॥ श्रीः ॥

॥ चन्द्रकलोदाहारः ॥

शिवदेव्यास्तपोमूर्त्तेर्मातुः पादाब्जजन्मनः ।
पितुः श्रीहरिविश्वनाथस्य कर्णांश्चेह्यादरान् मुहुः ॥ १ ॥
ख्याते घटोद्भवकुले बुधलक्ष्मणाख्यः विप्रः सनाढ्यकुलजो दृढधर्मनिष्ठः ॥
पुण्यप्रयागपरिवेणपूर्तपूर्वोऽपूर्वस्तपस्तनुरभूदुचितैकचित्तः ॥ १ ॥
तत्पुण्यपुञ्जपरिपाकसुपूर्त्तिदक्षस्तत्सूनुराविरभवद्भवदेवमिश्रः ।
यो मानवासुकरकार्यगणैर्मनुष्यदेहोऽपि सूक्ष्ममतिभिर्भव एव मेने ॥ २ ॥
क्रीडोचिते वयसि काशिनिवासमेव तातं पुनः पुनरयाचत मातरं सः ।
[illegible]चमनुजन्मतुरात्मनोऽपि श्रेयस्करीं समवलोक्य महेशसेवाम् ॥ ३ ॥
संप्रा[illegible]भ्भुनगरे पितृमातृपार्श्वे कालं कियन्तमतिवाह्य परेशभावम् ।
संप्राप्तयोरथ तयोरुचितं विधाय कृत्यं ततोऽभवदसावनृणोऽद्वितीयः ॥ ४ ॥
काले कियत्यथ गते मणिकर्णिकायां स्नात्वा व्रजन् पथिपिशङ्गजटा विभूतीः ।
[illegible]भाव्यमपि धारयता द्विजेन वर्षीयसा कुलभवादिकमेष पृष्टः ॥ ५ ॥
दिव्याकृतिं शिवसमं पुरुषं समीक्ष्य सम्यक् स्वकीयकुलगोत्रभवादिवृत्तम् ।
मूर्ध्ना प्रणम्य विनिवेदयति स्म तस्मै पित्रोर्वियोगकथने ववसन्नकण्ठः ॥ ६ ॥
हृद्यस्तु पूर्णमधिकारमथास्य वाक्येऽप्यालोच्य चिज्जडविवेचनचारुमन्त्रम् ।
दत्वैष यावदुपसीदति सद्गुरुं तंतावत्तिरोहिततनुर्भवति स्म तस्मै ॥ ७ ॥
ततः [illegible]त्येष समस्तवस्तुज्ञाता बभूवेति न तत्र चित्रम् ।
सर्वे महान्तो महिमानमात्मामन्त्रप्रभावादिति हि प्रसिद्धम् ॥ ८ ॥

विद्वद्भ्यः स्वर्णभारान् ददतुलबलो दक्षिणाग्रामहेन्द्रो
द्रव्यं दत्वाऽपि यस्मै कनकमणिचयं पेशवा माधवाख्यः ॥
यद्विद्याबुद्धिपूजाकरणमलमदः स्वीयकोशेऽनवाप्य ।
मूर्ध्नावाह स्वदत्तां मणिमयशिविकां यस्य भूदेवमौलिः ॥ ९ ॥

श्रीः

अथ श्रीमद्दामहोपाध्यायश्रीभैरवमिश्रसंगृहीता

शब्देन्दुशेखरटीका चन्द्रकला ॥

॥ श्रीगणेशाय नमः ॥

सीताचर्चितपादपद्मयुगलं ध्यात्वाद्वितीयं विभुं
मुद्रां ज्ञानमयीमभीष्टवरदं हस्ताम्बुजं जानुनि ॥
कुर्वे चन्द्रकलां शिवां शिशुहितां टीकामजं राघवं
सुग्रीवाङ्गदमारुतिप्रभृतिभिः संस्तूयमानम्परम् ॥ १ ॥
शब्देन्दुशेखरसेव्यं टीका चन्द्रकलाभिधा ।
रच्यते भैरवेणात्र क्षमध्वन्दयया बुधाः ॥ २ ॥
मान्यान् प्रणम्य विघ्नशिं करोमि यदिदं वचः ।
दूष्यं विचार्य्य मात्सर्यं विहाय विबुधाः परम् ॥ ३ ॥

धीमत्त्वे हेतुभूतानर्थान् स्वीयग्रन्थे शिवसादृश्यं स्वसा कुलशुद्धत्वञ्च व्यञ्जनया शब्दतो वा दर्शयन् विघ्नविघाताय कृतमङ्गलं शिष्यशिक्षायै निबध्नाति । पातञ्जल इत्यादिना । प्रथमं पातञ्जलशब्दोपादानं बलवत्तरमङ्गलाय, महाभाष्यमाचोक्तौ शारीरकसूत्रभाष्यस्यापि बोधस्यादतः पातञ्जलपदम् । तावन्माधोक्तौ चरकेतिव्याप्तिरतो महाभाष्येति । महत्पदानुपादाने पतञ्जलिप्रणीतसूत्रसम्बन्धिभाष्ये व्यासकृतेप्यतिव्याप्तिरतो महत्पदम् । न च पातञ्जलपदस्य प्रोक्तार्थाणस्ततया तदभेदस्य व्यासकृते विरहान्नातिव्याप्तिरिति वाच्यम् । इष्टिघटितत्वादिरूपमहत्त्वस्य भाष्यान्तरे विरहादनेनैव सकलातिप्रसङ्गनिरासे पातञ्जलपदमत्र योगभाष्यसङ्ग्रहार्थमेवेत्याशयात् । विनापि चकारमहरहर्नयमानो गमखम्युरुषम्यशमित्यत्र समुच्चयस्य दृष्टत्वात् । एतेन शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पातञ्जलसूत्रमादाय वक्ष्यमाणं सिद्धान्तार्थकथनमसङ्गतं पातञ्जलभाष्यार्थानवबोधादिति शङ्काया नावकाश इति सूचितम् । कृतभूरिप-

तस्याङ्गजो निखिलनव्यनिबन्धवार्द्धेः सेतून् व्यधात् सुविहृतीर्विपुलाविपश्चित्।
विद्याविवेकविनियैरपि ततत्तुल्यसीतात्मजोऽपि भुवि भैरवमिश्रनामा ॥१०॥

मञ्जूषां भूषणं यो व्यहृणुत गहनं कौस्तुभं शब्दरत्नं
भाष्यं सोद्योतदीपं प्रतिपदमखिलोम् शेखरद्वन्द्व मन्यान्।
ग्रन्थाञ् श्रीविक्रमस्योदभवदगमदब्दे एकोनविंशे
शिष्यानध्याप्य भट्टान् व्यतनुत शतकेऽशीतिवर्षाऽधिकायुः ॥ ११ ॥

रसगोनागभू १८९६ संख्ये विक्रमार्कस्य वत्सरे।
श्रावणस्य चयोदश्यां कृष्णायां सोऽत्यजत्तनुम् ॥ १२ ॥

यद्यप्यनेकबुधनिर्मित सन्निबन्धाः सन्त्येव ते तु न तथा विदुषामभीष्टाः।
श्रीमिश्रभैरवकृताः क्षुद्रिकौशलेन पुस्येन चास्य शिरसा विधृताः सुधीभिः॥ १३
दृष्ट्वाऽपि कांश्चन तदीयकृतैर्विशेषाञ् शेषावलोकनधियः सुधियः प्रयत्नात्।
तत्पुस्तकानि विरलान्यनवाप्य नूनं क्लिश्यन्ति खिन्नमनसो मनसोऽनुरोधैः॥ १४॥
इत्यादि सम्यगवधार्य गणेशदत्तो धीमान् प्रपौत्र उदितस्य निबन्धकर्त्तुः।
सर्वान् क्रमेण निजवंश्यकृतान्निबन्धान् संमुद्रा लोकमपशोकयितुं प्रवृत्तः॥ १५॥
पूर्वं स तद्विहृतिमिन्दुकलाभिधानां शब्देन्दुशेखरशिरोविधृतां जनानाम्।
दुर्गासरःपरिसरस्थितकाशिकाख्ये यन्त्रेऽवरोप्य सकलां मुदमादधाति ॥ १६ ॥
ग्रन्थप्रणेतृकरशोधनलेखनादिसंपूज्यपुस्तकमवेक्ष्य विशोधितेऽस्मिन्।
दृष्टिच्युतेर्मतिगतिस्खलनादिना वा यास्ताश्चुतीरपि विशोध्य पठन्तु सन्तः॥ १७
श्रीमिश्रभैरवविनिर्मितकार्यवर्ज्या संग्राहकाभिधनिबन्धधृतान् मनोज्ञान्।
श्लोकान् समीक्ष्यगुरुवृन्दमुखाच्च किं चिदासाद्य यल्लिखितमस्तु शिवार्पणं तत्॥ १८॥

नत्वा मनीषिचरणाम्बुजबुद्धिशुद्धैरभ्यर्चितमेव विनिवेदयतीतिवृत्तम्।
काशीस्थकुम्भजनिपत्तनसन्निवासी विप्रो
द्विवेदकुलसंभवरामनाथः ॥ १९ ॥



रिश्रम इति। सापेक्षत्वेपि गमकत्वात्समासः। न च चैत्रस्य गुरुकुलमित्यत्रैव नित्यसापेक्षत्वादेव न दोष इति वाच्यम्। नित्यसापेक्षत्वाभावेपि सङ्गाढ़कमाषणीयानाङ्गिमोदनः शालीनामित्यादौ समासदर्शनेन गमकत्वस्यैव प्रयोजकत्वात्। गमकत्वं च विग्रहवाक्यजन्यशाब्दबोधसमानप्रकारकशाब्दबोधप्रयोजकत्वमेव। कृतभूरिपरिश्रम इत्यनेन पातञ्जलमहाभाष्यप्रभावादेव सर्वतन्त्रार्थज्ञानजननबोधनेनान्यत्र परिश्रमाभावो ध्वनितः। पिठकीत्यर्थन्तन्नामोल्लिखति। शिवभट्टसुत इति। धीमान्। ऊहापोहकुशलः। एतेन स्वस्य विवेचकत्वं ध्वनितम्। सतीदेव्या इति। संज्ञा सतीति भाषितपुंस्कत्वाभावान्न पुंवद्भावः। न च संज्ञापूरण्योश्चेतिसूत्रेण संज्ञाया पुंवत्त्वनिषेधसामर्थ्याद्भाषितपुंस्कत्वन्त्यास्तीति वाच्यम्। योगरूढस्य दत्तादिशब्दस्य तत्र ग्रहणात्। देवीत्युपादानं तदन्तन्नामेतिसूचनाय। सतीं दीव्यति पातिव्रत्येन जिगीषतीति वा। दुष्टान्नभक्षणे बुद्धिमान्द्यसम्भवात्कथं धीमत्त्वमत आह। याचकानामित्यादि। त्रिभेदरूपकद्वयम्। अरिकक्षेति। अरय एव कक्षाः शुष्ककाननं तत्र हुताशनः। एतेन महाशूरत्वमपि ध्वनितम्। रामतः। रामसिंहनामकक्षत्रियात्। नागेश इति। एतेन व्याकरणसिद्धान्तज्ञानवत्त्वं सूचितम्। ननु मनोरमयैव मूलार्थज्ञानसम्भवात्प्रयासवैयर्थ्यमत आह। मनोरमोमार्ज्जदेहमिति। एतेन तदुक्तानामर्थानां प्रायः कथनाभावो ध्वनितः। लघुशब्देन्दुशेखरमिति। शब्द इवेन्दुः शब्देन्दुः। लघुश्चासौ शब्देन्दुश्च लघुशब्देन्दुः कर्मधारयसमासः स शेखरे यस्य। यद्वा लघवः शब्दा यस्मिन्स लघुशब्दः स इन्दुः शेखर इवेत्यर्थः। शब्दो व्याकरणाभिव्यङ्ग्यः। स इन्दुरिव शब्देन्दुः। तस्मिन्निन्दुतादात्म्यमर्थप्रकाशकत्वेन दोषरहितत्वेन वा विवक्षितम्। स एव शेखरः शिरोभूषणं यस्येति वा। न चेन्दुसादृश्यादेवार्थप्रकाशकत्वे लब्धे र्थप्रकाशकमित्यस्य पृथग्भूतस्योपादानं व्यर्थमिति वाच्यम्। मनोरमादिना यादृशार्थप्रकाशो न तस्यापि प्रकाशकमित्यर्थात्। ग्रन्थप्रचारादीति। आदिना तदध्येतव्याख्यातॄणां श्रद्धातिशयादिपरिग्रहः। समुचितेति। त्रयाणामपि शास्त्रप्रणेतृत्वात्। अनुषङ्गत इति। कृत्या इवान्यार्थं कृतस्यानुद्देश्यफलप्रयोजकत्वात्। नमःस्वस्तीति चतुर्थीमाशङ्क्याह। कारकविभक्तेरिति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीतिन्यायादित्यर्थः। क्रधातूपस्थाप्यक्रिया-

निरूपितकर्मत्वात् केवलनमःशब्दयोगे चतुर्थीविधानं चरितार्थम्। इदमस्तु संनिकृष्टमित्यभियुक्तवचनेन सन्निकृष्टस्यैवेदमा परामर्शो युक्तः, कौमुद्यास्तु सिद्धत्वाभावादेतदनुपपन्नमत आह। भाविन इति। यथा भाविघटविषयेच घटो भविष्यतीति व्यवहारस्तथेयमिति निर्देशः, सत्कार्यवादसिद्धान्ताश्रयेण वा इयमितिनिर्देश इति भावः। स्त्रीलिङ्गनिर्देशोपि ग्रन्थे उपमानकौमुदीगतलिङ्गस्यारोपेणोपपद्यत एव। बुद्धिसत्तासमाविष्टस्य शब्दबोधविषयत्वमितिसिद्धान्त इति भावः। कौमुदीसादृश्यप्रयोजकधर्ममाह। सिद्धान्तेति। अत्रोपमालङ्कारो व्यङ्ग्यः। संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोधिकारश्च षड्विधं सूत्रलक्षणमिति प्राचीनपठितसूत्रलक्षणेषु यस्य सत्त्वं तदाह। एषामिति। क्रमबोधकत्वेपीति। अत्र क्रमपदमर्थ्यादाद्यजन्तम्। क्रमेण बोधकत्वेपीति वार्थः। एतेन क्रमे शक्त्यभावेन क्रमबोधकत्वेपीत्यनुपपन्नमित्यपास्तम्। एषां क्रमेण बोधकत्वादेव यमां यमीतियथासङ्ख्यविज्ञानसंज्ञेणादिप्रत्याहारे उकारादिग्रहणस्य च सिद्धिः। वृत्तिपरिच्छेदकत्वञ्च शक्तिग्राहकत्वम्। ननु वृत्तिपरिच्छेदकत्वन्न संज्ञासूत्रत्वसाधकम् कर्तरि क्तादितादौ व्यभिचारात्, आदिरन्त्येन सहेतिसूत्रैकवाक्यतापन्नत्वे सति वृत्तिपरिच्छेदकत्वमपि न, क्त्वानुप्रयुज्यते इतिसूत्रघटकक्त्वप्रत्ययादिरन्त्ये नेत्येतदेकवाक्यतया शक्तिग्राहकत्वेपि संज्ञासूत्रत्वाव्यवहारात्, उक्तहेतोर्द्विरादेर्जित्यादावसत्त्वेन संज्ञासूत्रसामान्याद्वृत्तितया परिभाषाद्यन्यतमभिन्नत्वविशिष्टसूत्रत्वरूपपत्तावच्छेदकाव्यापकतया स्वरूपासिद्धत्वाच्चेति चेन्न। संज्ञास्वरूपावच्छिन्नशक्तिग्राहकत्वमात्रस्यैव हेतुत्वात्। तादृशहेतोः पञ्चेष्वेषु सूत्रेषु सत्त्वमादिरन्त्येनेतिसूत्रैकवाक्यतयेतिसूत्रयितुमादिरन्त्येनेत्यतदेकवाक्यतयेतिलतीयान्तोक्ते खः। एकस्योभयार्थत्वमत्राविरुद्धमित्याह। क्रमस्येति। इता सहेत्येनेति। अयमाशयः। प्रत्याहारानुबन्धानाङ्क्यमज्ग्रहणेषु नेति पूर्वपक्षे, आचारादप्रधानत्वान्नोपस्थ बलवत्तर इत्युत्तरोक्तरीत्यान्त्येनेता सहोच्चारणासम्भवेनेत्यदस्येत्सङ्ज्ञे लक्षणाया आवश्यकत्वात्। प्रसङ्गादाह। स्त्रीजक्षित्यादि। आदिना तिप्तस्झीत्यस्य क्त्वानुप्रयुज्यते इतस्य च सङ्ग्रहः। एतेषु सन्धिकार्यमाशङ्क्याह। एष्विति। अनुकरणत्वेनेति। अनुकार्यानुकरणयोरभेदविवक्षायामितार्थः। भेदविवक्षायान्त्वाह। सौचत्वाच्चेति। अयमाशयः। यदानु-

कार्यानुकरणयोरभेदविवक्षापक्षस्तदा शब्दजन्यशाब्दबोधे प्रकारतया यदनुकरणभानं तदेवानुकार्यस्यापि भानं भेदाभावादिति नानुकार्ये शक्तिरितप्रनुकरणशब्दस्य वृत्त्यर्थबोधकत्वरूपार्थवत्त्वाभावात्प्रातिपदिकत्वाभावेन विभक्त्यनुत्पत्तिः। वस्तुतस्त्वभेदो निरूपयितुमशक्यः । पटदितप्रादिध्वन्यनुकरणस्थलेनुकार्यस्य ध्वनिमयत्वादनुकरणस्य वर्णमयत्वाद्विरुद्धधर्मयोरेकत्रासमावेशात् । घटपटादिशब्दानुकरणस्थलेप्यर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यां भेदस्य न्याय्यत्वात् । न च तयोर्भेदेनुकार्योपस्थितिप्रयोजिका तत्र वृत्तिरूपेयेति प्रातिपदिकत्वमनुकरणस्य प्राप्नोतीति वाच्यम् । सादृश्यसम्बन्धेनोपस्थितस्याप्यनुकार्यस्य शाब्दबोधे व्युत्पत्तिवैचित्र्येण भानसम्भवात् । यदि वृत्त्यनुपस्थाप्यस्य शाब्दबोधे भानानङ्गीकारस्तदा तत्रानुकरणशक्तिसत्वेपि सौत्रतत्वाद्विभक्त्यभाव इति। न च संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षत इत्यनेन वाक्य एव संहिताया विवक्षाधीनत्वं बोधितम्, प्रकृते विभक्त्यभावेन वाक्यत्वस्यैवानुपपत्तिरिति वाच्यम् । यत्र कारकान्विता क्रिया प्रतीयते तत्रैवैतादृशवाक्यत्वाङ्गीकारात् । प्रकृते तु शक्तपदसमुदायस्य वाक्यपदेन ग्रहणम् यथा गवितप्रयमाहेतस्य वाक्यत्वात्समासग्रहणनिरर्थत्वोपपत्तिः । न चैतादृशवाक्यत्वस्य वाक्ये तु सेतप्रत्र ग्रहणे चक्रतुरितप्रत्र कदाचित्प्रयुक्तरहितप्रयोगोपि स्यादिति वाच्यम् । संहितैकपदे इत्यनेन तत्र संहिताया नित्यत्वबोधनात् । स्वरसन्धिस्तु न प्रवर्तते वर्णोपदेशकालेजादिसंज्ञानामनिष्पादादिति कैयटः कथितवान् तच्च कौस्तुभे मूलकारो वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे निष्पन्ने प्रवर्त्तमानानां यणादीनां सुध्युपास्य इत्यादौ तटस्थ इवोद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वादन्यथा तुल्यास्यप्रयत्नमित्यादौ सवर्णदीर्घो न स्यादिति रीत्या दूषितवांस्तदुद्धारः सिद्धान्तरत्नाकरे कृतस्तन्दूषयितुमुपन्यस्यति । यत्त्विति । अयम्भावः । अविकृताकारादिविषयतावच्छिष्टशक्तिज्ञानस्याद् गुणइत्यादिवाक्यजन्यशाब्दबोधहेतुतया तदुत्तरं तादृशविषयतावच्छिष्टशक्तिग्रहासम्भव इति । एतद् दूषयति । तन्न पुनरित्यादिना । अर्थान्तरे विकृताकारादौ सम्बन्धे सतीति शेषः। व्याख्यानत इति । शिष्टकृतादित्यादिः । पाणिनिपाठितप्राथमिकशिष्यज्ञानपरम्परया निर्णयसम्भवादिति भावः ।

समाम्नाय इति व्यवहार इति। अस्य भाष्ये कृत इत्यादिः। अस्यैव वेदाङ्गत्वमिति एवकारेणेतरव्याकरणानां व्यवच्छेदो न त्वङ्गानाम् सजातीयत्वात् । नन्वेषां महेश्वरप्रसादलब्धत्वे लण्सूत्रे आचार्यप्रवृत्तिरित्यत्राचार्येत्यसङ्गतमाचार्यपदेन तत्रतत्र पाणिनेर्व्यवहारादत आह । लण्सूत्रे णकारविषयेति। नन्वनुबन्धानां पाणिनिकर्तृकतया कथमत्रेश्वरग्रहणमत आह । अनुबन्धाश्चेति । अनुपदम् । नृत्तावसान इत्यादिना । नन्वनुबन्धानां महेश्वरकृततवे अमङ्णनमित्यत्र मकारप्रत्याख्यानपरभाष्यविरोध इत्यत आह । अमङ्णनमित्यत्रेति । एवम्परम् । एवं विचारपूर्वकमुद्घाट्टार्थत्वप्रतिपादनपरम् । इकोयणचीतिसूत्र इति । तत्सूत्रस्थभाष्य इत्यर्थः।सामर्थ्ययोगादिति ल्यब्लोप इति पञ्चमी फलजननसामर्थ्ययुक्तं विहायेत्यर्थः । तच्च फलं बहुषु दृष्टादृष्टोभयम् । क्व चिच्छ्रुद्घाट्टमेव । ननु नाज्झलावित्यादिसूत्रप्रत्याख्यानपरभाष्यासङ्गतिः। वृद्धिसूत्रभाष्ये प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेणेत्युक्तत्वादत आह । वृद्धिसूत्रस्थ इति । अत एव । वर्णसमाम्नायस्य श्रुतित्वादेव । प्रतिमण्डित इति । शोभित इत्यर्थः । ननाद । अन्तर्भावितण्यर्थतया नादयामासेत्यर्थकम् । एतत् । ढक्कानादरूपं शिवसूत्रजालं चतुर्दशसूत्रीरूपेण परिणतं बभूवेति शेषः । इतोऽतद्विमर्शे विचारयामि आर्षमेतत् । अथ वा सप्तम्यन्तमेतत्, विमर्शे विचारे कृते सति । प्रतीम इति सर्वशेषः । एतेन मृशसेः परस्मैपदित्वाद्घञत्ययेनात्मनेपदेष्युत्तमपुरुषैकवचनस्य टो ङित्त्वाद् गुणानुपपत्तिः । सर्वकार्यार्थे क्रान्दसत्वकल्पने गौरवमिति परास्तम्। अत्र सर्वत्रेति । ढक्कानादरूपसूत्रेष्वित्यर्थः । अन्त्यं वर्णचतुर्दशमिति । वर्णानाञ्चतुर्दशमितिसमासः । चतुर्दशत्वञ्च चतुर्दशसङ्ख्यापूरकत्वं तच्च सर्वेषामस्ति । यथा भाष्ये यदा समर्थः पदविधिरित्येषोध्यायश्चरमं गण्यते तदा सोप्यष्टमो भवतीत्युक्तम् । क्व चित्तु अन्त्यवर्णचतुर्दशमिति पाठः। अन्त्या वर्णाश्चतुर्दश यस्मिन्नित्यर्थः । वर्णानामुपदेश इत्यत्रोपदेशशब्दो बोधनपरः । अक्षरच्छन्द इति । अक्षरबोधको वेद इत्यर्थः। वर्ण शइति । वीप्सायां शस्, वर्णंवर्णं समनुक्रान्तम् सम्यगनुक्रमेण दर्शितम् मयेतिशेषः । पूर्वोक्तं छन्दस्त्वं दृष्टान्तप्रदर्शनेन दृढ़यति । यथेति । पाणिनिकर्तृकत्वशङ्कां वारयति ।

अत एवेति। अन्यकर्तृकत्वादेवेत्यर्थः। एतेन पाणिनिकर्तृकशास्त्रबहिर्भूतत्वमस्य स्पष्टमेव लभ्यते, अत एव मङ्गलार्थमादितो वृद्धिशब्दं प्रयुङ्क्त इति भाष्यं सङ्गच्छते। एतच्चोपपादितमिति। एतेषां क्रमबोधकत्वेपीत्यादिनेति शेषः। संज्ञाप्रयोजनमाह। संज्ञेति। रप्रतराहारिरिति। उरण् रपर इतिसूत्रनिर्दिष्टेति शेषः। कैयट इत्युक्तिसूचितामरुचिमप्रकाशयति। परे तिप्रतराहरिना। नन्वतो लृ ति सूत्रेपि रप्रतराहारनिर्देशे रदाभ्यां वनो र चेति सूत्रेपि रप्रतराहारग्रहणापत्तिरतस्तथा निर्देशो रप्रतराहारानित्यत्वज्ञापनार्थः। न च रदाभ्यामित्यत्र फञाभाव इति वाच्यम्। प्रफुल्लतमित्यत्र नत्वापत्तेः सुवचत्वात्। वनो र चेत्यत्र तु पक्षे लत्वप्राप्तिः स्फुटैवेति किञ्च प्रतराहारसिद्धिरित्थाधीना तच्चानुनासिकत्वप्रतिज्ञासमधिगम्यमित्यतो लृ तिसूत्रेनुवाद्यसमर्थकेतो लृ तिपदेनुनासिकत्वप्रतिज्ञाया अकल्पनेपि न क्षतिरित्यरुचेराह। किञ्चास्येति। यशब्दशक्तिग्रहश्च रशब्देनैव पाणिनीयव्यवहाराज्ञविष्यतीति भावः। नन्वतो लृ तिसूत्रे लकारोच्चारणेनानुनासिकमजनुबन्धमादाय प्रतराहारः क्वचिदेवेति कल्प्यते। अत एव रात्सस्य योचीत्यादौ न दोषः। यण्ग्रहे णकारोच्चारणञ्च चरितार्थमित्यरुचेराह। किञ्चानुबन्धेति। अत्राच्प्रतराहार इताज्वटितपाठः प्रतराहारेनुबन्धानामित्यस्य सूत्रचतुष्टयानन्तरं पाठेन भाष्यकृतोपन्यासात् कृतः। वस्तुतस्त्वइउणित्यादिसूत्रघटकानुबन्धानां तत्तद्व्यक्तित्वेन पञ्चत्वे पञ्चतावच्छेदकानां नानात्वापत्तिरतोनुबन्धपदव्यवहारविषयतात्वावच्छिन्नविषयता पञ्चतावच्छेदिका बोध्या। प्रतराहारघटकत्वाभावः साध्यः। आचारादिति हेतुः। अत्राचारः पाणिनेः कृतिरेव। न चाचार्यकृतेः पक्षे समवायेनाश्रयत्वात् स्वरूपासिद्धिरिति वाच्यम्। तादृशकृतेः स्वसाध्यप्रतराहारप्रयोज्यकार्यजनकत्वसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्त्वसम्बन्धेन हेतुत्वात्। सुधुरपास्य इतत्रेकारेत्वसाध्ययण्रूपकार्यजनकत्वसम्बन्धेन स्थितायाः कृतेस्तत्सम्बन्धावच्छिन्नाभाववत्तुषिमृषिकृषेरितिसूत्रघटके कृषिशब्दावयवककारेनुबन्धसदृशेस्तीतिहेतोः पक्षसत्त्वोपपत्तेः। इत्थनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे हेतुतावच्छेदकसम्बन्धासिद्धिरिति हेत्वन्तरमाह। अप्रधानत्वादिति। अत्र प्रधानत्वं प्रतराहारग्रहणफलकमहेश्वराभिप्रायविषयत्वम्। तदभावः स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको हेतुः। हेत्वन्तरमाह।

लोपश्च बलवत्तर इति।लोपस्य बलवत्त्वञ्चप्रत्याहारसिद्धिप्राक्कालिकप्राप्तिकर्तृत्वम्। बलवत्तरलोपप्रतियोगित्वं हेतुरिति फलितम्।तृतीयहेतोरव्यापकत्वापत्तिरिति।न चहेतोः साध्यव्याप्यत्वमेवानुमापकत्वप्रयोजकन्न तु व्यापकत्वमितियतदसङ्गतमिति वाच्यम्।पक्षतावच्छेदकाव्यापकत्वापत्तिरित्यर्थात् । पक्षतावच्छेदकावच्छेदेनानुमितौ हेतौ पक्षतावच्छेदकव्यापकत्वावगाहिपरामर्शस्यैव हेतुत्वादिति भावः।तदेतदुपपादयिष्यति।तवेत्यादि।मत इति शेषः।एतदुपपादनमिति।संज्ञालोपयोरभावेनेत्यन्तेन। ननु एवमपि यस्यानुनासिकत्वं तस्य लक्ष्ये असत्त्वादेव न दोष इत्यत आह।प्रत्याहारेष्विति।अत एव सर्वतकाराणां झल्पदबोध्यत्वोपपत्तिः। अनुनासिकत्वसमानाधिकरणजातिविवक्षायामप्याह । मामांस्यायस्वेति अनितेः क्विबन्तस्यानितिसम्बुद्ध्यन्तम्। ननु तर्हि ह्रस्वत्वविशिष्टजातिनिर्देश एवास्तामत आह। सोस्तीति। ननु यण्वटितसूत्रे ष्वित्यादिनोपपादितलाघवन्न सार्वत्रिकम् । इणो यण् इग्यण इत्यादौ तदभावात्,किञ्च को यणचीतिसूत्रे यप्रत्याहारेण निर्देशे प्रक्रियागौरवम् क्वचिन्माचालाघवसत्त्वेपि जातेरस्त्रीविषयादयोपधात् ङेर्य्यः योचीत्यादीनां विषयविभागानुपपत्तिः, तथासति जातेरितिसूत्रे प्रत्याहारग्रहणे महाशूद्रीत्यत्र ङीषभावापत्तिः । ङेर्य इत्यत्र प्रत्याहारनिर्देशे वकारादेरप्यादेशत्वप्रसङ्गः । एवं योचीत्यत्राप्यनिष्टं बोध्यम् । एवञ्च तृतीयहेतोरव्यापकत्वापत्तिरित्यसङ्गतम् । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वादिति चेन्न । उदात्तस्वरितयोः संयोगादेरातः उदात्तयणोहल्पूर्वादित्यादौ लाघवाय प्रत्याहारेणैव निर्दिशेदित्याशयात्। यत्र तु न लाघवं तत्रान्यार्थं लणित्यत्र कृतेन णकारानुबन्धेनैव निर्देशोस्तु । जातेरितिसूत्रे प्रत्याहारग्रहणन्तु न शङ्कास्पदम् । गाङ्टशप्रत्याहारग्रहणस्य भाष्येदर्शनात्। कष्टायेतिनिर्देशस्यैव सत्त्वान्न ङेर्य इत्यत्रापि तथाशङ्का। योचीत्यत्रापि न प्रत्याहारसम्भावना पूर्वोत्तरसूत्रयोः प्रत्याहारबोध्याविधायकतयात्रापि तत्साहचर्येण तथाकल्पनात्,पक्षतावच्छेदकसामानाधिकरण्येनेत्यपि तु न शङ्कास्पदमपि अदुणितयादिसूत्रचतुष्टयनिर्दिष्टानामनुबन्धनामुक्तानुगतधर्मपुरस्कारेणैव पक्षतयावच्छेदकावच्छेदेनैव साध्यसिद्धेर्भाष्याभिप्रेतत्वात्। न च सोस्यादिरिति निर्देशेनाकारे सुलोपाभावज्ञापनात्सोस्तीत्य-

सेकत्वाभावकल्पने लाघवसम्भवात्,अत एवाऽण् सूत्राकारस्यानिर्ज्ञकत्वादे-
त्याहार इति।व्याख्यातमेतत् । न हल्प्रत्याहार इति। अन्यथा अकारानुबन्धस्य
ातीयत्वात्तस्यापि हल्प्रत्याहारे ग्रहणशङ्कासमाधानयोः कर्तुमुचितत्वादिति
ाः। टग्रहणस्यापत्तिरिति। तथा च रामष्टीकत इत्यादौ हशि चेतुरत्वापत्तिःपु-
नरकारोच्चारणेनेति । न चाकारोच्चारणाभावे व्यञ्जनोच्चारणासम्भव इति वा-
ग्।ह्यादिवर्णानां संयुक्तानामुच्चारणसम्भवात् । तद्घटितेति। उच्चारणार्थावर्ण-
इतहल्घटितेत्यर्थः । न च को यष्टिकष्टीकत इत्यादिकविप्रयोगदर्शनात्तद्विष-
योगाणामदर्शनादित्यनुपपन्नमिति वाच्यम्। तं पातयाम्यथममास करेण पश्चा-
त्यादिमहाकविप्रयोगतुल्ययोगक्षेमत्वात् । उपसंहरति । तस्मादिति । अस्य ल-
सूत्रस्याकारस्य। न चोच्चारणार्थानामित्संज्ञाया वक्ष्यमाणत्वादिदमसङ्गतमिति
यम् । हकारादिस्थाकारवदस्याप्युच्चारणमात्रफलकत्वान्निर्हत्यभावेपि च्छत्र-
वात् प्रत्याहारे हकारादिघटिते ग्रहणापत्तिस्तु न । पुनःपुनरुच्चारणात् । अ-
ानत्वाद्वा।तदेतद्दर्शयति।न पुनरन्तरेणाचमित्यादिना।न विभक्तावित्यादेरिति ।
दिनाजादिपदघटितविधिसूत्राणाम्परामर्शः ।। अन्योन्याश्रयाभावाय शङ्कते ।
ेति । रुप्रभृताविति । रुशब्द इति निर्दिष्टधातुप्रभृतिष्वित्यर्थः । अशोक-
नकान्यायेनैतदुक्तिः । अनुनासिकश्चेद्दिग्भवति तर्ह्यजेवेति विपरीतनिय-
शङ्कां वारयति।मिदचोन्त्यादितीति।अस्यादोषत्वादिति । अपाणिनीयत्व-
दोषत्वादित्यर्थः । अत्रैव भाष्यसम्मतिमाह । सूत्रभेदमिति । उपाचरन्ति
ीयन्ति । तदेव तदर्थकमेव । भूयः । तदपेक्षयाधिकम् । तदाशयः । पूर्वपक्षाश-
। राजान्नास्तीति । एवञ्च पूर्वोक्तव्याख्याने गौरवमिति भावः। कस्यचिन्मतन्दू-
यति।न चेति। अत्र सहेताशब्द उद्देश्यबोधकः । एवञ्च सहेता मध्यमो वर्णः। अ-
ि न सहितो य आदिस्तदभिन्न इति वाक्यार्थः। अत्र सहेताशब्दो योगरूढ़ः। सह
ापत् एति बुद्धिविषयो भवतीत्यर्थः,मध्यम इति रूढ्यर्थप्रदर्शनम् । मतं खण्ड-
ते। अन्योन्याश्रयेत्यादिना।अत्र इण् गतावित्यतश्चेत्यपपाठः । एतेधतूरठस्खि-
ङ्गत्वापत्तेः।एतद्वि वाध्यसामान्यचिन्तया पररूपमात्रस्य बाधकमत एवावैहीति
ेघटितस्य तेन साधुत्वमुक्तम्,तच्च बाध्यविशेषचिन्तामाश्रित्य दीक्षितैर्दूषित-

नम्। एवञ्च योगरूढिसद्भावे मानाभाव इति भावः। अत्र भाष्यमपि साधकमित्याह। भाष्ये पेतिकैयटोक्तं भाष्यव्याख्यानं दूषयति। इहसमीप इत्यादिना। इतूरङ्गमिति। सामीप्यस्य षष्ठ्यर्थत्वाभाव इत्यपि बोध्यम्। नन्वेवमिति। पूर्वोक्तान्योन्याश्रयपरिहारेति। अभावज्ञाने प्रतियोगिज्ञानस्येवेति। विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वादिति भावः। ननु पूर्वं ह्यपवादा इति भाष्योक्त्यापवादवाक्यार्थज्ञानस्य कारणतां ब्रूम इत्यत आह। पूर्वमिति। अपवादशास्त्रपर्यालोचनेन, अपवादशास्त्रार्थबोधेनेत्यर्थः। तदविषयमिति। अपवादशास्त्राविषयमित्यर्थः। एतेन लक्ष्यसंस्कारे क्रमापेक्षा न तु वाक्यार्थबोध इति भावः। यत्त्विति। यथा न सम्प्रसारणे सम्प्रसारणमित्यपवादशास्त्रप्रवृत्तिः स्वयोग्यविषये भवति तथा परिचिन्त्य पूर्वमुत्सर्गः श्वयुवेत्यादिः प्रवर्त्तत इत्यर्थः, एतेनान्यस्य सम्प्रसारणमिति फलितम्। एतत्कैयटोक्तव्याख्यां खण्डयति। तन्नेति। भाष्यविरोधमुपपादयति। न ह्रीति। न्यायेन। पूर्वं ह्रीति न्यायेन। पूर्वोद्दिष्टान्योन्याश्रयासम्भवमुपपादयति। न विभक्ताविति। पदार्थज्ञानमात्रेणेति। मात्रपदेन वाक्यार्थज्ञानव्यवच्छेदः। अत्रापीति। आहत्तइलन्त्यमिति सूत्र इत्यर्थः। आदिरिति किमिति। अन्त्यपदेन तल्लाभः सम्भवतीति भावः। न चास्मिन्नस्य शाब्दबोधविषयत्वं पदानुपस्थितत्वान्न सम्भवतीति वाच्यम्। प्रविश पिण्डीमित्यत्रेव सम्भवात्। आदेरेवाक्षेप इत्यत्र मानाभाव इत्युत्तराभिप्रायः। अन्यतरानुपादाने इदन्यसहितः पूर्वः परसहित आदिरित्यपि सम्भाव्येत। स्वरूपमित्यनुवृत्तिपरव्याख्यानं निष्प्रयोजनमित्याशयेनाह। अत्रादन्तेति। प्रत्याहारप्रसङ्गादाह। अचिश्नुधातुभ्रुवांय्वोरियङुवङावित्यत्र। पूर्वनिपातापत्तेरिति। विशेषणत्वात्। सूत्रकारशैलीसिद्धत्वादिति। प्रायोवादोयम्, अमृक्त एकाल् निपात एकाच् इत्यादौ समासदर्शनात्। अत एवेति। समुदायान्त्यग्रहणादेव। इत्संज्ञापरित्राणमिति। इत्संज्ञायाः परित्राणमित्यर्थः। मुम्नुमेतिपञ्चम्यन्तपूर्वपदकः समासः। तत्सिद्धिरिति। इत्संज्ञासिद्धिरित्यर्थः। अत्रादयोच्चारणकाले विद्यमानस्यापि णकारस्येत्संज्ञाविधायकशास्त्रजन्यवाक्यार्थबोधान्न प्राप्तिरिति भावः। अन्यत्र सनादिप्रत्ययावयवनादौ। पदार्थोपस्थितिरिति। अनुबन्धविनिर्मुक्तस्यैव पदार्थस्योपस्थितिरित्यर्थः। चैचस्य गुरुकुलमित्यत्र सापेक्षत्वेपि समासः। एतादृशे विषये प्रायःपदं जतःगोत्यादिस्थले नि-

लम्बे नैव सेति सूचनाय। यद्यपि नाज्झलाविति सूत्रे उत्तरत्वमात्रमुक्तम्, तथापि तदव्यवहितत्वसहितं ज्ञेयमधिककालव्यवायसाधकाभावात्। ननु तदुपस्थाप्ये चेदित्कार्यं तदा वैयाकरण इत्यत्र चिदुपस्थाप्यैकारस्य चित्कार्यप्रसङ्गेत आह। वैयाकरण इति। नन्वनुबन्धविनिर्मुक्तस्य पदार्थस्योपस्थितिस्वीकारे सुब्विषयेन्तरङ्गत्वादित्संज्ञा स्यादेवञ्च जसादावित्संज्ञायां लोपे च कृते जकारमात्रस्य विभक्तिसंज्ञाप्रसङ्गः, न विभक्ताविति सूत्रस्य प्राग्दिशीये चारितार्थ्यादत आह। विभक्त्यादिसंज्ञापीति। आदिना प्रत्ययादिसंज्ञापरिग्रहः। अत्रार्थे भाष्यसम्मतिमाह। अत एवेति। अनुबन्धविनिर्मुक्तोपस्थितिस्वीकारादेव। तत्सूत्रभाष्ये अप्रत्यय इति किमर्थम्। सनाद्यंसभित्र उः। अत्यल्पमिदमुच्यते। अप्रत्ययादेशटित्किन्नित इति वक्तव्यमित्युक्त्वा, आदेशोदाहरणमिदमङ्गित्युपपन्नस्तम्, न चानुबन्धविनिर्मुक्तपदार्थोपस्थितिस्वीकारे णित् कर्मण्यण्सूत्रघटकः सन्प्रत्ययो यश्चैतदुपस्थाप्यः प्रयोगस्थः प्रत्ययो न स णिदिति कुभकार इत्यादिरूपासिद्धिरिति वाच्यम्। यथा द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या भ्रमरपदस्य द्विरेफपदव्यवहार्यत्वेपि शब्दार्थयोस्तादात्म्यान्मधुव्रतेपि द्विरेफपदप्रवृत्तिस्तथोपस्थापकस्य सूत्रघटकस्य णित्त्वादुपस्थाप्येपि णित्त्वमित्याशयात्। यद्यनुबन्धरहितस्य पदार्थस्योपस्थितिस्तदादेशस्यापि शकाररहितस्योपस्थितिः स्यात्तथा च शिदग्रहणस्य ज्ञापकत्वोपपादनपरभाष्यविरोध इत्यत आह। यत्त्विति। अनुबन्धप्रसङ्गादाह। अत्र के चिदित्यादि। अत्र, अनुबन्धविषये। एकान्तशब्दोवयववाची। तत्रावयववति, कदा चित् छेदनागन्तरम्, तत्रानुपलम्भात्, तथा च यस्यावयवित्वमभिप्रेतन्तत्र कदाप्यनुपलम्भेन नावयवत्वमिति भावः। तथा चानुबन्धा अवयवत्वाभाववन्तः, अवयवित्वाभिमतविषयितासमानाधिकरणविषयिताकत्वाभावादिति पर्यवसन्नम्। ननूपस्थापकस्यापि णित्त्वन्न स्यादन्त्यावयववाचकस्यान्त्यशब्दस्य तत्राप्रवृत्तौ हलन्त्यमिति सूत्रप्रवृत्त्यसम्भवादत आह। हलन्त्यमित्यत्रेति। अत्र पक्षे ज्ञापकमाह। अत एवेति। अनुबन्धानामनेकान्तत्वादेव। तत्राप्रिरिति। आदितश्चेत्यत्रापि समीपेवयवत्वारोपेणैव बहुव्रीह्युपपादनात्। सिद्धान्तमाह। परे त्वित्यादिना। नन्वनवयवत्वसाधकहेतोरुक्तत्वात्कथमवयवत्वमिति वाच्यम्। शास्त्रे तत्रोपलम्भादित्यनेनोक्तहेतोः स्वरूपासिद्धत्वोपपादनात्। तत्र, बोधके।

एवञ्च वाच्यवाचकयोस्तादात्म्याद्वाचकविषयितासामानाधिकरण्यस्यानुबन्धविषयितायां सत्त्वेन पक्षे हेतुतावच्छेदकावच्छिन्नाभावसत्त्वमक्षतमिति भावः। अन्यत्र बोध्यं। अनवयववैधर्म्यमाह। अनवयवो हीति। एकजातीयेति। संयोगेनेत्यर्थः। अनवयवत्वे बाधकमाह। किञ्चेति। दोषान्तरमाह। किञ्चेति। नन्ववयवत्वेभ्य आं अटित इत्यत्रोक्तप्रयोजनोपपत्त्यभावादुपदेशग्रहणमनर्थकमत आह। उपदेशेजितीति। स्पष्टार्थमिति। ननूत्तरसूत्रे णाग्निचिदित्यादौ तुक आगमेत्यत्रादौ चरितार्थत्वेन तत्राप्रवृत्त्यर्थमुपदेशग्रहणमस्त्विति चेन्न। वक्ष्यमाणरीत्योत्तरसूत्रेऽप्यस्यानावश्यकत्वात्। न चावयवत्वसाधनावसरे यदवयवत्वमभिप्रेतं तदन्यस्मिन्ननुपलम्भस्य हेतुत्वं सूचितं तच्चायुक्तम्। कर्मशब्दावयवककारस्य करणशब्दे उपलम्भादिति वाच्यम्। ककारव्यक्तिभेदेन यस्य ककारस्य कर्मशब्दावयवत्वन्तस्य करणशब्देसत्त्वात्। अनुबन्धविनिर्मुक्तस्य पदार्थत्वेनोपस्थितिरिति सिद्धान्ते विधिवाक्यस्य यादृग्बोधजनकत्वमुदाह। सर्वत्रेति। यत्त्वनवयवत्वपक्षे माङो व्यतीहार इति निर्देशो ज्ञापकः। लाघवं चात्र पक्षे यत एतत्पक्षे नानुबन्धकृतमनेजन्तत्वम् नानुबन्धकृतमसारूप्यन्नानुबन्धकृतमनेकाल्त्वमिति परिभाषाणामनारम्भादिति तन्न। दघ्नचश्चकारवैयर्थ्यापत्त्या एकान्तत्वपक्षस्यैव पाणिनिसम्मतत्वात्। उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति किं पुनरत्र न्याय्यमेकान्ता इतीव न्याय्यमिति भाष्योक्तेश्च। माङ इति निर्देशेन श्रूयमाणोऽप्यनुबन्ध एन्तजत्वाविघातक इति कल्पनात्। अनेकाल्शिदिति सूत्रे शिद्ग्रहणेनानुबन्धानामल्व्यवहारविषयत्वाभावकल्पनेन सर्वेष्टसिद्धेः। अत एवानुबन्धकार्येनल्विधाविति निषेधो न प्रवर्त्तत इति प्रवादस्याप्युपपत्तिष्टिल्क्तिदित्यादिबहुव्रीहेरप्युपपत्तिः। स्पष्टञ्चेदमिति। तत्र हि निष्ठासंज्ञायां समानशब्दप्रतिषेधो लोतो गर्त इति। निष्ठासंज्ञायां समानशब्दानाम् प्रतिषेधः। निष्ठासंज्ञा कस्मान्न भवति। अनुबन्धोन्यत्वकरः, अनुबन्धोन्यत्वकर इति चेन्न लोपात्। इति शङ्कायां यद्यपि लुप्यते जानाति त्वसौ सानुबन्धकस्येयं संज्ञा कृतेत्युक्तम्। एतेनानुबन्धलोपेपि विधिसूत्रे तत्तदनुबन्धोपादानात्तदुपलक्षिते कार्यं भवतीति स्पष्टमेवोक्तम्। वाचाल इति। अत्र लसेरत्वे लित्स्वरापत्तिरन्तरङ्गत्वात्। चित्स्वङ्गिमर्थमिति चेत् पर्यायार्थं सूत्रात्। अथ वा वाचाल इतीतत्साधकसूत्रसाध्यवाचाट

प्रत्ययोपलक्षणम्। अत्र हि टसोरत्वे ङीबापत्तिः। अत एवेति। दिशेरुच्चारणार्थत्वादेव। हलन्त्यमिति सूत्रे भावबलन्तोपदेशप्रदानतुल्यत्वं सूचयन् सिद्धान्तमाह। परे त्वितरादिना। उपदेशे किमिति। पूर्वसूत्र एव किमर्थमिति प्रश्नः। अत एव सूत्रद्वयविषये उपदेशपदस्य प्रत्याख्यानपरत्वे दूषणाभिधानसङ्गतिः। प्रत्याख्यमाख्यानमिति। अत्राख्यानं शब्दोच्चारणम्। तत्र प्रत्याख्यत्वाव्यभिचार इतीन्द्रियजन्यतावच्छेदकविषयताश्रयविषयकत्वम्। विषयता च व्यापारानुबन्धिनी। तथा चेष्टसिद्ध्यर्थसूत्र यदाख्यानं स उपदेशः। लटः सद्वेत्यादि। अत्र सदादिशब्दजन्योपस्थितिविषये तादृशविषयत्वाभावः स्पष्ट एव। सदादिसञ्ज्ञानुबन्धविनिर्मुक्तस्येति यदि ब्रूयात्तदाप्याह। तथा राजसूयेत्यादि। अत एव, एकसम्बन्धिनोन्यसम्बन्धित्वाभावादेव। न च राजसूयेत्यादिनिपातनेनैवानुबन्धलोपो भविष्यतीति वाच्यम्। निपातनेनापूर्वसञ्ज्ञाकल्पनापेक्षया हलन्त्यमित्यत्रोपदेशपदासम्बन्धकल्पने लाघवमिति भावः। लोकव्यवहारेणेति अनुवाकप्रश्ने इषेत्वकाद्यनुवाकाख्याने उद्दिष्टो मेनुवाक इति। मार्गप्रश्ने सुषिन्नवकाशे हस्तदक्षिणो ग्राह्य इत्याद्याख्याने उपदिष्टो मे पन्था इति व्यवहारादिति यावत्। एतेन सर्वेषु पूर्वोक्तेष्वित्वसिद्धिरनिष्टे तदभाव इति विषयविभागलाभः सूचितः। वार्त्तिके उपदेशेन इत्यनन्तरमुच्चारित इत्याहारो बोध्यः। प्रयोगप्रज्ञापनकरणेति। अत्र करणशब्दोपादानेन परिनिष्ठितभिन्नस्य ग्रहणमिति सूचितम्। लटः सद्वेत्यादिषु सञ्ज्ञासञ्ज्ञिभावबाधकेनुबन्ध उच्चारित एव, राजसूयेत्यादिष्वनुबन्धरहितानुमानमिति भावः। हलन्त्यसूत्रे व्यवसितपदार्थत्वेनेति। एतेन तत्सूत्रे उपदेशपदासम्बन्धः सूचितः। तत्सम्बन्धे दोषमप्याह। किञ्चेति। अत एव। हलन्त्यसूत्रे उपदेशपदप्रयोजनाभावादेव। अचसूत्रे, उपदेशेजिति सूत्रे। व्यवसितान्त्यमिति। धातुत्वादिना परिच्छिन्नान्त्यमित्यर्थः। अन्त्यग्रहणसामर्थ्येनेति। यक्त्वादिव्यावृत्त्यर्थमन्त्यग्रहणं चरितार्थमिति चिन्त्यमेतदिति, तदेव चिन्त्यम्। षः प्रत्ययस्य चुटू इतिसूत्रारम्भेणादेर्हलो यदीत्त्वं भवति तदोक्तस्थलेष्वेवेति कथनात्। ननु न धातुलोपसूत्रभाष्ये धातुग्रहणं किम् लूञ् लविता पूञ् पविता इत्यनेनानुबन्धलोपोत्तरमेव धातुसञ्ज्ञेत्यस्य लाभाद्धातुत्वादिना परि-

च्छिन्नान्त्यस्येत्त्वमित्यनुपपन्नमत आह । तत्रानुबन्धेति । पूर्वोक्तार्थे वार्तिकान्तरसम्मतिमाह । एवञ्चेति । उदश्विदादीति । आदिना शक्धृदित्यस्य सङ्ग्रहः । एतावद्व्युत्पन्नाविति कैयटः । कुम्भकार इत्यादाविति । ननु पूर्वमित्सञ्ज्ञा ततः प्रातिपदिकसञ्ज्ञेति क्रमात्कथं मत्र प्रतिषेधप्राप्तिरत आह । अपवादेति । यदि चोदकेन श्वयति वर्द्धत इति व्युत्पत्तिसिद्ध उदश्विच्छब्द इत्युच्यते तदापि द्वितीयसग्राव्युत्पन्नत्वमेव । न चास्यापि शकेर्ऋ तिन्नित्युणादिसूत्रनिष्पन्नत्वमिति वाच्यम् । तथाप्युपदेशेन्त्यत्वन्तकारस्य नित्यमिप्रायात् । प्रत्याख्यातमिति । न चोणादिप्रत्ययान्तानामव्युत्पत्तिपक्षे राजन्नित्यादौ नकारस्येत्त्वव्यावृत्त्यर्थमस्य वार्तिकस्यावश्यकत्वम् । न च फलाभावः । नित्स्वरस्यैव फलत्वादिति वाच्यम् । भीक्रीतिसूत्राश्रितेत्यत्रैव प्रत्ययादित्यस्यानुवृत्त्या सप्तम्या विपरिणामेन चेष्टसिद्धेः । अग्रहणेति । गणादावपठितानामित्यर्थः । उपदेशपदानुवृत्तौ भाष्यविरोधमाशङ्कते । नन्विति । क्वचित्पूर्वत्रेति । इतोत्सर्वनामस्थाने गोतो णिदित्यादौ । क्वचिदुत्तरत्र । ङमोह्रस्वादचि ङमुण् नित्यम् मय उञो वो वेत्योदौ । उभयोः प्रकल्पकत्वेति । पर्यायेणेत्यादिः । एकः पूर्वपरयोरित्यस्य युगपत्प्रकल्पकत्वाभावे ज्ञापकत्वाश्रयणम् लक्ष्यासिद्धेरिति । ठक्छसावित्यादिविहितेरयर्थः । स्वरीत्या व्यवसितान्त्यग्रहणे सूत्रस्य तत्राग्रहणात्कथं तदन्तस्येत्सञ्ज्ञेत्यत आह । अदुपदेशादीनामिति । लोपश्चेति । तत्र लोप इति भिन्नं पदं श इति च भिन्नम् । पूर्वस्य विभक्तिसकारस्य श्चुत्वेन शकारे द्विशकारको निर्देशः व्यपदेशिवद्भावेन शकारस्य प्रातिपदिकान्तत्वादित्सञ्ज्ञा । अनेकान्तत्वपक्षे समीपेवयवारोपेण बहुव्रीहिस्त्रीकाराल्लोपस्य शित्त्वम् । मुख्यपक्षे त्वाह । अनुबन्धानामिति । नन्वेकाच उपदेश इतिसूत्रस्थस्येत्सञ्ज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यत इति कैयटस्य का गतिरित्यत आह । एकाच उपदेश इति । अन्योपि, उपदेशेत्वत इतिसूत्रस्थः । वस्तुतोयमेवग्राह्यः । एकाच उपदेश इति सूत्रस्थस्य कर्मणि व्युत्पन्नत्वात् । तत्त्वेति । अनुनासिकत्वादित्यर्थः । व्यवहारश्चेति । इदितो नुमित्यादिव्यवहारश्चेत्यर्थः । यणापत्तिरिति । न च ककारस्याच्त्वेनानुनासिकशब्दावयवे ककारे यणादेशं बाधित्वा यस्येति लोप एव वक्तुमुचित इतिवाच्यम् । यण्पदस्याज्निमित्तकार्यसामान्योपलक्षणत्वात् यण्-

मात्रोपादानन्तु लृषिमृषिकृषेरित्यादिपदग्राह्ये यण एव प्राप्तिरित्यभिप्रायेण। तन्मूलभूतेति निर्देशमूलभूतेत्यर्थः। ननु वर्णसमाम्नाये अकारस्य प्राथम्यादाकार इत्युचितमत आह। कुक्कुटेति। व्याख्यानादिति। विभाषा घ्राधेति हेः घ्रुतविधानान्न मात्रिकस्याङ्गे अतो दीर्घो यञीति दीर्घविधानान्न मध्ये प्रवेशः। द्विमात्रयोर्न द्विमात्रस्याङ्गे प्रयोगः। ओमभ्यादान इति लिङ्गादित्यादिः। सदृशो लक्ष्यत इति। न चैवमुकारोच्चारणकालस्य स्वसदृशत्वाभावादुकारे एतत्सूत्रविधेयसंज्ञा न स्यादिति वाच्यम्। नञिवयुक्तमिति वाक्ये न्यग्ग्रहोपादानसामर्थ्येन सादृश्यस्य भेदाघटितत्वात्। वक्ष्यमाणा तुल्यास्येति सूत्रव्याख्याकालिकी रीतिर्वा बोध्या। ननूकाल इति वाक्ये उकारस्योद्देश्यत्वादणुदिदितिसूत्रप्रवृत्तौ प्रथमसदृशस्य संज्ञात्रयप्रसङ्ग इत्याशङ्क्य। नन्विति। अधुना यथासङ्ख्यन्तु स्यतासी लृलुटोरितिवच्छब्दतः साम्यात्। न च स्वविषये दीर्घप्लुतसंज्ञाभ्यां बाधः। आकाडारीयसंज्ञातिरिक्तत्वात्। न चैवमभ्यासस्य ह्रस्वविधाने दीर्घप्लुतयोरप्यापत्तिरिति वाच्यम्। आपोन्यतरस्यामिति सूत्रेण विकल्पेन ह्रस्वविधानात्। प्लुतापत्तिस्तु न। प्लुतश्च विषये स्मृत इति न्यायात्। वर्णग्रहणे जातिग्रहणादिति निपातैकाजनाङिति सूत्रस्यैकग्रहणेन ज्ञापितत्वात्। अन्तरङ्गत्वेन। उकारमात्रस्य कार्यित्वात्। अव्यवस्थितत्वादिति। नीचैरपि रोगार्त्तस्योच्चैः। उच्चैरपि कर्णपाटवयुक्तस्य नीचैः। एवं हि स वदति किमन्तर्ध्यस्मीमाधीशे इति। प्राचामनुरोधेनेति। पस्पशाह्नाह्नाह्ने अनुत्तरन्ति काकुदमित्युक्तत्वात्तदनुरोधेनेत्यर्थः। लोकप्रसिद्धत्वेन। यथा चैव भाष्ये। ननु न केवलमत्र व्यवहार एव प्रयोजकः किन्तु राजदृषदित्यादौ समासान्तोदात्तत्वमन्त्यहलोऽग्रहणाननुवृत्तौ प्राप्नोतीत्यत आह। हल्खरेति। यतोनाव इति सूत्रे नौप्रतिषेधाल्लिङ्गात्। अन्यथा यः स्वरयोग्यो नासावादिरिति तदर्थं स्यात्। नकारस्य स्वरस्तु वक्ष्यमाणो निमित्तस्य द्वयच्कत्वस्य विनाशापत्तेः। मेलनविरोधादिति। न चोदात्तानुदात्तत्वादात्मनः सम्भवतीत्यवेति वाच्यम्। धर्मिद्वयतादात्म्यस्य ज्ञाप्यदृष्टत्वात्। धर्मद्वयसमावेशस्तु सम्भवत्येव। यथा नानाजातीयरसवदवयवारब्धे वयविनि स्वाश्रयसमवेतत्वसम्बन्धेनावयवगतस्य रसस्यैव भानन्न तु चित्ररसाङ्गीकारस्तथात्रापि। अत एव तस्यादित उदात्तमर्धह्रस्वमिति सूत्रं

स्वरसतः सङ्गच्छते। तेनानुवर्त्तमानयोरुदात्तानुदात्तशब्दयोर्भावप्रधाननिर्देशपरत्वमावश्यकमिति भावः। न चानुवर्त्तमानयोरुदात्तानुदात्तपदयोर्लक्षणया धर्मपरत्वे तयोर्द्वन्द्वे ततो भावप्रत्यये उदात्तत्वानुदात्तत्वशब्दाद्दर्णधर्मवृत्तिधर्मबोधापत्तिरिति वाच्यम्। इतरेतरयोगद्वन्द्वेपि समूहस्यैव प्राधान्यस्य स्वीकारात्तं प्रति समूहिनो विशेषणतया द्वन्द्वोत्तरत्वप्रत्ययेन धर्मस्यैव प्रतिपादनसम्भवात्। तस्यादित इति सूत्रस्थाभ्यां ह्रस्वस्य ह्रस्वशब्दस्य ह्रस्वसमार्द्धमित्यर्थकत्वे दीर्घप्लुतस्वरितयोरसङ्ग्रह इत्यत आह। ह्रस्वपदघटितेति। स्वशास्त्रसङ्केतितरूपेण, अवयवव्युत्पत्त्या पूर्वोपदर्शितरीत्या लब्धेन धर्मेण। अर्द्धमात्रारूपेति। तदुक्तभाष्ये अर्द्धह्रस्वशब्दोर्द्धमात्रायां रूढ इति। हरिरप्याह। प्रमाणमेव ह्रस्वादावनुपात्तं प्रतीयते इति। इत आरभ्येति। इमं मे गङ्गे यमुने इति मन्त्रे मेशब्दमाश्रित्य सर्वेषां निघात इममित्युदात्तात्परस्यानुदात्तमेशब्दावयवेकारस्य स्वरितत्वे स्वरितापेक्षितायामिति गङ्गे प्रभृतीनां प्रचयो यथा स्यादिति देवब्रह्मणोरनुदात्त इत्यनेन ज्ञापकेनैतत्कार्यस्य अश्व इत्यतः प्राक् पाठस्य कल्पनमावश्यकमन्यथा देवा ब्रह्माण इत्यत्रामन्त्रिताद्युदात्तत्वे शेषनिघातेनानुदात्तस्योदात्तादनुदात्तस्य स्वरित इतिसूत्रेण स्वरितस्य देवब्रह्मणोरनुदात्त इत्यनुदात्तत्वे कर्तव्येसिद्धत्वात्तदसङ्गतिः स्यादेव। गुणाभाव इति। अहिशब्दे षेर्ङितीति सूत्रेण प्राप्तगुणाभाव इत्यर्थः। अहिरिव भोगैरित्यत्रामन्त्रिताद्युदात्तत्वेन पठ्यमानतया आमादित्वाद्वा षादित्वाद्वा आद्युदात्तत्वं भवति ततः शेषनिघातेनेकारस्यानुदात्तत्वे उदात्तादनुदात्तस्य स्वरितत्वे तस्य यणि स्वरितस्थानिकयणः परत्वाद्विभक्त्यकारस्य स्वरितत्वम्। न चोदात्तादनुदात्तेत्यत्रस्यासिद्धत्वात्पूर्वमेव यणि न स्वरितस्थानिकत्वम्। छान्दसत्वेनासिद्धत्वाभावस्य कल्पनात्। यद्वा तत्रादुदात्तपाठेपि प्रवृत्ते घृतादित्वादन्तोदात्ते तस्य यण्। यद्वा योश्च इत्यत्र यच्छब्दः किष इत्यन्तोदात्तस्तत्सम्बोधनत्वे उदात्तानुदात्तयोरेकादेशस्योदात्तत्वे पूर्वरूपे स्वरितोत्पन्नस्य वैकल्पिकत्वात्तदभावे एकादेशउदात्तेनेति पुनरुदात्तत्वे अहिशब्देकारस्य स्वरितत्वे तस्य यणि कृते स्वरितयणः परस्य सुपः स्वरितत्वसिद्धिः। उदात्तयण इति। स्वरिते उदात्तभागसत्त्वाभिप्रायेणेदम्। यदि चोदात्तस्वरितयोरिति सूत्रे स्वरितशब्दस्य पृथगुपादानात्स्वतन्त्रोदात्तस्यैवादेशो यण् उदात्त-

यण्प्रदेश स्थ इत्युच्यते तदा नैतत्सूत्रप्राप्तिरिति बोध्यम्। किं बहुनात्र शास्त्रे यद्यदुदात्तसम्बन्धि कार्यं तत्स्वतन्त्रोदात्तसम्बन्ध्येव। अत एवात्र मूले तस्य चोदात्तस्वरितपरत्वे अवर्णं स्पष्टमित्यत्रोदात्तात्पृथक् स्वरितशब्दोपादानं सङ्गच्छते। यमानुस्वाराणामेवेति। अनुस्वारयमानाश्च नासिकास्थानमिश्रत इति शिक्षोक्तेः सोक्तस्पष्टादशत्वं धर्मे वृत्त्यादयति। ङसुत्वादीनामित्यादिना। अत एवेति। दीर्घाभावादेवेत्यर्थः। अत एवानुदात्ततरस्येति। लौकिके प्रयोगेनुपलम्भादेवेत्यर्थः। एकश्रुतेः स्वरान्तत्व इति। किमियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता इति विचारे नोदात्ता यदयमुच्चैस्तरां वा वषट्कार इत्याह, अतनूतरनिर्देशः। नानुदात्ता यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह, अतनूतरान्तरनिर्देश इति भाष्ये स्पष्टम्, व्याख्यानादिति, वायुसंयोगस्य ग्रहणे ङसुदीर्घयोः सावर्ण्याभावापत्तौ तुल्यास्यप्रयत्नस्यैवानुपपत्तिरिति भावः, भेदघटितेति, लोके भिन्ने वस्तुनि सदृशव्यवहारस्य सुप्रसिद्धत्वात्, इदं सादृश्यस्योपमानत्वाभिप्रेतप्रतियोगिकभेदविशिष्टसाधारणधर्मरूपत्वमतेन, वस्तुतः सादृश्यमतिरिक्तमखण्डोपाधिरत एव केन धर्मेण सादृश्यमाह्लादकत्वेन मुखे चन्द्रसादृश्यमिति व्यवहारः संगच्छते। यजुष्येकेषामितीति। यत्किञ्चिदास्यप्रयत्नग्रहणे इकारैकारयोस्तालव्यत्वाविशेषात्सवर्णदीर्घापत्तेरिति भावः। सवर्णग्रहणेन ञ्नापकेनेति। हलो यमां यमीयत्रैव यथासङ्ख्यनिरासाय सवर्णग्रहणम्, तेन शिएढीतत्र डकारस्य ढकारे परे लोपसिद्धिः। प्रयत्नांशेपि चेद्यावत्तौल्यन्तदा डकारढकारयोर्यावत्प्रयत्नतौल्याभावाद्रूपासिद्धिः स्पष्टैव, अकारादुच्चारणे तु नेति, एतेन यदुच्चारणे यद्व्यापार आवश्यकस्तत्तस्य स्थानमिति सूचितम्, जिह्वामूले तु कुः प्रोक्त इति शिक्षाविरोधं परिहरति। अत्र कण्ठेति। अत एव, रूढिस्वीकारादेव। यदि कवर्गोपि जिह्वामूलीयस्यात्तदा तस्याच्चरसमाम्नाये प्रयोगसत्त्वाज्जिह्वामूलीयानान्तेषु गणनं विरुध्येतेति भावः। उच्च पवर्गेतियोगेनोपध्मानीयपदस्य पवर्गेपि प्रसङ्ग इत्यत आह। रूढत्वाच्चेति। अत एव, नासिकायाः स्थानत्वादेव। परमतं खण्डयितुं तन्मतमनुवदति। यत्त्विति। नासिकाकरणमिति शिक्षायां स्थानत्वोक्तिकरणत्वादेवेति तद्भावः, अस्यन्यनेनेति भाष्योयवावहात्स्थानमात्रे करणत्वं प्रा-

प्रोति। कण्ठादौ स्थानत्वव्यवहारे यत्प्रयोजकं तन्नासिक्यायामपि समानमित्याशयेन खण्डयति। तन्नेति। वर्णानां नित्यत्वादाह। वर्णाभीति। वर्णजनकेत्यपि तदर्थकमेव। तत्स्वव्यञ्जनक इति। एतेन व्यापारवत्त्वसूचनात्करणत्वव्यवहारो नानुपपन्न इति भावः। बाह्यप्रयत्नेषु यो व्यवहारस्तमुपपादयति। वर्णाभीति। भेदकत्वाद्गुणसेतिभाष्यीयव्यवहारादत्र इवानुनासिक्यमपि यथा गुणस्तथोपपादयति। अकारादीति। तथा च यथा पटादौ गुणः पश्चादुदेति तथैतस्मादपि पश्चादुत्पत्त्या गुणत्वव्यवहार इति भावः। ननूदात्तत्वादौ गुणव्यवहारस्य भाष्यादिस्थस्य का गतिरत आह। उदात्तत्वादीनामिति। ङादीनामुभयं स्थानमित्युपपादयति। ङादीनामिति। नन्वेवं कङादीनां सवर्णसञ्ज्ञा यावत्स्थानसाम्याभावान्न प्राप्नोतीत्यत आह। कङयोः सावर्ण्यं न्विति। इदमुपलक्षणञ्चञादीनाम्। आस्ये तुल्यदेशप्रयत्नमिति वार्त्तिककारीयन्यासे यत्प्रयत्नशब्दः प्रयत्नविशेषणं तदा सौचित्वाद् इन्द्रो बोध्यः। वदतामत इति। इदमन्यत्रोपपादितम्। ऐचः सर्वस्येति। ह्रसे ह्रसने टुओश्वीतित्रादावेङ्विषयेनुनासिकपाठदर्शनादेच इति नोक्तम्। यवयोरनुनासिकत्वं युवोरनाकाङ्क्षितिसूत्रभाष्ये नुनासिकयणोरिति भाष्यीयव्यवहारादस्त्येव। कस्य चिदुक्तिं खण्डयति। यक्ष्विति। दन्तोष्ठादिसमुदितमिति। अत्र समुदितपदोपादानेनोभयपर्याप्तद्वित्वमधिकरणतावच्छेदकमिति सूचितम्। प्रत्येकमनुत्पत्त्यापत्तेरिति। स्थानतावच्छेदकधर्मविशिष्टवाचकप्रातिपदिकाद्यतः शिक्षायां दर्शनेनोभयत्वस्य स्थानतावच्छेदकत्वे केवलदन्तादिप्रातिपदिकस्योभयत्वावच्छिन्नवाचकतया प्रत्येकमनुत्पत्तिर्यतस्तस्मादिति भावः। एतेन समुदायाद्यतः सम्भवाभावेन। दन्तोष्ठरूपमिति। व्याप्यज्यद्वत्त्वमुभयत्वन्न स्थानतावच्छेदकम्। अपि तु एकविशिष्टापरत्वरूपम्। विशिष्टञ्च केवलादन्यदिति वादिनो मतेनेदमभिहितमिति न पूर्वकल्पादभेद इति भावः। प्रयत्नशब्दस्याभ्यन्तरप्रयत्नबोधत्वेऽपि मूलोक्तं द्वैविध्यमुपपादयितुमाह। सूत्र इति। नाज्झलाविति सूत्रे णेति। एवञ्च सूत्रकारमताभिप्रायेण मूलमिति भावः। यथोत्तरमिति न्यायेनाह। भाष्यमत इति। स्पृष्टादीनामाभ्यन्तरत्वमुपपादयति। स्पृष्टादीनामिति। प्रयत्नमित्यपपाठ इत्येतत्खण्डनाभिप्रायेण जानीयादित्यस्याध्याहार इति तु न युक्तम्। प्रयत्नो द्विधेत्युपक्रमे प्रथमाया एव दर्शनेन द्वितीयाया विरुद्धत्वादि-

त्याशयेनाह। नपुंसके भाव इति। मूलोक्तं यस्मायस्य यद्यत्स्थानं तत्र मानमाह। तथा चेति। पाणिनीयेति शेषः। स्वर्णाभावरूप इति। एतेन दूरावस्थानलाभः। यण्स्वीषदिति। अत्रेषदित्यस्य विशेष्यानुपादानेपि मध्यमणिन्यायेन विवृतत्वं स्पृष्टत्वञ्चास्य विशेष्यमित्याशयेनाह। यण्स्वीषदित्यनेनेति। यत्तु, स्वराणामूष्मणामित्यनेनाचां विवृतत्वस्योक्ततयाचोस्पृष्टा इति वाक्येन पुनस्तद्बोधनं किमर्थमिति चिन्त्यमिति तन्न। ताभ्यामैचाविति पूर्ववाक्येन विवृततमत्वस्योक्ततया यण्स्वीषदित्यत्र विशेष्याकाङ्क्षायां तस्यैव परामर्शापत्तेः। दीर्घौकारस्य विवृततरत्वन्त्विति। अत एवाइउण्सूत्रे अकारस्य विवृतोपदेश आकारग्रहणार्थ इति वार्तिकं सम्यगुपपद्यते। व्याख्यानादिति। यथोद्देशस्वेस्य सूत्रस्यासिद्धत्वाद् व्यापकजातिनिर्देशोपि न तपरनिर्देशादेकशेषनिर्देशाद्वा सिद्धमिति भाष्यमूलकाद्व्याख्यानादिति। अतिदेशस्य फलमनोरथादिसिद्धिरूपं मनोरमायामिव स्फुटमिति। सूत्रस्याधिकारत्वे फलमाह। अधिकारत्व इत्यादिना। गोधुङ्मानिति। अयमाशयः। सिद्धान्ते हस्य झय्भिन्नत्वेनादौ निरवकाशत्वेन जश्त्वापवादत्वाद् धस्ततो जश्त्वानुनासिकयोरसिद्धत्वाद्धष्भावेनुनासिकस्यासिद्धत्वाज्जश्त्वे ततोनुनासिके तेषामसिद्धत्वाद्वाप्राप्त्या गोधुङ्मानित्यस्य सिद्धिः। अधिकारत्वाभावे तु निरवकाशत्वेन जश्त्वात्पूर्वं धस्ततोन्तरङ्गत्वेनानुनासिकात्परत्वेन तु भष्भावादादौ जश्त्वम्। एवं सति झषन्तत्वविरहाद्धष्भावानापत्तिरिति। ननु प्रागुक्तरीत्या जश्त्वात्पूर्वं धत्वेपि तदुत्तरमनुनासिकत्वजश्त्वाभ्यां पूर्वं निरवकाशत्वेन येन नाप्राप्तिन्यायेन वा बाधकयोर्वत्वभष्भावयोरेव प्राप्तिः। यद्यपि तसाविति भत्वविषये तड्डित्त्वानित्यादौ वत्वस्य चारितार्थ्यम्। तथापि प्रत्याहारनिर्देशसामर्थ्याद्धत्वस्य जश्त्वबाधकत्वम्। तयोश्च वर्णमात्रापेक्षत्वेनान्तरङ्गत्वाद्धत्वमेवोचितमिति चेत्तथैवाह। वस्तुत इति। उक्ताशयानभिज्ञः शङ्कते। न चेति। परोक्तमङ्गीकृत्यापि समाधत्ते। विप्रतिषेध इति। यथोद्देशपक्षे दोषाभावेपि कार्यकालपक्षे दोष एवेति चेत्तत्राह। पूर्वत्रासिद्धे नास्तीति। अधिकारत्वे सति तत्रतत्र यथा वाक्यार्थस्तन्दर्शयति। तत्रायमर्थ इति। तच्च, अधिकारत्वे सति। अत एवेति। विधेयभेदे वाक्यभेदस्वीकारादेवे-

त्यर्थः । इतरादिभिरित्यादिना न मुटादेश इति वार्तिकसङ्ग्रहः । तन्निषेधः । शास्त्रासिद्धत्वनिषेधः । यदि पदैकवाक्यता स्यात्तदा हो ढ इति सूत्रस्य पूर्वत्र कर्त्तव्ये सिद्धत्वविशिष्टो ढो भवतीति यथार्थस्तथा अदसोसेरितिसूत्रस्यापि पूर्वत्र कर्तव्ये सिद्धत्वविशिष्टो मूभावो भवतीति पर्य्यवसितार्थः स्यादेवञ्च न मुने इति सूत्रस्यापि नाभावे कर्त्तव्ये सिद्धत्वविशिष्टो मूभावो न भवतीत्यर्थः स्यात्तथा चामुनेति रूपासिद्धिः स्यादिति भावः । न चैवं वाक्यभेदेपि कार्य्यासिद्धत्वस्यैव लाभः स्यादिति शङ्क्यम् । पूर्वत्रेति शब्देन पूर्वशास्त्रस्य पुरःस्फूर्त्तिकतया प्रत्यासत्त्या पूर्वशास्त्रे कर्त्तव्ये एतत्कार्यविधायकशास्त्रमसिद्धमित्यर्थस्य लाभादिति मनोरथादिसिद्धिसम्भवात् । सङ्ग्राहकमिति । उपस्थितानां सूत्राणामेकेन शब्देन बोधकमित्यर्थः । इह, व्याकरणे । शास्त्रेति । पूर्वत्रेति शास्त्रेत्यर्थः । यत्राप्यन्तरङ्गत्वादिति । अत्रान्तरङ्गत्वं सपादसप्ताध्यायीशास्त्राप्राप्तिकालिकप्राप्तिकर्त्तृत्वमात्रम् । न त्वन्तरङ्गपरिभाषायाः प्रवृत्तिः । त्रिपाद्यां सर्वथा तदप्राप्तेर्ग्रन्थकारसम्मतत्वात् । यथा ऊढमाख्यदिति विग्रहे णिजन्तात्लुङि च्लेश्चङि ढत्वादिकं हित्वं कर्त्तव्ये सिद्धभवति । तथा च हतशब्दस्यैव द्विर्वचनम् । न चैवमपि रजतायोन्मीलितं चक्षुः पटं न हि न पश्यतीति न्यायेनास्य सार्वत्रिकत्वेपि हतशब्दबुद्ध्या जायमानं हित्वं वस्तुगत्या ढकारविशिष्टस्यैव स्यादित्यौजढदित्यस्यासिद्धिरिति वाच्यम् । हित्वविधायकशास्त्रदृष्ट्या यथा ढत्वादीनामसिद्धत्वं भवति तथा कुहोश्चुरित्येतद्दृष्ट्याप्यसिद्धत्वाद्धकारबुद्ध्या चुत्वस्य प्रवृत्तिसम्भवात् । यत्र त्विति । अमू अमी इत्यत्र । पूर्वत्र नेति । पूर्वत्र कर्त्तव्ये जातं तत्कालप्राप्तिकञ्च परत्र भवतीत्यर्थो भविष्यतीति भावः । अत्र पूर्वशास्त्रप्राप्तावित्यर्थो वा पूर्वशास्त्रविषयत्वसम्भावनायामित्यर्थो वोभयथापि न सम्भवतीत्याह । पूर्वशास्त्रेत्यादिना । एतन्निषेधाप्रवृत्तौ, पूर्वत्रेति निषेधस्याप्रवृत्तावित्यर्थः । ननु जातस्यापि सत्ता तेन निषिध्यत इत्यत आह । भुक्तवन्तमितीति । एतदप्रवृत्तौ, पूर्वत्र नेत्यस्याप्रवृत्तौ । न चैवमुक्तौ पौनरुक्त्यमिति वाच्यम् । पूर्वत्राप्राप्तिशास्त्रस्य स्वोद्देश्यतावच्छेदकाभावात्पन्तु भुक्तवन्तमिति न्यायहेतुकाप्राप्तिरुक्तेत्याशयात् । ननु नियमानुपयोगी तदकरणे लाघवमेवेत्यत

आह । राजभ्यामित्यादावपीति । द्वितीयमर्थं दूषयति । पूर्वशास्त्रेति । दिगिति । अत्रासिद्धमित्यस्यानिष्पन्नमिति व्याख्यानेन जातसंप्रासिद्धत्वमेव-लभ्यत इति न शङ्क्यम् पूर्वशास्त्रप्राप्तिकाङ्क्षिकाभावप्रतियोगीत्यर्थेन सर्वसामञ्ज-स्यादित्यादिकमनेन सूचितम्। ध्वनिविशेषरूपनादेति । एतद्विशेषपदोपादाने-नोत्तरत्राभिहितेन पौनरुक्त्यम् । आत्मेति। आत्मा अन्तःकरणं बुद्ध्या स्वसमवेत-बुद्ध्यात्मकवृत्तिविशेषेणार्थान्समेत्य एतस्यैव परिणामविशेषो मनः तत्कर्म इ-च्छया स्वीयवृत्तिविशेषेण युक्तं करोति। उभयत्रात्मनः कर्तृत्वमिति समानक-र्तृकत्वोपपत्तिः। संस्काररूपेण स्वगतानिति। संस्कारस्यापि मनःपरिणामत-या परिणामपरिणामिनोरभेदाद्विषयाणां संस्कारविषयत्वे स्वविषयकसंस्कार-परिणामित्वसम्बन्धेन विषयाणामन्तःकरणगतत्वमिति भावः। युङ्क्ते इत्यन्त-र्भावितण्यर्थम्। अत एव युक्तं करोतीति विवरणं संगच्छते। आस्यान्तर्गतत-त्तत्कार्येति। स्वर्गादिरूपकार्येत्यर्थः। बहिर्भूतदेश इति। काकलकाधस्तादेश इ-त्यर्थः। ऋस्वत्वादीनाञ्चार्वान्तर्भाव इत्याशयेनाह। मात्राकालिकत्वादीति । सर्वकार्यजनक इति। स्फोटादितवर्णनिष्ठऋस्वत्वादिजनक इत्यर्थः। वर्णनाशक इति। नच यत्नस्य वर्णनाशकत्वे मानाभाव इति वाच्यम्। येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्ने तस्मिन्वर्णे तं यत्नमुपादाय द्वितीयः प्रवर्तत इति परः स्वन्निकर्ष इति सूत्रभाष्यस्यैव मानत्वात्। न्यूनत्वं मूलस्य परिहरति। इदमिति। एवञ्चात्र प्रकरणे मूलोक्तं न नियमपरमिति भावः। पूर्वसदृश इति मूले पूर्वेणै-व सदृश इत्यर्थः। किञ्च पूर्वसदृश एव न तु पूर्व इत्यप्यर्थः। तत्रोभयत्र प्रमाणमाह। अत ए वेति। एवञ्च वर्णान्तरत्वं स्पष्टमेवेति भावः। इति भाष्यादिति। तच्च श्लोकमुक्तम् लु-कि किमुदाहरणम्। आर्द्रचर्मन् लोहितेचर्मन् नैतदस्ति। पूर्वसवर्णेनाप्यत्र सिद्धम् न सिद्ध्यति यद्यत्र पूर्वसवर्णः स्यादान्तर्यतो दकारः स्यादिति। जिह्वामूलीययमा-दीनामिति। आदिनानुस्वारविसर्गपरिग्रहः। आन्तरतम्यपरीक्षादाविति आदि-ना सावर्ण्यकार्यपरिग्रहः। शक्ध्योरपीति। तत्वे हि शार्ङ्गिञ्जिक्रन्धीत्यत्रानु-स्वारपक्षे झरो झरीति लोपापत्तिः। अन्तस्थाशब्द आदन्तः। हकारं यञ्चमैर्यु-क्तमन्तस्थाभिश्च संयुतमिति शिक्षावचनमत्र प्रमाणम्। एवञ्चायं विजन्तः। य-द्वा व.हुलकादातश्चोपसर्ग इति कर्त्तर्यङि कृते ततष्टाप्यर्थं साधुः। अत एव सा-

मान्येनोक्तमादन्त इति न त्वाबन्त इति। ऊषा वायुरिति। एवञ्चोषाण इत्यत्र विनापीत्वनेनोत्तरपदलोपो बोध्यः। एवं हि प्रातिशाख्येनाविरोधसूचनायाह। एवं सोषाण इति। भाष्यादूषत्वमिति। तत्र श्लोकमुक्तम्। वर्गेवर्गे च प्रथमावघोषौ युग्मौ सोषाणाविति। कण्ठादीनामिति। यावदाभ्यन्तरप्रयत्नतोल्पाभावादिति भावः। तद्धर्मत्वादिति। तालव्यात्तद्धर्म्यमिति भावः। ननु ऋल्वर्णयोः परस्परसावर्ण्यं ईकारादीनामिकारादिनेव ऋकारेण ऌकारग्रहणसिद्धौ ऌकारोपदेशो व्यर्थ इत्यत आह। एतदर्थमेवेति। ऋकारऌकारयोः संवर्णसञ्ज्ञाबोधनार्थमेवेत्यर्थः। अन्यथा। ऌकारोपदेशाभावे। ध्वनितञ्चेदमोडितीति। वर्णसमाम्नायानुपदिष्टस्यासत्त्वभाष्ये ध्वनितमित्यर्थः। द्विव्यञ्जनाश्रय इति। संयोगसंज्ञारूपः। वर्णैकदेशानां वर्णग्रहणेन ग्रहणाभाव इति भावः। अत्र यद्यप्येवमाकारादिष्वप्यसत्त्वशङ्का भवति, तथापि यश्चिमथीत्यादिधानादिना सा यथापनीयते तथा ऌकारविषयेपि गम्ऌधातौ ऌकारोपदेशेन ऌदित इत्यनुवादाच्च सा निवर्त्तनीयेति बोध्यम्। अत एव शङ्कापदोपादानम्। न्यूनताभङ्गायाह। एकारस्येति। इति मत इति। तालव्यावेकारचवर्गाविकारैकारौ यकारः शकारः शेष ओष्ठोपपाद्य इति वह्वृचप्रातिशाख्यं येषांतेषां मत इत्यर्थः। एकारादीनां शादिभिः सावर्ण्यं कटे शेते एधावहै शक्त्या गोयानम् भानौ यातीत्यादावेचोयवायाव इत्यस्यापत्तिः। ननु हकाराकारादिवर्णयोः परस्परं सवर्णसंज्ञायां हग्रि चेत्येव सिद्धे तोरोरिति व्यर्थमित्यनेनैव ज्ञापकेनाञ्झलोः सावर्ण्याभावे सिद्धे नाज्झलाविति व्यर्थमत आह। हग्रि चेति। अत एव आकारप्रश्लेषादेव। समासान्तरशङ्कां वारयति। अज्झलिति समाहारद्वन्द्वं क्लृप्तेति। अज्भिराकारास्येति। अत्रेष्टापत्तिं वारयति। अत एवेति। अज्झलोरेव सावर्ण्याभावसाधनादेव। यद्यकाराकारयोरपि सावर्ण्याभावः सूत्रकाराभिप्रेतः स्यात् तदाज्झलोः प्रयत्नभेदेनैवैतयोरपि सावर्ण्याभावः प्रकारान्तरेण साधितः स्यादिति भावः। अच्त्वं स्यादिति। नन्वच्छब्दस्य सञ्ज्ञाशब्दत्वेनाच शब्दरूपस्यैव प्रवृत्तिनिमित्तत्वेन भावप्रत्ययान्तेनान्वयापत्तिरत आह। अच्पदबोध्यत्वमिति। एवञ्चाच्त्वमच्पदं हकारादिसम्बन्धी स्यादितभिप्रेतमिति भावः। ननूच्चारितः शब्दः प्रत्यायको न त्वनुच्चारित इतीकारस्याच्पदबोध्यत्वेपि तस्या-

नुच्चारितत्वात्प्रत्यायकता नोपपद्यत इति हकारादीनामित्यादिपदानुपपत्तिरत आह। इदं प्रत्याहारघटकेत्यादि। मते, अज्झलोः प्रतिषेधे शकारप्रतिषेधोज्झलादिति वदतो वार्त्तिककारस्य मते। जातिपक्षे ग्रहणकशास्त्रस्यैवाभावादाह। व्यक्तिपक्षे चेति। अणुदित्सवर्ण। कुक्टुगादौ तु नैतत्सूत्रप्रवृत्तिरुकारस्योच्चारणमात्रफलकत्वात्। अस्य सूत्रस्य मूलोक्तसञ्ज्ञासंज्ञिभावबोधकत्वं समानाधिकरणपदोपादानाभावादयुक्तमत आह। अणमुद्दिश्य सवर्णबोधकतेति। खसिद्धान्तमाह। परे त्विति। प्रत्ययस्यापि भाव्यमानतया भाव्यमानसामान्यस्य प्राचीनसम्मतपरिभाषाविषयत्वसिद्धौ प्रत्ययस्यापि तत्त्वं सिद्धमेव स्थालीपुलाकन्यायेनेतिभावः। तदर्थत्वम्, यौगिकार्थपरत्वम्। वार्तिककृतेति। तदुक्तभाष्ये। अप्रत्यय इति किमर्थम् सनाशंसभिक्ष उः। अ सामृतिके। अत्यत्यमिदमुच्यते अप्रत्ययादेशटित्किन्मित इति वक्तव्यमिति। यत्त्वत्राप्रत्ययग्रहणमित्यस्य व्यर्थं सदिति शेषः। प्रत्ययसंज्ञाया अन्वर्थत्वात्सनाशंसेत्युकारबोध्यदीर्घस्याप्रत्ययकत्वेन विधातुमशक्यत्वादिति तन्न। उपक्रमस्थभाष्येप्रत्ययपदस्य यौगिकार्थपरत्वेनाभिप्रेतमन्यथा वार्त्तिकोत्थानस्यैवासम्भवापत्तेः। एवञ्चोकाराकारप्रत्यययोर्ग्राहकत्वव्यावृत्त्यर्थमप्रत्ययग्रहणचारितार्थ्येन शेषपूरणासङ्गतेः।किञ्चात्र सूत्रे अप्रत्ययग्रहणाभावेण सामान्यस्य सवर्णबोधकत्वमुद्दिश्यतावच्छेदकावच्छेदेन विधेयान्वयबोधकत्वं व्युत्पत्तिसिद्धमित्युकाराकारयोरपि दीर्घग्राहकत्वं स्यादेव, अन्वर्थसञ्ज्ञया तु न व्यावृत्तिः। अत्यन्तस्वार्थिकानां यथा कनादीनां तत्र प्रत्ययपदोपस्थितिसामर्थ्यादर्थाभावेपि प्रत्ययसंज्ञा तथाण्त्वरूपोद्देश्यतावच्छेदकाक्रान्तयोरुकाराकारयोर्ग्राहकसूत्रोपस्थितिसामर्थ्यादल्पार्थाभावेपि दीर्घयोः प्रत्ययसंज्ञा स्यादेवेत्याशयात्। उद्देश्यतावच्छेदकसंकोचे तु न मानमिति भावः। ज्ञापकमिति। न तु सूत्रचरमर्थादया भाष्यकृतायमर्थः साधितः। प्रत्ययग्रहणस्य प्रत्ययसञ्ज्ञकपरत्वे भाष्यान्तरमपि साधकमाह। ज्यादादीयस इतीति। भाव्यमानेनेति परिभाषाया इहाश्रयणे फलान्तरमप्याह। जातिपक्ष इति। भाव्यमानेनेति परिभाषाया अस्वीकारे प्रत्ययपदस्य यौगिकत्वेपि यत्राणुदित्सूत्रेण ग्रहणप्रसङ्गस्तत्रैव निषेधप्रसङ्गः स्यात्र तु जातिपक्षे, एवञ्च व्यापकत्वात्परिभाषा-

स्वीकार एवावश्यक इति भावः। व्यक्तिपक्ष इति। अस्मिन्पक्षेऽण्ग्रहणसत्त्वेऽपि यौगिकार्थाश्रयणेऽपि सूत्रप्राप्तस्यैव सवर्णग्रहणस्याप्रत्यय इत्यनेनवारणं कर्तुं शक्यत्व न तु गुणभेदकत्वात्प्राप्तस्येति भावः। वकार इति। वकारस्यानुनासिकत्वान्नादुपधाया इत्यनेनान्तरतम्यादनुनासिकः स्यादिति भावः। कौस्तुभोक्तिं खण्डयति। एतेनेति। भाव्यमानेनेति परिभाषाया व्यापकत्वसूचनेनेत्यर्थः। विधेयविषये गुणभेदकत्वप्रयुक्तदोषस्यालया परिभाषयैव व्यावर्त्तनेनोद्देश्यविषये भेदकत्वस्य प्रयोजनाभावेनाण्ग्रहणस्य स्वविषये चारितार्थ्याभावेन ज्ञापनासम्भवादिति भावः। अनुवादे कथमिति। विधेये तूपदेशसत्त्वादुपदेशे इत्संज्ञया सिद्धमिति भावः। अस्यापि, चोरित्यादयनुवादविषयस्यापि। न चोच्चारणार्थानामित्संज्ञां विना निर्लृत्त्वभावेन कुक्टुगादौ सवर्णग्राहकत्वं दुर्वारमिति वाच्यम्। उदित्यदेवधारणगर्भबहुव्रीह्याश्रयणेनादोषात्। व्याख्यानादिति। उऋदिति सूत्रे तपरकरणमूलकादिति भावः। एतत्स्वरूपमन्यत्रोक्तम्। लृकारग्रहणेनेति। इदं तपरसूत्रस्य विधायकत्वमते। यत्तु सूत्रकारमते ऋकारलृकारयोस्सावर्ण्याभावेन वार्त्तिककारमतेऽण्ग्रहणस्यैवाभावेन तत्र ज्ञापकानुपयोगाच्चिन्त्यमेतदिति तत्र। लृकारग्रहणेनेत्यस्य सवर्णसंज्ञाज्ञापनद्वारेत्यादिपूरणेन ऋकारलृकारयोः सवर्णविधिरिति वार्त्तिकोक्तार्थस्यापि क्रोडीकारसम्भवात्। एवञ्च तद्वार्तिकज्ञापूर्वमिति भावः। इणपि परेणैवेति। अस्य सर्वत्रेति शेषः। व्याख्यानादिति। अत्र ज्ञापकातिरिक्तं व्याख्यानमुपदेशपरम्परारूपं बोध्यम्। व्यक्तिपक्षाभिप्रायेण शङ्कते। नन्विति। एतद्व्यतिरिक्तेति। लृकारव्यतिरिक्ते दीर्घऋकारे। अत्र पक्षे, जातिपक्षे। योगविभागेनेति। अत्र पक्षे सूत्रे अण्ग्रहणाभावेनोदिदघटितवाक्ये अप्रत्यय इत्यस्य प्रयोजनाभावेन योगविभाग इति भावः। तत्प्राप्तेति। जातिपक्षप्राप्तेत्यर्थः। पूर्वोक्तमपि दार्ढ्याय पुनराह। गुणभेदकत्वेति। नन्वौजितिसूत्राभावे एचोयवायाव इत्यादौ यथासंख्यानुपपत्तिरत आह। एच इति। ननु यत्रैचप्रत्याहारनिर्देशस्तत्रानुपपत्तिरत आह। नयवाभ्यामित्यादि। मूले नाज्झलाविति निषेधो यद्यपीत्यादिनोक्तमयुक्तम्, हकाराकारयोस्सावर्ण्येऽप्यत्वजातिस्तत्राभावेन दोषाभावादत आह। इदं व्यक्तिपक्ष इति। एतेन सवर्णेति। पूर्वोक्तसमूहयुक्ताणुदित्सूत्र णेत्यर्थः। समूहघटकेषु पूर्वेषु तत्तदुपकारकत्वं स्पष्टमेवेति भावः। बाधकसम्भावनयेति। अयमाशयः। विधिनिषेधयोः पर्युदासन्यायेनैकवाक्यतानुभवसिद्धा सा च निषेधवाक्यार्थग्रहात्पूर्वं न सम्भवति विधिवाक्यार्थमात्रस्य ज्ञानं यद्यपि संभवति, तथाप्येतस्य बाधकमपिसूत्रमस्तीति ज्ञानेन एतज्ज्ञानं प्रमा न वेति सन्देहो जन्यते, तथा चाप्रामाण्यज्ञानानास्कन्दितसवर्णपदशक्तिग्रहाभावेन सवर्णपदार्थानुपस्थिता वणुदितसूत्रजन्यवाक्यार्थबोधासम्भव इति। ननु विश्वपाभिरित्यत्र ढत्वसंयोगान्तलोपयोः प्राप्तौढत्वस्यासिद्धत्वात्संयोगान्तलोप एव स्यादिति ढत्वमित्यनुपपन्नमत आह। हकारेणेत्यादि। नन्वइउण्सूत्रभाष्ये यणस्सानुनासिका निरनुनासिकाश्चेत्युक्तमिति तद्दत्वापि यणो द्विधा इति कुतो नोक्तमत आह। अम इति। न ङ्ञाविति। अत्र च हयवरट्सूत्रस्थरेफस्यानुनासिकपरसवर्णहिर्वचनप्रतिषे-

धो वक्तव्य इति प्रवट्टकर्त्रं भाष्यमानम्। अनुनासिकयवलानामिति। वा पदान्तस्येति सूत्रेण सवर्णे पदेनैव विधानं न विभिष्याणबोधकशब्देनेति भाव्यमानेनेति निषेधो न शङ्क्यः। हलो यमामिति लोप इति। अस्य वैकल्पिकत्वे इदमेवाण्ग्रहणभाष्यमिति भावः। अभिमानेनेति। अस्य भाष्यसिद्धान्तासम्मतत्वादिति भावः। बहुव्रीहिपञ्चमीतत्पुरुषाविति। इदं पञ्चमीभयेनेति सूत्रे पञ्चमीतियोगविभागेन तत्पुरुषसंज्ञाविधायकमिति मतेन। वस्तुतस्तु तत्पुरुषपदमाचारज्ञिबन्तम्। तेन सुप्सपेति समासस्वङ्ग्रह इति। वर्ण ग्रहणे त्विति। यथा सहिवहोरोदवर्णस्येत्यादौ, तेन उदवोढामित्यादौ वकाराकारस्य हृस्वोत्तरमप्योत्वसिद्धिः। सज्ज्ञेति। ऐजिति यथा। तपकरणादिति। न चायमाकारार्थो गुणभेदकत्वे नैव सङ्ग्रहसम्भवात्। ननुतपरकरणस्यासन्देहार्थतया पूर्वार्थत्वं सम्भवत्येवेत्यत आह। भाष्यप्रामाण्यादिति। एओङ्ऐऔजितिसूत्रस्थभाष्यप्रामाण्यादित्यर्थः। तत्र हि खट्वेन्द्रः खट्वैलकेत्यादौ त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रादेशाः प्राप्नुवन्तीत्याशङ्क्य तपरे गुणहृद्धी इत्यादिना समाहितम्। इदञ्चेति। तपरसूत्रञ्चेत्यर्थः। इदं वार्तिककारमतम्। विधिपक्षेऽतोभिसऐसित्यादावष्टादशनां ग्रहणं वारयति। गुणानां भेदकतयेत्यादि। परत्वं विरोधेसत्येव बलवत्त्वं प्रयोजकमतोऽविरोधमुपपादयति। संख्याकृतेति। नहिचिप्लुतोद्विप्लुतव्यपदेशं लभतइतिभाष्यकारोक्तेः। अनवकाशत्वेति। अनणिहृद्धिरादैजित्यादौयदनेनसाध्यन्तद्गुणभेदकत्वे नैवसाधितमिति तपरत्वमतोभिसऐसित्यर्थंतज्ज्ञानवकाशमिति भावः। ननु तद्गुणसंविज्ञानबहुव्रीहिणासंज्ञात्वान्तेविश्राम्यतितत्सम्भवकालवर्णग्राहिग्रहइत्यत आह। अत्रावध्यवधिमतोरिति। तयाचपञ्चम्यर्थेऽतद्गुणसंविज्ञानबहुव्रीहिणावर्णमात्रस्यैव संज्ञात्वं बोध्यतेतत्सम्भवकालस्य ग्राहिग्रहएवेति भावः। एवं सतिविभिष्टादत इत्यादौ विभक्त्युत्पत्तिः कथमत आह। सौत्वादिति। भाष्यकारमतमाह। जातिपक्ष इति। सवर्णग्रहणानुवृत्ते रिति। तपरः सवर्णस्य चेद्ग्राहकस्तदासम्भवकालस्यैव नान्यस्येति नियमः पर्यवसन्न। एवं विधनियमः सवर्णग्रहणानुवृत्तिमन्तरा न सम्भवतीत्यत्र पक्षे सवर्णग्रहणानुवृत्ते रित्युक्तमिति भावः व्यक्तिपक्षेऽप्याह। एवं गुणानामिति। ननु तात्पर्यग्राहकत्वे रविति सूत्रेणाप् यवस्त्व इत्यादावेव स्यान्नतु लवः पव इत्यादाविवत्यत आह। ऋदोरविति। पञ्चमीसमासाभाव इति। नेदमश्चमीसमासस्याकर्त्तव्यत्वाभिप्रायेण किन्त्वादौ यदा बहुव्रीहिसमासो दर्शितस्तदा तकारो मुखसुखार्थ एवेति भावः। तपरसूत्रे दकारग्रहणेषपक्षे त्विति। अयं भावः किरति गिरतीत्यादौ खरितत्ववारणाय तिति प्रत्ययग्रहणं कर्त्तव्यमित्युक्तम्। ततो ऋत इत्यत्र नैष तकारः कर्त्तव्यः दकारः यदि दकारो दीर्घस्य ऋकारस्य दीर्घः प्राप्नोतीति शंकाभाव्यमानत्वे न परिहृत्य यदि भाव्यमानो न ग्राहकस्तदाऽदसोसेरित्यादौ दोष इत्याशंक्य भाव्यमानोऽप्युकारस्वर्णान् गृह्णातीत्यदयन्दिव उदिति तपरकरणङ्करोति इत्युक्तं। ततोदिव उदित्यत्र वकारस्यार्द्धमात्रिकस्यान्तर्यतो मात्रिक एवोकारोभविष्यतीत्याशंक्य द्युभ्यामित्यादौपरत्वाल्लिङ्गदग्रहणानुवृत्तिपक्षे ऊठिकृतेऽपि द्विमात्रस्योकारस्य पुनःप्रसंगविज्ञानात् मात्रिकोयथास्यादित्येवमर्थन्तपरत्व

रितत्वं द्युभ्यामित्यादौ प्राप्नोतीति दकारस्तपरसूत्रे प्रश्लिष्यत इति च त्वस्यासिद्धत्वात्वगुत्वं न भवति सौचत्वात्, अत्र दकारप्रश्लेषपक्षे त्विति तुनाऽरुचिः सूचिता सा च द्युभ्यामित्यादौ स्रंसनधर्मिणो वकारस्यान्तरतमेऽनुदात्त उकारे कृते दकारेकारस्योदात्तस्य यणि उदात्तस्वरितयोरिति सूत्रेणोकारस्य स्वरितत्वं प्राप्नोतीत्युकारस्योदात्तत्वनिपातनीयम्। एवञ्च तेनैव निपातनेनेति स्वरितमित्यस्यापि बाधसिद्धौ दिव उदस्तान्तत्वेपि न च्छतीरिति तदेतदच्छति अयमुकारोऽन्तोदात्तो निपात्यते तेन द्युभिरक्तुभिरित्यत्रान्तोदात्तत्वं पञ्चमीं नविरुध्यत इति। द्वन्द्विरादेच्। इदम्पदत्रयमिति। द्वन्द्वः आत् ऐजिति भाष्ये पदविभागप्रदर्शनात् द्वन्द्विशब्दोऽत्रपक्षे आद्वृत्योर्ह्यभ्यामन्वेति असन्देहार्थतयेति। एतेनाकारार्थत्वमस्य नेति ध्वनितम्। तदेतदुपपादयति। प्रकृतसूत्र इति। परार्थमपीति। तात्पर इति पञ्चमीसमासाश्रयणात्। भेदाभेदरूपतादात्म्यस्य स्वीकारे याट्शो वाक्यार्थबोधोऽन्यत्र प्रसिद्धस्तन्दर्शयति। रामेतीति। रामेति द्वयचरन्नाम मानभङ्गः पिनाकिनः। शौर्यभङ्गो रावणस्य मदभङ्गश्च वालिन इति। अत्र भेदाभेदयोर्मध्ये भेदो व्यावहारिकोऽभेदः प्रातिभासिकः। न तु द्वौ समसत्ताकौ विरोधात्। अभेदस्य प्रातिभासिकत्वादेवं तादृशशुक्तिरजतेन कटकादिवन्न सुखादिदाहः। शब्दार्थयोस्तादात्म्यादेव सर्वेषु सञ्ज्ञाशब्देषु सञ्ज्ञासञ्ज्ञिनोः सामानाधिकरण्ये न निर्देशः सङ्गच्छते। तथा तत्तत्सञ्ज्ञासूत्राधीनोऽभेदबोध एव। संज्ञासंज्ञिभावस्तु, फलितः। संज्ञात्वन्तु व्याख्यानादिति। एकस्यानेकाः समानफलिकाः सञ्ज्ञा न प्रमाणसिद्धाः। एतच्चानाकृतिः सञ्ज्ञेत्यादिना भाष्ये एव स्पष्टम्। ननु द्वन्द्विशब्दस्य सञ्ज्ञात्वे विधेयता वाच्या सा च न सम्भवति उद्देश्यस्य पूर्वमप्रयोगादत आह। विधेयत्वेऽपीति। मङ्गलार्थ इति। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति भाष्योक्तेः। सञ्ज्ञासूत्राणां नियमार्थत्वं प्राचीनोक्तं कटाद्यर्थत्वोक्तं। सर्वशब्दानामिति। योगिदृष्ट्या, तेषां सर्वशब्दार्थज्ञानात्। सामान्यतः। सामान्यरूपेण, तच्च रूपं केवलान्वयि प्रमेयत्वादिकम्। तथा च सामान्यलक्षणया सर्वशब्दार्थानां ज्ञानसम्भवेऽपि यावच्छक्यतावच्छेदकस्याखिलशक्तितावच्छेदकस्य चाज्ञानात्तत्तद्धर्मावच्छिन्नविशेष्यकस्य शक्तिग्रहस्याभावेन तत्तद्धर्मावच्छिन्नविषयकशाब्दबोधसम्भ-

व इति भावः। एतेन सामान्यत इति प्रतीकमुपादाय इदञ्चित्त्वम् घटा इति सामान्याकारस्य तस्य बोधोपयोगित्वदर्शनात्। सर्वं विष्णुमयञ्जगदित्यादौ गत्यन्तराभावादिति यत्तत्परास्तम्। समानधर्मप्रकारकबोधे तु तद्धर्मावच्छिन्नविशेष्यकयत्किंचिद्धर्मस्य सर्वे घटा रूपवन्त इत्याकारकवाक्यजन्यशब्दबोधहेतुतायां अनुभवसिद्धत्वात्। सर्वशब्दस्य चोद्देश्यतावच्छेदकव्यापकविधेयव्याप्ययर्याप्तिको धर्मः प्रवृत्तिनिमित्तम्। उद्देश्यतावच्छेदकव्यापकत्वञ्च तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वम्। विधेयव्याप्यत्वञ्च स्वाभाववद्वृत्तित्वतत्सम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विधेयतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्त्वमतो न सर्वे घटाः प्रमेयत्ववन्त इत्यादौ विधेयतावच्छेदकावच्छिन्ननिरूपितस्य स्वाभाववदवृत्तित्वरूपव्याप्यत्वस्योद्देश्यतावच्छेदकव्यापकधर्मेऽप्रसिद्धावपि क्षतिः। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य सुलभत्वात्। इत्थञ्च तादृशो धर्मस्सर्वे घटा इत्यादौ घटनिष्ठयावत्त्वमेव। एवमेव सर्वं विष्णुमयं जगदित्यत्राप्युपपत्तिः। अत्र जगत्पदस्प्रागभावप्रतियोगिपरम्। विष्णुमयपदार्थस्य विष्णुसमवेतकृतिप्रयोज्यपरतया प्रागभावप्रतियोगित्वव्यापकं तादृशं यावत्त्वं सुलभमेव। तत्तत्स्थाने प्रसिद्धानां व्यवहाराणामेकवाक्यतामाह। तत्रैवेत्यादिना। एषामिति। संज्ञाशब्दानामित्यर्थः। आसामितिस्वेच्छया कृतानां सञ्ज्ञानामित्यर्थः। अत एवानित्यत्वादेव। एतेन नियमार्थत्वं फलितम्। न तु शब्दमर्यादालब्धम्। किन्तु यस्य सञ्ज्ञा कृता तस्यैवोपस्थितिर्नान्यस्येति। कृतः। अस्य हरिणेति शेषः। ननु पाणिनिकृतसञ्ज्ञानामनादित्वाभावाच्छास्त्रविषयता न स्यादसाधुत्वादत आह। आसाञ्चेति। गिष्टेति। शब्दतत्त्वविद्भिः। एतेन भाषानुसारेण क्रियमाणानां लौकिकसञ्ज्ञानामसाधुत्वमिति सूचितम्। केचित्तु सञ्ज्ञाविषये यदि यथोद्देशपक्षस्तदा स्वप्रदेश एव वाक्यार्थबोधस्तस्मिन्काले चाविधीयमानत्वाच्चिमाचादीनामपि तपरत्वाभावे वृद्धिसञ्ज्ञा स्यात्तदा खट्वेन्द्रादौ चिमाचादिव्याहृत्यर्थन्तपरत्वं परार्थमिति सम्भवति। कार्यकालपक्षे तु विधिशास्त्रैकवाक्यतया भूजेर्हरित्यादिशास्त्रैकवाक्यतया सञ्ज्ञासूत्राधीनो बोधो वाच्यः। एवञ्चैचो विधेयतया न सवर्णग्राहकतामात्रेण इति न तपरकरणमपरार्थमित्याहुस्तन्दूषयितुमुपक्रम-

ते । कार्यकालपक्ष इत्यादिना । अत एव , सङ्ग्रासूत्रस्य सप्तपूर्णस्योपस्थितिसत्त्वादेव । अत्र पक्षे । कार्यकालपक्षे । एतेन वाक्यैकवाक्यताविधिसूत्रैरिति सूचितम् । वाशब्दस्येति । धातुसूत्रेष्वर्थनिर्देशस्यापाणिनीयत्वेन वा इत्यानुपूर्व्याश्चोभयत्र समानत्वेन विकल्पार्थकवाशब्दस्यापि श्वादित्वमिति भावः । पदत्वानापत्तेरिति । अत्र के चित् निपातस्यानर्थकस्येति वार्त्तिकेऽनर्थकग्रहणमज्ञात्वा निपातसामान्यस्य तेन प्रातिपदिकत्वेऽस्यापि प्रातिपदिकत्वसम्भव इत्याहुः स्तम्भसूत्रारम्भकारके वार्तिकाभावे तद्धीत्यैतत्प्रयोजनकथनात् । भाष्यरीत्या दिवशब्द एवाव्युत्पन्ने क्रियावाचिन इत्यस्यप्रयोजनमस्तु । क्रियात्वाभावादितिकालपरिच्छेद्यत्वस्य क्रियात्वव्यापकत्वात् क्रियाभेदाय कालस्त्विति हर्य्युक्तेःसौत्राणां धातुत्वमुपपादयति । स्तम्भ्वादीनामिति। प्राग्रीश्वरात्। रीश्वरादिति ल्यब्लोपेपञ्चमी रीश्वरशब्दमभिव्याप्येत्यर्थबोधनाय । एषामिति । प्रादीनां चादीनाञ्चेत्यर्थः । द्योतकत्वमिति। अत एव प्रजयतीत्यत्र प्रकर्षस्य प्रशब्दद्योत्यस्य - धात्वर्थविशेषणत्वसिद्धिः । द्योतकत्वञ्च समभिव्याहृतपदजन्यबुद्धौ बोधकत्वम् । पदजन्यञ्च शक्तम् । तच्च प्रादिसभिव्याहारज्ञानस्य तत्तत्पदजन्यतत्तदुपस्थितौ सङ्केतकारित्वकल्पनयोपपद्यते अत एवानुभूयते सुखम् साक्षात्क्रियते गुरुरित्यादौ कर्मणि लकारस्येश्वरमनुभवतीत्यत्र कर्मणि सुपश्चसिद्धिः । न चैतेष्वनुभवादिरन्वादिनिपातानामेवार्थः, स्वस्वयुक्तनिपातार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति नानुपपत्तिरिति वाच्यम्। अनुगच्छतीत्यादितोऽप्यनुभवानुकूलव्यापारबोधापत्तेः । संयोगात्मकफलावच्छिन्नव्यापारेऽनुशब्दार्थान्वयासम्भवेन गम्यधातोर्व्यापारसामान्यार्थकत्वस्यास्वीकार्यत्वात् । अनुभवादिनिष्ठविशिष्टानुपूर्वीशक्तावच्छेदिकेति चेन्न । गौरवात् । धातोः फलव्यधिकरणव्यापारावाचकतया सकर्मकत्वानुपपत्तितादवस्थ्याच्च । न च धातोर्न तादृशार्थकत्वं किं तु लक्षणया तत्तदर्थबोधकत्वम् लाक्षणिकार्थमादायैव चेष्टपूर्वोक्तप्रयोजनसिद्धिरिति वाच्यम् । प्रादीनां तात्पर्य्यग्राहकतां विना विलक्षणार्थावगमासम्भवेन द्योतकत्वस्यैव सिद्धिसम्भवात्तात्पर्यग्राहकत्वस्यैव द्योतकत्वात् । उपसर्गाः क्रियायोग इतिसूत्रस्यापि प्रादयः क्रियाविशेषणीभूतार्थतात्पर्यग्राहकत्वे उपसर्गसंज्ञाः स्युरित्यर्थसम्भवात् । एवं प्रतिष्ठत इत्यत्र द्योतकतां विना न निर्वाहः । प्रशब्द-

स्याभावबोधकत्वे धातोरनेकार्थत्वेन गतिबोधकत्वेऽपि गत्यभाव एव प्रतीयते। यदि स्याधातुर्गतिनिवृत्त्यर्थक एव प्रशब्देन चाभावः प्रतिपाद्यत इत्युच्यते तदा गत्यभावत्वावच्छिन्नाभावो ज्ञायेत न तु विलक्षणगतित्वेनातो धातोरेव तादृशार्थकत्वं प्रशब्दस्तात्पर्यग्राहकः एवं चैत्रमिव पश्यतीत्यादौ चैत्रपदस्य चैत्रसादृश्यविशिष्टे लक्षणा इवशब्दस्तात्पर्यग्राहकः। एवं साक्षात्क्रियते अलं क्रियते नमस्क्रियते उरीक्रियते गुरुरित्यादौ तत्तदर्थे वर्तमानात्कृञो लकारस्य कर्मणि सिद्ध्यर्थन्तस्य तत्तद्वाचकत्वमुपेयम्,तात्पर्यग्राहकत्वममीषामस्तु। न च कृञः सकर्मकत्वात्कर्मणि लकारो नानुपपन्न इति वाच्यम् । साक्षात्कारादर्थे न स्यात् क्वचित्सकर्मकत्वात्कर्मणि लकारे विकुरुते वायुरित्यत्रापि स्यात्साक्षात्कारादेरधात्वर्थत्वे तु धात्वर्थफलाश्रयत्वरूपकर्मत्वविशिष्ट एव तत्तद्धातूत्तराख्यातस्य विधानान्न स्यात् न च साक्षात्कारादेः साक्षात्पदादिगम्यत्वमस्तु, तदनुकूलव्यापारस्तु धात्वर्थ इति वाच्यम्। स्वार्थफलव्यधिकरणव्यापारवाचकतया धातोः सकर्मकत्वाभावापत्तेः। किञ्च साक्षात्पदार्थस्य नामार्थतया धात्वर्थे भेदसम्बन्धेनान्वयेऽपि नस्यात् विशेषतासम्बन्धेन भेदसम्बन्धावच्छिन्ननामार्थप्रकारताकशाब्दबोधे प्रत्ययजन्योपस्थितेर्हेतुत्वस्यौदनः पचतीतिवाक्यात् कर्मत्वसंसर्गकबोधवारणाय स्वीकरणीयत्वात्। एवं पटो घटश्चेत्यादौ समुच्चयोपि द्योत्य एव, अन्यथा शोभनः समुच्चय इतिवच्छोभनश्चेत्यस्याप्यापत्तिः। न च चशब्दार्थसमुच्चयस्य नित्यपरतन्त्रतया न विशेषणान्वय इति वाच्यम् किञ्चिन्निष्ठप्रकारतानिरूपितविशेषतासम्बन्धेन शाब्दबोधे इतराविशेषणतया पदजन्योपस्थितेर्हेतुत्वेन वाचकत्वस्वीकारे तथोपस्थितेः सत्त्वाच्छाब्दबोधे शोभनादिविशेषणान्वयसंभवात्, एवञ्चकारशक्यार्थस्य समुच्चयस्य षष्ठीं विनाऽनन्वयापत्तिश्च स्यात्। विभक्त्यर्थमद्वारीकृत्य नामार्थयोर्भेदेनान्वयबोधायोगात् अन्यथा राजा पुरुष इत्यत्रापि तदापत्तेः । धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्यपि वाचकत्वपक्षे स्यात्, यदि च समुच्चिताभिधायकत्वं चकारस्योपेयते एवं च भेदाभावान्न घटादिपदेभ्यः षष्ठी शब्दशक्तिस्वाभाव्यात्तस्यासत्त्वरूपतैव धातूपस्थाप्यार्थस्यैवोपेयत इति मन्यसे तदा धर्म्यंशस्यान्यलभ्यत्वात्तत्र पुनश्चस्य शक्तिकल्पने गौरवम्। न च षष्ठीवारणान्यथानुपपत्त्या फलमु-

खत्वेन नायं दोष इति वाच्यम्। घटः पटश्चेत्यत्र पटपदार्थस्य समुच्चये प्रतियोगितासम्बन्धेनान्वयो वाच्यस्य च पदार्थैकदेशत्वान्न स्यादिति द्योतकत्वस्वीकारस्यावश्यकत्वात्। एवं शरैरुस्रैरिवोदीच्यानुद्वरिष्यन् रसानिवेत्यत्रापि वाचकत्वेऽगतिः। उस्रपदोत्तरतृतीययोस्रपदार्थस्य करणत्वं प्रतिपादनीयमत्र न संभवति। उदीच्यकर्मकोद्धारे उस्राणामकरणत्वात् इवशब्दस्य सदृशार्थकत्वेऽप्यसत्त्वार्थकतया तदुत्तरतृतीयाया अभावेनोस्रसदृशाभिन्नैः शरैरितिबोधासम्भवात्। यदि त्वव्ययादिति ज्ञापकात्सर्वविभक्त्युत्पत्तिः स्वीक्रियते तदोस्रपदोत्तरतृतीयानन्वयप्रसङ्ग इति समभिव्याहृतपदार्थे उपमानत्वस्याभेदान्वयस्य च द्योतक इवशब्द इति स्वीकार्यमिति न कापि क्षतिः। एवमेव वागर्थाविव सम्पृक्तावित्यत्राप्यूह्यमिति दिक्। वाचकत्वस्येति। अयमाशयः। यथा 'घटमानयेत्यादिवाक्यात्प्रथमं बोधः प्रयोज्यवृत्तस्येति बालस्य यद्यप्यन्वाचिते शक्तिग्रहस्तथाप्यावापोद्वापाभ्यां घटादिपदस्यैव वाचकत्वं कल्प्यते तथेहापि निपातानामन्वयव्यतिरेकाभ्यां सिध्यति। न च प्रतिष्ठत इत्यादावुक्तानुपपत्तिरिति वाच्यम्। प्रकारतासम्बन्धेन धात्वर्थे विशेष्यकबोधे कारकविभक्तिनिपातान्यतरजन्योपस्थितेर्हेतुत्वस्य कल्पनात् निपातातिरिक्तत्वं-विशेषणं नामार्थधात्वर्थयोरभेदान्वयबोधप्रयोजकव्युत्पत्तौ देयम् नामार्थयोरभेदान्वयप्रयोजकव्युत्पत्तावप्येवम्। वाचकत्वादेव ननेत्युक्तेऽभावमात्रप्रतीतिः सार्वजनीना निर्वहति। न च प्रसज्यप्रतिषेधार्थकनञः क्रियान्वयनियमभङ्ग एवं सति स्यादिति वाच्यम्। गम्यमानक्रियामादाय कर्मान्वयं मया इत्यत्रेव तदुपपत्तेः। अथ वा प्रकृत्यादिधर्माः प्राद्यर्थस्तथा च स्तोकं पचतीत्यादिस्थलवदभेदान्वयसम्भवः। न च निपातानां वाचकत्वे घटादिपदानामिव केवलानामपि प्रयोगः स्यादिति वाच्यम्। केषाञ्चिन्नञादीनां तथात्वस्येष्टत्वात्। कुत्र चित्तु 'ते प्राग्धातोरिति सूत्रस्य नियामकत्वात् कुत्र चित्तु प्रकृतिप्रत्ययययोरिव स्वभावतः केवलप्रयोगस्वीकारात्। एवं सति यत्र द्योतकतां विना न गतिस्तत्र द्योतकत्वस्यैव स्वीकार उचित इति नास्माकमेकतरपक्षाग्रह इत्याशयेनाह। यथाकार्यं यथाप्रयोगमिति। विशेष्यतयेति। द्रव्यावृत्तिविशेष्यताकोपस्थितिजनका इत्यर्थः। अत्र द्रव्यपदं न गुणाश्रयपरम् किन्तु वस्तूपलक्षणम्। यत्र सर्वनाम

युज्यते द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः इति लक्षणलक्षितमेव दृश्यं । वस्तूपलक्षणम् । वस्तूपलक्ष्यते परामृश्यते येन तत्सर्वनाम यच्च परामर्शाय युज्यते सोऽर्थो द्रव्यमित्युच्यते । अथ वा भेद्यत्वेन लिङ्गसंख्यानिरूपितविशेष्यत्वेन विवक्षित इत्यर्थः । क्रियाविशिष्टेति । प्रकर्षविशिष्टपूरणादिक्रियेत्यर्थः । अद्रव्यार्थाः किम् । पचः । इत्यर्थबोधना येति । क्रियायामित्येवास्तु । अवेतीत्यस्याध्याहारेण क्रियायोग इत्यर्थलाभसम्भवादिति भावः । समावेशार्थमिति । अन्यथा आकडारीयत्वात्स नस्यात् । निपातत्वायेति । तेन प्रगत आचार्यः प्राचार्य इत्यादावव्ययपूर्वपदप्रकृतिस्वरसिद्धिः । नन्वेतन्निपातसञ्ज्ञाया न फलम् । उपसर्गप्रतिरूपकत्वादेवाव्ययत्वसिद्धेरत आह । एतत्सिद्धमेवेति । योगविभागसिद्धमेवेत्यर्थः । अनुकार्यानुकरणयोरिति । इदम्प्राचामनुरोधेन । अनुकरणमनुकार्याद्भिन्नमेवेति सिद्धान्तिमते सुबुत्पत्तावपि प्रकृतिवदित्यतिदेशेनाव्ययत्वाद्विभक्तेर्लुक् अनुकार्यस्वरूपभङ्गभिया च पदान्तत्वप्रयुक्तं कार्यन्न । सान्तग्रहण इति । यथा निसस्तपतावनासेवने इत्यत्र । यत्र तु रुत्वप्रसिद्धन्तत्र । यथा न सुदुर्भ्याम् निरः कुषः सुदुरोरधिकरण इत्यत्र । यत्र तु रुत्वस्य सिद्धत्वमिति । स्फुरतिस्फुलत्योर्निर्निविभ्य इत्यत्र । यथा षत्वणत्वयोः । अत्र छेदः । तद्विषयोपसर्गत्वप्रतिषेधपरे वार्तिके इति । इदं वार्तिकं यद्यपि गतिश्चेति सूत्रे पठितन्तथाप्युपसर्गसञ्ज्ञायाः कार्यकालत्वेन प्रतिषेधवचनस्य रुत्वापेक्षया परत्वं बोध्यम् । एतच्च इह णत्वं माभूदिति भाष्यकारोक्त्या दुःस्थितमित्यस्यार्थे दुःष्ठितमित्याद्यप्रयोगादर्शनाच्चाध्यवसीयते । सान्तस्यापि ग्रहणमिति । तेन दुःसेधतीत्यत्र कदापि षत्वन्न । अत एव । वार्तिके उभयोर्ग्रहणादेव । यदि रेफान्तस्यैव ग्रहणं स्यात् तदा सान्तपूर्वकस्य षत्वे सिद्धे सुषामादिषु षत्वार्थं तत्पाठो व्यर्थः स्यादिति भावः । उपसर्गत्वाभाव इति । क्रियाविशेषणीभूतार्थद्योतकत्वाभावात् । न च यदा दुरूपूर्वकात्कुस्तदा वार्तिकेन निषेधे प्राप्ते षत्वार्थं पाठस्यावश्यकत्वेनात एवेत्यसङ्गतमिति वाच्यम् । उणादिष्युत्पन्नानां सञ्ज्ञाशब्दतया तस्यानभिधानादिति । न च निस् निर् इत्यनयोस्स्वीकारे स्वरतिसूतीति विकल्पानन्तरन्निरः कुष इत्यस्य वैयर्थ्यम् । एकाच उपदेश इति सूत्रानन्तरं रेफान्तनिर्घटितं निरः कुषोऽनिष्ठायामिति परनीयन्तेन सान्तोपपदे रुत्वस्यासिद्धत्वादि-

ङ् न भविष्यतीति रूपद्वयसिद्धौ लाघवसम्भवादिति वाच्यम्। अनिष्ठायामित्यस्य पर्युदासत्वे क्ङित्स्वेव प्रवृत्त्यापत्तेः। प्रसज्यप्रतिषेधे तु न लाघवम् वः। लोकेऽर्थपदार्थकस्येति। यथा घटः पट इत्यादौ घटादिपदाच्छब्दप्रकारिकार्थोपस्थितिर्यद्यपि भवति तथापीतिशब्दसमभिव्याहारे घट इत्यादौ न शब्दप्रकारिकोपस्थितिस्तथाऽत्र शास्त्रेऽग्नेर्ढगित्यादौ स्वं रूपमितिपरिभाषणाच्छब्दस्यैव प्राधान्येन भानम्। इतिशब्दसमभिव्याहारे तु शब्दप्रकारिकैवोपस्थितिरित्येव पदार्थविपर्यासकक्त्वम्। यद्यपि शब्दार्थौ द्वावपि पदार्थौ तथापि तयोर्य्या विषयता तद्विपर्यासकक्षमेव पदार्थविपर्यासकक्त्वमिति भावः। अनुवादवाक्य इति। यथा आः किमेतदिति क्रोधादाभाष्य महिषासुर इत्यत्र इति हेतुस्तदुद्भव इत्यत्र च जयेति देवाश्च मुदा इत्यादौ च। निषेधविकल्पयोर्विभाषासञ्ज्ञाविधानोपयोगं दर्शयितुमुपक्रमते। प्राप्तविभाषास्विति। वैरूप्याद्वाक्यभेदापत्तेश्चेति। यतो नैकत्रोभयरूपेण प्रवृत्तिः किन्त्वेकत्र विधिमुखेनापरत्र निषेधमुखेन एवञ्च वैरूप्यमिति। सूत्राद्वृद्धा क्ङ चिद्विधिमुखेन क्ङ चिन्निषेधमुखेन प्रवृत्तौ वाक्यभेदापत्तिरिति भावः। प्राप्तविभाषा यथा तिरोऽन्तर्द्धाविति सूत्रे चादन्तर्द्धावित्यनुवर्त्तमाने विभाषा क्रञीति, अत्र भावांशस्य सिद्धत्वात् पक्षे निवृत्तिफलिकैवास्य प्रवृत्तिरित्यादि। अप्राप्तविभाषा यथा विभाषोयममने, अचोपयमनं गन्धनाङ्गं विवक्षितम् यदा तदा यमो गन्धन इति नित्यमेव शास्त्रमपूर्वविप्रतिषेधन प्रवर्त्तत इति तत्सूत्राविषयएवैतत्सूत्रप्रवृत्तिर्वाच्या तत्राभावांशस्य सिद्धत्वाद्विधिमुखेनैवास्य प्रवृत्तिः। विभाषा श्वेरित्यादावुभयत्र विभाषासु उभयमुखेनैव प्रवृत्तिर्वाच्या सा पूर्वोक्तरीत्या न सम्भवतीति सूत्रस्यावश्यकतेति भावः। काक्वादिगोचरकत्वायेनोभाभ्यामितिशब्दः सम्बध्यत इति प्राचामुक्तिं खण्डयति। इति शब्दस्येति। जातिव्यक्तिपक्षयोरिति। जातिपक्षे क्वचिदेकरूपेण प्रवृत्तावपि चारितार्थ्येन सूत्रं सार्थकमिति वैरूप्यमेकस्य विभाषाश्वेरित्यस्योभयरूपेणप्रवृत्तौ सम्भाव्यत इति न वेति सूत्रमावश्यकम्। व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणभेदात्क्वचिन्निषेधमुखेनैकस्य क्वचिद्विधिमुखेनापरस्य प्रवृत्तिर्भविष्यतीति नार्थः सूत्रेणेति प्राचामुक्तिः सा न युक्तेतिभावः। यत्त्वेतदचिन्त्यम् अग्निष्टो वा विदितत्वादिति प्रत्याख्यानभाष्ये वाशब्दस्वारस्येन तस्य पाक्षिकत्वलाभाज्जातिव्य-

क्तिपचमाश्रित्यारम्भानायेत्यभिप्रायेण व्याख्यानमुचितमिति तन्न अग्निषेत्यत्वरस्वरस्यभङ्गापत्तेः । सूत्रस्य प्रयोजनकथनसमये एकस्यैव सूत्रस्य प्राप्तिविषयेऽप्राप्तिविषये चोपयोगाभावमुपपाद्योभयविभाषायां विभाषा श्वेरित्यत्र विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिरित्यनेनाप्येकस्यैव वैरूप्येणाङ्गत्तिमङ्गा कृत्वा सिद्धं तु पूर्वेणोत्तरस्य बाधितत्वादित्यनेन श्रुतक्रमानुरोधेन सञ्ज्ञानोर्निषेधविकल्पयोर्विधिप्रदेशे उपस्थित्या सञ्ज्ञाभेदेन वाक्यभेदं व्युत्पाद्य सा शङ्का परिहृता । एवञ्च यथारम्भपक्षे शङ्कासमाधानाभ्यामेकस्यैव लक्षणस्य निर्दिष्टत्वप्रतिपादितन्तथैवाग्निष्टो वेतिप्रत्याख्यानभाष्येपि व्याख्यानमुचितम् न तु वक्तिपचेऽनावश्यकत्वाभिप्रायेणेति दिक् । ननु स्वं रूपमितिसूत्रस्य सञ्ज्ञास्वरूपबोधकत्वं न सम्भवति सामानाधिकरण्यानोभयोरनिर्देशात् नापि स्थान्यादेशभावबोधकत्वम् सूत्रस्यैव वैयर्थ्यात् नाप्यागमागमिभावस्य लिङ्गानुपलम्भात्। अतस्सूत्रारम्भसार्थक्याय बोध्यमित्यस्याध्याहार एवेत्याशयेनाह । व्याख्यानादिति । नियमार्थमिति । स्वं रूपमेव बोध्यमित्यर्थः । उभयं सञ्ज्ञीति । रूपग्रहणसामर्थ्यात् । प्रकृतिप्रत्ययादीति । आदिना निपातपरिग्रहः ॥ उपपादितमेतत् । शास्त्रीयोपीत्यपिना लौकिकपरिग्रहः । तत्र प्रकृते शास्त्रीयार्थग्रहणाददो जग्धिरिति जग्धादेशो मदी हर्ष इतिधात्ववयवाच्छब्दस्य न, अर्थवतः प्रत्ययस्य ग्रहणात्सन्यङोरिति द्वित्वमृतेरीयङिति विहितेयङि न प्रवर्त्तते उपसर्गस्यार्थवतो ग्रहणादुदः स्थास्तम्भोरिति पूर्वसवर्णो गर्मुत्स्थानमित्यादौ न। मुख्यः प्रसिद्धश्चेतीति । अत्र श्रीघ्रोपस्थितिकत्वेनान्तरङ्गत्वं बीजं मुख्य इत्यस्य मुख्यमिव प्राथमिकोपस्थितिविषय इत्यर्थो न तु प्रकारतानात्मकविशेष्यताश्रय इत्यर्थः तत्र मुख्य इत्यनेन गौणलाक्षणिकस्य व्यावृत्तिः । एतेनाग्निसोमौ माणवकावित्यत्रेदग्नेरिति नाप्रसिद्धत्वमित्यनेन सञ्ज्ञाशब्दव्यावृत्तिः ॥ तेन सञ्ज्ञाशब्दस्यापत्यमित्यत्र राजश्वशुराद्यदिति न । न तु वर्णग्रहण इति । तेनैङो णचीत्यादौ न परिभाषाप्रवृत्तिरन्यथा दद्घतेत्यादावेव यणादिः स्याद्व तु अचत्यरेत्यादौ तस्मादित्युत्तरस्येत्यादिनिर्देशोप्यत्र मूलम् । ई ह्यघोरित्यत्र चरितार्थेनेति । अत इत्यनुवृत्तेति भावः। पूर्वोक्तं सूत्राशयवर्णनमात्रमिष्टाशयेनाह । भाष्ये त्विति । द्वितीयप्रयोजनान्यथासिद्धिमाह । उपस्थितार्थेति ।

षष्यब्दस्य सञ्ज्ञात्वेत्यपि व्यर्थमित्याह । लक्ष्यानुसारादिति । अत एव, सूत्राभावादेव । हृत्वादिष्विति । विभाषाहृत्वेतिसूत्रे । यत्नः कर्त्तव्य इति । तदुक्तं भाष्ये सित्तद्विशेषाणां हृत्वाद्यर्थम् पित्पर्यायवचनस्य च स्वाद्यर्थम् । चैन विशेषाणां स्वरूपस्य सङ्ग्रहः । जित्पर्यायवचनस्यैव राजाद्यर्थम् । भित्तस्य च तद्विशेषाणां च मत्वाद्यर्थम् । अस्यैकस्य पर्यायवचनस्येयते मीनान् हन्ति मैनिक इति । ननु यदा षष्यब्दस्य सञ्ज्ञात्वकरणेन ज्ञापकेन स्वरूपाग्रहणमिति स्वीक्रियते तदा नदीपौर्णमासीत्यत्र नदीपदेन स्वरूपग्रहणं न प्राप्नोतीत्यत आह । ज्ञापकसिद्धेऽपीति । अत एव, ज्ञापकसिद्धस्यासार्वत्रिकत्वादेव । येनेति करणे तृतीयेति । कर्त्तरि तु न सम्भवति षष्ठ्या बाधात् नापि हेतौ करणतृतीयायाः कारकविभक्तित्वेन प्राबल्यात् । न लक्षणेति । कर्तृकर्मणोः कृतीति सूत्रारम्भात् यदि सुब्विभक्तावपि लक्षणा स्यात्तदा तद्विषये शेषे षष्ठीं विधाय लक्षणया कर्तृत्वकर्मत्वाभ्यामेव बोधस्याप्युपपत्तिं कृत्वा कर्तृकर्मणोरिति सूत्रस्यानारम्भ एव कार्यः न केवलं सुब्विभक्तावेव न लक्षणा किन्त्वन्यत्रापीत्याह । किम्वृत्तेति । प्रत्ययः पुंयोगादिति । आद्ये प्रत्येतिमहासंज्ञाकरणेन प्रत्यायतीति प्रत्यय इत्यनेन यस्मिन्नर्थे शब्देन विधानं कृतं तत्रैव साधुत्वं भवति नान्यत्रेत्यनेन लभ्यते साधुत्वविधानपर्यन्तं शास्त्रव्यापारात् । एवं परश्चेति सूत्रे तस्य प्रयोगनियमार्थत्वं व्यवस्थापितम् प्रत्ययः परो भवत्येवेतिहि नियमस्तस्मात्कल्पाः । एतेन प्रकृतेः प्रत्ययासमभिव्याहारे साधुत्वमुक्तप्रायम् । पुंयोगादिति सूत्रेऽपि किं पुनरिहोदाहरणम् । प्रष्ठी प्रष्ठेरी कथम् पुनरयं प्रष्ठशब्दोऽकारान्तः स्त्रियां वर्तते तस्येदमित्यनेनाभिसम्बन्धेन यद्येवं पुंयोगादाख्यायां तद्धितलुग्वचनं कर्त्तव्यम् तस्येदमिति प्राप्नोति न तर्हीदानीमिदम्भवति प्राष्ठाः इमाः प्राचार्य्य इमाः भवति च विभाषा लुग्वक्तव्यः । यदा लुक् तदा प्रष्ठी यदा न लुक् तदा प्राष्ठी यद्येवं नार्थो लुका विभाषा तद्धितोत्पत्तिः । यदा तद्धितोत्पत्तिस्तदा प्राष्ठी यदा न तद्धितोत्पत्तिस्तदा प्रष्ठी । एवमपि लुग्वक्तव्यः । न ह्यन्तरेण लुकं परार्थे शब्दो वर्त्तते । अत्र परार्थे शब्दो न वर्त्तत इति सामान्यतोभिधानेन प्रकृतेः प्रत्ययस्य प्रसिद्धसूत्रार्थम्परित्यज्यान्यत्र वृत्तिर्नास्तीति स्पष्टमेव लभ्यते ततो यदि पुनस्तस्यामेव प्रष्ठशब्दो वर्त्तते कथं पुनस्तस्यामप्रतिष्ठमानायाम्प्रष्ठशब्दो वर्त्तते यथैव ह्यभावकुर्वती किञ्चित्यापं तत्कृतान्वयव-

न्यनक्लेशान् न्ते। एवम्प्रष्ठशब्दमपि लभत इत्युक्तम्। एतेन भाष्यप्रघट्टकेन न च्छान्तरेणित्यत्र तत्स्वारस्येन प्रकृतिमात्रस्य लुकमन्तरा तद्धितार्थे वृत्तिर्नास्तीति प्रतिपादितमिति लक्षणया वृत्तिर्नेति स्पष्टमेव लभ्यते। अग्रिमस्य यदि पुनरित्यस्य प्रस्थानादिक्रियाया यथाकथञ्चित्समर्थाचरणादिना कर्तृत्वात्प्रष्ठशब्दप्रवृत्तिर्भविष्यतीत्यभिप्रायः। यथा पञ्चभिर्हलैः क्षषतीत्यत्र प्रतिविधानात्कर्तृत्वमिति कथं पुनस्तस्यामिति यदा प्रतिविधानमपि नेति भावः। तत्कृतान् भर्तृपापकृतान्' तथा च भर्तृसम्बन्धाद्भाम्पत्यरूपाद्यथा वधबन्धनादिजनितक्लेशानुभवस्तस्यास्तथा तच्छब्दस्यापि तत्सम्बन्धादेव प्रवृत्तिरितिभावः। सा च तत्र प्रष्ठत्वरूपप्रवृत्तिनिमित्तारोपरूपा एवञ्चारोपितप्रष्ठत्वप्रवृत्तिनिमित्तकोऽत्र प्रष्ठशब्दः स्वार्थ एव प्रवर्त्तते शक्यतावच्छेदकारोपात्मिका लक्षणा यत्र शास्त्रेण यस्य साधुत्वमन्वाख्यायते ततोऽन्यत्रापीष्यते एव। लक्षणया साधुत्वाभाव इत्यस्य त्वयभावः शक्यतावच्छेदकातिरिक्तधर्मप्रकारकबोधफलिकान्यधर्मावच्छिन्ने शक्यसम्बन्धप्रयोज्या लक्षणा नास्त्येवेति गौणमुख्यविभागस्यापि शब्दस्य स्वीयप्रवृत्तिनिमित्तप्रकारकप्रतीतिविशेष्यप्रसिद्ध्यर्थकत्वं मुख्यत्वम् तद्धर्मप्रकारकप्रतीतिविशेष्याप्रसिद्ध्यर्थत्वञ्च गौणत्वमित्युपपत्तिरिति दिक्। इतरव्यावृत्तिकरणम्। विशेष्यप्रकारकेतरभेदानुमितिकरणज्ञानविषयीभवनमित्यर्थः। अन्येन चान्यस्येति। अन्यशब्दसम्बन्धी यो विधिः सोन्येन भवति तत्र दृष्टान्तः। चैचस्येति। चैचसम्बन्धी यःसंग्रामस्तं हस्त्यश्वरथपदातिभिर्विधत्त इत्यन्वयः। एवञ्च विशेषणसम्बन्धाभावे उद्देश्यसामान्यसम्बन्धित्वेन सम्भाव्यमानं विधेयं विशेषणेन परिच्छिन्नविशेष्यसम्बन्धित्वेन बोधयति। एवञ्च विशेषणस्य करणत्वमुपपन्नम्। अत्र दृष्टान्ते व्यापारान्तरस्यापि संघीभवनादिरूपस्य करणत्वाभिप्रेते हस्त्यश्वादौ यद्यपि सम्भवस्तथापि करणत्वमात्रे दृष्टान्ततेति बोध्यम्। तत्र। विशेष्येषु। तादृशम्। शब्दोपस्थितम्। यथा पादः पदित्यत्र। क्वचित्सति गमक इति। यथा सर्वादीनि सर्वनामानीत्यादौ। तत्रेति। विशेषणञ्चेत्यर्थः। अन्तरङ्गत्वादिति। इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यमात्रस्य तत्र सम्बन्धत्वात्। नन्वेवमिन्हन्नित्यत्रेोपात्तेन्-शब्दस्याङ्गविशेषणस्य तदन्तग्राहकतेष्यते। सा च नोपपद्यते नह्यनङ्गमिति सम्भवतीत्यत आह। तत्र तदतन्तविधाविति। एवञ्चेदृशे विषये सूत्रघटकशब्दजन्य-

प्रथमोपस्थितस्य विशेष्याभिन्नत्वं स्वस्वरूपात्मकवाच्यमादाय यद्यपि न सम्भवति तथापि तदन्तोपस्थितौ विशेष्याभिन्नत्वं सम्भवतीत्येतादृशयोग्यताया अप्येवमतच्छास्त्रप्रवृत्तिनियामकत्वं ग्राह्यमिति भावः। पाठ्यमिति। लोकप्रसिद्धव्यपदेशिवद्भावस्य शास्त्रेणाबाधायेति शेषः। समासेतिवचनाङ्गीकारे गौरवं स्यादत आह। विशेषणेति। समर्थैरित्यस्येति। इदं विभक्तिविपरिणामेन निर्दिष्टम्। तस्य विशेष्यस्य। सुपा इत्यनेनान्यथा सर्वत्रान्वयासम्भवः। यद्यपि स्त्रियां सम्बुद्धौ च संभवस्तथापि शास्त्रस्यान्यत्रापि कष्टं श्रितः कष्टश्रित इत्यत्र यथा स्यात् कष्टम्यरमश्रित इत्यत्र मा भूदितिभाष्यप्रामाण्यात्प्रवृत्तिरिष्टैवेति भावः। उगिदिति। उगिता वर्णे न च यत्रविशेष्यते तत्र तदन्तविधिर्भवत्येवेतिफलितम्। अतिभवतीति। सर्वादिपठितभवतुशब्दान्तमेतत्। उगितश्चेति। सूत्रे उगिदन्तग्रातिपदिकग्रहणात्। एवञ्च। वर्णग्रहणे तदन्तविधिस्वीकारे च। गृह्यमाणप्रातिपदिकेति। प्रातिपदिकसमाख्यावृत्तिधर्मप्रकारकप्रतीतिजनकतावच्छेदकरूपेणोपात्तम्प्रातिपदिकं यत्रेत्यर्थः। नायं निषेधति। न चास्य निषेधेपि वन्नात्रस्याप्रातिपदिकत्वात्तस्यार्थात्तदन्तविधिः स्यादिति वाच्यम्। एवमपि वन्नन्तान्त मित्यर्थलाभो न स्यादित्यत्र तात्पर्यात्। समासप्रत्ययेतिवचनस्य प्रत्ययविधिविषयत्वस्वीकारादमूनित्यादौ गृह्यमाणप्रातिपदिकविषयेपि तदन्तविधिर्भवत्येव। वर्णानां सिद्धान्ते नित्यत्वात्तत्तासामान्याभावाप्रसिद्धिरत आह। उच्चारणाभाव इति। स च। वर्णोच्चारणाभावश्च। व्याख्यानादिति। र ऋतो हलादेर्लघोरिति सूत्रे तद्व्याख्यानभाष्ये च रेफस्य विसर्गाकरणमूलकादित्यादिः। न च पूर्वकालिकोच्चारणाभावस्यावसानसञ्ज्ञायामपि नास्ति रेफस्य प्रकृते प्राप्तिः। रेफस्य पदान्तत्वविरहादिति वाच्यम्। अवसाने यत्र रेफस्य विसर्गप्राप्तिस्तत्र पदान्तत्वं रेफस्यावश्यमस्तीवेति तद्घटितवाक्ये पदान्त इत्यस्यासम्बन्धात् किञ्च तद्घटितवाक्ये तत्सम्बन्धेपि वोरुपधाया दीर्घ इत्ये तत्सूत्रे य आदौ रेफस्तस्य पदान्ततया विसर्गापत्तिर्दुर्वारा च सञ्ज्ञा। न चैवमपि तस्मिन्निति परिभाषयाऽवसानपरत्व एव विसर्गग्रहत्या न तत्र विसर्गप्राप्तिरिति वाच्यम् तस्मिन्निति सूत्रे दिशेरुच्चारणार्थकस्य सत्त्वेन यस्योच्चारणसम्भवस्तद्विषये एव तत्परिभाषाप्रवृत्तिरवसानस्य तु वर्णोच्चारणाभावरूपतयाऽभावस्योच्चारणासम्भवेन नात्र परिभाषाप्रवृत्तिः। किन्तु बौद्धोपस्थेषसत्त्वादिसर्गाप-

घादिभिरुत्तरपदस्य विशेषणादिति भावः। तस्मादिति। संज्ञाविधौ ग्रहणं प्रत्ययइति न्तिरित्याशयात्। वर्णवदिति। यथा वर्णानामुच्चारितप्रध्वंसितया नोपश्च षस-म्भवः। उपश्लेषस्य स्थिरपदार्थनिष्ठत्वात् किन्तु बौद्ध एव स तथाऽभावस्यापि वाच्यः। पूर्वेणापि। अवसानविषये। अवसानकार्याणाम्। वावसान इ-त्यादीनाम्। तदधिकारे। संहिताधिकारे। सावकाशायास्संहितासञ्ज्ञाया इति। एतेनावसानसंज्ञा तु निरवकाशेति सूचितम्। यदि त्वेषापि हे ए इत्यादौ सम्बोधने सावकाशेति मन्यते तदा परत्वादवसानसंज्ञया संहितासञ्ज्ञाया बाधः स्यादिति शङ्काभिप्रायः। अग्ने। तोक्मीत्यादौ, अग्निचि-न्नातीत्यत्र च संहिताभावे परसवर्णो माभूदित्यर्थमिति भावः। ध्वनितमिति। तत्र हि अनवकाशत्वाद्बाधपक्षे पूर्वपरसन्निकर्ष एव संहितासञ्ज्ञेति पक्षे चा-णोऽप्रगृह्यस्येत्यत्रोभयसम्बन्धेन दोषोद्भावनेन। एतेन मण्डूकप्लुतिरयुक्तेति स्पष्टमेव लभ्यत इति भावः। सन्निकर्षः संयोगादिर्वर्णानान्न सम्भवतीत्यत आ-ह। सन्निकर्षः सामीप्यमिति। व्याख्यानादिति। न कर्पः नापि सप्तमीबहुव-चनमेव किन्तु तिङ्साहचर्यात्प्लुपः पकारेण प्रत्याहार इत्यर्थकात्। अन्तग्र-हणवैयर्थ्यं शङ्कते। यद्यपीति। अयुक्तत्वादिति। एतेन यत्र वर्णानां विराम-स्तत्र राम इत्यादौ द्वयोस्सञ्ज्ञयोस्समावेश इति सूचितम्। यत्तु इदं प्रकृतसूत्रभा-ष्यकैयटविरुद्धम् तत्र वर्णाद्वर्णान्तरोच्चारणे प्रतिवर्णं विरामसञ्ज्ञावादवसानसञ्ज्ञ-या संहितासञ्ज्ञाबाधः प्राप्नोतीत्याशङ्क्य इत्यादौ वर्णान्तरानुच्चारणे सावकाशामवसानसञ्ज्ञां संहितासञ्ज्ञा बाधते ग्रयुभयोः समावेशस्तर्हि-बाधकथनासङ्गतिरिति तत्र। द्वयोः सञ्ज्ञयोर्लौकिकत्वेपि बाध्यबाधकभा-वो यथा राज्ञा स्वल्पाधिकारदानसमये एका सञ्ज्ञा क्रियते पुनस्तदपेक्षया-ऽपि महतोऽधिकारस्य दानसमयेऽपरा सञ्ज्ञा क्रियते तयैव च सञ्ज्ञया लोके लौकिकैर्यावज्जीवनं स व्यवह्रियते तथाऽत्रापि संहितासञ्ज्ञाया लौकि-कत्वेप्यनयाऽवसानसञ्ज्ञया बाधो भविष्यतीत्यभिप्रायेणात्र बाधकथनात्। अयञ्च बाध्यबाधकभावो न युक्त इत्यभिप्रायेण अथ वाऽवसानसञ्ज्ञायां प्र-ककर्षगतिर्विज्ञास्यते साधीयो यो विराम इति कश्च साधीयः यः शब्दार्थयो-र्विरामः। अथ वेति सर्वत्र विरामसञ्ज्ञावात्पुनः श्रुत्या विशेष आश्रीयते अन्य-

क्यतया कृत्तद्धितेति सूत्रेणापि प्रातिपदिकत्वमियानित्यादौ साधनीयन्तच्च तु सत्यपि शब्दाविरामे पदार्थस्य वाक्यार्थस्य वा विरामान्न भवत्यवसानसञ्ज्ञा इति भाष्यकैयटयोरुक्तम्। अत्र शब्दस्य विरामः श्रवणकृतोऽर्थस्य बोधकृत इति भावः। अन्यत्र त्विति। वर्णानन्तरं वर्णोच्चारणे मध्यमकाल इत्यर्थः। एतेन पूर्वभाष्यमभ्युपेत्य वादेनेति स्पष्टमेव। प्राचामुक्तिं खण्डयति। प्रत्ययेनेति। प्रकृतिं विना प्रत्ययोत्पादासम्भवादिति भावः। आक्षेपासम्भवादिति। प्रत्ययोत्पत्तौ प्रकृतेरपेक्षासत्त्वेपि तस्य स्थितौ व्यभिचारेण प्रकृतेराक्षेपासम्भवादिति भावः। आक्षिप्तस्य शाब्देऽनन्वयादिति। पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात्, आक्षिप्तार्थस्य मानसज्ञानविषयत्वेऽपि तद्वाचकशब्दानुच्चारेण उच्चारितः शब्दः प्रत्यायको नानुच्चारित इति भाष्यसंवादेन तस्यार्थस्य त्वया पदजन्यपदार्थोपस्थितेरभावादिति भावः। गौरी ब्राह्मणितरेति। इदन्न परिनिष्ठितम् किन्तु लौकिकं समासार्थवाक्यम्। अत्र गौरीशब्दस्य न ह्रस्व इत्यर्थः कल्प्यः। अत्र तु पुंवद्भावेन गौरब्राह्मणितरेति भवति तदन्तस्य सञ्ज्ञायान्तु परत्वात्पुंवद्भावस्य बाधकं ह्रस्वत्वं गौरीशब्दस्य स्यादिति गौरिब्राह्मणितरेति स्यादिति भावः। एतन्निषेधसामर्थ्यादिति। संज्ञाविधावितिनिषेधसामर्थ्यादित्यर्थः। प्रदेशेषु। घरूपकल्पेत्यादिषु घादेः प्रत्ययस्य तदन्तग्राहकतया यद्यपि प्राप्तामासात्संज्ञाविधावितिवचनेन तस्मिन्प्रदेशे निषेधस्तु कर्त्तुमशक्यः। संज्ञाविधावित्यत्रयसञ्ज्ञाया विधावितिकर्मषष्ठात्। मासाननु सञ्ज्ञाविधावितिसमासाभिप्रायेण प्रत्ययग्रहणे चापञ्चम्या इत्यस्य व्याख्यावसरे कैयटेन रदाभ्यामित्यत्र रेफदकाराभ्यामुत्तरो यो निष्ठान्तस्तस्य यस्तकारस्तस्य नत्वमिति व्याख्याने यच्छङ्कितन्न च सञ्ज्ञाविधावितिनिषेधावतार इति तत्। कर्मषष्ठ्या समासे विरुध्यत इति चेन्न। तृतीयासमासे कैयटस्यापि यत्र हि सञ्ज्ञाविधानन्तत्रायन्निषेध इत्यादिलेखनेन सम्मतिर्नास्तीतिकल्पनात् तदग्रे पुनस्तेनैव शङ्कितं सञ्ज्ञाविधावितिनिषेधस्य तर्हि किं प्रयोजनम्। तर्हीति। प्रदेशेषु तदन्तग्रहणं यदि तर्हीत्यर्थः। उच्यते यदि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य सञ्ज्ञास्यात्प्रदेशे पुनस्तदन्तविधिस्स्यादिति प्रत्ययान्तान्तं गृह्येत तस्मात्सञ्ज्ञाविधावपि तदन्तविधेः प्रतिषेधो रदाभ्यामित्यत्र च एतच्चोद्योते व्याख्यातम्।

स्वरूपभङ्गापत्त्या न कृतम्। उचितेति। सन्देहस्यैव तत्रानुदयादिति भावः। तित प्रत्ययग्रहणे चापञ्चम्या इति वचनाभ्यामिति भावः। एवं शङ्कासमाधानाभ्यां षष्ठीसमासस्यैव तदभिप्रेतत्वं लभ्यते। न च तद्व्याख्यावसरे एतन्निषेधसामर्थ्यादिति नोद्भावितं किन्तु तदन्तविधिद्वयप्रसक्तिरेवोद्भाविता तेनास्य विरोध इति वाच्यम्। तत्र कैयटेन प्रौढ्या तथाभिधानात् उद्योतेऽपि स्वरूपत्याक्रियैव पराक्रिया इत्याशयेन निषेधसामर्थ्यं नोक्तमित्येव युक्तम् न हि तदन्तविधिद्वयप्रसक्तिभिया प्रत्ययग्रहणपरिभाषाया अप्रवृत्तिः किन्तर्ह्यन्तग्रहणज्ञापनबलेनैव तच्च ज्ञापनं प्रदेशे पुनस्तदन्तग्रहणेनैव निर्वहतीति बोध्यम्। न च लेखग्रहणज्ञापितेनोत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणमिति वचनेनैव घरूपेति सूत्रे तदन्तविध्यभावोपपत्तौ निषेधसामर्थ्यात्तत्र तदन्तविध्यभावोपपादनमयुक्तमिति वाच्यम्। उत्तरपदेतिवचनस्य राचेः क्रतीति सूत्रस्थभाष्यप्रामाण्येनानित्यत्वात् तत्र हि तत्सूत्रस्य रात्रिमटो रात्रट इत्युदाहरणमुक्तम्। रात्रिशब्दात्क्रतोऽसंभवात्। न च रात्रिशब्दप्रकृतिकाचारक्विबन्तात्क्रतस्संभव इति वाच्यम्। अभिव्यक्तपदार्था ये इति न्यायेन तत्रैतत्सूत्राप्रवृत्तेः। यद्वा उत्तरपदाधिकारे प्रत्ययग्रहण इति वचनस्य प्रत्ययपदं प्रत्ययसञ्ज्ञाश्रयतावच्छेदकानुपूर्व्यवच्छिन्नपरम्। तथा च तादृशानुपूर्व्यवच्छिन्नस्योपादानं यत्र तत्र प्रत्ययग्रहणेन तदन्तग्रहणमित्यर्थः। यथाणिति राचेः क्रतीति सूत्रे तु क्रत्त्वेनैवोपादानमिति निषेधाप्रवृत्तिवद्घरूपेति सूत्रेऽपि घशब्देन तदुपादानम् तत्र न तच्छ्रयतावच्छेदकमस्त्युत्तरपदेति वचनाप्रसक्तौ घशब्देन पुनस्तदन्तविधौ सञ्ज्ञाविधावितिवचनसार्थक्यानुपपत्तिरिति निषेधसामर्थ्यात्तत्राप्रवृत्तिरित्युपादानं सार्थकमत्र राचेः क्रतीति सूत्रमेवं मानमिति दिक्। पदप्रदेश इति। सुप्तिङ्मात्रपदसञ्ज्ञायामपीत्यादिः। न चात्र पूर्वोक्तं सामर्थ्यान्नतदन्तविधिरिति समाधानं सम्भवति। सुप्तिङ्मात्रस्य पदसञ्ज्ञाविधानसामर्थ्यात्तदन्तग्रहणसम्भवात् पदान्त एव प्रवर्तमानदश्चेतिसूत्रमेव तदन्तग्रहणे ज्ञापकं भविष्यतीत्यपि बोध्यम्। प्रकृतिसाधारणतयेति। स्वादिष्वित्यनेन प्रकृतेरपि पदसञ्ज्ञाविधानात् पदसञ्ज्ञाविधायकशास्त्रे यस्मात्प्रत्ययविधिरित्यनुवृत्त्या व्याख्याने यस्मादिति परिभाषाया स्मरणात्तदेकवा

त्यत्र स्यात्। अनिष्टफलस्यापि सूत्रे लघुग्रहणेन कल्पनसम्भवात् एवमतत-प्रकृतेरभावान्नोपपद्यते इत्याशङ्कायामाह।इयानित्यादाविति।अशास्त्रीयस्यापीति। व्यपदेशिवद्भावस्य लौकिकत्वात्। नन्वसहाय एव व्यपदेशिवद्भावप्रवृत्तौ निजौ चत्वार एकाच इति भाष्यमिकारमात्रे एकाच्त्वोपपादनासम्भवेनानुपपन्नमत आह। निजौ चत्वार इति। ध्वनितञ्चेदमिति। असहाय एव व्यपदेशिवद्भाव इत्येतत्। असहाय एवेति। एवञ्चार्थवतेति नापूर्वमिति भावः। दिगिति। अर्थस्य त्यागोपादानाभ्यां व्यपदेशिवद्भाव इति कैयटोक्तञ्च युक्तम्, तथोपपादने मुख्यस्यैव व्यवहारस्य भाष्यरीत्या सम्भव इत्यादिरन्यत्र प्रपञ्चितम्। विशेषणताया एवौचित्यादिति। एवञ्चानन्तर्यं संयोगपदशक्यतावच्छेदकघटकमिति सूचितम्। अनन्तरा इत्यत्राविद्यमानमन्तरं वर्णशून्यकाल एषामिति, अविद्यमानमन्तरा येषामिति वा समासः। उभयथा समुदायस्यैव लाभः इयोश्चैव मध्यसम्भवात्। कैयटोक्तिं खण्डयति। यत्त्विति। अनिष्टापत्तेरिति। भवदुक्तरीत्याविप्रतिषिद्धसमुदायस्य सञ्ज्ञायां शोभनविप्रशब्दावयवनकाराकारस्य गुरुसंज्ञापत्तौ तस्य प्लुतापत्तिरूपानिष्टापत्तेरित्यर्थः। नन्वेवं महासञ्ज्ञाकरणं व्यर्थमत आह। महासञ्ज्ञाकरणन्त्विति। तेन समुदायसंज्ञाकरणेन सौत्रमिति। इयोर्हि वचनस्य न्याय्यत्वात्। सौत्रत्वकल्पने गौरवप्रसङ्गादाह। यद्वेति। नन्वेवमपि भिन्नवचनोपादानेन सहविवक्षाप्रदर्शनमयुक्तमन्यत्रादर्शनादत आह। स्वरितादिति। तथैकशेषस्य। अनुदात्तस्यानुदात्तयोश्चानुदात्तानाञ्चानुदात्तानामित्येवम्प्रदर्शनेनैकशेषस्य। तत्र यथाऽनुदात्तयोरित्यत्रानुदात्तानामित्यत्र चैकशेषङ्कृत्वा पुनरेकशेषस्तद्वत् अत्रैवं विग्रहप्रदर्शनेन विभक्त्यन्तानामेकशेष इति न भ्रमितव्यम्। एवं प्रदर्शनस्यानेकार्थत्वप्रदर्शनमात्रतात्पर्यकत्वात्तच्च तन्त्रेण। एकशेषस्तर्हि व्यर्थ इति चेत् एकशेषशब्दस्य तत्परत्वस्यैव कल्पनात्। इयोरपीति। न चापिशब्दसंग्राह्याणां बहूनां संयोगसञ्ज्ञायाः फलाभावात् न सेत्यपिशब्दोपादानमनर्थकमिति वाच्यम् बहुस्थलीयतादृशसमुदायसमुच्चायकत्वात् ननु बहूनां संयोगसञ्ज्ञायाः फलन्द्वयोः संज्ञाव्याप्तिरेव भविष्यतीत्यत आह। तत्तत्वेति। तथा च शास्त्रबोध्यस्य तत्फलस्यासम्भवेन बहूनां निष्फलत्वान्न भविष्यतीति भावः। कुत्वव्याप्यमिति। पदान्तत्वात्। परन्तु सञ्ज्ञा-

उदेवेति । तितउना दीव्यतीति विग्रहः । अचःतकाराकारावयवकस्य तदिति समुदायस्य संयोगसञ्ज्ञा यां तीतीकारस्य गुरुसञ्ज्ञास्यात् न चैवं घटेत्यादावप्यादनसम्भवा द्विग्रिथ्यात्वैतस्योपादानमनर्थकमिति वाच्यम् । अशोकवनिकान्यायेनास्योक्तेः । यदि तु विजातीयव्यवहितभिन्ना सजातीया वर्णा एव गृह्यन्ते तदा तितउभ्यामित्यत्र सयोगान्तलोपापत्तिर्बाधा अझलोपि लोपविधानात् । एवं हेनर अउ इति कुरु इत्यत्रघुतापत्तिद्रप्स्यामितिःद्रप्सन्दधि घनेतरत् अत्र सकारमकारयोः संयोगसंज्ञायां संयोगादिलोपापत्तिः । यद्यपि भाष्ये पनसमित्येतदेतद्भावार्थमुक्तन्तथापि तच्चम्यन्तस्य झल इत्यस्य स्कोरितिसूत्रेऽनुवृत्तिं कृत्वापि सकारलोपाभावशङ्का स्यादित्यस्योपन्यासः । वस्तुतस्तु तत्र न झल इत्यस्य सम्बन्धः । भ्रष्टेत्यादौ सकारलोपानापत्तेः । ननु संयोगे गुरुसञ्ज्ञा यदि ह्रस्वस्य लघुव्यवहाराभावप्रयोजिका तदा नित्यत्वात्तासि गुरुसञ्ज्ञायां गुणो न स्यादत आह । भेत्तेत्यादाविति । यत्तु, समप्रवृत्तया गुरुसञ्ज्ञया लघुसञ्ज्ञाया बाधेपि पूर्वं प्राप्ताया अन्तरङ्गायास्तस्या बाधे मानाभाव इति तन्न । परसंयोगनिमित्तिकाया गुरुसञ्ज्ञायायेन नाप्राप्तिन्यायेन लघुसञ्ज्ञापवादत्वात् । न चाप्तेत्यादावाकारादौ संयोगे र्विगुति चारितार्थमिति वाच्यम् । शास्त्रीयसञ्ज्ञामात्रस्यान्यासाधयतत्तत्फलजनकत्वस्य क्लृप्तत्वेनैतादृशेषु दीर्घत्वेति सूत्रेणैव सिद्धतया प्रकृतसूत्रस्य तदविषयकत्वात् । न च ह्रस्वं लघ्विति सूत्रे सत्याकाङ्क्षारीयत्वाद्गुरुसञ्ज्ञया लघुसञ्ज्ञाबाधः प्रसज्यते तदेव न । ऊकालोऽज्झ्रस्वदीर्घप्लुत इति सूत्रे ह्रस्वग्रहणमपनीय तत्स्थाने लघुग्रहणस्यैव करणेन लघुसञ्ज्ञाया अनाकाङ्क्षारीयत्वात् । यत्रयत्र ह्रस्वग्रहणं तत्र सर्वत्र लघुग्रहणेनैव निर्वाहादिति वाच्यम् । संयोगे गुरुर्विति सूत्रेऽनुवृत्त्यर्थं ह्रस्वग्रहणस्यावश्यकत्वात् । न च संयोगे लघु गुरु इत्येव सूत्रमस्त्विति वाच्यम् । तथा सत्यत्र सूत्रे लघोरुद्देश्यतया लघुगुरुसंज्ञयोः समावेशापत्तेः । न चेष्टापत्तिः । अचिच्चमदित्यत्र दीर्घो लघोरिति सूत्रेण दीर्घापत्तेः । न च तस्मिन् सूत्रे लघुग्रहणसैत्रं सति वैयर्थ्यापत्तेरिति वाच्यम् । स्वाभाविकस्य लघोः परिग्रहार्थत्वात् ।तथा कल्पने सूत्रस्य प्रवृत्तिरततच्चदित्यत्र स्यादप्रवृत्तिस्त्रावीभवदित्यादि ।

अचाद्यविशिष्टेनाभ्याससंज्ञाम्बेडितसंज्ञयोर्द्वितीयेन प्रगृह्यसंज्ञाया व्यावृत्तिः। न च टिसंज्ञायाः शकन्ध्वादिषु पररूपमिति वार्त्तिकसाध्यसन्धिकार्योपयोगित्वेनात्र प्रकरणे तदनुपादानाच्छून्नतापत्तिरिति वाच्यम्। तत्र शकन्ध्वादिसिध्यनुगुणं पररूपमिति व्याख्यानेनेष्टसिद्धया टेरित्यनुपादानेऽपि क्षतिविरहात्। मूले यदुक्तं टेरिति तत्फलितार्थकथनमित्याशयः। ननु कथं सञ्ज्ञानुक्रमे अइत्यस्य पूर्ववासिद्धमित्यस्य चोपादानमत आह। अत्र इत्याद्युपेति। प्रासङ्गिक इति। न तु प्राधान्येनेति शेषः॥

इति संज्ञाप्रकरणम्॥

इको गुणवृद्धी। परिभाषेयमिति। न तु विधिः। तत्तद्विधायकशास्त्राणां वैयर्थ्यापत्तेः। नापि नियमः। प्रकरणोत्कर्षेण करणेन लाघवतात्पर्यकत्वात् माप्यधिकारः। पृथक्पाठसामर्थ्यादित्याशयेनाह। व्याख्यानादिति। सामर्थ्यादिति भाव इतिएवञ्चैतत्सूत्रघटको गुणवृद्धिशब्दो गुणवृद्धिशब्दबोध्याकारादिलाक्षणिकः। ननु पूर्वसूत्रस्थयोर्गुणवृद्धिशब्दयोः स्वरूपपरतयाऽनुवृत्त्यैव सिद्धे इत्यनुपपन्नमत आह। अनुवर्त्तमानमिति। ण्णान्ता षड़ित्यत्र यथा। तथा च शब्दाधिकारेण सङ्ख्याशब्दो यथा स्वरूपबोधकसूत्रभिन्नसूत्रान्तरैकवाक्यतापन्नत्वादर्थपरस्तथाऽयमपि स्यात्। अनुवर्त्तमानगुणवृद्धिशब्दोभयं पक्षः॥ सञ्ज्ञाबोधकत्वं साध्यम्। स्वस्वरूपबोधकसूत्रभिन्नसूत्रैकवाक्यतापन्नत्वं हेतुरित्यूह्यम्। स्पष्टप्रतिपत्तये वक्ष्यमाणदोषाच्च। स्पक्षान्तरमाह। यद्वेति। यो यत्सूत्रोपात्तश्शब्दस्स ततोऽन्यत्रार्थान्तरपर इति सामान्यतो न नियमः। स्वादिष्विति सूत्रेऽनुवृत्तपदशब्दे व्यभिचारादित्याशयेनाह। स्वादिष्विति। सिद्धान्तरहाकरोक्तिङ्खण्डयति। लक्षणेति साक्षादुच्चारितसेति। यथागातिस्थेति सूत्रे पाशब्देन पापाने इत्यस्य धातुषु पठितस्य। तत्तच्छब्दानुवादेनेति। विभाषा दिक्समास इत्यत्र दिङ्नामान्यन्तराल इति सूत्रकृतबहुव्रीहिसंज्ञाविशिष्टस्य यथा शीघ्रोपस्थितिकमेवोभयत्र हेतुर्बोध्यः। ध्वनितमिति। लक्षणप्रतिपदोक्तपरिभाषया विवक्षितार्थकथनाभावेन ध्वनितमित्यर्थः। विधेयसमर्पकेति। वि

धेयतात्पर्यकतयोपात्तगुणवृद्धिपदश्रवणविमत्यर्थः। न च वृद्धिर्यस्येत्यत्र वृद्धिपदस्य प्रथमान्ततया प्रथमायाश्च विधेयबोधतात्पर्यकतया तत्रापि परिभाषोपस्थितिस्स्यादिति वाच्यम्। तत्सूत्रे तच्छब्दयुक्तस्य वृद्धिपदस्यैव विधेयबोधकत्वात्। वृद्धिशब्दस्तु यच्छब्दयुक्तोद्देश्यबोधकवाक्यार्थप्रधानार्थविशेषणबोधक एव। एवञ्चात्र सूत्रे विधीयत इति पदाध्याहारो बोध्यः। एतेन विधीयत इति पदाध्याहारेण वाक्यार्थपर्यवसानकरणेन एतत्सूत्रे गुणवृद्धिपदश्रवणमेव तदध्याहारे लिङ्गम्। एतन्मूलक एवेति। अध्याहारमूलक इत्यर्थः। उद्घोष इति एतेन तस्या उदीचामात इतिसूत्रोक्तस्थानशब्दस्यापि त्व नेति सूचितम्। प्रथमाया इति। वृद्धिरेचीत्यादौ। अत एव। विधेयसमर्पकत्वादेव। वाक्यार्थान्वयिनेति। स्वार्थसमर्पणद्वारा। एतत्सूत्रप्रयोजनमाह। इदञ्चेति। ननु टकः कित्त्वादिज्ञापकेनाकारादेर्गुणो न भविष्यतीत्यत आह। भिन्नमित्यादाविति। आदिना न्यधुवीत्यादिसङ्ग्रहः। के चित्तु विधौ परिभाषोपतिष्ठत इति परिभाषाज्ञापनार्थमुदीचामिति सूत्रे स्थानेग्रहणमावश्यकमेव। अत एव प्रतिदीव्न इत्यत्र व्यवहिताकारस्याचः परस्मिन्निति स्थानिवत्त्वाद्लोपाभावः। किन्त्वेषा विधाविति परिभाषा पुनर्गुणवृद्धिपदोपादानेनानित्येति ज्ञायते। तेनोदात्तस्वरितयोरित्यनुवादे न दोष इत्याहुः। अत्रेदं चिन्त्यते। परिभाषासत्त्ववादिनः कोर्थोऽभिमतः साक्षादनूद्यमानविशेषणनियामिका परम्परया वा यद्विशेषणन्तन्नियामिका साक्षात्परम्परासाधारणविशेषणनियामिकेति वा। नाद्यः। इकोयणचीत्यस्य व्यवहितेपि प्रवृत्त्यापत्तेस्तस्मिन्निति सूत्रे वैयर्थ्यापत्तेश्च। न द्वितीयः। स्थानेग्रहणस्य ज्ञापकत्वासङ्गतेः। न तृतीयः। इको यणचीत्यादौ दोषतादवस्थ्यात्। प्रतिदीव्न इत्यत्र स्थानिवद्भावस्तु न पदान्तेतिसूत्रे दीर्घग्रहणेन ज्ञापकेनाचः परस्मिन्नित्यत्र पूर्वत्वस्य व्यवहिताव्यवहितसाधारणेन कल्पनेन सिद्धः। परिभाषाभावादेवोदात्तस्वरितयोरित्यनुदात्तस्थाने यणित्यस्य षष्ठीस्थान इति परिभाषया लाभः। न च विधाविति परिभाषाभावे अचः परस्मिन्नित्यस्य व्यवहितेपि प्रवृत्त्यर्थम्। दीर्घग्रहणस्य ज्ञापकत्वं कल्पनीयमिति गौरवमिति वाच्यम्। परिभाषासत्त्वे तत्र स्थानेग्रहणस्य ज्ञापकत्वं तदनित्यत्वे च प्रकृतसूत्रस्थगुणवृद्धिग्रहणस्य ज्ञापकत्वं कल्पनीयमिति भवन्मत एव गौरवा। शेषमिति। त्

अत्रापि विधीयते इत्यस्याध्याहारः। तस्मिन्सति· यत्र विधेयसमर्पकङस्यादिपदोपादानन्तत्राच इत्यस्योपस्थितौ सम्भवति सामानाधिकरण्ये इति न्यायेन ङस्यो. नपुंसक इत्यादौ सामानाधिकरण्येन शमामष्टानामित्यादौ वैयधिकरण्येन सम्बन्ध इति लक्ष्यानुसारिव्याख्यानात्कल्पनीयमिति भावः। नैकत्रान्वय इति। यत्रैको धर्मोऽन्वयितावच्छेदकस्तत्रैव साहित्यव्यवहारस्य प्रसिद्धत्वादिति भावः। समूहयोरिति। साहित्यस्योद्देश्यतावच्छेदकत्वं विधेयतावच्छेदकत्वञ्च प्राथमिकबोधे ततो यथासङ्ख्यसूत्रसहायेन लक्ष्यसंस्कारसिद्ध्यर्थन्द्वितीयोपि बोधः कल्प्यत इति भावः। लोक इति। अजाविधनौ देवदत्तयज्ञदत्तौ-वित्युक्ते न ज्ञायते कस्याजा धनं कस्यावय इति भाषात्। तत्र गमकाभावेन प्रत्येकमन्वयः। इह तु यथासङ्ख्यसूत्रमेव गमकमिति भावः। अत एवाह। अर्थवेति। इन्द्वान्त इति। यदि इन्द्वान्ते श्रूयमाणश्च प्रत्येकमन्वयस्तदैव साहित्यस्योपपत्तिः। एवं इन्द्वादौ श्रूयमाणस्यापि समन्वयो बोध्यः। पुरस्कादिति। बाध्यविशेषचिन्तयेति भावः। चरेष्टादय इति। आदिना ख्युङादिसङ्ग्रहः। अत एव। स्थानियोगत्वमात्रापवादत्वादेव। प्रकृतार्थलाभायाह। आद्यन्ताक्षिप्त इति। एतेनाद्येपः प्रकृते युक्त एव। आद्यन्तावयववाचकपदस्यावयविनि नित्यसाकाङ्क्षत्वात्। शब्दाध्याहारो बोध्यः। इताविति किमिति। टकावित्येवार्थं आद्यजन्तमस्वित्यभिप्रायेण प्रश्नः। न चैकेन ककारेण कुकोऽन्त्यावयवत्वे सिद्धे ककारद्वयोच्चारणमेवेत्सञ्ज्ञकेन परावयवत्वबोधनं नान्येनेत्यत्र ज्ञापकमविष्यतीति प्रकृतमिदमग्रहणं व्यर्थमिति वाच्यम्। ककारांश एव विशेषापेक्षज्ञापकत्वसम्भवात्। मिदच इति सूत्रविषये बाध्यसामान्यचिन्तायां ज्ञापकमाह। टणहेति। अत एव समुदायावयवत्वस्वीकारादेव। एवञ्च पञ्चारत्नीनीत्यत्र नुमः समुदायभक्तत्वादिगन्तकालेति स्वरसिद्धिस्तदाह। समुदायेत्यादि। इत्यंशाप्रवृत्तिरिति। परत्वांशस्तु प्रवर्तत एव। तेन न मुचादीनामित्यस्य स्थानषष्ठीत्वसम्भावनयाऽलोन्त्यपरिभाषाप्रवृत्तिः। परशब्देन चात्र न परावयवत्वबोधनं किन्तु यस्य सन्निहितस्तस्य योन्त्याच् ततः परत्वमात्रमन्यथा पञ्चारत्नीनीत्यत्र स्वरादिसिद्धिस्स्यात्। अमुच्चादित्यादौ मुमि कृते विशिष्टस्याङ्गत्वन्तु तन्मध्यपतितन्यायेन। न चावयवावयव-

स्य समुदायावयवत्वेन यस्यायंधातुकेति सूत्रविहितेट् तस्य टित्त्वबुद्धिरस्यात्। एवञ्च कारिता सङ्घट्टिरित्यादौ टित्वान्ङीबापत्तिरिति वाच्यम्। तुटष्टित्त्वेनैव सिद्धे टुघटुग्लोटित्त्वे नागमे तत्तद्व्यवहारसम्पादकानुबन्धस्य न स्वीयागमस्य यदागमत्वन्तद्घटितसमुदाये तद्व्यवहारप्रयोजकत्वमिति स्वीकारात्। न चावयवानुबन्धस्य समुदायोपकारकत्वाभावे तुल्यन्यायेन धेटष्टित्त्वात्स्तनन्धयीति प्रयोगस्यासिद्धिरेवं सति स्यादिति वाच्यम्। टित्त्वस्य धातावुपकाराभावेन समुदायोपकारसम्भवात्। आगमविषय एव पूर्वोक्तज्ञापककल्पनाच्च। इत्यञ्च यदवयवसम्बन्ध्यनुबन्धोऽवयवस्योपकारं करोति स समुदायानुबन्धो न भवति यत्र तु नावयवोपकारस्तत्र समुदायोपकारकत्वं कल्प्यते इति दिक्। स्थानपदार्थेत्यादि। स च सम्बन्ध आदेश्यादेशभावरूपः। निपातनादिति। तृतीयासमासे निपातनादेत्वमिति भावः। स्थानरूपः सम्बन्धो न षष्ठ्यर्थः स्थानं योगस्सम्बन्धो यस्या इत्यर्थकस्थानयोगेत्युपादानेन सिद्धे तृतीयाया एवं निपातनादिति भाष्येण तथा बोधनादेवं व्यधिकरणबहुव्रीहिकरणमिति ज्ञापकमिति बोध्यम्। नन्वेवमस्तेर्भूरिति सूत्रघटकषष्ठ्यर्थेऽस्तेरनन्तरे समीपे वेत्यादिभाष्ये अनन्तरादिपदोपादानेन वैषां षष्ठ्यर्थत्वं कल्प्यते तथा च स्थानात्मक एव सम्बन्धः षष्ठ्यर्थो भविष्यतीत्यत आह। अस्तेरनन्तर इति। एवञ्च यद्यनन्तरपदाध्याहारस्यात्तदाऽनन्तरपदार्थनिरूपितो योऽव्यवहितदेशवृत्तित्वरूपस्सम्बन्धस्स भूशब्दे प्रतीयेत। परन्तु प्रकृते षष्ठीस्थानेयोगेतिशास्त्रबलात् स्थानपदार्थनिरूपितसम्बन्धार्थिका षष्ठी बोध्या। परिभाषाया अनियमे नियमकारकत्वस्वभावत्वाद्यत्र षष्ठीमात्रोच्चारणेनानेकसम्बन्धसम्भावना तत्र षष्ठ्याः स्थानपदार्थनिरूपितसम्बन्धार्थकत्वमन्या षष्ठ्या बोध्यत इति निष्कर्षः। अन्यत्र। उद्योतादौ प्रसङ्ग इति। ननु स्थानपदस्य प्रसङ्गार्थकत्वमन्यत्र न दृष्टमत आह। दर्भाणामिति। सति सम्भव इति। एतेन इको यणचीत्यादौ तस्मादित्युत्तरस्येत्यादिनिर्देशादनर्थकस्य स्थानित्वे पि न क्षतिः। शब्दानाञ्चित्यत्वसमर्थनाय कल्पनायामप्याह। इको यणचीति। अर्थबोधनाय प्रसङ्ग इति। अनुमानिकस्थान्यादेशभावकल्पकं वाक्यं स्थान्यर्थबोधनसमर्थमेव कल्प्यत इति भावः। कार्यविपरिणामाश्रयइमिति वार्तिकरीत्याह।

किञ्चेकारेति। कार्यस्य सम्प्रत्ययस्य विपरिणाम इति तदर्थः। एवञ्च विषयिबुद्ध्युन्मज्जननिमज्जनयोर्विषये आरोपेण तयोस्थान्यादेशभावव्यवहारः सङ्गच्छत इति अन्यथा सर्वत्र समुदायादेशत्वेऽजादेशाप्रसिद्धिरेव स्यादिति भावः। दाधा घ्विति। तत्र हि प्रनिदारयतीत्यत्र णत्वाभावार्थं कृतस्य समानशब्दानाम्प्रतिषेध इति वार्तिकस्यार्थात्परिभाषाखण्डनं कृत्वा प्रणिदापयतीत्यत्र णत्वाप्राप्तिमाशङ्क्य न चार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते इत्युक्त्वा नित्येष्वागमविधानमनुपपन्नमित्याशङ्क्य नित्येष्वादेशशासनं यथा बुद्धिविपरिणामेन तथात्रापीत्याश्रयेणादेशास्तर्हि भविष्यन्ति अनागमकानां सागमका आदेशाः कथं सर्वे सर्वपदादेशा इत्युक्तम्। स्थानिवत्सूत्रे तु कार्यविपरिणामादिति स्पष्टमेवाभिप्रेतम्। अत एव हि प्राप्य। प्राप्यमाणानामित्यर्थकरणादेव। चिमात्रो नेति। अदेङ्गुण इति सूत्रे तपरकरणात्। स्थानेऽन्तरतम इति। स्थानेऽन्तरतम उरण्परः इतिसंहितापाठेऽन्तरतमशब्दस्सप्तम्यन्तः प्रथमान्तो वेति सन्देहः सप्तम्यन्तपाठेआदेशानुरोधेन स्थानिसंकोचः। प्रथमान्तत्वे स्थान्यनुरोधेनादेशसङ्कोचः। तत्र सप्तम्यन्तच्छेदो न युक्तः। दीर्घेषु यणोऽसिद्धत्वापत्तेस्तत्र स्थानिनोऽत्यन्तविलक्षणत्वात्। लृज्वत्क्रोष्टुरितीति। यदि तु लृज्वत्क्रोष्टुरिति चिसूत्रे प्रयोगनियमार्थेति नायमादेश इति विभाव्यते तदा सर्वे सर्वपदादेशा इति पक्षे एरुरित्यत्र ङ्युतयोस्थान्यादेशबोधकपदयोस्तदन्तपरतया इवर्णान्तस्योवर्णान्तादेश इति कल्पनायामपि भवत्वित्यत्र तिशब्दस्य तुशब्द एव न तु तुशब्द इत्यत्रार्थत आन्तरतम्यमेव नियामकम्। व्याख्यानादिति। तस्मिन्नणि च युष्माकास्माकाविति सूत्रस्थ यौष्माकीण अस्मभ्यन्दे हीत्यत्र परस्यादेशनिवृत्तिः पूर्वसूत्रस्योच्चरत्वानुपलभत इत्यत्रोत्तरसूत्रस्य पूर्वशसवयवसकारेऽप्रवृत्तिश्च फलं यद्यपि स्वसमानानुपूर्वीकानुकार्यग्रहणं सम्भाव्यते तथापि तस्मिन्नणि चेत्यत्र निर्दिष्टयोः प्रत्ययत्वात्ताभ्यां यस्मादिहितस्तदादेरित्यस्यापेक्षेण तस्माच्छसो नस्तस्माद्ङिच्चीत्यनयोः परस्येत्युपादानेन वा दोषाभावस्सूत्रद्वयानारम्भेपि साधयितुं शक्य इत्याशयमूलकाद्बहुलत्र्यसंस्कारानुरोधाच्चेत्यर्थस्तदाह। व्याख्यानादित्यादि। सप्तम्यन्तानामिति। तत्तत्सूत्रावयवानामचि हलीत्यादीनाम्। नन्वेवमितिशब्दो व्यर्थ इत्यत आह। इति शब्द इति। इतिशब्दाभावे सप्तम्यन्तपदाना-

मेव सप्तमीप्रकृतिवाच्यत्वं स्यात्तथा च तस्य लक्ष्यं निरन्तरीच्चरितत्वासम्भव इति भावः। तस्य। सप्तम्यन्ताचीत्यादिपदस्य। तदर्थपरत्वम्। सप्तम्यन्तपदार्थपरत्वम्। न च नेड्वशि कृति ङस्योत्यादिषष्ठ्यर्थसप्तमीनिर्देशो यत्र तत्रापि तस्मिन्निति सूत्रप्रवृत्तिरस्यादितिं वाच्यम्। तदर्थपरत्वमित्यस्य सप्तम्यर्थविशिष्टप्रकृत्यर्थपरत्वमित्यर्थः। नेड्वशीत्यादौ तु न सप्तम्यर्थ इति भावः। पदस्य चार्थ इति। सप्तम्यर्थविशिष्टप्रकृत्यर्थो लिङ्गमित्यर्थः। न च सप्तमीनिर्दिष्टं पूर्वस्येति कुतो न सूत्रितमिति वाच्यम्। तथा सप्तमीपदं यत्रोच्चरितं तत्र सप्तम्याङ्गनेर्ङ इत्यादाविव प्रवृत्त्यापत्तेः। बौद्धमिति। शब्द्योरुपश्लेषो न संयोगः। द्रव्ययोरेव संयोगात्। नापि स्वोत्पत्त्यधिकरणक्षणाव्यवहितक्षणोत्पत्तिकत्वम् वर्णस्य नित्यत्वात् किन्तु स्वज्ञानाधिकरणक्षणाव्यवहितक्षणवृत्तितत्समानाधिकरणज्ञानविषयत्वमेवश्चोपश्लेषो बुद्धिकृत एव पर्यवसन्न इति भावः। न चायमुपश्लेषः पूर्वपरसाधारणो यत्यव्यवधानगर्भस्तदा तस्य व्यवहियसाधारणस्योपपद्यत इति निर्दिष्टपदं व्यर्थमिति शङ्क्यम्। ज्ञानस्य द्विक्षणवृत्तितया सुद्युपास्य इत्यत्रोपशब्दावयवोकारविषयकज्ञानाव्यवहितक्षणवृत्तिज्ञानविषयत्वं यथा धकारेकारे तथा ईकाराधिकरणाव्यवहितधकारज्ञानोत्पत्त्यधिकरणक्षणवृत्तिज्ञानविषयत्वं सु इत्युकारविषयकज्ञानेपीति सुशब्दावयवोकारस्य यणभावार्थं निर्दिष्टपदोपादानात्। यदि च स्वविषयकज्ञानोत्पत्त्यधिकरणक्षणाव्यवहितक्षणोत्पन्नज्ञानविषयत्वमेवोपश्लेषस्य च स्वाभाविकार्द्धमात्राकालव्यवधानेनोच्चारणे एव न तु तदधिककालेनोच्चारणे इति कल्प्यते। तदा निर्दिष्टपदं व्यर्थमेव तदेतद्वक्ष्यति। यदि त्वर्द्धेत्यादि। नियमार्थमिदमिति। एतेनेतयोः परिभाषात्वं ध्वनितम्। शात्रलोप इति सूत्रे भाष्ये उक्तमिति। तत्र हि किमर्थं शमशकारस्य ग्रहणं क्रियते इति प्रश्ने नन्दिता नन्दक इत्यत्रापि प्राप्नोतीति दोषे कथितेक्ङितीति वर्त्तते एवमपि हिनस्तीत्यत्र न प्राप्नोति। नैषा परसप्तमी का तर्हि सत्सप्तमी क्ङिति सति एवमपि नन्दमान इत्यत्रापि प्राप्नोति एवन्तर्हि न शब्द एव क्ङित्त्वेन विशिष्यते क्ङिच्चेत्यशब्दो न भवतीत्युक्तम्। एतेन प्रघट्टकेनैवोपश्लेषिकाधारे यत्र सप्तमी तत्र तस्मिन्निति परिभाषाप्रवृत्तिरिति लभ्यते। ननु व्यवहितेऽर्द्धमात्राधिककालेन वा व्यवधानेप्युपश्लेषस्तदाऽवग्रहेप्यानङ् भवति भवदुक्तनियमे स न स्यादतं

आह । अवयह इति । तदनुरोधेन । अवयहानुरोधेन । एतेन । पूर्वोक्तव्याख्यानेन । उत्तरांशविकलेति । परश्वेत्यस्य नियामकत्वे तु षष्ठ्यंशविकलेति बोध्यम् । अत एव तदंशरहितस्याप्युपस्थितिस्वीकारादेव । अत एव । आगमविषयेऽपि परिभाषाप्रवृत्तिस्वीकारादेव । अतिदेशविषयेष्याह । गाङिति । एतत्परिभाषाप्रवृत्तिरिति । तस्मादितिपरिभाषाप्रवृत्तिरित्यर्थः । ननु परिभाषात्वमनियमे नियमकारकत्वमिति शिष्टसमाचारस्य नोपपद्यते । परिभाषात्वभिमतवाक्यैकवाक्यतया विधिसूत्रैर्लक्ष्यसाधनादिति शङ्कापरिहारार्थमाह । परिभाषाणान्नियमत्वन्त्विति । सूत्रमित्येकवचन्तु जातौ । एवञ्चार्थिको नियमत्वव्यवहार इति भावः । षष्ठीस्थाने इत्यनुवृत्तौ यथा वाक्यार्थस्तथा दर्शयति । स्थान इति । निर्दिष्ट इत्यध्याहारलब्धम् । स्थानेत्यादि किमिति । अनुवृत्तेः प्रश्नः । षष्ट्यन्तमिति । नं तु जसन्तम् । लोपात्मकादेशविषयेऽदर्शनञ्चेत्यादौ परिभाषाप्रवृत्त्यनापत्तेः । अन्यस्य पदस्येति । अधिकारलब्धस्येत्यादिः । लिङ्गमिति । एवञ्चालसमुदायबोधकपदोत्तरं यत्र स्थाने षष्ठी तत्रान्त्यस्याल इत्युपतिष्ठत इति वाच्योऽर्थः अत्र मानन्तु परिभाषाया नियमकारकत्वमेव । यत्रालसमुदायोत्तरं स्थानषष्ठी तत्रैवैतत्परिभाषाभावेऽनियमप्रसक्तेः । आदेरलइति । अल्ग्रहणानुवृत्त्याऽयमर्थः फलति । तेन । अल्ग्रहणानुवर्तनेन । अन्यथालोन्त्यसूत्रान्ङिच्चेत्यत्रान्त्यपदानुवृत्तेः क्लप्तत्वादन्त्यस्यादेरित्यर्थापत्त्योपात्तसमुदायस्यापत्तिः । अल्ग्रहणानुवृत्तौ तूपात्तशब्दस्यादेरलोऽन्त्यादित्वासम्भवेन तदनुवृत्तिः । रित्यस्य विहितेति । इदञ्च धातोरित्यस्य फलाभावेप्यनुवृत्तिशङ्कायाम् वस्तुतस्तस्याननुवृत्तिरेव युक्ता । ननु विधेयत्वाख्यविषयताया विशिष्टे स्वीकारेऽणुदित्सूत्रेऽप्रत्ययादेशटित्किन्मित इति वक्तव्यमिति वार्तिकव्याख्यावसरे आदेशोदाहरणमिदम इशित्युक्तभाष्ये तन्नोपपद्यते विधेयत्वाख्यविषयतापर्याप्तिर्यादृशसमुदाये तस्य नाणत्वम् यस्य चाणत्वं तस्य न तादृशविषयत्वाधिकरणत्वमिति शङ्कायामाह । उदेशत्वेति । ननु शिदग्रहणाभावे घुसोरितिविहितलोपस्य सर्वादेशत्वार्थं यद्विशकारको निर्देश इत्युक्तन्तद्विरोध इत्यत आह । घुसोरितीति । नन्वनुबन्धानामनेकान्तत्वे नेशो नानेकाल्त्वमित्यत आह । अनुबन्धानामिति । नानुबन्धकृतमिति । अनुबन्धत्वयोग्यकृतमित्यर्थः एवञ्चात्र सूत्रे शित्पदस्येत्संज्ञायोग्यश-

कारवत्त्वमेवार्थः। नन्वौतस्त्कार उच्चारणार्थ इति कथमस्येत्संज्ञेत्यत आह। तस्य चेति। उच्चारणार्थानामित्संज्ञां विना निवृत्त्यसम्भवादिति वक्ष्यत इत्यर्थः। मात्रालाघवाभिप्रायकमङ्कायामाह। नानेकालेत्यादि। निषेधापत्तेरिति। न चाल्ग्रहणादेरित्युभयानुवृत्त्योभयथाऽनुवृत्तौ दोषाभाव इति वाच्यम्। पारिशेष्यान्मध्यगस्यैवेत्यपि सम्भावनापत्तेः। एतेन ङिच्चेत्यत्र ङिदेवानेकालिति। अत्रानेकालिति पदाभावात्कथमस्य लाभ इति नाशङ्कनीयम् ङिच्चेति सूत्रस्थानङादेशार्थमेवारम्भेण तेषामनेकाल्त्वात्। अपास्तमिति। आदिरित्यत्र तद्बाधकतयाऽनेकालित्यस्यावश्यकत्वात्। इत्यभूतलक्षणे तृतीयेति। अत्र सूत्र इत्यादिः। अधिकारत्वप्राप्तस्येदं स्वरितत्वलक्षणम्। विनियोगः स्वीयसूत्रोत्तरसूत्रैकवाक्यतया विवक्षितवाक्यार्थनिष्पादनम्। यत्र तु पूर्वत्र विनियोगस्तत्र पूर्वसूत्रैकवाक्यतया विवक्षितवाक्यार्थनिष्पादनम् रा हलीत्यत्र हलीतिपदस्य यथा। असति गमक इति। यथा प्राग्दीव्यत इत्यस्य सत्वेनाणस्तेन दीव्यतीत्यतः प्राग्विनियोगः। यत्र तु न तथा तत्र लक्ष्यानुसारिशिष्टकर्तृकव्याख्यानमेव। मुख्यसूत्रप्रयोजनमाह। अधिकारगतिरिति। अस्मिन्पक्षेऽधिकारगतिरिति शब्दस्याधिककार्यज्ञानमित्यर्थः। तेन गौणाधारस्याप्यधिकरणसंज्ञा। यथासंख्येन सम्बन्धः। गोस्त्रियोरिति सूत्रे स्त्रीग्रहणेन स्वाधिकारीयटाबादिग्रहणमित्येषा व्यवस्था सिध्यति। एतेन। किच्चेत्यादिनार्थान्तरकरणेन। तत्कल्पनमिति अभावकल्पनमित्यर्थः। एवञ्च नित्येनानित्यस्य बाधे लाघवरूपा युक्तिः प्रमाणमितिफलम्। बहिरङ्गपरिभाषां निरूपयितुं तद्घटकपदार्थानाह। अन्तरिति। मध्यत्वस्य नियतावधाकाङ्क्षत्वात्तच्छान्त्यर्थमाह। बहिरङ्गेति। शेषपूरणेन व्याचष्टे। अन्तर्भूतेति। अङ्गशब्दस्य लोके शरीरावयवाचकत्वेपि प्रकृते निमित्तपरत्वमित्याशयेनाह। निमित्तानीति। इयञ्च वार्ह ऊठ्सूत्रेण ज्ञापितेति। तच्चोड्ग्रहणेन ज्ञापितेत्यर्थः। तथाहि तस्मिन्सूत्रे ऊठ्ग्रहणभावेपि सम्प्रसारणमात्रविधानेन लघूपधगुणे हुह्विरेचीति हुह्वौ विश्वौह इत्यादिसिद्धौ तद्वैयर्थ्यसिद्धमेव। सत्यां हि तस्यां बहिरङ्गसम्प्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्यादित्यूठ्ग्रहणं सफलम्। ननूठ्ग्रहणाभावे रूपासिद्धभावेपि विश्वौह इत्यादावूडिदमिति सूत्रेणौडादिभ्यः परा याऽसर्वनामस्थानविभक्तिस्तदादित्वा स्यादित्यर्थ

केन विभक्त्युदात्तत्वन्न स्यात् तस्मिन्सूत्रे ऊठस्थाने सम्प्रसारणग्रहणन्तु कर्त्तुमशक्यम्। यून: यूनेत्यादावतिप्रसङ्गादिति चेन्न। ऊडिदमिति सूत्रे वूडिदमिति पठित्वा स्थानसम्बन्धार्थकषष्ठ्या व ऊरिति समासे तत: वुश्च ऊट् चेति द्वन्द्वेन सुवचत्वात् वकारपाठफलं तु पुधातो: क्विपि पुर: पुरेत्यादौ तस्या: प्रवृत्ति:। न चैवमपि वप् धातो: क्विपि उप उपेत्यत्र प्राप्नोतीति वाच्यम्। ऊठ्साहचर्येणेणन्ताङ्गोहे ग्रहकस्य वोर्ग्रहणेनादोषात्। ऊळ्पधाग्रहणमिति वार्त्तिकेपि वूळ्पधेति पाठ्यम्। न चैवमपि वेञ: क्विपि सम्प्रसारणे उच्छब्दात्प्राप्नोतीति वाच्यम्। इणन्तेत्यस्य परिनिष्ठिते श्रूयमाणे य इण् तदन्तेत्यर्थात्। किञ्चैवं सत्यश्वद्यु वेत्यादौ स्वराप्राप्त्या ऊळ्पधाग्रहणमिति वार्तिकमनावश्यकम्। ऊठ उदाहरणन्तु जूर: जूरेत्यादि। अथ वा ऊडिदमितिसूत्रानन्तरं वाह इति सूत्रं कर्त्तव्यम्। यदि च हलादिविभक्तेरपि प्राप्नोतीत्युच्यते तदा शतुरनुम इति सूत्रानन्तरन्तथा पाठेन सामञ्जस्यात्। न चैवं सूत्रान्तरकरणे गौरवमिति वाच्यम्। अधिकपदाकरणेन साम्यात्। नन्वस्यां परिभाषायां ज्ञापकानुपयोग:। लोकन्यायेनैव सिद्धेरिति चेन्न। जातस्य बहिरङ्गस्यासिद्धत्वप्रतिपादनार्थमस्यावश्यकत्वात्। तदेतद्दृष्ट्वादयितुमाह। यद्यपीति। प्रत्यङ्गवर्त्तीति। अङ्गानां प्रत्यासन्नत्वात्प्रत्यासत्तिरूपगुणसम्बन्धादङ्गशब्द: प्रत्यासन्ने लाक्षणिकस्तेन वीप्सायामतिशब्दस्याव्ययीभाव:। सर्वविषयतेति। अन्तरङ्गे कर्त्तव्ये जातं तत्कालप्राप्तिकत्वासिद्धमित्यर्थकल्पनेनेति भाव:। एवञ्च सा परिभाषा पृथक् न कार्येति ध्वनितम्। ननु बहिरङ्गान्तरङ्गयोरिति परिभाषा निरपवादा। असिद्धमिति परिभाषा तु नाजानन्तर्ये बहिष्टृप्रकृतिरित्यतदपवादसहितेति सर्वविषयत्वमस्या इत्यनुपपन्नमित्यत आह। नाजानन्तर्यपरिभाषा त्विति। षत्वतुकोरसिद्ध इति सूत्रे तुग्ग्रहणमस्याज्ञापकम्। तदुदाहरणमधीत्य प्रेत्येति। तच्चासिद्धपरिभाषयैव सिध्यति। अन्तरङ्गे तुकि कर्त्तव्ये पदद्वयसम्बन्धिवर्णद्वयापेक्षस्यैकादेशस्यासिद्धत्वात्। नाजानन्तर्यपरिभाषास्वीकारे तु तुक्यन्तरङ्गेऽजानन्तर्य्याश्रयणेनासिद्धपरिभाषानिषेधे व्युत्पत्तिपर्यन्तमसंहितयावस्थानाभावेन पूर्वमेवैकादेशे तुगर्थं तुग्ग्रहणञ्चरितार्थम्। परिभाषास्वीकारादेवाच्चय्यूरिति सिध्यति। अन्यथाऽन्तरङ्गे यणि ऊठोऽसिद्धत्वाद्यण् न स्यात्। नास्त्रं वेति। षत्वतुकोरिति

सूत्रस्थन्तुग्ग्रहणमसिद्धपरिभाषाया अनित्यत्व एव ज्ञापकमस्तु। एवञ्चासिद्धपरिभाषाया अप्रवृत्त्यैव सकलेष्टसिद्धौ सा नारब्धव्येति भावः। वचनप्रामाण्यादिति। तच्चापवादत्वं द्विविधम्। येन नाप्राप्तिन्यायेन निरवकाशत्वेन वा। अधिकमन्यत्र स्पष्टम्। अङ्गतेतीति। कैयटादिसम्मतव्याख्यानमाह। न क्त इति। विग्रव्द्व्योत्यमर्थमाह। विग्रिष्ट इति। ऊहस्तर्क इत्येतद्विवृणुते। निमित्तविनाशेपीति। ऊहस्यान्यत्र ज्ञानरूपत्वेपि प्रकृते निश्चीयमानतादृग्यकार्यस्थितिरेव ऊहपदेन विवक्षितेति भावः। पाणिनीयाः। पाणिनिप्रोक्ताध्येतारो निमित्तविनाशसमानकालिककार्यस्थितिविषयकनिश्चयाभाववन्त इति फलितम्। एतेन निमित्तापाये नैमित्तिकस्याप्यपाय इति फलितम्। लाघवादाह। अन्ये लिति व्यूहोऽन्तरङ्गशास्त्रमिति। प्रकृतस्य व्यूहपदस्याचारक्विबन्तप्रकृतिकात्प्रत्ययान्तत्वात्। यथा लौकिकव्यूहस्य सैन्यरचनाविशेषस्य परबलनिवारकत्वं तथाऽन्तरङ्गशास्त्रमप्यस्मिन्व्याकरणे परिभाषाबलाद्बलवत्। भाविनिमित्तविनाश इत्यध्याहारः। निमित्तञ्चोपस्थितत्वादन्तरङ्गस्य गण्डते तथा च स्वनिमित्तविनाशसम्भावनासमानकालिको याऽन्तरङ्गशास्त्रप्रवृत्तिस्तद्विषयकनिश्चयाभाववन्तः पाणिनीया इति फलितम्। अन्ये लित्यनेनास्यार्थस्य लोकाप्रसिद्धत्वमेवारुचिरसूचिता। शेषमन्यत्र द्रष्टव्यम्। इति परिभाषाप्रकरणमिति। प्राधान्येन सूचात्मकपरिभाषाणामुक्तिकरणं समाप्तमित्यर्थः। परनित्येत्यादि तु प्रासङ्गिकत्वेनोक्तमिति दिक्॥

॥ इति परिभाषाप्रकरणम् ॥



इको यणचि। ननु यण् स्यादिति व्याख्यानेन यण्कर्तृकं भवनम्प्रतीयते तन्नोपपद्यते शब्दानान्नित्यत्वादत आह। कार्यशब्देति। संहितायामिति वैषयिकाधारे सप्तमी वाच्या, एवञ्च संहितायां विषयभूतायामिति पौनरुक्त्यादनुपपन्नमत आह। कार्येनिमित्तयोरिति। संहितायामिति सप्तम्यन्तपदप्रतीयमान एवार्थः स्पष्टत्वार्थं विवृत इति भावः। इदं यथासंख्यसूत्र इति। यथासङ्ख्यमनुदे-

श: समानाम् किमुदाहरणम्।इको यणचि दध्यत्र मध्वत्रानेतदस्ति।स्थानेन्तरतमेनाप्येतल्लिङ्गम्।इत्युक्तम्।ननु स्थानेऽन्तरतम इति सूत्रे यथासङ्ख्ये नाप्येतल्लिङ्गमित्युक्तं तच्चानुपपन्नम्। यण्ग्रहणबोध्या: सप्त इक्ग्रहणबाच्या: षट्षष्टिरिति वैषम्यादित्यत आह । जातिपक्षे इति । ननु यदीको यणचीतिसूत्रविषयेऽन्तरतमपरिभाषया निर्वाहस्तदा खौजसित्यत्रानुनासिकोकारस्य वकारोऽनुनासिक: प्राप्नोतीत्यत आह। अनुनासिकेति । गुणाभेदकत्वपक्षे तर्हि प्राप्नोतीत्यत आह।गुणाभेदकत्व इति।लक्षणां कटाक्षयन्नाह। दीर्घादीनामिति । अत एव । जातिपक्षाश्रयणादेव । जातिपक्षे मानमप्याह । ल्वादिभ्य इति।तत्फलमवात्तामित्यत्र सलोप: सूत्रत्वभिन्ना इत्यत्र चरितार्थम्। ननु यदीत्थं विधायकसूत्रार्थस्तदाऽस्य शास्त्रस्य साध्वनुशासनत्वभङ्ग इत्यत आह । व्याकरणस्येति । करणल्युटा व्याकरणमत्र सूत्रम् । परिनिष्ठितेन । अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकाक्रान्तेन समुदायेन । ज्ञाप्यम।इगादीनामुच्चारणप्रसङ्गे यणादि । अर्थापत्तीति । तथा च सैवात्रप्रमाणमिति भाव: । मूलोक्तपक्षेपि साध्वनुशासनत्वमुपपादयति । कार्यशब्दवाद इत्यादिना।एतेनेति।जातिपक्षाश्रयणेनैवेत्यर्थ:। भवदुक्तं सप्तम्यन्तपाठे संगच्छते तदेव नेत्यभिप्रायेण दोषान्तरमाह। स्थानेऽन्तरतम इति। प्रथमान्तपाठे स्थान्यनुरोधेनादेशसंकोच: । सप्तम्यन्तपाठे तु स्थानिसंकोच: स चायुक्त इति भाव: । चौ विध्यर्थ इति। विधेरपि शाब्दत्वसूचक इत्यर्थ:। एओङ्सूत्र इति । एओङ् सूत्रं यस्मिन्नान्हिकमन्यपदार्थ: तेन तस्मिन्नान्हिके हयवरट्सूत्र इत्यर्थ:। तत्र ह्रयोगवाहानामविशेषेण पाठ: कर्त्तव्य इत्यस्य प्रयोजनकथनावसरे संयोगोपधासञ्ज्ञाऽलोन्त्यविधिर्द्विर्वचनस्थानिवद्भावप्रतिषेधा इत्येतद्घटकद्विर्वचनस्य प्रयोजननिरूपणावसरे उर: क: उर: प: अनचि च अच उत्तरस्य यरोद्दे भवत इति द्विर्वचनं सिद्धवतीत्युक्तम् । द्वे वा स्त इतीति । यरोऽनुनासिक इति सूत्राद्यग्रहणमनुवर्तत इति भाव: । तत्र मानमाह । सूत्रकृतेति । निषेधविकल्पे विधिविकल्प: फलतीति भाव: । अवसान इति । वाक् वाक् इति भाष्योदाहृते । अन्यथा हलीत्येव वदेत् । द्वि: प्रयोग एवेति। यथा षाष्ठं द्विर्वचनं द्वि:प्रयोगरूपं न त्वादेशरूपं तथा आष्टमिकमिदमपीत्यर्थ:। ननु षाष्ठं द्विर्वचनमादेशरूपमेवास्त्विति चेन्न।स्थाने द्विर्वचने

षष्ठीस्थानेयोगेति परिभाषया कल्पिते आटिटदाशिशदित्यादौ वत्सरसादाविव प्रकृतिप्रत्ययविभागसंमोहेन णेरनिटीति णिलोपानापत्तेः । किञ्च जिघांसतीत्यत्र सनस्सकारेण विशिष्टस्य द्विर्वचने कृत्वन्न स्यात् । एतस्यापि द्विर्वचनस्य स्थाने द्विर्वचनत्वे स्थाली स्थाता वत्सर इत्यादौ सकारस्यतकारस्य चैकस्य सद्वयात्मकतद्वयात्मका देशे द्वयोर्भेदस्य वत्सरसादाविवाऽप्यबुद्धौ प्रत्येकं शरः पररूपबुद्धप्रत्यक्षत्वेन शरः खय इति द्विर्वचनन्न स्यात् । यदि च न च मात्रिकं व्यञ्जनमस्तीति भाष्योक्तेर्नायमाचिक एकवर्णात्मकादेशः किं तर्हि वर्णद्वयात्मक एवेति न पूर्वोक्तदोष इति मन्यते । तथापि दधिस्यति मधुस्यतीत्यादौ क्वचि सर्वप्रातिपदिकेभ्यः क्वचि लालसायामित्यनेन सुगागमे अनचि चेति द्विर्वचनादेशे आदेशप्रत्यययोरिति षत्वापत्तेः सकारोच्चारणं लवणस्यति क्षीरस्यतीत्यत्र चरितार्थम् । यदि तु द्वित्वासिद्धत्वान्नायं दोष इत्युच्यते तदा साधकान्तरमाह । यर इत्यादेरिति । न च स्थाने द्विर्वचनपक्षस्यापि स्थानपदाध्याहारेण तन्निरूपितसम्बन्धार्थकत्वं षष्ठ्याः कल्पयित्वोपपत्तिः कार्या एवञ्चोभयत्राप्यध्याहारोऽविशिष्ट इति वाच्यम् । द्विःप्रयोगपक्षस्योपपदविभक्तेरितिपरिभाषानुगृहीतत्वात् । न लक्ष्यभेद इति । यथा उदवोढामित्यत्र उदवह् स् तामिति स्थिते सिज्लोपादेरसिद्धत्वाद्धलन्तलक्षणायां हृस्वौ सहि वहोरोदित्योक्ते लक्ष्ये लक्षणस्येतिन्यायेन पुनर्द्वित्वेनेति सिचि हृद्विरिति सूत्रे भाष्ये उक्तम् । स्थानिवत्सूत्रारम्भस्य प्रयोजनमाह । स्थान्यादेशयोरिति । अत्रभेदादित्यस्य स्थानिकार्यमादेशे न स्यादित्यनेनान्वयः । तत्स्थानापन्न इति लोकन्यायेन सिद्धिः स्यादत आह । स्वं रूपमित्युक्तेरिति । प्रत्यासत्तीति । आदेश स्थानिवदितिवाक्यजन्यशाब्दबोधे स्थानिनो विषयत्वात्तैवानल्विधावित्यत्र चाल्यदार्थविशेषणीभूतसम्बन्धाकाङ्क्षास्थानिद्वत्वावनुपस्थितकल्पनायामानाभाव इति भावः । यद्यपि तथा आदेशोऽनुपस्थितस्तथापि स नाल्विशेषणं कष्टाय ामण इति निर्देशात् । आदेशस्य स्थानिभूत इति । अत्राप्यादेशस्यैव स्थानी ाक्यार्थघटक इत्यत्र प्रत्यासत्तिरेव प्रयोजिका । अनल्विधावित्यत्र च प्रसज्यप्रतिषेध एव । न पर्युदासस्तथा सति व्यूढोरस्केनेत्यादौ स्थान्यल्भिन्नकवर्गाद्यावयत्वेन णत्वापत्तेः । स्थान्यलाश्रयविधिभिन्नविधावित्यपि नार्थः । तथा सति बभूविवेत्यत्र द्विधौ बलादिलं निमित्तताव्यवच्छेदकत्वे नाश्रितत्वात्र स्थानिसम्बन्धि-

वकारघटितमिति स्थानिवद्भावो न स्यात्। प्रसज्यप्रतिषेधे यद्धर्मवैकल्यादुपदेशाप्रवृत्तौ स्थानिवद्भावः प्रार्थ्यते तस्य धर्मस्य स्थानिस्थान्यवयवान्यतरालवृत्तित्व एव निषेधप्रवृत्तेः। प्रकृते च वलादित्ववैकल्यप्रयुक्ता नोपदेशाप्रवृत्तिः किन्त्वार्द्धधातुकत्ववैकल्यप्रयुक्ता तच्च न तादृशमिति भावः। यदि तु यद्रूपवैकल्यप्रयुक्तोपदेशाप्रवृत्तिः प्रसज्यते स्थानिस्थान्यवयवान्यतरालवृत्तिभिन्नतद्धर्माश्रयविधौ स्थानिवद्भावो भवतीत्यर्थ आश्रीयते तर्हि पर्युदासेपि न दोष इत्यवधेयम्। स्थानिभूत इत्यर्थनिवेशे मान माह। अत एवेति। आद्यार्थनिवेशादेवेत्यर्थः। नन्वेवमारेयत्र ऋधातोर्द्वित्वेऽभ्याससंज्ञायामुरदत्वेरपरे कृतेऽरित्यभ्यासत्वमलभ्यत्स्य स्थान्यलवृत्तिधर्मत्वादेवञ्च हलादिशेषाप्राप्तिरत आह।ऋधातोरिति। पुनरितिसञ्ज्ञायाः कार्यार्थत्वात्कार्यस्य च भेदे तत्तत्प्रयोजकसञ्ज्ञाया अपि भेदः प्रधानानुरोधेन कल्पते इति भावः। अत एव।आद्यार्थनिवेशादेव। यत्त्वत्रेणिवृत्तय इति। धिन्वन्तीत्यत्रेत्यर्थः। अपरविधावित्यस्य स्थानिभूतादचः परस्य विधौ नेत्यर्थः। तेन नैधेय इत्यस्य सिद्धिः। अस्या एकदेशयुक्तित्वमुपपादयति। असिद्धवत्सूत्रेणेति। आयङ्गासन्निति।अत्र स्वविधावपि स्थानिवद्भावादजादित्वमाश्रित्याट्सिद्धिः। प्रकारान्तरेण सिद्धत्वमेवैकदेशयुक्तित्वसाधकम्। ननु तस्यान्यथासिद्धत्वेपि धिन्वन्तीत्यस्य सिद्धिरेवेतादृशन्यासकार्या भविष्यतीत्यत आह। अस्यापीति।धिन्वन्तीत्यस्यापीत्यर्थः। इतिवार्तिक इति। अचः परस्मिन्निति सूत्रघटकपूर्वशब्दार्थस्यावधिसाकाङ्क्षत्वात्तदाकाङ्क्षाशान्त्यर्थमिदं वार्तिकं वैयाकरण इत्यादावाद्यप्रवृत्त्यर्थमिति च बोध्यम्।स्थान्यवयवान्निवेश प्रयोजनमाह। प्रदीव्येत्यादाविति।तत्रापि स्थानिविशेषणप्रयोजनमाह।स्थान्यलीति। एवञ्च यत्फलितमत्यासत्त्या शेषपूरणेन च तदाह। यन्निमित्तेत्यादि। स्थान्यलसाधारणेति। अत्र स्थान्यलसाधारणेत्यस्य स्थान्यलितरावृत्तित्वे सति स्थान्यलवृत्तित्वमित्यर्थोऽसाधारणनिवेशात्प्रतीयते, परन्त्वयन्न युक्तः। धिन्वन्तीत्यत्र वकारस्यान्यकारवृत्त्यार्द्धधातुकत्वस्य स्थान्यलितरस्यादिवृत्तितया विशेषणाभावेन विशिष्टाभावस्य सत्त्वात्स्थानिवद्भावापत्तेः। किन्तु स्थान्यलवृत्तित्वमात्रं विवक्षितम् तथा चार्द्धधातुकत्वस्य स्थान्यकारवृत्तित्वेन न स्थानिवद्भावप्रसक्तिः। अत एव भोभगो अघो इति सूत्रभाष्योक्त

रेऽप्रवृत्तित्वस्य विसर्गेऽतिदेशस्याश्रु संगच्छते । नन्वेवमट्णेट् अवकात् । अचकाः । इत्यादौ सार्वधातुकत्वतिप्तसिप्त्वादिधर्मावच्छिन्ननिमित्तकाडमाट्यो न सिध्यन्तीतेषां स्थान्यल्प्रवृत्तिधर्मावच्छिन्ननिमित्तकत्वादिति। प्रत्ययलक्षणसूत्रस्य विधायकत्वमेव स्यादिति भाष्योक्तनियमार्थत्वपक्षासङ्गतिरिति चेन्न । यथाऽग्रहीदित्यस्य सिद्धयेविशिष्टं श्नुषोऽनलमाश्रयते इटन्नामेति भाष्ये उक्तन्तेनैव न्यायेनैतेषां सिद्धिसम्भवात् । तथाहि । स्थानिस्थान्यवयवाल्प्रवृत्तिधर्मे आदेशविधावुपात्तत्वविशेषणन्देयम्। एवञ्चादेशविधौ स्थानितावच्छेदकत्वेनोपात्तो यस्तस्थानिस्थान्यवयवान्यतराल्मात्रप्रवृत्तिधर्मस्तत्समानाधिकरणधर्मावच्छिन्ननिमित्तके विधौ स्थानिवत्वन्नाग्रहीऽलिटि दीर्घ इति विधावुपात्तं स्थानितावच्छेदकमिट्त्वन्तच्च नालमात्रप्रवृत्तीति स्थानिवत्त्वसङ्गतिः । धिन्वन्तीत्यत्रादेशस्य यणो विधौ स्थानितावच्छेदकत्वेनोपात्तमिक्त्वं तच्च स्थान्यल्मात्रप्रवृत्तीति तत्समानाधिकरणार्धधातुकत्वावच्छिन्नोद्देश्यकइण्न।स्थानितावच्छेदकत्वेनोपात्तश्चोद्देश्यबोधकशब्दजन्योपस्थितिविषयतावच्छेदकतापर्याप्तयधिकरणत्वमेवञ्च हल्ङ्यादिलोपे न केवलं हस्त्वमेवोद्देश्यतावच्छेदकतापर्याप्तयधिकरणं किन्तु सुतिस्यमेदविशिष्टहल्त्वन्तन्निष्ठा चोद्देश्यतावच्छेदकताख्या विषयता नालमात्रप्रवृत्तितावच्छेदकधर्मनिष्ठावच्छेदकतापर्याप्तयवच्छेदकधर्मपर्याप्तावच्छेदकताकेति तेषु निषेधाप्रहत्या स्थानिवद्भावेन तत्तत्कार्यसिद्धौ प्रत्ययलक्षणसूत्रस्य नियमार्थत्वसङ्गतिः । अत्र हल्ङ्यादिलोपे कार्ये उद्देश्यतावच्छेदकतयोपात्तं सुतिस्यमेदविशिष्टहल्त्वन्तन्निष्ठावच्छेदकतापर्याप्तयवच्छेदकं विशिष्टहल्त्वन्तञ्चात्र न तादृशाल्मात्रप्रवृत्तितावच्छेदकतापर्याप्तयवच्छेदकमिति। अग्रहीदित्यत्र च स्थानितावच्छेदकतापर्याप्तयवच्छेदकमिट्त्वन्तच्च नालमात्रप्रवृत्तितावच्छेदकतापर्याप्तयवच्छेदकमिति स्थानिवद्भावनिर्वाहः। नचैवमपि वृक्षः प्लक्ष इत्यत्र विसर्गविधावुद्देश्यतावच्छेदकतयोपात्तस्य रत्वस्याल्प्रवृत्तितया तत्समानाधिकरणसुत्वावच्छिन्नोद्देश्यकम्पदत्वन्न स्यादिति वाच्यम्। पदसञ्ज्ञायां यथोद्देश्यपक्षस्यैवाश्रयणेन रुत्वात्पूर्वं जायमानपदत्वस्य समुदायनिष्ठस्य स्थानिवद्भावेन विशिष्टबुद्धिसम्भवात् । न च सान्नी लोन्नी इमे इत्यत्र श्यादेशस्थान्योकारनिष्ठस्वादित्वस्य श्यादेशेऽतिदेशासम्भवेन भत्वा-

भावाद्विभाषा ङिय्योरित्यलोपः द्विवचनत्वस्यानतिदेशात् प्रगृह्यसञ्ज्ञा च न स्यादिति वाच्यम्। ङान्तसञ्ज्ञाकरणेन ओङ आप इतिसूत्रजन्यबोधीयोद्देश्यतायामिट्त्ववदीङ्त्वावच्छिन्नत्वस्वीकारात्। ननु घेर्ङितीति गुणविधावुपात्तं स्थानितावच्छेदकं घित्वन्तञ्च स्यान्यलवृत्तीति स्थानिवद्भावासम्भवेन कृन्मेजन्तसूत्रस्थभाष्यविरोध इति चेन्नातदन्तस्य घिसञ्ज्ञेति पक्षाभिप्रायेण तदुपपत्तेः। एवमेव कुभ्रुकारिभ्य इत्यत्राप्यादेशविधावुपात्तस्य स्थानितावच्छेदकस्यात्त्वस्यापीट्त्वतौल्यभविष्यति तदेतदुक्तम्विशिष्टं ह्येषोऽलमाश्रयते इटन्नामित्यस्य व्याख्यावसरे भाष्यप्रदीपोद्योते। दीर्घ इडृदित्वे वातिदेशकल्पनायां स्थानितावच्छेदकं च शास्त्रोपात्तरूपमेव तच्च नालरूपमिति इट् इत्यादि न स्यान्यलवृत्तिधर्माश्रयम् एवञ्च यत्र शास्त्रे विशेष्यतया विशेषणतया वा आदेशस्थानिभूतो योऽल् तत्सम्बन्धी च योऽल् तन्मात्रवृत्तिधर्माश्रयणन्तादृशे विधौ हि निषेधोऽच च शब्दतो विशिष्टमेवानलमाश्रयते वलादेरित्यत्र च शब्दतो विशिष्टमलमिति भाव इति।एतदाशय उक्तः। न च स्थानितावच्छेदके उपात्तत्वविशेषणदाने प्राचीनोक्तासाधारणनिवेशात्को विशेष इति वाच्यम्। स्थानितावच्छेदकधर्मस्योपस्थितितया तस्मिन्नुपात्तत्वविशेषणदानापेक्षयाऽसाधारणनिवेशेऽनुपस्थितिकल्पनायां गौरवस्य स्पष्टत्वात्। न चैवं व्याख्यानेपि मात्रपदस्य निवेशेऽसाधारणनिवेशकर्तृमतादविशेष इति वाच्यम्। आधेयत्वस्वनिष्ठतन्मात्रवृत्त्युपात्तधर्मपर्याप्तावच्छेदकताकविषयतासामानाधिकरण्योभयसम्बन्धेन तादृशान्यतरविशिष्टो यो धर्मस्तद्धर्मसमानाधिकरणधर्मावच्छिन्नोद्देश्यके विधौ स्थानिवत्त्वन्नेत्यर्थः। एतादृशोभयसम्बन्धेन वैशिष्ट्यनिवेशसूचनाय यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य निमित्तस्य स्थान्यलसाधारणधर्मत्व एव निषेधप्रवृत्तेरित्यत्रासाधारणेत्युक्तम्। ननु तस्य विशेषणत्वाभिप्रायेण। अणुदित्सूत्रस्थभाष्यप्रामाण्येनोद्देश्यत्वविधेयत्वाख्यविषयतया बोधविषयताया अनुबन्धविनिर्मुक्ते स्वीकारेऽपि सानुबन्धकनिर्देशे स्थानित्वादेशत्वयोरनुबन्धविशिष्टे सूचोपात्ते स्वीकारात्। अत एव ङेर्यादेशस्य सुप्त्वादित्युक्तिसङ्गतिः। अलमात्रवृत्तित्वञ्च येन सम्बन्धेन स्थानितावच्छेदकत्वन्तेन सम्बन्धेन विवक्षितम्। एवञ्च ध्यादिसञ्ज्ञया यत्र सञ्ज्ञिनः स्थानित्वं बोध्यते तत्र तादात्म्येन संज्ञाया एवावच्छेदकत्वन्तेन सम्बन्धेन च

तस्यास्स्वस्वरूपेणापि सम्बन्धितया स्वस्वरूपस्य चानत्वेन स्थानिनिष्ठविषयतायां अल्मात्रवृत्तिधर्मपर्याप्तावच्छेदकताकत्वाभावस्स्फुट एव । एवमेवाच्छब्देनोपादाने बहुवचने भत्थेदित्यादावपि एतत्कल्पनायां क्षुन्मेजन्तसूत्रस्थभाष्ये चिकीर्षवे क्षुम्भकारेभ्य इति प्रयोगेष्वतिव्याप्तिप्रदर्शनपरभाष्यमेव मानमिति भाष्यतत्त्वविदामाशय इति दिक्। ननु स्थानिवद्भावस्वीकारे नायक इत्यत्राकादेशस्य स्थानिवद्भावेन हलादित्वादायादेशो न स्यादत आह । प्रत्यासत्त्येति । आयादेशप्रतिबन्धस्तु न शास्त्रीय इति भावः । प्राधान्यादिति । सर्वातिदेशानां कार्यार्थत्वादिति भावः । शास्त्रातिदेशस्य कार्यातिदेशादभिन्नरूपत्वे साधकमाह । भाष्येऽपीति । ननु कार्यातिदेशस्वीकारे इदमेव कार्यसाधकमिति लभ्यते । एवं सति यादेशस्य स्थानिवद्भावेन सुप्त्वात्सुपि चेति दीर्घ इति ग्रन्थानामसङ्गतिरत आह । तत्रालपेक्षितेति । यथा सुप्त्वव्यवहारे स्वादिपान्तसमुदायघटकत्वनिमित्तं तस्य यादेशेऽभावेपि अनेनातिदेशेन सुप्त्वबुद्धौ तादृशव्यवहारो भवति पश्चात्स्वनिमित्तसद्भावबुद्ध्या सुपि चेति शास्त्रं प्रवर्तते तथा सर्वत्र ज्ञेयमिति। परिवोरित्यादाविति । अत्र व्योः क्विपि सम्प्रसारणे कृते स्थानिवद्भावेनैव तुग्दीर्घत्वयोः प्राप्तौ स्थानिवत्सूत्रस्यैवोभयविधायकत्वे तुकः परत्वाद्बल इति दीर्घ इति व्यवस्था न स्यादिति भावः । पक्षान्तरमाह । यद्वेति । किञ्चिन्निमित्तवैकल्ये पीति । यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तवैकल्ये पीत्यर्थः । आदेशः स्थानिवत्कार्यं प्रवर्त्तयतीति सूत्रार्थात् । ततः किं कार्यमित्याकाङ्क्षा ततो विधिशास्त्रपर्यालोचनम् । ततस्तत्कार्यनिर्णय इति यद्देशस्थितकार्यस्वरूपनिश्चयस्तद्देशीयपरत्वस्य विप्रतिषेधशास्त्रप्रवृत्तिनियामकत्वमिति भावः । एतदेव । पूर्वोक्तक्रममेव । उत्पत्तिदेशः । उत्पत्तिमन्निश्चयविषयकार्यबोधकशब्दघटितसूत्राधिकरणदेशः । क्व चित्पूपदेशदेश इति पाठः । स तु सुगम एव । अत्र । अनयोर्मध्ये । अत एव । आद्यपक्षस्यैतत्सूत्रभाष्यसम्मतत्वादेव । स्थान्यल्विधिप्रतिषेध इति । तत्र हि स्थान्यल्विधिरूपे कार्ये प्रतिषेध आहोस्विदल्मात्राश्रयकार्ये इति सन्दिह्यैवमुक्तम् । अत्र लघूपधत्वादीत्यादिनाऽनुपधत्वपरिग्रहः । लघूपधगुणादिरित्यत्रादिना वृद्धेः परिग्रहः । अत्र लघूपधगुणादीत्येवोक्तम् न त्वनेनातिदे-

र्थेनेति । तेनाद्यपक्षस्य भाष्यसंमतत्वं लभ्यते । पूर्वत्र किञ्चिन्निमित्तवैकल्ये पीत्युक्तत्वात्र यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तस्यापि कस्य चिद्ग्रहणशंकावारणार्थमाह । एवं यन्निमित्तेति । एवम् । पूर्वोक्तवत् । सर्वनिमित्तकत्वमिति । तेन सर्वस्मिन्नित्यत्र यज्ञादित्वाभावाद्दीर्घो न । अन्यथा किञ्चित्पदेन यज्ञादित्वस्यापि ग्रहणे स स्यादिति भावः । अत एव । तादृशसर्वनिमित्तकत्वादेव । इष्टवद्भावेनेति । अनेनेष्टत्वमेवातिदिश्यते । भत्वं तु यचि भमित्यनेन । वर्णाश्रयत्वमिति । तेन सुबन्तात्सिजिति पक्षेऽन्तर्वर्तिसुपा यत्प्रत्ययान्तस्य णिलोपे जातेपि प्रत्ययलक्षणेन प्राप्तं यञ्चत्वन्तेन बाधो नेति मनोरमोक्तं संगच्छते । प्रकृतसूत्रविषयेप्याह । सर्वातिदेश इति । तेन रामस्येत्यादौ न दीर्घः । शास्त्रीयमेवेति । शास्त्रबोधमेवेत्यर्थः । तेन वयादेशे स्थानिवद्भावेन तासौ नित्यानिट्त्वं न । तस्य स्थानिनि शास्त्रबोध्यत्वाभावात् । औतस्थान्यादेशभावस्यैव । तस्य पुरस्स्फूर्तिकत्वात् । सर्वे सर्वपदादेशा इत्यत्र पदशब्दोऽर्थवत्परः । अतएव । एकदेशविकृतन्यायस्य लौकिकत्वादेव । अत एव । अशास्त्रीयस्यापि विकारस्य ग्रहणादेव । आयसावित्यत्र षान्तनिष्ठं ष्ठुत्वेरूपिताङ्गत्वमेकदेशविकृतन्यायेन सान्ते आगतमिति नुमः प्राप्तिरत्र ह्रस्वे: शास्त्रीयत्वेप्यकारनिवृत्तिर्न शास्त्रीयेति भावः । एतदेव समर्थयितुं साधकान्तरमाह । अन्तादिवदिति । ननु शब्दैकदेशस्य विकारस्वीकारे शब्दनित्यत्वसिद्धान्तविरोध इत्यत आह । शब्दानित्यत्वमिति । रेखागवयवत्सर्वविकारादिकल्पना । वास्तविकन्तु नित्यत्वमेवेति भावः । अन्यत्वाभाव इति । अ । रोपितान्यत्वमित्यर्थः । तेन शक्तावच्छेदकानुपूर्व्यग्रहात्ततो बोधानापत्तिरिति दूषणस्य नावकाशः । जातिव्यञ्जकेति । यत्र जातिव्यञ्जकावयवसंस्थानमस्ति तत्रैव लोकेऽयं खेत्यभेदप्रत्ययः । अभेदप्रत्यय एव व्यक्त्यैक्यसाधकस्य किञ्चिद्विकार एव । यत्र त्वल्पत्वदधिकं वा विकृतन्यत्र शुनोयमवयवो न तु खेति व्यवहारः । शुनोयमिति प्रत्ययेन तु भेदस्यैव सिद्धिरिति भावः । प्राचीनानुरोधेनाह । किञ्चेति । परिच्छिन्नपरिमाणेति । परिच्छिन्नानुपूर्वीकसमुदायनिष्ठतयेत्यर्थः । प्रकृते च परिच्छिन्नपरिमाणार्थवाचकस्तिङ्शब्दः । भाष्य इति । तत्र हि यथा द्रोणादिश्रामाभ्यूनाधिकयोर्न प्रवृत्तिस्तथा सर्वेत्यानुपूर्वीविशेषोपादानेन कृतसंकेतस्य सर्वनामश-

दस्यापि सर्वकादावप्रवृत्तिमाशङ्क्य तदेकदेशभूतं तदग्रहणेन गृह्यते इति समाहितम्। ननु शनोऽधिकस्फोटादिविकारसत्त्वे द्रोणादिदृष्टान्तेनायं श्वा इति व्यवहारो स्यादिति चेत्। तत्रापि तदेकदेशन्यायेनैव तथा व्यवहार इति भावः। स्थानिवद्भावविषय एव विशेषो वक्तुं शङ्कते। न चेति। शङ्कायां स्थानिवद्भावेनेत्युपादानमन्तादिवच्चेति सूत्रं स्थानिवद्भावेन गतार्थमिति मतेन। प्रातिपदिकत्वापत्तिरिति। तथा च न लोपापत्तिः। न चैतादृशे विषये यदि नलोपस्तर्हि तस्माच्छसि पुंवीत्येवास्तु। तस्मादित्यस्याक इत्यर्थः अचीति सिद्धत्तम्। अकः सवर्णे दीर्घो भवतीति सूत्रार्थः, विधानसामर्थ्येन चाचादेः परस्येत्यस्य बाध इति निर्विसर्गरूपे सिद्धे नकारादेशविधानं तच्छ्रवणार्थमिति नलोपो न भविष्यतीति वाच्यम्। तण्डुलानित्यादावित्यादिपदेन सर्वस्मिन्नित्यत्र तस्यापत्तिरित्याशयात्। न चात्रापि नकारोच्चारणसामर्थ्यं वक्तुं शक्यम्। सर्वस्मिन्नय इत्यत्र अयवासेत्यलुकि संज्ञाविधौ नलोपस्यासिद्धतया गुरुसंज्ञायां श्रुतसिद्धेः फलत्वात्। अतएव। अतिदेशस्वभावसिद्धताद्दयवचनबलादेव। ननु असिद्धवद्भावेपि यदि स्वाश्रयधर्मप्रयुक्तं कार्यमस्तदाऽसिद्धवत्सूत्रमेव व्यर्थमत आह। असिद्धवत्सूत्रन्त्विति। पर्युदासत्व इति। अयमाशयः। अप्रत्यय इत्यस्य पर्युदासत्वे प्रत्ययान्तभिन्नत्वं प्रातिपदिकसंज्ञाप्रयोजकं तदभावप्रयुक्तः प्रातिपदिकसंज्ञाभावस्तु न शास्त्रबोध्य इत्येतत्प्रयोजकप्रत्ययान्तत्वबुद्धिसम्पादकः स्थानिवद्भावो न स्यादिति। उत्तराभिप्रायस्तु यदि प्रत्ययान्तत्वप्रयुक्तप्रातिपदिकत्वाभावः शास्त्रतात्पर्यविषयो न स्यात्तदार्थवत्सूत्रेण प्रत्ययान्ते न विधिर्नापि निषेध इति अप्रत्यय इतिविशेषणं व्यर्थमेव स्यादिति तत्सामर्थ्याच्छास्त्रतात्पर्यकल्पनया सिद्धोप्यर्थः शास्त्रीयवद्भवतीति तत्सम्पादकस्थानिवद्भावो भवत्येव। अस्मिन्नर्थे साधकान्तरमाह। वेरस्कन्देरनिशामिति। पर्युदासत्वे निष्ठाभिन्ने क्त्वेन निष्ठासदृशे प्रत्यये एव षत्वन्न तु तिङन्त इति लभ्यते। प्रसज्यप्रतिषेधेऽसमर्थसमासो वाक्यभेदश्च स्यादतो लाघवात्पर्युदासः। अत एव न्यायः। तिङन्ते षत्वाभावस्येष्टत्वे सम्मतिमाह इत्यादीति। विस्कन्द इति। अत्र हि सर्वे सर्वपदादेशा इतिन्यायेन तशब्दस्य नशब्दादेशस्तस्याशास्त्रीयेपि षत्वाभावे स्थानिवद्भावो

भवतीति। न चैवोयवायाव इति सूत्रेऽवीत्यनुवृत्तेर्नाव्ययीभावः शास्त्रतात्पर्य्यविषय इति नायक इत्यादिरूपप्रतिबन्धकस्थानिवद्भावस्यादिति वाच्यम्। पर्य्युदासलभ्येतिङ्ग्राह्यगरीरे निवेशेनैव दोषवारणात्। अत इत्यादिसम्मतत्वेत्य पादानभाष्यानुग्रहरूपारुचिसूचनाय। अत एवाह। तस्य प्रसज्यप्रतिषेधत्व इति। तस्य। अनिष्टायामित्यस्य। वस्तुतस्त्वज्ञार्थो लाघवात्कल्प्यते तत्र न ज्ञापकापेक्षेत्याशयेनाह। केचित्तु भाष्य इति। अस्योक्तमित्यनेनान्वयः। तेन सिद्धिरिति। लोकन्यायेन सिद्धिरित्यर्थः। नन्वशास्त्रीयस्याप्यतिदेशे तासौ निल्यानिट्त्वस्याप्यदिनिष्ठस्य घस्लादेशे अतिदेशादुपदेशेऽत्वत इत्यस्य प्राप्तया जघसिथेत्यत्र क्ङिति भारद्वाजस्येति विकल्पापत्तिरित्यत आह त्वत्र क्ङादिनियमान्नित्यमिडित्यत आह। अतिप्रसङ्गस्त्विति। न धातुलोप आर्धधातुक इति सूत्रप्रत्याख्यानपरभाष्यध्वनितश्चायं कल्पः। तथाहि। लोलुवः पोपुव इत्यादौ यङ्वयवयकाराकारयोः पृथग्लोपेऽच्प्रत्ययनिमित्तकगुणस्याचः परस्मिन्निति सूत्रेणाक्लोपस्य स्थानिवद्भावादादौ प्रतिबन्धेपि यङ्वयवाकारमाश्रित्यैवोवङि पुनरजिमित्तकलघूपधगुणस्याचः परस्मिन्नित्यक्लोपस्य स्थानिवद्भावान्निवृत्तिर्न स्यादुवङवयवोकारस्यानादिष्टादचः पूर्वत्वाभावात् अशास्त्रीयस्याप्यतिदेशे तु स्थान्युकारनिष्ठस्यानादिष्टादचः पूर्वत्वस्य स्थानिवत्सूत्रेणातिदेशादचः परस्मिन्निति स्थानिवद्भावः सिध्यतीति। अनादिष्टादचः पूर्वत्वस्याशास्त्रीयस्यातिदेशादेव निराद्यादित्यत्र उपधाया इति णौ ह्रस्वे सर्वे सर्वपदादेशा इतिन्यायेन क्ङितेऽदो जग्धिरितिजग्धादेशस्य बघादेशस्य च नापत्तिः। अनादिष्टादचः पूर्वत्वस्य स्थानिनिष्ठस्य क्ङतद्धितेतिदेशादिति बोध्यम्। यदुक्तं क्वचिल्लोकन्यायानाश्रयणेनेति तत्र साधकमाह। ब्राह्मणकण्डूतिरिति। उवङि यणि चेति। यदा कंड्वादयो धातवः प्रकृतित्वे नाश्रीयन्ते तदोवङः प्राप्तिः, यदा तु प्रातिपदिकाद्यक्प्रत्ययस्तदा यणादेशस्य प्राप्तिः। पूर्वोक्तं पर्य्युपदासबोध्यमर्थं द्रढयति। अत एवेति। तत्राप्यतिदेशप्रवर्त्तनादेव। अत्रार्थे कैयटोक्तेविरोधमाशङ्क्य परिहरति। यत्त्विलादिना। अनलिबाविति विधिग्रहणादिति। अन्यथाऽनलीत्युच्यमानेन्यविभक्त्यर्थस्य क्रोडीकारो न स्यात्। विधिग्रहणे त्वलाश्रयविधिसामान्यग्रहणसिद्धिः। तेन प्राधान्येनाप्राधान्ये न वा यत्रालाश्रयणं तत्र सर्वत्र निषेधसिद्धिः। यत्र विधौ शब्दत इति।

एतन्निष्कर्ष उक्तः। अत्र सूत्रे विशेषेति। तथा च सामान्यातिदेशे विशेषानतिदेश इत्येषा परिभाषा न प्रवर्तते इति भावः। प्रपञ्चेत्यत्र विशेषणतयाऽऽश्रयणे स्थानिवद्भावनिषेधोपि विधिग्रहणस्य प्रयोजनमितिव्याख्यानसामर्थ्यात्। न च्व्यपीति सूत्रमप्यत्र ज्ञापकमित्याह। हलादिकृङिन्निमित्तक इति। सामान्योपस्थापकसामग्रीकाले नियमेन विशेषोपस्थापकसकलसामग्र्यभावमूलिकायास्सामान्यातिदेश इति परिभाषायास्त्यागेपि न च्व्यपीति सूत्रस्य न चारितार्थ्यम्। प्रदायग्रहणेत्यादौ स्थानिवद्भावेन कित्त्वस्य विशेषणतयाऽऽश्रयणान्निषेधस्यादत आह। अनुबन्धकार्ये त्विति। इति शेष इति। एतेन नानुबन्धकृतमनेकाल्त्वमिति परिभाषान्तरमारब्धव्यमिति सूचयति। ध्वनितं चेदमिति। अनुबन्धानामलव्यवहाराभावस्वरूपं वस्त्वित्यर्थः। एवञ्चगवतो ङिच्च पिच्च ङिच्चेति या कल्पना साप्यनुबन्धानामलव्यवहाराभावसूचिकेति बोध्यम्। अच एवेति। अचः परस्मिन्निति सूत्रेऽनुवृत्तादेशपदार्थेऽच्पदार्थस्य स्वमात्रनिवर्त्तकत्वरूपसम्बन्धः षष्ठ्यर्थः। अत एव चङीति। उक्तार्थस्वीकारादेव। चङ्परनिर्द्धास इत्यस्य कर्त्तव्य इति शेषः। निषेध इति। क्ङितुगुपधात्वे ति निषेधस्यार्थक इत्यर्थः। यलोपो न स्यादिति। स्वाश्रयनिवृत्तेरप्येतत्सूत्रसाध्यत्वात्। ननु युवजानिरित्यत्र यलोपविधिमति न स्थानिवदित्यनेनापि गतार्थमत आह। वैयाघ्रपद्य इति। यदत्र स्थानिवद्भावः स्यात्तदा पद्भावो न स्यात्। आदीध्य इति। अत्र स्थानिवद्भावे यीवर्णयोरिति लोपस्यापत्तिः। स्वाश्रयद्वयत्वनिवृत्तेरिति। गौणी मुख्या वा सङ्ख्या पूर्वां सङ्ख्यां बाधत इति न्यायात्। निगाल्यत इति। अत्राचि विभाषेति लत्वम्। पटयतीति। टिलोपस्य स्थानिवद्भावादुपधाह्रस्वो न भवति। लघूपधत्वे ति। अदुपधत्व इत्यर्थः। व्याख्यानाच्चे ति। परस्मिन्नित्यस्य श्रवणाद्यदि परस्यावधित्वं तदा लवन इत्यत्र गुणनिमित्तल्युणिनमित्तकस्य स्थानिवद्भावेऽवादेशो न स्यादित्यं च किरतौ लवन इति निर्देशासंगतिरितिभावमूलकादित्यर्थः। तस्यैव। अच एव। पूर्वसम्बन्धिन्येव शास्त्रविधेय इति। अत्र मानमजादेरित्यादिनिर्देशः, अन्यथा घेर्ङितीति गुणस्य स्थानिवद्भावे सति ङसिङसोरिति पूर्वरूपानापत्तिः, सूत्रन्तु सेगोशब्दान्ङसिङसोश्चरितार्थम्। अधिकारार्थसङ्ग्रहार्थमाह। वस्तुतोऽचे ति। तत्त्वमिति। विवक्षितो यावानर्थस्स पर्य्यायशब्दान्तरेण न बोध-

ले इति बोद्धुः श्रोतुश्च शब्दतत्त्वे नैवानेकार्थप्रतीतिरिति भावः। भावस्त्वन्तार्थमाह। तत्स्थितावित्यर्थ इति। तत्त्वनिर्देशे मानमाह। अत एवेति। द्वितीयार्थाङ्गीकारादेवेत्यर्थः। भाष्यसम्मतिरप्यत्रार्थ इत्याह। प्रकृतसूत्रेऽपीति। भावसाधनविधिशब्दपक्षे यदयमेवार्थस्तदा निगाल्यते एवमादिपूर्वोक्तार्थप्रयोजनासंगतिरत आह। सोऽपीत्यर्थ इति। साधारणमिति। तच्च कार्य्यशब्दवादे स्वोत्पत्त्यधिकरणवर्णवृत्तित्वं संप्रतियोगिसमयवृत्तित्वरूपम्। नित्यत्वपक्षे तु तज्ज्ञानघटितम्बोध्यम्। प्रकृत इति। सुध्युपास्य इति प्रयोगे। नन्वत्र द्विर्वचनादिग्रहणं व्यर्थम्लेषां त्रैपादिकत्वेनासिद्धत्वात्तेषु कर्तव्येषु स्थानिवद्भावस्याप्रसक्तेरत आह। अत्र द्विर्वचनेति। अत्रान्येति न भाष्यांशप्रविष्टं किन्तु फलमन्यत्र। एतत्सूत्रविषये तु पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य द्विर्वचनादिग्रहणस्याकरणमेव भाष्यकृत्सम्मतमेवञ्च द्विर्वचनग्रहणस्य ज्ञापकत्ववर्णानावसरे ज्ञाप्यं वचनं वतिघटितातिदेशानां त्रिपाद्यामपि प्रवृत्तिरित्येव। एवञ्च स्थानिवदादेश इत्यस्यान्तादिवच्चेत्यस्य व्यपदेशिवदेकस्मिन्नित्यस्य त्रिपाद्यामपि प्रवृत्तिः। प्रथमे प्रयोजनमाह। तेन राम इत्यादाविति। द्वितीयस्य प्रयोजनममी क्षीरपेण। अत्रैकादेशे अदस्शब्दसंबन्धित्वम् तथैकादेशे एकाजुत्तरपदत्वमन्तादिवच्चेत्यनेन। तृतीयस्य प्रयोजनमत्रैषीदित्यत्र सदेवान्यच्चदित्यत्र च सित्वः सिपश्च सकारस्य प्रत्ययावयवत्वात्पत्वं व्यपदेशिवद्भावेन। वस्तुतस्तु वतिघटितानामतिदेशानां त्रिपाद्यामन्येषान्तु प्रवृत्तिरेव। अचः परस्मिन्नित्यस्य तु सर्वथा प्रवृत्तिरेव न किन्तु क्व चित्प्रवृत्तिः क्व चिदप्रवृत्तिरेवञ्च तस्य दोष इत्यपि नापूर्वमिति विशेषसूचकं द्विर्वचनादिग्रहणम्। तेनैष इति। भावसाधनत्वेन। पदचरमावयवकर्मके विधाने न स्थानिवदिति वाक्यार्थनिष्पत्तौ एषो यनित्यत्र विधेयस्य लोपस्याभावरूपस्य पदानवयवतया तस्मिन् कर्त्तव्ये निषेधाप्रवृत्त्या स्थानिवद्भावेनहल्परत्वाभावेन लोपो नाञ्चनेन सूत्रेण पदचरमावयवस्य प्रापकः प्रतिबन्धकश्च स्थानिवद्भावो निषिध्यते विनिगमनाविरहात्। कानि सन्ति कौस्त इत्यत्र प्रापकः एषो यन्नित्यत्र प्रतिबन्धकस्थानिद्भावो निषिध्यते। अत्र पदेऽन्त इतीति। अन्तशब्दस्य चरमावयववाचकतया पदे परतश्चरमावयवः पूर्वपदस्यैव सम्भवतीति तत्प्रापकः प्रतिबन्धको वा स्थानिवद्भावः परपदस्याजा-

देशस्थेवेति तदेकवाक्यतया षष्ठीसमासपक्षेऽपि तादृश एवाजादेशो गृह्यते वेतस्वानित्यत्र तु न तथा पदचरमावयवसकारस्थानिकरुत्वस्य प्रतिबन्धकस्थानिवद्भावो भवत्येव। परपदस्थाजादेशस्य स्थानिवत्त्वाप्रसक्तेः। न चैवमिति। अस्यापूर्वत्वपक्षेऽनेन उपपादितरीत्या क्वाचित्कत्वकल्पने तस्यैव। अत एव। पदचरमावयवातिरिक्तस्य चैवादिकस्य ग्रहणादेव। इदमत्र बोध्यम्। यद्यपि वेतस्वानित्यत्र पदान्तविधिशब्दे षष्ठीसमासपक्षे स्थानिवद्भावनिषेधः प्राप्नोतीत्याशंक्यपदेऽन्त इति सप्तमीसमासेन निषेधाप्राप्त्युपपादनं यदि तदा लोपः शाकल्यस्येति सूत्रव्याख्यावसरे हृच्चव् करोतीत्यत्राश्ग्रहणाभावेऽपि स्थानिवत्त्वनिषेधज्ञाने पदान्तत्वज्ञानं तन्निर्णये च स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्रय इति निषेधाप्रवृत्तिरिति वक्ष्यमाणरीत्या निषेधो न प्राप्नोतीति सप्तमीसमासप्रदर्शनवैयर्थ्यशङ्का भवति तथापि न पदान्तसूत्रस्थभाष्ये पदान्तविधिशब्दस्य कानि सन्ति को स्त इति प्रयोगे निषेधप्रवृत्तिः प्रयोजनमित्युक्तं तत्प्रामाण्येन यत्र पदान्तत्वं सिद्धं तत्र निषेध इति कल्प्यते। वेतस्वानित्यत्र तु पदान्तत्वं न सिद्धमिति निषेधो न प्रवर्तेत परन्तु सूत्रस्थपदान्तशब्दस्य पदान्तत्वपरतया स्वादौ पूर्वम्पदमिति पदत्वे कर्तव्ये निषेधप्रवृत्तिः तसौ मत्वर्थ इति भत्वे तु निषेधप्रवृत्त्यभावात्स्थानिवत्त्वेनैतदकारान्तमिति न भत्वेन पदत्वबाधः। यदि तु सप्तमीसमासेन परपदस्थाजादेशस्यैव स्थानिवद्भावनिषेधस्तदा च न निषेधप्रवृत्तिरिति पदत्वबाध एव इत्युपाध्यायानुयायिनः। वस्तुतस्तु द्विर्वचनशब्दस्य शास्त्रीयार्थबोधकतया पदान्तशब्दोपि शास्त्रीयार्थस्यैव बोधकस्तत्राहृच्यर्थादिति युक्तम्। वेतस्वानित्यत्र रुत्वस्य पदचरमावयवत्वेन तस्मिन्कर्तव्ये निषेधः प्रवर्त्तते। न च पदसञ्ज्ञा न पदचरमावयव इति वाच्यम्। तस्याः कार्यार्थत्वाद्रुत्वस्य पदचरमावयवत्वेन तत्सम्पादकपदसञ्ज्ञाया अपि पदचरमावयवत्वेन ग्रहणमिति पूर्वपक्षाशयः। सिद्धान्त्येकदेशिना तु समाहितभसंज्ञा बाधिका भविष्यति। तस्यायम्भावः। यदि पदचरमावयवसम्पादकस्यापि पदचरमावयवत्वेन ग्रहणन्तदा सान्तनिष्ठपदत्वाप्रतिबन्धसम्पादकत्वाद्रुत्वप्रापकं भत्वं पदचरमावयवप्रापकत्वात्पदान्तशब्देन गृह्येत। न च भत्वम्पदत्वप्रतिबन्धकं न तु पदत्वाप्रतिबन्धसम्पादकमिति शङ्क्यं भत्वे कर्त्तव्ये टिलोप-

स्य स्थानिवद्भावः क्रियते ततश्च पदत्वभवतीति भत्वप्रतिबन्धकस्थानिवद्भावप्रयोजकज्ञानविषयत्वाद्भत्वस्यरम्परया कुत्वसम्पादकत्वात्पदत्वाप्रतिबन्धकमिति व्यपदिश्यत इत्याशयात् एवम्पदचरमावयवे भत्वे कर्त्तव्ये टिलोपस्य स्थानिवद्भावनिषेधाद्भसंज्ञया पदत्वबाधाद्धुत्वमेति भावः। परं त्वेवं रीत्या समाधाने महान् क्लेश इत्यत आह। अत एदेऽन्त इतीति। पदचरमावयवविधायकातिरिक्तस्यैव त्वादिकस्येत्यर्थस्यावश्यकत्वमाह। अत एवेति। तादृशार्थकल्पनादेव। महिमानित्यत्रेति। अत्र भत्वविषयतानेति भावः। एवं चात्र टिलोपस्य स्थानिवद्भावो भवत्येव।ननु जश्त्वविधिमति न स्थानिवदिति निषेधस्यादत आह। सूत्रे जश्पदेनेति। चर्सन्निहितेति। प्रकृतसूत्रे चर्सन्निहितपाठेन यस्य जश्श्चर्सन्निधानं तस्यैव ग्रहणमिति भावः। नन्वन्तरङ्गे जश्त्वे बहिरङ्गस्य टिलोपस्यासिद्धत्वाज्जश्त्वस्य भविष्यतीत्यत आह। कार्य्यकालपक्ष इति। यत्तु जश्त्वस्येति।वस्तुतो झलां जशोऽन्त इत्यत्र झल्पदस्य विशेषणाज्झलन्तपदस्यालोऽन्त्यस्य जशित्यर्थेन सिद्धेऽन्तग्रहणात्पदान्तस्यैव झलो जश् भवति न तु लोपप्रकृतपदान्तस्यापीत्यर्थस्य क्रोडीकाराज्जश्त्वे प्राप्तिरेव नेति तत्र। भ्रस्जेर्णिचि क्विपि भ्रट्भ्रडित्यसिद्धापत्तेः। अत्र हि संयोगस्य लोपप्रकृतमेव पदान्तत्वम्। किञ्च बुधमाचष्टे बुधयति।बुधयतीति भुदित्यस्य सिद्धिर्न स्यात्।किञ्चैतत्सूत्रभाष्ये भावसाधनविधिपक्षे ब्रह्मबन्धुब्रह्मबन्धवे इत्यत्र जश्त्वमाप्नोतीतिशङ्कितम्।तत्र कैयटः ऊङनूङोरेकादेशऊङ्ग्रहणेन गृह्येत तस्मिन्त्वादिष्विति पदसंज्ञायां धकारस्य जश्त्वं स्यात् इति तदेतद्विरुध्येत।धकारो न हि पदान्त एव। नन्वेवं गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासे उत्तरपदस्य पदत्वाभावेन पदेऽन्त इति समासे गोचेत्यत्राच इत्यञोपस्य स्थानिवद्भावादवङादेशापत्तिरत आह। गोचेत्यादाविति। सा हि तस्य धनक्रीतेत्यत्र यथानन्वेवमपीदमनुपपन्नमुत्तरपदत्वे चेति निषेधेनोत्तरपदस्य पदत्वाभावादत आह।उत्तरपदत्व इति। उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति हि वार्त्तिकम्। उत्तरस्य पदत्वे उत्तरपदत्वे उत्तरपदशब्दपरोऽत्रोत्तरशब्दः पदैकदेशलोपात्।एवञ्चोत्तरपदस्य पदत्वव्यपदेशे कर्त्तव्ये प्रत्ययलक्षणत्वे त्यर्थः।परमवाचा।परमवाचेगोदुहा खलिहा अत्रोत्तरपदस्य पदत्वे प्रत्ययलक्षणप्रतिषेधात्कुत्वघत्वढत्वादीनि न।अपदादिवि-

धाविति किम् दधिसेचौ दधिसेचः अचोत्तरपदस्य पदत्वे सात्पदाद्योरितिनिषेधसिद्धौ भवतिन च माषकुम्भवापेनेत्यत्र कुम्भशब्दव्यवायेन यः पदव्यवायेनेति निषेधस्य न स्यात्। कुम्भशब्दस्य उत्तरपदत्वे नेति पदत्वनिषेधादितिवाच्यम्। अपदादिविधाविति पर्य्युदासादुत्तरपदस्य कार्य्यित्वे एव प्रवृत्तिस्वीकारात्। न च पूर्वदण्डिप्रिय इत्यत्र त्रिपदे बहुव्रीहौ प्रियशब्दे तद्धितार्थेति समासे दण्डिन्नित्यस्य नलोपात्मककार्य्याधिकरणतया प्रत्ययलक्षणनिषेधे सति नलोपो न स्यादिति वाच्यम्। उत्तरपदशब्देन मध्यमपदत्वानाक्रान्तस्यैवोत्तरपदस्य ग्रहणात्। न चैवं सति माषकुम्भवापेनेत्यत्र कुम्भपदस्य मध्यमपदत्वाक्रान्ततया निषेधाविषयत्वेन पदव्यवायेपीति निषेधसिद्धौ कार्य्यित्वनिवेशो व्यर्थ इति वाच्यम्। प्रत्यासत्त्या तत्समासीयमध्यमपदत्वानाक्रान्तस्य ग्रहणात्। एवञ्च माषस्य कुम्भो माषकुम्भः। माषकुम्भस्य वाप इति षष्ठीतत्पुरुषपूर्वपदकषष्ठीतत्पुरुषे कुम्भशब्दस्य तत्समासीयमध्यमपदत्वानाक्रान्ततया तस्य प्रत्ययलक्षणेन पदत्वसिद्ध्यर्थं कार्य्यित्वनिवेशस्यावश्यकत्वात्। न चैवमपि पूर्वदण्डिप्रिय इत्यत्र त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषे यत्समासोत्तरपदत्वं दण्डिन्नित्यस्यतत्समासीयमध्यमपदत्वानाक्रान्ततया निषेधापत्तिरिति वाच्यम्। तत्समासप्रयोजकैकार्थीभावप्रयोज्यसमासीयमध्यमपदत्वानाक्रान्त्यर्थस्वीकारात्। प्रकृते चोभयसमासप्रयोजकैकार्थीभावस्यैकत्वेन दण्डिन्नित्यस्य विवक्षितमध्यमपदत्वमस्त्येव। न चैवम्परमवाचेत्यादौ वागादिशब्दस्यैतत्समासीयमध्यमपदाप्रसिद्ध्या विशिष्टार्थाप्रसिद्धिरिति प्रक्रान्तप्रयोजनस्यैवासिद्धिरिति वाच्यम्। तत्समासीयमध्यमपदानाक्रान्त्यस्य तत्समासीयचरमपदाव्यवहितपूर्ववर्त्तित्वविशिष्टपदत्वानाक्रान्त्यर्थात्। अतद्धित इत्यस्य प्रत्याख्यानाय पदे व्यवाय इत्यर्थस्यवश्याकत्वेन च कार्य्यित्वनिवेशावश्यकत्वादन्यथा वापशब्दस्य पदत्वाभावेन माषकुम्भवापेन इत्यत्र निषेधो न स्यात्। न चैवं सति परमदण्डिनावित्यादौ ङमुट् स्यादिति वाच्यम्। अजादेः पदस्येत्याख्यानात्। न च सुगस्योग्यावित्यत्र ङमुडागमो न प्राप्नोति। ईशशब्दस्य मध्यमपदत्वानाक्रान्तत्वात्कार्य्यित्वाच्चेति वाच्यम्। पूर्वोक्तवत्पदान्तत्वनिमित्तकविधावित्युपादानेनैतत्सङ्ग्रहात् न चैवं मध्यमपदत्वे तत्समासीयत्ववि-

शिषणं व्यर्थम् । कृञश्चग्रहस्य वापग्रहस्य वा पदत्वमनायासेन सिध्यति पदव्यवायेपीति निषेधस्य पदान्तत्वनिमित्तकविधित्वाभावादिति वाच्यम् । दधिसेचिवयः । दधिसेचिवास इत्यादौ वयवासवासीति सप्तम्या अलुकि सेक्शब्दस्य पदान्तत्वनिमित्तकक्कुत्वाभावार्थमत्यासत्तिलभ्यस्य तत्समासीयत्वनिवेशस्यावश्यकत्वात्।अत एव गोधुग्धा सेत्यस्य च सिद्धिः।न च पदे व्यवायइत्यर्थे वापग्रहस्य पदत्वसिद्ध्यर्थं क्रार्य्यित्वनिवेश इति यदुक्तं तत्पद इत्यत्र पदग्रहस्य पदत्वयोग्यपरत्वे नाप्यन्यथासिद्धमिति वाच्यम् । शास्त्रान्तरसङ्केतितोत्तरपदग्रहस्य तादृशेऽर्थे लक्षणापेक्षया स्वशास्त्रसङ्केतितपदग्रहस्य लक्षणानौचित्यादिति दिक् । नपदान्तसूत्रे पदेऽन्त इत्यत्र पदग्रहस्य लक्षणयापि गोचेत्यस्य सिद्धिरित्यभिप्रायेणाह । पदे इतीति । एतत्सूत्रभाष्ये ति । पूर्वत्रासिद्धे च । पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यम् । वरेयलोपस्वरवर्जमेतावदेव यद्यपि तत्रोक्तम्तथापि दीर्घस्याप्युपलक्षणमेतदित्याशयेनाह । वरेयलोपस्वरदीर्घग्रहणवर्जमिति । अयमाशयः । यद्यपि दीर्घग्रहणस्य प्रतिदीव्न इति प्रयोजनं पूर्वत्रासिद्धत्वेन सिध्यति तथापि कमेर्णिङिति सूत्रस्थभाष्यप्रामाण्येन सपादसप्ताध्यायीस्थस्यापि दीर्घस्य ग्रहणमिति दीर्घग्रहणमावश्यकमित्यत्रत्यभाष्यमुपलक्षणम्। तत्र हि कमेर्णिङोऽकारस्य णेरनिटीत्यत्र णिसामान्यग्रहणार्थत्वमुक्त्वा ङकारस्यात्मनेपदार्थत्वमप्युक्त्वा प्रतिषेधस्य बलवत्त्वेन कामयत इत्यत्र क्ङिति चेति प्रतिषेधः प्राप्नोतीति शङ्कितम्। इक्प्रकरणादिग्लक्षणयोरेव गुणवृद्धोर्निषेध इत्यज्ञानेन शङ्केयम्।एवमेव चान्ते समाहितं सिद्धान्तिना । मध्ये सिद्धान्तेकदेश्याह एवन्तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न कमेर्ङिति प्रतिषेधो भवतीति। यदयत्र कम्यमिचसामिति मित्वप्रतिषेधं शास्ति।पूर्वपक्ष्याह। अर्थवान् मित्वप्रतिषेधः कामयमानश्चयुङ्क्तेत्यर्थे णिङन्ताच्चिचि या वृद्धिस्तस्या ङ्कित्वं माभूदिति नैव वा णिचि वृद्धिः प्राप्नोति क्ङितिचेतिप्रतिषेधात् । सिद्धान्त्येकदेश्याह क्ङिति चेत्यत्र तन्निमित्तग्रहणान्न तस्या यावृद्धिस्तस्याःप्रतिषेधः।नंव णिङन्तस्य णिचि वृद्धिः प्राप्नोति णिङा व्यवहितत्वात्। लोपे कृते नास्ति व्यवधानम्।स्थानिवद्भावाद्व्यवधानमेवेदं तर्हि प्रयोजनं यत्तच्चिस्मुलोर्दीर्घोन्यतरस्यामिति दीर्घत्वं शास्ति।तत्कमेर्णिङि माभूत् किम्पुनः कारणन्तत्र दीर्घोन्यतरस्यामित्युच्यते न ह्रस्वोऽन्यतरस्यामित्येवोच्येत यथाप्राप्तं क-

मेर्ङ्ह्रस्वत्वम्। तत्रायमर्थः ह्रस्वग्रहणं न कर्त्तव्यभवति प्रकृतमनुवर्त्तते मितां ह्रस्व इति। अशमि। अशामि। शमम्शमम्शामम्। शामम्। हृद्भा सिद्धं न सिध्यति। नोदात्तोपदेशस्येति प्रतिषेधः प्राप्नोति। चिण् ङतोः स प्रतिषेधः णिच्यवस्थितेषु तर्हि यङ् लोपे चोपसङ्ख्यानं कर्त्तव्यं स्यात्। शमयन्तम्ययोजितवान्। अशमि। अशामि। शंशम्यते: अशंशमि। अशंशामि। किम्पुनः कारणं न सिध्यति चिण्मुल्परेणौ मितमङ्गानां ह्रस्वो भवतीत्युच्यते। यश्चात्र णिश्चिण्मुल्परो न तस्मिन् मिदङ्गम्। यस्मिन् मिदङ्गं नासौ चिण्मुल्परः। णिलोपे च ङतौ चिण्मुल्परः। स्थानिवद्भावान्न चिण्मुल्परः अथ दीर्घोऽन्यतरस्यामित्युच्यमाने यावता स्थानिवद्भावः कथमेवैतत् सिध्यति। एतदिदानीं दीर्घग्रहणस्य प्रयोजनं दीर्घविधिं प्रति न स्थानिवदित्यजादेशस्य स्थानिवत्प्रतिषेधश्चिन्वो भवतीत्युक्तम्। एतेन। भाष्यग्रन्थकेन चैपादिकादिरिणोपि दीर्घो न पदान्तेति सूत्रे दीर्घग्रहणेन गतार्थ इति स्पष्टमेव लभ्यते। न च हेडधातोर्घटादिपठितात्सिजन्ताच्चिणि अहिडिअहीडीति रूपं दीर्घोऽन्यतरस्यामित्युच्यमाने सिध्यति। ह्रस्वविकल्पे तु अहिडि अहेडीति स्यादिति कथमेतदिष्टस्य स्पष्टतया कथमेतत्प्रन्थकमिति वाच्यम्। एतद्भाष्यप्रामाण्येन हेडधातोर्घटादिपाठस्याप्रामाणिकत्वात्। न च क्ङिति चेति सूत्रभाष्यस्य तद्धितकाम्योरिक्प्रकरणादिति वार्त्तिकस्य विस्मरणेन तत्प्रन्थकमित्येकदेशस्युक्तत्वान्न प्रकृतसूत्रस्थभाष्यस्योपलक्षणत्वे न मानं इति वाच्यम्। चिण्मुल्दीर्घोऽन्यतरस्यामिति सूत्रस्थभाष्यसंवादेनात्रत्यभाष्ये दीर्घग्रहणस्योपलक्षणत्वावश्यकत्वात्। तत्र हि अशंशमि अशंशामीत्यत्र यङ्व्यवधाने स्थानिवद्भावाद्दीर्घत्वं न प्राप्नोतीत्याशङ्क्य प्रतिषिध्यतेऽत्र स्थानिवद्भावः। दीर्घविधिम्प्रतीति। एवमप्यसिद्धत्वान्न प्राप्नोति। समानाश्रयवचनात् सिद्धमित्युक्तम्। तथा ऊकाल इति सूत्रे भाष्येपि तत्पाठस्याप्रामाणिकत्वं ध्वनितम्। तच्चोकालो ह्रस्वसंज्ञक इति वाक्ये ग्रहणकशास्त्रप्रवृत्तौ दीर्घप्लुतयोः पूर्वसंज्ञाप्रसङ्ग इति शङ्कायां कालग्रहणेन समाधाय अथ वा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यतीत्युक्तम्। तत इदन्तर्हि ह्रस्वसंज्ञावचने प्रयोजनम्। एच इग्घ्रस्वादेश इति। अन्यथा ह्रस्वो नपुंसके रौ चङि ह्रस्व इत्यत्र च निर्ह्रस्वप्रदेशेषु एव इगिति वक्तव्यं स्यात् इति गौरवं स्यात्। एतेनापि घटा-

दिषु हेडधातोः पाठोऽप्रामाणिक इति लभ्यते। अन्यथा हिडयतीति रूपसिद्ध्यर्थं मितां ह्रस्व इत्यत्राऽपि तथा पाठस्यावश्यकतया त्रिष्वेव गौरवोद्भावनं विरुध्येत। अत्र वार्तिकम्। प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्। स्वरे यथा। आकर्षिकः चक्रीषकः जिहीर्षकः। आकर्षिक इत्यत्र ष्ठलो लित्त्वात्ककारोकारस्योदात्तत्वमभवति। लित्त्वसामर्थ्याद्भावद्धितस्यापीति चेत्। आकारस्यापि स्यात्। चिकीर्षक इत्यादौ ण्वुलो। लित्त्वादिकारस्योदात्तत्वं भवति। अन्यस्वादेशः स्थानिवदेव पञ्चारत्नो दशारत्नाइति अत्र यणादेशस्य स्थानिवद्भावादिगन्तकालकपालेति स्वरो भवति तथा बहुखट्वकः अत्र ह्रस्वत्वस्य स्थानिवद्भावाद्बह्वन्तेन्यादिति स्वरो न भवति। दीर्घे यथा प्रतिदीव्नः यो ह्यन्य आदेशस्स्थानिवदेवासौ भवति किंयौगिंर्यौरिति। यलोपे यथा ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिः यो ह्यन्य आदेशस्स्थानिवदेवासौ भवति वाग्वोः अश्वर्यौरिति एतावान्यथासिद्धमिति भाष्ये उक्तम्। लोपोपि प्रकृतः आदेशोपि विधिरुपलक्षणमपि दीर्घादयोपि निर्दिश्यन्ते केवलं तत्राभिसंबन्धमात्रं कर्त्तव्यम्। प्रकृतसूत्रस्थो लोपशब्द आवर्त्यते प्रकृत इत्यस्य प्रस्तुत इत्यर्थः। क्ङिलुगुपधात्वचङ्परनिर्ज्ञानसङ्ख्येषूपसङ्ख्यानम्। अत्र क्ङीत्यंशो द्वेधा व्याख्यातः। क्ङौ लुप्तं न स्थानिवत् क्ङौ विधिरिति न स्थानिवदिति विधावित्यस्याध्याहारः तत्क्ङौ इत्यस्याहृत्या आदेशेन सम्बन्धात् क्ङिनिमित्तो ऽजादेश इत्यर्थेन क्ङौ लुप्तमित्यस्य लाभः। अस्योदाहरणम्। कण्डूरिति कण्डूयतेरप्रत्ययः। अत्र यण् न यलोपश्च भवति। यद्यपि यलोपविधिरिति यलोपः सिध्यति तथापि यणादेशाभावो मुख्यप्रयोजनम्। पिपठिषतेरप्रत्ययः। पिपठीः अत्राल्लोपस्य स्थानिवद्भावनिषेधाद्दीर्घस्सिध्यति। यद्यप्येतद्दीर्घविधिरिति न स्थानिवदित्यनेन सिध्यति तथापि ह्रत्वमेतल्लाभ्यमेव। यद्यपि पदान्तविधिरिति षष्ठीसमासे प्राप्तिस्तथापि सिद्धान्तिसम्मते सप्तमीसमासे तदप्राप्तिरेव। लावयतेर्लीः पावयतेः पौः अत्र णिलोपस्य स्थानिवद्भावादूण् न प्राप्नोति। यदि तु ण्यक्षत्रियार्षञितीति वचनसूचितपूर्वविप्रतिषेधेन प्रथमं णिलोपस्ततः प्रत्ययलक्षणेन वृद्धिरिति प्रक्रिया न तु वान्तस्य क्ङौ परतोऽङ्गत्वमिति मान्नोट् तदा लवमाचक्षाणो लौः पौरिति लवशब्दादाख्याने णिचि टिलोपे वकारस्य ऊठ् क्रियते स णिलोपस्य स्थानिवद्भावान्न स्यान्नु

क्वौ विधिम्रतीति वचनेन तस्यापि सिद्धिरिति चेत्तदा ण्यन्तदिवधातुप्रकृतिक-क्विबन्तस्य दयूरित्यत्र तस्मिलोपस्य स्थानिवत्त्वान्न स्यात्। न चात्र णिलोपस्य स्थानिवद्भावादुकारस्य ह्रस्वस्यादिति वाच्यम्। उठ आदिष्टादचः पूर्वत्वात्। यदि चेदमपि क्वौ विधिम्रतीत्येव सिद्धमित्युच्यते तदा ख्यत्यादिति सूत्रभाष्योदाहृतं सख्यीयते: सख्युरिति रूपमन्यथा न स्यात् अल्लोपस्य स्थानिवद्भावो यणादेशे प्रत्ययनिमित्तके कर्त्तव्ये स्यात्। तथा गोमत्यतेर्गोमानिति उगिदचामिति सूत्रे भाष्योदाहृतम् ण्यन्तपदेः पात् पद इति येन विधिरितिभाष्योदाहृतं स्थानिवद्भावान्न स्यात्। प्रथमेऽल्लोपस्यस्थानिवद्भावात्सर्वनामस्थानपरत्वाभावान्नुम् द्वितीये णिलोपस्य स्थानिवद्भावात् पदभावश्च न स्यात्। दधा युष्मानस्मान्वा आचष्टे युष्मयति अस्मयति ततः क्विप् त्वम् अहम्। अत्र णिलोपे सौ त्वाहौ साविति कर्त्तव्ये णिलोपो न स्थानिवत्। ननु भाष्ये लवमाचक्षाणो लौरित्यस्य साधनावसरे नैवं विज्ञायते क्वौ लुप्तन्न स्थानिवदित्युक्तं तदेतद्विरुध्येत इति चेन्न नैवं विज्ञायते इत्यस्यैवमेव न विज्ञायते किं तु क्वौ विधिम्रति न स्थानिवदित्यपि एवञ्च लवमाचक्षाणोलौरित्यत्र णौ वकारलोपस्य ऊठि कर्त्तव्ये स्थानिवत्त्वाभावस्सिध्यति। एवञ्चार्थद्वयमपि लक्ष्यसिद्धये आश्रीयते इतिभावः। लुका लुप्तं न स्थानिवत्। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः पञ्चाग्निः शताग्निः अत्र स्त्रीप्रत्ययलुकस्स्थानिवत्त्वादानुक् ऐकारश्च श्रूयेत। उपधात्वविधिम्रति न स्थानिवत्। पारिखीयः परिखाशब्दाच्चातुरर्थिकेऽणि आकारलोपस्य स्थानिवत्त्वात्पारिखे भव इति ह्रस्वादकेकान्तखोपधादिति क्वौ न स्यात्। चङ्परनिर्ङ्सि न स्थानिवत्। वादितवन्तं प्रयोजितवानवीवदद्वीणां परिवादकेन अत्र योसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावादृङ्स्वत्वन्न प्राप्नोति न चाचाप्युपधात्वविधिम्रति न स्थानिवदित्येवसिद्धम् तस्य निषेधस्य प्रत्ययविधिविषयत्वात्। अत्रैतद्वचनस्यैव मानत्वात्। अत एव पटयतीत्यत्र टिलोपस्य स्थानिवद्भावस्सिध्यति। कुत्वे कर्तव्ये न स्थानिवत्। अर्चयतेरर्कः मर्चयतेर्मर्कः अचीणादिके कप्रत्यये तस्मिन् कुत्वं णिलोपस्य स्थानिवत्त्वान्न प्राप्नोति। शास्वत इति। यथा लिट्युगित्यादौ स्त्रीजसेत्यादिशास्वतः प्रसक्तस्य स्वादेर्ङेङ्याभ्य इत्यादिना लोपविधानम् ख्यत्लोप इत्यादिविषयसङ्-

ग्रहायार्थत इति । अवर्जनीयतयेति । विषयभानप्रयोजकसामग्रीसन्निधाने तज्ज्ञानं न जायतामितीच्छायामपि तज्ज्ञानं भवत्येव । तत्सामग्रीति । ज्ञानसामग्रीत्यर्थः । ननु यत्र लोपविधानं तत्र प्रसक्तवर्णकृतसत्तानिवृत्तिः शास्त्रतो लभ्यते न तु तस्य वर्णस्याभाव इति चेन्न। समानियताभावानामैक्यस्वीकारात् । ननु स्वं रूपमिति शास्त्रसत्त्वाददर्शनशब्दस्यैषा संज्ञा स्यादत आह । अर्थस्यैषेति । लक्षणयाऽदर्शनप्रतिपाद्यस्योच्चारणकृतसत्ताभावस्य । व्याख्यानादिति । मङ्गासञ्ज्ञाकरणरूपात् । निपातएकाजनाङिति निर्देशाच्च । अदर्शनशब्दस्य सञ्ज्ञित्वे चानाङित्यस्य प्रथमान्तत्वमनुपपन्नमिति भावः । स्वंरूपमित्यस्य प्रत्याख्याने तु प्रकृतेऽर्थे कार्यं बाधाभावेनार्थग्रहणे बाधकाभाव इति । ननु ग्रामस्य दर्शननिरूपिताधिकरणत्वमस्त्येवेत्यत आह । तत्त्वे त्विति । ननु पित्कृतः प्रत्ययत्वात्तेन प्रकृत्याद्येपेण चपु जत्वित्यत्र न पूर्वोक्तदोष इत्यत आह । कृत्प्रत्ययेनेति । अतिदेशतः प्रत्ययलोपशास्त्रतस्थानिवत्त्वेन वा । यदि परदेशावच्छेदत्वविशिष्टप्रत्ययज्ञानस्य प्रकृतिज्ञानं व्यापकं स्यात्तदा कृत्प्रत्ययेन प्रकृतेरनुमानात्मकाद्येपस्यात्तत्तु न सम्भवति अत्रैव व्यभिचारात् । प्रत्ययग्रहणपरिभाषया यस्मात्प्रत्ययविधिस्तदादेरेव तुग्भविष्यतीत्यपि न वक्तुं शक्यम् । उत्तमैकाभ्यामिति निर्देशेन यत्र प्रत्ययो निमित्तत्वेनाश्रीयते तत्र षष्ठ्यन्तस्य यस्मात्प्रत्ययविधिस्तदादेरित्यस्य नियमेनोपस्थितिस्तदास्याद्यदिनिमित्तत्वेनाभिप्रेतस्य प्रत्ययस्य तदाद्यन्तार्थसत्तां विना निमित्तत्वानुपपत्तिस्यात्साचाधुना नेति भावः । विनिगमनाविरहादिति । यणो मय एतयोर्मध्ये एकतरस्य पञ्चम्यन्तत्वमेवापरस्य षष्ठ्यन्तत्वमेवेत्यत्र साधकयुक्त्यभावादित्यर्थः । त्रैपादिकत्वादिति । पञ्चद्वये त्रिपाद्यां तदप्रवृत्तेरभिप्रेतत्वात् । ननु विसर्गद्वित्वेनाधिक्याच्चत्वारीत्यसङ्गतमत आह । धकारयकारयोरितीति । नन्वेकस्य धकारस्य जश्त्वेन दकाराद् द्विधत्वमनुपपन्नमत आह । प्रक्रियायामिति । एकस्या आकृतेस्स्वरूपस्य कृतः प्रयोगो न द्वितीयस्यास्तृतीयस्या इति न्यायो यथाऽन्यत्राश्रीयते । अत एव गवामश्वानाञ्च स्वामीत्येव प्रयोगो न तु गवां स्वामी अश्वेषु चेति तथाऽत्रापि द्वित्वाकृतेर्धकारविषये प्रयोगे यकारस्यापि द्वित्वमेवोचितमत्र तु तदभाव इत्यभिप्रायेणागङ्कते । एकस्या इति । अत एव व्रीहीणां

यागसाधनत्वेनोपादाने यवोपादानं न भवति । सार्थकानेकेति । अत्रार्थशब्दोऽभिधेयपरः फलपरश्च प्रकृते द्वित्वविषये नैकस्यापि संभवः गवां स्वामी अश्वेषु इत्युच्यमाने तु अश्वानामधिकरणत्वमपि प्रतिपत्तिविषयस्यात् । तथा एकस्मिन्नेव यागे व्रीहियवयोरुपादानन्न भवति फलभेदस्यादिति भावः । प्राधान्यादिति । अत एवात्र स्त्रियास्सिद्धत्वात्प्रथममेकादेशे पुत्रादिनीत्यत्र पुत्रशब्दस्यादिनीशब्दपरत्वं दुर्लभमित्यपास्तम् । अत एव । लुप्तसप्तम्यन्तत्वादेव । त्रिप्रभृतिष्वित्यस्य व्याख्याने संयुक्तेष्वित्युक्तन्तत्लाभोपायमाह । त्रिप्रभृतीत्यादि । अत्र सूत्रशब्दप्रयोगस्सादृश्यात् । अत एव । चयादिहलामेव ग्रहणादेव । श्रुतत्वादिति । श्रुतानुमितयोरिति न्यायात् । ननूत्तरसूत्रानुरोधेन यर एव विशेषणमुचितमत आह । व्याख्यानादिति । प्रत्यासत्त्या श्रुतविशेषणत्वस्य न्याय्यत्वरूपादित्यर्थः । इयनुवृत्तेरिति । इयतोन्यतरस्यां ग्रहणानुवृत्तेरित्यर्थः । भाष्यसम्मताऽष्टाध्यायीपाठे त्विति । उदः स्थास्तम्भोरिति सूत्रभाष्ये उत्पूर्वस्कन्देश्छन्दस्युपसङ्ख्यानमिति वार्त्तिकस्य अग्नेर्दूरमुत्कन्देत्युदाहरणे तथा रोगे चेति वक्तव्यमिति वार्त्तिकस्य उत्कन्दको रोग इत्युदाहरणे चोदस्थेति सूत्रस्थवार्त्तिकनिष्पन्नसकारस्थानिकथकारस्य चर्त्वेन तकार एव व्यत्यासाभावे तु चर्त्वदृष्ट्या थकारभावेन तकारघटितरूपासिद्धिस्स्यात् । शेषार्थेति । इदमाद्यर्थे । लाघवादाह । इचोऽचीति । नन्वत्रावौ यिप्रत्यय इति न्यासे तोष्टूयत इत्यादावतिप्रसङ्ग इति चेदेतन्न्यासेपि यथासंख्यसूत्रेण सम्बन्धो बोध्यः । अत्राहुरित्यनेनापाणिनीयत्वरूपारुचिस्सूचिता । नन्वकारस्य विवृतोपदेशस्यैव करणात्लृवर्णस्येत्ययुक्तमत आह । एतद्भाष्येति । भाष्ये प्रत्याख्यातेति । अलोऽन्त्यात्सूत्रस्थभाष्ये प्रत्याख्यासेत्यर्थः । फलानामन्यथासिद्धया । तस्मान्नुडचीत्यादीति । आदिना नेड्वशीत्यादेः परिग्रहः । परिभाषार्थस्तु अलग्रह्यते येन शब्देन तस्मिन् सप्तम्यन्ते यो विधिस्स तदादौ बोध्य इति न युक्तः । इको यणचीत्यादावपि तदादिविधापत्तेः किन्तु गृह्यते इतरभिन्नत्वेन ज्ञायते येन तद् ग्रहणम् । अल् च तद्ग्रहणञ्चेति समासः । विशेषणस्यापिपूर्वनिपातप्रकरणस्यानित्यत्वात्परनिपातः । यस्मिन्निति सप्तम्यन्तानुकरणम् । तथा च सप्तम्यन्तेऽल्रूपे विशेषणे योविधस्स तदादौ बोध्यः । प्राचीनसम्मतमकारं दूषयति । पूर्वमूच इत्यादि । तथा च यदि

वाक्यार्थपर्यालोचनं स्यात्तदा ओकारौकारयोर्वान्तादेशस्थानित्वनिर्णयस्य च न सम्भवतीति भावः । कैयटस्यापि पूर्वापरविरोध इत्याह । अत एवेति । ओदौतोरिति वक्तव्यमिति वार्त्तिकोपपादकोयं ग्रन्थः । गोपानमिति । ननु वान्त इति सूत्रे प्रत्ययग्रहणाभावे गव्यूतिरित्यस्यानायासेन सिद्धौ गोर्यतावितिवचनन्नियमार्थम् । अप्रत्ययया दौ चेद्यूतावेति । एवं च गोयानमित्यस्य व्यावृत्तिः सिद्धैवेति चान्त इति सूत्रे प्रत्ययग्रहणं व्यर्थमिति चेन्न । यूतौ चेद् गोशब्दस्यैव गोशब्दस्य चेद् यूतावेवेति वा नियमोऽपि संभाव्येत । एवं च गोयानमित्यत्र तद्व्यावृत्त्यर्थप्रत्ययग्रहणस्यावश्यकत्वात् । हलि सर्वेषामिति लोपः स्यादिति । एवं चैतदर्थं तत्र वकारोऽप्यनुवर्त्तत इति भावः । निमित्तत्वबाध इति । एवञ्च वान्त इत्यत्र वकारात्पूर्वं वकारग्रहणे वकारलोपो न स्यादिति भावः । तदप्राप्तियोग्ये विषयेऽचारितार्थ्यं बाधकत्वे बीजं तदत्र नास्तीत्याह । निमित्तत्वानाक्रान्त इति । ननु माभूद्येन नाप्राप्तिन्यायेन बाधस्तत्रकौण्डिन्यन्यायेन तु स्यादत आह । तक्रेत्यादि । तथा च येन नाप्राप्तिन्याय एवास्यान्तर्भावः । विधेयविषयस्येति । विधीयमानदधिदानस्यैव बाधकत्वदर्शनात् । अत्रार्थे मानं दर्शयितुमाह । तद्धितेष्वचेति । तत्र हि तद्धितेष्वचामादिवृद्धौ अन्त्योपधलक्षणायां वृद्धेः प्रतिषेधो वक्तव्यः क्रौष्टो जागत इति । ननु चाचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिम्बाधिष्यते कथमन्त्यस्योच्यमानाऽन्त्यस्य बाधिका स्यात् । अस्ति खल्वपि सम्भवे बाधनम्भवति । अस्ति च सम्भवो यदुभयं स्यात् लोकविज्ञानात्सिद्धम् सत्यपि सम्भवे बाधनम्भवति तद्यथा ब्राह्मणेभ्यो दधि दीयताम् तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानन्निवर्त्तकम्भवति । एवमिहापि सत्यपि सम्भवेऽचामादिवृद्धिरन्त्योपधलक्षणां बाधिष्यते विषम उपन्यासः नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्ते आरभमाणस्बाधकम्भवति । इह पुनरप्राप्तायामन्त्योपधलक्षणायां वृद्धौ अचामादिवृद्धिरारभ्यते सुस्रुत् सौस्रुतः एतेन वचनेनैवादिवृद्धिर्यत्र तत्रान्त्योपधालक्षणा वृद्धिर्निवर्त्तनीयेति सूचितम् । पुष्करसच्छब्दपाठाद्वेत्युक्तम् । अन्त्य इति । धातोरेकाचो हलादेरिति सूत्र इत्यर्थः । उत्तरयोरिति । नित्यं कौटिल्ये गतौ लुप-

मदवरेतिसूत्रयोरित्यर्थः। नित्यग्रहणस्य लुप्सदेत्यत्राप्यनुवृत्तेः सम्भावनायामिदम्। वस्तुतस्तु उत्तरयोर्विग्रहेण विशेषासम्प्रत्ययान्नित्यग्रहणानर्थक्यमिति वार्त्तिकं यद्यपि सम्प्रत्युपलभ्यमानभाष्यपुस्तके नित्यं कौटिल्ये लुप्सदेति सूत्रद्वयपाठानन्तरमुपलभ्यते तथापि पूर्वसूत्रस्थमत्र पतितम् तत्र प्रथमसूत्रविषये भाष्ये उक्तम् न हि कुटिलं क्रामतीति चङ्क्रम्यत इति गम्यते। अत्र कैयटः चङ्क्रम्यत इत्यस्यार्थोऽर्थः प्रतीयते नासौ कुटिलङ्क्रामतीति वाक्येन शक्यः प्रत्याययितुमिति तदर्थानभिधानादेव वाक्यं न भविष्यति कुटिलं पन्थानं क्रामतीति सम्प्रतीयत इति भावः। द्वितीयसूत्रविषये आह। अथैतेभ्यः क्रियासमभिहारे यङा भवितव्यम् क्रियासमभिहारे च नैतेभ्यो भवितव्यम्। भृशं जपति ब्राह्मणो भृशं समिधो दहतीत्येव अत्र भाष्ये क्रियासमभिहारे चेत्यत्र यश्चकारस्तेन विशेषासम्प्रत्ययादित्यस्य सम्बन्धाद्भृशं जपतीत्यादयर्थं विशेषस्य यङन्तादप्रत्ययादित्यर्थः। यत्तु कैयटः। तत्र कौण्डिन्यन्यायेन कौटिल्यभावगर्हाभ्यां यङः क्रियासमभिहारादाच्छिद्य स्वीकृतत्वादिति भाव इति। तत्र विशेषविहितेन सामान्यविहितं बाध्यत इति हि न्यायो लोके शास्त्रे च प्रसिद्धस्तत्र विहितपदोपादानसामर्थ्येन विधीयमानयोरेव बाध्यबाधकभावः प्रतीयते न त्वनूद्यमानयोः' यदि त्वत्रापि न्यायेन स स्यात्तर्हि विशेषासम्प्रत्ययादित्यनुकर्षकवकारवैयर्थ्यमेव स्यादिति भावः। तस्य चेति! प्रश्लिष्टवस्य चेत्यर्थः। ननु लोपो व्योरिति सूत्रे स्थितस्य वकारस्य भाष्यकृता प्रत्याख्यानाद्वकारप्रश्लेषे तद्विवृत्तिर्न स्यादत आह। लोपो व्योरिति। मूलं खण्डयति। परे त्विति। सा पूर्वप्रदर्शिताऽतोल्लान्तस्येत्यत्र लुप्तनिर्दिष्टो वकार इति भाष्योक्तिः। पूर्वपक्ष्युक्तिरिति। तथाहि। उत्तरार्थं सिजर्थं द्वित्वग्रहणं कर्तव्यमिति द्वित्वग्रहणस्य प्रयोजने कथिते न्यनुवीत् न्यधुवीदित्यत्र द्वित्वं मा भूदितिप्रयोजने च प्रतिपादिते नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वाद्वोवङादेशे कृतेऽनन्त्यत्वाद् द्वित्वं न भविष्यति। यदि तर्हि सिच्यन्तरङ्गं भवति। अकार्षीत्। अहार्षीत्। गुणे रपरत्वे चानन्त्यत्वाद् द्वित्वं न प्राप्नोति। मा भूदेवम्। हलन्तस्येत्येवं भविष्यति। इह तर्हि न्यस्तारीत् न्यदारीत्। गुणे रपरत्वे चानन्त्यत्वाद् द्वित्वं न प्राप्नोति। मा भूदेवम्। लान्तस्येत्येवं भविष्यति। इह तर्हि अलावीत्। अयावीत्। गुणेऽ-

वादेशे चानन्त्यवाद् ह्रस्वत्वं प्राप्नोति । माभूदेवम् । ह्रान्तस्येत्येवं भविष्यति । ह्रान्तस्येतद्युच्यते न चेदं ह्रान्तम् । ह्रान्तस्येत्यत्र वकारोऽपि निर्दिश्यते । किं वकारो न श्रूयते । लुप्तनिर्दिष्टो वकारः । इत्येवं पूर्वपक्षिणोक्ते ह्रान्तेतिसूत्रे णिच्ग्रहणेन ज्ञापकेन सिच्यन्तरङ्गन्नास्तीति प्रतिपादिते वकारप्रश्लेषस्य न फलमिति स्पष्टमेव । मूलोक्तप्रयोजनमप्यन्यथासिद्धमित्याह । किञ्चेत्यादि । धातोस्तन्निमित्तेतिसूत्रे धातुग्रहणाभावे प्रातिपदिकविषयो वा सामान्यतो वा नियमः स्यात् । तत्र क्रमेण दूषणमाह । धातोरित्यस्याभाव इति । न चास्मिन् सूत्रे धातुग्रहणसत्त्वे क्विबन्तभूशब्दादुगवादिभ्यो यदिति यति गुणे धातोः कार्यमिति परिभाषयाऽवादेशो न स्यादिति वाच्यम् । यत्र कार्यविधौ धातुत्वाश्रयस्य समुदायस्योद्देश्यत्वे नोपादानन्तत्र तत्परिभाषाप्रवृत्तेः । न धातुलोपसूत्रभाष्यरीत्येति । यथा तत्र धातुग्रहणाभावे उपेदृधः प्रेदृध इत्यत्र जायमान आदुगुणोऽपि निषिध्येतेति प्रयोजनस्यान्तरङ्गनिषेधबुद्ध्या बहिरङ्गगुणस्यासिद्धत्वात्खण्डनकृतम् । न चात्र सूत्रे एवकाराभावेपि सिद्धे सतीति न्यायेन नियमो भविष्यतीति वाच्यम् । एवकारस्येष्टोऽवधारणार्थत्वात् । अन्यथा तन्निमित्तस्यैवेत्यन्तादेशस्तदा धातोरेवेत्यपि सम्भाव्येत अत्रेष्टापत्तिस्तु न सम्भवति । तथा सति वभ्रुशब्दादपत्येऽर्थे मधुवभ्रोर्ब्राह्मणकौशिकयोरिति सूत्रेण यञि कृते बाभ्रव्य इत्यत्र वान्तादेशो न स्यात् । ननु तन्निमित्तस्येत्यस्य श्रीयते श्रीयतेत्येव यदि प्रत्युदाहरणन्तदा न यकीत्येव सूत्रं लाघवात्कर्तव्यम् । पूर्वसूत्रप्राप्तस्य वान्तादेशस्य प्रतिषेधेन लक्ष्यसिद्धिर्निर्बाधेति । अत्र के चित् । गोशब्दादावारक्विबन्तात्कर्तरि क्विपि गोषु साधुरित्यर्थे तत्र साधुरिति यति वान्तादेशस्यापत्तेरिति । तन्न । वदव्रजेतिसूत्रेतः श्यनीतिसूत्रस्थभाष्यविरोधात् । प्रथमे हल्ग्रहणं किमर्थम् । समुच्चयो यथा विज्ञायेत । अज्ग्रहणादेव समुच्चयो भविष्यति । वदिव्रज्योरचश्चेति । अस्त्यन्यदज्ग्रहणे प्रयोजनम् । वदिव्रजिविशेषणं यथा विज्ञायेत । वदिव्रज्योरच इति । अथ वा एतदपि न ब्रूयात् । अत इति वर्त्तते । इदन्तर्हि प्रयोजनम् । हलन्तस्य यथा सम्राजन्तस्य माभूत् । कस्य पुनरजन्तस्य प्राप्नोति । अकारस्य । अचिकीर्षीत् । अजिहीर्षीत् । लोपो ऽत्र बाधको भविष्यति । अकारस्य तर्हि प्राप्नोति । अयासीदवासीत् । नास्त्यत्र

विशेषः । अन्यच्चरस्य तर्हि प्राप्नोति । न वै सन्यच्चरमन्त्यमस्ति इत्युक्तम् । गो शब्दादाचारे क्विप्यत्वे एतद्विरोधः स्पष्ट एव । अन्त्ये ओतः शितीति वक्तव्यम् क्विप्ययोजनम् । ष्टिवुक्लम्बितिसूत्रे शितीति न वक्तव्यम् । ननु च श्यन्ग्रहणेति श्यनष्टानामित्यत्र श्यन्ग्रहणं न कर्त्तव्यम् । तत्रापि शितीत्येव सिद्धमित्युक्तम् । ओकारान्तेभ्य आचारे क्विप्यत्वे शितीत्युच्यमाने लोपः प्राप्नोति श्यनीति न्यासे तु नेति फलभेदः स्पष्ट एव । अत्राहुः न यकीति न्यासे लावयतेर्लौ पावयतेः पौः । जनानवतीति जनौः । एभ्यः सप्तम्यन्तेभ्यस्तत्र साधुरिति सूत्रेण यति धातोस्तन्निमित्तेतिन्यासे वान्तादेशो न भवति स प्राप्नोति । न चाचः परस्मिन्निति द्वद्धेः स्थानिवत्त्वम् । अपूर्वविधित्वात् णिलोपस्यापि न । आदिष्टादचः पूर्वत्वात् । क्वौ लुप्तमिति निषेधाच्चेति दिक् । च्विज्योरेव ग्रहणं व्याख्यानादित्युक्तन्तदेव व्याख्यानं स्पष्टयति । अत एवेति । क्रय्यस्तदर्थ इत्यत्र प्रधानक्रयणकर्मणो न तच्छब्देन परामर्शस्तदर्थशब्दोपादानसामर्थ्यादतो गुणभूतक्रयणक्रियाया एव परामर्श इत्याशयेनाह । व्याख्यानाद्गुणभूतस्यापीति । सर्वनाम्ना प्रधानपरामर्शकत्वमित्युत्सर्गः । दर्शते राजमातङ्गास्तस्यैवामी तुरङ्गमा इत्यत्र यथा । तदर्थत्वञ्च तन्निरूपितफलोपधानात्मकन्तज्जनकत्वम् । न तु स्वरूपयोग्यत्वं विशेषणोपादानसामर्थ्यात् तदाह । क्रयार्थत्वञ्चेति । के चित्त्विति । अयमाशयः । क्रय्यशब्दे विक्रये क्रीणातिर्वर्त्तते । एवञ्च यदन्यं विक्रीतं तत्क्रय्यम् । तत्र विक्रेत्रा मदीयमिदं क्रय्यमिति व्यवहर्त्तव्यम् । येन तु धान्यं क्रीतन्तेनेदं धान्यं क्रेयमित्येव वक्तव्यम् । शब्दशक्तिस्वभावात् । तत्सूत्रस्थभाष्याच्च । एवं हि तत्र भाष्यम् । तदित्यनेन क्रियतिनिर्दिश्यते । स एव क्रीणात्यर्थः । इह माभूत् । क्रेयन्नो धान्यम् । क्रेतव्यमिति तदर्थः । न चास्ति क्रय्यमिति । अयमभिप्रायः । अत्र क्रीणातिर्विक्रये वर्त्तते । तथा च यत्र मया विक्रीतमितिव्यवहारस्तत्र क्रय्यमिति भवति । तथा व्यवहारयोग्यता च धान्यस्यैव न द्रव्यस्य । येन तु स्वीयन्द्रव्यन्दत्वा धान्यं क्रीतन्तमिति केन चित्पुरुषेणोक्तमिदन्धान्यमस्मभ्यन्देयमिति तदा स क्रेता एवमुत्तरं ब्रूयात् क्रेयन्नो धान्यमिति । अयमेव भाष्यस्वरसः । प्रातिपदिकाच्छिजुत्पत्त्येति । प्रातिपदिकाद्धात्वर्थ इत्यनेन । न च तत्करोतीति तदाचष्टे तेनातिक्रामतीति विभिन्नविभक्तिनिर्देशात्सुबन्ताच्छिजिति

भ्यते तत्क्रियमुक्तम्प्रातिपदिकादितीति वाच्यम् । तत्ते नेत्यनेन कर्मत्वाद्यर्थान्तर्भावेन वृत्तिप्रदर्शनमात्रं क्रियते णिच् तु प्रातिपदिकादेवेत्याशयात् । पूर्वत्रासिद्धीय इति । न च पदसंज्ञायां यथोद्देशत्वस्यैव सिद्धान्ततया पदसंज्ञाया अत्रैपादिकत्वेन कथम्पूर्वत्रासिद्धेन स्थानिवदितिनिषेध इति वाच्यम् । साक्षात्पदत्वस्यात्रैपादिकत्वेपि पदत्वद्वारकपरम्परया पूर्वत्रासिद्धीयलोपप्रतिबन्धकस्य स्थानिवत्त्वस्यानेन निषेधात् । न पदान्ता हलोऽण इति । यद्यपि लण्सूत्रे भाष्ये न हि पदान्ताः परेणः सन्तीत्येव पाठ उपलभ्यते तथापि तदर्थे तत्रैव ननु चायमस्ति कर्तृ हर्तृ इति प्रदर्शितम् । तेनाज्झूपस्थाणः सम्भवाद्धलोऽप्रदर्शनाच्च पदान्ता हलो न सन्तीति गम्यत इत्यभिप्रायेणेह हलोऽण इत्युक्तम् । न च सुध्युपास्य इत्यादौ पदान्तस्य हलोऽणो दर्शनादिदमसंगतमिति वाच्यम् । प्रकृतिकार्यभाजो न सन्तीति तदर्थात् । अणोऽप्रगृह्यस्येति सूत्रेऽण्प्रत्याहारः पूर्वेण न परेण कुत एतत् पराभावात् न हि पदान्ताः परेणः सन्ति । ननु चायमस्ति कर्तृ हर्तृ । यद्यप्यनुनासिकविधौ पदान्ताधिकारो नास्ति तथापि पदान्तानामेवावसानेनुसिको विधीयत इत्यभिप्रायेणेह पदान्ता इत्युक्तम् । वृत्तवादेः प्रामाणिकत्वेऽनुनासिकयोग्यस्य परस्याप्यणः सम्भवादिदमसंगतमेव स्यात् । सुध्युपास्य इत्यादौ तु यणोऽनुनासिकप्रवृत्तियोग्यत्वाभावेन तत्सत्त्वे बाधकाभावात् । अत्रैव गमकान्तरमाह । भोभगो इतीति । तत्रत्यवार्त्तिकेन कथमेतावल्लभ्यमत आह । अशोऽन्यत्रेति । एतन्निमित्तकार्यस्य कार्यिणोऽभावादित्यर्थः । अस्मिन्नर्थे तदग्रिमव्याख्यानभाष्यविरोध इत्यत आह । न ह्यन्यत्रेत्यादि । अत एव । प्रकृतसूत्रेऽण्ग्रहणस्य प्रयोजनाभावादेव । वाक्यसंस्कारपक्ष इति । यद्यप्यस्मिन्पक्षे सर्वकार्याणां युगपत्प्राप्तिस्तथापि येन क्रमेण वर्णश्रवणस्तेनैव क्रमेणान्तरङ्गत्वाच्छब्दसंस्कारः कार्य इत्यत्र न पदान्तसूत्रस्थङ्गानि सन्ति को स्त इत्यत्र पदान्तग्रहणप्रयोजनप्रतिपादनपरभाष्यमेव मानम् । परिभाषालभ्यमिति । अनुवादेपि परिभाषाप्रवृत्तेः । पूर्वोक्तार्थे भाष्यसम्मतिमाह । अत एवेति । रेफस्यावयवत्वस्वीकारादेव । तत्सादृश्येति । अवयवसादृश्येत्यर्थः । यथा दध्यवयवस्यावयविबोधकशब्दजन्यप्रतिपत्तिविषयत्वन्तथा अस्य वृद्धिगुणादिशब्दबोध्यत्वम् । अन्यथा । सादृश्यापर्यवसानो

हलन्ताच्चेति । तत्र च्युक्तोऽयं निर्देशः । कथं हि नामिको हलन्तः स्यात् । अन्यस्यान्य इत्युक्तम् । अत्र कैयटः । अन्यस्यान्य इति । अत्यन्तभेदमनयोर्दर्शयति एतदेकवाक्यतया । वाक्यैकवाक्यतया । अत एव । अवयवत्वस्वीकारादेव । एतेनेति यदुक्तन्तदर्थमाह । उक्तनियमेति । जातस्याणो रप्रत्वमितिपक्षेऽन्येनो हितन्दूषणङ्खण्डयति । अत्र पक्षे इति । कस्यापि कल्पनान्दूषयति । तत्रतत्रेति ऋत इत् । उदोष्ठ्यपूर्वस्येत्यत्र तकारस्य स्थाने रेफ एवोच्चारणीयः । द्वद्विरारालादेच् अरलदेङ्गुणः । एवं रीत्या पाठे बह्वनां रेफलकाराणामुच्चारणेन यद्यपि गौरव रूपन्दूषणं स्फुटमवति तथापि दूषणान्तरमाह । आबित्यादि । अत्र यथाश्रुतन्यासे ईर्ष्यतीति न सिध्येत् एतदर्थमत्र ईरिति करणे ईष्यति क्षीष्यतीति न सिध्येत् । भृञामिदिति । अत्र तपरातपरपाठयोर्यद्यपि न दोषः । हलादिशेषेण रेफनिवृत्तेः । तथापि माङ् ओहाङ् विषये हलादिः शेष इत्येतस्य स्मरणमत्र पक्षे कर्त्तव्यमिति गौरवमेव दोषः । रप्रत्याहाराभावेनेति । निरूपितमेतत्प्राक् । भयो ह इति । यथाश्रुतपाठे । भाष्यसम्मताष्टाध्यायीपाठे आह । यावत्सानः इति । फलविशेष एव प्रवृत्तेरिति । ननु सन्नन्ते ईर्ष्यतीति प्रतीकमुपादाय पूर्वत्रासिद्धीयमद्विर्वे इति चर्वे कृते लशब्दस्य द्वित्वमित्युक्तम् । तत्र चर्वात्प्राग् द्वित्वेऽपि रूपसिद्धौ निर्बाधायां रूपे विशेषाभावेन परिभाषाप्रवृत्तिर्न स्यात् सा च स्वीकृतेति तेन ग्रन्थे नास्य विरोध इति चेन्न । अकृतकारि शास्त्रमग्निवत् यथा अग्निर्यददग्धं तदहतीति न्यायानुसारित्वादस्य ग्रन्थस्य तस्य तु ग्रन्थस्य कृतकारि खल्वपि शास्त्रम्पर्जन्यवदित्येतन्न्यायानुसारित्वात् । पृथक्पदमिति । नात्र षष्ठीसमासस्य प्राप्तिः पूरणगुणेति निषेधादिति भावः । कश्चिदिति । संज्ञाप्रमाणत्वादित्यादिनिर्देशैस्तन्निषेधस्यानित्यत्वात्समासेऽपि न क्षतिरित्यस्वरसः । आदेश एवेति । एतेनोठ उपधात इति धातुव्याख्यानादिति । असिद्धम्बहिरङ्गमन्तरङ्ग इतिपरिभाषाज्ञापकपरत्वाद्ऊठ्सूत्रस्थभाष्यमूलकाद्व्याख्यानादित्यर्थः । प्रसिद्धत्वादिति । एतेन वीगतीत्यत्र प्रक्षिप्तस्य व्याख्यानमिति । भाष्यस्वरस इति । तत्र हि औतोम्शसोरित्यत्राचीत्यनुवर्त्य नैवं विज्ञायते अच्यमीति कथन्तर्हि अम्यचीति । एतेनास्मिन् प्रकरणे यत्रयत्राचीति सम्बध्यते तत्र सर्वत्राच्पदार्थस्य विशेष्यत्वमित्येकादेशस्य वर्णाश्रयत्वमित्युक्तम् ।

रवश्चायमेवार्थ इत्यस्य शब्दोऽर्थ इत्यर्थ इति तात्पर्यम्। हृद्भिर्भवत्वेवेति। एवञ्च ण्यन्तस्य शब्दान्तरत्वेऽपि प्रकृतिभागस्यानन्यत्वान्नानुपपत्तिरिति भावः। अवैहीति हृद्भिरसाधुरेवेत्युक्तन्तच्चायुक्तमाङोऽभावेनौमाङोरित्यस्याप्राप्तेरत आह। आङिणोरेकादेशेति। स्वं रूपमिति सूत्रे उक्तमिति। तस्मिन् सूत्रे स्वंरूपमित्युभयोरुपादानादात्मीयार्थविशिष्टशब्दरूपस्य संज्ञित्वादेतल्लाभः। अत्र मनोरमायामुक्तम्। सीरदेवस्त्वाह। व्रश्चेति सूत्रे राजेः पृथग् भ्राजिग्रहणमिह ज्ञापकम्। नन्वेतदयुक्तम्। फणादिना राजिना साहचर्यात्तथाभूतस्यैव षत्वार्थतया भ्राजिग्रहणस्योपन्यूणत्वादिति चेत्। विभ्राड् विभ्राग् इति रूपद्वयं साध्यम्। तच्च व्रश्चादिसूत्रे राजृ इति पठित्वापि सुसाधम्। एकस्य भ्राजतेर्ऋकारस्य प्रागपि दातुं शक्यत्वात्। भ्राजभासेति विकल्पस्य वाचनिकतया ऋकारस्यात्मनेपदमात्रफलकताया वक्ष्यमाणत्वेन तत्स्थानेऽकारस्यापि दातुं शक्यत्वात्। एवञ्च ऋकारानुबन्धकस्य व्रश्चेतिसूत्रे ग्रहणात्तस्य विभ्राड़िति रूपमन्यस्याकारानुबन्धकस्य विभ्रागिति भविष्यतीति भावः। तस्मात्सीरदेवोक्तं ज्ञापकं सम्यगेवेति। शब्दरत्ने सीरदेवोक्तमिति। अत्रारुचिबीजन्तु व्रश्चादिसाहचर्येण धातुसंज्ञकराजेर्ग्रहणं स्यादेवञ्च भ्राजन्तर्गतस्य राजेरधातुत्वान्न तेन तत्र षत्वसिद्धिरिति भ्राजिग्रहणस्यावश्यकत्वम्। किञ्च भ्राजन्तर्गतराजेर्न ऋकारानुबन्धत्वन्तस्य समुदायानुबन्धत्वादिति। समुदायानुबन्धो हि नावयवानुबन्धः। तस्थस्थमिपामिति सूत्रे चतुर्णाभेदेनोपादानात्। अन्यथा तस्थपामित्येव वदेत्। तेन महिङो ङकारस्य तिङादिप्रत्याहारार्थत्वेन समुदायानुबन्धतया महिप्रत्ययस्य न ङित्त्वमिति सम्पप्रच्छिमह इत्यत्र सम्प्रसारणाभाव इति। यत्तु असत्यामर्थवत्परिभाषायामृकारस्य समुदायावयवोभयोरुपकारकत्वसम्भवेन राजृग्रहणेन भ्राजृग्रहणं स्यादेवेति। तन्न। तत्रत्यऋकारस्य समुदायोपदेशप्रयुक्तैवेत्संज्ञा वाच्या व्यवसितानुनासिकस्यैवेत्संज्ञाविधानात्। एवञ्च यदुपदेशप्रयुक्ता यस्येत्संज्ञा तस्य तदुपकारकत्वमित्युभयोपकारकत्वासम्भवात्। न चैवं सति याटष्टकारस्य समुदायानुबन्धत्वेन रमायै इत्यत्राटश्चेति हृद्भिरिति प्राचीनलेखनासङ्गतिरिति वाच्यम्। ज्ञापकसिद्धस्यासार्वत्रिकत्वेन शरीरावयवहस्तपादाद्यवयवाङ्गुल्यादेः शरीरावयवत्वस्य लोकप्रसिद्धव्यवहारेण च प्राङ्भिस्त

थाभिधानात्। यत्तु व्रश्चादिसाहचर्येण धातुसंज्ञकानामिव ग्रहणे क्ष्णविषयेऽपि साहचर्याच्छ्नान्तधातोरेव ग्रहणं स्यादेवञ्च निज्ञ्नान्निङ्निरिति रूपा सिद्धिरिति। तन्न। तत्रापि निज्भ्यान्निज्भिरिति रूपाभ्युपगमात्। यदि तु निज्ञ्नामित्यादीष्टन्तर्हि साहचर्यानित्यत्वेन साधनीयम्। यदपि फणादिभिन्ने राजावतिप्रसङ्गनिवारणाय क्ङतस्य राजृ इत्यत्र ऋकारस्य यदि न राजुपकारकत्वन्तदा ऋकारपाठवैयर्थ्यमिति। तदपि न। समुदायोपकारकत्वेन तस्य चारितार्थ्यात्। तपरकरणादिति। प्रकृतसूत्रे तु न फलम्। ऋकारादेर्धातोरप्रसिद्धत्वात्। ऋकारीयतीत्यादाविति। आदिना ऋकार इवाचरति ऋकारतीत्यस्य सङ्ग्रहः न गृह्यते व्याख्यानादिति। एतत्सूचभाष्ये यत्क्रिया इति वचनेनोपसर्गग्रहणेन धातुग्रहणे सिद्धे पुनर्धातुग्रहणस्योपसर्गाद्धति धातौ हृद्विरेव यथा स्याद्यदन्यत्प्राप्नोति तन्माभूत्। किञ्चान्यत्प्राप्नोति ह्रस्वत्वं ऋत्यक इति प्रतिपादितम्। यद्यस्मिन्सूत्रे ऋतिः सौत्रो विवक्षितः स्यात्तदा धातुग्रहणसत्त्वे सौत्रस्य शीघ्रोपस्थितिकतया तद्ग्रहणं सिध्यत्यन्यथा ऋतीत्यनेन वर्णग्रहणमेव ऋत्यक इतिवत्सम्भाव्येत ततश्च पुनर्विधानार्थत्ववर्णनमसङ्गतं स्यात्तेन सौत्र एव गृह्यते इति नेति व्याख्यानादित्यर्थः अत एव धाताविति किमर्थम्। इह माभूत् प्रर्षभं वनम्। एतत्प्रत्युदाहरणभाष्योक्तं सङ्गच्छते। यदुक्तम्पूर्वस्य परस्य समुदायस्येति तत्फलमाह। तदर्णमात्रवृत्तीत्यादिना। एवञ्च विशिष्टनिष्ठधर्मातिदेशो न तु वर्णवृत्तिधर्मस्येति सिद्धम्। अस्मिन्नर्थे ज्ञापकमप्याह। अत एवेति। उक्तार्थस्वीकारादेवेत्यर्थः। तुक्यसिद्धेति। तुकि कर्त्तव्येऽसिद्धवचनमिति योजना। असिद्धवचनम्। असिद्धत्वबोधकं वचनमित्यर्थः। उक्तार्थे वार्त्तिकसम्मतिमप्याह। तदुक्तमिति। वार्त्तिककृतेति शेषः। अत्र प्राचः स्थानिवत्सूत्रेण गतार्थमेतत्सूत्रमिति। तन्न युक्तमित्याशयेनाह। क्षीरप इत्यादि। न चात्रोत्तरपदत्वमाश्रित्य इत्यत्रातिदिश्यते एकाच्त्वन्तु तस्य स्वतः सिद्धमिति समासे एकाजुत्तरपदकत्वमर्थसमाजग्रस्तमिति स्थानिवत्त्वेनैव निर्वाह इति वाच्यम्। एकाजुत्तरपद इति सूत्रे समासनिर्देशेनैकाजवयवकत्वविशिष्टोत्तरपदकसमासावयवपूर्वपदस्थत्वस्य निमित्ततावच्छेदकत्वेनाश्रयणन्तच्च विशेषणीभूतात्लघटितमेव। किं चात्र श्रौतस्थान्यादेशभावो वा। आनुमानिको वा। उभयथोत्तरपदत्वम्पे इ

त्यत्रातिदेष्टुमशक्यम् ॥ श्रौतस्थानिनि पूर्वाकारपरेकारघटितसमुदाये तस्याभावात् ॥ आनुमानिकादेशस्तु क्षीरपेणेति तस्य स्थानी क्षीरप इनेति तस्मिन्समुदायेऽपि नोत्तरपदत्वमिति तस्यातिदेष्टुमशक्यत्वादिति भावः ॥ भीई भिय इति॥ आत्वपक्षे भियो हेतुभये षुगिति सूत्रेण षुगागमवारणाय भिय इति सूत्रे ईकारप्रश्लेषः कृतस्तन्निर्देशोऽयम् ॥ ये त्वरुदितामित्येतद्दृष्टान्तेन स्थानिवद्भावमुपपादयन्ति ते मान्याः । तत्र तसस्तामादेशे तस्य स्थानिवद्भावेन सार्वधातुकत्वसम्पादनसमये न कथमप्यलाश्रयणमिति वैषम्यं स्पष्टमेव ॥ तथा प्राचाम्पूर्वापरविरोध इत्याह ॥ किञ्चेति ॥ अभीयादित्यादावसिद्धिरिति ॥ इणोण उपसर्गात्परत्वस्यातिदेशेन लाभसम्भवात् ॥ अचः परस्मिन्नित्यस्येति ॥ पूर्वसूत्रापेक्षयाऽचः परस्मिन्नित्यनेनाभावोऽप्यतिदिश्यते इत्येव विशेषो दर्शितो न त्वयमित्युभयत आश्रयणेप्युभयोः प्रवृत्तिः । विनिगमनाविरहाच्च ॥ यद्युभयत आश्रयणेऽप्रवृत्तिस्तदोभयोरप्रवृत्तिः स्यात् प्लायत इत्यस्यासिद्धिः ॥ अचायतिपरत्वन्न कार्यिरेफविशेषणन्निलयते दुलयत इत्यादौ चरितार्थस्य तस्य पल्ययत इत्यादौ व्यवहिते प्रवृत्तिर्न स्यादत उपसर्गविशेषणमेवञ्च प्लायत इत्यत्र लत्वं स्थानिवत्त्वेनैव साधनीयमिति भावः ॥ पदद्वयसम्बन्धित्वेन वर्णद्वयस्य निमित्तत्वे नाश्रयणन्न शास्त्रबोध्यङ्किन्तु वस्तुगत्या गुणस्य पदद्वयसम्बन्धिवर्णनिमित्तकत्वं वाच्यम् ॥ तच्च विसर्गस्यापीत्याह ॥ गुणस्येवेति ॥ कार्यकालपक्षे त्रिपाद्यामसिद्धपरिभाषा प्रवृत्तिरिति प्राचीनसम्मतोऽर्थो नोचित इत्याह । किञ्चेति ॥ अनया । असिद्धपरिभाषया । विनिगमनाविरहादिति । प्रत्यक्षानुमानयोः समत्वमभ्युपगम्येदम् ॥ उक्तेर्थे भाष्यसम्मतिमप्याह ॥ अत एवेति ॥ कार्यकालपक्षेप्यप्रवृत्तेरेवेत्यर्थः इमामिति । एवं हीत्यायुक्ताम् । तत्र हि नार्कुटो नार्पत्य इत्यत्र विसर्गनिवारणायारब्धस्य विसर्जनीयोऽनुत्तरपद इति वचनस्य प्रत्याख्यानाय प्रवृत्तस्यहिरङ्गपरिभाषया समाधानमयुक्तङ्किन्तु वचनेन समाधानं कार्यम् । तच्चतच्च । संयोगान्तस्य रदाभ्यान्निष्ठातः । त्रियो दीर्घात् खरवसानयोरेतेषु सूत्रेषु । वचनानीति । संयोगान्तलोपे यणः प्रतिषेधः । तथा कर्त्तिरित्यत्र नत्वव्यावर्त्तकं रेफादपरनिमित्तात् । तथा चैतिरित्यत्र नत्ववारकन्निष्ठानत्वमहत्वेरिति । एवञ्चेदं व्यापकत्वादादर्त्तव्यमनेनैव सिद्धे पूर्वोक्तन्न कार्यम् । नार्क-

टे विसर्गनिवारकं विसर्जनीयोऽनुत्तरपद इत्येवं वचनञ्च कार्यमित्यर्थः । उत्तरपदे सति यो रेफः उत्तरपदनिमित्तक इति यावत् तस्य नेत्यर्थः । न च नार्कुट इत्यादावुत्तरपदस्य न रेफनिमित्तत्वङ्किन्तु तद्धितस्येति वाच्यम् । उत्तरपदे सत्यृकारे आदित्वव्यपदेशेन द्वद्विप्राप्त्या परम्परया रेफस्योत्तरपदनिमित्तकत्वात् ॥ न चैवमपि नार्कल्पिरित्यत्र रेफस्योत्तरपदनिमित्तकत्वाभावाद्विसर्गो दुर्वार इति वाच्यम् । उत्तरपदशब्दस्योत्तरं यत्पदमर्थवत्तत्परत्वात् । कल्पप्रत्ययस्यापि द्योत्येनार्थेनार्थवत्त्वात् ॥ ननु तत्रतत्र वचनारम्भे गौरवमत आह । ज्ञापकानुसरणमिति । संयोगान्तस्य लोप इत्यत्र झल्ग्रहणापकर्षस्याप्युपलक्षकमेतत् । एवञ्च विसर्गविधौ उभयथर्क्षु कर्त्तरि चर्षीत्यादिसंयोगान्तलोपविषये झल्ग्रहणापकर्षो वा तस्मादित्युत्तरस्येत्यादिनिर्देशस्य वा ज्ञापकत्वम् । नत्वविषये निष्ठानत्वमद्वडेः इड्डेः परस्य प्रतिषेध इत्यर्थकं वचनमेव कर्त्तव्यमेवञ्च ज्ञापकानुसरणं वेत्यत्र वाकारोऽनाख्यायान्द्रष्टव्यः ॥ यदर्थं क्रियारूप इति । उपसर्गाः क्रियायामित्येव सिद्धे योगग्रहणाद्यत्क्रियायोग इत्यस्योपस्थित्या विवक्षितार्थलाभः । सुबन्तप्रकृतिके धाताविति । सुबन्तप्रकृतिर्यस्यैतादृशो यः प्रत्ययः क्यजादिस्तदन्ते धातावित्यर्थः । न तु सुबन्ते धाताविति शेषः ॥ अनुपसर्गत्वादिति । क्रियायोगाभावादिति भावः । अत्रापीति । पूर्ववत् । व्यञ्जनात्परस्यैकेति ॥ न हि व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषोऽस्तीतरच्च व्यञ्जनात्परस्य व्यञ्जनं परं यस्मादिति वा समासद्वयं विवक्षितम् । अनवक्लृप्तादि चेति । अत्रादिनाऽमर्षपरिग्रहः । यथाऽनवक्लृप्तिः प्रतीयते तथा स्पष्टयति । क्वेत्यादि । निर्द्धारणे षष्ठीति । सौत्रत्वादेकवचनम् । अत्रान्त्यशब्दस्य सापेक्षत्वेऽपि समासोपपत्तिङ्करोति । गमकत्वादिति । गणे सीमन्तशब्दो नान्तडावन्तयोरपि तन्त्रेण निर्द्दिष्टः । केशवेश इत्यस्य रचनाविशेषविशिष्टकेशेष्वित्यर्थः । मृताण्डादागत इति । एतेनाण्प्रत्ययसत्तायाम्परूपमिति सूचयति । अत्राधिकरणस्य हेतुत्वविवक्षया पञ्चमी । आगत इत्यस्य भवेत्यर्थः । वृषशापवशाददितेरुदरे स्थित एव गर्भोऽचेतनः सम्पन्नः पश्चात्ततो निःसरणे सचेतनो भूदिति भारते प्रसिद्धम् । शब्दज्ञानानुपातीति । शब्दश्च ज्ञानञ्च शब्दज्ञाने ते अनुपातिनी जनके यस्य स शब्दज्ञानानुपाती वस्तुशून्यो

बाह्यवस्तुशून्यस्तद्विषयित्वाभाववानिति यावत् । एतादृशो यः प्रत्ययस्य विकल्प इत्युच्यते । शशशृङ्गादिशब्दे केनचित्पुरुषेणार्थं शशशृङ्गवानित्यादिरीत्योच्चारिते इदंशब्दबोध्यस्य दुःखं जायते । दुःखोत्पत्तौ च तदर्थविषयकशाब्दबोधो हेतुः । स च शाब्दबोधः पदार्थोपस्थितिसाध्यः सा चोपस्थितिरस्मादेव शब्दादस्येति यः शाब्दबोधो भवति स उच्चारितशब्दजन्यज्ञानञ्च प्रयोक्तुः परम्परया शाब्दबोधस्य प्रयोजकं वाक्यप्रयोगे वाक्यार्थबोधस्य कारणत्वात् ॥ बौद्धपदार्थस्वीकाराच्च एष वन्ध्यासुतो याति खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धर इत्यस्योपपत्तिः ॥ शकन्ध्वादिषितिवचनस्य शकन्ध्वादिषु शब्देषु यथा शब्दा उच्चारितास्तथा येन प्रकारेण सिध्येरंस्तथा पररूपञ्चवतीत्यर्थोऽभियुक्तैरुक्तः । तेन टेरिति लब्धम् । पतच्छब्दस्याञ्जलिशब्देन समासे यद्यपि पतञ्जलिशब्दसिद्धिर्भवति शकन्ध्वादौ पतञ्जलिशब्दपाठश्च चरितार्थो भवति । तथापि कस्य चिदृषेरञ्जलेः पतित इत्यर्थे यः पतञ्जलिशब्दस्तस्यानेन सिद्धिर्न भवतीति सिंहावलोकनन्यायेनाह । पतञ्जलिरिति त्विति । अतएव भगवान् भाष्यकार एव तत्रतत्राह गोनर्दीयस्त्वाहेति । तथा चेयमेव व्युत्पत्तिर्युक्तेति सूचितम् ॥ नन्ववर्णादोत्वादिशब्दावयवेऽचि वा पररूपमित्यर्थे ओत्वोष्ठादिशब्दस्य विशेषणतयाऽस्यापि पदसम्बन्धिविधित्वेन समर्थपरिभाषोपस्थित्या समास एव प्रवृत्तिर्भविष्यतीति समासग्रहणं व्यर्थमत आह । अत्र समर्थेति । यथा कथञ्चित्पदविधौ परिभाषोपस्थितौ समासेऽञ्जलेरित्यस्यापि समासे प्रवृत्तिः सिद्धैवेति तत्रापि समासग्रहणं व्यर्थमेव स्यात् ॥ ननु तस्याप्यकरणे लाघवमेवेत्यत आह । पदविधिरितिसूत्रस्वरसेन चेति । न चैतावता सुबन्तत्वेनेत्यस्य लाभ इत्यत आह । भाष्यादिस्वारस्येन चेति ॥ अत्र साक्षादुद्देश्यतेत्यस्य पदस्येत्यादिः । तेन पदसंज्ञकसमुदायस्योद्देश्यतायामेव समर्थपरिभाषा प्रवर्त्तते । समासेऽञ्जलेरित्यत्वौत्वोष्ठ्ययोरित्यत्र च न पदस्योद्देश्यत्वङ्किन्तूद्देश्यविशेषणत्वमिति भावः । तत्र सुबन्तत्वेनोद्देश्यता समासादिविधौ स्फुटैव । पदत्वेनोद्देश्यतायामप्रवृत्तिश्च गतिर्गतावितिसूत्रे भाष्ये कैयटेन दर्शिता । न च समासादिविधौ समर्थपरिभाषया एकार्थीभावो बोध्यते । स चैकार्थीभावः साक्षाद्विध्युद्देश्ययोर्विधेयोद्देश्ययोर्वा कल्प्यते । समासविषये विध्युद्देश्ययोरिति ग्राह्य-

म्। अत्र द्वित्वस्याविवक्षितत्वाद्धनामपि सङ्ग्रहः। कर्मण्यणित्यादौ विधेयोद्देश्ययोरिति प्राप्तम्। तथा सति महान्तं कुम्भं करोतीत्यत्र णाणिति यत्प्राप्तिः कुम्भमित्यस्योद्देश्यत्वाभावादिति वाच्यम्। उद्देश्यपदस्योद्देश्ये सोपपदोद्देश्ये च लाक्षणिकत्वात्। एवञ्चोद्देश्योपपदविधेयानामपि क्वचित्स कल्प्यते। अत एव मूलकेनोपदंशमित्यादौ मूलकेनेति तृतीयान्तेन सह कल्प्यते उपपदाभे चेद्विशेषणन्तदा तु न। तेन महता मूलकेनोपदंशमित्यसाध्विति ग्रन्थसङ्गतिः। उपपदमतिङन्तमिति सूत्रे सुप्सुपेत्यस्य निवृत्तावपि पदत्वेनोद्देश्यतासत्त्वान्न क्षतिः॥ गतिर्गताविति सूत्रे भाष्ये गताविति किमर्थम्। न च तिङन्ते प्राप्नोति। तिङन्ते चेदुदात्तवत्त्वेवेति नियमेनान्यतिङन्तव्याहृत्तेरिति प्रश्नः। आमन्द्रेरिन्द्रहरिमित्यादौ मन्द्रशब्दे परे आङो निघातव्याहृत्यर्थङ्गताविति युक्तमित्युत्तरम्। अत्र कैयटः। यदा प्रयोगनियमो धातोः प्रागेव प्रयोक्तव्या इति तदोपसर्गत्वेपि प्रक्रान्ते छन्दसि परेपीत्यनेन नियमबाधेन व्यवहितपूर्वप्रयोगसिद्धिस्तदा गतेराङो निघातः स्यात्। यदा तु संज्ञानियमपक्षो धातोः प्राक् प्रयुज्यमानानामेव गतित्वमिति। तदात्र न गतित्वमिति। नैतद् गताविति सूत्रस्य प्रयोजनमिति। न च मन्द्रे रवि सुखि सति व्युत्पन्नान् मन्द्रशब्दाद्व्याक् प्रयोगात्स्यादेव गतिसंज्ञेति वाच्यम्। यत्क्रिययायुक्ता इति वचनाद्यत्क्रियायोगस्तत्प्राक्प्रयोगे सत्येव गतित्वमिति इन्द्रम् प्रत्यगतित्वादित्युक्तभाष्ये। तत्र कैयटः। यत्र परनिमित्तोपादानन्तत्रैव यत्क्रिययायुक्ता इत्यस्योपस्थितिः। यद्योपसर्गस्य वक्ष्यत्यादौ प्रक्रान्ते तस्यानुपादानान्न यत्क्रिययायुक्ता इत्यस्योपस्थितिरिति शङ्कायाम्पदस्येत्यधिकाराल्पदविधित्वात्समर्थपरिभाषोपस्थानादेतद्विशेषलाभ इत्याह। येन गतेः सामर्थ्यन्तत्रेति यो गतिः स तस्मिन् परे निहन्यत इत्यर्थ इति भावः। वस्तुतस्त्विदञ्चिन्त्यम्। एकार्थीभावविषय एव समर्थपरिभाषाप्रवृत्तेः। तद्विषयत्वञ्च प्रक्रान्ते क्रियावाचकस्येति स्पष्टमेव। ननु प्रागुक्तभाष्यस्य तर्हि का गतिरिति चेत्। यया क्रिययाऽव्यवहितपरशब्दवाच्यया युक्तास्तत्रत्येव गतित्वमिति प्रक्रान्ते तु यद्वाचया योगस्तद्वाव्यवहितत्वेन संज्ञानियमपक्षे गतित्वाभावो येन चाव्यवधानन्तस्य क्रियात्वाभाव इति सर्वथा गतित्वाभाव इति। किन्तर्हि याहि शब्दम् प्रतीति भाष्यस्य तद्वाव्यवहितत्वाद् गतित्वा-

भाव इति भावः । एवं यत्र सुबन्तत्वावच्छिन्नबोधे स्वकविधिसाहचर्यन्तत्रापि सन्नन्तादावेकार्थीभावो भाष्यकारादिसंवादात् स्वीक्रियत इति बोध्यम् । इति निषेधादिति । अनुकरणावयवाच्छब्दस्यानर्थकत्वं स्फुटमेव । नानर्थक इति परिभाषां विनापि लक्ष्यसिद्धिमाह । आम्रेडितस्येति । घटगितीति । इदङ्गपोतोच्चारितध्वनेरनुकरणम् ॥ वैचित्र्यार्थमिति । मात्रादिलाघवाभावेपि प्रतिपत्तिलाघवं यथा भवति तथैव वक्तव्यमिति नियमाभावसूचनार्थमित्यर्थः । फलकल्पनाभिनिवेशस्त्विति । नाम्रेडितस्येत्यंश आम्प्रत्ययशिष्टत्वद्वारा घटग्घटगितीत्यादावन्त्यस्य पररूपभवतीत्येवं रूप इति भावः । प्रमादशतमिति । न तु तत्र द्विस्वाङ्गृहणेनाधीयानविदुषोः पृथग्ग्रहणं सिध्यति । अन्यथा योऽधीते वेद च तत्रैव स्यादिति फलकल्पना आर्या । तिग दीर्घत्वे खनति जयतीत्यादौ यथा पृथगेव निमित्तत्वन्तथा पृथगेव भविष्यतीति भावः । ननु ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यामप्रागनिष्पत्तेरित्यनुपपन्नम् । सुबनिष्पत्तेर्नाञ्झलावितिशास्त्रजन्यशाब्दबोधहेतुत्वे मानाभावादतोऽनिष्पत्तेरित्यस्य तावद्ग्रहणबोधकत्वेत्यादिपूरणेन व्याख्या युक्तेत्याशयेनाह । नाञ्झलावितीति । यद्यपृक्त इति ऋ वेत्येव वक्तव्यमथाप्यनुवृत्त्यैतादृशार्थलाभ इत्याह । सूत्रस्थेति॥ वार्तिकद्वयविधेययोः प्रसिद्धाद्विलक्षणत्वं वार्तिकारम्भ एव ज्ञायते । एवञ्चाचकार्थसिद्धिः कथमत आह । एतद्विधेययोरिति ॥ न रपरत्वमिति । प्रथमणकारेणाणग्रहणस्यैव तस्मिन् सूत्रे निर्णीतत्वात् ॥ अत एव द्विमात्रत्वादेव ॥ रेफद्वयवत्तारूपेति । स्थानार्थगुणप्रमाणेति चतुर्विधमेवान्तरतम्यमिति नियमस्योरणिति सूत्रेऽनान्तर्यमेवान्तर्यमिति भाष्यकृतोक्तत्वेन त्यागादिति भावः । कदाचिद्विहृतस्येति ॥ प्रसिद्धस्य दीर्घऋकारस्येत्यर्थः । द्विलकारस्येति । वार्तिकविधेयस्येषत्स्पृष्टस्य । दीर्घलृकारस्याचाप्रसिद्धत्वादिति भावः । रेफवत्तासाम्येन चेति । यो हि द्वयोः षष्ठीनिर्दिष्टयोः स्थाने भवति स तसेऽसावन्यतरतो व्यपदेश्यमिति भाष्यकृतैवोक्तत्वेन पूर्ववृत्तिधर्मवत्त्वेनोत्तरवृत्तिधर्मवत्त्वेन वा साम्यस्य ग्रहीतुमुचितत्वादिति भावः । तदेव भाष्यमिति । प्रत्याख्यानपरभाष्यमेवेत्यर्थः । तदेवोपपादयति। द्विरेफत्वे हीति । अवश्यमङ्गीकर्तव्य इति । ऋवर्णान्तस्येति तु पक्षान्तरेस्ति । भेदेनाप्रतिभासमानेष्विति । ऊकारादयवयवेष्वित्यर्थः । प्रातर्ऋ-

तमित्यत्रेति । एतेन मूले वार्तिकव्याख्यावसरेऽभितोऽज्भक्ते रिति यदुक्तन्तद्वार्तिकविधेययोरेवेति शङ्काव्युदासः । रेफात्परमक्ते रिति । रेफाल्लोः परमिति योजना । तथैवोचितत्वादिति । अभितोऽज्भागस्यौचित्वादिति भावः । वार्तिकविधेययोर्यत्र साधुत्वन्तद्विषयन्दर्शयति । अत्र ऋस्य इत्यादि । ऋतीति तपरकरणेन ऋस्यैव स्थानित्वलाभात् । पूर्वस्य । पूर्ववार्तिकविधेयस्य । ऋस्वऋकारेति । यदेतदृतीति एतदृत इति वक्ष्यामीति भाष्यात् । लृकारेति । तस्यैव द्वितीयवार्तिक उपादानात् ॥ अत एवेति । उक्तव्यवस्थाश्रयणादेवेत्यर्थः । सावर्ण्यं च कार्यमिति । सावर्ण्यस्य होतृलृकार इति स्थिते सवर्णदीर्घरूपं यत्फलन्तस्थानेन वार्तिकेनैव सिद्धिर्भविष्यति वार्तिकस्थवाशब्दस्य चार्थत्वात् । एवञ्च वार्तिके ऋत इति करणे होतृलृकार इत्यत्रैव द्वितीयवार्तिकविधेयौ भविष्यत इति तत्र सवर्णग्रहणानुवृत्तिर्न कार्येति भावः । वार्तिकविधेययोरीषत्स्पृष्टत्वे प्रमाणमाह । उपस्थितेति । एतेनान्यप्रयत्नकत्वशङ्का निरस्ता । ननु प्रसिद्धऋटकारीयप्रयत्न एवास्त्वित्यत आह । विवृतत्वे होति । अनयोरपि ऊकालत्वस्योपपादितत्वादिति भावः । भवतीति । न चात्र शपि गुणे सन्निपातपरिभाषया न पररूपमिति वाच्यम् । अस्य धयतीत्याद्युपलक्षकत्वात् । न चापदान्ताच्चेन्ङसिङसोरेवेति नियमार्थकङसिङसोर्यति सूत्रारम्भाच्च दोष इति वाच्यम् । विभक्तौ चेन्ङसिङसोरेवेतिनियमपरतयापि सूत्रसार्थक्यसम्भवात् । हरयः असुनवमित्यादिव्यावर्त्यं स्यात् । स्फोटायनेति । स्फोटस्य ऋषेरपत्यमित्यर्थः । अत एव । तन्निवृत्तिस्वीकारदेव ॥ ननु सन्निपातपरिभाषयाऽवङादेशे कृते दीर्घो न स्यादत आह । सन्निपातेति ॥ देवचात इति । क्तिच्क्तौ चेतिसंज्ञायां क्ते नुदविदेति नत्वमत्र न । गल इति । अचि विभाषेति लत्वम्प्राण्यवयवे नित्यम् । ग्राह इति । जलचरे विभाषा ग्रह इतिणप्रत्यय एव । इतियोग इति । हन्तीति पलायत इत्यादौ लक्षणहेत्वोरिति शत्रादिर्न । वातायनेऽवङ् नित्यः । व्रतविषये शाच्छोरिति नित्यमेवेत्वम् । ते नत्वादयो मिथो न विभाषन्ते एकस्मिन् विषये पर्यायेण न भवन्ती अन्या अपि व्यवस्थितविभाषा भाष्यप्रमाण्यात्तत्र तत्र स्वीकार्याः ॥ न तु स्वेच्छया ॥ तदाशयेनाह । अग्नीत्प्रेषण इतीति ॥ अग्नीधःप्रेषणे यद्दाक्यन्तस्यादेस्त-

स्मात्परस्य च प्लुतो भवति। स यथा ओश्रावयेत्यत्र भवति तथा अग्नीदग्नी-न्विहरेत्यत्रापि स्यादित्यर्थः॥ नन्वन्यत्रापि व्यवस्थितविभाषात्वस्वीकारे इन्द्रे चेति सूत्रं व्यर्थमित्याशङ्क्य निराचष्टे। न चेति। एवञ्च भाष्यतात्पर्यविषय एव व्यवस्थितविभाषात्वमिति सिद्धम्। इन्द्रावयवेऽचीति। अवयविन आधारत्वविवक्षायां सप्तमी। अत्राप्यचीत्यनुवर्त्तमानं विशेष्यसमर्पकमेव। तदुक्तभाष्ये। नैवं विज्ञायते इन्द्रेचीति। किन्तर्हि अचीन्द्रे इति॥ न चेदानीमप्याचेपादुत्तरपदभूतेन्द्रशब्दावयवेऽचीति व्याख्यानेनानुपपत्तिः समानैवेति वाच्यम्। अचीत्यनुवृत्तिसामर्थ्यात्तथार्थाकल्पनात्। सामञ्जस्यमिति। प्लुतप्रगृह्या इत्यस्य प्रथमान्तत्वात्। अचीत्यनुवर्त्तमान इति। न चाज्ग्रहणानुवृत्त्यभावेपि प्लुताः प्रगृह्याः प्रकृत्या इत्यनेनैव सामञ्जस्येऽज्ग्रहणानुवृत्तिसामर्थ्यादुक्तार्थो भविष्यतीति वाच्यम्। अनुवृत्तिसामर्थ्यात्तस्मिन्निति परिभाषायाः षष्ठ्यन्तपदरहितायाः अप्युपस्थितिः सम्भाव्येतेत्याशयात्॥ आश्रयादिति। अनुवादसामर्थ्यादित्यर्थः॥ वाग्रहणनिवृत्त्यैवेति। सर्वत्र विभाषेतिसूत्रादनुवर्त्तमानस्य विभाषाग्रहणस्य इन्द्रे चेतिसूत्रे सामर्थ्यान्निवृत्तेरुक्तत्वात्। अयमेवेवि। एतच्च मूलएवोक्तम्। प्रथमया विपरिणम्यत इति। इक इत्यस्य जसन्तस्य विशेष्यस्यानुरोधात्। पञ्चम्याः पूर्वत्र कृतार्थत्वात्। विकल्पसिद्धिरिति। शाकल्यग्रहणसिद्धस्य विकल्पस्य सिद्धिरित्यर्थः। तदसम्बन्ध इति। प्रकृतेत्यस्यासम्बन्ध इत्यर्थः। आवश्यकत्वेनेति। उत्तरसूत्रेऽवश्यन्तथा वक्तव्ये पूर्वसूत्र एव तथास्त्विति भावः न च ह्रस्वाभावे प्रकृतिभावार्थश्चकारोऽस्त्विति वाच्यम्। भाष्यप्रामाण्येन ह्रस्वप्रकृतिभावयोरेकत्रैव प्रवृत्तेः स्वीकारात्। यत्रैकस्याभावस्तत्रापरस्याप्यभावाङ्गीकारात्। तथा सति चक्री अत्रेत्यस्यासिद्धिरत आह। चक्री अत्र इति। इतिवार्त्तिकमिति। सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्य इतिवार्त्तिकखण्डनिर्देशः। इति णसिति। पर्शूनां समूह इत्यर्थे इत्यादिः। पदत्वमिति। तेन गुणाभाव इति भावः। बह्वृच्छक इति। अत्र बहुजवयवोकारस्यापदान्तत्वं सुलभमेव। एतेन। बह्वृच्छक इत्यस्य व्यावर्त्यस्य लाभेन॥ व्याख्यानादिति॥ पूर्वसूत्रप्राप्तियोग्यस्यैवोदाहरणस्य भाष्ये उपन्यासमूलकात् सित्साहचर्यमूलकाद्वा व्याख्यानादित्यर्थः। प्रथमोपात्तेति। लोके प्रथमोपात्ते एव प्रथमज्ञिज्ञासो-

दयस्यानुभवसिद्धत्वात्। यत्रातिसम्भाषत इति। एवञ्चाशीर्वचनमत्यभिवाद इत्येव न किन्तु यद् गुर्वादिर्वक्ति स्वीयानुग्रहसूचकवाक्यमात्रमाशीर्वचनरूपङ्गलप्रश्नरूपं वा तत्सर्वमत्यभिवादशब्दबोध्यमिति भावः। विधेयत्वादिति। सम्बोध्यतावच्छेदकत्वेनाभिमतो यो धर्मस्तदवच्छिन्नस्य यत्र सिद्धत्वन्तत्रैव सम्बोधनविभक्त्यङ्गीकारात्॥ भवेत्यस्याप्युपलक्षणमिति। आयुष्मान् भव सौम्येति वाचो विप्रोऽभिवादनइति मनुसम्वादात्। नन्वेधीतिप्रयोगस्तर्हि निर्मूल एवेति चेत्। मनूक्तौ भवेतियत्तदर्थपरमित्यभिप्रायात्। अत्रैव किंप्रमाणमिति चेत्। आयुष्मानेधि अग्निभूता इ इत्यनुपदमुदाहरिष्यमाणभाष्यप्रयोग एवेति गृहाण। शर्मान्तवामेति। यत्र शर्मादिप्रयोगस्तत्र तस्य तदवयवत्वन्न तु तदन्तमेव नाम। उक्तभाष्यप्रयोगस्यैवात्रापि मानत्वादिति भावः। स्त्रियां अपीति। तद्विषये तथैवोदाहृतत्वात्। नामगोत्राभ्यामेवेति। असौ नामाहमस्मीति स्वनामपरिकीर्त्तयेदिति मनुवचने नामपदङ्गोत्रस्याप्युपलक्षणम्। प्रत्यासत्त्येति। वाक्यसम्बन्धिटित्वसिध्यर्थमेतस्य वाक्यान्तत्वम्। भोशब्दस्याप्राप्त इति। अस्य नामगोत्रभिन्नत्वात्॥ दूरत्वस्यानियतत्वादाह। यावति देश इति प्राकृतेति। स्वाभाविकेत्यर्थः। उपलक्षणमिति। एवञ्चाह्वानाभावेऽपि न क्षतिरिति भावः। तत्र मानमाह। अत एवेति। उक्तार्थाङ्गीकारादेवेत्यर्थः। समावेश इति। लघुगुरुसंज्ञे वर्णस्य नदीघिसंज्ञे तु तदन्तस्येति समावेशसिद्धिः। अवाक्डारसूत्र इति पाठे रैफान्तानुकरणादागन्तुनाऽकारेण निर्देशो बोध्यः। केवलाभ्यामपीति। यत्र नामग्रहणस्यात्मनामेत्यादिना निषेधस्तत्रागच्छ हे इति प्रयोगदर्शनादित्यर्थः। न चैवमपि हेशब्दस्य समव्याहृतपदगतशक्त्युद्बोधकत्वरूपद्योतकत्वस्यानुपपत्तिः समभिव्याहृतस्य तादृशस्य पदस्याभावादिति वाच्यम्। प्रादेशं विमाय परिलिखतीत्यर्थे विद्यमानस्य वाक्यैकदेशन्यायेन प्रादेशं विपरिलिखतीत्यस्य तादृशार्थबोधकत्वेन तद्घटकस्य विशब्दस्य यथाश्रुतविमानक्रियाजनकत्वव्यवहारस्तथाऽत्रापि स्वघटितायग्रहणयोग्यनामघटितवाक्यार्थे आगच्छ हे इत्यस्य वर्त्तमानत्वेन द्योतकत्वोपपत्तेः एवञ्चेदं सूत्रं नियमार्थमिति सिद्धम्। हेहेऽन्त इत्येवमिति। वाक्यस्य टेरित्यधिकारादन्त्यग्रहणमनर्थकमिति न शङ्क्यम्। अन्त्यग्रहणाभावेऽधिकारबलादनन्त्ययोस्तयोः प्लुतस्याप्राप्तौ विध्यर्थमेतत्सूत्रं स्या

दित्याशयात् । हैहयोरिति तु यच्च हैहयोः प्रयोगस्तच्च हैहिसम्बन्धिनोऽनन्त्यस्यापि प्लुतो भवतीति प्लुतयोरेकत्र समावेशस्यादित्येवमर्थम् । प्रयोगग्रहणसत्त्वे तु हैहेप्रयोगे इत्यंशस्यानुवाद्यसमर्पकत्वं हैहयोरित्यस्य च विधेयबोधकत्वमिति निश्चयो भवतीतीष्टसिद्धिः । स्वसिद्धान्तमाह । के चित्त्विति । एकमिति । आद्यमित्यर्थः । प्रयोगे हैहयोरिति निर्देशेऽपि प्रत्यासत्त्या हैहेप्रयोग इति लभ्यत एव । नन्वेवमपि हैहे हैहयोरित्येवास्तु । प्रयुज्यमाने सतीत्यध्याहारेण वाक्यार्थपर्यवसानसम्भवित्वतीत्यत आह । प्रयोग इतीति । प्रयोगग्रहणाभावे दूराद्भूत इत्यस्यानुवृत्त्या ह्रयमानार्थत्वं यच्च तच्चेति कल्पनया हे २ रामेत्यादावेव स्यादिति भावः । अन्यथा । प्रयोगग्रहणस्यानर्थकहैहयोः प्लुतार्थत्वाभावे । तद्वैयर्थ्यं स्पष्टमेवेति । सति तु प्रयोगशब्दे तत्सामर्थ्यादानर्थक्येऽपि यच्च प्रयोगस्तच्च तयोःप्लुतसिद्धिः । अप्राप्ते विध्यर्थमिति । राम हे१ इत्यादौ सामर्थ्यादन्त्यस्य ह्रयमानार्थभिन्नस्य स्यादिति भावः । अत्र के चिदितिदर्शनेनारुचिं कल्पयन्ति यद्यपि सर्वभाष्यकैयटारूढम् । तथापि हैहयोः प्रयोगे इत्यनेन प्रत्यासत्तिन्यायेन षष्ठ्युच्चारणसामर्थ्येन च तयोरेव प्लुतसिद्धया तदर्थमेवेति । अत्रेदश्चिन्तनीयम् । हैहेप्रयोगे हैहेग्रहणङ्क्रियते । हैहयोःप्लुतिर्यथा स्यात् । देवदत्त हे३ । देवदत्त हे ३ अक्रियमाणे हि हैहेग्रहणे तयोः प्रयोगेऽन्यस्य स्यादिति भाष्ये उक्तम् । एतेन हैहयोरित्यस्य प्रयोजनमुक्तम् । भाष्ये हैहेप्रयोगे इत्यत्र प्रयोगपदोपादानात् । अत्र कैयटः अन्यथारभ्यसामर्थ्यादनन्त्यस्यापि ह्रयमानवाचिन एव प्लुतः स्यात् । देवदत्त हे इत्यादौ ह्रयमानवाचिनः देवदत्तशब्दस्य हे देवदत्तेत्यादौ पूर्वेणैव सिद्धिरिति भावः तदनन्तरभाष्ये अथ प्रयोगग्रहणङ्किमर्थम् । प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् । प्रयोगग्रहणेऽनर्थकयोरपि यथा स्यात् । देवदत्त हे ३ । देवदत्त है ३ । पुनर्हैग्रहणङ्किमर्थम् । अयमाद्यविषये प्रश्नः । अनन्त्ययोरपि यथा स्यात् । है३देवदत्त इति । भाष्येऽनर्थकयोरिति यत्तस्यानर्थकत्वमुक्तरीत्या कैयटेनोपपादितम् । अस्मिन्ग्रहके सामर्थ्यादितिकथनेन प्रत्यासत्तिन्यायापेक्षया सामर्थ्यस्य बलवत्त्वं सूचितम् । षष्ठ्युच्चारणसामर्थ्यादित्यपि न युक्तम् । हैहयोरित्यस्याभावे स्थानषष्ठ्यनिर्देशात् । प्रथमोपात्तस्य हैहयोरित्यस्य तु प्रयोगापेक्षया कर्मषष्ठीत्वात्तस्याश्च प्रयोग-

विशेषणभूतार्थप्रतिप्रादकत्वेन चरितार्थत्वादिति । शिव हे इत्यादाविति । अत्र हेशब्दस्य पूर्वोक्तरीत्या ह्रयमानार्थत्वाभावः स्पष्ट एव । ननु सर्वप्लुतप्रकरणस्यायं शेषोऽस्त्वित्यत आह । सर्वप्लुतेति । एतच्चयेति । प्रत्यभिवादेऽशूद्रे दूराद्धूते च हैहेप्रयोग इत्येतच्चितयेत्यर्थः । वृत्तौ स्पष्टमिति । भाष्यन्त्वत्रोदासीनम् । तद्विहितानामिति । एकसूत्रोपात्तत्वात् । व्याख्यानादिति । अपिशब्दस्यानन्त्यसमभिव्याहारेणान्त्यसमुच्चायकतया टेरित्यस्य प्रक्रान्तस्य समुच्चयकल्पने लाघवमित्येतन्मूलकादित्यर्थः । ननु वाक्यस्य टेः प्लुत उदात्त इत्यधिकारात्तत्तद्विधेयप्लुतापेक्षया शेषस्यानुदात्तत्वापत्तिरत आह । अनुदात्तम्पदमितीति । तत्सूत्रस्थैकग्रहणेन चैपादिकोदात्तस्वरितयोरग्रहणादिति भावः । व्यवस्थितविभाषेति । अत्र मूलम्प्रागुक्तम् । भाष्ये तु प्राचामिति योगविभागो नोक्तः किन्तु विभाषेति कृतस्तेन प्राचामिति योगविभागेन सर्वस्य प्लुतस्य वैकल्पिकत्वलाभेपि प्राचामुदीचाञ्च स्वस्वमतप्रच्युतिरूपो दोषो न सम्भाव्यत इत्याशयेनाह । भाष्ये त्विति । कैयट इति । न चास्याव्यवस्थितविभाषात्वङ्गीकृतो भाष्यकृता नोक्तमिति वाच्यम् । प्रत्याख्यानेन भाष्यकृता तथा सूचनादित्याह । अत एवेति । व्यवस्थितविभाषात्वादेवेत्यर्थः । प्लुत इत्यध्याहार इति । अन्यथोहेश्याकाङ्क्षाशान्त्यभावेन वाक्यार्थपर्यवसानन्न स्यात् । स निवर्त्तेत इति । न च पर्युदासपरतया व्याख्याने प्लुतसदृशो दीर्घः स्यात् । अच्त्वेन सादृश्याश्रयणे प्रथमोपस्थितत्वाद् ह्रस्वो वा स्यादिति वाच्यम् । प्लुतश्रवणाभावे तात्पर्यात् । जायमानो दीर्घो वा ह्रस्वो वा उभयथा सन्धिकार्येण तस्य निवृत्तिः स्यादिति फलतो न विशेष इत्याशयः । कस्य चिद्व्याख्यानन्दूषयति । प्रसज्यप्रतिषेधेति । अग्नी इतीति । अत्र गुरोरनृत इति प्लुतः । अत्र वत्करणाभावेऽप्लुतादेशे सवर्णदीर्घापत्तेः । वत्करणसत्त्वेऽपि यत्नेन चित्कृतं व्याख्यानन्दूषयति । अप्लुतवदित्यस्येति । ननु प्लुतस्य प्रगृह्यत्वन्दुर्लभमोदूदेदिति सूत्रे दीर्घाणामेव समाश्रयणात्तेषाञ्चानण्त्वात् । न हि पूर्वप्रवृत्तम्प्रगृह्यत्वं स्थानिवद्भावलभ्यमल्विधित्वादत आह । प्लुते कृतेपीति । न ह्यत्र लक्ष्ये लक्षणं सकृदेव प्रवृत्तम्भवतीति पुनः प्रगृह्यत्वस्यादिति शङ्क्यम् । संज्ञायाः कार्यार्थतया कार्यस्य प्रकृते प्लुतोत्तरम्प्राप्तया पुनः प्रवृत्तिस्वीकारात् । तस्यासिद्धत्वादिति । प्लुतस्यासिद्धत्वादित्यर्थः । विभा-

षाग्रब्दस्याव्ययत्ववादिमतनिरासायाह । विभाषेत इति । नवेत्ति विभाषायामर्थस्य संज्ञाकरणमिति भाष्यप्रयोगोऽप्यानुकूल्यः । ईचाक्रवर्मणस्येति सूत्रस्योभयत्र विभाषात्ववादिमतन्दूषयति । भाष्ये त्विति ॥ अभावांशबाधकत्वादिति । न च सूत्रबाधकत्वादिति वक्तव्ये इदमनुपपन्नमिति वाच्यम् । भावांशविधाने पूर्वोत्तरयोर्द्वयोरपि समत्वेनाभावांशबाधे सूत्रबाधस्यैव पर्यवसन्नत्वादिति भावः । एवञ्चानुपस्थितार्थमेवेदं सूत्रमुभयत्र विभाषेयमितिमूलस्य त्वयमर्थः । उभयत्र निमित्तद्वये । तदाह । मूलन्त्विति । कथञ्चिदिति । प्राप्ताप्राप्तविभाषायामेव तादृशशब्दप्रयोगस्य शिष्टसम्मतत्वात् ॥ अत्र कैयटानुयायिनः । वस्तुतः पूर्वविप्रतिषेधकल्पने गौरवप्रसङ्गादनुपस्थितार्थमिति भाष्यस्य तदर्थमपीत्यर्थ उचितः ॥ तच्च ईग्रहणेन नार्थः अविशेषेण चाक्रवर्मणस्येत्यादि तदुत्तरभाष्ये चाविशेषेत्यस्य स्वान्त्यांशे निमित्तांशे चेत्यर्थात्कैयटमतस्य सयुक्तिकमिति ॥ इदमवधेयम् । विप्रतिषेधसूत्रे परशब्दस्येष्टवाचकत्वात्सर्वेषां पूर्वविप्रतिषेधानां सङ्ग्रहीतत्वात्तस्य कल्पनायान्नाधिक्यकल्पना । अनुपस्थितार्थमिति भाष्यस्य तदर्थमपीत्यध्याहारेण व्याख्यान एव गौरवम् । किञ्च यदोत्तरसूत्रे ईग्रहणन्नास्ति तदा येन नाप्राप्तिन्यायेन पूर्वसूत्रस्योपस्थिते विकल्पबाधकत्वस्यैव लाभादपिशब्दपूरणेन भाष्यव्याख्यानन्न्यायविरुद्धमिति ॥ ननु योगस्य सूत्रस्य बोद्धव्यतया द्वयमिति स्त्रीलिङ्गनिर्देशोऽनुपपन्न इत्यत आह । उद्देश्येति । ऐक्यमापादयत् । ऐक्यबोधयत् । यस्मादर्थबोधयितुं यच्छब्दः पूर्वमयुक्तस्यैव तत्पदेन तत्समानविभक्तिकेन बोधनस्यानुभवसिद्धत्वात् ॥ उद्देश्यलिङ्गत्वं यथा । यद्यत्यापन्नतिजहि जगन्नाथ नम्रस्य तस्य इत्यादावुद्देश्यलिङ्गत्वस्य णेरणाविति सूत्रेऽणौ यत्कर्मणि चेत्तत्कर्मेति कर्मण उद्देश्यस्य परामर्शार्थमुपात्तस्यापि यच्छब्दस्य स कर्तेत्यत्र पुल्लिङ्गता दृश्यते ॥ ननु द्विवचनसंज्ञायाः प्रत्ययबोधकतया प्रत्ययग्रहणपरिभाषया तदन्तग्रहणापत्तिरित्यत आह । सं ज्ञाविधाविति । नन्वनाङिति पर्युदासवत्ते नार्थवत एव ग्रहणान्न प्रत्ययेऽतिप्रसङ्ग इत्यत आह । प्रत्ययस्येति । स्वातन्त्र्येण प्रयोगार्हत्वविशिष्टार्थवत्त्वन्तु वक्तुमशक्यम् । आङो द्योतकतया तस्याप्यतथात्वात् । पर्युदासवत्तञ्जन्यार्थवत्त्वाभिप्रायेण शङ्कायामयमर्थः । एतेन । वर्णग्रहणेऽर्थवत्परिभाषायाः प्रकृत्यभावेन प्रकृतेऽर्थ-

वदृग्रहणविचारासङ्गतिरित्यास्ताम् ॥ अन्तरङ्गत्वादिति । यद्यपि कर्मधारयबहुव्रीह्योरेकार्थीभावः समानः । तथाप्यजहत्स्वार्था वृत्तिरिति पक्षेऽवयववृत्तिग्रहसहकारेणैव समुदायग्रहणा बोधात्कर्मधारयजन्यशाब्दबोधसामग्र्यपेक्षया बहुव्रीहिजन्यशब्दसामग्र्या अन्यपदार्थोपस्थितिघटिततया गुरुत्वेन सामग्र्योर्लाघवगौरवमादाय कार्ययोरन्तरङ्गत्वबहिरङ्गत्वबोध्यम् ॥ नन्वेवमेकशब्देन क्वापि बहुव्रीहिर्न स्यादेवञ्चैकाचो हे प्रथमस्येत्यादावप्यनुपपत्तिरत आह । व्याहरतीति । एवञ्च व्याहरतीतिनिर्देशात्कर्मधारयस्य हलादिः शेष इति सूत्रारम्भाद्बहुव्रीहेः प्रामाणिकत्वेऽपि प्रकृतेऽनेन निर्देशेन कर्मधारय एवेति भावः । पर्युदासस्यौचित्यात् । असमर्थसमासाक्षमत्वादेकवाक्यतया शाब्दबोधजननाच्च । ओदिति सूत्रे प्रतिषिद्धार्थोयमारम्भ इति भाष्यन्तु गम्यमानप्रतिषेधमादायोपपादनीयः । न्यायसिद्धे लिङ्गमप्याह । अत एवेति । पर्युदासस्याभिप्रेतत्वादेवेत्यर्थः । एतत्पक्षेऽङ्गते । वासुदेवेत्यादि । सति प्रगृह्यत्वेऽव्ययीभावसंज्ञकस्याग्रशब्दस्याम्शब्दावयवाकारे प्रकृतिभावापत्तिः । न च पर्युदासपक्षे आङि न सूत्रव्यापार इति पूर्वान्तवत्त्वेन निपातत्वेऽपि आङ्नातिदेशो न भविष्यतीति वाच्यम् । आङ्भिन्नत्वरूपोद्देश्यतावच्छेदकधर्मज्ञानप्रतिबन्ध्यर्थमेवाङ्त्वातिदेशः स्यात् । अत एव ओदिति सूत्रस्थ ओषु यातमित्यत्र प्रयोजनङ्गथितम् । अन्यथा तत्राप्याङ्त्वातिदेशाभावेनानाङितिनिषेधाप्राप्त्या भाष्यासङ्गतिः स्पष्टैव । पर्युदासलभ्यशास्त्रीयेपि शास्त्रीयवत्कार्यस्योपपादितत्वाच्च ॥ न च आ ओ इत्यवैकादेशे कृते आङ्भिन्नत्वस्योकारनिष्ठस्यातिदेशेन निपात एकाजित्येव सिद्धे प्रतिषिद्धार्थोयमारम्भ इति भाष्यमेवमप्यनुपपन्नमिति वाच्यम् । आङ्भिन्नत्वस्याशास्त्रीयत्वेनातिदेशालभ्यत्वात् । शास्त्रीयत्वञ्च न शास्त्राश्रितत्वम् । किन्तु शास्त्रबोध्यत्वमेवेति ॥ स्पष्टार्थमिति । निपातस्यैकाचः सर्वस्य सङ्ग्रहो यथा स्यात् । आङ्सदृशस्यैकाचोऽर्थवतो निपातस्यैव पर्युदासबलाद् ग्रहणमाभूत् । अनेन रूपेण सादृश्यग्रहणे हि पादपूरणार्थकस्य कमीमिदु इत्यस्य व्याहृत्तिः स्यात् । समुदायेऽच्त्वाभावादिति । अच्त्वस्य प्रत्येकपर्याप्तत्वात् ॥ अनभिमतत्वमिति । लक्ष्यते इति शेषः ॥ ननु गोभवदित्यादौ च्व्यन्ते ओदिति सूत्रेण प्रगृह्यत्वमाप्नोतीत्याशङ्क्य गौणमुख्यन्यायेन समाहितं भाष्ये तच्च तदा सङ्गच्छते

यदि गौणमुख्यन्यायमूलभूताया अर्थवद्ग्रहणपरिभाषाया विशिष्टरूपोपादानविषयायाः प्रवृत्तिः स्यादतस्तस्याः प्रवृत्तिमुपपादयति । निपातसंज्ञे त्यादि । अर्थवतामेवेति । अर्थविशिष्टानाञ्चादीनामुद्देश्यतयोपस्थितत्वात्॥एतत्परिभाषेति। गौणमुख्यपरिभाषेत्यर्थः॥ अनित्यत्वादिति ॥ इणः षीध्वमिति सूत्रेऽङ्ग्रहणादित्युपादानेनार्थवत्परिभाषाया अनित्यत्वस्य ज्ञापितत्वात्तन्मूलिकाया गौणमुख्यपरिभाषाया अप्यनित्यत्वमिति । अव्ययसंज्ञादाविवादिना प्रातिपदिकसंज्ञापरिग्रहः । ननु सम्बुद्धौ प्राक्तस्यस्येत्यस्मिन् सूत्रे सम्बुद्धाविति सप्तमीश्रवणेन तस्मिन्निति परिभाषाबलात्सम्बुद्धिपरो य ओकार इत्येव व्याख्यानं युक्तमत आह । सम्बुद्धिपर इति । न च लक्षणप्रतिपदोक्तपरिभाषानुग्रहाय तस्मिन्निति परिभाषानुग्रहाय च तथैव व्याख्यानं युक्तमिति वाच्यम् । लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वात्। निर्दिष्टपरिभाषापि लक्ष्यानुसारात् क्व चिच्छ्रज्यते ॥ न च लुनातीति लौः । पुनातीति पौः । अत्र हि गोतो णिदिति सूत्रे गोत इति यथाश्रुतमिति मते सम्बुद्धौ लो पो इति रूपम् । गकारस्याविवक्षितत्वे तु लौः पौरिति तदा हे गौरित्यत्रैव स्थानिवद्भावाद्भसंज्ञाप्राप्तिः लो पो इति विजन्तस्य रूपं सम्बुद्धिपरं सम्भवति । सम्बुद्धिनिमित्तक इति व्याख्याने त्वेतदवयवोकारस्य सम्बुद्धिनिमित्तकत्वाभावाल्लौ इति पौ इतीत्यत्र प्रगृह्यत्वप्रयुक्तः प्रकृतिभावो न स्यादिति वाच्यम् । अचः परस्मिन्निति सूत्रस्थभाष्यप्रामाण्येन ने लो पो इत्यादीनां विजन्तानामनभिधानात् । तत्र हि पूर्वविधाविति किमर्थम् । हे गौः । बाभ्रवीयः । नैधेयः । हे गौरित्योकारः परनिमित्तकस्तस्य स्थानिवद्भावादेङ्ङ्खादिति लोपः प्राप्नोति । पूर्वविधाविति वचनान्न भवति । नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति न सम्बुद्धिलोपे स्थानिवद्भावो भवतीति । यदयमेङ्ङ्खात्सम्बुद्धेरित्येङ्ग्रहणङ्करोति । नैतदस्ति ज्ञापकम् । गोर्थमेतत् स्यात्। यत्तर्हि प्रत्याहारग्रहणङ्करोति । इत्यरथा हि ओङ्खादित्येव ब्रूयादित्युक्तम् ॥ अत्र कैयटः । नयत्यादीनां विजन्तानां गुणे ने लो पो इति कथं सम्बुद्धिलोप इति चेन्नैतेभ्यो विज् दृश्यते इत्याह । ओङ्खादित्येवेति । सेस्मृतोग्रब्दादाषष्येवम् । नैतेभ्य इति । एवन्दीर्घैकारान्तप्रकृतिकसेत्यादीनामेकाक्षरकोशबोधितस्य ए इत्यस्य च सम्बुद्धावभिधानाभावो बोध्यः । अत्रेदमवधेयम् । ओङ्ख-

ङणस्य भाष्य ज्ञातत्वेन दीर्घोकारान्तप्रकृतिक ओकारान्तानामभिधाने मा
भावः। किञ्च द्योशब्दस्य सर्वसम्मततत्वेन गोर्थमेतदिति भाष्यमोकारान्तोपल
क्षणतया व्याख्येयम्। किञ्च सम्बुद्धावनभिधानेन भाष्यस्योपपत्तौ सर्वथा विज
यकल्पना नोचिता। एवं सति सम्बुद्धौ शाकल्यस्येति सूत्रस्य सम्बुद्धिनिमित्त
ओकार इति व्याख्यानमपि न विरुध्यत इति॥ ननु चिन्तु सम्बुद्धिग्रहणमत्र
नेऽनर्थकम्। न चाङो इतीत्यादौ परत्वादिकल्पाभावार्थमिति वाच्यम्।
दिति पूर्वसूत्रविहितनित्यसंज्ञाया अपरनिमित्तकत्वेनान्तरङ्गत्वात्। इतिग्र
सापेक्षत्वेन परभूतविकल्पस्यैव बहिरङ्गत्वात्। न च पूर्वसूत्रस्थमोत्पदस्यिप
पदसम्बन्धमभूदिति प्रकृतसूत्रे निपातपदासम्बन्धबोधकं सम्बुद्धिपदमिति
व्यम्। यद्येतावन्मात्रप्रयोजनकं सम्बुद्धिग्रहणन्तदा प्रकृतसूत्रेप्योदग्रहण
र्तव्यन्तेन निपातपदामनुवृत्तिर्भविष्यत्यन्यथौत्पदानुवृत्त्यैव सिद्धे प्रकृतस
ओदित्येतत्पदं व्यर्थमेव स्यादितिकल्पनसम्भवादित्याहुः। अचेदमस्तत्त्वम्। स्व
दिषु पठिते मिथो इत्यभ्यये प्रगृह्यत्वाभावो यथा स्यादित्येवमर्थं सम्बुद्धिग्रह
मिति। उञ ऊमित्येकमेव सूत्रमस्तयोगाविभागेन व्याख्यातमुञ इति। मिप
एवेति। प्रतिपदोक्तत्वात्। योगविभागफलन्दर्शयति। उञ ऊमित्येकसूत्रत्व
ति। सङ्ग विधानादिति। यद्यपि विधेयभेदाद्वाक्यभेदो न्याय्य एव तथापि
योर्वाक्ययोः सङ्गप्रवृत्तिः स्यादित्याशयः। एवं सत्यादेशे प्रगृह्यकार्यङ्कथमत ह
ह। आदेशे प्रगृह्यत्वकार्यन्त्विति। ननु उ तौ इतीति। विधेयतया प्रक्रान्तयं
र्द्वयोरेवैकस्मिन् प्रयोगे विकल्पः स्यादिति। तदभावेऽपि तात्पर्यादिति। शाक
ल्यातिरिक्तमते प्रगृह्यत्वमुञो नेत्यर्थात् योगविभागे सति उञ इति सूत्रे षष्ठ
न्तार्थान्वयायाह। उञो वाचकमिति। उञ इति सूत्रे विकल्पफलन्दर्शयति
विकल्पाननुवृत्ताविति। न च योगविभागाभावेऽपि निरनुबन्धकोकारमादा
उ इति रूपं सिध्यत्येवेति वाच्यम्। किमः परत्वं यच्च तच्च किम्त्विति किमु
तीति रूपद्वयञ्च स्यादित्यत्र तात्पर्यात्। वैयर्थ्यापत्तिश्चेति। अनुनासिकाननुना
सिकयोर्द्वयोरप्यादेशे रूपे विशेषाभावादिति भावः। विकल्पमात्रेति। शाक
ल्यशब्दमात्रस्येत्यर्थः। प्रगृह्यत्वमादेशस्येति। उञ इति पूर्वसूत्रेण प्रगृह्यत्व
इत्यनेन चादेशत्वमित्यर्थः। ननु प्रगृह्यपदस्योद्देश्यसम्बन्धस्य लुप्तषष्ठीकत्वेन पूर्व

पपादितरीत्या विशिष्टस्य विधिरिति न युक्तमिति चेन् मूलानुसारेण तथाभिधानादित्याशयेनाह। वस्तुत इति। नन्वेवम्प्रगृह्यसंज्ञकश्चेति भाष्यविरोध इत्यत आह। भाष्ये प्रगृह्यसंज्ञकश्चेति। न्यायविद इति। असति साधके क्लृप्तसम्बन्धित्यागो मानाभाव इति न्यायेत्यर्थः। न च प्रगृह्यपदस्य प्रथमान्तत्वेन प्रथमान्तेन सामानाधिकरण्यमेवाच साधकमिति वाच्यम्। प्रथमान्तसामानाधिकरण्यस्य पूर्वसूत्र एव त्यक्तत्वात्॥ ननु मय उञ इति सूत्रे मयपदेन मयधातोरेव ग्रहणं कुतो नेत्यत आह। व्याख्यानादिति। बहुलञ्चसंस्कारानुरोधमूलकादित्यर्थः। ननु प्रगृह्याश्चोञः प्लुतप्रगृह्या इत्यनेन कार्यान्तरप्रवृत्तिप्रतिबन्धकेन मय उञ इत्यस्यापि प्रवृत्तिप्रतिबन्धः कुतो नेत्यत आह। अस्य चेपादिकत्वेनेति। अनुस्वारो भवत्येवेति। एतेन चिपाद्यां वत्वविधानस्यानुस्वाराभावः फलमिति सूचितम्। तदुक्तम्मनोरमायाम्। प्रकृतिभावमात्रबाधनार्थत्वे हि इको यणित्यनन्तरं मय उञ इत्येवावक्ष्यत्। यणश्चान्यवर्त्तयिष्यदिति। न च चिपाद्यामयः परस्य उञो वत्वविधानेऽपि मयः परत्वमुपजीव्य कृतं वत्वं सन्निपातपरिभाषयाऽनुस्वारनिमित्तञ्च भविष्यतीति चिपाद्यां वत्वविधानस्यानुस्वाराभावरूपप्रयोजनकथनासङ्गतिरिति वाच्यम्। चिपाद्यान्तथा पाठेन सन्निपातपरिभाषाया अनित्यत्वस्यापि ज्ञापनात्। न च चिपाद्यान्तथा पाठे वत्वस्यासिद्धत्वात्प्रत्यङ् उ उक्तमिति स्थिते ङसुटि कृते ङसुड्विशिष्टस्य उञ्ग्रहणेन ग्रहणेपि निर्दिश्यमानस्य ङसुटा व्यवधानाद्वत्वस्याप्राप्तिः। इको यणचीति सूत्रानन्तरम्पाठे तु ङसुटोऽसिद्धत्वाद्वत्वे कर्तेऽजादित्वाभावान् ङसुटोऽप्राप्तिरिति फलभेदस्य स्पष्टतया कथं सन्निपातपरिभाषाया अनित्यत्वज्ञापनमिति वाच्यम्। चिपाद्यामपि बहिरङ्गपरिभाषाप्रवृत्तिवादिप्राचीननयेऽन्तरङ्गे ङसुटि कर्त्तव्ये बहिरङ्गस्य यणादेशस्यासिद्धतया पूर्वं ङसुटि फलभेदाभावात्। न चोभयोरपि पदद्वयसापेक्षत्वेन नान्तरङ्गबहिरङ्गभाव इति वाच्यम्। पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वस्य ङसुटि सत्त्वात्। न चान्तरङ्गपरिभाषाप्रवृत्तिस्वीकारे किम्ब्रूत्रमित्यत्रान्तरङ्गेऽनुस्वारे बहिरङ्गस्य यणादेशस्यासिद्धतयाऽनुस्वाराप्राप्तिरिति कौमुदीमनोरमाग्रन्थयोर्विरोध इति वाच्यम्। मान्तपदसमुदायसापेक्षत्वेनपदसंज्ञासापेक्षत्वेन चानुस्वारस्यापि बहिरङ्गत्वात्। प्राचीननये बहुपे-

च्चस्य बहिरङ्गत्वं च स्पष्टमेव । वस्तुतः सन्निपातपरिभाषाया अनित्यत्वज्ञया-सयोरिति निर्देशात् क्लृप्तमेव । बहिरङ्गपरिभाषापि त्रिपाद्यान्न प्रवर्त्तत इति त्वसकृदावेदितमेव । तपरत्वमसन्देहायेति । न च गुणभेदकत्वपक्षे तथात्वेऽपि भेदकत्वपक्षे गुणान्तरयुक्तसङ्ग्रहार्थन्तपरत्वमावश्यकमिति वाच्यम् । अस्य ग्रन्थस्याभेदकत्वपक्षाभिप्रायकत्वात् । ङ्झल्भान्ताभ्यामिति । अस्य यरस्येति शेषः । तदावश्यकमिति । अर्थग्रहणमावश्यकमित्यर्थः । वैजात्येत्यस्य प्रकृतसूत्रे इत्यादिः । असम्भवादिति । ऊकारान्तसप्तम्या असम्भवादित्यर्थः । अनभिधानमेवेतीति । प्रकृतसूत्रस्थभाष्यप्रामाण्यात्तथा कल्प्यत इति भावः । तत्संसृष्टार्थेति । पूर्वपदार्थसंसृष्टाऽधेयार्थवृत्तेरित्यर्थः । एतदुपपादयति । संज्ञायामिति समास इति । जहत्स्वार्थायां वृत्ताविति । जहत्स्वं यं स जहत्स्वस्तादृशोऽर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिः । अत्र स्वशब्द आत्मीयवाची । अर्थस्य चात्मीयः शब्द एव । एवञ्च वृत्तेः पूर्वं यदर्थसम्बन्धी यः शब्दस्तस्माद्यत्र वृत्तौ सोऽर्थो न प्रतीयते किन्तु समुदायशक्त्या अर्थान्तरस्यैव प्रतीतिस्तत्र जहत्स्वार्था वृत्तिरित्युच्यते । वस्तुतस्तु साऽत्र न युक्ता जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीत्यभियुक्तोक्तेः । यथा कुशलप्रवीणादिशब्दे । वाप्यश्व इत्यत्र तु रूढेरभावान्न जहत्स्वार्थता युक्ता । किन्तूपसर्जनपदं स्वार्थमजहत्स्वरार्थमप्यभिधत्ते । भिक्षुको द्वितीयाभिक्षामासाद्य न पूर्वां जहाति सञ्चयायैव प्रवर्त्तते इति भाष्यात् । एवञ्च वाप्यश्व इत्यत्र वापीपदं वाप्यधिकरणकाश्वपरमिति सप्तम्यर्थमात्रे पर्यवसन्नत्वाभावान्न प्रगृह्यसंज्ञा । अर्थग्रहणसामर्थ्याच्छ्रूयमाणायां सप्तम्यां यथा आधेयासंसृष्टाधिकरणप्रतीतिर्भवति तथा लुप्तायामपि तस्यामाधेयासंसृष्टाधिकरणप्रतीतिर्यत्र तत्रैव प्रगृह्यत्वस्वीकारादिति । ननु सोमो गौरी अधिश्रित इत्यत्र गौरीपदस्य विरुद्धविभक्तिरहितनामार्थयोरभेदान्वयस्यौत्सर्गिकतया गौर्यधिकरणके लक्षणास्वीकारान्नाधेयासंसृष्टाधिकरणप्रतीतिरत आह । गौरी अधिश्रित इत्यत्रेति । एवञ्चोभयोर्विरुद्धविभक्तिरहितत्वेऽपि कारकस्य क्रियायामन्वयस्यावश्यकत्वेन गुणीभूतक्रियायान्तदन्वयेन वाक्यार्थस्योपपत्तौ लक्षणायामानाभाव इति भावः । नित्याधिकारबाधे मानाभावादिति । यस्य नित्याधिकारे पाठस्तत्र विभाषाधिकारबाधो न चात्र तथेति । व्याख्यानादिति ।

अप्रगृह्यस्येति पर्युदासाद्वलान्नानुनासिक्यादेशयोग्यत्वं पराण्सङ्ग्रहार्थत्वे त्वज्ग्रहणमेव कुर्यादित्यण्ग्रहणसामर्थ्यमूलकादित्यर्थः ॥ आगच्छतमग्नी इत्यत्र प्रगृह्यस्याप्राप्तिमाशङ्क्य पूर्वं प्रगृह्यसंज्ञायामपि समाधत्ते । आगच्छतेति । कार्यमेव बीजमिति । न च लक्ष्ये लक्षणसत्येतिन्यायविरोध इति वाच्यम् । समः सुटीति सविधानज्ञापितस्य ज्ञापकसाजात्येन तस्य संज्ञातिरिक्तविधेयपरत्वस्वीकारात् । ननु प्रगृह्यसंज्ञोद्देश्ये ईकारे तर्हि द्विवचनत्वमपि न स्यादत आह । द्विवचनत्वन्विति । ननु परादिवद्भावेनापि ताद्रूप्यातिदेशो नेत्यत आह । ताद्रूप्येति । ताद्रूप्यस्य वर्णमात्रवृत्तिधर्मस्यानतिदेशेपि तद्धर्मस्य वर्णवृत्तिधर्मस्यातिदेशस्वीकारात् द्विवचनत्वञ्च न वर्णमात्रवृत्तीति भावः । एतदेव द्रढयति । अत एवेति । सुब्धस्यात्र वर्णवृत्तित्वेऽपि तस्य वर्णमात्रवृत्तित्वाभावेनान्तादिवत्वे त्यनेनातिदेशो भवत्येव ॥ अच्सन्धिरित्यत्राच्पदे कुत्वस्य चयोगे शुत्वस्याप्राप्तप्रार्थमाह । सिद्धमनच्त्वादितीति ॥ यत्तु संज्ञात्वभङ्गापत्तेर्नेह कुत्वशुत्वे इतीति । तन्न । प्रत्याहारेऽनुबन्धानाङ्क्यमज्ग्रहणेषु नेत्यत्र वार्त्तिके जग्त्वस्य एषा ह्याचार्यशैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति अचोऽञ्णुद्धलो द्धल्ष्विति भाष्यप्रयोगेऽक्ष्विति दर्शनेन संज्ञात्वभङ्गस्याकिञ्चित्करत्वात् ॥

॥ इति स्वरसन्धिः ॥

स्तोःश्चुना ॥ अच समाहारद्वन्द्वे नपुंसकत्वापत्तिः । इतरेतरयोगे द्विवचनापत्तिरत आह । सितीति । न च समाहारद्वन्द्व एवास्तु सौचत्व पुंस्त्वमस्तु । न ह्यत्र गौरवम् । भिन्नविभक्तिकत्वेऽपि सौचत्वेनैव विभक्तिलुकः कल्पनादिति वाच्यम् । समाहारद्वन्द्वे सौचत्वेन पुंस्त्वस्य कल्पनायां स नपुंसकमिति शास्त्रस्य बाधकल्पनापेक्षया विभक्तिलुक्कल्पनायां सुपां सुलुगिति शास्त्रप्रवृत्तिकल्पनायां लाघवादित्याशयात् । स्तोः श्चुना श्चुरितिसूत्रे द्वन्द्वो यूनेतिवद्विनापि तद्योगग्रहतीया । श्चुना योगः सम्बन्धः स चाव्यवधानरूप एव ग्राह्यः । बहुषु बहुवचनमितिनिर्देशात् । ष्टुनेत्यत्रापि तथा । पूरणगुणसुहितेति निर्देशात् । तथा च संयोग एव पर्यवसानमित्याशयेनाह । संयोग इति तदर्थ इति । ननु पदस्येत्यस्याधिकृतस्य स्तोरितिविशेषणमिति पदान्तयोः सकारतवर्गयोरित्यर्थोऽत्र उचित इत्यत आह । अत्र पदस्येत्यधिकृतमपी-

ति। ग्रादिति ज्ञापकादिति। तादृशार्थस्याभिप्रेतत्वे विश्वः प्रश्न इत्यत्र सुत्वा-प्राप्त्या तदर्थमेव स्यादिति भावः। ग्रादितिलिङ्गादेवेति। न ह्येकेनैकमेव ज्ञाप्यते किन्तु यावता विनानुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वात्। यथासङ्ख्यमिति शेष इति। ग्रत्र यथासङ्ख्यस्यान्वयबाधे साधकाभावात्। वैचित्र्यार्थ इति। यद्य-प्येतल्लक्ष्यतावच्छेदकाक्रान्तन्तथापि तयोरत्राप्रवृत्तावपि सच्चिदित्यस्य सच्चि-रिति सूचनमेव वैचित्र्यम्। लक्ष्यतावच्छेदकाक्रान्ते लक्षणप्रवृत्तेर्न्याय्यत्वानु-सरणेन तु चुत्वस्यासिद्धत्वादित्यादुरुक्तिः। सम्प्रसारणाभाव इति। न चानेन निर्देशेनैव सुत्वाभावस्यापि सिद्धौ ग्रादिति सूचयिष्यमिति ग्रङ्गम्। तस्य वि-श्व इतिप्रयोगार्थत्वात्। न ह्येकमुदाहरणमिति न्यायस्याच न विषयता। पूर्वो-क्तज्ञापनस्यापि तत्फलत्वात् ग्रष्टार्थमिति। न चान्तग्रहणाभावे पदत्वेन ग्रह-णात्समर्थपरिभाषोपस्थितिः स्यादिति वाच्यम्। ग्रत्रैव सूत्रेऽनामित्यस्योपादा-नेन समर्थपरिभाषानुपस्थानात्। पदत्वेनोद्देश्यत्वाभावाच्च। पृथक्पदे इति। दिक्शब्दे संज्ञायामितिनियमेन समासाप्राप्तेः। न्यूनतां परिहर्त्तुमाह। उपल-क्षणमिदमिति। वलयोरिति। कमल् ह्रचव् एतयोरभिधाने कमल् मनोरथः। ह्रचव् ग्रांखिनोतीत्यादाविति शेषः। जातिपक्ष इति। स्थानप्रयत्नाभ्यामन्तर-तमे चारितार्थ्येनैव वचनं सफलमिति भावः। व्यक्तिपक्षे तर्हि दोष एवेत्यत ग्राह। व्यक्तिपक्षेऽपीति। सिद्धान्तमाह। परे त्विति। न दोष इति। प्रथमा-न्तपाठे ग्रादेश्यसङ्कोचेऽपि न दोष इत्यर्थः। सवर्णा न सन्तीति। एतेन सवर्ण-ग्रहणाप्रकर्षः सूचितः। उपपत्त्यभावादिति। प्रमाणे इयसजितिसूत्रे प्रमाणश-ब्दस्य परिच्छेदकपरत्वाच्चितः परिच्छेदकत्वासम्भवात्। ननु चिन्मात्रं ब्रह्मेति प्रयोगस्य का गतिरत ग्राह। मयूरेति। ननु यवादिगणे दकारनिपातनादित्य-नुपपन्नम्। तत्र प्रकृतिमात्रपाठस्य तत्स्वरूपप्रतिपत्तौ तात्पर्यादित्यत ग्राह। यवादिगण इति। न च वाऽवसान इति चर्त्वेन निर्देशे कर्त्तव्ये दकारान्तपा-ठो मतुपि विकाराभावार्थ इति कल्पनयैव सामञ्जस्ये समुदायपाठस्वीकारेण मूलयोजनञ्चिन्त्यमिति वाच्यम्। प्रायो गणेषु प्रातिपदिकानुकरणस्यैव सत्त्वेन चर्त्वस्याप्राप्तेरित्याशयात्। समनियतत्वेनेति। त्रयाणाम्परस्परमव्यभिचरित-त्वेन। ग्रन्यतमेति। त्रयाणां यस्य कस्य चिदित्यर्थः। एतेनात्र द्वयोरग्रहणाद-

न्यतमप्रयोगासङ्गतिरित्यपास्तम्। त्रिपाद्याम्परत्वादिति। पूर्वसवर्णस्येत्यादिः। मन्वेवं परेश्च वेति सूत्रे कैयटेनोक्तं यद्यप्येत्सूत्राभावेऽपि झलो झलीत्यनेन सलोपे उत्थानस्य सिद्धिस्तथापि झलादौ प्रत्यये तेन लोप इत्यर्थज्ञापनार्थमेतदिति यत्तर्हि तदिदानीं विरुध्यते लोपपक्षे द्वित्थकाराघटितस्य रूपस्यैव सिद्धिः पूर्वसवर्णे तु झरो झरीति लोपाभावे द्वित्थकारकस्य प्राप्तेरिति चेन्न। तच्च्यकैयटस्य भाष्यसम्मताष्टाध्यायीपाठाभिप्रायकत्वात्। तदेतत्सूचयति। हलो यमामितीति। पाठव्यत्यासे प्रमाणमाह। अत एवेति। अन्यथाचापि यस्यासिद्धत्वाच्चर्त्वाभावे थकारस्य श्रवणप्रसङ्ग इति भावः। उत्थानस्य सिद्धेरिति। न च लोपपक्षे उदो दकारस्य चर्त्वे तस्य द्वित्वे द्वितकारकं रूपम्। सकारस्य शकारादेशे तस्य पूर्वोक्तरीत्या तकारे पूर्वतकारस्य द्वित्वे तकारत्रयस्य श्रवणमिति भेदात्कथमियमाशङ्केति वाच्यम्। एवं विधे विशेषेऽपि न हि व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेष इति न्यायमाश्रित्य शङ्कनात्। विशेषो नेत्यस्य दुर्लक्ष्यो विशेष इत्यर्थः। भयो ह इति सूत्रे भय इत्यस्य षष्ठ्यन्तत्वाज्भयः स्थाने ह इत्युचितमिति विपर्यासनिरासायाह। पदान्तादित्यपीति। तेनैतत्सामानाधिकरण्याय भय इति पञ्चम्यन्तमुत्तरसूत्रे। एवञ्च पूर्वसूत्रेऽपि भय इति पञ्चम्यन्तमर्थाधिकारानुरोधात्। अत एव नाज्झलाविति निर्देशसङ्गतिः। उत्तरसूत्रे भय इत्यस्य पञ्चम्यन्तत्वे फलमाह। विरप्शमित्यादाविति। अत्र विपूर्वोद्रपेरौणादिकः शप्रत्ययः। अत एव। पृथक्पदत्वादेव। परसवर्णपदस्य समासत्वे एकदेशसम्बन्धे क्लेशः। दंशनमित्यादाविति। आदिना कंसेत्यस्य सङ्ग्रहः। शकारसवर्णाप्रसिद्धेरिति। इदन्नाज्झलाविति सूत्रभाष्यात्तस्य पञ्चधा प्रयत्नाङ्गीकर्तुमर्हतेन। तेन दीर्घेकारस्य षाष्टशस्य प्रसिद्धावपि न क्षतिः। शकारसवर्णः शकारो यद्यपि प्रसिद्धस्तथापि स नानुनासिकोऽस्मिन्सूत्रे यरोऽनुनासिक इत्यतोऽनुनासिकपदानुवृत्तेः। अन्यथा कुर्ण् रथेनेत्यत्र परेरेफसवर्णस्य रेफस्यैवानुस्वारस्य स्थाने आपत्तिः स्यात्। अनुस्वारस्यैव स्यादिति। न च स न्यायो यथा न षडित्यत्र त्यज्यते तथात्रापि तत्त्यागोऽस्विति वाच्यम्। तत्र तथा व्याख्यानस्याकरे कृतत्वेन त्यागेऽपि तत्त्यागस्याच स्वीकारे मानाभावात्। तदाह। ध्वनितमिति। तत्र हि मो राजीत्यनुस्वारादिबाधनार्थमित्यु-

क्तम्। अचादिपदोपादानं हे मपर इत्येतत्सूत्रविषये नत्वसङ्ग्रहार्थम्। येन क्रमेण पदज्ञानम्यात्तदुपस्थितिर्वेति। आद्योदाहरणन्तूदीश्वलातुरित्यादि। अत एव स्वतासील्लुटोरित्यत्र यथासङ्ग्रहनिर्वाहः। अन्त्योदाहरणम्परस्मैपदानां णलतुसेत्यादि जातिपक्षे इको यणचीत्यादि च। स्थानाख्येति। स्थानञ्चात्र क्रमः। शत्रुमित्रं विपत्तिश्च जयरक्षयभक्षयेत्यत्र यथा। क्रमेण सम्बन्धो यत्र क्रमेणोच्चारणं तत्र यत्र तु न तथा तत्र न लौकिकप्रमाणावसर इत्याशयेन समाधत्ते। तथापीति। नन्वेवं विलम्बेऽपि लौकिकप्रमाणादेव सिद्धिरत आह। आद्यन्ताविति। साहित्ये द्वन्द्वविधानादिति। इतरेतरयोगेऽपि साहित्यस्यैव प्राधान्यादितिभावः। लोके तु यत्रासमासेनोच्चारणन्तत्रैव क्रमेण सम्बन्धोऽनुभवसिद्धः। अत एवाजाविधनौ देवदत्तयज्ञदत्तावित्युक्ते न ज्ञायते कस्याजा धनञ्चस्यावय इति भाष्ये उक्तम्। अयमाशयः। यद्येवंविधे विषये क्रमेणान्वयः स्यात्तर्हि द्वन्द्वघटकानामेकधर्मावच्छिन्नान्वयित्वाभावेन साहित्यस्यैवानुपपत्तिरिति। वाक्यकल्पनेति। प्राथमिकबोधस्तु साहित्यावच्छिन्ने साहित्यावच्छिन्नस्यैव। यथा राजपुरोहितौ स्वाराज्यकामौ यजेयातामित्यत्र। उत्तरकालिकस्तु राजा स्वर्गकामो यजेत पुरोहितश्च राज्यकाम इति प्रकरणादिवशाद्बोधः। प्रतिपत्तिकालिकम्। प्राथमिकवाक्यार्थबोधकालिकम्। प्रहृत्युपयोगीति। तेन स्वतासी लृलुटोरित्यत्र लृशब्देन लृङ्लृटोर्ग्रहणे पश्चादुपस्थितावपि नानुपपत्तिः। जमङणनमित्यत्र भाष्य इति। तत्र हि मकारप्रत्याख्याने ये मकारेण प्रत्याहारास्ते अकारेणैव सन्तु ङ्ञो ह्रस्वादचि ङ्ञुण्नित्यमिति यथा तर्हि पदान्तयोर्झकारभकारयोरभावात्पञ्चागमास्तस्य आगमिन इति वैषम्यात्सङ्घातानुदेशो न प्राप्नोतीत्याशङ्ग्य येषामागमानामागमिनः सन्ति त एव भविष्यन्ति प्रतिपत्तिकालिकन्तु सङ्घातसाम्यमस्तीति प्रतिपादितम्। एते यवला इति। यद्यप्येतेऽनुनासिकस्थानिकत्वादान्तरतम्यादनुनासिकत्वयुक्ताः प्राप्तास्तथापि भाव्यमानेन सवर्णानाङ्ग्रहणन्नेति निषेधान्निरनुनासिका एवेत्यर्थः। अत एवेति। भाव्यमानत्वादेवेत्यर्थः। एतेन तद्वानितिनिर्देशान् मतोर्मस्य नानुनासिको वकार इति केषाञ्चित्कल्पनमपास्तम्। चयो द्वितीया इति वार्त्तिकनिष्पन्नद्वितीयस्य चस्य नाशङ्ग्याह। एतत्स म र्यादिति। ननु प्रातिशाख्यविरोधात्कथमत्र द्वितीय-

यादेश इत्यत आह । उभोदयमिति । एवञ्च सुगण्ठ् षष्ठ इत्यादौ द्वितीयादेशो भवत्येवेति भावः । चर्त्वासिद्धत्वेति । चयो द्वितीया इत्येतदिष्ट्या चर्त्वस्यासिद्धत्वादित्यर्थः । अत्र तु द्वितीये तु । अस्य द्वितीयस्य । ननु अप्सु सरन्तीत्यर्थकस्याप्सरश्शब्दस्यावयवः पकारोऽपि चर्त्वं निष्पन्न एवेति भाष्योक्तस्याफ्सरा इत्युदाहरणस्यासङ्गतिरत आह । अफ्सरा इत्यादि । छन्दसि सर्वविधीनां वैकल्पिकत्वेन द्वितीयादेशे असिद्धत्वस्यापि वैकल्पिकत्वमिति भावः । पक्षान्तरमाह । यद्वेति । उणादिष्वसुत्पत्तिपक्षस्यैव सिद्धान्तितत्वात् । सप्तमी षष्ठ्यर्थ इति । सीति सप्तम्या अप्यकृतार्थत्वात्सकाराव्यवहितपूर्ववर्त्तिनो डात्परस्याव्यवहितस्य धुडित्यर्थः । तस्येति फलितमेवञ्च सप्तम्याः षष्ठ्यर्थे पर्यवसानमिति भावः । न च ड इति षष्ठ्यन्तमेवास्त्विति शङ्क्यम् । ध्वलिट्त्सायम्। मधुलिट्त्सायमित्यत्र न पदान्ताट्टोरनामिति ष्टुत्वप्रतिषेध इति भाष्यविरोधापत्तेः । उभयनिर्देशे पञ्चमीनिर्देशो बलीयानितिपरिभाषाबलात्सप्तम्यन्तस्य षष्ठ्यन्तत्वकल्पनमिति तु युक्तम् । तस्मिन्निति तस्मादिति परिभाषयोः प्रवृत्तावुभयोरागमित्वे विरोधस्य सद्भावात्तस्मादिति परिभाषायाः परत्वाद्बाधस्येति । तदादिविधौ विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वनियामकमित्यत्र विशेषस्य पदस्यासप्तम्यन्तत्वान्न तदादिविधिः । तेन षट्सु इत्यत्र धुट्सिद्धिः । पञ्चम्या विपरिणम्यत इति । एवञ्च नकारान्तात्पदादिति फलितम् । ङमट्सूत्रस्थभाष्यस्वरस इति । तत्र हि पदावयवङमःपरस्येति व्याख्यातमेवञ्चोत्तरसूत्रे पदस्येत्यस्य वैयधिकरण्येन सम्बन्धे पूर्वसूत्रेऽपि तथैवास्त्विति भावः । शि तुगिति सूत्रे शीति सप्तम्या अचरितार्थत्वन्न इति पञ्चमी तु पूर्वसूत्रे चरितार्थेति पञ्चम्यन्तस्यैव षष्ठ्यन्तत्वकल्पनमिति भावः । इत्युचितमिति । वर्णग्रहणे च सर्वत्रेति तदन्तविधिसम्भवादिति भावः । रूपाणामाधिक्यस्यापि सम्भवाच्चतुष्टयमित्यस्योपपत्तये आह । वक्ष्यमाणेति । विशेषणसम्बन्धमनुभूयेति । गुणः कृतात्मसंस्कार इति न्यायादिति भावः । लाघवार्थ इति । वक्ष्यमाणरीत्या तदादिविध्यर्थमपीति बोध्यम् । एतेन सप्तमीनिर्देशस्य कृतार्थत्वाद्बाधकत्वशङ्काऽपि निरस्ता । सिद्धान्तमाह । भाष्ये त्विति । एतदर्थमेवेति । न तु लाघवार्थ इत्येवकारव्यवच्छेद्यम् । उच्चारणकृतलाघवेऽपि मनोव्यापाराधिक्येऽधिकगौरवात् । अत एव वक्ष्यते हलन्तन-

पुंसके उत्तरपदत्वे चेति वचनस्य भाष्ये प्रयोजनान्यथासिद्धिप्रदर्शनेन प्रत्याख्यानेऽपि ज्ञानगौरवेण प्रत्याख्यानस्यायुक्तत्वात्स्थापनमेव कृतमिति। पदे इत्यनुवृत्तेरावश्यकत्वमपि दर्शयति। ङमन्तं यत्पदमित्यर्थेऽपीति। उत्तरपदस्य यच्च कार्यित्वमिति। अत्र यदुक्तव्यन्तन्न पदान्तसूत्रे उक्तम्। ङमुडागमस्य नित्यत्वादिको यणचीति प्रयोगानुपपत्तिरत आह। सौत्रो निर्देश इति। एवमादिप्रयोगाः संहिताया अविवक्षयापि साधयितुं शक्याः। वस्तुतः सनाद्यन्ता धातवः सुप्तिङन्तमित्यादिषु बहुषु सौत्रत्वकल्पनापेक्षया वृत्तिघटकङमन्तपदस्थले ङमुटः क्वाचित्कत्वमित्यत्र युक्तम्। तेनाणादिसंज्ञार्थानीत्यादिप्रयोगसङ्गतिः। रुप्रकरणविधेय इति। तेन सविधानपक्षे सकारस्य लोपपक्षेऽभावस्योपलक्ष्यस्य सङ्ग्रहः। ल्यब्लोप इति। ल्यपो ल्यबन्तस्य विहायेत्यस्य लोपे गम्यमानार्थत्वादप्रयोगे ल्यबन्तार्थक्रियाकर्मणि पञ्चमीत्यर्थः। व्याख्यानादिति। यद्यत्र दिग्योगलक्षणा पञ्चमीस्यात्तदाऽचानुस्वारपरानुनासिकः पूर्वस्य तु वेत्येव वदेत्तथा तु न कृतमित्येवंरूपादित्यर्थः। अयमिति। अनुस्वार इत्यर्थः। अत्र परपदोपादानेन परसेति सूत्रैकवाक्यतापन्नसूत्रविधेयसादृश्यस्य लाभादनवयवत्वसिद्धिः। खरीत्यस्य मण्डूकप्लुत्यानुवृत्तौ गौरवादाह। विसर्गेति। इदमन्यरीत्या। वस्तुतस्तु मण्डूकप्लुतिरेव युक्ता। न त्वाचेपः। आक्षिप्तस्य शाब्दबोधविषयत्वाभावस्यान्यत्रोक्तेः। व्याख्यानादिति। लक्ष्यानुरोधमूलकादत एव प्रत्यय इत्यादिनिर्देशसङ्गतिः। एवञ्चेति। एतैः सकारविधाने चेत्यर्थः। भाष्य इति। समः सुटीति सूत्रभाष्य इत्यर्थः। ननु वार्त्तिकेन विसर्गस्य स्थाने सकारविधानत्यागे वीजं किमित्यत आह। विसर्गस्थानेनेति। प्रातिशाख्यविरोधमपरिहरति। प्रकृतिभाव इति। अत्र प्रकृतिभावशब्दः शास्त्रविधेयतत्तत्कार्यप्राक्कालिकस्वरूपावस्थानपरः। तच्च नॄन्पाहीत्यत्रास्त्येव। नॄन्प इत्यस्य वैकल्पिकत्वात्। नोपधेति। रोः पूर्वस्यैवानुनासिको न तु रुप्रकरणविधेयात्। एवञ्च लोपपक्षे नोपधारञ्जनप्राप्तिरिति भावः। प्रातीति। प्रतिशाखभवमिति प्रातिशाख्यसमाख्याबलादृक्सम्बन्धिच्छाखापरमिदं शास्त्रन्तु सर्वसाधारणमिति भावः। पूर्वोक्तमेव दृढयति। अत एवेति। तस्य तच्छाखामात्रविषयत्वादेव। यदि सर्वसाधारणं स्यात्तर्हि रुत्वपक्षे उपधारञ्जनस्य प्राप्तिस्स्यत्वपक्षे च तस्याभाव इति फलभेदस्य स्पष्टतया रुत्व-

पक्षेऽनुनासिकाद्यापत्तिरप्युक्ता स्यात्स्वमते तु रुप्रकरणविधेयात्पूर्वस्यानुनासिकादेशस्येष्टतया रुत्वपक्ष इव सत्वपक्षेऽप्यनुनासिकादेशस्य सम्भव इति रुत्वेऽनुनासिकापत्त्यकथनं युक्तमेव। एवञ्च लोपेऽप्युपधारञ्जनभवत्येवेति भावः। एतेन। त्रिसकारकरूपासाधनेन। इदं वचनं व्यर्थमेवेति। न ह्रीति भाष्योक्तवचनन्तु दुर्लक्षत्वाभिप्रायन्न तु सर्वथा विशेषाभावपरमिति भावः। इदमिति। शरः खय इत्येतत्। ननु हे इत्यनेनोच्चारणद्वयस्यैव विधेयत्वाद् द्वयोर्वचनयोर्युगपद्व्रत्तौ द्विरुच्चारणस्यैकस्यैवोभाभ्यां वचनाभ्यां लाभेन त्रितस्यानिर्वाह इत्यत आह। पूर्वत्रेत्यादि। वार्त्तिकेऽपि पूर्वापरीभावं व्युत्पादयति। अनचि चेत्यत्रेति। कविभिः कृतमित्यादिव्याहृतये इदुदुपधेति सूत्रे प्रत्ययग्रहणस्य प्रत्ययावयवलाक्षणिकत्वादाह। इदुदुपधस्येतीति। ननु घसेः किच्चेत्यौणादिकसूत्रे णेरन्विधानेन क्षीरशब्दस्य व्युत्पादनाच्चर्त्वस्यासिद्धत्वात्खय्परत्वाभावेन नैतत्प्रतिरत आह। क्षरधातोरिति। प्रकृतार्थदार्ढ्येति। यद्यप्यभावाभावस्य प्रतियोगिरूपतया यत्कर्त्तृकप्राप्तावित्येव लभ्यते। तथापि नञ्द्वयोपादानसामर्थ्याद्दार्ढ्यलाभकल्पना। दार्ढ्यञ्चोपवादत्वाभिप्रेतशास्त्रोद्देश्यतावच्छेदकस्योत्सर्गशास्त्रोद्देश्यतावच्छेदकव्याप्यत्वमेवेति बोध्यम्। तदप्राप्तीति। उत्सर्गाप्राप्तीत्यर्थः। अत्रैव सम्मतिमाह। तदुक्तमिति। ननु बाध्यबाधकभावे ह्येविध्यमसिद्धम्। समानफलकत्वं विरोधश्च। यथा दध्नस्तक्रस्य चौदनोपसेकात्मकसमानफलकत्वम्। अष्टाश्रिर्यूपो भवति वाजपेयस्य चतुरश्र इत्यत्र सङ्ख्याकृतविरोधाच्चतुरश्रत्वेनाष्टाश्रित्वस्य बाधः। द्विविधापि विधा प्रकृते न सम्भवति। हलादिःशेषेण पस्यर्द्ध इत्यत्र सकारस्य शरूपूर्वेत्यनेन पकारस्य शेषसम्भवादिति चेन्न। शेषपदार्थस्येतरवृत्तिपूर्वकावस्थानरूपतया द्वयोरपि सकारपकारयोर्निर्वृत्तिस्थित्योर्विरोधाद्भवतीह बाध्यबाधकभाव इति भावः। न चास्य विसर्गस्येति। एतत्सूत्रविहितस्येत्यर्थः। तथा च वासः क्षौममित्यादिरूपमेव कुप्वोरित्यस्योदाहरणम्भविष्यति। शरूपर इति सूत्रविहितविसर्गस्य श्रवणन्तु कः क्षरुः। कः क्षरितेत्यादिषु भविष्यति। एतयोः कःपयोः। शर्पर इति सूत्रविहितविसर्जनीयस्य तु न सत्वप्राप्तिस्तद्दृष्ट्याऽसिद्धत्वादिति भावः। वाक्यभेदेनेति। कुप्वोरितिपदस्यावृत्तिमुक्त्वा भिन्नवाक्यं सम्पादनीयमिति भावः। ननु विसर्जनी-

यो र इति संज्ञासूत्रङ्कृत्वा खरवसानयोरित्यादिसूत्रे विसर्जनीयपदस्थाने लाघवाद्र इत्येव पठनीयमिति चेन्न । पर्यायशब्देषु लाघवगौरवचर्चा नाद्रियते इत्यस्य ज्ञापनार्थन्तदुपादानात् । कस्कादिषु चेतिसूत्रव्याख्यावसरे एषु इण उत्तरस्य षत्वमन्यस्य सत्वमिति विविच्योक्तन्तत्तत्राभप्रकारमाह । गण इति । तथा च कस्कादिषु यथा पठितन्तथैव साधु भवतीति सूत्रार्थः। संहितायाम् । यद्यपीदमिको यणित्यादिसूत्रे ष्वण्पयुज्यत इति तत्रैव व्याख्यातुमुचितन्तथाप्यष्टाध्यायीस्थसौत्रक्रमानुरोधादेवङ्कृतम् । ननु निर्मले रूढे स्वच्छशब्दे तस्यापदान्तत्वात्कथं जश्त्वमत आह । स्वशब्द इत्यादि । अव्ययमेवेति । तेन क्विबन्तमाङ्मान इतिधातोर्ग्रहणशङ्कायामाङ्छेद इतिलक्ष्यसम्भवेऽपि सा व्युदस्ता । मध्यमाणज्ञापकादिति । सुराच्छायेतिज्ञापकादित्यर्थः । ननु दीर्घादितिसूत्रमपदान्तविषयकम् । सेनासुराच्छायेत्युदाहरणन्तु पदान्ताद्वेति सूत्रस्य विषय इत्यत आह । व्याख्यानादिति । वर्णैकदेशानां वर्णग्रहणेन ग्रहणमितिपक्षे अग्ने इन्द्र इत्यादौ सवर्णदीर्घत्वन्दीर्घे ऋस्वात्तराश्रयमालूयेत्यादौ ऋस्वस्य पिति कृतीति तुकश्चाशङ्क्य दीर्घं ऋत्वाचराश्रयो विधिर्न भवतीत्यर्थे यदयन्दीर्घाच्छे तुकं शास्तीत्युक्तभाष्ये । यदि ह्रस्वायन्तुक्स्यात्तदा ऋस्वस्य पूर्वेण ह्रस्य त्वनेनेति विशेषस्य स्पष्टत्वात्तस्य ज्ञापकत्वाभिधानासङ्गतिरिति भाष्यपर्यालोचनमूलकादित्यर्थः । ध्वनितमिति । ध्वनितञ्च तथा ज्ञापकोपपादनेनैव । स्थानिद्वारेति । यथा उरदितिसूत्रनिष्पन्नस्यारित्यस्यावयवो रेफश्चकार जहारेत्यादौ निवर्त्तते । साक्षात्सन्निहितनिवृत्तिस्तु पपाचेत्यादौ स्पष्टैव । चरितार्थमिति । यदुत्तरकालप्राप्तिकपदत्वे नोद्देश्यत्वाभावेन च स्थानिद्वारकप्राप्तिकर्त्वभिन्नस्यापि तेन निवृत्तिः स्यात्तदा नुकोऽपि निवृत्त्यापत्तौ यय्यँम्यत इत्यादौ नुक्श्रवणाभावेन तद्वैयर्थ्यं स्पष्टमेव । दीर्घस्य पदान्तस्येति षष्ठ्यर्थे पञ्चमीत्युक्त्वादिति भावः । समर्थपरिभाषानुपस्थित्यर्थमिति । यत्र सुबन्तत्वेन पदत्वेन वोद्देश्यता तत्र समर्थपरिभाषोपस्थितेरुक्तत्वात् । पदान्तस्य दीर्घस्येत्यर्थे तु दीर्घस्यैवोद्देश्यत्वन्न तु पदत्वावच्छिन्नस्य । यद्यत्र समर्थपरिभाषोपस्थितिः स्यात्तदा लक्ष्मीच्छाया इत्यादावेवास्य प्रवृत्तिः स्यान्न तु तिष्ठतु लक्ष्मी च्छाया देवदत्तस्येत्यादाविति भावः । यत्त्वेवमेव न पदान्ताट्टोरनामिति सूत्रेऽप्यन्तग्रह-

णस्यावश्यत्वेनान्तग्रहणं स्पष्टार्थमिति तच्चत्यग्रन्थविरोध इति। तन्न। षष्ठ्यामित्यत्र निषेधाभावफलकेनानामित्यस्योपादानेन पदत्वेनोद्देश्यत्वाभावेन च तत्र समर्थपरिभाषोपस्थित्यभावस्य पूर्वमुपपादितत्वात्। किञ्च समासेऽङ्गुलेः सङ्ग इतिसूत्रस्थसमासग्रहणेन ज्ञापकेन सजातीयापेक्षत्वाद्यत्र भावकार्यस्य विधेयत्वन्तत्र समर्थपरिभाषाप्रवृत्तिरतोऽन्तग्रहणन्तत्र स्पष्टार्थमेवेति॥

इति हल्सन्धिः।

पौनरुक्त्यशङ्कापरिहारायाह। प्राग्व्याख्यातमपीति। बहुव्रीहिरिति। कर्मधारयस्याभिप्रेतत्वे शरीत्येव वदेत्। विसर्जनीयाच्चित्र इति। स्थानिनो विसर्जनीयस्य निमित्तमित्यत्रविषये खरेवेति शर्परे खरीति पदसमुदायार्थे तदेकदेशस्य शर्पर इति पदस्य शक्तिस्वीकारादनेनोपस्थितः खरेवेति भावः। एतेनाच्चित्रस्य शब्दबोधे भानानङ्गीकारादिदमसङ्गतमित्यपास्तम्। व्याख्यानादिति। अव्ययीभावश्चेतिसूत्रभाष्येऽव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचारा इति परिगणनेन प्रयोजनमुक्तोपचारस्य विसर्गस्थानिकसकारस्योपपयःकार इत्यत्राप्रवृत्तिः प्रयोजनमिति प्रदर्श्य तस्मिन् सूत्रेऽनुत्तरपदस्थस्येत्यनुवृत्त्योपपयःकार इत्यादौ विसर्गस्योत्तरपदस्थत्वात्सत्वाभावसिद्धौ तदव्ययत्वस्य न प्रयोजनमिति दर्शितम्परिगणनञ्च प्रत्याख्यातम् यदि सोपदादाविति सूत्रशेषभूतेऽनव्ययस्येति वार्त्तिके यदनव्ययपदन्तेनोपपयस्काम्यतीत्यत्र प्रतिषेध इष्टः स्यात्तदोपचारस्येदमप्रयोजनं सम्भवत्येवेति प्रत्याख्यानपरभाष्यं विरुध्येत। तस्मादुपचारपदेन परिगणनस्थेनातः ककमीतिसूत्रनिष्पन्नसत्वस्यैव ग्रहणमिष्यते। तच्चाव्ययत्वप्रयोजनमन्यथासिद्धमित्यव्ययीभावस्याव्ययत्वप्रयोजननिराकरणमूलकाद्भाष्यात्प्रत्याख्यानादित्यर्थः। उपलक्षणमिति। एवञ्चेणः ष इति सूत्रस्यायमविषय इति भावः। सर्पिष्याशमिति। उणादीनामव्युत्पन्नत्वमिति पक्षेऽत्र दुदुपधस्येत्यस्य प्राप्तिः। गीष्याशमिति। अत्र दुदुपधस्येति तपरकरणात्षत्वप्राप्तिरेव न। अत एव। उक्तत्रितयस्येणः ष इति सूत्रस्यापि शेषत्वादेव। यदुक्तत्रितयस्यैतत्सूत्रशेषत्वन्न स्यात्तदा स्वातन्त्र्येण षत्वविधायकत्वपक्षे उच्चैःकल्पमित्यादौ षत्वप्राप्त्या सकारस्य षत्वमिति पक्षे चैषु सकाराभावेन षत्वाप्राप्त्या फलभेदः स्पष्ट एव। ननूक्तार्थस्य फलवत्त्वेऽपि लाभः कथमत आह। अत्रेति। एतत्सत्रे

भाष्ये ह्येवमुक्तम्। किमविशेषेण सत्वमुक्त्वा इण उत्तरस्य सकारस्य षत्वमुच्यते आहो स्विदिण उत्तरस्य विसर्जनीयस्यैव षत्वं विधीयते इति। अत्र यदा सकारस्य षत्वविधानमिति पक्षस्तदा सोपदादावित्यतोऽनुवृत्तस्य प्रथमान्तस्य षष्ठ्या विपरिणामः कार्यः किञ्चातः। यद्यविशेषेण सत्वमुक्त्वा इण उत्तरस्य सकारस्य षत्वमुच्यते तदा निष्कृतस्त्रिष्पीतमित्यत्र सत्वस्यासिद्धत्वात् षत्वन्न प्राप्नोति। सत्वस्यासिद्धत्वादिति। निष्कृतमित्यादौ इदुदुपधस्येति सूत्रेणैव सत्वमस्मिन् पक्षे वाच्यस्य च इणः ष इत्येतद्ष्टयाऽसिद्धत्वात्षत्वन्न प्राप्नोतीत्यर्थः। इतः प्रभृति सर्वत्र विपरिणतस्य स इत्यस्य ष इत्यस्य विसर्जनीयस्येत्यस्य च सम्बन्धः। किञ्च विसर्जनीयस्थानिकस्य सस्य षत्वमिति पुंसुच इत्यत्र दोषवारणाय स्वीकार्यम्। एवञ्चोत्तरत्र विसर्जनीयस्येत्यस्य मण्डूकानुवृत्तिक्लेशोऽपि नेति। अत्र पक्षद्वयसम्भवसत्त्वे सोऽपदादाविति सूत्रविहितस्य स्थानेऽनेन षत्वमिति स्वीकार्यम्। सोऽपदादावित्यस्य तु पूर्वोक्तद्वितयं शेष इति इणः ष इत्यस्यापि तत्त्रितयं शेष इत्युक्तम्माक्। यदा तु द्वितीयपक्ष एव परिगृह्यते तदाह। अनव्ययस्येत्यादीति। भाष्योक्तदूषणेनैवेमम्पक्षं खण्डयति। परं त्वयमिति। ननु न योगी योगोऽसिद्धः किन्तु प्रकरणे प्रकरणमिति पक्ष आश्रीयत इति सत्त्वषत्वप्रकरणस्यैकत्वान्नायन्दोष इत्यत आह। प्रकरणे प्रकरणमसिद्धमिति। उपपादयिष्याम इति। तत्र हि पूर्वपदात्संज्ञायामग इति सूत्रात्पूर्वपदादित्यनुवृत्तौ तदाश्रितसमास एव स्यादित्यसमासेऽपीति। ननु व्याख्यानतः पूर्वपदादित्यस्य निवृत्त्याऽसमासेपीति व्यर्थम्। न च पूर्वपदात्संज्ञायामिति नियमव्यावर्त्तितणत्वप्रतिप्रसवायेदमावश्यकमिति वाच्यम्। पूर्वपदादित्येतद्ष्ट्योपसर्गादसमास इत्यस्यासिद्धया नियमेनाव्याप्तेः। न चासमासेऽपीति पदमेव न योगी योगोऽसिद्धः किन्तु प्रकरणे प्रकरणमसिद्धमित्यर्थे ज्ञापकमस्त्विति वाच्यम्। समानपद इत्यस्याखण्डपद इत्यर्थकत्वावश्यकत्वेन पूर्वपदादिति सूत्रस्य विधायकतयाऽसमासेपीत्यस्योक्तरीत्या प्रतिप्रसवार्थकत्वासम्भवादिति चेन्न। सप्तार्थत्वादित्येवन्निरूपयिष्यत इत्यर्थः। ननु मूलोक्तपक्षे सत्वषत्वयोः सर्वत्र सम्बन्धेन नमस्पुरसोरिति सूत्रेणापि षत्वापत्तिरत आह। विसर्जनीयस्यैवेति। मण्डूकप्लुत्येति। इयञ्च भाष्य एव स्पष्टा। इ-

त उत्तरमिति। इतः प्रभृतीत्यर्थः। व्याख्यानादिति। नारायणनमस्कृत्येत्यादिलक्ष्यदर्शनमूलकादित्यर्थः। ननु नमस्करोतीत्यादौ नमःशब्दस्य च्व्यर्थवृत्तित्वाभावोत्साच्चात्प्रभृतित्वादित्यसङ्गतमत आह। उर्यादित्वादिति। लाघवादिति। वाक्यभेदाभावेनेत्यादिः। प्रत्ययभिन्नस्येतिव्याख्यानन्न युक्तमित्याह। तच्च प्रत्ययपदमित्यादि। ननु विजर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वन्नेत्यत आह। एकादेशशास्त्रे ति। न च कस्कादिगणे भ्रातुष्ण्वशब्दपाठस्य ज्ञापकत्वमसङ्गतम्। इदुदुपधेति षत्वे कर्तव्ये एकादेशस्य षत्वतुकोरित्यसिद्धतया उदुपधत्वाभावेन षत्वाप्राप्तौ तत्पाठेन षत्वस्य साध्यत्वादिति वाच्यम्। षत्वतुक इति सूत्रे पदान्तपदाद्योरेकादेशोऽसिद्ध इति वार्तिकात्तादृशे विषय एवासिद्धत्वविधानात्। इदञ्च वार्तिकमावश्यकम्। अन्यथा शकञ्छ्वु परिवीषु द्वचेच्छ्वम् प्लक्षेच्छ्वमित्यादौ षत्वतुकोरसिद्धत्वापत्तेः। यत्तु इक् साच्यणः सम्प्रसारणमिति सूत्रं कार्यम्। सम्प्रसारणाच्चेति सूत्रञ्च न कार्यमेवञ्च शकञ्छ्वित्यादावेकादेशस्यैवाभावेनासिद्धत्वशङ्कैव नेति षत्वविषये पदान्तपदाद्योरिति नियमो न स्वीकार्यः। एवञ्च भ्रातुष्ण्व इत्यादावेकादेशस्यासिद्धत्वादुदुपधत्वाभावेन षत्वाप्राप्तौ षत्वसिद्ध्यर्थञ्जस्कादिषु भ्रातुष्ण्वशब्दपाठश्चरितार्थ इति ज्ञापकत्वोपपादनमसङ्गतमिति। तन्न। ष्ठानमाचष्टे शावयतीति रूपवादिमते नस्तद्धित इति टिलोपे सम्प्रसारणानापत्तेः। न च ष्ठादीनां सम्प्रसारणे नकारान्तग्रहणमिति वार्तिकविरोधात्कथमत्र सम्प्रसारणमिति वाच्यम्। टिलोपस्याभीयासिद्धत्वेन सम्प्रसारणप्राप्तेः। वस्तुतस्तु शुनयतीत्येव युक्तम्। षपूर्वेतिसूत्रभाष्ये प्रकृतिभावस्यात्लोपोऽन इत्येतद्बाधकताया अयुक्तत्वेन नैकाजित्येव सिद्धे प्रकृतिग्रहणेन प्रकृतिभावे कर्तव्ये न्यायाप्रवृत्तिबोधनेन वो येन नाप्राप्तिन्यायस्यात्राप्राप्तया नस्तद्धित इति प्रकृतिभावेन टिलोपस्य दुर्लभत्वात्। तर्हि साच्यण इति न्यासे दोषाभाव इति चेत्। अच्साहित्यं स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धेनैव स्वाव्यवहितोत्तरत्वसम्बन्धेनापि स्यादिति मघोन इत्यसिद्धापत्तेः। यूनस्तिरिति निर्देशस्य स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धस्यैव निवेशे तात्पर्यग्राहकत्वाश्रयणे प्रतिपत्तिगौरवम्। किञ्च शुन इत्यत्र श्वन्शब्दस्यान्तोदात्तस्य सम्प्रसारणे वकारस्य संहनधर्मणोऽनुदात्तोकारे पूर्वरूपे एकादेश उ-

दात्तेनोदात्त इत्युदात्तस्योकारस्य श्रवणं भवति। यदि तु साच्कस्य समुदायस्य सम्प्रसारणस्थानित्वमिष्यते तदा समुदायस्योदात्तत्वाभावेन तदादेशस्योदात्तत्वन्न स्यात्किन्तु समुदायस्योदात्तत्वाभाववत्त्वरूपानुदात्तत्वेन तत्स्थानिकसम्प्रसारणस्याप्यनुदात्तत्वापत्तिः । साच्यण इतिश्रवणेनानुदात्तत्वोदात्तत्वयुक्तयोर्वकाराकारयोर्मान्तरतमः स एव भविष्यतीति चेत्स्वरितत्वापत्तिरिति शुनो दन्त्योत्यस्यातेः शुन इति निर्देशस्य वा आदुदात्तत्वांशे ज्ञापकत्वाश्रयणे तु सुतराङ्गीरवम्। किञ्च मघवन्शब्दान्मघवानमाचष्ट इत्यर्थे णिचि टिलोपे पूर्ववट्टिलोपस्यासिद्धत्वात् सम्प्रसारणेन वकारस्य उकारे घकाराकारेणाद्गुणे क्ष्णुप्रंसोः क्ङितोम्ङसोरित्यात्वे मघाम् मघा इति भवति सम्प्रति तु वकारस्य स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धेनाच्साहित्याभावात्सम्प्रसारणाभावापत्तौ मघवम् मघव इति स्यादित्यपि बोध्यम् । अभिव्यक्तेतिन्यायस्तु पदकार्य एवेति दिक्। षत्वापत्तेरिति। तथा च वैयधिकरण्येन सम्बन्धो न युक्त इति भावः। हयवरट्सूत्रभाष्योक्तेरिति। अयोगवाहानामविशेषेण पाठ इति पक्षे उपधासंज्ञारूपस्य प्रयोजनस्य खण्डनाय तत्रैवमुक्तम्। तिरस्कारशब्दस्येति। अनादरः परिभवः परिभावस्तिरस्क्रियेति कोशात्। विसर्गविशेषणमिति। तस्य प्राधान्यात्तथा प्रसज्यते परन्तु लक्ष्यानुरोधाच्छुत्वाच्च हिरादीनामिव विशेषणमिति भावः। लाघवसम्भावनयाह। इसुसोरितिसूत्रवक्ष्यमाणेति । सुचः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया सुजन्तस्य पदस्येत्यर्थे परमद्दिष्करोतीत्यादौ न स्यादतो वक्ष्यमाणरीत्या विशेष्यसत्त्वेऽपि शब्दस्वरूपं विशेष्यमादाय तदन्तविधौ पुनस्तदन्तस्य पदविशेषणतया सुजन्तान्तस्य पदस्येत्यर्थः स्वीकार्य इति भावः। अव्युत्पन्न इति। एवञ्चोणादिषु चतेरुरन्निति पाठोऽयुक्त इति भावः । अत्र मानमाह। अत एवेति। अव्युत्पन्नत्वादेवेत्यर्थः। आदिना चतुष्पादो गर्भिण्येत्यस्य सङ्ग्रहः। भाष्यतात्पर्यादिति। एवञ्च तत्त्वं सग्रहणं विसर्गस्यान्युपलक्षणमिति भावः। उपलक्षणत्वे भाष्यान्तरं साधकमित्याह। अत एवेति। उपलक्षणत्वादेवेत्यर्थः। षत्वापादनम्। इदुदुपधेति सूत्रेण। अन्यथा तस्य सस्थानिकत्वाभावाद्भाष्यमनुपपन्नं स्यादिति भावः। अत्र लाघवाभिप्रायेणैव शङ्कते। न चेति। पूर्वोक्तमुत्र इतिन्यासे तदन्तविधिहयमस्मिन्न्यासे तु तथा नेति भावः।

चतुःशब्दे इति। एवञ्चतुष्करोति चतुः करोतीति रूपद्वयमिष्यते तत्र सिध्येत्। यदा तु द्विश्चियतुरिति पाठस्तदा चतुश्शब्दोपादानसामर्थ्यान्नासिद्धत्वमिति भावः। नन्वेवं सुच इति सूत्रयितुमुचितमिति पूर्वग्रन्थविरोधस्तादृशन्यायस्य द्विष्करोति त्रिष्करोतीत्यत्र चरितार्थतया चतुष्करोतीत्यत्रास्यासिद्धत्वान्नित्यषत्वापत्तेः। न च द्विष्करोति त्रिष्करोतीत्यत्र विकल्पस्य इसुसोरित्यनेनैव सिद्धौ सुचसूत्रं चतुष्करोतीत्यत्रैव विकल्पार्थमित्यारम्भसामर्थ्यादसिद्धत्वन्न भविष्यतीति वाच्यम्। देवदत्तः पचतु हिः करोति यज्ञदत्तः पाकमित्याद्यर्थमस्यावश्यकत्वात्। न च सुच इति सूत्रानन्तरं र इति पठनीयम्। सुच इत्यस्यात्रानुवृत्तिः कार्या वर्णग्रहणे तदन्तग्रहणमिति पूर्वोक्तरीत्या सुजन्तं सुजन्तान्तं च यत्पदं रेफान्तञ्च तदवयवस्य विसर्गस्य वा षत्वमित्यर्थान्न पूर्वोक्तस्थले नित्यषत्वापत्तिरिति वाच्यम्। सूत्रान्तरकरणे पदलाघवसम्भवेऽपि सुच्पदे स्वरितत्वकल्पनेन पृथग्वाक्यार्थकल्पनेन च ज्ञानगौरवस्य स्पष्टत्वादिति चेन्न। इणः ष इतिसूत्रानन्तरं सुच इति पठनीयमित्यभिप्रायात्। ष इति वा शरीत्यतो वेति चानुवर्तते। सुजन्ते इकारोकारोपधत्वस्यैव सम्भवादिण इति नापेक्ष्यते यदि वाशब्दस्य मण्डूकप्लुत्याऽनुवृत्तौ क्लेश इत्युच्यते तदा स्वस्थान एव सुच इति सूत्रानन्तरं र इत्येव पठनीयमथ वा चयाणामेकशेषेण सुचामिति पठनीयमित्यपवादत्वादसिद्धत्वन्न प्रसञ्जनीयमित्यभिप्रायादिति दिक्। अन्यत्र विस्तरः। भाष्यादौ विस्तरः। तदुक्तभाष्ये। अधिकारः प्रतियोगन्तस्यानिर्देशार्थ इति योगेयोगे उपतिष्ठते इति। तथा सुच इत्येव सूत्रमस्तु। चतुःशब्दे नित्यषत्वापत्तिस्तु न। अस्मिन् सूत्रे इदुदुपधेत्यतो योभयोरनुवृत्तिस्तत्रेदुपधेत्यस्य चारितार्थ्येऽपि उदुपधांशे चारितार्थ्याभावादसिद्धत्वापत्तिर्नेति एतेन यत्सुच इति न्यासे प्रत्ययग्रहणपरिभाषायां यस्तदन्तांशस्योऽपि येन विधिरिति सूत्रबोधित एवेति निर्दिश्यमानपरिभाषया निर्दिश्यमानसुच एव षत्वं स्यान्न तु तदन्तस्येति चतुष्करोतीत्यस्यासिद्धिदूषणन्तदपि निरस्तम्। उदुपधत्वांशे विधानसामर्थ्येन निर्दिश्यमानपरिभाषाया अप्रवृत्तेरिति। अपि च क्लोर्थ इति न्यासपक्षेऽपि उदुपधेत्यस्यांशस्य चारितार्थ्यविरहेणासिद्धत्वस्य परिहारः कर्तुं शक्य इति द्रष्टव्यम्। यदुक्तम्प्रातिपदिकावयव इति तत्र मानमाह। नित्यं समास इतीति।

अत एवेति । तदन्तविधिद्वयसिद्ध्यर्थमुपात्तविशेषसत्त्वेऽपि शब्दस्वरूपं विशेष्यमादायादौ तदन्तविधिस्वीकारादेवेत्यर्थः । अत्र द्विसर्पिःप्रिय इत्येतद्व्यावर्त्तकतयाऽनुत्तरपदस्थस्येत्यस्य चारितार्थ्यं सम्भवतीति शङ्का यद्यपि भवति । तथापि भाष्योक्तस्य परमसर्पिःकुण्डिका इत्यस्योपपत्तिस्तदन्तविधिद्वयं विना न भवतीत्यभिप्रायः । तस्यैकार्थीभावसामर्थ्येति । स्पष्टश्चेदं भाष्ये । अधात्वभिहितमिति । समर्थसूत्रभाष्य एव स्पष्टम् । ननु सर्पिष्यीयत इत्यत्र कर्मणो न धात्वभिहितत्वमत आह । धातुसहचरितेति । तथा च धातुपदस्य धातुसहचरिते लक्षणेति भावः । अनेन । इसुसोरित्यनेन । नन्वेवं समासे इदुदुपधेत्येव सिद्धे नित्यं समास इति व्यर्थमत आह । नित्यं समास इतीति । प्रतिषेधार्थमिति । तथा च परमसर्पिःकुण्डिकेत्येव भवति । नन्वस्मिन्पक्षे सर्पिषेत्यत्र सकारस्य षत्वन्न स्यात् सकारस्यादेशप्रत्ययावयवभिन्नत्वादत आह । व्याख्यानादिति । उत्तरसूत्रे समासग्रहणस्य सत्त्वेन तस्यैकार्थीभावविषयकतया इसुसोरिति सूत्रे सामर्थ्यस्य व्यपेक्षाविषयकत्वमित्येवंरूपादित्यर्थः । एतेन । तत्र चारितार्थ्येन । तेन । इदुदुपधेत्यनेन । एतेन । व्यपेक्षायान्नित्यार्थत्वेतिकथनेन । तस्य । कस्कादिषु चेत्यस्य । समासाच्चिसेति । नित्यं समास इति सूत्रात्समासग्रहणानुवृत्तेः । ननु समासाच्चिसोत्तरपदस्योपस्थितत्वात्कुभादिरूपस्थैव ग्रहणं स्यादित्ययस्कुम्भीत्यत्र न स्यादत आह । लिङ्गविशिष्टेति ॥

॥ इति विसर्गसन्धिः ॥

लाघवमूलकमाचां व्याख्यानन्दूषयति । यत्विति । न च ससजुष इति सूत्रस्यान्यार्थमावश्यकतया प्रकृते सकारस्य रेफस्य वोच्चारणे को विशेष इति वाच्यम् । प्रक्रियालाघवसत्त्वात् । प्रथमैकवचन इति । न चैवं सति ससजुष इतिसूत्रविधेयरुशब्दे उकारोच्चारणं व्यर्थमिति वाच्यम् । भोभगो इति सूत्रे उभयोर्ग्रहणसम्पादनेन चारितार्थ्यात् । न च यदि रोरसिद्धत्वन्तदा एहि सुस्रोता इत्यादौ रुत्वस्यासिद्धत्वादुत्वन्नैव प्राप्नोतीत्यप्लुतग्रहणसामर्थ्यादसिद्धत्वबाध इति वाच्यम् । देवदत्ताः ३ गतो ग्रामान् किमित्यादावनन्त्यस्यापीति ध्रुतविषये तस्य चारितार्थ्यात् । प्रत्ययविधिविषयमिति । ज्ञापकस्य सजातीयापेक्षत्वात् । जश्त्वापवाद इति । सस्य स्थाने प्राप्तस्य जश्त्वस्य निरवकाशत्वेन स-

जुष्शब्दविषये येन नाप्राप्तिन्यायेन च प्राप्तस्य जश्त्वस्य च बाधक इत्यर्थः । ननु उत्वदृष्ट्या यत्वस्यासिद्धत्वात्तेन येन नाप्राप्तिन्यायाभावाद्यत्वापवादत्वोक्तिरसङ्गतेत्यत आह । यदीदमिति । इदम् । उत्वशास्त्रम् । कृते त्वस्मिन् । अस्मिन् सूत्रे । एतेन शास्त्रासिद्धत्वस्यैव सिद्धान्तितत्वादिदमित्याद्यसङ्गतमित्यपास्तम् । व्याख्यानादिति । अत्र प्रथमयोरित्यनेन न यस्य कस्य चिद् ग्रहणङ्किन्तु वा सुपीत्यतः सुब्ग्रहणानुवृत्तेस्सुब्विभक्त्योरेव तयोरपि न प्रथमवचनयोः । अचीत्यधिकारात्तस्माच्छस इत्यत्र कृतस्य पूर्वसवर्णदीर्घार्थकृतच्छब्दस्य दीर्घाज्जसीति निषेधसूत्रस्य च दर्शनमूलकादित्यर्थः । पच्च इति । पूर्वपरयोरित्यनेन पूर्वपरयोरुपस्थितत्वात्पर्यायेण कदाचित्परसवर्णस्यापि प्राप्तिरिति भावः । त्रिमात्रो माभूदिति । आन्तरतम्यादाप्त इति भावः । पूर्वजातीय इति । तथा च पूर्वस्यादीर्घत्वात्पूर्वशब्दस्य लक्षणया पूर्वजातीयबोधकता भविष्यतीति भावः । न च यत्र पूर्वो दीर्घस्तत्रास्य चारितार्थ्यात्कथं लक्षणेति वाच्यम् । दीर्घाज्जसि इचि च निषेधादप्रवृत्तेरिष्टतया यत्र पूर्व आकारः परश्शस् तत्र सवर्णदीर्घस्यैव प्राप्तेरिष्टस्य सिद्धेर्दीर्घकारादेश्शसि प्रवृत्तिरस्य वाच्या तथा चास्याल्पविषयत्वाप्रवृत्तिरतो लक्षणाया आवश्यकत्वात् । ऋकारल्कारयोः सवर्णविधिरित्यनेन समानजातीयत्वमेवातिदिश्यत इति गमॄनित्यादौ नानुपपत्तिः । ननु वृद्धिप्राप्तिकालोत्तरकालिकप्राप्तिकर्तृपूर्वसवर्णदीर्घस्य नादिचीत्यनेन निषेधे भ्रष्टावसरन्यायेन वृद्धिरेचीति वृद्धिर्न स्यादत आह । भ्रष्टावसरेति । सुस्रोतस्शब्द इति । एतेनैतदकारान्तस्य रूपमिति कस्य चिल्ललपितमपास्तम् । नन्वतो रोरेतिसूत्रे प्लुतस्य निमित्तत्वेनाश्रयणन्न तु प्लुतस्येति तत्सामर्थ्यादित्यसङ्गतमत आह । प्रतियोगित्वेनेति । ननु यदि सामर्थ्यादुत्वदृष्ट्या प्लुतस्य सिद्धत्वन्तदा वक्ष्यमाणरीत्या उत्वन्न स्यादित्यत आह । पयस्वटतीति । अटतेः क्विबाद्ये । पयो ददातीति । दाधातोरातोऽनुपसर्ग इति कः । प्रतियोगित्वेन प्लुतस्याश्रयणात्पूर्वचासिद्धत्वमेव बाध्यते न त्वन्तरङ्गपरिभाषया बोध्यस्यासिद्धत्वस्य बाधो मानाभावात् । ननु परिभाषायाः षाष्ठीत्वादेतदृष्ट्या प्लुतस्यासिद्धत्वात्कथम्बहिरङ्गपरिभाषाप्राप्तिरत आह । परिभाषेति । स्वदृष्ट्याऽविद्यमानस्येति । अयञ्च न्यायो लोके प्रसिद्धः । नन्वेवं त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तिरिति सिद्धान्त-

विरोध इत्याह। अन्तरङ्गस्यासिद्धत्वे त्विति। प्रतिपादयाभाव इति। यथा ययोः शास्त्रयोरन्तरङ्गबहिरङ्गभावविचारस्तत्र द्वयोरप्यन्तरङ्गत्वे बहिरङ्गत्वे वा परिभाषाया अप्रवृत्तिस्तथाऽन्तरङ्गस्य चैपादिकत्वे तन्निरूपितबहिरङ्गत्वस्य पूर्वशास्त्रे प्रतिपादनासम्भवादिति भावः। पूर्वोक्तप्रयोगयोर्येन शास्त्रेण प्लुतस्तदाह। तत्राद्य इति। तयोर्मध्य इत्यर्थः। अत्र दूराद्धूत इत्यनेन प्लुतः। ननु प्रतियोगित्वेनाश्रयणसामर्थ्यादुभयविधासिद्धत्वस्य बाधोऽस्त्वित्यत आह। आश्रयेण त्विति। प्रत्यक्षत्वेन चेति। एतेन पूर्वत्रासिद्धत्वस्य शीघ्रोपस्थितिकत्वात्तद्बाधेनोपपत्तौ विलम्बोपस्थितिकस्यानुमानिकासिद्धत्वस्य बाधे मानाभाव इति भावः। स्पष्टमाष्य इति। अतो रोरप्लुतादप्लुत इति सूत्र इत्यर्थः। के चित्तु एतेन प्लुतप्रगृह्या इति सूत्रे प्लुतस्य सिद्धत्वज्ञापनद्वारा एकादेशात् प्लुते विप्रतिषेधात्प्रकृतिभावः। देवदत्ता ३ अत्र त्वमसि इति भाष्योक्तेः प्लुतस्यैकपदाश्रयत्वादन्तरङ्गत्वादेकादेशस्य तु पदद्वयापेक्षत्वाद्बहिरङ्गत्वाच्चिन्त्यतोक्तौ प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापेक्षतया एकादेशसमत्वाच्चिन्त्यमेव चिन्त्यमिति विवरणोक्तिः प्रयुक्ता। वाक्यस्य टेः प्लुतार्थं देवदत्ता ३ इत्यस्यादावेहीतिशेषपूरणस्यावश्यकत्वाद्वाक्यद्वयसापेक्षैकादेशस्यैवमपि बहिरङ्गत्वादित्याहुः। तत्र। शेषपूरण इत्यप्रयुक्तम्। अन्ते पूरणे एव शेषपूरणव्यवहारात्। वाक्यसापेक्षैकादेशस्येत्यपि चिन्त्यम्। वस्तुतो वाक्यद्वयसापेक्षत्वन्तदवयववर्णद्वयसापेक्षतया यद्यप्यस्ति तथापि वाक्यत्वेन वाक्यद्वयापेक्षायाम्मानाभावः। प्लुतस्य यादृशसमुदायसापेक्षत्वन्तादृशसमुदायस्य शब्दतोऽपेक्षाया एकादेशस्य विरहादेकादेशस्यैवान्तरङ्गत्वात्। यद्येवन्देवदत्ता ३ अत्र त्वमसीतिवाक्यस्य का गतिरिति चेत्। अत्र के चित्। एतादृशे विषये द्वयोर्वाक्ययोः संस्कृतयोरयम्प्रयोग एवच्च प्लुतस्य प्रकृतिभाव इति। अपरे तु वस्तुतो वाक्यद्वयावयवसापेक्षैकादेशस्यापि प्लुतसमत्वान्नात्र बहिरङ्गपरिभाषाया विषयत्वमिति सङ्गिरन्ते। यदि त्वेकादेशस्य वर्णमात्रापेक्षयान्तरङ्गत्वन्तदा सपादसप्ताध्यायीस्थेऽप्यन्तरङ्गे लक्ष्यानुरोधादनित्यत्वेन बहिरङ्गपरिभाषाया अप्रवृत्तिरिति दिक्। उकारानुबन्धग्रहणादित्योकारस्यानुबन्धस्य स्थानित्वेन ग्रहणमित्यर्थस्य प्रकृते न सम्भवः। उकारस्येत्संज्ञालोपाभ्यामपहारात्किन्तु बहुव्रीहिमभिप्रेत्याह। उका-

रेत्स्नेति। आदिना तरुमूलमित्यस्य सङ्ग्रहः। अकारान्तद्वन्द्वेनेति। न चैवमकारस्य पूर्वनिपातापत्तिरिति वाच्यम्। पूर्वनिपातप्रकरणस्यानित्यत्वात्। भाष्ये त्विति। स्थानिवत्सूत्रव्याख्यावसरे यदत्र वक्तव्यन्तदुक्तम्। वाच्यवृत्त्येति। वाच्यनिष्ठा या वृत्तिः शक्तिस्तया नियमशास्त्रघटकशब्दोऽर्थबोधक इत्यर्थः। ननु यदि प्राचोक्तरीत्याऽसाधारणनिवेशस्तदा हे रामेत्यादौ पदत्वासिद्धिरित्याशङ्क्यते। नन्वेवमिति। पदत्वाभावे सति हे राम पाहि मामित्यादौ निघातो न स्यादिति भावः। लक्षणपदोपादानेनेति। प्रत्ययलोपे प्रत्ययवदिति न्यासेन सिद्धे लक्षणपदोपादानेनैतादृशार्थलाभः। प्रत्ययनिमित्तककार्यस्येति। अस्य प्रकृतिसम्बन्धिन इत्यादिः। अत एव नखभिन्न इत्यादौ नैसादिः। न चैवमपि स्थानिवद्भावेनैसादेशः कस्मान्न भवतीति वाच्यम्। अचः परस्मिन् पूर्वविधाविति सूत्रे पूर्वविधिशब्दे पूर्वशब्दोत्तरं स्वशब्दाश्रयेण भावरूपस्य कार्यस्य चिकीर्षायामभावात्मकादेशस्थानिनः स्थानिवत्पदघटकस्थानिपदेनाग्रहणबोधनात्। तन्निमित्तकव्यवहारस्येति। प्रकृतिनिष्ठप्रत्ययपरत्वव्यवहारस्येत्यर्थः। एतेन श्रूयमाणप्रत्ययान्ते यो व्यवहारस्तस्य सर्वत्र स्थानिवत्सूत्रेणैव सिद्धिरिति सूचितम्। कार्यातिदेशस्य फलमाह। एवमिति। प्रथमप्रकारेणेत्यर्थः। तथा न केवलं सख्युरन्त एव स्थानिवत्त्वेन प्रत्ययान्तत्वबुद्धिः किन्तु राजपुरुष इत्यादावपि स्थानिवत्त्वेनेति बोध्यम्। न रेफ इति। यद्यपि प्रत्ययलक्षणेन सुप्परत्वव्यवहारस्यापि लाभेन तेन सूत्रेण सिद्धिः। तथापि स्थानिवत्सूत्रेण सिद्धिकथनन्नियमार्थत्वाभिप्रायेण। हे रामेत्यादौ तु स्थानिवत्सूत्रेणैव। यत्तु, वस्तुतस्त्वनपेक्षितार्थसन्निधानस्य तत्तन्निमित्तरूपकार्यव्यवहारस्यैव स्थानिवत्सूत्रेणातिदेशात्तथाभूतस्य चात्र सुप्परत्वस्याशास्त्रीयत्वादतिदेशाभावाच्चिन्त्यमेतदिति। तन्न। रोऽसुपीति सूत्रस्य वाक्यभेदेन मूल एव व्याख्यातत्वादसुपीति पदेन तस्मिन्निति परिभाषैकवाक्यतया सुबव्यवहितपूर्वात्मकशास्त्रीयधर्मावच्छिन्न एवोद्देश्यतावच्छेदकावच्छिन्ने निषेधविधानेन सुब्व्यवहितपूर्वत्वस्य स्थानिवद्भावेनातिदेशसम्भवात्। वृत्तिकृतो मतेनेति। निपातानान्निर्देशोत्तरन्तेषामित्यनेन निपातानामेव बोधनात्। सिद्धान्तमाह। परे त्विति। एषामिति। मतुवसोरिति सूत्रेऽस्य पाठात्तस्मिन्नलोन्त्यपरिभाषाप्रवृत्तिवदत्रापि तस्याः प्रवृत्तिः।

नन्वेवमवांग्रेऽप्यलोन्त्यपरिभाषाप्रवृत्तिः स्यादत आह । अवग्रहणेति । नानर्थकपरिभाषा तु प्रत्याख्यातैवेति भावः । अन्यत्रेति । मनोरमादावित्यर्थः । ननु लघुप्रयत्नतर इत्यनुपपन्नम् । वर्त्तिपदार्थस्यान्यपदार्थेन प्रकर्षेण च युगपदन्वयविवक्षायाम्यरत्वात्तरप्स्यात् ततो बहुव्रीहौ लघुतरप्रयत्न इति स्यादत आह । अन्यपदार्थेति । न च वर्त्तिपदार्थस्यान्यपदार्थविशेषणत्वात्कथमप्रकर्षयोग इति शङ्क्यम् । शुक्लतरः पट इत्यादौ विशेषणप्रकर्षबोधकस्य तरपो बहुषु दृष्टत्वात् । वार्त्तिककृतापि सूचितमिदम् । पूर्वपदार्थातिशये आतिशायनिकाद्बहुव्रीहिस्सूक्ष्मवस्त्रतरादर्थ इति । अत्र बहुव्रीहिरित्यस्य पूर्वविप्रतिषेधेनेति शेषः । लघुप्रयत्नतर इति निर्देश एवात्र गमक इति बोध्यम् । वृत्तिरिति । भाष्यानुक्तत्वमत्रारुचिः । पकारसाहचर्यादिति । ओकारात्परस्य पदान्तस्य धात्ववयवस्य यस्यासम्भवादिति भावः । स्मृतोवच्युत इति । स्मृतः उः शम्भुर्येन स स्मृतौः । स्मृतां वातिगच्छतीति स्मृतोवाः । तमाचक्षाणः स्मृतोव् इति । तदाहेति । तदभिप्रेत्याहेत्यर्थः । एवञ्च पकारांश एव स्वरितत्वमथ वा व्योरित्यनुवर्त्तमानमत्र यकारमात्रतात्पर्यकमिति भावः । विच्छेदादिति । लोपः शाकल्यस्येत्यत्रास्यानुवृत्तेः । व्याख्यानादिति । अत्र भाष्ये किमर्थमिदमुच्यते न लोपः शाकल्यस्येत्येव सिद्धम् । लोपः शाकल्यस्येत्यनेन पाक्षिकः सिद्ध एव लोपोऽनेनापि गार्ग्यस्य मतेन लोपो नान्येषामिति विकल्पेनैव विधेय इति प्रश्न इति कैयटः । ओकाराल्लोपवचनन्नित्यार्थम् । ओकाराल्लोपवचनं क्रियते नित्यार्थोऽयमारम्भ इत्युक्तम् तदर्शनमूलकादित्यर्थः । कैयटोऽपि । गार्ग्यः स्वस्यां स्मृतावोतो नित्यमेव लोपं स्मरतीति पाणिनिरपि तथैवेच्छति । एवञ्च भो अत्रेति नित्यम्भवति । न तु भोयत्रेति इति । न च स्वस्वमतप्रच्युत्यभावायेदमस्त्विति वाच्यम् । गार्ग्यशाकल्याभ्यां लोपस्यैव स्मृत्या तद्वाक्येऽन्यग्रहणेन तयोरग्रहणात् । भाष्यानुसारिण इति । नित्यार्थोऽयमारम्भभाष्यतात्पर्यविद इत्यर्थः । अयम्भावः । लोपः शाकल्यस्येति सूत्रे अवर्णपूर्वस्येति यद्याख्यानन्तस्य न भोभगो इति सूत्रादवर्णमात्रानुवृत्त्या सम्भवः । अशब्दस्य द्वन्द्वघटकतया तन्मात्रस्य पूर्वशब्देन समासासम्भवात् । तस्मिन्सूत्रे भोभगोअघोअपूर्वस्येत्यनुवर्त्तते । तत्र भोभगोअघोअपूर्वत्वे ओतो गार्ग्यस्येत्यनेन

नित्येन भवितव्यम्। तस्मादपूर्वस्येति परिशेषसिद्धार्थकथनम्। तादृशस्यैव समुदायस्य ओत इति सूत्रेऽप्यनुवृत्तिरत एव नित्यार्थत्वकथनमप्यारभ्यसामर्थ्यात् साधु सङ्गच्छते। एवञ्च विच्छेदादित्यसङ्गतम्। स्मृतोविलादौ च प्राप्तिरेवनेति फलितम्। तस्यानभिधानादिति। वृत्तवृत्तशब्द इवेत्यादिः। वृत्तिरिति। अत्रापि प्राग्वदेवारुचिः। अत एवेति। मण्डूकप्लुतिस्वीकारादेव। अन्यथा हलि सर्वेषामित्यत्र पदे इति सप्तम्यन्तानुवृत्तौ हलादौ पद इत्यर्थः स्यादेवञ्च माभ्यामित्यादौ लोपानापत्तिस्तदाह। अत एवेति। भध्येऽसम्बन्धादेवेत्यर्थः। उभयोरपीति लघ्वलघूच्चारणयोरपीत्यर्थः। न चेति। एवमित्यस्य शेषः। समाधत्ते। लघुप्रयत्नस्यैवेति। परिशेषादेतत्सिद्धम्। हलि विधानाभावेन। लघुप्रयत्नस्य विधानाभावेनेत्यर्थः। ननु हलीतिसूत्रन्न ऋषिमात्रतात्पर्यकमपि तु नित्यार्थमत आह। विकल्पस्येति। अत्र चेति। हलीति सूत्रे चेत्यर्थः। फलाभावादिति। वकारानुवृत्तेः फलाभावादित्यर्थः। अस्मिन्नर्थे सौचनिर्हेशस्य साधकत्वमाह। अन्यपर इति। सौत्रत्वादीति। आदिना निपातनादिपरिग्रहः। तदाहेति। तदेतत्सर्वं हृदि निधायाह। लघ्वलघूच्चारणस्येति। अत्र लघ्वलघूच्चारणेति सर्वेषामित्यनेन लभ्यते। रोऽसुपीत्यत्र यत्रसञ्यप्रतिषेधपरत्वेन व्याख्यानन्तत्फलमाह पर्युदासेहीति। एवञ्च लक्ष्यानुरोधान्नीरवं युक्तमेव। ननु सुबन्तातिरिक्ते शब्दे परे न पूर्वोक्तान्यासप्रतिव्यासीति पर्युदास एव लाघवादुचित इत्यत आह। उक्तमेकेति। यदि सप्तमीनिर्हिष्टेऽपि तदन्तविधिः स्यात्तदा सुपि चेत्यत्रापि तदापत्तौ दीर्घानापत्तिरिति भावः। प्रत्ययग्रहणपरिभाषायाः प्राप्तिरपि नेत्याह। लक्ष्यानुरोधेनेति। अत एव। लक्ष्यानुरोधस्वीकारादेव। अन्यथा रदाभ्यां परं यदिष्टान्तमित्यर्थापत्त्या दृषत्तीर्ण इत्यत्र धातुतकारस्यापि नत्वापत्तिः। न चात्र प्रत्ययग्रहणे चापञ्चम्या इत्यनेन प्रत्ययग्रहणपरिभाषाया निषेधान्न निष्ठान्तमित्यर्थसम्भव इति वाच्यम्। अस्यापि वचनस्येष्टविशेषणविशेष्यभावतात्पर्यग्राहकत्वात्। आतिदेशिकस्येति। अत्र अहः सर्वैकदेशेति सूत्रेण रात्रिशब्दान्तद्वन्द्वादच् प्रत्ययः। एकदेशविकृतन्यायेन च रात्रिशब्दत्वम्। ननु नचोदाहरणमादरणीयमिति। अभियुक्तोक्तेरिदमयुक्तमत आह। नलोपः प्रातिपदिकान्तेतिसूत्र इति। तत्र हि। अहः अहोभ्यामित्यत्र रुत्वरत्वयोरसिद्धत्वेन

नलोपमाशङ्क्याह नित्यस्याङ्ग्याऽसिद्धत्वस्य वारणे प्रामाणभाष्ये उपन्यस्तम्। न हि रूपराचरथन्तरेषु रौ रे वा विशेषोऽस्तीति। ननु समासान्तस्य राचिशब्दविकारत्वाभावादेकदेशविकृतन्यायेनानुपपन्नमत आह। राचिशब्दान्तसमासादिति। इन्द्रादित्यर्थः। तत्पुरुष इति। द्वयोर्लोप इति तत्पुरुष इत्यर्थः। अनीयरीति। एवं सति करणीयमित्यत्र दीर्घापत्तिः। ननु नात्र रेफस्य तन्मात्रलोपविधायकशब्देन लोप इत्यत आह। चचारेत्यादाविति। न चात्रापि कथन्तत्त्वमिति वाच्यम्। अभ्यासपदात् तत्तद्धातुसम्बन्धिनो विभिन्नस्याभ्यासस्य प्रतिलक्ष्यं लक्षणोपप्लवन्यायेन बोधात्तत्वमस्तीत्याशयात्। न चात्र सत्यपि दीर्घे ह्रस्व इति सूत्रेण ह्रस्वादेशे रूपसिद्धिरस्तीति वाच्यम्। आङ्क्त्वात्पर्जन्यवल्लक्षणन्यायेन ह्रस्वे ततो दीर्घे लक्ष्ये लक्षणस्येति न्यायेन पुनर्ह्रस्वानापत्तेरिति भावः। मूलोक्तरीत्या व्याख्याने णिजन्तात्कर्मण्यण्युपपदसमासे द्वृत्तिद्वयप्रसङ्गाल्लाघवाभिप्रायेणाह। भाष्ये त्विति। न च समानाधिकरणानामेव बहुव्रीहिविधानाद्व्यधिकरणबहुव्रीहिरनुपन्न इति वाच्यम्। सप्तमीविशेषण इति सूत्रेण सप्तम्यन्तस्य पूर्वनिपातविधानाल्लिङ्गाद्यधिकरणबहुव्रीहेरपि साधुत्वज्ञापनात्। ढ्यग्रहणेनेति। रग्रहणन्तु न ज्ञापकम्। पुना रमत इत्यत्र चारितार्थ्यात्। तत्तच्छास्त्रेति। सिपि धातोरिति शास्त्रहो ढ इति शास्त्राभ्यामित्यर्थः। न चैवमपि संयोगान्तस्येति सूत्रस्यासिद्धत्वमपरिहृतमिति वाच्यम्। नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथेति रामायणप्रयोगदर्शनेन तत्राप्येवमेव कल्पनात्। यत्तु, हल्ङ्याबितिसूत्रे मनोरमायां हल्ङ्यापः सोरिति सूत्रयितुमुचितमित्युक्तन्तत्र शब्दरत्ने सुपदन्तिस्योरप्युपलक्षणमन्यथाऽबिभा राज्यमित्यत्र संयोगान्तलोपस्यासिद्धत्वाद्दीर्घत्वन्न स्यादित्युक्तमिह च दीर्घमिति सिद्धत्वमुच्यते तेन विरोध इति। तन्न। उक्तरामायणप्रयोगेण विभक्त्यवयवमात्रसम्बन्धिसंयोगान्तलोपस्य सिद्धत्वकल्पनात्। अच इत्येवेति। अचश्चेति परिभाषया लब्धमित्यादिः। व्याख्यानादिति। यदि परेण णकारेणाग्रहणं स्यात्तदा हल्रूपाणि फलाभावादच्तात्पर्यकमेवाणग्रहणमविष्यतीति तदभावेऽप्यचश्चेति परिभाषयैव तल्लिङ्गिर्भविष्यतीत्येवंरूपादित्यर्थः। परस्परविरोधेति। विविधं यङ्मनन्तदत्र विवक्षितमेवञ्च विरोधलाभ इति भावः। तु-

ल्यबलविरोध इत्येतत्परिशेषसिद्धमित्येतदुपपादयति। तत्र नित्यस्येति। सम-
र्पणञ्च स इति। अत्र चो वाक्यालङ्कारे। यदुक्तम्न्यायेनेति ततफलमाह। क्व चि-
त्क्वेवलेति। न्यायद्वयोपपत्तिमाह। तत्र युगपदिति। ल्वजादिवदिति। यथा
ण्वुल्तृचौ पर्यायेण भवतस्तथा पूर्वपराविपि पर्यायेण भवेतामित्यत्र यदा पूर्वशा-
स्त्रप्रवृत्तिस्तदा योऽप्राप्तांशस्तत्पूरणम्परेण क्रियते इति नियमः फलितो भव-
ति। पूर्वशास्त्रस्य चैतद्विषयाविषयकत्वं कल्पनीयम्। लौकिकदृष्टान्तेन
पुनः प्रसङ्गन्यायमुपपादयति। यद्वेति। लक्ष्यप्रेष्ययोः लक्ष्योपकारकत्वा-
देवं व्यवहारः। अप्रतिपत्ताविति। अप्रवृत्तावित्यर्थः। तत्र क्ङिति। पर-
स्मिन्क्ङिते। तातङि इति। क्ङित इति शेषः। पुनर्द्विरिति। स्थानिवद्भावेन
हित्वात्। अत्र के चित्। एवं सत्यचश्चेतिसचस्थभाष्यकैयटविरोधः। तथाहि।
यद्यचश्चेति सूत्रमिको गुणवृद्धी इतिसूत्रवदत्र इत्यस्य षष्ठ्यन्तस्योपस्थापकन्त-
दोकालोजितिसूत्रेऽजिति किमर्थमित्याशयेन अथ पूर्वस्मिन्योगेऽज्ग्रहणे सति
किम्प्रयोजनमिति भाष्ये उक्तम्। अत्राज्ग्रहणे सतीति मध्यमणिन्यायेनो-
भाभ्यां संबध्यते।एवञ्च सत्यज्ग्रहणे पूर्वस्मिन्योगेऽज्ग्रहणे किम्प्रयोजनमित्यन्वयः।
अज्ग्रहणं संयोगाच्चसमुदायनिवृत्त्यर्थम्। अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थम्।
अच्चसमुदायनिवृत्त्यर्थञ्च। संयोगनिवृत्त्यर्थन्तावत्। प्रतच्य। प्ररच्य। क्ङस्य पिति
क्ङिति तुङ्माभूत्।अत्र कैयटः।यथा प्रत्याहारेऽनिर्दिष्टा आकारादयो दीर्घप्लुतसंज्ञे
लभन्ते तथा संयोगोऽपि क्ङस्संज्ञः स्यादिति तुक्प्रसङ्गः॥ अच्चसमुदायनिवृत्त्यर्थम्।
तितउच्छत्रम्। तितउच्छाया। दीर्घात्परदान्ताद्देति विभाषा तुङ्माभूत्। अत्र
वैकल्पिके तुकि तदभावे क्ङस्लक्षणस्तुक्कस्मान्न भवतीत्याशङ्क्याङ् कैयटः।
परत्वाद्दीर्घलक्षणे वा तुकि सति सकृद्गतौ विप्रतिषेध इति न्यायाद्ध्रस्वलक्षणः
पुनर्न प्रवर्त्तते। न चैवं विधे विषये पुनः प्रसङ्गविज्ञानमस्ति। नित्यविरोधा-
त्पूर्वेण परस्य बाधप्रसङ्गात्। यत्र हि पूर्वो विधिः परन्न बाधते तत्र पुनः प्रसङ्ग-
विज्ञानं क्व चिदाश्रीयते इति। यत्र पुनः प्रसंगविज्ञानन्यायेन पूर्वप्रवृत्तौ पर-
शास्त्रप्रवृत्तिवैयर्थ्यप्रसङ्गस्तत्र सकृद्गतिन्याय एव। यत्र परस्मिन्क्ङिते पूर्वप्रवृत्ता-
वपि न परप्रवृत्तिवैयर्थ्यन्तत्र पुनःप्रसङ्गन्यायप्रवृत्तिरिति भावः। यथा भिन्धकी-
त्यत्र परत्वाद्धौ क्ङितेऽकच्प्रवृत्तावपि न धिभाववैयर्थ्यमिति पुनः प्रसङ्गन्यायेनाक-

ज् भवति। एवञ्च भिन्धीत्यत्र तु परत्वात्तातङि कृते यदि पुनः प्रसङ्गविज्ञान-न्यायेन धिभावस्तदा तातङ्प्रवृत्तिवैयर्थ्यमेवेति नायम्पुनः प्रसङ्गन्यायविषय इत्याहुः॥ अत्रापरे समादधिरे। यथाऽकृतकारि खल्वपि शास्त्रमग्निवत्। कृत-कारि खल्वपि शास्त्रम्यज्जन्यवदिति द्वौ न्यायौ लक्ष्यानुरोधाद्व्यवस्थितौ तथे-मावपि न्यायौ लक्ष्यानुसारिणावित्याशयेन भिन्धीत्यत्र परस्य तातङः प्रवृत्तेर्वै-यर्थ्यप्रसङ्गेपि पुनः प्रसङ्गन्यायप्रवृत्तिराश्रिता। न चैवमचश्चेतिसूत्रभाष्यविरोध इति वाच्यम्। ई च द्विवचन इति सूत्रभाष्यप्रामाण्येन परशास्त्रप्रवृत्युत्तरम्पूर्व-शास्त्रप्रवृत्तौ परशास्त्रवैयर्थ्याभावेऽपि क्वचित्सङ्गतिन्यायस्य प्रवृत्तिस्वीकारात्। तच्च यद्यपि अच्चो ते इन्द्र पिङ्गले इत्यत्र परत्वादीकारादेशे पुनर्नुमः प्रवृत्तावपि ने-कारप्रवृत्तिविरोधस्तथापि सङ्गतिन्यायान्न नुमित्युक्तभवन्मते तत्र पुनः प्रसङ्ग-न्यायस्यैव विषयतासत्त्वान्नाष्टविरोधः स्पष्ट एव तथा साच्चात्प्रभृतीनि चेति सूत्रे भाष्ये उक्तम्। च्व्यन्तस्य प्रतिषेधो वक्तव्यः। लवणीकृत्य। न वा पूर्वेण कृतत्वात्। न वा वक्तव्यम्। किं कारणम्। पूर्वेण कृतत्वात्। अस्त्वनेन विभाषा पूर्वेण नित्या भविष्यतीति। तत्र कैयटः। लवणीकृत्येति। अत्र हि परत्वादनेन विभाषा प्राप्नोति। नित्या च गतिसंज्ञेष्यते। पूर्वेणेति। पुनः प्रसङ्गविज्ञाना-दिति भाव इत्याह। यदि यत्र पुनः प्रसङ्गविज्ञानन्यायेन पूर्वप्रवृत्तौ परशास्त्र-प्रवृत्तिवैयर्थ्यप्रसङ्गस्तत्र सङ्गतिन्याय एवेति नियमस्वीकारस्तदा पूर्वेणनित्या भविष्यतीति भाष्यविरोधः स्पष्ट एवेति द्वयोरप्युक्तन्याययोर्लक्ष्यानुसारेण प्रवृत्ति-कल्पनमेव वरन्न नियम इति दिक्। अष्टाध्यायीपाठकृतपरत्वमेवेति। एतेन यथोद्देशपक्षे परिभाषायोः पौर्वापर्यन्न तु कार्यकालतायामिति कैयटोक्तन्न युक्तमिति सूचितम्। तत्र साधकमाह। अत एवेति। कार्यकालपक्षेप्यष्टा-ध्यायीपाठकृतपरत्वस्य नियामकत्वादेव। ङमो ह्रस्वादित्यादाविति। आदिना ङः सीत्यस्य परिग्रहः। परिभाषयोः। तस्मिन्निति तस्मादित्यनयोः। सं-ज्ञाविषये त्वाह। संज्ञानान्त्विति। विरोधप्रतिसन्धानमिति। यथोद्देशे विरो-धप्रतिसन्धानन्तूद्देशीयपरत्वस्य नियामकत्वादेव। अत्र प्रमाणमाह। अत एवे-ति। यदि संज्ञाविषयेप्यष्टाध्यायीपाठकृतपरत्वन्नियामकं स्यात्तदा प्रगृह्यसंज्ञा-या अयादिः परत्वोक्तिरसंगतैव स्यादिति भावः। नन्वियमेव युक्तिः परि-

भाषाविषयेऽप्यस्त्वित्यत आह । परिभाषाणान्त्विति । तत्पक्षे । कार्यकालपक्षे । ननु गुणानाञ्च परार्थत्वादिति न्यायेन विप्रतिषेधे परं कार्यमिति परिभाषायाः परिभाषाविषये नियामकत्वङ्कथमित्यभिप्रायेणाशङ्कते । यद्यपीति । कार्यमात्रग्रहणादिति । कार्यमात्रग्रहणस्य सुनिश्चयसम्मतत्वादित्यर्थः । प्रसङ्गादाह । एवमिति । यथैषा वाक्यभेदेन व्यवस्थापिका तथेत्यर्थः । अन्तरङ्गत्वज्ञाने बहिरङ्गत्वेन यो विवक्षितस्तेन विरोधप्रतिसन्धाने च परिभाषाप्रवृत्तेः । उपसंहरति । एवञ्चेति । उपपादितरीत्या व्यवस्थापकत्वे चेत्यर्थः । तदेतदुपपादयति । विणाद्यामिति । सूत्रोक्तरीत्येति । लोपे रत्वस्यैवेहेश्यतावच्छेदकत्वे नोपादानात्तस्य चाल्वृत्तित्वादिति भावः । स्थानिवद्भावप्रवृत्तिमभ्युपेत्याह । स्थानिवत्त्वेनेति । तदप्राप्तेः । उत्वाप्राप्तेरित्यर्थः ॥ एतत्तदोरिति सूत्रे त्यदादीनीत्यनेनैकशेषप्राप्तिमाशङ्क्याह । अनुकार्येति । सूत्रे सौत्रत्वादेकशेषाप्रवृत्तावपि हृत्तौ एतत्तदोर्यः सुस्तस्येत्यत्रैकशेषवारणमेव बोध्यम् । सूत्रे पञ्चम्यभावात्परमित्यवक्तुमशक्यमित्यभिप्रायेण सूत्रे श्रूयमाणा या एतत्तदोरिति षष्ठी तदुपपत्तयेऽनन्तरपदस्यैवाध्याहारो न तु पूर्वसमीपादिपदाध्याहार इति दर्शयति । एतत्तदोर इत्यर्थ इति । अनन्तर इत्यस्यानध्याहारेऽनञ्समासग्रहणस्य वैयर्थ्यापत्तेः पूर्वस्य तस्याभावात् । न चैवन्तदपि त्यज्यतामितावता लाघवमेवेति वाच्यम् । यो विभुर्विश्वमखिलं स्वीकृत्य समदृष्टिताम् । सदा रक्षति रामः स ममास्तु शरणं हरिरिति पद्ये रामः स इत्यत्रातिव्याप्तिप्रापत्तेः । व्याख्यानादिति । उत्तरत्र प्रथमैकवचनस्यैव सम्भवेन पूर्वसूत्रेऽपि तस्यैव ग्रहणमित्याशयमूलकादित्यर्थः । पूर्वपदार्थप्रधानत्वादिति । अस इत्यस्मात्तद्भिन्न इत्याकारकबोधस्य नैयायिकसम्मतत्वात् । युक्तं चैतत् । नञो भेदवाचकत्वे नीलो घट इत्यादौ तादात्म्यसम्बन्धेन नीलपदार्थप्रकारकघटविशेष्यकबोधस्य सर्वानुभवसिद्धतया प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति न्यायेन तादात्म्यसम्बन्धावच्छिन्ननीलाभावप्रतीतिरुपपद्यते नञ्समभिव्याहारे । न चैवं न ह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवतीति भाष्योक्तेरभाववद्विशेष्यकस्य बोधस्य स्वीकारे लोष्टाद्यानयनापत्तिरनिष्टा प्राप्नोतीति वाच्यम् । घटादिपदानां घटत्वादिना यावद्घटबोधकत्वेऽपि प्रकरणादिनाऽत्र घटोऽस्तीत्यादौ वस्य चिद् घटस्यैव बोध-

वद्ब्राह्मणादिपदादपि प्रकरणादिना ब्राह्मणभिन्नक्षत्रियस्यैव बोधसम्भवात्। न चासमस्तस्य नञो भेदार्थकत्वे नञर्थभेदस्याश्रये पदप्रतिपाद्ये प्रकारतया भानात्पटो न घट इत्यत्रानुपपत्त्यभावेप्यघटमानयेत्यादावनुयोगिवाचकपदाभावाद्भेदस्यैव प्राधान्येन भानापत्तिरिति वाच्यम्। तत्र नञो भेदवति लक्षणास्वीकारात्। न च भेदस्य पदार्थैकदेशतया तत्र प्रतियोगिनो घटादेरन्वयासम्भव इति वाच्यम्। चैत्रस्य नप्तेत्यादाविव पदार्थैकदेशेपि ससम्बन्धिकत्वे नान्वयसम्भवात्। न च नञो भेदवाचकत्वे न ब्राह्मणैरेतैरुपद्रुतमित्यादौ प्रतियोग्यनुयोगिवाचकपदयोः सामानाधिकरण्यात्समानविभक्तिकत्वानुपपत्तिरिति वाच्यम्। प्रतियोग्यनुयोगिनोरभेदान्वयबोधोपयोगिकाङ्क्षायामिव नञा भेदबोधनात्। अन्यथा भूतले न घट इत्यत्रापि भेदबोधापत्तिः न च नञो भिन्ने लक्षणाकल्पने तदेकदेशे प्रतियोगिनोऽन्वयकल्पने गौरवमिति वाच्यम्। यजतिषु येयजामहं करोति नानुयाजेषु इत्यत्र भिन्नलक्षणाया आवश्यकतया अन्यत्रापि तस्याः कल्पनात्। अत्र हि यजतिशब्दो यागवचनः। येयजामहमिति। हकारान्तानुकरणादुच्चारणार्थकाकारान्ताद्वितीया। तस्य करणं च तच्छब्दवन्मन्त्रोच्चारणम्। तथा चानुयाजभिन्नेषु यागेषु येयजामहशब्दवन्मन्त्रप्रयोगरूपैकार्थविधाने सत्येकोद्देश्यकैकविधेयकार्थबोधजनकत्वतयैकवाक्यतानिर्वाहः। यद्यत्र नञोऽत्यन्ताभावार्थकत्वं स्यात्तदावाक्यभेदः स्यात्। न च नञो भेदे शक्तिर्भिन्नैवेत्यत्र विनिगमगमनाविरह इति वाच्यम्। भेदत्वस्याखण्डोपाधितया तस्य स्वरूपतः शक्यतावच्छेदकत्वात्। यद्यप्यस्मिन् पक्षे नञ्समासग्रहणं पूर्वपदार्थप्राधान्येऽपि उत्तरपदार्थप्राधान्यप्रयुक्तं कार्यं भवतीत्यर्थज्ञापकमित्यस इत्यादौ सर्वनामकार्यानुपपत्तिः परिहर्तुं शक्यते। तथापि गौरवमतः पक्षान्तरमाह। उत्तरपदार्थेति। आरोपितत्वमारोपविषयत्वरूपमथवारोपमात्रम्। विषयत्वं तु संसर्ग इति पक्षेऽस इत्यत्र सर्वनामकार्यानुपपत्तिर्नास्ति अनञ्समासग्रहणं चरितार्थम्। ननु सत्येवेत्यवधारणपरतया व्याख्यानन्न सर्वसम्मतमत आह। वृद्धैर्व्याख्यातमिति। एनेन तदनुवृत्त्यैव सर्वैष्टसिद्धाववधारणपरतया व्याख्यानमनर्थकमिति सूचितम्॥

॥ इति स्वादिसंधिः ॥

अथ स्वादिसंधिनिरूपणानन्तरम् प्रसङ्गसङ्गत्या प्रातिपदिकसंज्ञानिरूपणमिति ध्वनयितुमाह । स्वाधिविधाविति । प्रातिपदिकाधिकारादिति । एतेन प्रातिपदिकत्वस्य स्मरणे प्रसङ्गनिर्वाहके स्वादिनिरूपितस्य स्वविध्युद्देश्यतावच्छेदकत्वरूपसम्बन्धस्य नियामकत्वं सूचितम् । न च ङ्याप्प्रातिपदिकादिति सूत्रे ङ्यापोः प्रथममुपादानात्तयोरप्यधिकारत्वेन प्रथमं तयोरेव निरूपणमुचितमिति वाच्यम् । ङ्याब्ग्रहणस्यान्यार्थतायां वक्ष्यमाणत्वात्तयोरप्युपपत्तौ प्रातिपदिकत्वस्योद्देश्यतावच्छेदकत्वादित्याशयात् । अधातुरप्रत्ययइत्यत्र तत्पदहृदयप्रतिपाद्यार्थविशिष्टस्यार्थवत उद्देश्यत्वे नाश्रयणाद्विशेषज्ञानस्याप्रामाण्यज्ञानानास्कन्दितस्य सम्पत्त्यर्थं तत्पदहृदयं तावदाचष्टे । अधातुरित्यादिरिति । न च धातुपदस्य पुल्लिङ्गत्वात्तेन नञ्समासस्यापि पुंस्त्वात्तदर्थविवरणवाक्ये नपुंसकत्वानुपपत्तिरिति वाच्यम् । धातुभिन्नमित्यस्य फलितार्थत्वात् । आरोपितो धातुरित्येव तु वाक्यार्थः लाघवादिति । असमर्थसमासस्य वाक्यभेदस्य चाकल्पनेन लाघवादित्यर्थः यद्यपि सूत्रस्थमप्रत्ययपदमेकमेव तथापि तदावृत्त्या मूले व्याख्यातं तत्राह । आवर्तित इति । प्रत्ययस्य यत्र संज्ञेति । प्रत्ययोद्देश्यकसंज्ञाविधावित्यर्थः । ज्ञापकस्य सजातीयापेक्षत्वादिति भावः । अत्र सूत्रेऽर्थशब्दोऽभिधेयवाचक उपात्तो न प्रयोजनवाचकः सर्वस्यापि यत्किञ्चित्प्रयोजनवत्त्वादर्थवद्ग्रहणस्यानर्थक्यप्रसङ्गात् । एवञ्च शक्त्या यत्किञ्चिदर्थविशिष्टं यत्तत्प्रातिपदिकसंज्ञं स्यादिति सूत्रार्थः । न चार्थवद्ग्रहणमत्र वर्णानामप्रत्येकं संज्ञा माभूदित्येवमर्थं वाच्यम् सत्याञ्च तस्यान्धं वनमित्यादौ नलोपः प्रातिपदिकान्तस्येति नलोपः प्रसज्येतेति भाष्ये उक्तम् तदेतत्कर्मणि द्वितीयेत्यादिशास्त्रस्य द्वेरुकयोरित्यादिशास्त्रस्य चैकवाक्यतया एकत्वादिविशिष्टकर्मादिष्वेव स्वादयो भवन्तीत्येवन्नियमे नोपपद्यते संख्याकर्मादेरभावादिति कथन्नलोपप्राप्तिरिति वाच्यम् । प्रकृतार्थापेक्षया प्रत्ययनियमेऽव्ययादिभ्य इव प्रतिवर्णं स्वाद्युत्पत्तिः स्यादित्याशयात् । यदा तु सामान्यापेक्षो नियम आश्रीयते तदा दश दाडिमानि षडपूपाः कुण्डमजाजिनम्यललपिण्डमधरोरुकमेतत्कुमार्याः स्फ्यक्रतस्य पिता प्रतिशीन इत्यत्यानर्थकस्य समुदायस्य व्यावृत्त्यर्थमर्थवद्ग्रहणम् । समासग्रहणन्त्वर्थवत्समुदायव्यावृत्त्यर्थमिति स्फटीभविष्यति । अधातुरिति किम्।

अहन्। अत्र नलोपः स्यात्। न च प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासः स्यादिति वाच्यम्। प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासाप्रवृत्तौ न ङिसम्बुद्ध्योरिति सूत्रस्थसम्बुद्धिग्रहणस्य ज्ञापकत्वसम्भवात्। न च धातोः प्रातिपदिकत्वाभावे सुपो धातुप्रातिपदिकयोरिति सूत्रस्थधातुग्रहणमेव ज्ञापकमभविष्यतीति वाच्यम्। श्ये नायत इत्यादौ क्यङ्लस्य प्रत्ययान्तपर्युदासेनाप्रातिपदिकत्वात्तस्यावश्यकत्वेन ज्ञापकत्वासम्भवात्। अप्रत्यय इति किम्। काण्डे कुड्ये। अत्र हि प्रातिपदिकत्वे ह्रस्वत्वापत्तिर्दोषः। ननु पर्जन्यवल्लक्षणप्रवर्त्तत इति न्यायेनान्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागेव ह्रस्वत्वे कृते ततः सुबुत्पत्तावेकादेशेऽपि लक्ष्ये लक्षणस्येति न्यायेन पुनर्ह्रस्वत्वन्न भविष्यति। विकारकृतो लक्ष्यभेदस्तु न लक्ष्ये लक्षणेति न्यायप्रवृत्तिप्रतिबन्धकः। उदवोढामित्यत्रादावकारस्याकारे तस्यौकारे ढत्वादीनामसिद्धत्वात्पुनरोकारस्य प्राप्तायां हलन्तलक्षणवृद्धेरनेन न्यायेन वारणपरभाष्यप्रामाण्येन तादृग्भेदस्यानाश्रयणादिति चेन्न। यद्धर्मावच्छिन्नस्य पूर्वकालिकप्राप्तिकर्तृशास्त्रबोध्यकार्यविधावुद्देश्यता तद्धर्मसामान्याश्रयोद्देश्यकविकारस्यैव भेदानियामकत्वकल्पनात्। यद्वोदवोढामित्यत्र हलन्तधात्ववयववाच्त्वमुद्देश्यतावच्छेदकान्तर्धर्मसामान्यावच्छिन्नसम्बन्धित्वमेव पुनःप्राप्तवृद्धेरिति। न चैवमूखतुरित्यत्र पूर्वमभ्यासस्य ह्रस्वत्वे तत एकादेशे कृते पुनःप्राप्तह्रस्वत्वस्य नाभ्यासमात्रावयवः स्यानीति लक्ष्ये लक्षणस्येति न्यायेन समाधानपरग्रन्थविरोध इति वाच्यम्। अभ्याससंज्ञाविधौ धात्ववयवप्रथमैकाचो ग्रहणेन विधीयमानं यद् द्विर्वचनन्तत्पूर्वभागस्योद्देश्यतया ह्रस्वत्वस्य तदच्स्थानिकत्वेन तद्धात्ववयवाच्स्थानिकैकादेशस्यापि न लक्ष्यभेदसम्पादकत्वमित्याशयात्। काण्डे कुड्य इत्यत्र तु पूर्वप्रातिपदिकान्त्यत्वविशिष्टमच्त्वं ह्रस्वत्वविधावुद्देश्यतावच्छेदकान्तर्धर्मावच्छिन्नमात्रसम्बन्धित्वन्नैकादेशस्य किन्तु प्रकृत्यवयवप्रत्ययसम्बन्धित्वमित्येतादृग्भेदमादाय लक्ष्यभेदस्याश्रयणात्। अत्र च काण्डे कुड्ये इत्यत्र प्रत्ययान्तपर्युदासप्रयोजनप्रदर्शनपरभाष्यस्यैव साधकत्वमाश्रीयते। युक्तञ्चैतदन्यथा अतति यत् कुलन्तदम्। कुड्यस्याम् कुड्यम् तस्यै कुड्यायेत्यत्र सवर्णदीर्घे कृते ह्रस्वो नपुंसक इति ह्रस्वत्वानापत्तिः स्यात्। तथाविवक्षायान्तु कुड्यशब्दान्त्यावयवाच्त्वम्पूर्वकालिकप्राप्तिकर्तृ ह्रस्वत्वोद्देश्यतावच्छेदकान्तर्धर्माश्रयमात्रस-

स्मन्धित्वनोत्तरकालिकविकारस्येति लक्ष्यभेदो भवत्येव । न चैवमपि काण्डे कुड्य इत्यत्रैकादेशे विशिष्टस्य प्रत्ययान्तभिन्नत्वं शोस्त्राश्रितम्पूर्वान्तवद्भावेनेति ह्रस्वत्वप्राप्त्येवेति वाच्यम् । ह्रस्वो नपुंसके यत्तस्येति न्यासेन सिद्धे प्रातिपदिकग्रहणात्तत्प्रधानप्रातिपदिकस्यैव ग्रहणमिति स्वीकारात् । अत्र भाष्ये अप्रत्ययग्रहणं शक्यमकर्तुम् । कस्मान्न भवति काण्डे कुड्ये इति । कृत्तद्धितग्रहणन्नियमार्थम्भविष्यति कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति नान्यस्येत्युक्तम् । अत्र कैयटः । यद्यपि कृत्तद्धितग्रहणमित्युक्तन्तथापि तद्धितग्रहणमेव नियमार्थम् । कृदग्रहणन्तु प्रतिषिद्धार्थम् भिद् छिदिति । अत्र ह्यधातुरिति प्रतिषेधप्रसङ्गः । न च प्रत्ययान्तस्य चेत्तद्धितान्तस्यैवेति नियमशरीरम्पर्यवसितन्तथा सति कारक इत्यत्र प्रातिपदिकत्वन्न स्यात् । कृदग्रहणं हि मध्येऽपवादन्यायेनाधातुरिति प्रतिषेधस्यैव बाधकम्भविष्यतीति वाच्यम् । बाध्यमानान्यचिन्तायां एव कारके इत्यादिनिर्देशात्प्रकृते स्वीकारात् । वस्तुतस्त्वेवम्भाष्यतात्पर्यवर्णने कृत्तद्धितग्रहणमित्युभयोपादानमनर्थकमापद्यतेति धातोः प्रत्ययान्तस्य च चेत्कृत्तद्धितान्तस्यैवेति नियमाकारे तात्पर्यम् । एवञ्चाधातुग्रहणमपि न कार्यम् अर्थवदग्रहणन्तु पर्युदासबलाद्यादृशोऽर्थवत्त्वलाभो न भवति तादृग्बोधनार्थङ्कार्यमेव । अत एव प्रत्ययपर्युदासो भाष्ये नोक्तः । नन्वेवं सति तद्धितग्रहणस्यास्यापत्यमित्रियानित्यादौ प्रत्ययपर्युदासेन प्रातिपदिकत्वाप्राप्त्या तत्प्रापकतया चारितार्थ्यान्नियमार्थत्वानुपपत्तिरिति शङ्क्यम् । तादृगर्थवत्त्वमेवाह । अत्र सूत्र इत्यादि । एवं सति सूत्रद्वयेऽप्येकस्यैवार्थवत्त्वस्याश्रयणे लाघवमपि । यदि मनोरमोक्तरीत्योत्तरसूत्रे एकार्थीभावेन लौकिके प्रसिद्धत्वरूपप्रशस्तार्थवत्त्वरूपं विवक्षितन्तदा प्रत्ययग्रहण इति परिभाषायाः प्रयोजननिरूपणावसरे देवदत्तो गार्ग्येत्यस्य कृत्तद्धितेतिसूत्रेण यञन्तत्वात्प्रातिपदिकत्वापत्तिरन्यथा स्यादित्युक्तभाष्ये तत्र सङ्गच्छेत तावत्समुदाये एकार्थीभावविरहात् । ननु देवदत्तो गार्ग्येत्यस्य समुदायस्य पारिभाषिकार्थवत्त्वमस्ति न वा । आद्ये सिद्धान्तेऽपि वक्ष्यमाणरीत्या समासग्रहणकृतनियमेनावारणात् पूर्वसूत्रेण प्रातिपदिकत्वन्दुर्वारम् । अन्त्ये उत्तरसूत्रे तदन्तविध्यर्थमर्थवत्पदानुवृत्तेरावश्यकतयाऽर्थवत्त्वाभावस्य सत्त्वादुत्तरसूत्रस्याप्यप्राप्तिरिति प्रत्ययग्रहणप-

रिभाषाप्रयोजनकथनपरभाष्यभङ्गप्रसङ्गोऽपि विरुध्येत। किञ्च प्रत्ययग्रहणपरिभाषा यावन्न सिद्धा तावत्कृतेऽर्थवत्सूत्रे प्रत्ययान्तत्वस्यापि यथा कथञ्चिद् ग्रहणं स्यादेवञ्च समासार्थालौकिकविग्रहवाक्यस्य प्रत्ययान्ततया पूर्वसूत्राप्राप्तेः समासग्रहणमुत्तरसूत्रे विध्यर्थमवतिष्ठतीति नियमकथोच्छेद इति चेन्न। उत्तरसूत्रेऽर्थवत्पदानुवृत्तौ केवलकृत्तद्धिते पारिभाषिकार्थवत्त्वाभावादभेदेन विशेषणविशेष्यभावानुपपत्तिरिति कृत्तद्धितांशे तदन्तविधौ तद्विशेषणार्थवत्पदांशेऽपि तदन्तविधौ बाधकाभावेनार्थवदन्तं यत्कृदन्तन्तद्धितान्तञ्चेत्यर्थस्वीकारादर्थवान्यो गार्ग्यशब्दस्तदन्तत्वस्य प्रत्ययग्रहणपरिभाषाभावे तद्धितान्तत्वस्य च देवदत्तो गार्ग्येतिसमुदाये सत्त्वेन प्रातिपदिकसंज्ञा प्राप्नोतीति परिभाषाप्रयोजनकथनपरभाष्यभङ्गप्रसङ्गतिरित्यभिप्रायात्। परिभाषास्वीकारे तु विशिष्टस्यार्थवदन्तत्वेऽपि तद्धितान्तत्वाभावान्न दोषः। कर्त्ता गार्ग्य इत्यादावर्थवदन्तत्वं व्यपदेशिवद्भावेन बोध्यम्। न चैवमपि पूर्वोक्तरीत्या समासग्रहणस्य नियमार्थत्ववर्णनाभङ्गप्रसङ्गतिरिति वाच्यम्। पूर्वसूत्रमप्रत्ययेत्युत्तरसूत्रे प्रत्ययग्रहणपरिभाषायाः प्रयोजनभाष्यकृतोक्तन्तदभिप्रायेण समासग्रहणस्य नियमार्थत्ववर्णनात्। तथाहि। प्रथमसूत्रे येषामवयवा अर्थवन्तस्तेषां समुदायोऽप्यर्थवान्। यथैकस्मिन्खौलदाने समर्थस्तेषां समुदायः खारीशतमपि समर्थन्तौलदान इत्यभिप्रायेण दश दाडिमानीत्यादिसमुदाये भङ्गं कृत्वा समाधानङ्कृतन्तत्प्रत्ययग्रहणपरिभाषासत्त्वमभिप्रेत्यैवान्यथा दश दाडिमानीत्यादिसमुदायस्य प्रत्ययान्ततया प्रत्ययान्तपर्युदासेन तद्ग्राहकत्वेन भङ्गासमाधानयोर्निर्हेतुकापत्तिरेवञ्च पूर्वसूत्रविषये परिभाषयानुगृहीत एव पूर्वसूत्रमवर्त्तत इत्यभिप्रायः कल्पनीयः। एवञ्च समासार्थालौकिकविग्रहवाक्यस्य प्रत्ययान्तत्वाभावान्निषेधाप्राप्त्या पूर्वसूत्रेणैव प्रातिपदिकत्वं सिद्धमिति समासग्रहणन्नियमार्थमेव। किञ्च देवदत्तो गार्ग्य इत्यत्र तद्धितान्तत्वात्प्रातिपदिकत्वमाप्नोतीति कथनन्न परिभाषाभावाभिप्रायेण किन्तु तद्धितान्तत्वात्प्रातिपदिकसंज्ञायामपि परिभाषाप्रयोजनमिति ध्वनयितुमन्यथा प्रथमोपस्थितत्वाद्देवदत्तः पूजकेति समुदायस्य कृदन्तत्वात्प्रातिपदिकत्वापत्तिरेवोद्भाविता स्यात्। एतत्सूत्रेति। फलभूतेति पाठो न तु फलीभूतेति च्वेरसम्भवाभावात्। मधु लिङित्यादिसङ्ग्रहाय नञर्थद्वयप्रवेशः।

विभक्तीतरानपेक्षत्वञ्च विभक्तीतरविषयकज्ञानासहकारिकारणकज्ञानविषयत्वम्। एवञ्च यद्विषयकज्ञानस्य लौकिकार्थबोधजनकतायामेतत्संज्ञाफलभूतविभक्तिभिन्नविषयकं ज्ञानं सहकारि कारणन्न भवति तत्त्वरूपमर्थवत्त्वम्प्रातिपदिकसंज्ञोद्देश्यतावच्छेदकम्। न च प्रत्ययग्रहणपरिभाषया कृत्तद्धितेति सूत्रेण देवदत्तो गार्ग्येत्यस्य प्राप्तसंज्ञाव्याहृत्तावपि अर्थवत्सूत्रेण प्राप्नोति। तस्यार्थबोधजनकतायाङ्गार्ग्यशब्दप्रकृतिकप्रातिपदिकसंज्ञाप्रयोज्या या विभक्तिस्तन्भाचस्यापेक्षासत्त्वादिति वाच्यम्। एतत्संज्ञेत्यस्य यद्रूपविशिष्टस्य या संज्ञा चिकीर्षिता तत्फलभूतेत्यर्थात् तच्च रूपन्तत्तदानुपूर्वीस्वरूपम्। एवञ्चार्थवत्सूत्रसाध्यसंज्ञाफलभूतविभक्तिभिन्नकृत्तद्धितेतिसूत्रसाध्यप्रातिपदिकसंज्ञाफलभूतविभक्तेरपेक्षासत्त्वान्नातिप्रसङ्गः। अत एवैतत्संज्ञाफलभूतेति विशेषणमर्थवद्ग्रहणवति अत्र के चित्। तद्भिन्नञ्च साजात्याप्रकृतिप्रत्ययान्यतररूपमेव गृह्यते। तेन क्वचिदादेशागमादिसापेक्षत्वेऽपि न क्षतिरादेशापेक्षा यथा। अर्वन्तावितिप्रयोगवटकार्वन्शब्दस्य त्रादेशसहकारिणैवार्थबोधकतायां लोके दर्शने भवन्तावित्यादौ नुमाद्यागमादिसहकारिणैव तथा दर्शने। अत्र दम्बोध्यम्। औपगवेतिसमुदायस्य प्रातिपदिकसंज्ञायाश्चिकीर्षितायामेतत्संज्ञाफलभूतविभक्तिभिन्नतादृशसमुदायघटकस्य तद्धितप्रकृतेरपेक्षासत्त्वादव्याप्तिः। यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तदृघटकान्यत्वनिवेशेऽपि तत्रैवाव्याप्तिस्तस्मिन्यत्किञ्चित्तदृघटकवर्णस्य भेदसत्त्वात्। तादृशसमुदायघटकप्रकृत्यन्यत्वनिवेशे अव्युत्पन्नप्रातिपदिकासङ्ग्रहः। किञ्च कारयाञ्चकार हारयाञ्चकारित्यादावामन्तस्य प्रातिपदिकत्वानापत्तिस्तिङ्प्रकृतिकृञोऽपेक्षासत्त्वात्। एवन्तादृशविभक्तिभिन्नप्रत्ययानपेक्षापि वक्तुमशक्या। अजा खट्वेत्यादौ टावुत्पत्तेः प्राक् प्रातिपदिकत्वानापत्तेः। विभक्तिपदस्य प्रत्ययसामान्योपलक्षणत्वेऽपि कारकेत्यादिसमुदायघटकस्य खुलादेर्निरुक्तापेक्षासत्त्वादव्याप्तिः। तादृशप्रत्ययभिन्नत्वे सति प्रातिपदिकसंज्ञोद्देश्यघटकप्रत्ययान्यत्वस्यानपेक्षानिवेशेऽव्युत्पन्नप्रातिपदिकासङ्ग्रह इति। इदमत्र तत्त्वम्। एतत्संज्ञाफलभूतेत्यत्र विभक्तिपदमेतत्संज्ञाफलभूतप्रत्ययोपलक्षणमत एव सांकूटिनमित्यादाविनुणन्तस्यार्थबोधकतायामणोऽपेक्षासत्त्वेऽपि न क्षतिः। तस्य च प्रत्ययस्यैतत्संज्ञोद्देश्योत्तरवृत्तितया तद्भिन्नोऽपि तदुत्तरवृत्त-

त्येव गृह्यत इति कुम्भकारो मूलकेनोपदंशमित्यादावुपपदापेक्षासत्त्वेऽपि न क्षतिः। ननु तादृशप्रत्ययभिन्नोत्तरवृत्तिसामान्यानपेक्षानिवेशे कारयाञ्चकारेत्याद्यसङ्ग्रह इति चेन्न। तादृशप्रत्ययभिन्नं यदेतत्सञ्ज्ञोहेश्योत्तरवृत्तिसुप्सुप्प्रकृत्यन्यतरत्तदनपेक्षयेत्यस्यनिवेशेनानुपपत्तिपरिहारात्। अत्रैतत्सञ्ज्ञोहेश्योत्तरवृत्तित्वं सुप एव विशेषणम्। न च राम इत्यादिपदसंस्कारकाले तदुघटकरामशब्दादेर्यदा प्रातिपदिकसंज्ञा चिकीर्षिता तदा तदुत्तरवृत्तिनिरुक्तान्यतरस्य तत्राभावात्तेषामसङ्ग्रह इति वाच्यम्। एतत्सञ्ज्ञोहेश्योत्तरवृत्तिनिरुक्तान्यतरसापेक्षत्वे सत्यप्यवोधकं यदुत्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटविशिष्टत्वे सति लोकेऽर्थबोधजनकत्वरूपमर्थवत्त्वन्निवेशनीयमेवञ्च पञ्चगवेत्यस्य धनशब्दोत्तरसमुदायघटकसुपापेक्षतया पञ्चगवोच्चैरित्यत्र पञ्चगवेत्यस्य सुप्प्रकृत्युच्चैःशब्दापेक्षतया ताभ्याभिन्नत्वं रामेत्यादावुक्तमेव। न च पञ्चगवेत्यस्य धनशब्दप्रकृतिकसुपापेक्षत्वे मानाभाव इति वाच्यम्। धनशब्दप्रकृतिकश्रूयमाणसुबन्तेनैकार्थीभावस्वीकारेण सुपोप्यपेक्षायाः सत्त्वात्। उच्चैरित्यस्यैव च तत्र सुबन्ततया सुपस्तत्र नापेक्षेति प्रकृतिनिवेशसार्थक्यमिति दिक्। क्रदादीनामनर्थकानामिति। न च प्रतिष्ठानिष्ठादिशब्दघटकाङ्प्रत्ययस्याङ्कूटिनमित्यादिशब्दघटकाण्प्रत्ययस्यानर्थकः प्रसिद्ध एवेति वाच्यम्। तस्यापि प्रकृत्यर्थेनार्थवत्त्वाभ्युपगमात्। नन्वेवं पर्युदासेनैवार्थवत्त्वलाभे सिद्धेऽर्थवद्ग्रहणान्नञिवयुक्तन्यायानित्यत्वं वेः स्कन्देरनिष्ठायामिति सूत्रस्य तिङन्तेऽपि प्रवृत्त्यर्थमभिधत्तीत्याह। न चेत्यादि। भाष्यसम्मतेति। तस्य सूत्रस्य तिङन्तेऽपि प्रवृत्तेर्भाष्यानुक्तत्वात् कृत्स्वेव प्रवृत्तेर्हृत्यादिसम्मतत्वाच्च। अपि च पर्युदासस्थले सदृशग्रहणमवश्यम्भवतीत्यभिप्रायेणाकर्त्तरि च कारकेति सूत्रे भाष्येऽकर्त्तरीति कर्तृसदृशस्य कारकस्य ग्रहणात्कारकग्रहणन्न कर्त्तव्यमित्युक्तम्। ननु अर्वणस्त्रसाविति सूत्रेऽसावित्यस्य पर्युदासत्त्वे तस्य सूत्रस्य सुभिन्नविभक्तावेव प्रवृत्तिः स्यान्न चेष्टापत्तिः। अर्वत्पदमित्यत्र समासेऽप्रवृत्त्यापत्तेः। न चात्र त्रादेशप्रवृत्तौ साधकाभाव इति वाच्यम्। अर्वण इति सूत्रस्य ऋधातोर्विजन्तान्मतुपि कृते तान्ते नार्वच्छब्देन साध्यप्रयोगस्य साधनेन प्रत्याख्यानैकवाक्यतया तत्र प्रवृत्त्यनुमानादित्यत आह। दृढतरेति। अर्वणस्तृ मघोनश्च न शिष्यच्छान्दसं हि तदि-

त्यनेनार्वन्शब्दस्य छान्दसत्वादुक्तप्रयोगस्य छान्दसत्वे न लुमतेतिनिषेधानित्यत्वेन तदुपपत्तिसम्भवः। छान्दसा अपि क्वचिद्भाषायामभवन्तीत्यस्याश्रयणे तु वाहैरलुप्यत सहस्रदृगर्वगर्व इत्यत्रैव चादेशाभाव एव ॥ यदि त्वर्वण इति सूत्रे सावित्यत्र प्रसज्यप्रतिषेध एव तदा तु नानुपपत्तिरिति बोध्यम् पारिभाषिकार्थवत्त्वस्वीकारेपि धातुपर्युदाससार्थक्यमुपपादयति। अहन्काण्ड इति। न च तत्के वलस्येति। पारिभाषिकार्थवत्त्वं केवलप्रत्ययस्य नास्तीत्यर्थ। तदेतदुपपादयति। तदुक्तमित्यादि ॥ विभुद्वानामिति। प्रत्ययरहितानामित्यर्थः। लौकिक इति। लोके विदित इत्यर्थः। स च कारकादिविशिष्टः। एतेन केवलस्य धातुसंज्ञाप्रयोजकार्थसद्भावेऽपि न क्षतिः। कृत्तद्धितानामर्थश्च केवलानामिति। अत्र लौकिकोर्थो विद्यत इति सम्बन्धः। अत्र प्रसज्यप्रतिषेधार्थकेन नञा समासः। प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यताशून्य इत्यस्यार्थः। प्राग्विभक्तेरिति। विभक्तयुत्पत्तेः प्रागित्यर्थः। तदन्तस्य। कृत्तद्धितान्तस्य। तथैवार्थो न विद्यत इति। अत्रैवकारस्य नञुत्तरं सम्बधः। एपश्चानुत्पन्नविभक्तिकानां कल्पितार्थसद्भावेऽपि न लौकिकस्यार्थस्य सद्भाव इति। एतेन सूत्रद्वये निरुक्तार्थवत्त्वमेव प्रातिपदिकसंज्ञाप्रयोजकमिति स्पष्टमेव लभ्यते। अत्र प्रमाणमाह। अत एवेति सूत्रद्वयेऽपि निरुक्तार्थवत्त्वस्य विवक्षितत्वादेवेत्यर्थः। ज्ञापकत्व इति। सतीति शेषः। शास्त्रीयार्थग्रहण इति आवापोद्वापाभ्यां कल्पित इत्यर्थः। तदर्थस्य प्रशस्त्यस्येत्यर्थः। स च स्वार्थद्रव्यलिङ्गसंख्याकारकरूपः। प्रत्यासन्नः। तद्विषयकप्रतीत्यव्यवहितप्राक्कालिकप्रतिपत्तिविषयः। स च कृत्तद्धितान्तस्यैव न तु केवलकृत्तद्धितस्येति भावः। लक्ष्यत इति। सुपान्द्योतकतया सुप्समभिव्याहार एव स प्रतीयत इति भावः। एवञ्च सुबन्तस्यैव सम्पूर्णलौकिकार्थवत्त्वम्। तत्राग्भागस्य तु लौकिकार्थप्रत्यासन्नत्वमित्युक्तम्। विवरणकारायुक्तिं खण्डयति। यत्विति। अभिव्यक्तेरपीति। अभिव्यक्तेरेवेत्यर्थः। यत्र च लिट् धुगादौ प्रतीतिरस्ति तत्र न कृदन्तत्वमात्रमपि तु सुबन्तत्वमिति। तद्भाव इति। भाष्यकैयटयोर्भाव इत्यर्थः। सामान्यत इति। लौकिकालौकिकसाधारणार्थवत्त्वमित्यर्थः। अत एव। पारिभाषिकार्थवत्त्वस्याभिप्रेतत्वादेव। तद्धितग्रहणस्येति। एतत्प्रागुपपादितम्। पञ्चनावप्रिय इति। अत्र श्रूयमाणसुबंतनैवैकार्थीभावाङ्गीकारादेतत्संज्ञाफल-

भूतविभक्तिभिन्नस्य सुपोपेक्षासत्त्वान्न प्रातिपदिकत्वम्। प्रत्ययस्य प्राप्तिरेव नेति प्रत्ययमात्रस्य चिकीर्षिता या प्रातिपदिकसंज्ञा तत्फलभूतबोध विभक्तिभिन्नस्य प्रकृतिस्वरूपस्यापेक्षासत्त्वात्। एवञ्च सामान्यतोऽर्थवत्त्वस्याश्रयणे प्रत्ययाति-व्याप्तिवारणाय तत्पर्युदासे गौरवमिति भावः। निरर्थकपदसमुदाय इति। निरर्थकश्चासौ पदसमुदायश्चेत्यर्थः। एतेन वक्ष्यमाणेन नि-यमेनास्य न व्याहत्तिरिति सूचितम्। धनं वनमित्यादौ प्रतिवर्णं संज्ञाव्याहत्तिस्तु न फलम् साधकं विना सुपोऽनुत्पतेः क्त्यभावात्। न च दश दाडिमानीत्यादावर्थवद्ग्रहणस्य फलमिति यावन्न सिद्धान्तावदुत्तरसूत्रे तदनुवृत्तेरप्यभावेनोत्तरसूत्रस्थसमासग्रहणस्यासूर्यम्पश्येत्याद्यसमर्थसमासस्य पर्यु-दासलभ्यार्थवत्त्वाभावेऽपि प्रातिपदिकसंज्ञासिद्ध्यर्थं ग्रहणमिति नियम एव नास्तीति वाच्यम्। तेषाम्प्रातिपदिकसंज्ञायाः समासग्रहणाभावेऽपि धर्मिग्राह-कमानेनैव सिद्धेः। न चार्थवच्छब्दस्त्वे यन्मूले व्याख्यातधातुम्प्रत्ययम्प्रत्यया-न्तं वर्जयित्वेति तन्नोपपद्यते समानकर्तृकत्वाभावादिति वाच्यम्। प्रातिपदिक-संज्ञकत्वविशिष्टभवनेऽर्थवच्छब्दस्वरूपस्य कर्तृत्वे तात्पर्यात्। सुबन्तानां समा-ससंज्ञाविधानात्तस्य समुदायस्य प्रत्ययान्तत्वशङ्काव्याहत्तये आह। प्रत्ययग्रहण इति। साजात्यमिति। सङ्घाद्व्यवच्छेदयोरित्यादिः समाससाजात्यमित्यर्थः। तत्र पूर्वभागस्य पदत्वसत्त्वात्। साजात्यास्वीकारे सङ्घातस्य चेत्पदसंज्ञकपूर्व-भागकसमासस्यैवेति नियमे समासातिरिक्तसंघातमात्रस्य व्याहत्तिः स्यादेत-त्सूत्रमर्थवतामेकैकवर्णानां संज्ञाविधायकत्वेन चरितार्थमिति भावः। ननुयत्त-च्छब्दयोर्बुद्धिस्थपरामर्शकतया यदा यो बुद्धिस्थस्तस्यैव बोधो न त्वन्यस्येति यत्र सङ्घात इत्यनेन समासात्मकस्य सङ्घातस्य ग्रहणे व्यवच्छेद्यवाक्यासङ्गृहः। वाक्यस्यैव यत्रेत्यनेन ग्रहणे तत्पदेनापि तस्यैव बोधात्तदभेदस्य समासेऽ भा-वात्तस्य यदि समासस्येत्यसङ्गतमिति खण्डनकृदाह तन्मतन्दूषयति। एतेनेति। मूलोक्तनियमाकारस्य साजात्यप्रदर्शनपरत्वेन। नन्वस्त्वर्थाननुगमः शब्दानुगम-स्तु स्यादेवेत्यत आह। शब्दानुगमस्याप्रयोजकत्वेति। अयमाशयः। शब्दानु-गमो नामानुगतार्थप्रतिपादनमेव। यथा घटादिशब्दानां घटत्वादिनाऽनुग-तानामेकाकारप्रतीतिविषयीभूतानामर्थानाम्प्रतिपादकत्वम्। न तु शब्दानुगम

इत्यस्यैकानुपूर्वीकत्वसम्पादनमित्यर्थः। अर्थभेदाच्छब्दभेदस्वीकारेऽपि शब्दानुपूर्व्या एकत्वस्यैव सत्त्वात्। एवञ्च प्रकृतौ शब्दानुगमसङ्गावेऽपि पूर्वोक्तरीत्यार्थानामननुगततया सोऽकिञ्चित्कर इति॥ ननु त्यदादीनाम्बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिस्वीकाराच्छक्यतावच्छेदकानामननुगमेऽपि शक्यतावच्छेदकतावच्छेदकैक्यादनुगतत्वव्यवहारो भविष्यतीत्यत आह। व्यवच्छेद्यानुगमेऽपीति। संग्राह्ये विवक्षितधर्मवत्त्वेन बोधनीयेसर्वसंग्राह्योपस्थितिरपेक्षिता सा चानुगमे न संभवतीत्यनुगमापेक्षा। व्यवच्छेद्यानुगमेऽपि तेषां विशेषधर्मसम्बन्धबोधस्यानभिप्रेतत्वात्तेषामननुगमेऽपि क्षतिविरहादिति भावः यथोक्तं भाष्ये। शब्दापशब्दयोरन्यतरोपदेशेन ज्ञातं स्यादिति॥ मूलोक्तस्य नियमाकारस्यासाध्यत्वं प्रत्ययग्रहण इति परिभाषायां देवदत्तो गर्ग्य इत्यत्रातिव्याप्तिवारणार्थमावश्यकत्वप्रदर्शनपरभाष्याल्लभ्यते इति कस्य चिच्छङ्कायान्तदर्थमाह। पदशब्देनेति। यदि पदशब्दः पदसंज्ञकपरस्तदा हृषीकेशवसुरित्यस्यासंग्रहः यदि पदसंज्ञाप्राप्तियोग्यपरस्तथापि भसंज्ञया प्रकृते बाधात्तद्योग्यतापि नेति स्वीकारे सर्वसमासमाजात्याभाव एव। पदसंज्ञाप्रयोजकप्रत्ययप्रकृतिपरत्वे राज्ञः पुरुष इत्यादिवाक्यघटकस्य पूर्वभागस्य विभक्त्यन्तस्य तादृशप्रकृतिभाव एव। ननु षष्ठीप्रकृतिप्रातिपदिकमादाय वाक्यसंग्रह इति वाक्यानान्वियमेन व्यावृत्तिर्भविष्यतीति चेत्। एवं सति पदशब्दस्य तत्र शक्त्यभावेन लक्षणाया आवश्यकत्वे जहत्स्वार्थलक्षणापेक्षयाऽजहत्स्वार्थलक्षणैवोचिता। किं च जन्मवानित्यादौ प्रातिपदिकत्वसिद्धये उत्तरस्तु प्रत्ययो नेत्यपि निवेशनीयमिति गौरवमपि भविष्यतीत्याशयेनाह। स्वातन्त्र्येणेत्यादि। स्वातन्त्र्येण प्रयोगयोग्यत्वे सत्यर्थवदित्यर्थः। अत्र साजात्यप्रदर्शकवाक्ये। अत्र पूर्वशब्दोपादानात्परस्यापि तादृशस्यैवोपस्थितिरिति स्वातन्त्र्येण प्रयोगयोग्यताविशिष्टार्थवत्त्वविशिष्टपूर्वोत्तरभागकसमुदायलाभाज्जन्मवानित्यादेः शङ्कूहः। पूर्वोत्तरपदयोः स्वातन्त्र्येण प्रयोगार्हत्वञ्च तत्तत्प्रयोगाभावेऽप्यर्थबोधजननाय प्रयुज्यमानत्वम्। यत्तु, स्वम्बेरमः शक्तिकरिः समस्य इत्यादेः स्वातन्त्र्येण प्रयोगानर्हत्वान्नैतद्घटितरूपेण साजात्यविवक्षणं युक्तमिति। तन्न। वेदव्यास इत्यत्रोपपदसमासे विनापि प्रत्ययमिति वचनेन वेदित्यस्य लोपेऽपि व्यासेत्यस्य प्रयोगवत्स्वंवेरम इ

त्यादावपि तथा सम्भवात्। यदि च भीमसेन इत्यस्य यदुत्तरपदं सेन इति तावन्मात्रस्य पृथक्प्रयोगादर्शनान्नोपविधायकं वचनं क्वाचित्कमिति नैतेषु पूर्वोत्तरपदयोरन्यतरलोपेनान्यतरस्य स्वातन्त्र्येण प्रयोगार्हत्वसम्भव इति मन्यते तदा किञ्चिन्निष्ठोपपदसंज्ञाविधायकशास्त्रविधेयप्रत्ययान्तघटितसमुदायावयवत्वपूर्वोत्तरभागाभावसमानकालिकार्थबोधजनकतावच्छेदकतावच्छेदकानुपूर्वीमत्त्वान्यतररूपमेव स्वातन्त्र्येण प्रयोगार्हत्वमिति वक्तव्यम्। एतद्घटकपूर्वोत्तरभागाभावश्च कालिकसम्बन्धेन यत्प्रतियोग्यधिकरणन्यायनिरूपितविशेषणतासंबन्धावच्छिन्नत्वत्वात्मकसामानाधिकरण्यसम्बन्धेन तत्तत्प्रतियोगिविशिष्टान्यो वक्तव्य इति न विशिष्टाभावोभयाभावमादाय जन्मवानित्यादौ दोषः। नचैवं सति स्वातन्त्र्येण प्रयोगार्हार्थवदित्यत्र पृथगर्थवत्त्वनिवेशनमफलमिति वाच्यम्। निरुक्तस्य स्वातन्त्र्येण प्रयोगार्हत्वस्य निवेशसूचनाय तदुपादानात्। उक्तार्थे भाष्यसम्मतिमाह। अत एवेति। उक्तान्यथानुपपत्तिपरिहारार्थमेव। अर्थवत्समुदायानामिति। अर्थवत्समुदायपदमत्यन्तन्त्र्येण षष्ठीतत्पुरुषकर्मधारयाभ्यामर्थवतामर्थवान्यः समुदायस्तद्बोधकम्। कर्मधारयमात्रविवक्षायामव्युत्पन्नडित्यादेरसङ्गः षष्ठीतत्पुरुषमात्रविवक्षायामुत्तरसूत्रेऽनुवर्तमानं यदर्थवत्पदन्तदर्थलाभः। तत्र ह्यनुवर्त्तमानस्यार्थवत्पदस्य निरुक्तार्थकत्वमावश्यकमन्यथाऽनर्थको योऽर्थवतां समुदायोऽग्राह्यभोजी ब्राह्मणोऽलवणभोजी ब्राह्मण इत्यादितेषाम्पूर्वसूत्रेणाप्राप्ता या संज्ञा तद्विधायकत्वेन समासग्रहणस्य चरितार्थतया नियामकत्वानुपपत्तेः। नचेष्टापत्तिः। मूलकेनोपदंशमित्यादिवाक्ये क्रदन्तत्वादतिव्याप्त्यापत्तेः। पूर्वसूत्रकृत्सार्थकस्यैवानुवृत्तौ तु पूर्वसूत्रे यथाऽर्थवान्यः शब्दस्तस्यैवार्थवत्पदबोध्यतयोत्तरसूत्रेऽपि वाच्यमिति कर्मधारयोप्यावश्यकः। किञ्च दशदाडिमानीत्यादि यदर्थवद्ग्रहणव्यावर्त्यमुक्तन्तदपि कर्मधारयपक्षे संगच्छते। अन्यथा तस्य समुदायस्य नियमेनैव व्यावृत्तौ तस्यार्थवद्ग्रहणव्यावर्त्यत्वानुपपत्तिः। अग्राह्य भोजीत्यादीनान्तु सुड़नपुसकस्येति ज्ञापकेन साधुत्वं बोध्यम्। अत्र भाष्य इति। वाक्यव्याहृत्तिपरभाष्य इत्यर्थः। न्तानामित्यनेनेति। अस्य वहुपटव इत्यादिसंग्रहायेत्यादिः। अत्र प्रातिस्विकसंज्ञाभावेऽपि न क्षतिरिति तु न वाच्यम्। वकाराकारस्य चित इत्यनेनो-

दात्तत्वापत्तेः। तदुक्तं भाष्ये। तुल्यजातीयस्य नियमः कश्च तुल्यजातीयः। यथा-जातीयकानां समासः। कथञ्जातीयकानां समासः। सुबन्तानाम्। यद्यर्थवत्समुदायमात्रविषयको नियमः स्यात्तदा बहुपटव इत्यादीनां व्याहृत्तिः स्यात्। अत्र हि द्योत्येनार्थेन बहुजर्थवान् प्रकृतिस्तु वाच्यार्थेनार्थवतीति स्पष्टमेव। ननु सुबन्तत्वेनापि समाससामान्यसाजात्यं वक्तुमशक्यमश्वक्रीतीत्यादौ सुबुत्पत्तेः प्रागेव गतिकारकोपपदानामित्यनेन समाससंज्ञाप्रवृत्तिबोधनादत आह। भेदसंसर्गद्वारकार्थवन्त इति। प्रातिपदिकसंज्ञायोग्यावयवानां शब्दनामपृथक् प्रयोगे सतीतरसंसर्गाकाङ्क्षा भेदसंसर्गः स द्वारभूतो यस्य विशिष्टार्थवत्त्वस्य तदुक्तानामित्यर्थः। समासेऽपि वाक्ययेनैवार्थेन विशिष्टार्थवत्त्वम्। बहुपटव इत्यादौ तु तथा नेति भावः। पचतभृज्जता खादतमोदतेत्यादिसमासस्यापि दर्शनेनोक्तार्थलक्षणाया आवश्यकत्वमिति च सूचितम्। मूलोक्तनियमे पूर्वोभागः पदमित्युक्तं तस्य यथाश्रुतार्थकत्वे गवित्ययमाहेत्यादौ पूर्वभागस्य पदत्वाभावान्नियमाऽप्राप्त्याऽतिप्रसङ्ग इत्याशङ्कां वारयितुमाह। तेनेति। पदशब्दस्य निरुक्तार्थकरणेन। अनुकरणस्य स्वातन्त्र्येण प्रयोगार्हत्वमुपपादयति। अनुकरणस्येति। स्वातन्त्र्यं णेतीति। एतद्घटकबहुवो न पूर्वोक्तस्वातन्त्र्यमिति भावः। यत्तु विभक्तीतरापारतन्त्र्यमत्र स्वातन्त्र्यमिति तत्स्तम्बेरम इत्यादयसङ्ग्राह्यकतया न्यूनम्। पुत्रकाम्येति। अप्रत्ययादित्यनेन काम्यजन्तादकारप्रत्यये टाप्। न दोष इति। उत्तरभागस्य निरुक्तस्वातन्त्र्याविरहात्। न च क्रुदन्तत्वात् सिद्धिः। परत्वान्नित्यमेन बाधप्रसङ्गात्। अत एव। उक्तस्यैव नियमस्याभिप्रेतत्वादेव। मूलस्थपदपदस्योक्तार्थकरणं तु नामंगतिरिति सूचयितुं यथाश्रुतेति। एतेन। पदशब्दस्योक्तार्थकत्वेन। सुपः अवगानापत्तिरिति। ननु सर्वत्र वाक्यस्यैव प्रयोगार्हाक्यावयवसुपां लोपेन चेदपहारस्तदाङ्गाधिकारविहितानां सुब्निमित्तकार्याणां सुबादेशानाञ्चेयर्थापत्तिरत आह। पिण्डीमित्यादाविति। ननु वाक्येऽपि चेल्लोपस्तदा वाक्यस्यापि समाससमानानुपूर्वीकत्वापत्तौ समासविकल्पविधानमनुपपन्नमत आह। विकल्पेनेत्यादि। स्वरादीत्यादिना एकार्थीभावनिमित्तकसर्वकार्याणां विशेषणाद्ययोगानाम्परिग्रहः। नन्वर्थवत एव चेत्प्रातिपदिकसंज्ञा तदा शशशृङ्गादिशब्दानां लौकिकार्थाभावा-

त्प्रातिपदिकसंज्ञानापत्तिरित्यत आह । शशशृङ्गादिपदानामिति । एतेन ते ष्वपि पूर्वसूत्रेणैव प्रातिपदिकसंज्ञेति न तेषु प्रातिपदिकसंज्ञासिद्ध्यर्थं समासग्रहणं विध्यर्थमिति शङ्कनीयमिति भावः । ननु बौद्धपदार्थानङ्गीकारेऽपि शशशब्दस्य तादात्म्यसम्बन्धावच्छिन्नशशीयनिष्ठप्रकारतानिरूपितविशेष्ये लक्षणया तादृशविशेष्याभेदावगाहिबोधजनकोऽयं शब्दो भविष्यति । तादृशप्रकारतानिरूपितविशेष्यता चान्यथाख्यातिनिरूपिता प्रसिद्धैवेत्यत आह । स्वप्नाद्यनुरोधेनेति । अत्रानुभूतानाम्पदार्थानान्न कदाचिदपि सत्ता । प्रबोधोत्तरमुपलम्भात् । यस्य हि व्यावहारिकी सत्ता स पदार्थो घटादिरनुभूयत एव । न चाचापि संस्कारविषयपदार्थानामन्यथाख्यातिरूपमेव ज्ञानङ्किन्न स्यादिति वाच्यम् । विप्र पृथ्व्यादिचित्तस्थन्न बहिष्ठङ्कदाचन । स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयत इति कूर्मपुराणीयस्मृतेर्वासनारूपेणान्तःस्थितानामेव पदार्थानां विलक्षणान्तःकरणस्य वृत्तिरभ्युपेयते न तु तेषाम्पदार्थानाङ्कदाचिदपि सद्भावः । चाकचिक्यादिदोषवशाद्यत्रेदं रजतमिति भ्रमो जायते तत्र तद्विषययोर्विशेषणविशेष्ययोर्व्यावहारिकी सत्ताऽभ्युपेयेति न्यायमतरीत्या स्वीकारो नोचितः । ज्ञानलक्षणाप्रत्यासत्तेरनङ्गीकारात् । तत्तद्विशेष्यानुयोगित्वतत्तत्प्रतियोगिकत्वविशिष्टसम्बन्धाननुभवाच्च । किन्तु चित्तस्य द्रव्यरूपपरिणाम एव वृत्तिरिति व्यवह्रियते । चित्तमेवेन्द्रियप्रणाल्या निर्गत्य विषयेण संयुज्य विषयवासनावशात्तथा परिणमते । तस्य च परिणामस्य प्रातिभासिकी सत्ता । यावदधिष्ठानस्य व्यावहारिकसत्ताविशिष्टं यच्छुक्तित्वादि तत्तद्रूपेण साक्षात्कारो न भवति तावत्स तिष्ठति । तादृशसाक्षात्कारे सति स निवर्त्तते । स्वप्ने तु विषयेन्द्रियसन्निकर्षस्याप्यभावेनान्तःकरणस्य निर्गमनासम्भवाद्बौद्धस्यैव भानमिति बौद्धस्वीकार आवश्यक इति । अधिकमस्मद्भूषायान्द्रष्टव्यम् । नन्वक्षौहिणीरथन्तरादिष्ववयवानामत्यन्तनैरर्थक्यात्प्रातिपदिकत्वानापत्तौ सुवुत्पत्त्यभावेन समासानापत्तौ समुदायस्य साधुत्वन्न स्यादत आह । अक्षौहिणीरथन्तरादिपदेष्विति । अन्यत्र दृष्टार्थारोपेण । अक्षान् दीव्यतीत्यादौ ऊहो मनुष्याणामित्यादौ च प्रसिद्धानामर्थानामारोपेणावयवस्य साधुत्वार्थन्तदर्थकत्वकल्पनेन प्रातिपदिकत्वादिकमुपपादनीयम् । जहत्स्वार्था वृत्तिरिति पक्षे मण्डपकुशला-

दिपदेऽप्ययमेव प्रकार ऊहनीयः। अत्र नैयायिकमतानुसारिणः। अर्थवत्त्वमत्र शक्तिलक्षणान्यतरसम्बन्धेनार्थोपस्थापकत्वमेव । तच्च धातुप्रत्यययोरप्यस्तीति पर्युदासहयम्। प्रत्ययान्ते च प्रकृतिप्रत्ययसमुदायरूपेऽर्थवत्त्वाभावान्नातिव्याप्तिरिति प्रत्ययान्तपर्युदासोऽनावश्यकः। अव्युत्पन्नडित्यादिकमेतत्सूत्रोदाहरणम्। शेषङ्कृत्तद्धितेति सूत्रस्य। अव्युत्पन्नप्रातिपदिकपक्षसङ्गावे चैतत्सूत्रमेव ज्ञापकम्। कृदन्ते लिट् धुगित्यादौ धातुभेदाभावात् कृदन्ते पक्ता कारक इत्यादिसमुदायेऽपि निरुक्तार्थवत्त्वाभावादप्राप्ता सा संज्ञोत्तरसूत्रेण विधीयते । अस्यापत्यमिरित्यादौ प्रत्ययभेदाभावात्तद्धितान्ते गार्ग्य इत्यादौ च निरुक्तार्थवत्त्वाभावात्तद्धितान्तसमुदायेऽपि सारब्धा । एवमेव राजपुरुषादिसमासे समुदायेऽप्राप्ता सा विधीयते। समुदायस्य च शक्त्यभावे कृत्तद्धितेति सूत्रमेव ज्ञापकम् यतः समासपदघटितसूत्रमभगवान् पाणिनिः प्रणिनाय । अत्र कृत्तद्धितग्रहणमप्रत्ययग्रहणपरिभाषया तदन्तपरम्। न च संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणासम्भव इति वाच्यम्। तज्ज्ञापकेन सुप्तिङन्तमिति सूत्रस्थान्तशब्देन प्रत्ययग्रहणपरिभाषायाः क्वाचित्कत्वस्यैव ज्ञापनात् । न च विशिष्टस्य शक्त्यभावे बहुपटव इत्यादिसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोतीति वाच्यम्। प्रत्ययग्रहणपरिभाषायाः कृदन्त एव प्रवृत्तिस्तद्धितपदन्तु स्वाव्यवहितपूर्वप्रवृत्तित्वस्वाव्यवहितोत्तरवर्त्तित्वान्यतरवत्त्वसम्बन्धेन तद्धितविशिष्टे लाक्षणिकमिति स्वीकारात्। न चाणुपगुरिति समुदायेऽतिव्याप्तिरिति वाच्यम्। व्याकरणप्रसिद्धसमुदायस्यैव लक्ष्यत्वात्। सर्वके इत्यादिसङ्ग्रहस्तु तन्मध्यपतितन्यायेन सर्वसाधारणः। न चैवम्मूलकेनोपदंशमित्यादिसमुदायस्य कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया कृदन्तत्वात्प्रातिपदिकत्वापत्तिरिति वाच्यम्। गतिरनन्तरइतिसूत्रस्थानन्तरपदस्य क्वचित् कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमित्यत्रैव ज्ञापकत्वकल्पनात्। दर्शिता चेयं रीतिर्वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिज्ञापकस्यादेच उपदेशइतिसूत्रस्योपदेशपदस्य लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्व एव ज्ञापकत्वमिति वदद्भिर्नवीनैः। ननु समासादिरूपसमुदायस्य शक्तिः समर्थः पदविधिरिति सूत्रकरणेन भगवता पाणिनिना दर्शिता सा कथमपलप्यत इति चेन्न। समुदायशक्त्यभावेऽ-

पि नीलोत्पलमित्यादौ समासप्रयोजकविग्रहवाक्येऽवयवानां योऽर्थः प्रसिद्धस्तदर्थविशिष्टानान्तेषां व्यपेक्षालक्षणसामर्थ्यविशिष्टानामेव समर्थः पदविधिरितिपरिभाषाविषयतास्वीकारात्। व्यपेक्षालक्षणसामर्थ्ये सुसो. सामर्थ्य इति सुग्रहमेव। किञ्चैकार्थीभावः किं वृत्तित्वसमासत्वान्यतरावच्छेदेन तत्सामानाधिकरण्येन वा। नाद्यः। परार्थाभिधानं वृत्तिरितिलक्षणप्रणयनेनावयवार्थातिरिक्तसमुदायार्थ एव समुदायशक्तेरभ्युपेतव्यतया कर्मधारये तदनुपपादनात्। नान्त्यः। पङ्कजादियोगरूढशब्दस्थले रथन्तरादियुक्तरूढस्थले च यत्र समुदायशक्तिः क्वोशादिसुप्रसिद्धा तत्र समुदायशक्तेरस्माभिरपि स्वीकारात्। सर्वनामादिशब्दानां समुदायात्मकानां व्याकरणप्रसिद्धिमाश्रित्य स्वीकाराच्च। न चैकार्थीभावाभावे राजपुरुष इत्यादौ राजादिपदार्थस्य नामार्थतया पुरुषादिपदार्थे भेदसम्बन्धेनान्वयोऽनुपपन्न इति वाच्यम्। तेषु राजादिपदानां राजसम्बन्ध्यादिलाक्षणिकतयाऽभेदेनैव सम्बन्धेनान्वयोपगमात्। नन्वेकार्थीभावानुपगमे ऋत्विजो हविःशेषान्भक्षयन्तीति प्राप्तभक्षानुवादेन वषट्कर्तुः प्रथमभक्ष इत्यनेन प्राथम्यविधाने उद्देश्यविधेयभावेन स्वघटकपदार्थान्वयबोधाजनकत्वरूपस्यैकप्रसरत्वस्य भङ्गापत्त्या न भक्षानुवादेन प्राथम्यविधानङ्किन्तु प्राथम्यविशिष्टभक्षणस्यैव विधानं शाब्दम्। प्राप्ताप्राप्तविवेकन्यायेन तु प्राथम्यविधाने पर्यवसानमिति मीमांसायान्निर्णीतमेतावानेव तु विशेषस्तेषां सर्वत्रैव तु वाक्यार्थो लक्ष्य एवेति संस्थितिरिति मतमस्माकन्तु विशिष्टस्य शक्यत्वमिति तदेतद्विरुध्येतेति चेन्न। समासघटकपदार्थनिष्ठविधेयतानिरूपितोद्देश्यतासम्बन्धेन शाब्दबोधे तत्समासघटकपदजन्योपस्थितेः प्रतिबन्धकतया समुदायशक्त्यभावेऽपि प्राथम्यस्य विधेयत्वास्वीकारेण तादृशैकप्रसरत्वस्योपपत्तेः। न चैतत्प्रतिबन्धकत्वकल्पनमधिकमिति शङ्क्यम्। बहुषु स्थलेषु विशिष्टस्य शक्तिकल्पनापेक्षया तादृशप्रतिबन्धकस्वीकारस्योचितत्वात्। समर्थसूत्रस्य चायमर्थः। पदसम्बन्धी यो विधिः स साक्षात्परम्परया वा स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपसामर्थ्यवत्पदाश्रितो बोध्य इति। समुदायशक्त्यभावादेव वाक्यस्य प्रातिपदिकत्वाप्राप्त्या नियमस्वीकारे फलाभावोऽपि बोध्यः। व्यवहाराद्वाक्ये प्रथमं शक्तिग्रहेऽपि तत आवापोद्वापाभ्यां पदानाम्पदार्थेषु शक्तिग्रहे

प्राथमिकशक्तिग्रहेऽप्रामाण्यं कल्प्यते । प्राथमिकग्रहेऽप्रामाण्यकल्पनमन्यत्रा-क्लृप्तमिति तु न वाच्यम् । प्रथमतश्चन्द्रेऽल्पपरिमाणग्रहेपि ज्योतिःशास्त्रेणाधिकपरिमाणग्रहे पूर्वोत्पन्नज्ञानेऽप्रामाण्यग्रहस्य सुप्रसिद्धत्वात् । न चैकार्थीभावस्वीकारे राजपुरुषादिपदार्थैकदेशराज्ञि पदार्थैकदेशत्वान्न विशेषणान्वयो व्यपेक्षापत्ते तु स्यादिति वाच्यम् । एकपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधेऽन्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन ज्ञानस्य प्रतिबन्धकतया तादृशापेक्षाभावात् । न चैतादृशप्रतिबन्धकाभावस्य शाब्दबोधकारणतायान्तत्वात्तामग्रा भिन्नविषयकप्रत्यक्षप्रतिबन्धकतायामाधिक्यमिति वाच्यम् । एकार्थीभाववादिमते पदार्थैकदेशत्वं स्वरूपसन्न समासावटकपदार्थप्रकारकशाब्दबोधे प्रतिबन्धकं व्यधिकरणत्वात् । किन्तु एकपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे पदान्तरजन्योपस्थितेर्सु ख्यविशेष्यतासम्बन्धेन कारणतया तदभावान्नापत्तिरिति वक्तव्यन्न चैतावता निर्वाहः । अवयवशक्तिग्रहसहकृतसमुदायशक्त्या विशिष्टार्थोपस्थितिर्यत्र तत्रावयवशक्तिग्रहजन्यावयवार्थोपस्थितेरपि सत्त्वात्तथा प्रतिबध्यप्रतिबन्धकभावस्य भवतामप्यावश्यकत्वात् । अधिकमन्यत्र स्पष्टमिति प्राहुः । ननु प्रत्ययशब्दस्य शुद्ध्याधिकारत्वे स्वं रूपमिति शास्त्रबलेनाग्रिमसूत्रैः प्रत्ययशब्दस्यापि विधानापत्तिरत आह । संज्ञाधिकार इति । एवञ्चाग्शब्दसंज्ञेति निषेधान्न स्वं रूपमित्यस्योपस्थितिरिति भावः । ननु पूर्वोच्चारितशब्देन संज्ञानिर्देशात्कथं संज्ञात्वावगतिरित्यत आह । संज्ञात्वावगम इति । व्याख्यानादिति । उत्तरसूत्रेषु प्रथमान्तप्रत्ययपदोपस्थितौ विधेयसामानाधिकरण्येन निर्देशात्संज्ञात्वावगममूलकात् । विकारागमेषु संज्ञात्वप्रसङ्गं वारयति । विकारागमानान्त्विति । बहुवचनञ्च विकारागमानां बहुत्वात्तदभिप्रायेण । महासंज्ञयेति । एतद्बलादेव स्वार्थान्तर्भावलाभः । स्वप्रकृत्यन्यतरार्थेति । स्वार्थप्रत्ययकत्वं धातोरितिसूत्रविहितसनि स्पष्टम् स्वप्रकृत्यर्थप्रत्ययकत्वं स्वार्थिकेऽत्यन्तस्वार्थिके च प्रसिद्धम् । ननु यदर्थे द्योत्ये वाच्ये वा यस्य विधानन्तस्य तदर्थकत्वकल्पनन्न चैतत्प्रकृतौ सम्भवति। अर्थविशेषे प्रकृतिविधानाभावादत आह।स्वप्रकृत्यर्थत्वञ्चेति।अत्रापि स्वार्थिकस्य प्रकृत्यर्थद्योतकत्वमत्यन्तस्वार्थिकस्य तु द्योतकत्वाभाऽपे प्रकृतिप्रयो-

ज्यविषयतावि लक्षणविषयत्वाप्रयोजकत्वरूपस्य प्रकृतिसाधारणधर्मस्याश्रयतया गौणमुक्तत्वर्थप्रत्ययकत्वमिति विशेषः। तमुच्चार्येति। अर्थविशेषबोधकशब्दमुच्चार्येत्यर्थः। बोधितत्वमिति। प्रकृतिशक्यत्वेन बोधितत्वमित्यर्थः। एवमनर्थकानां विकारागमानामन्वर्थसंज्ञया व्याहृत्तिङ्कृत्वा सार्थकानामपि संज्ञां वारयति। अत एवेति। अन्वर्थसंज्ञाविधानादेवेत्यर्थः। नभवधाद्यादेशानामिति। नाभि नभं च। हनश्च बधः। आदिना विरागो विरङ्ग चेत्यस्य परिग्रहः। स्वान्यर्थेनैवेति। स्वान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति सिद्धान्तात्। एवकारव्यवच्छेद्यमाह। न त्विति। स्वः। स्वीयः। ननु स्वार्थत्वाभावेऽपि उक्तप्रकृत्यर्थत्वतुल्यमर्थवत्त्वं स्यादत आह। अत एवेति। स्वान्यर्थेनार्थवत्त्वादेवेत्यर्थः। तदर्थेति। तेषां पृथगर्थेत्यर्थः। अत एव नभ्यशब्दान्नाभिहित इत्येव बोधो न तु नभहित इति। न चैतावताप्युक्तप्रकृत्यर्थत्वव्याहृत्तिः कथमिति वाच्यम्। तत्र प्रकृतिशब्दस्य प्रत्ययविधानावधिपरतया यस्कादस्य विधानन्तप्रयोज्यविषयतावि लक्षणविषयत्वाप्रयोजकत्वस्य साधारणधर्मस्य तत्राभावेन न प्रकृत्यर्थार्थकत्वस्य व्यवहार इति भावः। चुप्रादेशानामपि चिनिष्ठनिरुक्तप्रत्ययत्वाश्रयादेशतया स्थानिवद्भावेन प्रत्ययत्वं सुलभम्। अत्रार्थे भाष्यसम्मतिमाह। एतदर्थेति। ननु विग्रहवाक्यादेतादृशार्थप्रतीतावपि प्रत्ययपदात्कथन्तदर्थप्रतीतिरत आह। भाष्यप्रामाण्यादिति। प्राचामुक्तिं खण्डयति। यत्त्विति। अप्रवृत्त्यापत्तेरिति। एषु देशाकाङ्क्षाया अन्यत एव निवृत्तेः। ननु क्तक्तवतू इमिति निर्देशादकचः प्रत्ययकबाधकतया बहुचश्चितः सप्रकृतेर्बह्वकजर्थमिति भाष्यात्प्रत्ययत्वज्ञानमविष्यतीत्यत आह। किञ्चेति। विशेषविहितत्वन्निरवकाशत्वे सत्येव बाधप्रयोजकमित्यत आह। परत्वादिति। न च लादेशप्राप्तियोग्ये विषये सीयुटश्चारितार्थ्याभावेन परत्वात्सीयुटीत्यसङ्गतमिति वाच्यम्। लादेशपदस्य लादेशसामान्यबोधकत्वेऽपि लविषीयेत्यत्र लादेशस्येट एव प्रवृत्त्या तदप्राप्तियोग्ये सीयुटश्चारितार्थ्यमसिद्धमेवेत्याशयात्। यद्यपि लादेशानाम्प्रत्ययत्वं स्थानिवद्भावेन सिद्धन्तथाप्यधिक्रतस्य प्रत्यय इत्यस्य तत्रासम्बन्धे मानाभाव इत्याशयः। अथ वा परत्वादित्यस्यादुदात्तश्चेति सूत्रापेक्षया परत्वादित्यर्थः। लानिमित्तादुदात्तत्वस्य यात इत्यादिरवकाशः। शयिषीष्टेत्यादौ लसार्वधा-

तुकानुदात्तत्वात्सीयुट् सावकाशः । प्रकृते चोभयप्रसङ्गे परत्वात्सीयुडित्यर्थः । लावस्थायान्तु न स्वरस्तस्यानच्कत्वात् । न च पूर्वं सीयुटि अनिर्दिश्यमानत्वान्न समुदायस्य व्यवहितत्वान्न निर्दिश्यमानस्येत्यादेशाप्रवृत्तिरेव स्यादिति वाच्यम् । धातोरित्यस्य विहितविशेषणत्वाङ्गीकारेण व्यवहितेऽपि प्रवृत्तेः । अपादानत्वासम्भवादिति । गुपादिभ्यः प्रत्ययस्य विश्लेषाभावात् । तत्र तस्यां सत्याम् । अस्यैतदुपपत्तय इति शेषः । ननु गापोष्टगित्यत्र पञ्चम्यनिर्देशादादेशत्वापत्तिरत आह । गापोष्टेति । अस्य प्रत्ययाधिकारे पाठेन प्रत्ययत्वज्ञाने षष्ठी स्थानियोगेति सूत्रस्याप्रवृत्तिकल्पने षष्ठ्यर्थाकाङ्क्षायां सत्यामनन्तरपदाध्याहारेण तन्निरूपितसम्बन्धार्थकत्वमस्या इति भावः । स च सम्बन्धः स्वाधारदेशसम्बन्धिदेशाधिकरणकसम्भावितस्थितिकर्तृत्वरूपः । व्यवधानेन परत्वापत्तिं वारयति । अत्रेति । अत्र । तत्तत्प्रत्ययविधायकयोगे । न च यत्र तस्मादितिपरिभाषोपस्थितिस्तत्राव्यवधानलाभेऽपि गापोष्टगित्यादावव्यधानलाभः कथमिति वाच्यम् । अत्रापि धातोरित्यस्यानुवृत्त्या गापोरनन्तरो धातोरव्यहित इत्यर्थकल्पनेनादोषात् । उत्तराङ्गेति । उत्तरस्येत्यंशेत्यर्थः । षष्ठ्यंशेति । तदर्थस्यासम्भवात् । तस्मादिति सूत्रोपस्थितौ सुपि च बहुवचने झल्येदिति सप्तमीनिर्देश एव प्रमाणम् । यदि पूर्वशब्दाध्याहारेण प्रत्ययः पूर्वः स्यात्तदा सप्तमीनिर्देशोऽनुपपन्न एव स्यात् । ननु विभाषा सुप इति सूत्रे पुरस्तादपवादेन बहुजेव पूर्वो नान्य इति नियमेनान्यः प्रत्ययः पूर्वो न भविष्यति । न च यत्र षष्ठीनिर्देशो गापोष्टगिति तत्र मध्येऽपि प्रत्ययोत्पत्तिः स्यादिति वाच्यम् । अव्ययसर्वनाम्नामिति सूत्रे प्राक्टेर्ग्रहणेनायमेव मध्ये नान्य इति नियमेन मध्यदेशस्यापि नियमनात् । एवं सति परिशेषात्पर एव भविष्यति किं षष्ठ्यंशविकलसूत्रोपस्थानेनेति चेन्न । विधेयतया प्रधानीभूतयोर्बहुजकचोर्नियामकतयापि पुरस्तादपवादग्रहणस्य प्राक्टेर्ग्रहणस्य च चरितार्थ्यसम्भवेन प्रत्ययान्तरनियामकत्वे व्यापाराभाव इत्याशयात् । इति सिद्धमिति । परत्वस्य सावधिकतयाऽवध्याकाङ्क्षायां यस्माद्विधानं ततः परो भवत्येवेति फलितमिति शास्त्रेण च धात्वादेर्विधानात्केवलस्य पच् पदित्यस्य प्रयोगो न भविष्यति । नन्वेवं गवित्यश्वमाहेत्यस्य प्रयोगो न स्यादत आह । अनुकेति । अभेदविवक्षयेति । तदा हि

साङ्ख्याख्यसम्बन्धेनोपस्थितिर्न वृत्त्याख्यसम्बन्धेन प्रकृते च वृत्तिरूपसम्बन्धेनार्थबोधकतया लोके दृष्टस्यैव ग्रहणमित्थत इति भावः। प्रातिपदिकत्वाभावेनेति। अस्य स्वाद्युत्पत्तेरिति शेषः। एवञ्च यत्फल्गितन्त्रदाह। प्रकृतित्वाभावादिति। प्रत्ययविधावित्यस्य यदिति शेषः। अस्योद्देश्यतावच्छेदकेऽन्वयः। गमकत्वात्समासः। ननु प्रत्ययः परो भवत्वेवेत्यस्य यत्र प्रत्ययस्य लुक् तत्र नियमभङ्गस्त्वपरिहारमाह। अयन्याय इति। अन्यतरेति। प्रकृतिप्रत्ययान्यतरेत्यर्थः। एतेन यत्र प्रकृतेर्निवृत्तिस्तत्रापि व्यति मे इत्यादित्यादौ न नियमाव्याप्तिः। नन्वपदन्न प्रयुञ्जीतेति यथा वाचनिकन्तथा न केवला प्रकृतिरिति नियमस्यापि वाचनिकत्वमेवास्त्वित्यत आह। एतदिति। एतन्मूलकमेव न केवला प्रकृतिरिति नियममूलकमेवेत्यर्थः। ननु परिनिष्ठितपदार्थाप्रसिद्ध्याऽपदपदार्थाप्रसिद्धिरित्यत आह। अप्रवृत्तनित्यविधीति। अप्रवृत्तौ यो नित्यविधिस्तस्य यदुद्देश्यतावच्छेदकन्तदनाक्रान्तत्वमिति विवक्षितम्। न च गन्तेत्यादावप्रवृत्तो यो नित्यविधिराङ्धातुकेति तस्य यदुद्देश्यतावच्छेदकं बलाद्याङ्धातुकपरधातुत्वन्तदाक्रान्तमेतदिति परिनिष्ठितमेतन्न स्यादिति वाच्यम्। उत्सर्गापवादस्थलेऽपवादविषयम्परित्यज्यैवोत्सर्गप्रवृत्तिस्वीकारादुपदेशकालावच्छिन्नैकाच्त्वानुदात्तत्वावच्छिन्नप्रतियोगिताकभेदविशिष्टधातुपरबलाद्याङ्धातुकत्वस्योद्देश्यतावच्छेदकतया तदनाक्रान्तत्वस्य प्रकृते सत्त्वादेवमेवान्यत्रापि बोध्यम्। सेर्ह्यादावव्याप्तीति। न च नित्यपददानेऽपि कथमस्य परिनिष्ठितत्वम्। पूर्वोक्तविशेषणविशिष्टधातुपरबलाद्याङ्धातुकत्वसत्त्वादिति वाच्यम्। स्वरत्यादिभिन्नत्वेनापि धातोर्विशेषणीयत्वात्। नन्वस्य निषेधस्य व्यापकतया न केवलेति वचनस्य च प्रकृतिप्रत्ययमात्रविषयकतयैतन्मूलकतयेत्यसङ्गतमिति चेत्। केवलप्रत्ययप्रकृतिप्रयोगेष्वपरिनिष्ठितस्य प्रयोगे प्राप्ते तेन नियमेन तस्य निवृत्तावेकदेशानुमत्या व्यापकस्यापि तन्मूलकत्वमिति गृहाण। एकवचनोपपत्तये आह। समाहारेति। प्रकृतेराक्षेपादिति। परत्वस्य सावधिकत्वात्। न चाक्षिप्तस्य शाब्दे भानाभावेन कथमेतदिति वाच्यम्। अवध्याकाङ्क्षायाः प्रकृते नित्यत्वात्प्रकृतेरिति शब्दस्याध्याहारेण विवक्षितवाक्यार्थपर्यवसानसम्भवात्। न द्वितीयादीति। पश्य मृगो धावतीत्यादौ धावतिपदात्कर्मबोधिका द्वितीया

स्यात्। न च पचति भवतीत्यत्र तिङन्तात्प्रथमाया अप्यापत्तिसम्भवेन प्रथमादीति वक्तव्ये द्वितीयादीत्यनुपपन्नमिति वाच्यम्। अनभिहिताधिकारे कर्मणीति सूत्रस्थ प्रथमोपादानात्। सङ्ख्याभावादिति। सङ्ख्यान्तराभावादित्यर्थः। गमकाभावेनौत्सर्गिकैकवचनस्याप्यप्रवृत्तेः। एवं सर्वत्र तिङन्तस्य भवतिक्रियाकर्तृत्वसम्भवेन प्रथमाया दुर्वारत्वात्सुबन्तत्वेनैव पदत्वे सिद्धे तिङ्ग्रहणस्यानर्थक्यमपि सम्भाव्येत। न च तिङर्थसङ्ख्यावच्छिन्ने सुबर्थसङ्ख्यायाः प्रकारतया भानं स्यादिति वाच्यम्। दण्डवान्दण्डवानितिवदुद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोधासम्भवात्। तनु तस्या एव सङ्ख्यायाः प्रतिपादकः सुक्कथन्न स्यादित्यत आह। तिङोक्तत्वादिति। एतेनैकसङ्ख्याया धात्वर्थेऽपरस्यास्तिङर्थसाधनेऽन्वयाभिप्रायेण तिङन्तात्सुबुत्पत्तिः स्यादित्यपास्तम्। न च द्योतकविषये उक्तार्थानामिति न्यायो हौ ब्राह्मणावित्यादौ यथा न दृष्टस्तथात्रापि स्यादिति वाच्यम्। द्योतकविषयेऽपि क्वचिन्न्यायप्रवृत्तेः स्वीकारात्। अत एव स्त्रीप्रत्ययप्रकरणे ष्फेणोक्तेऽपीत्यादि वक्ष्यति। वाक्यात्तर्हि सुबुत्पत्तिः स्यादित्यपि नाशङ्कनीयम्। स्वघटकसुपा तत्रापि सङ्ख्याया उक्तत्वात्। ननु धातुभ्यस्तर्हि स्यादत आह। धातुभ्य इति। अपवादत्वादिति। विशेषविहितत्वेनेत्यादिः। ननु धातुतिङन्तेभ्यस्तद्धितव्याहृत्यर्थम्प्रातिपदिकाधिकार इत्यत आह। तस्येत्यादीति। तिङन्ताद्धेत्वन्तरेणापि तद्धितं वारयति। तमब्विधाविति। न्यायेनेति। अनया युक्त्या सुबुत्पत्त्यनन्तरमेव तद्धितोत्पत्तिसम्भवनेति भावः। हेत्वन्तरमाह। तस्यापत्यमित्यादेरिति। उपस्थितेति। पूर्वोक्तहेतुद्वयेनोपस्थितेत्यर्थः। एवञ्च प्रातिपदिकाधिकाराभावेऽनुदात्तादेरित्यस्यानुदात्तादेः सुबन्तादित्यर्थोऽपि सम्भाव्येतेति भावः। नचोच्चादिगणे सर्वशब्दस्य पाठेनाञि कर्तव्ये सर्वस्य सुपीत्येतन्न प्रवर्त्तत इति कल्प्यते सर्वचैव सर्वस्य सुपीत्यस्य ग्रहृत्यान्तोदात्तत्वस्य श्रवणाभावात्तत्पाठस्याञ्सिद्धिमात्रफलकत्वात्। यदि च प्रातिपदिकाधिकाराभावेऽनुदात्तादेः सुबन्तादित्यर्थे च सति सार्व इत्यत्र भवदुक्तरीत्याऽञोऽप्रवृत्तिस्तर्हि उच्चादिषु सर्वशब्दपाठस्य वैयर्थ्यं स्पष्टमेवेति वाच्यम्। अस्य अन्यस्यैतत्सूत्रभाष्ये पठितवार्त्तिकोक्तप्रयोजनसामान्योपलक्षणत्वात्। एवं हि वार्तिके उक्तम्। वृद्धाद्वृद्धावर्णस्वरद्व्यजाद्यञ्च प्रत्यक्षणे यविधौ त

त्वसम्प्रत्ययार्थम् । हृद्भावृद्भावर्णस्वरद्यञ्जलक्षणे तर्हि प्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं क्रियते । हृद्भात् अहृद्भात् अवर्णान्तात् अनुदात्तादेः ङ्याच इति एतानि प्रातिपदिकविशेषणानि यथा स्युरिति । अथाक्रियमाणे प्रातिपदिकग्रहणे कस्यैतानि विशेषणानि स्युः । समर्थविशेषणानि । तत्र को दोषः । उदीचां हृद्भादगोत्रात् इह च प्रसज्येत ज्ञानां ब्राह्मणानामपत्यम् । एतद्धि समर्थं हृद्भम् । इह न स्यात् ज्ञयोर्ब्राह्मणोरपत्यमिति । प्राचामहृद्भात्फिन् बहुलम् । ज्ञयोर्ब्राह्मणोरपत्यमित्यत्र प्रसज्येत एतद्धि समर्थमहृद्भम् । इह न स्यात् ज्ञानां ब्राह्मणानामपत्यमिति । एतद्धि समर्थं हृद्भम् । अत इञ् । इहैव स्याद्दत्तस्यापत्यन्दात्तिरिति एतद्धि समर्थमकारान्तम् । इह च न स्याद्दत्तयोरपत्यन्दत्ताणामपत्यमिति एतद्धि समर्थमनवर्णान्तम् । अनुदात्तादेरञ् भवति । इह प्रसज्येत वाचो विकारस्त्वचो विकार इति । इह न स्यात् सर्वेषा विकारः सार्व इति । ङ्याचष्ठन्निह प्रसज्येत वाचा तरति त्वचा तरति । इह न स्यात् । घटेन तरतीति भाष्ये उक्तम् । एवं पञ्चानां विकार इति विग्रहे षट्चिचतुर्भ्य इति विभक्तेरुदात्तत्वेन समर्थस्यानुदात्तादित्वादञ् प्राप्नोति । प्रातिपदिकाधिकारे तु वः सङ्ख्याया इति पञ्चन्शब्दस्यादुदात्तत्वादनुदात्तादिप्रातिपदिकप्रकृतिकसुबन्तत्वाभावान्न भवतीति बोध्यम् । ननु प्रातिपदिकाधिकारेऽपि यत्प्रातिपदिकं सर्वं इत्येतदनुदात्तादि तत्र समर्थम् यच्च समर्थं सर्वं ङसिति तत्र प्रातिपदिकमित्यत्रच न प्राप्नोति । लक्षणया प्रातिपदिकपदस्य तत्प्रकृतिकपरत्वच्चेदनुदात्तादिपदस्यैव तत्प्रकृतिके लक्षणास्तु किम्प्रातिपदिकाधिकारेणेत्याशङ्कते । न चेति । मानाभावात् । अस्यानुपपत्त्यात्मकबीजाभावादित्यादिः । तत्रापि गर्गादिभ्य इत्यत्रापि । न लक्षणेति । प्रकारान्तरेण निर्वाहे जघन्यवृत्तिकल्पनमन्याय्यमिति भावः । सामान्यग्रहणे तद्विशेषग्रहणे चेति । अनया परिभाषया ङ्याप्ग्रहणवैयर्थ्यं प्रतिपादनपरभाष्यात्सामान्यग्रहणे कुमारः श्रमणादिभिरित्यस्य ज्ञापकतया विशेषग्रहणे चेत्यर्थः । बहुतरोदाहरणेति । अयस्कुम्भीत्यादिः । नन्वनया स्त्रीप्रत्ययविशिष्टस्य प्रातिपदिकग्राहकशब्देन ग्रहणेऽपि प्रातिपदिकत्वव्याप्यधर्मलाभः कथमत आह । स्त्रीप्रत्ययेति । अत एव । उक्तार्थस्य स्वीकारादेव । अन्यथा । प्रातिपदिकत्वव्याप्यधर्मातिदेशस्वीकारे । ननु समासान्त-

विधौ नेति ङ्याप्सूत्रभाष्ये उक्तन्तद्विरोध इत्यत आह । समासान्तेष्विति । अवयवविषय एवेति । यथा मद्राणां राज्ञी मद्रराज्ञीत्यत्र राजाहरिति टज् न । उपलक्षणमिति । अत्र मानन्तु कुत्सित इतिसूत्रभाष्यमेव । तत्र हि स्वार्थादि-प्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतकुत्सादियोग इतिन्यायेनातिशायनिकः प्रत्ययः स्त्रीप्रत्ययानन्तरमेव भविष्यति । तत्र लिङ्गपदोपादानेन तद्रीत्या त्यूङन्तात्तद्धितोत्पत्तेः । ङ्याब्ग्रहणस्य वाच्यार्थमात्रतात्पर्यकत्वे तु नेति फलैक्याय लक्षणाया आवश्यकत्वमिति भावः । सिद्धिरिति । विशिष्टात्तद्धितसिद्धिः । अन्यथा लोहिनिका इत्यादेव प्रयोजनं स्यान्न तु त्यूङन्तघटितम् । इत्यादेरित्यत्रादिना युवतिकेत्यादिपरिग्रहः । ननु पुंवद्भावाद्ह्रस्वत्वं विप्रतिषेधेनेति वार्तिकव्याख्यानावसरे पुंवद्भावावकाशो दारदिका इति भाष्ये उक्तन्तेन तसिलादिषु कप्रत्ययस्यापि पाठेन युवतिकेत्यादौ पुंवद्भावः स्यादतः कथमुक्तप्रयोगाणां सिद्धिरत आह । जातेरेति । ननु वयसोऽनित्यत्वेन नास्य जातिवाचकत्वमत आह । वयोवाचिनामिति । वैकल्पिकेति । आकृतिग्रहणेत्यादिलक्षणेऽनित्यव्याहृत्तविशेषणाभावाद्युवत्वादिकमपि जातिरत एव युवतितरेति भाष्योदाहृते न पुंवत्त्वम् । न चैवं युवजानिरित्यत्र पुंवत्त्वानापत्तिर्जातेरेति निषेधादिति वाच्यम् । अपर आहेत्यादिना प्रादुर्भावविनाशाभ्यान्द्रव्यस्य युगपद् गुणैरित्यादिना यावद्द्रव्यभावित्ववटितलक्षणान्तरकरणेन युवत्वस्य तन्मते जातित्वाभावात् । एवञ्च भिक्षुषिकट्कलक्षणद्वयप्रामाण्येन वयोवाचके जातिकार्यविकल्प इति भावः । हृद्या वेश्या तपस्विनीत्यादौ पक्षे तर्हि ङीष् प्राप्नोतीत्यत एतादृशानामजादिषु पाठो बोध्यः । गौरादिषु तरुणतलुनयोः पाठस्तु अपर आहेति मते जातित्वाभावात् । एतच्चेति । तद्धितपदञ्चेत्यर्थः । व्याख्यानादिति । लक्ष्यसिद्धिमूलकाद्व्याख्यानादित्यर्थः । एतेन । तद्धितपदस्य समासान्तप्रत्ययातिरिक्तपरत्वे नातद्धितपदस्य तद्धितसामान्यपरत्वे समासान्तप्रत्ययोरपि तद्धितसंज्ञकत्वेन एतयोरपि स्त्रीप्रत्ययान्तादेवोत्पत्तिः स्यात्तथा च यूनीलिर्बहुगोमतीकेति स्यादेव तत्राधुना नेति भावः । तद्धितपदस्य समासान्तप्रत्ययातिरिक्तपरत्वे सति यत्फलितन्तदाह । एवञ्चेति । तदन्यपरत्वे चेत्यर्थः । आरभ्येति । एतेन समासान्तानां सङ्ग्रहः । व्याख्यानादिति । कुत्सित इति सूत्र-

भाष्योक्तन्यायेन सार्थकतद्धितानां ज्यावन्तादेवोत्पत्तिर्भविष्यति। ज्यापोः स्वार्थविवक्षायामिव प्राप्त्याऽत्यन्तस्वार्थिकानान्तु स्वार्थद्रव्यमात्रापेक्षत्वेन ताभ्यामपूर्वमेव प्राप्तिरिति तन्न्यायाविषयत्वमित्येवं युक्तिमूलकादित्यर्थः। एवं सति यत्सिद्धन्तदाह। अत एवेति। अत्यन्तस्वार्थिकानामप्रकृतिप्रयोज्यविषयताविलक्षणविषयत्वाप्रयोजकत्वादेव। सुबुत्पत्तेः पूर्वमुत्पत्तिरिति। सुबुत्पत्तेः सङ्ख्यापेक्षत्वेन बहिरङ्गत्वादिति भावः। पूर्वोक्तार्थे भाष्यसम्मतिमप्याह। सर्वस्य द्वे इति। प्रयोजनमिति। अस्य द्विर्वचनाभाव इत्यनेनान्वयः। पादार्थस्य। पादपदार्थस्येत्यर्थः। एकत्वलक्षणेति। द्वित्वसङ्ख्यायुक्तपादार्थस्य व्याप्तिबोधसमये तदर्थगतैकत्वाननुभवात्। पदत्वाभावादिति। एतेन द्विर्वचनाभावे हेतुरुक्तः। प्राक् तद्धितोत्पत्तेरिति। तद्धितोत्पत्त्यनन्तरन्तु न द्विर्वचनम्। तद्धितान्तेन वीप्साया बोधनात्। तद्धितस्यास्य स्वार्थिकतया सुबुत्पत्तेः प्रागेवोत्पत्तिरिति स्पष्टमनेन लभ्यते। सुबुत्पत्तेस्तु संख्यापेक्षत्वमेतादृशतद्धितस्य तु नेत्यत्यन्तस्वार्थिकेति समाख्यापि साधु सङ्गच्छते। अत्रैवार्थे भाष्यान्तरमपि साधकमाह। पुंयोगादितीति। अन्तरङ्गत्वादणीति। सुबुत्पत्तेः संख्यापेक्षत्वेन बहिरङ्गत्वमिति भावः। एवं चात्यन्तस्वार्थिकानां सुबुत्पत्तेः प्रागुत्पत्तिस्वीकारवत् स्त्रीप्रत्ययानां लिङ्गबोधकत्वेन बहिरङ्गतया स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपि बोध्यम्। इनुणीति। कूटधातोरिति शेषः। स्वार्थिकत्वेनान्तरङ्गत्वादिति। विभक्तेर्बहिर्भूतसङ्ख्याकारकापेक्षत्वेन बहिरङ्गत्वादिति शेषः। अत्र स्वार्थिकस्यान्तरङ्गत्वकथनेन सुबुत्पत्तेः प्रागुत्पत्तिरिति स्पष्टमेव लभ्यते। तस्यापि। अत्यन्तस्वार्थिकाणोऽपि। अपिशब्देन समाससङ्ग्रहः। न च समासस्य पदद्वयसापेक्षत्वमणस्विनुणन्तत्वमात्रापेक्षतयाऽन्तरङ्गत्वमिति वाच्यम्। अण्प्रत्ययो भवतीत्यर्थे जननीये सौत्राण्पदादण्प्रत्ययस्वरूपज्ञानस्याप्यपेक्षासत्त्वेन समासाद्बहिरङ्गत्वमिति भावः। इदमत्र बोध्यम्। समासान्तप्रकरणे प्रातिपदिकादित्यस्याप्यसम्बन्धः तेषामलौकिकविग्रहवाक्य एवोत्पत्त्या तस्यामवस्थायामप्रातिपदिकत्वादिति। समाहारद्वन्द्व इति। इतरेतरद्वन्द्वे बहुवचनापत्तिः पृथक्पदत्वे प्रत्येकं विभक्तिश्रवणापत्तिरत आह। समाहारद्वन्द्व इति। ननु लोपफलिकेत्संज्ञा न युक्ता उच्चारणसामर्थ्यात्। अन्यथा काम्यचः ककारस्यापि सा

कथन्न स्यादत आह । इतरव्याहृत्या चरितार्थानामिति । एतेन काम्यजवयवकारं इवोच्चारणसामर्थ्यमेषु नास्तीति भावः । निषेधोपयोगिनीमिति । वाच्यतासम्बन्धेन विभक्तिशब्दावच्छिन्नस्य निमित्तत्वादिति भावः । ननु विभक्तिश्चेतिसूत्रमकर्तुं शक्यम् । न विभक्ताविति सूत्रे सुप्तिङ्ग्रहणेनैव सिद्धेः । अष्टन आविभक्ताविति सूत्रे सुब्ग्रहणमेवास्तु । त्यदादीनाम इत्यत्रापि सुब्ग्रहणमेवानुवर्त्तते । तथा सति प्राग्दिश इत्यत्रापि सुबित्येवाधिकारः । यत्र तत्रेत्यादौ सुप्संज्ञके चलादावत्वमभविष्यति । न चैवमेतर्हीत्यत्र सुपि चेति दीर्घापत्तिरिति वाच्यम् । यूभि सुपि च इति करणेनादोषात् । यादौ भादौ सुपीति तस्यार्थः । न च यत्र तत्रेत्यादौ सुपश्चलादेर्लोप इदानीमित्यादावनुदात्तौ सुप्तावित्यनुदात्तत्वञ्च स्यादिति वाच्यम् । चलादिविधानसामर्थ्येन लुगभावसिद्धेः । चलो लित्करणेन ज्ञापकेन प्राग्दिशीये प्रत्ययेऽनुदात्तौ सुप्तावित्यस्याप्रवृत्तेश्चेति चेन्न । चलादीनां विधानसामर्थ्यकल्पनेन चलो लित्त्वस्य ज्ञापकत्वाश्रयणेन मनोव्यापारगौरवस्य स्पष्टत्वात् । किञ्च विभक्तिसंज्ञाभावे इवेन सहेति वार्त्तिके सुब्लोपश्चेत्येव पाठ्यम् । एवञ्च तत्रेवेत्यादौ चलादीनामश्रवणेन चरितार्थतया तत्रत्येत्यादौ लोपापत्तेर्दुर्वारत्वात् । यूभि इत्यं तत्पदद्वयकरणाच्च । सर्वदा इत्यत्र दाप्रत्ययस्य विभक्तिसंज्ञायां प्रत्ययादुदात्तत्वेनान्तोदात्तत्वमभवति । सुप्संज्ञायान्तु सौवर्यः सप्तम्य इति सिद्धान्तादादौ विभक्तिनिमित्तकादुदात्तत्वेऽपि पुनर्हान्तस्य सर्वस्य सुपीत्यादुदात्तत्वापत्तावनुदात्तान्तत्वापत्तेश्चेति । समावेशार्थ इति । तेन युष्मदुपपद इत्यादिप्रवृत्तिः । न त्वन्यतरबाधः । वचनद्वयप्रामाण्यात्तदाह । पर्याय इति । ननु त्रीणित्रीणीत्यस्यानुवृत्तौ अष्टन आ विभक्ताविति सूत्रविषये सामर्थ्यान्निर्वाहेऽपि प्रथमयोरित्यत्र वचनयोरेव ग्रहणमाप्नोतीत्यत आह । प्रथमयोरित्यादाविति । वाच्ययोरिति । त्रिकयोरित्यर्थः । व्याख्यानादिति । प्रथमयोरितिशब्दोपादानमूलकाद्व्याख्यानादित्यर्थस्तदाह । अन्यथेति । तयोरेव ग्रहण इत्यर्थः । विभक्तिप्रदेशेष्विति । निरूपिततत्त्वकमेतत् । दीर्घापत्तेरिति । न च तिङ्संज्ञैवास्तु । निघातापत्तेः । अस्मिन् व्याकरण इति । तेनेहेत्यस्यास्मिन्प्रकरण इत्यर्थकत्वभ्रमनिरासः । ननु सुबिति सप्तमीबहुवचनस्यैव ग्रहणमस्त्वित्यत आह । प्रत्याहारादिति । पूर्वसूत्रे

चीणिचीणीत्युपादानादेकस्य समानफलकानेकसंज्ञाकरणस्य प्रसङ्गाच्चेत्यादिः। नन्वादशतः संख्याशब्दस्य संख्येयपरतया द्वित्वैकत्वयोरित्यनुपपन्नमत आह। न संख्येयपराविति। बहुवचनापत्तेरिति। एवं हि सति द्वौ केष्विति स्यात्। प्रायः साधुत्वमिति। एतत्फलमाह। क्व चिदित्यादि नन्वेकशब्दस्यान्याद्यर्थकस्यापि ग्रहणं स्यादत आह। द्विशब्दसाहचर्यादिति। नन्वेकत्वे वाच्य एव चेदेकवचनन्तदाऽव्ययेभ्यस्तस्याप्युत्पत्तिर्न स्यादत आह। एकग्रहणमिति। व्यर्थैकवचनेति। अत्रैकशब्दस्यानुपादानेन प्रसिद्धस्यैकशब्दार्थैकत्वस्याभावेऽप्येकवचनसिद्धिरिति भावः। बहुषु बहुवचनमित्यनेन शास्त्रेण बहुत्वे बहुवचनस्य प्रवृत्तिरुक्ताविता तत्र केषां बहुष्वित्याकाङ्क्षायां येषु कर्मादिषु बहुवचनं विधीयते तेषाम्बहुष्विति भाष्ये उक्तम् अत्र केषां बहुष्वित्यत्र षष्ठ्युपादानाद्बहुत्वं बहुवचनबोध्यम् तच्च बहुत्वन्न संख्या। नियतविषयपरिच्छेदहेतुर्हि संख्या। बहुत्वन्तु न तथा। न च बहुत्वस्यासंख्यात्वे सुपां कर्मादयोऽप्यर्थाः संख्या चेत्यनेन विरोध इति वाच्यम्। तत्तत्संख्यापदेन बहुत्वस्याप्युपलक्षणात् चित्रचतुरादिव्यक्तीनां विवक्षायामपि बहव इति प्रयोगात्। अत एव बहुगणेति सूत्रभाष्ये यदयमसंख्यां संख्येत्याह संख्यावदयं भवतीत्युक्तम्। तच्च बहुत्वं त्रयादिसंख्याव्यापकमखण्डोपाधिरूपम्। किञ्च लोके घटा इत्युक्ते कतीति तद्विषयसंख्याजिज्ञासा भवति यदि बहुत्वमेव नियतविषयपरिच्छेदकम्भवेत्तर्हि तादृशजिज्ञासाबोधकव्यवहारो न स्यात्। न च यत्र घटत्रयविषयकं घटा इत्याकारकं ज्ञानन्तत्र बहुत्वप्रकारकज्ञानेऽपि त्रित्वप्रकारकनिश्चयाभावात्त्रित्वप्रकारकसंशयप्रतिबन्धो न स्यादिति वाच्यम्। द्वित्वादिवद्बहुत्वस्याप्यपेक्षाबुद्धिजन्यतया यदापेक्षाबुद्धिविशेषजन्यबहुत्वप्रकारकप्रत्यक्षंतदा त्रित्वप्रकारकप्रत्यक्षसामग्र्या अपि कल्पनेन जायमानत्रित्वादिप्रकारकप्रत्यक्षेण प्रतिबन्धात्संशयानुत्पादात्। यत्र तु न प्रत्यक्षविशेषसामग्री तत्र बहुत्वस्यापि प्रत्यक्षम्। न चैवमपि यत्र घटा इति बहुवचनान्तशब्दप्रयोगस्तत्र त्रित्वत्वस्य बहुवचनार्थतानवच्छेदकतया तदवच्छिन्नप्रकारताकशाब्दबोधासम्भवेन तादृशसंशयापत्तिरिति वाच्यम्। इष्टापत्तेः। यदा चय इत्यादिशब्दान्तरात्त्रित्वादिशाब्दधीस्तदैव संशयनिवृत्त्यभ्युपगमात्। न च बहुत्वस्याखण्डोपाधित्वेऽभाववत्प्रत्येकवृत्ति-

तया यत्किञ्चिद्व्यक्तिविवक्षायामपि घटा इति प्रयोगापत्तिरिति वाच्यम् । चित्वादिव्याप्तिविशिष्टपर्याप्तेरेव बहुत्वसम्बन्धत्वोपगमेनैकस्मिन्तादृशपर्याप्तिसम्बन्धेन तस्यासत्त्वान्न प्रामाणिकानान्तथा व्यवहारः । अत एव दारा इत्यादौ बहुवचनस्यारोपेण साधुत्वस्वीकारः साधु सङ्गच्छत इत्याशयादिति दिक् । ननु बहुष्विति सूत्रे बहुशब्दस्य बहुत्वार्थकत्वे बहुवचनासङ्गतिरत आह । बहुवचनस्त्वाश्रयेति । नन्वेकव्यक्तावपि दारशब्दस्य बहुवचनान्तस्य प्रयोगो दृश्यते स च वाच्यार्थे बहुत्वाभावादसङ्गत इत्यत आह । दारा इत्यादाविति । कोशव्यवहारेति । कोशाद्यथा । दाराः पुंसि च भूम्नीवेति । व्यवहाराद्यथा गुरवः समागता इत्यादौ । राम इतीति । रमन्ते योगिनो यस्मिन्निति व्युत्पत्त्या हलश्चेति घञा कृदन्ततया प्रातिपदिकत्वात्सादयः । कार्यकालपक्षाभिप्रायेणाह । एकदेशविकृतन्यायेनेति । रेफान्तसमुदाये सान्तनिष्ठपदत्वस्यातिदेशः । एतेन सकारमात्रस्य रुत्वे स्थानितया तन्निष्ठसुम्नस्य रुशब्देऽल्विधित्वादतिदेशो दुर्लभ इत्यपास्तम् । भ्यामीति । भ्यामादावित्यर्थः । एवकारबलेनान्वयितावच्छेदकावच्छेदेन विधेयान्वयलाभाद्विभक्तित्वावच्छेदेन सारूप्य एवैकशेष इति भावः । पुंवद्भावेनेति । भस्याढ इति सूत्रविहितेनेत्यादिः । नन्वेकशेषस्यापरनिमित्तकत्वे नान्तरङ्गतया बहिरङ्गदीर्घादीनामसिद्धत्वान्नाद्यशब्दयोर्वैरूप्यादर्शनादेकशेषो दुर्वार इत्यत आह । लौकिक इति । स च परिनिष्ठित एव । तत्र वैरूप्यन्दृश्यत एवेति भावः । प्राप्तिरेव नेति । एतावतैव द्वन्द्वापवाद एकशेष इति व्यवहारः । न च सर्वशब्दस्य संज्ञाभूतस्यासर्वनामत्वज्ञसि सर्वा इति सर्वनाम्नस्तु सर्वे इत्येवं वैरूप्यादेकशेषो न प्राप्नोतीति वाच्यम् । विभक्ताविति सप्तम्यन्तोपादानेन तत्परत्वयोग्यप्रातिपदिकांश एव वैरूप्याभावस्य विवक्षितत्वात् । न च तथाप्यनयोरामि सर्वेषां सर्वाणामिति वैरूप्यदर्शनादेकशेषो न प्राप्नोतीति वाच्यम् । विभक्तिसंज्ञाविधावुद्दिश्यतावच्छेदकं यादृशयद्रूपन्तादृशतद्धर्मावच्छिन्नपरत्वविशिष्टं यद्वैरूप्यन्तदभावस्य सारूप्यपदार्थत्वात् । न चैकविभक्ताविति यस्यैकत्वसंख्यावच्छिन्नविभक्ताविति यो न सम्भवति । यश्चैकशेषस्तत्र समुदायादेकविभक्त्यभावेनैकशेषशास्त्रस्य वैयर्थ्यापत्तेः । एकजातीयायामित्यर्थे स्वसा च स्वसारौ च माता च मातरौ चेत्यत्रैकशेषानापत्तिरि

ति वाच्यम्। लौकिकप्रयोग इत्यस्यैकशेषप्रवृत्त्युत्तरमुत्पत्तियोग्या या विभक्तिस्तस्यामित्यस्यैकशब्दोपादानेन विवक्षितत्वात्। तन्त्रेणैवेति। सकृदुच्चरितस्यैकस्य शक्त्यानेकार्थप्रतिपादकत्वन्तन्त्रम्। कारकस्येति। अनेन विभक्त्यन्ततन्त्रमत्रेति सूचितम्। न चात्र तन्त्रानङ्गीकारेऽपि शास्त्रीयैकशेषेणैव निर्वाह इति वाच्यम्। इन्द्र इत्यस्यानुवृत्त्या इदितो नुमिति लिङ्गेन च सहविवक्षायामित्यस्यावश्यकत्वात्। सा चैकधर्मावच्छिन्नान्वयित्व एव प्रकृते च समभिव्याहृतानेकसाहित्यानवच्छिन्नक्रियायामेवान्वयस्य तात्पर्यविषयतया सा न। शाब्दबोधोऽप्यत्तपदबोध्यानां साहित्यानवरुद्धानान्तत्तत्क्रियान्वयिनां समूहालम्बनरूपः। न केवलम्बहुवचनसङ्गाव एव तन्त्रेण निर्देशः किन्त्वेकवचनान्तप्रयोगेऽपि तदाह। एवमत्त इति। न चाचैकस्य बह्वर्थकत्वे बहुवचनापत्तिरिति वाच्यम्। विभक्त्यन्तस्य तन्त्रेणानेकार्थकत्वं विवक्षितन्तच्च न प्रातिपदिकमिति तदप्राप्तेः। उचितस्यैतादृशे विषये तन्त्रस्वीकारः। अन्यथा साहित्याभावेऽप्येकशेषस्वीकारे शिष्यमाणैकशब्दस्यानेकार्थाभिधायकत्वे वृत्त्या पुष्पवन्तपदप्रयोग इवैकत्रैवान्वयः स्यात्। नन्वत्तो भज्यतामित्यत्र न तन्त्रम् किन्तु वक्तुर्यदा श्रूयमाणैकशब्दादुपस्थितानाम्बह्वनामर्थानामनेकत्रान्वयविवक्षा तदा तस्य शब्दस्यावृत्त्याऽर्थानामृथगुपस्थितिरेव स्वीक्रियत इत्यत आह। तन्त्रमिति। शब्दस्य पर्यायपरिवृत्तीति। पर्यायस्य पर्यायवाचकस्य परिवृत्तिः स्वप्रयोगाभावेऽपि स्वबोध्ययावत्प्रवृत्तिः तत्सहत्वन्त्यायोग्यत्वमिति यावत्। अत्र शब्दस्येति षष्ठ्यर्थो निष्ठत्वम्। एवञ्चैतादृशशब्दनिष्ठधर्मभेदविध्येन शब्दोऽपि द्विविधः। स्वावच्छिन्नशक्यतावच्छेदकावच्छिन्नविषयतासमनियतविषयताकबोधजनकतावच्छेदकस्वभिन्नानुपूर्वीकशब्दकं यद्यत्तद्भिन्नधर्मवत्त्वं शब्दतन्त्रमिति निष्कर्षः। स्वं वाचकतावच्छेदकतानुपूर्वी। सा च घटशब्दनिष्ठा। तदवच्छिन्नशक्यतावच्छेदकावच्छिन्नविषयतासमनियतविषयताकबोधजनकतावच्छेदकस्वभिन्नकलशेत्यानुपूर्वीकत्वस्य तत्र सत्त्वात्। समनियतघटकव्यापकत्वानिवेशे रथाद्यविशेषविषयकबोधजनकतद्रथक्रिरिति शब्दमादायव्याप्यत्वानिवेशे द्रव्यशब्दमादायाद्यावित्यादावसम्भवः स्यादित्युभयोपादानम्। अत्तेत्याद्यानुपूर्वी च न तादृशीत्येतादृशेषु शब्दतन्त्रमेव। एवञ्चैकस्मिन् शब्देऽर्थे वा बह्वनामर्थानां

शब्दानां वा सम्बन्धसम्भवात्तत्रिकुटुम्बधारण इति धात्वर्थानुसारात्तन्त्रव्यवहार उभयत्रापि समञ्जस एव॥ परन्तु यत्रानेकार्थबोधो जायतामितीच्छया वक्तुः शब्दोच्चारणानुकूला कृतिस्तत्र तन्त्रेणोच्चारणमिति व्यवहारो यत्र तु न तादृगिच्छा तत्र तथा व्यवहाराभावः।इदन्तन्त्रेणोच्चारणमनेकक्रियान्वयविवक्षायामेव सङ्गदुच्चरितः शब्दः सङ्गदर्थं गमयतीतिन्यायादित्याशयेनाह।अन्वयीति।अन्वयानुयोगिधात्वर्थस्य भेदादित्यर्थः।एकत्व इति।न च क्रियायां सङ्ख्याया असत्त्वादेकत्व इत्य ङ्गतमिति वाच्यम्। संख्याकृतपरिच्छेदशून्यत्वे इत्यर्थात्।एकोपस्थितीति।इष्युपस्थापितदर्शने बहुवचनान्तेनाख्यातेनेतिपदेन तन्त्रेणोपस्थापितानां देवनाच्चरथाच्चविभीतकाद्यानामन्वयः। तत्फलवन्त्विति। नियमफलवन्त्वित्यर्थ।त्वर्थमिति। अर्थमर्थमप्रतीत्यर्थः। अत्रापिना अर्थावर्थौ प्रतीति भाष्योक्तविग्रहो पि सूचितः। तद्विषय इति। सूत्रसारस्यात्। अन्त्य आह। अत एवेति। सहविवक्षाविषयत्वस्वीकारादेव। प्रकृतसूत्रे तिष्यपुनर्वस्वोरित्यतोद्वन्द्व इत्यस्याकर्षणादेतल्लाभः। तस्याकर्षणमकृत्वा तादृशनियमस्वीकारे दोषमाह। किञ्चेति। सारवतारव इति। आरवैः सहिताः सारवाः सरयूवां भवाः सारवाः। सारवाश्च ताः सारवाश्च ऊर्मयस्तासु जात इत्यर्थः। विभक्त्यन्ततन्त्रन्त्वसहविवक्षायामपि स्वीक्रियत इत्याह। असहविवक्षेति। ब्राह्मणाभ्यामिति तृतीयान्तञ्चतुर्थ्यन्तञ्च। पय इति। द्वितीयान्तम्प्रथमान्तञ्च। नवमे काव्यप्रकाशे भक्तिप्रश्नविलोकनप्रणयिनी लीलोत्पलस्पर्द्धिनी ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये। लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं कुरुताम्भवार्त्तिशमनश्चेचे तनुर्वा हरेरिति लिङ्गवचनस्थेषोदाहरणम्। तथा विद्वन्मानसहंस वैरिकमलासंकोचदीक्षागुरो दुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानर। सत्यप्रीतिनिधान दक्ष विजयप्राग्भावभीमप्रभो साम्राज्यं वर वीर वत्सरशतं वैरंध्यमुच्चैः क्रिया इति दशमोल्लासे उक्तम्। अत्र विदुषां मानसाभिन्नमानसाधिकरणकहंसेत्यादयर्थः। एतेषु सहविवक्षाया अभावेऽपि तुल्यत्वात्मकस्य तन्त्रकारणस्य सत्त्वात्तन्त्रसद्भावो नानुपपन्नः। शब्दानान्तुल्यरूपत्वमेव तन्त्रकारणम्। तदुक्तम्। अक्षादिषु यथाभिन्ना भक्तिभक्त्यादिविक्रियाः। प्रयोगकालभेदेऽपि प्रतिभेदमपृथक् स्थिताः। अक्षा न्तन्त्रिणान्तन्त्रेऽपायस्तुल्यरूपतेति

भाष्यकृत्सम्मतमेकशेषप्रत्याख्यानमाह । एतच्चेति । नन्वेवं सूत्रप्रत्याख्याने यदा नैकेन नानार्थप्रतिपादनविवक्षा किन्तु प्रतिव्यक्तिप्रतिपादनेच्छा तदाऽनेकघटशब्दानां सह प्रयोगः प्राप्नोतीत्यत आह । अनेकघटादिपदानामिति । सूचारम्भवादिमतापेक्षया प्रत्याख्यानवादिमतस्य प्राबल्यात् । तन्त्रपर इति । विभक्त्यन्ततन्त्रपरः । सूचारम्भपक्षेऽप्येकग्रहणेपि विभक्तित्वव्याप्यरूपेण साजात्यविवक्षया यद्धर्मावच्छिन्ने सारूप्यन्तत्रैकशेषस्तेन श्यामादावेकशेषो भवत्येव तेषु सारूप्यसद्भावात् न त्वोजसादिषु तत्र वैरूप्यादिति केचित् तन्मतन्दूषयन्नेकग्रहणफलमाह । एकविभेति । एवकारलभ्याभावप्रतियोगिभूतं विरूपत्वं विभक्तित्वावच्छेदेन विवक्षितमिति भावः । यत्तु समाहारविवक्षायामप्येकशेषेण भवितव्यं सूचारम्भेऽनभिधाने प्रमाणाभावात्तत्रापि सूचमप्रवर्त्तत एवान्यथा घटघटाविलक्षाप्यनभिधानेनैव वारणेन सूचस्यैव वैयर्थ्यादिति कश्चिदाह । नन्वेवं शिष्यमाणादेकस्मात्समूहस्येतरेतरयोगस्य वा प्रतीतिरित्यत्र विनिगमकाभाव इति वाच्यम् । प्रकरणादेरेव निर्णायकत्वादन्यथा घटाद्यादौ कदाचिद्व्यक्तिवचनस्य कदाचिच्चतुर्णाम्वचानां वेत्यत्रापि नियमो न स्यात् । समाहारविवक्षायामप्येकशेषाङ्गीकारादनेकम्ब्राह्मणभोजयेत्युपपद्यते । अत एव च न ब्राह्मणं हन्यादित्यस्याप्युपपत्तिः । न चैवं समूहेऽभावप्रतियोगिहननकर्मत्वप्रतीतावपि ब्राह्मणेषु कथन्तत्प्रतीतिरिति वाच्यम् । समूहस्यावयवानतिरेकात् । एकत्वान्वयस्तु प्रधानसमूह एवेति तन्मतन्दूषयति । समाहारद्वन्द्वविषये त्विति । अन्यतरस्यामित्यनेनेति । यद्येकशेषविषयाणां समाहारे वृत्तिः स्यात्तदा समाहारविवक्षायामेकवद्भावस्येतरेतराविवक्षायाञ्चवचनबहुवचनयोः सिद्धावन्यतरस्यामिति व्यर्थमेव स्यादिति भावः । अत्र के चित् । आश्विकश्च आश्विकी च आश्विकञ्च तानीमानि आश्विकानीत्यत्र बहुप्रकृतित्वाभावात् फलसेनेति वार्त्तिकेनैकवद्भावस्य व्यावर्त्तनात्समाहारद्वन्द्वाभावेनैकवद्भावस्याप्राप्तस्य प्रापणार्थं प्रकृतसूत्रे एकवच्चान्यतरस्यामित्यावश्यकमित्यस्य ज्ञापकत्वच्चिन्त्यमिति । तन्न । एकशेषस्य द्वन्द्वापवादतयाऽपवादविषयपरिहारेणोत्सर्गस्य विकल्पवारणाय प्रवृत्तिस्वीकारात् फलसेनेति वार्त्तिकस्य च समाहारद्वन्द्वविधायकशास्त्राङ्गत्वेन विभिन्नशक्यतावच्छेदकविषयकतयोक्तस्थले वार्त्तिकाप्रवृत्ते-

रिति । जातिपक्षेणैवेति । न च जातेः साक्षात्कार्यान्वयित्वासम्भवाद्व्यक्तेराक्षेपो वाच्यः । तासाञ्च बहुत्वाद्बहुवचनमेव स्यादित्येकवचनासङ्गतिरिति वाच्यम् । एतत्पक्षे जातेः प्राधान्येन तस्या एकत्वाप्रधानानुरोधेनैकवचनोपपत्तेः । अत एव । जातिपक्षस्याभिप्रेतत्वादेव । इति दूषणमिति । न च विभक्त्यन्ततत्त्वेनैतादृशे विषये निर्देशाश्रयणेन दूषणासङ्गतिरिति वाच्यम् । प्रतिव्यक्तिशाब्दत्वापत्तेरिति लाघवेन जातिपक्षस्यैवोचितत्वात् । यत्त्वेकशेषस्तत्र श्रूयमाणातिरिक्तनिवृत्तेरशाब्दत्वं वारयति । एकशेषशब्दार्थेति । एकैत्यस्य सरूपाणामित्येतदपेक्षत्वेनासामर्थ्यशङ्कानिरासायाह । पृथक् पदमिति । श्रूयमाणपदस्येति । लुप्यमानपदार्थेऽपि श्रूयमाणस्य शक्तिग्राहकत्वैकशेषविधायकं शास्त्रमेव । ब्राह्मणावित्यत्रैव भवतो भवन्तीत्यादिष्वपि विभिन्नकर्तृकानेकव्यापारप्रतीतिरेकशेषादेवेति भ्रमवारणायाह । धातुष्विति । निवृत्तभेदानामिति । स्वतो द्वित्वादिसङ्ख्यारहितानामित्यर्थः । स्वगतमेकत्वन्तु प्रतीयत एवात एवैकवचनम् । यद्यपि देवदत्तयज्ञदत्तविष्णुदत्तैरास्यत इत्युच्यते तत्र वस्तुगत्या कर्तृभेदाद्भेदेऽपि तिङन्तार्थभेदस्यानवगतिरेव । एवञ्चैकसमानाधिकरणद्वित्वादेश्चानवगतिः । न च देवदत्तः पचति । यज्ञदत्तस्तु पचतितराम् । विष्णुदत्तस्तु पापच्यत इत्यादौ पञ्चकत्वः पचतीत्यादौ च प्रकर्षपौनःपुन्याभ्यामाख्यातिगणनप्रतीत्या भेदप्रतीतिरस्त्येवेति वाच्यम् । तेषामाश्रयगतप्रकर्षादिनिबन्धनत्वात् । आश्रयगतो यः प्रकर्षः पटुत्वादिलक्षणस्तन्निबन्धनः क्रियायाः प्रकर्षः पौनःपुन्यञ्च नरुत्पत्तिरभ्यावृत्तिरपि पुनःपुनरुत्पत्तिरेव । उत्पत्तेश्च तदधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपतया समयसम्बन्धगतपौनःपुन्यादिनिबन्धनमेव क्रियायाम्पौनःपुन्यादिकमिति बोध्यम् । अत एव भाष्येऽनवकाशत्वेनैकशेषस्य द्वन्द्वापवादत्वोक्त्यनन्तरं तिङन्तेषु एकशेषस्य चरितार्थमाशङ्क्य न तिङन्तान्येकशेषारम्भयोजयन्ति एका हि क्रियेति भाष्ये उक्तम् । न च क्रियासमूहः काल इति व्यवहारः क्रियाया एकत्वेऽनुपपन्न इति वाच्यम् । न हि वयं सर्वापि क्रिया वस्तुत एकैवेति ब्रूमः किन्तु क्रियानामेयत्वस्तापरदृष्टा पूर्वापरीभूतावयवेति भाव्यात्तस्याः स्वतोभेदेपि शब्दशक्तिस्वाभाव्येन धातुवाच्यक्रियायाः कर्त्रादिभेदेन भेदेऽपि निवृत्तभेदाया एव धातुतः प्रतीतिरित्यभ्युपगमात् । न चैवमपि कर्तृद्वयविव-

च्चायां लक्षयापत्तिरिति वाच्यम् । वर्त्तमाने लडित्यादावेकत्वस्य विवक्षितत्वात् उभयस्वरितकादेश इति । अन्यतरसाम्यमादायान्यतरधर्मवान्यद्यपि प्राप्नोति तथापि विनिगमनाविरहादुभयस्वरितकोऽपि स्यात् । यद्यप्यान्तरतम्यघटकोदात्तानुदात्तशब्दाभ्यान्तत्संज्ञकयोर्ग्रहणात्स्वरितघटकयोस्तयोस्तथात्वाभावादुभयस्वरितक इत्यसङ्गतम् । तथापि तेनैव रूपेण सादृश्यमत्र ग्राह्यमित्यत्र विनिगमनाविरहाद् द्वयुदात्तसंज्ञकः कदाचिदनुदात्तसंज्ञकस्यादेशः प्राप्त इत्याशयः । स्वरभिन्नानामिति । स्वरैर्भिन्नानामित्यर्थः । उत्तर इति । उत्तरसूत्रेण विहित इत्यर्थः । एवञ्चात्तस्यादेवनस्येति सूत्रस्थ परतयाऽऽदुदात्तस्यैवैकशेषः । अनभिधानादिति । तदुक्तभाष्ये । इह कस्मान्न भवति । एकश्च एकश्च द्वौ च द्वौ चेति । सङ्ख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चानेकशेष इति । अत्र कैयटः । सङ्ख्याया अर्थस्यासम्प्रत्ययादित्यर्थः । यच्चैकः शब्दोऽनेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नाश्रयः प्रयुक्तानामन्वाख्यानात् । एकावित्युक्तेऽसहायादिरर्थो गम्यते न तु द्वावित्यर्थः । अन्यपदार्थत्वादिति । असन्दिग्धेन पदान्तरेणायमर्थः प्रत्याय्यत इत्यर्थः । यथा एकश्च एकश्चेत्यत्र द्वाविति । द्वौ च द्वौ चेत्यत्र चत्वार इति । अत्रेदं बोध्यम् । एकादिदमशब्दान्नान्यतमः पक्षः । एकशेषविधायकशास्त्रोद्देश्यत्वाभावः साध्यम् । स्वशक्यतावच्छेदकमात्रावच्छिन्नविषयताशालिशिष्यमाणशब्दजन्यबोधजनकशब्दकं यत्तत्त्वेन वादिति शिष्यमाणशब्दजन्यबोधीया या स्वप्रयोज्यविषयतातिरिक्तवृत्तिविषयता तत्प्रयोजकशब्दान्तरकत्वादिति वा हेतुः । स्वमेकशेषप्रवृत्तिप्राक्कालिकसहविवक्षाविषयः शब्दः । ननु गार्ग्यबिल्वतः कदाचिद्गर्गगोत्रापत्यद्वयस्य बोधजननेऽपि गार्ग्यायणस्यापि गर्ग्यश्च गार्ग्यायणश्चेत्येवं सहविवक्षायां बोधात्स्वशक्यतावच्छेदकमात्रावच्छिन्नविषयताशालिशिष्यमाणशब्दजन्यबोधजनकशब्दकत्वस्य तत्रासत्त्वेनैतादृशधर्मावच्छिन्नभिन्नत्वस्य तत्र सत्त्वेन प्रथमहेतौ व्यभिचारः । तथा विंशतिश्च विंशतिश्च विंशती इत्यत्र द्वितीयेऽपि शिष्यमाणविंशतिशब्दजन्यबोधीया स्वप्रयोज्यविषयतानतिरिक्तवृत्तिविषयता तत्प्रयोजकचत्वारिंशच्छब्दकत्वस्त्वेन व्यभिचारः । एवं घटादिशब्देऽपि पर्यायकलशादिशब्दमादाय व्यभिचार इति चेन्न । एवन्तर्हि नेमौ पृथक्परिहारौ

एकपरिहारोयम् सङ्ख्याया अर्थासम्भवत्ययादन्यपदार्थत्वाच्चेति भाष्येणैवाच्च समाधानात्। एवञ्च सामानाधिकरण्यसम्बन्धेन प्रथमविशिष्टद्वितीयस्य हेतुत्वमित्युक्तभवति। गार्ग्यावित्यत्र प्रथमस्य विशेषणस्य सत्त्वेपि विशेष्यस्यासत्त्वेन विंशतेर्घटावित्यादौ च विशेषणस्यासत्त्वेनैतेषु हेतुतावच्छेदकावच्छिन्नाभावसत्त्वान्न व्यभिचारः। आदिग्रहणानुवृत्तेः फलमाह। तेनेति। आदिशब्दानुवृत्तिकरणेन। चामरादाविति। तथा सति चित इत्यन्तोदोत्तापत्तिः। आदुग्रदात्तो हि सः। लघावन्त इति फिट्सूत्रेण। नेत्थमिति। यद्यत्थंसंज्ञा स्यात्तदा चित्तित्स्वरयोः पर्यायः स्यात्। मकारपरित्राणार्थादिति। उकारे सति व्यवसितान्त्यत्वस्य मकारेऽभावात्। अत एव। विभक्तित्वादेव। नव्या इति। एतेनानित्यत्वस्य दानींव्यतिरिक्तस्थले फलाभावेन तत्र तु प्रकारान्तरेणैव निर्वाहात्सामान्यतोऽनित्यत्वाश्रयणमनुचितमित्यरुचिः सूचिता। इत्थंसंज्ञा वारितेति। सद्यःपरुदित्यत्रसकारतकारयोरित्त्वाभावो निपातनादेव। न चैवमौतस्त्वकारस्येत्त्वन्न स्यादिति वाच्यम्। ननौ पृष्टप्रतिवचने शेषे लडयदौ। क्रियातिपत्तावित्यादिनिर्देशादुच्चारणार्थस्य तस्येत्त्वस्वीकारात्। ननु यलोपेऽन्त्यत्वमस्त्येवेत्यत आह। लोपस्यासिद्धत्वाच्चेति। बहिरङ्गत्वेनासिद्धत्वादित्यर्थः। चो वाक्यालङ्कारे। अत एव पुरस्तादपवादन्यायाश्रयणादेव। इज्ग्रहणाभावेप्यज्ग्रहणानुवृत्त्यैव सिद्धेः। तदैयर्थ्यमिति। इज्ग्रहणवैयर्थ्यमित्यर्थः। नन्वनन्तरानित्यस्य प्रतिपत्तौ व्यवहिते वक्तव्ये नोत्तरानित्ययुक्तमत आह। अनन्तरापेक्षेति। तथा चैवंशब्देन प्रतिपत्तिकथनमेवेति भावः। न तदन्तस्य संज्ञेति। न च संज्ञाविधाविति निषेधः शङ्क्यः। सामन्तमितिवन्महासंज्ञाकरणेन प्रत्ययग्रहणेऽपि तदन्तग्रहणसिद्धेः। योग्यतयेति। अन्यथा समानविभक्तिकत्वाभावेनैङ्ङस्यादित्यभेदेन विशेषणन्न स्यात्। प्रत्यय इति। अङ्गसंज्ञासूत्रे प्रत्यये इत्यन्तस्य योगविभागेनैतादृश्यपरिभाषाया लाभात्। संवृद्धेः प्रत्ययतया प्रत्ययज्ञानस्य प्रकृतिज्ञानव्याप्यत्वादनुमानरूपं प्रकृतिज्ञानमभिप्रेत्येत्यत आह। अनुमानेनेति। भावेल्युट्। अनुमितीत्यर्थः। फलाभावादिति। न च हेकतरदित्यत्र हलो लोपाभावस्यैव फलत्वमिति वाच्यम्। तस्य शास्त्रीयप्रत्ययग्रहणपरिभाषयैव लाभेनानुमानस्य व्याप्त्यादिज्ञानसापेक्षस्य विलम्बितोपस्थितिकत्वात्।

न चानुभीयमानाङ्गस्य संबुद्धिसत्वमेव फलमिति वाच्यम्। तथा सत्यपि पदेन तस्यानुपस्थापनाच्छाब्दबोधाङ्गत्वन्तस्य न स्यादितिभावः। ज्ञान इति। प्रत्ययत्वेन ज्ञाने प्रत्ययाधिकारे पाठो विधेयसमर्पकविभक्तिनिर्देशश्च साधकः न तु प्रकृतिज्ञानन्तस्य तज्जनकतावच्छेदकधर्मशून्यत्वादिति भावः। अत एव। एतादृशे विषये प्रत्ययग्रहणपरिभाषाया एवोपस्थितेरेव। न च संबुद्धिसंज्ञकः प्रत्ययो यस्मादिहितस्तदादिष्टिलोपे कृतेऽपि कतरेत्यस्त्येवेति कथमत्र लोपाभाव इति वाच्यम्। परिभाषायां प्रत्ययपरकस्य तदादेरित्यंशस्य घटकतच्छब्देनोपस्थिततया प्रकृते संबुद्ध्या तादृशस्यैव तदादेरित्यंशस्योपस्थितिः सोत्र रेफान्तो न ङकारान्त इत्यदोषात्। परत्वादिति। लोपापेक्षया इत्यादिः। पूर्वरूपे। अमि पूर्वइत्यनेन। व्यवहारासंभवादिति। अन्तादिवच्चेतिशास्त्रबलादेकस्मिन्नपि यदि व्यवहारइयन्तयापि ङकारस्य संबुद्धेश्च पूर्वत्वस्य परत्वस्य चातिदेशबोधकशास्त्राभावेन तादृशव्यवहारासंभवादिति भावः। ननु स्थानिवद्भावेन तादृशव्यवहारो भविष्यतीत्यत आह। तादृप्येति। तादृप्यस्य वर्णमात्रवृत्तिधर्मघटितस्यानतिदेशेन ङकारान्तात्परा संबुद्धिरिति व्यवहारः स्थानिवत्त्वेनापि दुर्घटः। ङकारत्वस्य वर्णवृत्तितया विशेषणतयाऽलाश्रयणात्। ननु पूर्वान्तवद्भावेन ङकारान्ताङ्गत्वमेकदेशविकृतन्यायेन तस्य संबुद्धित्वन्तस्यैव च व्यपदेशिवद्भावेन तदवयवत्वमिति लोपो भविष्यतीत्यत आह। अर्थविकार इति। अत्रार्थशब्दो भागाभिप्रायेण। न तु मात्रया। अत एव हेत्वन्तरमाह। एकवचनसंज्ञेति। ननु स्थानिवद्भावेन संबुद्धित्वाल्लोपो भविष्यतीत्यत आह। सकारस्येति। नन्वेतादृशे विषये संबुद्धित्वस्यामिति समुदायवृत्तित्वेऽपि पूर्वरूपेणानुमानिकदेशकल्पनया अ अ इत्यस्य स्थाने अ इति सकारस्यावशिष्टस्य सकार एवादेशः संबुद्धिर्भविष्यतीति न कुलेत्यादौ लोपाप्राप्तिरत आह। अत एवेति। सस्यादेशत्वाभावादेव यदि सकारे संबुद्धित्वमतिदेशलभ्यं भवेत्तदा सुप्त्वमपि तुल्यन्यायात् स्यादितिभावः। सिद्धान्तार्थेपि शङ्कते। न चेति। सकारमात्रनिष्ठत्वेनेति। इदं यथाश्रुतसूत्ररीत्या। सुसंबुद्धिरिति न्यासे तु शब्दतः समुदायस्य संज्ञित्वेनाश्रयणादयमनल्विधिरेव। सूचरीत्यैवसमाधत्ते। सुसंज्ञाया इति। अनल्विधित्वादिति। इटो दीर्घ इव। एतेनेति। उक्तरीत्या कुलेत्यस्य शङ्कासमाधानपर-

तया योजनेन। एङ्ह्रस्वादिति सूत्रस्थस्यैङ्ग्रहणस्य प्रयोजनमन्यथासिद्धमित्याह। हर इत्यादि । अङ्गाधिकारस्यादिति । एतेनाधिकारेऽन्तत्वरूपं बहिरङ्गत्वबीजं सूचितम् । ननु संज्ञापेक्षान्तरङ्गबहिरङ्गभावोऽत्र निरस्त इति चेत्तदाह । परनिमित्तेति परनिमित्तकं बहिरङ्गमिति पूर्वपक्षिणो मतमितिभावः संबोधने प्रयोगसत्त्व इति । एवङ्कथनेन नान्तः पादमितिसूत्रस्थेन न चैङः पदान्तात्परोऽस्तीतिभाष्येण विरोधात्सावीदृशानामनभिधानेन एकारग्रहणस्यापि न प्रयोजनमिति सूचितम्। सौ पदत्वञ्च स्वादिष्वितियोगविभागेन साधितमेव। मूले नित्यत्वाच्चेति। न च नित्यादप्यन्तरङ्गस्य बलवत्त्वन्तच्च ह्रस्वान्तत्वप्रयुक्तस्य लोपस्योपपादितमेवेति वाच्यम् । परस्थानिकमन्तरङ्गम्परनिमित्तकम्बहिरङ्गमित्यस्य लक्ष्यसाधकत्वे नासम्भवापत्तेरित्यादिति भावः । ननु सम्बुद्धिनिमित्तके गुणे कृते उपजीव्यविरोधस्यान्याय्यत्वमूलकसन्निपातपरिभाषया सम्बुद्धिलोपो न स्यादत आह । सामर्थ्यादेवेति । एङ्ग्रहणसामर्थ्यादित्यर्थः । सम्बुद्धिसन्निपातेन गुणे कृते यदि सम्बुद्धिलोपो गुणनिमित्तकः स्यात्तदा सन्निपातपरिभाषाविरोधः स्पष्ट एव । अत्रेति । लोपविषये। ननु अतोमितिसूत्रे मू इति च्छेदपक्षे ज्ञानमित्यादौ सुपि चेतिदीर्घापत्तिमुक्त्वा सन्निपातपरिभाषया दीर्घवारणे हे ज्ञानेत्यादौ सम्बुद्धिलोपानापत्तिः। मनिमित्तसन्निपातस्य प्रत्ययलोपेन विनाशादित्युक्तम्। यदि लोपविषये सन्निपातपरिभाषा नेतिप्रक्रतोक्तरीत्योच्यते तदा तत्र वक्ष्यमाणग्रन्थविरोध इति चेन्न । छन्मेजन्तसूत्रभाष्ये सन्निपातपरिभाषाया दोषनिरूपणावसरे नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यादित्युक्तम् तत्राप्याणे नसम्बुद्धिनिमित्तककार्ये कृते तस्य कार्यस्य यत्र सन्निपातविघातककार्यान्तरनिमित्तत्वप्रसक्तिस्तत्र सन्निपातपरिभाषायाअप्रवृत्तिः कल्प्यते। यत्र तु सम्बुद्धेरेव कार्यान्तत्र सा प्रवर्त्तत एवेत्याशयात्॥ सामर्थ्यादेति उभयोपादानसामर्थ्यादेङ्सामान्यमेतत्सूत्रस्य विषयः। हे हरे हे विष्णो इत्यत्र यदि सन्निपातपरिभाषया लोपो न स्यात्तदा लोपशास्त्रस्यैङ्त्वव्यापकप्रवृत्तिकत्वभङ्गः स्पष्ट एव॥ अत एव। सन्निपातपरिभाषाऽप्रवृत्तिस्वीकारादेव। एवञ्चैङिति प्रत्याहाराश्रयणं सन्निपातपरिभाषाया अनित्यत्वे ज्ञापकमिति तत्त्वम् । असमबलस्थले परत्वन्न नियामकमित्याशयेनाह । अभ्युच्चय इति । ननु सम्बु-

दृधिगुणस्य नानवकाश्यत्वम् तपो इत्यादौ लुका बाधेनैङ्ङ्स्यादित्य-स्याप्राप्तो गुणस्य चारितार्थादित्यत आह । नपुंसक इति । अ-स्यापि । एङ्ङ्स्यादित्यस्यापि । अन्यदिति । लुका बाधेऽपि प्रकृत-सूत्रोद्देश्यतावच्छेदकसत्त्वेन गुणस्य प्रकृतसूत्राप्राप्तियोग्येपि विषयेऽचा-रितार्थेनापवादत्वमस्तीतमिति भावः । पूर्वग्रहणन्विति । पूर्वो वर्णः स्थानप्र-यत्नाभ्यां यज्जातीयस्तज्जातीय एव यथा स्यादिति । पुंसो विहितस्येति अत्र । विहितत्वानुपादाने अतिमालानित्यादौ पूर्वसवर्णदीर्घे कृते पुंसि यो वर्त्तते ततः परस्य शसोऽसम्भवः । आद्यव्याख्यायां व्यत्ययकल्पनापेक्षया लाघवादाह । तत्र विद्यमानादिति । एतान्गा इति । अत्रैतानित्यस्योपादानं गोशब्दस्य पुंसि-विद्यमानत्वसूचनाय। यत्तु तस्मादित्यस्याभावेऽप्येतान् गाः पश्येत्यत्र न दोषः। शसो नुम् पुंसीति न्यासात् अक इतिहवल्लेऽतिप्रसङ्गाभावायानुवर्त्तनीयमेवेच्चा-हुः परस्येत्युपस्थित्याऽकारस्यान्त्यावयवे नुमि पूर्वसवर्णदीर्घे सकारस्य संयोगा-न्तलोपे सिद्धमिष्टम्। गा इत्यत्र तु न नुमः प्राप्तिरपवादत्वात्पूर्वमाच्चेऽकः पर-स्य शसोऽभावादिति।तन्न।विश्वप इत्यादावाकारलोपेऽपि पञ्चमीसमासेन शसो कः परत्वादकारस्य नुमापत्तेः पञ्चमीसमासः प्रत्याख्यात इति न भ्रमितव्यम्। तदावश्यकत्वस्यान्यत्र स्पष्टत्वात्। णत्वसिद्धिरितीति । अचाङ्ग्रहणमव्यवाय इतिसूत्रे पदशब्द आङ्भिन्नपदपर इत्यत्र तात्पर्यग्राहकमितिभावः।यदुक्तमङा-द्व्यतिरिक्तव्यवायादिति तत्राभिप्रकारमाह । तस्मादीति । प्रतियोगिज्ञानसापे-क्षेति न्यासस्य गुरुत्वे हेतुः । इत्युक्त्या इत्यस्य लब्धमिति शेषः । तस्या इति । समाधानपरभाष्योक्तेरित्यर्थः। सिद्धान्तमाह । भाष्ये त्विति । अत्राक्षरसमाम्ना-यिकैरित्येतन्नियमस्य सजातीयापेक्षत्वाल्लब्धम् । अत्राक्षरसमाम्नायिकत्वन्नाक्षर-समाम्नायपठितत्वङ्किन्तु अक्षरसमाम्नायपठितग्राह्यत्वमपि । अत एव सरूपाणा-मिति निर्देशसङ्गतिः । स्वं रूपमिति शास्त्रासञ्ज्ञाशब्दप्रकारकबोधविषयित्व-स्यात्रात्वप्रत्ययस्य प्रकारीभूतशब्दबोधकतया तस्यैव प्राप्तिरित्याशयेनाह । णकार इति । न्यायानामिति । एकस्यैव विषयभेदाद्बहुत्वारोपेण बहुवचनम् । न्यायाप्रवृत्तिरिति सूचितम् । ननु यस्मात्प्रत्ययविधिरित्यत्र गुणानाञ्च परार्थ-त्वादिति न्यायेन तस्मिन्निति परिभाषाप्रवृत्तिर्न स्यादत आह। गुणः कृतात्मेति।

। गुणः कृतात्मसंस्कारः प्रधानमतिपद्यते । प्रधानस्योपकारे हि तथा भूयसि वर्त्तते । पानीयमलादिसंस्कृतमुदकस्य यथेति न्यायेनेत्यर्थः । भवतीत्यादौ भू इत्यादेः शब्दनिरूपिताङ्गत्वसिद्धय आह । प्रकृतिमात्रस्येति । सूत्रे विधिरिति किम् । स्त्री इयतीति । विधिग्रहणाभावे यस्मात्प्रत्ययः पर इत्याश्रयणे स्त्रीशब्दादतुपः परत्वात्तस्मिन्नपि स्त्रीशब्दस्याङ्गसंज्ञा स्यात्तथा सति स्त्रिया इतीयङापत्तिः । अत्र शङ्कते । न चेति । आभीयत्वादसिद्धत्वेति । असिद्धवदत्राभादित्यनेनासिद्धत्वादित्यर्थः । अत्राऽभिविधौ । एवञ्च भादिति पञ्चम्यर्थस्य व्यापकत्वस्य सत्त्वे तात्पर्यग्राहकत्वेन द्योतक इति फलितम् । भशब्दश्च लक्षणया भाधिकारसम्बद्धशास्त्रपदः । असिद्धपदञ्च लक्षणयाऽसिद्धकर्तृकसत्तापरम् । असिद्धमनिष्पन्नमित्यर्थः । तृतीयान्ताच्च वतिः । तृतीयार्थः प्रतियोगित्वम् । एवञ्चानिष्पन्ननिष्ठप्रतियोगित्वस्य निरूपकत्वसम्बन्धेन वत्यर्थसादृश्येऽन्वयेनासिद्धकर्तृकसत्ताप्रतियोगिकसादृश्यलाभः । सादृश्यञ्च प्रवृत्तिरूपनिवृत्तिरूपं च । भाधिकारसम्बद्धशास्त्रनिष्ठा व्याप्यता तादात्म्यसम्बन्धावच्छिन्ना ग्राह्या । सादृश्यनिष्ठा व्यापकता च स्वरूपसम्बन्धावच्छिन्ना विवक्षिता । भाधिकारसम्बद्धशास्त्रस्य तादात्म्यसम्बन्धेन यः सम्बन्धी तन्निष्ठो योग्यत्वाभावस्तदप्रतियोग्यसिद्धकर्तृकसत्ताप्रतियोगिकं सादृश्यमित्युभयार्थः । आभादिति पदञ्चावर्त्तते । तदर्थोऽपि व्यापकत्वपर्यन्तम्पूर्ववत् । शास्त्रे कर्त्तव्य इत्यध्याहारः । एतद्घटकशास्त्रे चावृत्तेश्छब्दार्थव्यापकत्वस्य स्वाश्रयसम्बन्धत्वसम्बन्धेनान्वयः । तादृशव्यापकत्वाश्रयश्चासिद्धवत्पदमेव अत इत्येतद्घटकैतच्छब्देनासिद्धवत्पदसम्बद्धशास्त्रीयनिमित्तसमुदायो गृह्यते । विषयत्वं सप्तम्यर्थः । स च स्वसजातीयनिमित्तसमुदायरूपः । एवञ्चासिद्धवत्पदसम्बद्धशास्त्रीयनिमित्तसजातीयनिमित्तके भाधिकारसम्बद्धशास्त्रव्यापकत्ववत्सम्बद्धशास्त्रे कर्तव्येऽविद्यमानकर्तृकसत्ताप्रतियोगिकसादृश्यवती भाधिकारसम्बद्धशास्त्रकर्तृका सत्तेति सूत्रार्थः । एतत्सूत्रभाष्येऽसिद्धवच्चमसुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थञ्चेति सूत्रप्रयोजनमुक्तम् । यथा एधि शाधीत्यत्र परत्वान्नित्यत्वाच्च घुसोरेदुधावित्येत्वे कृतेऽपि तस्यासिद्धत्वादुधिभावो भवति । एवं शाधीत्यत्र शभावे कृतेऽपि तस्यासिद्धत्वाद्धित्वमिति । न चो-

भयमप्यन्यथा सिद्धम्। घुसोरिति सूत्रेऽत इत्यनुवर्त्तते एवैत्वे धित्वे सलोपे चैधीत्यस्य शा हाविति सूत्रे शास् हाविति न्यासेन शास इदङ्हलीति प्राप्ते त्वबाधकशासादेशे धित्वे सलोपे च शाधीत्यस्य च सिद्धेः। अथ वा न हाविति न्यासेनेत्त्वनिषेधेऽपि सिद्धेरिति वाच्यम्। कुर्वित्यत्र कृ उ हि इति स्थिते सर्वविधिभ्यइतिन्यायेन हेर्लुकि सार्वधातुकपरत्वमसिद्धत्वादाश्रित्यात उदिति सूत्रेणोस्वार्थं तस्यावश्यकत्वात्। यदि चोप्रत्ययान्ताङ्गावयवकरोतेरत उदित्यर्धेन लुक्यपि प्रत्ययलक्षणेनाङ्गसंज्ञया भूतपूर्वगत्या सार्वधातुकपरत्वाश्रयणेन वास्यापि सिद्धिरित्युच्यते तदाऽऽसन्नायन्नित्यत्र असोरिति सूत्रेणाङ्गेऽपि प्रथमस्य इणो यणिति यणादेशेऽनजादित्वादाण् प्राप्नोतीति सूत्रमावश्यकमिति वदन्ति। न च मयतेरिदन्यतरस्यांल्लुलुङ्लङिति संहितापाठे लकारान्तरं प्रश्लिष्य आर्द्धातुकग्रहणानुवृत्त्या वा लावस्थायामेवाडागमेनास्याप्यन्यथा सिद्धिरिति वाच्यम्। एवं सत्यैज्यत इत्यस्यासिद्धायत्तेः। न चाङजादीनामितिसूत्रस्याडागमेनैव लक्ष्यसिद्धेरनारम्भ एव युक्तः। हुझिविधावटश्चेति कर्त्तव्यम्। तच्च उपसर्गादृतीति सूत्रानन्तरं पाठ्यम्। उपसर्गादृतीतिसूत्रादृधातुग्रहणमनुवर्त्त्य षष्ठ्या विपरिणामेनाटो धात्ववयवेऽचि हुझिः स्यादिति व्याख्यानादास्वपोहसतीत्यादौ न दोषः। न चास्वपोऽहसन्नित्यत्र पूर्वान्तवत्त्वे नाट्त्वात्पूर्वरूपं बाधित्वा हुझिः स्यादिति वाच्यम्। येन नाप्राप्तिन्यायेन गुणस्यैव बाधिका हुझ्धिरिति परत्वात्पूर्वरूपेण सिद्धेः। न चाटीदित्यत्र पररूपापत्तिः। अतो गुण इतिसूत्रानन्तरन्नाट इतिकरणेनाटश्चेतिसूत्रस्थचकारस्य पुनर्हुझिविधायकतया वा पररूपस्य बाधनात्। अत एवोस्योमाङ्च्छाटः प्रतिषेध इति वचनप्रत्याख्यानमपि सङ्गच्छते। एवञ्चायन्नित्यचान्तरङ्गत्वाद्धृदधावायादेशे च सिद्धिर्भविष्यति हृदधौ कृतायामिणो यणिति तु न। एरुरितिसूत्रादेरित्यपकर्षेणेवर्णान्तस्येणो यणित्यर्थात्। न च वार्णादाङ्गमितिन्यायेन हुझिस्वाधिक्यान्नेकाच्त्वादिवर्णान्तत्वाय णापत्तिरिति वाच्यम्। अजादौ प्रत्यये इणो यणिधानेनोभयोर्युगपत्प्राप्तयभावात्। न च लावस्थायामडागम इति पक्षे अध्येयातामिति न सिध्यति। अच पूर्वमडागमे इयङ्हृदध्योर्युगपत्प्राप्तयभावेनान्तरङ्गत्वाद्धृदधौ इयङोऽप्रवृत्तेरिति वाच्यम्। आडागमप्रत्याख्यानपरभाष्यप्रामाण्येन लोके तदनभिधानात्। स-

म्प्रत्ययाच्चेतिसूत्रभाष्यस्थाध्येयातामितिप्रयोगस्य तु छान्दसत्वमभ्युपेत्य बहुलं छन्दस्यमाङ्योगेऽपीतिबहुलग्रहणेन पूर्वमियङि ततोऽटि ह्वदधिरित्युपपत्तिः। आसन्नित्यत्र तु अटि ह्वदौ अदितितपरकरणेनाल्लोपाप्रवृत्तिः। एवमकारि ऐहीत्यत्र चिणो लुगिति लुकि न लुमतेतिनिषेधेन प्रत्ययलक्षणाभावेऽपि लावस्थायामडागमे ततश्चिणि दीर्घाभाव इत्यपि बोध्यमिति चेन्न। आगहि जह्रीत्यत्रानुनासिकलोपे जादेशे च कृतेऽतो हेरिति लुक्प्राप्नोति स चासिद्धत्वान्नेत्यस्य प्रयोजनत्वात्। नन्वतो हेः प्रत्ययात्। उतश्चासंयोगपूर्वादिति न्यासेनातः प्रत्ययादेव। प्रवृत्त्येदमप्यन्यथा सिद्धमिति चेन्न। पय्धातोर्यङ्लुगन्तात्परस्य लोपानापत्तेः। यदि यङ्लुकश्छान्दसत्वमिति ब्रूषे तथाऽपि मघशब्दाच्छन्दसीवनिपाविति वनिपि शसि वकारस्य सम्प्रसारणे यस्येति चेत्यल्लोपः प्राप्नोति तस्यासिद्धत्वाद्प्रवृत्तेः फलत्वात्। न च बहिरङ्गपरिभाषया सम्प्रसारणस्यासिद्धत्वमभविष्यतीति वाच्यम्। बहिरङ्गपरिभाषाया अन्तरङ्गस्याजानन्तर्यनिमित्तकत्वेऽप्रवृत्तिस्वीकारात्। किञ्च शुन इत्यत्र वकारस्य सम्प्रसारणे वार्णपरिभाषया परत्वं बाधित्वाऽल्लोपः स्यात्। सूत्रारम्भे तु सम्प्रसारणस्याल्लोपे कर्त्तव्येऽसिद्धत्वान्न संयोगादितिसूत्रेण निषेधान्नाल्लोपः। न चेष्टापत्तिः। उदात्तनिवृत्तिस्वरापत्तेः। किञ्च दध्र इत्यत्र इरयो रे इति सूत्रेण रेभावे तस्यासिद्धत्वादतो लोप इत्यल्लोपो भवति स च सूत्राभावे न स्यात्। यद्यप्येतस्य छान्दसत्वेन छन्दस्युभयथेतिसूत्रेण सार्वधातुकत्वात्सार्वधातुकमपिदिति ङित्वेनातो लोप इटि चेति लोपेन सिध्यति। तथापि कारिषत इत्यत्र चिण्वदिट आभीयत्वेनासिद्धत्वाच्चिलोपस्य सूत्रप्रयोजनत्वात्। यदि तु स्यसिजिति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वेन चिलोपोऽपि साध्यते तथाप्यकारितरामित्यत्र चिणो लुकि कर्तव्ये चिणो लुग्ग्रसिद्धो भवति सूत्राभावे तु तरपोऽपि लोपः स्यात्। तद्ग्राह्यर्थं यदि चिणो लुगिति सूत्रे तग्रहणङ्क्रियते यदि वा चिणो लुगिति सूत्रे मण्डूकप्लुत्या एकदेशे स्वरितत्वप्रतिज्ञया गमहनेतिसूत्राद्ङिद्ग्रहणस्यानुवृत्तिमाश्रित्य ङितो लोप इति व्याख्यायते तर्हि क्ङिति इत्येतद्येच्छया सूत्रारम्भ एव ज्यायानित्याशयः। असिद्धवत्पदसम्बद्धशास्त्रीयनिमित्तसजातीयत्वच्चान्यूनानतिरिक्तत्वेन निमित्तमत्र समवायिकारणनिमित्तकार-

च्च । अत एव समानाश्रये आभीये कर्तव्ये इति व्याख्यातम् । एवञ्च प्रयोग-प्राप्तासिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायान्यूनानतिरिक्ताश्रयकत्वम् । अचा-न्यूनत्वनिवेशात्पपुषः तस्थुष इत्यत्र सम्प्रसारणे कृते आतो लोपे कर्तव्येऽसि-द्धत्वाभावः सिध्यति । सम्प्रसारणनिमित्तभत्वनिमित्तशसाद्यनपेक्षत्वात् । एवं प्रशमय्य गः प्रतमय्य गत इत्यत्र मितां ह्रस्व इत्यस्य णेरयादेशे कर्तव्ये नासिद्धत्वम् । असिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायाधिकनिमित्तकत्वमचा-यादेशस्य । एवञ्चाखायिता चाखायितुमित्यत्रात्वे कृते आत्वस्यासिद्धत्वाद्य-स्य हल इति लोपः प्राप्नोति तस्याधिकनिमित्तकत्वादसिद्धत्वाभावः । न च जहीत्यत्र हन्तेर्जादेशेऽतो हेरिति हेर्लुक् प्राप्तोऽपि हिनिमित्तकजादेशस्यासि-द्धत्वान्नेति भाष्ये उक्तन्तद्विरुध्यतेऽतो हेरितिसूत्रप्रवृत्तिनिमित्तातिरिक्तस्य जादेशस्यानिनो हन्तेर्जादेशनिमित्तत्वेन समानाश्रयत्वाभावादिति वाच्यम् । एतद्भाष्यप्रामाण्येन विकारकृतभेदस्य समानाश्रयत्वविघातकत्वानङ्गीकारात् । न च तथापि चिणो लुकि कर्तव्ये चिणो लुगसिद्ध इत्यपाचितरामित्यत्र तरपो न लुगित्युक्तन्तद्विरुध्यते । उत्तरकालप्राप्तिकलुक्सम्बन्धिनस्तरपः पूर्वकालजा-तलुक्स्थानितशब्दभिन्नतया समानाश्रयत्वाभावादिति वाच्यम् । अन्यूनातिरि-क्ताश्रयकत्वघटकातिरिक्तस्य येन रूपेणासिद्धत्वाश्रयशास्त्रनिमित्तता तद्धर्मावच्छिन्नप्रतियोगिताकभेदवद्रूपतया प्रकृते चिणः परत्वमात्रस्यैवोद्देश्यतावच्छेद-कत्वेन तादृशधर्मावच्छिन्नप्रतियोगिताकभेदस्य चोत्तरकालप्राप्तस्य चिणो लुक् शास्त्रस्य सम्बन्धिन्यसत्त्वात्समानाश्रयत्वमव्याहतमेवेत्याशयात् । स्थानिनोऽपि निमित्तमध्ये प्रवेशस्वीकारादिधिग्रहणस्याङ्गसंज्ञासूत्रघटकस्य प्रयोजननिरूप-णावसरे स्त्री इयतीत्यत्रेयङादेशे इयच्छब्दनिमित्तके कर्तव्येऽङ्गसंज्ञा नेत्युक्तं सङ्गच्छते । स्थानिनो निमित्तत्वेनाश्रयणाभावे यस्येति चेति लोपस्य स्त्रिया इतीयङादेशस्य चेयच्छब्दनिमित्तकत्वेन समानाश्रयतया इयङादेशे कर्तव्ये यस्येति लोपस्यासिद्धत्वं स्यात् । स्थानिनस्तथात्वे तु व्याश्रयतयाऽसिद्धत्वा-भावः स्पष्ट एव । अत्रेदन्तत्वम् । अत्र भाष्ये आरभ्यमाणेप्येतस्मिन्योगे सिद्धं वसुसम्प्रसारणमज्विधावित्युक्तम् । व्याश्रयत्वान्नासिद्धत्ववचनमित्याख्यातमिति त्वयत् । परं त्वारभ्यमाणेऽप्येतस्मिन्निति वाक्येऽपिशब्दोपादानसामर्थ्यान्नाश्रयका-

रस्यामिद्वत्सूत्रानारम्भ एवाभिमत इति कल्प्यते। अत एवाह कैयटः। अनेकपरिहाराश्रयेण प्रतिपत्तिगौरवमाभूदित्येवमर्थमारभ्यमाण इत्यर्थ इत्याह। नन्वेवमिर इत्संज्ञा वक्तव्येतिवार्त्तिकप्रत्याख्यानावसरे गोः पादान्त इति सूत्रादन्तपदसम्बन्धेनेदिदन्तस्येति व्याख्याने नुम्विधायकसूत्रस्थधातुग्रहणस्याङ्गस्येत्यस्याङ्गसंज्ञायोग्यार्थकत्वं कल्पयित्वा उपदेशावस्थायामिव नुम्प्रवृत्तिः प्रयोजनम्। तेन कुण्डा हुण्डेत्यादौ गुरोश्च हल इति सूत्रेणाकारप्रत्ययः सिध्यतीत्येतादृशसिद्धान्ते तासन्ते भवितेत्यादौ नुम्प्राप्नोतीत्याशङ्क्य तास एव वक्तुं शक्यत्वादित्युक्तम्। एवं सति हन्तारावित्यादौ टिलोपे कृतेऽनिदितामिति नलोपः प्राप्नोति। सूत्रसत्त्वे त्वभीयत्वेन टिलोपस्यासिद्धत्वेन नलोपाप्राप्तिरिति वाच्यम्। हनः सिजिति कित्त्वविधानेनाहतेत्यादौ नलोपसाधकेन विकरणोपधात्वमादाय नलोपाभावज्ञापनेनादोषात्। अत एवामंस्तेत्यत्र नलोपो न। न च लावस्थायामडागममाश्रित्य सूत्रप्रत्याख्यानेऽकरोदित्यादावुप्रत्ययस्यादुदात्तत्वेऽटोऽनुदात्तत्वापत्तिरिति वाच्यम्। अन्यत्र विकरणेभ्य इति पर्युदासात्। न च तथाप्यग्रहीष्टामित्यादावेकाचो ग्रहेर्विहितत्वाभावादीर्घो न स्यादिति वाच्यम्। अन्तरङ्गे दीर्घे कर्तव्ये बहिरङ्गस्याटोऽसिद्धत्वात्। सम्परिभ्याङ्करोतावितिसूत्रे पञ्चमीनिर्देशेन सम्परिभ्याम्परत्वयोग्यस्य करोतेरित्यर्थकरणेन समस्कृतेत्यादौ नानुपपत्तिः। न चास्मिन्पक्षेऽवियदित्यत्वाटमाश्रित्यैरनेकाच इति यणापत्तिः। सूत्रसत्त्वे त्वटोऽसिद्धत्वादियङेष्टसिद्धिरिति वाच्यम्। एरनेकाच इति योगं विभज्य णो यणित्यनुवर्त्त्य योगविभागस्येष्टार्थत्वेनाडागमसहितानेकाच एत्वेयण् तर्हि इण एवेति नियमेन सिद्धत्वात्। आडागमसहित्यञ्चानेकाज्ग्रहणानुवृत्त्या लभ्यत इति दिक्। विकरणस्य गुणार्थमिति। भवामि भविष्यामीत्यत्र मूलोक्तोदाहरणे तु विधिग्रहणाभावेऽप्यतो दीर्घो यञीतिसूत्रारम्भसामर्थ्यादीर्घो भविष्यतीति भावः। वव्रश्चेत्यसिद्धिरिति। उरदत्त्वस्य प्रत्ययपरत्वलाभानापत्तौ परनिमित्तत्वाभावेनाचः परस्मिन्नित्यस्याप्राप्त्याऽत्वस्य सम्प्रसारणत्वाभावेन न सम्प्रसारणेतिसूत्रस्याप्राप्तेर्वकारस्य सम्प्रसारणापत्तेर्वव्रश्चेत्यस्यासिद्धिरित्यर्थः। दूषणान्तरमाह। किञ्चेति। प्रत्ययान्तस्याङ्गसंज्ञायां लुप्तो यः प्रत्ययस्तस्य राजन्शब्दादिधानेन तच्छब्देन राजन्नित्य-

स्य ग्रहणे प्रत्ययो निमित्तमिति लुप्तप्रत्ययनिमित्तत्वं राजन्शब्दादेः सुबन्तस्या-
स्तीति निषेधापत्तिरिति भावः। देवदत्त ओदनमपाचीदित्यादौ प्रत्यासत्त्या
दोषवारणमशक्यमित्याह। अङ्गसंज्ञाया इति। इति षष्ठ्या इति। इत्यधिकृत-
घटकषष्ठ्या इत्यर्थः। अङ्गस्येति षष्ठ्या विपरिणामे गौरवात्यत्तान्तरमाह।
अकारात्परेषामिति। ननु ब्राह्मणेत्यस्य न लुमतेत्यनेन निषेधादङ्गत्वेन्दुर्लभ-
मत आह। युवोरनाकाविति। तत्र पञ्चभिः क्रोष्टृभिः क्रीतमित्यञ्चक्रोष्टृ इत्यु-
क्तम्। अङ्गस्य क्रोष्टुस्तज्जन्यदङ्गसंज्ञा च भवति प्रत्ययलक्षणेन। न लुमतेतिनिषे-
धस्तु न। लुप्तप्रत्ययनिमित्ताङ्गसंज्ञाविशिष्टोद्देश्यककार्यान्तरे प्रतिषेधो न तु
तस्यामपीति भावः। नन्वर्थवत्परिभाषया प्रत्ययाप्रत्ययपरिभाषया वा वारण-
मविष्यतीत्यत आह। अर्थवदिति। किञ्च भिसः प्रत्ययस्यैव ग्रहणमित्यत्र सा-
धकाभावः। प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणमितिपरिभाषाया लक्ष्यसाधक-
त्वे नान्यज्ञानाश्रयणात्। प्रत्ययस्यैव ग्रहणमिति नियमासिद्धौ भिस्शब्दाव-
यवानर्थकस्यापि ग्रहणसम्भावनयाऽर्थवत्परिभाषाया अप्यप्रवृत्तिरिति भावः।
व्याख्यानादिति। न धातुलोप आर्धधातुक इत्यत्र सप्तम्येकवचने यादेशादर्थ-
नमूलकादित्यर्थः। यो विधिरिति। कर्मणि क्विप्रत्ययः। तद्विघातस्येत्यत्र कर्म-
ण्यण्। असिद्धं बहिरङ्गमिति परिभाषायामन्तरङ्ग इति सप्तम्यन्तस्याध्यसा-
काङ्क्षतया बुद्धिस्थे सतीत्यध्याहारोऽपि सम्भवतीत्याशयेन शङ्कते। न चेति।
प्रकृतिप्रत्ययोभयस्य यादेशे दीर्घे च यद्यप्यपेक्षा तथापि प्रत्ययविशेषणस्य य-
जादित्वस्य तादृशसमुदायबहिर्भूतस्य दीर्घेऽपेक्षाभावाद्बहिरङ्गत्वमिति भावः।
तद्विघातस्य जायमानत्वेनेति। एतेनोपजीव्यविरोधीत्येवेति सूचितम्।
अस्मात्परिभाषायामन्तरङ्ग इत्यस्य कर्तव्य इत्यनेनैवाकाङ्क्षायाः पूरणस्य भा-
ष्यादिसर्वग्रन्थसम्मतत्वादित्याशयेनाह। किञ्चेति। तत्र कृते। अन्तरङ्गे कृते।
तदग्रहणादिति। सन्निपातपरिभाषाया अप्रवृत्तावित्यर्थः। अतिव्याप्तिपरिहा-
येति। नदीह्रस्वत्वं संबुद्धिलोपस्येति भाष्यस्येत्यर्थः। असिद्धत्वमपि कथमिति
बहिरङ्गासिद्धत्वस्य शास्त्रज्ञाप्यत्वात्। अत एव पुग्ह्रस्वत्वस्य अदीदपदिति
भाष्यसङ्गतिः। यदि भवदुक्तरीत्यातिदेशिकसन्निपाताभावः सन्निपातपरिभा-
षाया अप्रवृत्तौ हेतुर्भवेत्तदा प्रकृतेऽपि पुक्शास्त्रस्यान्तरङ्गत्वाद्ह्रस्वस्य तु

बहिरङ्गत्वात्परिभाषाया अप्रवृत्तौ भाष्यासङ्गतिः स्पष्टैव । यत्तु सन्निपातः संश्लेषः उपात्तयोर्यादृशो यत्कार्यस्य निमित्तं तत्कार्यन्तादृशसंश्लेषविघातकप्रत्ययनिमित्तम् । यथा घेर्ङितीति सूत्रे उपात्तयोर्घिङितोः संश्लेषो गुणस्य निमित्तत्वात्सिध्यति सति स गुणोऽव्ययसंज्ञाद्वारा लुकमत्वनिमित्तम् । ङेर्य इत्येतत्सूत्रे तूभयोरनुपादानान्नायं सन्निपातपरिभाषाविषय इति रामायेत्यत्र सुपि चेति दीर्घः सन्निपातपरिभाषाविरोधान्न प्रवर्त्तत इत्यसङ्गतमिति कश्चिदाह तन्मतन्दूषयितुमुपक्रमते । कार्यस्य निमित्तमित्यादिना । नाग्रह इति । क्नय्योजन्त इतिसूत्रभाष्ये कुभ्वादिभ्य इत्यत्रानयापरिभाषयाऽव्ययसंज्ञावारणपरभाष्यविरोध एवं सति स्यादिति भावः । अत्रैवार्थे भाष्यान्तरसम्वादमाह । अत्र एवेति । तादृशनियमाभावादेवेत्यर्थः । ननु सुपि चेति दीर्घापेक्षयाऽङादित्वस्य परत्वात्तेनैव दीर्घो वक्तुं योग्य इत्यत आह । विरोधाभावादिति । एककार्यसाधकत्वेन विरोधाभावादिति भावः । पर्युदासन्यायेनाह । अङादितीति । अन्य इति । मुख्या इत्यर्थः । अतएवोरुया धेनुयेत्यादौ न दीर्घः सुपां सुलुगिति सूत्रेण तृतीयैकवचनस्य यादेशः । झल्ग्रहणाभावेऽपि रामाणामित्यादिसिद्धये आह । उतो वृद्धीति । झल्ग्रहणमेत्वविषये विलक्षणार्थज्ञापकमाह । झल्ग्रहणमिति । एतेन । एवं सन्निपातपरिभाषाया अप्रवृत्तिस्वीकारेण । रामस्येति । अचस्यादेशेऽङादित्वसन्निपातस्योपजीव्यत्वेन सन्निपातपरिभाषयैवेत्वव्यावृत्तौ बहुवचनग्रहणस्यातिव्याप्तिवारकत्वसूचनमसङ्गतं स्यात् । क्वचित्तु रामः रामस्येति पाठः । तत्र राम इत्यत्र न बहुवचनग्रहणप्रयोजनम् । प्रत्यय इत्यादिनिर्देशैः क्वचित्त्रिपाद्यामसिद्धत्वमेति कल्प्यते । अन्यथा रुत्वस्यासिद्धत्वाद्रेफान्ते पदत्वाभावाद्विसर्गो न स्यात् । एवं च राम स् इत्यवस्थायामेत्वरुत्वयोः प्राप्तौ परत्वाद्रुत्वे सङ्गतिन्यायेनैत्वव्यावृत्तिः स्यादित्यरुचेराह । रामस्येति । यत्र सन्निपातपरिभाषयाऽतिप्रसङ्गवारणन्न भवति तादृशमत्युदाहरणमाह । रामाभ्यामित्ययीति । मात्रालाघवानुरोधाद्यत्नेन चिदुक्तन्तदूषयति । बहुवचन इति । ज्ञानयोरिति । ज्ञानशब्दस्य ओसि परे इगागमे कृते आदृगुण इति गुणस्येकोऽचीति नुमश्च प्राप्तौ वार्णादाङ्गस्य कार्यस्य बलवत्त्वादृगुणात्पूर्वंनुमि सति रूपासिद्धिः । न च बहुवचने झल्येडिति न्यायोऽस्तु ।

एवञ्च ज्ञानयोरित्यत्र न नुमः प्राप्तिः विभक्तौ यदङ्गन्तस्य गन्तत्वाभावादिति वाच्यम्। बहुवचने झलीति सप्तम्या अचारितार्थ्येन झलादौ बहुवचने सुप्यत इडित्यर्थापत्तावनिष्टापत्तेः। यदि च यत्तदेतेभ्य इतिनिर्देशेन सप्तमीनिर्दिष्टपदानां षष्ठ्यन्तत्वमत इत्यस्य च षष्ठ्यन्तस्य पञ्चम्यन्तत्वकल्पनं सप्तमीनिर्देशस्य यस्मिन्विधिरिति परिभाषाप्रवृत्तिसम्पादकत्वेन चरितार्थ इत्युच्यते तदाऽधिकं ज्ञानगौरवं स्पष्टमेव। किञ्चेदम्शब्दाद् भ्यसि त्यदादित्वे पररूपत्वे च कृते इलि लोपस्येडागमस्य च प्राप्तौ नित्यत्वादिट् स्यादेवञ्च इलादिपरत्वाभावान्नोपानापत्तिः। लोपविधानन्तु द्विवचने चरितार्थमिति दिक्। इति शेष इति। यत्त्वेवं शेषपूरणेन प्रकृतग्रन्थसङ्गमनेऽपि रत्नमुडित्यादावान्तरतम्यात्षकारस्य चर्त्वेन षकार एव प्राप्नोति। न टकारोऽल्पप्राणतया प्रयत्नमेदादतस्तदादिशब्दे दकारस्य स्थानेऽकृतकारि खरि खमग्निवदिति न्यायेन फलाभावेन जश्त्वाप्रवृत्तौ तत्र चर्त्वस्य चरितार्थादपवादत्वमेव नेति रामादित्यादावुभयोः प्राप्तावसिद्धत्वाच्चर्त्वात्प्राग् जश्त्वमिति। तन्न फलाभावेऽपि पर्जन्यवल्लक्षणन्यायेन शास्त्रप्रवृत्तेर्बहुषु दृष्टत्वाद्येन नाप्राप्तिन्यायेन चर्त्वस्य जश्त्वापवादतयाऽसिद्धत्वस्याप्राप्तेः। रत्नमुडित्यस्य सिद्धिस्तु जक्षित्यादयः षडिति न्यासेन षकारस्य स्थाने जश्त्वात्पूर्वञ्चर्त्वं शास्त्राप्रवृत्तिकल्पनमिति भविष्यति। चर्त्वोत्तरन्द्वित्वमिति। यत्तु द्विर्वे परसवर्णत्वं सिद्धं वक्तव्यमिति वार्त्तिकाद्वर्णद्वित्वे एतदप्रवृत्तिरिति। तन्न। वाक् वागिति भाष्योदाहरणेन वर्णद्वित्वेऽपि तत्प्रवृत्तेः स्वीकारात्। द्विर्वे परसवर्णत्वमिति वार्तिकन्तु पूर्वंचाभिद्वीयमिति वचनस्यैवावयुत्यानुवाद इति बोध्यम्। मूले सस्य द्वित्वेति। अनचि चेत्यनेन वैकल्पिकद्वित्व इत्यर्थः। अत्र सकारस्य स्थाने खरि चेत्यनेन स्थानतः प्रयत्नतश्च तुल्यस्तकारः प्राप्नोतीति भ्रान्तस्य शङ्कायामाह। आन्तरतम्यादिति। स्थानेऽन्तरतम इति सूत्रे तमब्ग्रहणेन सङ्ग्रहैकादेशेन भाव्यमित्युभाभ्यामन्तरतमः सकार एव स्यात्। तदेतदुपपादयति। अन्यथेति। अन्यथा। उभाभ्यामान्तरतम्यानाश्रयणे। इदम्। सस्यार्द्धधातुक इत्येतत्। ननु सस्यार्द्धधातुक इतिन्यासारम्भे वक्ष्यतीत्यादौ चयो द्वितीया इत्यनेन पक्षे थकारो भवति। खरि

चेति सूत्रेण तकारे त्वस्याऽसिद्धत्वाद्वितीयादेशाप्राप्त्या थकारघटितरूपासिद्धिरिति कथमियमाशङ्क्यायत्तु तवं स्यार्द्धधातुकसंज्ञकस्य शब्दापेक्षत्वद्वितीयादेशस्य तु सकारमात्रापेक्षत्वमित्यन्तरङ्गत्वाद्वितीयादेशे कर्त्तव्ये सः स्यार्द्धधातुकइत्यस्यापि बहिरङ्गपरिभाषयाऽसिद्धत्वादत्र द्वितीयादेशो न भवत्येवेति। तन्न। अवात्सीदित्यत्र शास्त्रद्वयस्यापि समाननिमित्तकत्वात्। आर्द्धधातुकसंज्ञाया अधिकाया अपेक्षणात्तत्वबहिरङ्गमिति तु न वाच्यम्। संज्ञाक्षतबहिरङ्गत्वानाश्रयणात्। चैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाभावस्याद्यचोपपादितत्वाच्चेति चेन्न। अस्य यस्य प्राचीनमताभिप्रायकत्वात्तन्मते संज्ञाक्षतान्तरङ्गबहिरङ्गभावस्य विपाट्याम्रक्षत्तेः स्वीकारात्। न मु न इति सूत्रे नेति योगविभागेन क्वचिदसिद्धत्वन्नेत्यर्थकल्पनेन खरि चेत्यनेन तकारादेशेऽप्यसिद्धत्वन्न भविष्यतीति कल्पनायाः सम्भवाच्चेति। षष्ठ्या विपरिणम्यत इति। नद्याप इति पञ्चम्यन्तस्य सत्त्वात्। आमीति सप्तमी तु चेस्वय इत्यत्र चरितार्था। साधकमप्यत्राह। नामीति लिङ्गादिति। सुट्थाथ इति। तत्र हि बहव आम्शब्दाः पठ्यन्ते। कास्प्रत्ययादाममन्ते लिटि। ङस् ओस् आम्। किमेत्तिङित्यत्र। ङेराम् नद्यामित्यत्र। कस्येदं ग्रहणम्। षष्ठीबहुवचनस्य ग्रहणम्। कास्प्रत्ययेतिसूत्रपठितस्य तु सानुबन्धकत्वान्न ग्रहणम्। स चानुबन्ध इत्संज्ञापरित्राणार्थः कर्तव्यः। अस्ति चेत्संज्ञायाः फलमन्त्यादचः परो यथा स्यादिति। प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेषः मिदचोन्त्यात्परत्वेन प्रत्ययपरत्वेन वा। यस्तर्हि न प्रत्ययान्तादिजादेरिति। अत्राप्यास्कासोराम्वचनं ज्ञापकन्नायमन्त्यात्परो भवतीति। किमेदितिसूत्रविहितस्यापि न ग्रहणम्। सानुबन्धकत्वात्। ङेरामो निरनुबन्धकत्वेऽपि तत्र याट्स्याडाड्भिः परत्वाद्याधे सङ्गतिन्यायात्पुनस्तदग्रहणे षष्ठीबहुवचनस्यैव ग्रहणमित्युक्तम्। दण्डिसम्मतमर्थं खण्डयति। यत्विति। इङ्गशब्दादिभ्योऽतिप्रसङ्गं वारयति। नद्याप इतीति। लिहादुहामित्यादावतिप्रसङ्गं वारयति। हलन्ताच्चेदिति। विपरीतनियमापत्त्या तद्दूषयति। नद्याप इति। एवं सति हाहाङ्गङ्गशब्देऽतिप्रसङ्गः स्यादेव। ङ्गस्येऽपीति। मत्यतिमालादौ। ननु नैकमित्यसङ्गतम्। तिसृणामित्यत्र चारितार्थ्यादत आह। तिसृणामितीति। अन्यत्रापि चारितार्थं वारयति। चत-

स्नणामिति। गौणेऽप्रवृत्तौ भाष्यविरोधमप्याह। नैकमिति। अस्य गौणेऽप्रवृत्ति-साधकमुपायान्तरङ्खण्डयति। सप्ताहारित्यादि। अस्थिदधीति सूत्रे तिसृभ्य इत्यत्र च बहुवचननिर्देशेऽपि गौणे प्रवृत्तेः प्रामाणिकतया व्यभिचारादित्य-र्थः। गौणेऽप्रवृत्तिर्भाष्यान्तरसम्वादेन परेणोक्तेति यत्तदूषयितुमुपक्रमते। न चेति। पञ्चभ्येति। पञ्चभ्यन्तेनेत्यर्थः। स्वकल्पितेर्थे भाष्यान्तरमपि साधकमाह। षड्भ्य इत्यत्रापीति। न दोष इति। अस्य विहितविशेषणत्वेऽपीत्यादिः। ननु षट्चतुर्भ्य इत्यत्र षण्णान्तेति सूत्रेऽनुवर्तमानसङ्ख्यापदेन लोके गणनायामसिद्धानामेव ग्रहणेन षट्प्रधानत्वेऽपि कथं लुगित्यत आह। षण्णान्तेत्यत्रेति। प्रकृतेऽपीति। षट्च-तुर्भ्य इत्यत्रापि। उक्तभाष्येति। न ह्येकमितिभाष्येत्यर्थः। अङ्गस्येत्यस्यैवम-न्वयोऽन्यत्र भाष्ये दृष्ट इत्याह। अतो भिस इति। अत एव। विहितविशेषणा-नाश्रयणादेव। सर्वादिसूत्रस्थभाष्यं योजयति। यद्यपीति। एकदेशिन इति। विरुद्धविभक्तित्वेऽप्यन्वयस्योपपादित्वादिति भावः। अनयोरेवेति। एवञ्च त-द्भाष्यबलेन षट्चतुर्भ्य इत्यस्यान्यथा व्याख्यानमनुचितमिति भावः। कैयटोक्तिं खण्डयति। षड्भ्य इत्यादि। आमीति न्यासे कृते दीर्घे यदि भूतपूर्वगत्या ङ्क-स्यान्तत्वमादाय नुट् तदा पदादन्तामित्यत्रापि नुट् प्राप्नोतीति शङ्कां हरदत्तीया-न्निराकरोति। न चेति। मात्राकालिकत्वांश इति। नुड्विधायकसूत्रस्थङ्कस्य-ग्रहणस्यैतावन्मात्रेणोपपत्तेः। तेन। उत्तरार्थत्वेन। तत्फलमाह। चर्मणामि-ति। अत्र णत्वस्यासिद्धत्वान्नान्तत्वाद्दीर्घप्राप्तिः। दिगिति। दिगर्थस्तु ङ्कस्यग्रहण-सामर्थ्याद् भूतपूर्वङ्कस्यान्तानुडिति स्वीकारे पदां_दतामित्यादावतिप्रसङ्गशङ्का पदादीनामादेशत्वपक्षे। यदा तु पदादीनां प्रकृत्यन्तरत्वपक्षस्तदा पदान्दता-मित्यत्रातिप्रसङ्गशङ्कैव न। किञ्चादेशत्वपक्षेऽपि शस्प्रभृतिष्वित्यस्य विषयसप्त-मीत्वेन हलन्तादेवाम्विधानेनासुत्पत्तिकालिकङ्कस्यान्तानुडित्यर्थो ङ्कस्यग्रह-णसामर्थ्यात्कल्प्यते तावतापि पदांमित्यादावतिप्रसङ्गो वारयितुं शक्य एवेति। ननु सुपि चेति दीर्घे कर्त्तव्ये यथा सन्निपातपरिभाषा प्रवर्त्तते तथा नामीति दीर्घविधावपि सा कुतो न प्रवर्त्तते इतिशङ्कायामाह। सर्वचेति। सुपि चेति दीर्घे कर्तव्ये सन्निपातपरिभाषाप्रवृत्तिस्तु आन्नलोप इति सूत्रे भाष्ये ध्वनि-ता। तत्र हि श्रमः शकारविशिष्टस्य ग्रहणाभावे नान्नलोप इति न्यासे यन्नानां

यङ्लुगन्तस्य नामीत्यत्रापि नलोपः प्राप्नोतीतिदूषणेऽभिहिते दीर्घे जाते नास्ति लोपप्राप्तिरिति पूर्वपक्षिणा शङ्किते परत्वाद्दीर्घस्याधिक्या नलोपः प्राप्नोतीति सिद्धान्तितम्। अत्र परत्वादिति कथनेन नामीति सूत्रस्य प्रवृत्तिरभिहिता। न तु सुपि चेत्यस्य। नलोपस्यास्यापेक्षया सुपि चेति शास्त्रस्यैव परत्वात्। न च सुपि चेति दीर्घस्तर्हि परत्वान्नलोपात्प्राक् स्यादिति वाच्यम्। तस्य सन्निपातपरिभाषयाऽप्रवृत्तेः। नामीति दीर्घे तु आरब्धसामर्थ्यात्परिभाषाबाध इति भावः। यद्यपि सुपि चेति दीर्घोऽपि कष्टाय क्रमण इति निर्देशात्सन्निपातपरिभाषा न प्रवर्तत इति प्रागभिहितन्तथापि नामि परे सुपि चेति दीर्घे कर्तव्ये तदप्रवृत्तौ मानाभावः। अत एव सन्निपातपरिभाषाया दोषनिरूपणावसरे यादेशः सुपि चेति दीर्घत्वस्येत्येवाभिहितम्। यदि तु कष्टायेति निर्देशेन सामान्यतो दीर्घे कर्तव्ये सन्निपातपरिभाषाया अप्रवृत्तिङ्कृत्वायित्वा सुपि चेति दीर्घ इत्येव वक्तुमुचितमित्युच्यते तदाह्याह। कृताकृतेति। कृताकृतप्रसङ्गित्वमुपपादयितुमाह। न चेत्यादि। आयादय इतिसूत्रभाष्य इति। तत्र ह्यविशेषेण यादिविधिमुक्त्वा सार्वधातुके नित्यमिति न्यासपक्षे यादिबलीयस्त्वं विप्रतिषेधेन तुल्यनिमित्तत्वादिति वार्तिककृतोक्तम् तत्खण्डनाय वार्तिककृता यादिविधानस्यानवकाशत्वादित्यादिग्रन्थः। एतेन गोपायेत्यत्र चारितार्थ्यादनवकाशा इत्यसङ्गतमित्यपास्तम्। अप्रात्येति। षट्चितुर्भ्यो हलादिरिति खरप्रयोजकषट्त्वं स्थानिवत्त्वेनास्तीति भावः। कर्तेर्नामीति न्यासे लाघवमप्याह। एवञ्चेति। नुटीति तु नोक्तमिति। मात्रालाघवसत्त्वेऽपि बहुनामर्थानामङ्गत्वत्वेन ज्ञानगौरवापत्तेः। नुव्यजन्ताङ्गस्य दीर्घ इत्यर्थेऽनश्च इत्यादौ दीर्घापत्तेः। न च नुटि यदङ्गन्तस्य दीर्घ इत्यर्थे नायन्दोषः। नुटि परे यत्किञ्चिन्निमित्तकाङ्गस्य ग्रहणे तत्रैवातिव्याप्तेः। अङ्गसंज्ञाप्रयोजके नुटीति तु वक्तुमशक्यम्। नुड्मात्रस्याङ्गसंज्ञाप्रयोजकत्वासम्भवात्। नुटीत्यस्य नुड़ादौ लक्षणायान्तु लक्षणैव दोषः। एवं सन्नच्युत इत्यत्र ङमो ह्रस्वादचीति सूत्रेण नुटि नोपधाया इति दीर्घापत्तिः। सन्निपातपरिभाषया संयोगान्तलोपस्यासिद्धतया वा तद्वारणकल्पनेऽपि ज्ञानगौरवं स्फुटमाकिञ्चाक्षत्रन्त इत्यत्र कृन्दस्यपि दृश्यत इत्यनञ्यन्नन्तात्परस्य मतुपो नुडित्यर्थकेनानो नुडिति सूत्रेण नुटि कृते दीर्घापत्तिः। यदि तु नोप-

धाया इति दीर्घं कर्तव्येऽनो नुडित्यस्यासिद्धत्वम्पूर्वत्रासिद्धत्वादिति कल्प्यते तदाऽसिद्धत्वकल्पनैव दोषः । यदि त्वनश्च इत्यादौ दीर्घापत्तिवारणाय तरु नुगचीति न्यासेन लुप्तनकारस्य नञो नुगागमः क्रियते तदा नलोपः प्रातिपदिकान्तस्येति नलोपः प्राप्नोति । नुग्विधानसामर्थ्यान्नलोपाभावकल्पने तु कल्पनागौरवं स्फुटमेव । ष इत्येव सिद्ध इति । लाघवार्थमित्यादिः । नन्विणः षीध्वमिति सूत्रे ढ्रग्रहणमस्खित्यत आह । रषाभ्यामित्यत्रेति । एवञ्चेति । पदद्वयस्याधिकारत्वे चेत्यर्थः । इण्कोरित्यत्र समाहारद्वन्द्वः । सौत्रम्पुस्त्वम् । स्फ्रित्यादयर्थमिति आदिना गवाङ्ष्वित्यस्य सङ्ग्रहः । तदवयवपर इति । लक्षणया प्रत्ययावयवपर इत्यर्थः । व्याख्यानादिति । आत्मनेपदेष्वित्यादिनिर्देशमूलकात् । तत्र लिङ्गमप्याह । सातेरिति । बाह्याभ्यन्तरयोर्द्वयोरप्यान्तरतम्यपरीक्षोपयोगित्वं सवर्णसंज्ञायान्त्वाभ्यन्तरप्रयत्नस्यैव तुल्यास्यप्रयत्नमित्यत्र प्रशब्दबलादुपयोग इत्याशयेनाह । विवृतत्वरूपेत्यादि । ननु टाङसीतिसूत्रे सकारोच्चारणसामर्थ्यादेव षत्ववारणमभविष्यतीत्यत आह। टाङसीति सूत्र इति । तेन । तादृशबहुव्रीहिणा । तत्र वैयर्थ्यात्सामर्थ्यात्तदङ्गेष्विति न्यायेनाह । तत्र वैयर्थ्यादिति । निपातनस्य बाधकत्वाल्लोकेऽपि तथैव प्रयोग इति बोध्यम् । तदेतदुपपादयति । नाप्राप्त इति । शब्दस्वरूपं विशेष्यमादाय तदन्तविधिः सत्येव गमक इत्याशयेन ज्ञापकमाह । मूले इन्द्रे चेतीति । तदेतदुपपादयति । प्रथमार्थ इति । एवञ्च इन्द्वात्मकसमुदाये सर्वनामसंज्ञाप्राप्तिस्तदन्तविधिं विना नेति ज्ञापकत्वन्निषेधस्य । तदन्तविधौ शङ्कते । नन्विति । विरुद्धमेतेति । सत्यपि विहितविशेषणेऽतिसर्वशब्दे संज्ञाप्राप्तिरस्त्येवेति भावः । इत एव वारुचेरिति । कृतेऽप्युपसर्जनप्रतिषेधेऽतिसर्वशब्दे दोषतादवस्थ्यमत प्रतिषेधो न युक्त इत्यरुचेरेवेत्यर्थः । पक्षान्तरेति । अथ वा महतीयं संज्ञेति पक्षान्तराश्रयणरूपेत्यर्थः । ननु वार्तिकस्य ऋष्युक्तत्वेन प्रामाणिकत्वात्तत्रारुचिरनुपपन्नेत्याशङ्क्य समाधत्ते। न चेत्यादिना । द्वन्द्विसंज्ञासूत्र इति।अस्य इति भाष्योक्तेरित्यन्वयः। तत्र हि आचार्याचाराल्लंज्ञासंज्ञमन्देहं व्यवस्थाप्य सूत्रकारं प्रति प्रकृतसूत्रस्यागमकत्वमाशङ्क्य सूत्रकारीयपुनःपुनर्द्विशब्दोच्चारणरूपाचार्याचारेण गमकत्वसाधनमयुक्तमित्याशयेनानन्तरमनाकृतिलिङ्गेन वा संज्ञासंज्ञमसन्देहः

साधितः। तदसिद्धिरिति। अकजाद्यसिद्धिः। एतेनेति। सर्वनामप्रकृतिकसुबन्तादित्यर्थकरणेन। उत्तरार्थमिति। सर्वे इत्यत्र तु ङस्यादेशेऽपि गुणेन सिद्धेः। आवृत्ताविति। अङ्गस्येत्यस्यावृत्तावित्यर्थः। तेन। विहितत्वांशनिवेशेन। इत्यत्र नेति। उभयत्र समुदायस्य प्रथमार्थसप्तम्यन्तपदघटितेन तृतीयासमासे इन्द्वे चेत्यनेन सर्वनामसंज्ञानिषेधात्। अत एव। सर्वनाम्नो विहितस्येत्यर्थकरणादेव। अन्यथाऽनेन समुदायस्य सर्वनामसंज्ञाभावपक्षेऽप्यवयवस्य सर्वनामतया ततः परत्वाच्छीभावस्य दुर्वारतया विकल्पविधानं व्यर्थं स्यादिति भावः। नन्वङ्गस्यावृत्त्यभावेऽपि सर्वनाम्नोऽदन्तादिहितस्याङ्गसंज्ञानिमित्तस्येत्यर्थः कुतो नेत्यत आह। अङ्गसंज्ञानिमित्तस्येति। अदन्तादिहितस्येत्यर्थेऽदन्तत्वस्योद्देश्यतावच्छेदकत्वं स्यादेवं सति तद्धर्मावच्छिन्नस्य विधानकाले सिद्धिं विना न सुट्प्राप्तिरिति भावः। यदि त्वतः परस्याङ्गसंज्ञानिमित्तस्य सर्वनाम्नो विहितस्येति व्याख्यायते तदा तु नानुपपत्तिरित्यवधेयम्। ननु विभक्तिविषये विभक्त्युत्पत्तेः प्रागेवात्वभविष्यतीति नायन्दोष इत्यत आह। अत्त्वविधाविति। प्रत्ययादित्वज्ञानाभावादिति॥ समुदायादेशे हि स्वानिवद्भावेन समुदायस्य प्रत्ययत्वज्ञानन्ततः प्रत्ययादित्वज्ञाने सति लशक्वित्यस्य प्राप्तिस्ततोऽनुबन्धत्वज्ञानमिति भावः सिद्धान्तार्थमाह। परे त्विति। अत एव। अनुबन्धपदस्येदृशार्थकत्वादेव। अन्यथा। अनुबन्धपदस्य वाचकतासम्बन्धेनेत्पदविशिष्टार्थकत्वे। विकल्पो दुर्वार इति विधानकाले नानुबन्धकृतमसारूप्यमितिवचनस्याप्रवृत्तौ वासरूपसूत्रप्रवृत्त्येति भावः। वासरूपवचनन्तु स्वाश्रयकृतोरिन्नित्येतद्विषयेऽणव्यावर्त्तकत्वेन चरितार्थमिति बोध्यम्। न च हलन्त्यमिति सूत्रेण व्यवस्थितान्त्यस्येत्संज्ञाविधानाद्वाक्यार्थज्ञाने सति प्रत्ययत्वेन परिच्छिन्नाद्यान्त्ययोः ककारणकारयोरित्त्वज्ञाने नानुबन्धेत्यस्य प्रवृत्तिरिति विकल्पो दुर्वार इति वाच्यम्। प्रत्ययइत्यनेनैकवाक्यतासत्त्वात्तत्सूत्रजन्यशाब्दबोधरूपे प्रत्ययत्वेन ज्ञाने तत्संज्ञायाः प्राप्तिसम्भवात्। जातनिवृत्त्ययोगादिति। कविषये जातस्याणो निवृत्त्ययोगादित्यर्थः। तज्ज्ञान इति। अनुबन्धत्वज्ञान इत्यर्थः। तन्निवृत्तिः। अणो निवृत्तिरित्यर्थः। अत्रापि। जसः शीत्यत्रापि। तत्त्वज्ञाने। प्रत्ययत्वज्ञाने। निवृत्त्यापत्तिरिति। नानुबन्धकृतमनेकाल्त्वमित्यस्य प्रवृत्त्या सर्वादेशत्वस्यापि निवृत्त्यापत्तिरित्य-

र्थः। ध्वनितञ्चेदमिति। तत्र लुटः प्रथमस्येति सूत्रभाष्ये डाविकारस्य शित्क-रणंसर्वादेशार्थम्। डाविकारः शित्कर्त्तव्यः। किंप्रयोजनम्। सर्वादेशार्थम्। शि-त्त्वञ्चेति सर्वादेशो यथा स्यात्। अक्रियमाणे हि शकारे अलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येतेत्युक्तम्। अत्र कैयटः। डाविकार इति। डादेश इ-त्यर्थः। नानुबन्धकृतमनेकाल्त्वमित्यन्त्यस्य स्यादिति डाञ्चकृत्य इत्याह। तद्-ग्रे भाष्ये सिद्धमलोन्त्यविकारात्। सिद्धमेतत्। कथमलोन्त्यविकारात्। अस्त्व-यमलोन्त्यस्य। का रूपसिद्धिः कर्त्ता। डिति टेर्लोपाल्लोपः। डिति टेर्लोपेन लो पो भविष्यति। अभत्वान्न प्राप्नोति। डित्करणसामर्थ्याद्भविष्यति इत्युक्तम्। डितीति। आकारे डिति परतः टिसंज्ञकस्य लोपो डित्करणसामर्थ्याद्भविष्य-तीति। एतद्भाष्ये ऽन्त्यादेशत्वमभ्युपेत्य टिलोपेन समाहितम्। पूर्वपक्षिणा च डा-देशस्य शित्त्वङ्कर्त्तव्यमित्युक्तमेतेन ध्वनितम्। यद्यनुबन्धपदस्यानुबन्धत्वयोग्ये लक्षणा न स्यात्तदा आदेशप्रवृत्तिकालेप्युक्तरीत्यानुबन्धत्वाभावेन नानुबन्धेत्य-स्याप्राप्त्याऽनेकाल्त्वे नैव सर्वादेशत्वे सिद्धे पूर्वपक्षसमाधानयोर्निर्हेतुत्वापत्ति-रिति। ततोऽग्रे भाष्ये अनित्त्वाद्वा। अथ वाऽनित्त्वादेतत्सिद्धम्। अनित्त्वञ्चा-लोन्त्यस्यायम्भवन्न प्रत्ययः स्यादित्यादिनोपपादितम्। आनुपूर्व्या। इदम्भाष्यमनुब-न्धपदस्य लक्षणाया अभावे नानुबन्धेतिवचनस्याप्रवृत्तिस्वीकारेप्यानुपूर्व्यादने-काल्त्वं नैव सर्वादेशत्वम्भविष्यतीत्यभिप्रायेण। ततः प्रश्लिष्टनिर्देशाद्वा। अथ वा प्रश्लिष्टनिर्देशोयम्। डा आ डा इत्युक्तभाष्ये। एतेनाकारस्य प्रश्लेषाभावे डकारस्यानुबन्धत्वयोग्यत्वान्नानुबन्धेत्यस्य प्रवृत्त्या सर्वादेशत्वन्दुर्लभं स्यादित्यु-क्तप्रायम्। यत्तु मध्यपठितस्यानित्त्वादित्यस्यैव सिद्धान्युक्तित्वम्पूर्वोत्तरयोस्त्वे-कदेशयुक्तित्वमिति कल्पनन्तत्प्राचीनमत एव अद्यत्वाजाड्येनेति दिक्॥ ननु त-तीयासमास इत्यनेनापि समुदायस्य सर्वनामसंज्ञानिषेधादवयवस्य सर्वनाम-त्वान्नासपूर्वायेत्यत्रसंभावो दुर्वार इत्यत आह। सर्वनाम्नो विहितस्येत्यर्थ इति। विभक्तित्वयोग्येति। विभक्तित्वव्यवहारविषयत्वयोग्ये इत्यर्थः। सौत्रं विभक्ति-पदन्तत्र लाक्षणिकमिति भावः। अत्र साधकमाह। अत एवेति। विभक्तिप-दस्य तादृशार्थलाक्षणिकत्वादेव। तुग्रहणञ्चरितार्थमिति। सर्वस्मिन्नित्यादौ न-कारस्येत्संज्ञाव्यावर्तकत्वे नैव तुग्रहणञ्चरितार्थं स्यात्तच्च लक्षणां विना न संभ-

वतीति भावः। न च प्राग्दिशीये चारितार्थ्यम्। तेष्वप्रवृत्तेरिष्टत्वात्। यत्तु उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसर्जातनिमित्तमप्युपसर्गं बाधत इति न्यायेन स्मिन्नादेशप्रतिपत्तिकाले प्राप्तेर्ङ्याया वारणे सिद्धे विभक्तिपदस्य लक्षणाकल्पनमनुचितमिति। तन्न। उत्सर्गापवादयोरेकवाक्यतायां एव विकल्पवारणाय सम्प्रदायसिद्धतया हलन्त्यमितिसूत्रघटकहल्पदस्य विभक्तिस्थतवर्गादिभिन्नहलत्वावच्छिन्नबोधकत्वं वाच्यमेवञ्च स्मिन्नादेशस्य प्रवृत्तिसमये विभक्तिज्ञानाभावादित्वस्यानुपपत्तिस्तदवस्थैवेति लक्षणाया अवतापि वाच्यतया न्यायानुपयोगात्। तेन। परिगणनेन। अन्यथाऽन्वर्थसंज्ञया क्त्वादिशब्दानामपि स्यादिति भावः॥ समुदाये शक्ताविति। यथा सर्वोयं धान्यराशिश्चैत्रस्येत्यादौ। यदा तद्राश्यवयवा वक्तृबुद्धिस्थास्तदा तदभिप्रायेणायं प्रयोगः। मैत्रीयगोधूमराशेरपि यदा कदा चिच्चैत्रीयबुद्धिस्थावयवारब्धत्वेपि सम्प्रति मैत्रसम्बन्धित्वविवक्षायां सर्वोयं राशिर्मैत्रस्येति प्रयोगो न तु तदा चैत्रस्येत्यतो बुद्धिस्थत्वं विशेषणम्। तादृशसमुदायद्वयादीति। बुद्धिस्थानेकसंख्याकावयवारब्धसमुदायद्वयविवक्षायां द्विवचनम्। तादृशसमुदायत्रयादिविवक्षायां बहुवचनम्। नन्वेवं सर्वोऽप्यात्मा नित्य इतिप्रयोगानुपपत्तिः। अद्वैतसिद्धान्तेऽन्तःकरणद्युपाधिभेदादात्मनाभेदेऽपि बुद्धिस्थानेकसंख्याकावयवारब्धसमुदायरूपत्वानुपपादनात्। एवमात्मनां सर्वेषामेकत्वमित्यादिप्रयोगानुपपत्तिः। न चात्राशेषत्वावच्छिन्नः सर्वशब्दार्थः। अशेषत्वञ्च विधेयशून्यावृत्त्युद्देश्यतावच्छेदकत्वम्। प्रकृते विधेयस्य नित्यस्य यस्तादात्म्यसंबन्धावच्छिन्नाभावस्तद्वाननित्यः प्रपञ्चस्तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभाववदात्मत्ववत्त्वमात्मनि प्रतीयत इति नानुपपत्तिरिति वाच्यम्। सर्वे घटाः प्रमेयत्ववन्त इत्यत्रागत्यापत्तेः। विधेयस्य विधेयतावच्छेदकस्वरूपसम्बन्धावच्छिन्नाभावाप्रसिद्धेः। किञ्च सर्वे घटा रूपवन्त इत्यादौ शब्दाद् घटत्वावच्छिन्नं तादात्म्यसम्बन्धेन रूपाभाववदवृत्तिघटत्वावच्छिन्नस्य विधेयांशेऽधिकावगाहित्वेन शाब्दबोधसम्भवेऽपि वारद्वयं घटत्वविषयत्वावगाह्यनुभवस्य सार्वजनीनस्याभावादनुपपत्तिः। न चोद्देश्यतावच्छेदकव्यापकविधेयवत्त्वमेव सर्वशब्दार्थः। तदवच्छिन्ने तस्य विधेयतया भानानुपगमात्। न च सर्वशब्दार्थो व्याप-

कत्वमेव तस्य विधेयेऽन्वयाद्वानुपपत्तिरिति वाच्यम् । नामार्थयोर्भेदसम्बन्धेनान्वयानुपगमात् ।नाप्यभेदेन विधेयात्वपीव्यापकः सर्वपदार्थः। एवं सति विधेयबोधकपदसामानाधिकरण्येन सर्वशब्दस्य तल्लिङ्गत्वापत्त्या सर्वे वेदाः प्रमाणमित्यत्रान्वयिप्रमाणशब्दवत्सर्वशब्देनपुंसकत्वापतिः। एवमेकवचनापत्तिश्चेति चेन्न । उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिको धर्मः सर्वपदप्रवृत्तिनिमित्तम् । स च धर्मः सर्वे घटा रूपवन्त इत्यादौ घटनिष्ठयावत्त्वम् । तदवच्छिन्नस्य चोद्देश्येऽभेदेनान्वयोपगमान्न पूर्वोक्तानुपपत्तिः । यावत्त्वयर्याप्तावुद्देश्यतावच्छेदकव्यापकत्वञ्चोद्देश्यतावच्छेदकसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वम् । न च विधेयव्याप्यत्वञ्च विधेयतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकविधेयाभाववदवृत्तित्वमेवञ्च सर्वे घटाः प्रमेयत्ववन्त इत्यादौ स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयत्वाभावाप्रसिद्धाऽनुपपत्तिरिति वाच्यम् । व्यभिचारित्वसम्बन्धावच्छिन्नप्रतियोगिताकविधेयतावच्छेदकावच्छिन्नाभाववत्त्वस्यैव व्याप्यत्वरूपत्वात् । व्यधिकरणसम्बन्धावच्छिन्नाभावश्च सर्वमतप्रसिद्ध एव ॥ अयं सर्वशब्दार्थश्च यत्र सर्वशब्दस्योद्देश्यबोधकपदसामानाधिकरण्यन्तत्र । यत्र तु विधेयबोधकपदसामानाधिकरण्यन्तत्र तु विधेयतावच्छेदकव्यापकोद्देश्यतावच्छेदकावच्छिन्नसंबन्धव्याप्यपर्याप्तिकयावत्त्वम्प्रवृत्तिनिमित्तम् । पृथिवी सर्वगन्धवतीत्यादौ यथा । पूर्वादिशब्दानां सर्वनामसंज्ञाया अष्टाध्यायीस्थसूत्रेण जसाधारं यच्छब्दोभावाख्यं कार्यन्तत्र सिद्धेर्गणसूत्रार्थमाह । व्यवस्थेति । ननु नित्यद्विवचनान्त इत्यनुपपन्नं यत्र टाप्त्रयोभस्य द्विवचनान्तत्वासम्भवादत आह । द्विवचनान्त एवेत्यर्थ इति । एतेन नित्यं द्विवचनान्त इत्यत्र नित्यशब्दोऽवधारणार्थ इति सूचितम् । तेन सजातीयवचनान्तरस्यैव व्यवच्छेदो न तु टापः । अन्तोदात्तत्वस्यैवेति । चित इति सूत्रे सप्रकृतेरित्युक्तत्वात् । ननु प्रत्ययविधौ यदुद्देश्यतावच्छेदकन्तदवच्छिन्नस्यैव प्रकृतित्वमिति विशेषोऽस्त्येवाशयेन शङ्कते । न चेति । प्रातिपदिकस्यैव प्रकृतित्वादिति । यदुद्देश्यत्वेनोपात्तन्तत्प्रकृतिरित्युच्यते तादृशञ्च प्रातिपदिकमेवेति भावः । न्यायात् । स्वार्थे एरिपूर्णस्यैवेतराकाङ्क्षत्वमित्येवंरूपात् । वचनादिति । ओकारसकारभकारादाविति वक्ष्यमाणवचनादित्यर्थः। के तु नेति । कान्तस्य शब्दान्तरत्वात्। प्रत्ययान्तर-

त्वेन व्याख्यानादिति। प्रत्ययविधायकसूत्रेषु महाविभाषासम्बन्धस्य बहुशो दर्शनादित्यर्थः। दृढीकर्त्तुमस्योपादानम्। हृत्तिविषय इति। अयं भावः। उभयोऽन्यत्रेति वार्त्तिकस्वारस्येनोभौ साभ्यासस्येति सौत्रप्रयोगेण च यत्र द्विवचनस्याश्रवणन्तत्रैवायचः साधुत्वन्तेन हृत्तिविषय इतिलब्धमिति। अत एव॥ सुबुत्पत्तेः पूर्वमस्योत्पत्तिरेव। चलाद्युत्पत्तिरिति। एतेन यस्य मते उभशब्दस्य न सर्वादौ पाठस्तस्मति चलादिघटितस्य दृष्टान्तत्वेनोपन्यासः सङ्गच्छते। अयच्च। अयच्प्रत्ययश्च। ननु हृत्तिविषय इत्येतावन्मात्रोक्तावुभयोर्वास इत्यत्रायच् दुर्वार इत्यत आह। उभशब्दस्येति। ननूभशब्दस्य द्विवचनपरत्वाभावो हृत्तिविषये पूर्वमयच् यदि स्यात्तदाऽस्त्येवेत्यत आह। उभयशब्दस्य वेति। यद्यत्रायच् स्यात्तदापि प्रकृते विभक्तेरलुकि कृते उभयशब्दस्य द्विवचनपरत्वं स्यादेवेति पूर्वमप्ययच् न प्रवर्त्तत इति भावः। ननु द्विवचनपरत्वाभावेनेत्यसंगतम्। नित्यमिति सूत्रेण विधीयमानस्यायचोऽन्तरङ्गत्वात्समासतद्धिताद्युत्पत्तेः सुबुत्पत्तेश्च पूर्वमेवोत्पत्तिसम्भवात्तदा सर्वत्रैव द्विवचनपरत्वाभावोऽस्त्येवेत्यत आह। तत्परत्वविषयाभाव इति। भावप्रधाननिर्देशेन द्विवचनपरत्वविषयत्वाभाव इत्यर्थः। न च कप्रत्ययेनेष्टसिद्धिरिति यस्य शङ्का तन्मते उभशब्दस्य सर्वादिषु पाठाभावेन ततस्तसिलादिविवक्षायाः कर्त्तुमशक्यत्वेन द्विवचनपरत्वविषयतायाः एव सर्वत्र सम्भवेन द्विवचनपरत्वविषयत्वाभावस्यासम्भवेन उभयत उभयत्रेति दृष्टान्तेन कप्रत्यये सत्ययच् स्यादित्यसङ्गतमिति वाच्यम्। द्विवचनविषयत्वाभावसम्भावनेतिव्याख्यानेनैव समाधानात्। एवञ्च तन्मते उभशब्दस्य पाठाभावेऽप्युभयशब्दस्य सर्वादौ पाठस्य सत्त्वाद्यद्यत्रायच् स्यात्तदा ततसिलादिः स्यात्ततश्च द्विवचनस्य लुक् स्यादेवं रीत्या द्विवचनपरत्वविषयत्वाभावसम्भावनासत्त्वान्नानुपपत्तिः। ननूभयो मणिरित्यत्र तयपः स्थानेऽयजादेशो यत्र तत्र स्वार्थिकः पुनरयच् स्यादत आह। उभयो मणिरित्यादाविति। रूपबाद्यन्त इति। उभरूपमित्यादौ, हृत्तिविषय इत्येतद्वाक्यविज्ञाप्यार्थस्य तत्राप्यत्वात्। अत्रादिना बहुभशब्दसङ्ग्रहः। ननु कुत्साद्यर्थविवक्षायामेव हृत्तिविषयता तत्रायचि कृते उभयशब्दस्य सर्वादौ पाठस्य सर्वमतसिद्धतयाऽकृतेव स्यात्तथा सति द्विवचनपरत्वविषयतासत्त्वेन कथमयचः प्रसङ्ग इत्यत आह।

अयच्चकच् त्विति । उपजीव्यत्वेनेति । यद्यत्र कप्रत्ययः स्यात्तदा द्विवचनपरत्वविषयत्वाभावमाश्रित्यायचः प्राप्तिरिति कप्रत्ययस्य भाविनी या उत्पत्तिः सा उपजीव्या यदि तु कप्रत्ययस्य बाधकोऽकच् प्रकृते स्यात्तर्हि उपजीव्यविरोधः स्पष्ट एवेति भावः । नन्वपवादविषये कथं बाध्यप्रवृत्तिरत आह । अपवादस्त्वन्यत्रेति । युष्मदस्मच्छब्दविषये । तस्येह पाठस्तूभकावित्यकजर्थं इतिसूत्रोक्तसिद्धान्तमाह । अत्रेदश्चिन्त्यमिति । नन्वकच्त्रिधावेवोभशब्दपाठे संज्ञाभूतोभशब्दादप्यकच् स्यात्सर्वादौ पाठे तु सर्वनामसंज्ञायास्तत्राभावेन नाकच्प्राप्तिरिति विशेषोऽस्थेवेत्यत आह । अनभिव्यक्तेति । अत एव । सर्वनामसाहचर्यादेव । एतेन भिव्यक्तेति न्यायस्य पदकार्ये प्रवृत्तेः सिद्धान्तितत्वेन कथमत्र तत्सञ्चार इति निरस्तम् । तस्य न्यायस्य प्रवृत्तावेव निर्भरस्याभावात् । अथोभयशब्दविषये विशेषमाह । उभयोऽन्यत्रेतीति । तयप्समानार्थक इति । एतेन वक्ष्यमाणः प्रत्ययान्तरत्वपक्ष एव मुख्य इति सूचितम् । तदुपक्रमेण । स्वार्थिकोपक्रमेण । एतन्मूलकमेवेति । उक्तभाष्यमूलकमेवेत्यर्थः । प्रागुक्तभाष्येति । उदाहरणप्रदर्शनपरभाष्येत्यर्थः । यदि द्विवचनमपि स्यात्तदा तदन्तोदाहरणाप्रदर्शनेन न्यूनतापत्तिः स्यादिति भावः । सिद्धान्तमाह । भाष्ये त्विति । उभयोन्यत्रेति वार्त्तिकव्याख्यानावसरे यो द्विवचन शब्द उक्तः स न कृत्रिमस्यैव बोधकः किन्तु यौगिक इत्याशयेनाह । द्वित्वसंख्येति । अत एव । द्विवचनशब्दस्य यौगिकत्वादेव । पूर्वोक्तार्थे भाष्यसम्मतिमाह । तदुक्तमिति । भाष्यस्थग्रहणशब्दः करणल्युडन्त इत्याशयेनाह । ग्राहकेणेति । उभयत उभयत्रेति प्रयोगासङ्गतिमपरिहरन्नाह । ततसिलाविति । शक्तिप्रधानाविति । अपादानत्वाधिकरणत्वशक्तीत्यर्थः । इदं शक्ते विभक्त्यर्थत्वमेवेति मतेऽकारकस्य विभक्तिवाच्यत्वेऽपि संख्यायाः प्रकृत्यर्थविशेषणतया भानेन संख्याप्रकारकप्रकृत्यर्थविशेष्यकबोधो यद्यपि भवति । तथापि न विभक्तिवाच्यार्थे संख्यायाः प्रकारत्वमिति निरुक्तद्विवचनत्वाभावः स्पष्टः । उभयशब्दाद्बहुवचनोपपत्तये आह । अवयवद्वयेति । अत एव अर्थस्योभयत्र निमित्तत्वादेव । न विकल्प इति । अर्थाभावादित्यादिः । स्वसिद्धान्तरीत्याह । अर्थकृतेति । अर्वाचाम् । प्रक्रियाकारादीनाम् । अभावबोधकतयेति । इदन्निषेधार्थेति वचनप्रवृत्तौ नियामकम् । यदुक्तमन्तरङ्गत्वादिति तत्खण्ड-

यति। किञ्चेति। अत एव प्रातिपदिकसंज्ञासमकालं सर्वनामसंज्ञाप्रवृत्तिस्वीकारादेव। ननु प्रातिपदिकसंज्ञासमकालमेव चेत्सर्वनामसंज्ञा तदा पूर्वपरेत्याद्यष्टाध्यायीस्थसूत्रवैयर्थ्यमत आह। पूर्वपरेत्यादीति॥ ज्ञापकसिद्धपरिभाषाया अपि न प्रवृत्तिरित्याह। असिद्धमिति। अन्तरङ्गे कर्त्तव्ये जातस्य बहिरङ्गस्यानेनासिद्धत्वप्रतिपादनात्। एतादृशार्थे साधकमाह। बहुश इति। पचावेदमित्यादौ। तदुत्तरमिति। नित्यसंज्ञोत्तरमित्यर्थः। एतत्प्रवृत्त्येति। प्रथमचरमेत्यस्य प्रवृत्त्येत्यर्थः। ननु जसीति सप्तम्या विषयसप्तमीत्वात्पूर्वं विकल्पप्राप्तिः स्यादत आह। जसीति विषयेति। तदुत्तरमेव तद्विषयात्। प्रातिपदिकसंज्ञोत्तरमेव जस्विषयत्वसत्त्वात्। नित्यसंज्ञायास्तु प्रातिपदिकसंज्ञाप्राप्तिसमानकालप्राप्तिकतया विकल्पेन बाधा न सम्भवतीति भावः। एतेनान्तरङ्गत्वादित्युक्तिर्निरस्ता। स्थानिवद्भावेन या विकल्पप्राप्तिस्तस्याः परिणेऽमन्तरङ्गत्वाद्बाधमभ्युपेत्यापि प्रकारान्तरेण तन्मतन्निरस्यति॥ स्थानिवदतिदेशेति। अत्र निरवकाशत्वोक्त्याऽन्तरङ्गस्यापि निरवकाशबाधकत्वासंभवः सूचितः। नन्वन्तरङ्गपरिभाषया स्थानिवद्भावस्यैव बाधोऽस्त्वत आह। प्रत्यक्षस्येति। ननु कार्यकालपक्षे द्वयोस्संज्ञयोर्युगपत्प्राप्तिः स्यादत आह। सर्वनामसंज्ञायामिति। उक्तयुक्त्येति। उभय इत्यत्र सर्वनाम्नो विहितत्वसिद्ध्यर्थं यथोद्देश्यत्वमेव स्वीकर्त्तव्यमन्यथा श्रीभावो न स्यादितिरीत्येत्यर्थः। उक्तार्थे भाष्यसम्मतिमाह। अत एवेति। अन्तरङ्गपरिभाषया प्रक्रतेऽनिर्वाहादेव। प्रत्ययान्तरत्वपक्षे ङीबसिद्धिमपरिहरति। उभयीत्यत्रेति। अतिप्रसङ्गमपरिहरति। अत इत्यनुवृत्त्येति। नन्वेवं सति मात्रज्ग्रहणेनैव सिद्धे टिड्ढेतिसूत्रे तयबग्रहणवैयर्थ्यापत्तिरत आह। तयबग्रहणन्विति। अवयुत्येति ल्यबन्तम्। पृथक्कृत्येत्यर्थकम्। अवयुतिशब्दप्रकृतिकतृतीयान्तं वा। समुदायादेकदेशस्य पृथक्करणेनानुवाद इत्यर्थः। ननु द्विचिशब्दादवयवे वर्त्तमानादवयविनि यदा तयप् तदा तस्य स्थानेऽयजादेशे स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति जसि विकल्पो भवति। अयचः प्रत्ययान्तत्वे तु न विकल्पप्राप्तिरत आह। द्विचिशब्देति। जसः श्रीविषय इति न्यूनमन्यत्रापि प्रयोगाभावादत आह। पुंस्येवेति। स्त्रियान्नपुंसकत्वे च प्रयोगो दृश्यते।

द्वयी विधा। असती कुलद्वयन्नाश्रयतीत्यत्र यथा। तदाश्रय इति। तयादेशे उभय-प्रतिषेध इति वार्तिकप्रत्याख्यानपरभाष्याश्रय इत्यर्थः। न च तस्यपामिति वक्तव्ये तस्यस्यमिपामिति गुरुनिर्देशात्समुदायानुबन्धस्यावयवानुबन्धत्वाभावो ज्ञापित इति यदि मात्रजिति प्रत्याहारस्तदाऽयचश्चित्त्वन्न स्यादिति वाच्यम्। ज्ञापकसिद्धन्न सर्वत्रेति परिभाषया क्वचित्समुदायानुबन्धस्याप्यवयवानुबन्धत्व-स्वीकारात्। यत्तु द्विचिभ्यामिति सूत्रे तयग्रहणस्याकरणप्रौढ्येदम्। वस्तुतस्तु उभयशब्दप्रकृतिकायच एव प्रत्ययान्तरत्वमत एव कर्तृकर्मणोरिति सूत्रे धा-तोर्द्वये प्रत्ययास्त्रिङः क्तस्येति प्रयोगः सङ्गच्छते। व्यथां द्वयेषामिति भाघ-प्रयोगश्च द्वयमिश्रन्तीतिरीत्या यद्यप्युपपद्यते तथाप्युक्तप्रयोगस्यान्यथोपपादा-नासम्भवादिति। तन्न। अयच्प्रत्ययान्तरमिति प्रकृतिविशेषानुपादानेन प्रत्य-यान्तरत्वोक्त्या द्वये प्रत्यया इतिप्रयोगाच्च द्वयशब्दोऽव्युत्पन्नप्रातिपदिकान्तस्य च प्रथमचरमेतिसूत्रस्थचकारेण संग्रहात्सर्वनामसंज्ञासिद्धिरित्याशयात्। उभया अमित्रा इति प्रयोगश्च छान्दसत्वेन साध्य इति दिक्। फलाभावमुपपादयति। अदन्तादङ्गात्परस्येति। पूःशब्दस्येति। तदर्थस्येत्यर्थः। अत एवान्तरायान्नग-र्यामिति प्रयोगस्याप्युपपत्तिः। एकशब्दस्य यावन्तोऽर्था एकोन्यार्थ इत्यादिनो-क्तास्वेषु केषाञ्चिदर्थानां सप्रमाणत्वं तस्य चित्तु नेति विशेषन्दर्शयितुमाह। तत्रेति। णान्ता षडिति सूत्रे सङ्ख्यावाची एको द्वौ बहव इत्यत्र प्रसिद्धः। अन्यार्थकोऽपि तत्रैव सधमादो द्वाभ्यामेकास्तां इत्युक्तः। असहायवाच्यपि तत्रैव एकाग्नयः एकहलानीत्युक्तः। एको गोत्र इति सूत्रशेष इति। तत्र हि एका प्रकृतिर्गोत्रप्रत्ययमुत्पादयति इत्युक्तम्। तत्रान्ये नैकशब्दस्य परमप्र-कृतिपरत्वे कथिते सिद्धान्तिनोक्तम्। न ह्येदं लोकाद्विद्यते लोके हि सङ्ख्यां प्रवर्त्तमान मुपचरन्ति। एक इति वा प्रथम इति वा। यावद् ब्रूयात्प्रथमो गोत्रे प्रत्ययमुत्पादयति तावदेको गोत्र इतीति। अत्र कैयटः। लोके योऽर्थ एकश-ब्दस्य दृश्यते स एवेहाश्रीयते। लोके च प्रथमशब्दसमानार्थ एकशब्दो दृश्यते इतीहापि प्रथमवाचे वाश्रीयते। शास्त्रेऽपि प्रथमार्थ एकशब्दो दृश्यते। एकेऽ-ल्पप्राणा इति। प्रथमेऽल्पप्राणा इति गम्यते। उपचरन्तीति। व्यवहरन्तीत्यर्थः। प्रायेणार्थकृतेनैकदिगित्यत्र दृष्टः। समानार्थकस्तु चैत्रमैत्रयोरेका मातेत्यत्र।

एतयोरेकत्वसङ्ख्याप्रकारकबोधजनकत्वात् अर्थत इति । सार्वविभक्तिकस्तसिः । अर्थवशात् । दिशो मातुश्चैकत्वं विना साधारणत्वसमानत्वयोरनुपपत्तिः । अल्पार्थकस्त्वनेकधान्यवपनयोग्यक्षेत्रेऽपि धान्यात्मत्वाद्यदैकजातीयस्यैव धान्यस्य वपनं श्रुत्वाऽत्र क्षेत्रे मयैकस्यैव धान्यस्य वापः कृत इति कृषीवलोऽनुमिनोति प्रयुङ्क्ते तदीयवाक्ये प्रसिद्धः । तदर्थकाभावो ध्वनित इति । पूर्वोक्तप्रयोगवटकैकशब्दस्य तु एकजातीयत्वार्थकत्वकल्पनेनाप्युपपत्तिरिति भावः । न दृढम्मानमिति । यदा त्वसहायत्वं स्वस्य दुरदृष्टसत्त्वप्रयोज्यमेकाकिभिः क्षुद्रकैर्जितमित्यादौ यथा तदा प्रधानत्वप्रतीत्यभावेऽपि बहुषु राजसु वीरेषु सत्स्वपि प्राधान्यादयमेकवीर इति यदा प्रयोगस्तदा प्राधान्यप्रतीतिर्यद्यपि सम्भवति तथापि न दृढम्मानं स्वनिष्ठगुणसजातीयगुणवत्त्वकृतसाजात्यवदन्याभावप्रयोज्यासहायत्वस्यापि पर्यवसानेन वाक्यार्थनिष्पत्तिसम्भवादिति भावः । स्वाभिधेयापेक्षोऽवधिनियमो व्यवस्थेति क्वचित्पाठस्य चायुक्तः । कर्मवच्चन्तस्यापेक्षशब्दस्यावधिसापेक्षत्वेन नियमेन योगासम्भवसंभवादत आह । समस्तः पाठ इति । एवं च स्वाभिधेयापेक्षशब्दस्यावधिशब्देन समासं कृत्वा नियमशब्देन समासे कृते स्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमो व्यवस्थेति वाक्यार्थ सिद्धः । एवञ्च यत्फलितन्तदाह । नियमेनेति । नियमेनावधिसापेक्षत्वञ्चावधिबोधकशब्दप्रयोगनिवर्त्तनीयोत्थिताकाङ्क्षाजनकज्ञानविषयत्वम् । तच्च पूर्वादिशब्दार्थे प्रसिद्धमेवेति भावः । व्यवस्थायामिति सप्तमी तु विषयत्वार्थिकैव । आग्रहे त्विति । एवमभिधानेनाच्च दक्षिणशब्दस्यावधिसापेक्षार्थवृत्तित्वाभावः सूचितः । उत्तरे प्रत्युत्तर इति । अत्रोत्तरशब्दः प्रतिवादुच्चारितवाक्यपरः । प्रत्युत्तरशब्दस्तु पूर्ववादुच्चारितोत्तरनिराकरणसमर्थवाक्यपरः । उत्तराः कुरव इति वाक्यघटकोत्तरशब्दार्थे व्यवस्थाविषयत्वमुपपादयति । सुमेर्ववधिकेति । अनेन सुमेरुशब्दस्याकाङ्क्षानिवर्त्तकत्वं सूचितम् । मध्यान्हेति । अस्य तत्पुरुषीयेत्यादिः । एवमेव सर्वेषामेव वर्षाणामेरुरुत्तरतः स्थित इति वाक्यस्याप्युपपत्तिः । दिग्वाचकानाम्पूर्वादिशब्दानामप्रवृत्तिनिमित्तमुक्त्वा देशवृत्तीनामप्याह । देशवृत्तीनामपि । अत्र केचित् । असंज्ञायामित्यस्योत्तराः कुरव इति प्रत्युदाहरणमसङ्गतम् । देशविशे-

ये उत्तरशब्दस्य निरूढत्वादवधेर्नियमेनापेक्षाया अभावेन व्यवस्थाया अभावात्। किञ्च दिग्वाचकपूर्वादिशब्दानामपि सर्वनामसंज्ञा दिक्षु तेषां रूढत्वान्न प्राप्नोति। किञ्च दिग्नामान्यन्तराल इति सूत्रभाष्ये दिक्समासस्सङ्ख्ययोगयोश्चाग्रिष्यो बहुव्रीहिः। किं कारणमन्तरालप्रधानाभिधानात्। दिक्समासे सङ्ख्योगे च अन्तरालप्रधानञ्चाभिधीयते तच्चान्यपदार्थ इत्येव सिद्धम्। यद्येवं दक्षिणपूर्वा दिक् समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोति। अथ पुनरियं सैव दक्षिणा सैव पूर्वेति ज्ञात्वा समानाधिकरणलक्षणः पुंवद्भावः सिद्धो भवति। न सिध्यति। भाषितपुंस्कस्य पुंवद्भावः। न चैतौ भाषितपुंस्कौ। ननु च भोः दक्षिणशब्दः पूर्वशब्दश्च पुंसि भाष्येते। समानायामाहतौ यद्भाषितपुंस्कम्। आकृत्यन्तरे चैतौ भाषितपुंस्कौ। दक्षिणापूर्वेतिदिक्शब्दौ। दक्षिणः पूर्वेति व्यवस्थाशब्दौ। एवन्तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति वक्तव्यम्। दक्षिणोत्तरपूर्वाणामित्येवमर्थमिति भाष्ये उक्तम्। अत्र कैयटः। दक्षिणस्याः पूर्वस्याश्च दिशो यदन्तरालं दिक् सा दक्षिणपूर्वेत्युच्यते तच्चान्तरालस्यान्यपदार्थत्वात्पूर्वेणैव सिद्धः समासः। अथ पुनरिति। सूत्रारम्भकाले। सूत्रमेवं व्याख्यायते। अन्तराले यानि दिङ्नामानि वर्त्तन्ते तानि समस्यन्ते। दक्षिणादीनाञ्च सामीप्यादन्तरालवृत्तित्वन्तच्च दक्षिणा चासौ पूर्वेति समानाधिकरणलक्षणः पुंवद्भावः सिद्धो भवति। सूत्रानारम्भे त्वन्यपदार्थसम्पादनाय दक्षिणापूर्वेति शब्दयोः स्वार्थ एव वृत्तिरभ्युपेया। ततो वैयधिकरण्यम्। ततो न सिध्यतीति प्रतीकमुपादाय प्रवृत्तिनिमित्तभेद एवोपपादितः। दिक्शब्दाविति। विना प्रवृत्तिनिमित्तेन दिग्विशेषे रूढ्या प्रवृत्तावित्यर्थः। देशकालयोश्च व्यवस्थापेक्षप्रवृत्तिनिमित्ताः। एतेन प्रघट्टकेन दिग्वाचकपूर्वादिशब्दानां व्यवस्थाविषयत्वाभावात्सर्वनामसंज्ञा न प्राप्नोतीत्यभिहितम्। अपि च दक्षिणा गाथका इत्यत्राप्युत्कर्षस्यावधिसापेक्षत्वेन व्यवस्थायाः सत्त्वात्कथन्न सर्वनामसंज्ञेति। तत्र। संज्ञाशब्दत्वञ्च रूढ्या बोधकशब्दमात्रप्रवृत्तिनिमित्तकशब्दत्वम्। अत एव संज्ञायां समजेति सूत्रेण समूहार्थकसमज्याशब्दस्य सूत्रकृता साधुत्वमुक्तम्। अत एव पशुनामत्वेन गवादयो व्यवह्रियन्ते। न ह्येतेषु पदप्रवृत्तिनिमित्तकत्वम्। इन्द्रशक्रादीनामिव प्रवृत्तिनिमित्तकत्वापत्त्या पर्यायत्वानापत्तेः।

संज्ञोपसर्जनीभूता इत्यत्र त्वाधुनिकसंज्ञाविषय एव गच्छति । दिक्षु त्वैश्वरः सङ्केतः । कुरुषु त्वाधुनिक इत्यत्र व्याख्यात्ववचनमेव प्रमाणम् । एवन्देवगणविशेषे विश्वशब्दस्याप्यैश्वर एव सङ्केत इति विश्वेषान्देवानामिति सिद्धम् । उत्तराः कुरव इति प्रत्युदाहरणस्याप्युपपत्तिरुक्तैव । यच्चोक्तन्दिग्वाचकानां व्यवस्थाविषयत्वाभावादिति । तदपि न । यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युरितिभाष्येणैव समाधानात् । अस्य भाष्यस्य स्वात्तर्हि भाषितपुंस्कत्वमिति शेषः । दिग्वाचकानां सर्वनामत्वमिष्टव्यमिति तात्पर्येण चेदं भाष्यमवतत्तम् । अत्रापि व्यवस्थाशब्दाः स्युरित्यस्य व्यवस्थाविषयप्रवृत्तिनिमित्तका इति पूर्ववद्व्याख्येयम् । दिग्वाचकपूर्वादीनाम्पृथ्वीमध्यभागावधिकोदयाचलादिपर्यन्तदेशरूपोपाधिविशिष्टदिशि प्रवृत्तिस्तथा च व्यवस्था स्फुटैव । अयमाशयः । आकाशवदेकस्यैव दिक्पदार्थस्यौपाधिको भेदः । उपाधिश्च पृथिवीमध्यन्तरालस्थाश्चत्वारः पर्वताश्च । तत्राप्युदयाचलसन्निहितत्वादिकमेव प्रवृत्तिनिमित्तम् । अवधिस्तु पृथिवीमध्यमेकमेव । न चैवम्पुंवद्भावे सिद्धे सर्वनाम्न इत्यनेन तत्साधनं व्यर्थमिति वाच्यम् । दिग्वाचकानां रूढ्या शब्दस्वरूपमवृत्तिनिमित्तीकृत्य प्रवृत्तिरिति समानायामाकृतौ भाषितपुंस्कत्वन्नास्तीत्यभिप्रायेण तथाभिधानात् । वस्तुतस्तूपपादितरीत्या व्यवस्थाविषयत्वमस्त्येव । पृथ्वीमध्यस्यावधित्वञ्च रामायणे किष्किन्धाकाण्डे सुग्रीवेण वानरान् प्रति मध्यभागावधिकस्यैव दिग्विभागस्योक्तेः कल्प्यते । पृथ्वीमध्यञ्च मध्यान्हसूर्यसंयोगिदेशः । न च पूर्वादिष्वपरशब्दस्य पाठो व्यर्थः । परशब्दस्य नञा समासे तदन्तविधिनाऽपरशब्देपि सर्वनामकार्यसिद्धेरिति वाच्यम् । एवन्तर्हि परापरशब्दयोः समानार्थकत्वव्यवहाराभावप्रसङ्गात् । किन्तु परशब्दवदपरशब्दस्यापि दिक्कालयोस्तदवच्छिन्ने च रूढिः । अपरशब्दे नञ्समासत्वेऽपि जहत्स्वार्थवृत्त्या परशब्दार्थस्यैवाभिधानम् । तस्मिन् रूढिसङ्गावाज्जहत्स्वार्थवृत्तिस्वीकारो न विरुध्यते । अपरेत्यत्र परशब्दस्यानर्थकतया स्वीयसर्वार्थवाचकपरशब्दान्तत्वाभावेनैतदुपादानमावश्यकमेवेत्यवधेयम् । अन्तरशब्दस्यार्थानाह । अन्तरमवकाशेत्यादिना । अवकाशे । राजकार्यसाधने नियुक्तमिति अन्येन मदीयमिदङ्कार्यान्तरं कर्त्तव्यमित्युक्ते स वदति । सत्यन्तरे भवदीयकार्यान्तरं करिष्यामीति ।

अवधौ । दिनान्तरे मासान्तरे । परिधाने । अन्तरे शाटकाः । अन्तर्द्वौ मेघान्तरे सूर्यः । भेदे रामायणे रावणस्मृति सीतावाक्ये । यदन्तरं वायसवैनतेययोर्यदन्तरस्मद्गुमयोरपीति । तादर्थ्ये । भवदन्तरे मया धनमर्जितमिति । छिद्रं विवरन्तच । अन्तरे शस्त्रमहर्त्तव्यमिति । आत्मीये यथा । अयं ममात्यन्तमन्तरः । विनार्थे अन्तरेण पौरुषमिदन्न साध्यमित्यच । बहिरर्थे । अन्तरे अन्तरा वा चण्डालादिगृहाः । अवसरे मम सेवकोन्तरज्ञानाति । मध्ये । आवयोरन्तरे विष्णुः । अन्तरात्मनि । अन्योन्तरात्मा आनन्दमयः । इदमुपलक्षणम् । तेन सादृश्यस्यापि सङ्ग्रहः । यथा स्थानेऽन्तरतम इत्यच । तत्त्वनिषेधकमिति । सर्वनामसंज्ञानिषेधकमित्यर्थः । सिद्धेरिति । एवञ्चाध्याहारं विना सूत्रवैयर्थ्यापत्त्या चिकीर्षित इत्यध्याहारः । नन्वक्ङितव्यूहपरिभाषयाऽलौकिकप्रक्रियावाक्येऽप्यकञ् भविष्यतीत्यत आह । अक्ङितव्यूहेति । एतत्तत्त्वमन्यत्रोक्तम् । स्वरः । स्वाङ्गशिटामिति विहितः । प्रत्यङ्गम् । प्रत्यवयवम् । ध्वनितमिति । एवं हि भाष्ये उक्तम् । धिन्विक्ङिण्व्योर चेति क्वायमकारः श्रूयते । न क्वचिच्छ्रूयते लोपोऽस्य भवति । अतो लोप आर्द्धधातुक इति । यदि न क्व चिच्छ्रूयते किमर्थमयमुच्यते न लोप एवोच्येत । नैवं शक्यम् । लोपे सति गुणः प्रसज्येत । अत्वे पुनः सति अकारलोपस्य स्थानिवद्भावाद् गुणो न भविष्यति । ननु च लोपेऽपि सति न धातुलोप आर्द्धधातुक इति प्रतिषेधो भविष्यति । आर्द्धधातुकनिमित्ते लोपे प्रतिषेधः । न चैष आर्द्धधातुकनिमित्तो लोपः । अपि च प्रत्याख्यायते स योगः । तस्मिन् प्रत्याख्याते गुणः स्यादेवेत्युक्तम् । अनेन सूत्रमताप्रत्याख्यानवादिमतं प्रबलमिति प्रत्याख्यानवादिसम्मतलक्ष्यमेव सूत्रमतेऽपि साध्यमिति ध्वनितमित्यर्थः । एवञ्च प्रत्याख्यानविरुद्धफलकसूत्राशयकल्पनं वृत्तिकाराणामनुचितमिति सूचितम् । तदाह । एवञ्चेति । नन्वेवं सूत्रे सप्तमीनिर्देशो विरुध्यतेऽत आह । सूत्रे इति । अत एव । सप्तम्याः प्रथमार्थत्वादेव । तदनुगुणत्वं विशदयति । प्राधान्येति । ननु सर्वार्थवाचकत्वं सर्वविश्वयोरेव न त्वन्येषामत आह । प्रसिद्धस्यैवेति । अत्र सामानाधिकरण्यं स्वरूपसम्बन्धेन तादृशवाचकत्ववत्तदात्मत्वरूपम् । आवश्यकत्वेनेति । उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयो वाच्यः स चांशतो बाधान्न सम्भवतीत्यत उद्देश्यतावच्छेदकस्य तद्वा-

ङ्तत्वसिद्धये तेषामनुकरणमेव नेति भावः । नामपदस्वारस्येनेति । अन्यथा सर्वार्थेति वदेत् । स्वीयसर्वार्थेति । तत्तत्पदवाच्यसर्वेत्यर्थः । अभिव्यक्तेर्न्यायमूलकमिति । उष्ट्रमुखवल्लमासः । अभिव्यक्तेर्न्यायस्य यन्मूलं श्रीशीपस्थितिकत्वन्तदेवैतस्यापि मूलम् । अयमावः । संज्ञोपसर्जनप्रतिषेध इति वार्त्तिकात्तन्मतेऽप्रसिद्धस्य संज्ञा न भवतीति सिद्धौ अथ वा महतीयं संज्ञा क्रियते इत्यादिना वार्तिकप्रत्याख्यानभाष्यकारमते वार्तिकैकवाक्यतयाऽप्रसिद्ध्याद्यनुवृत्तिरवश्यमेव स्वीकार्या सा च स्वीयस्य प्रसिद्धस्यैवार्थस्य ग्रहणेन भवतीति । यत्तु प्रातिपदिककार्येष्वभिव्यक्तेर्न्यायस्य प्रवृत्त्या प्रसिद्धेति लब्धम् । गौणमुख्यन्यायादस्य न्यायस्य भेदेनोपादानात्तस्य पदकार्यविषयत्वेऽस्य न्यायस्य प्रातिपदिककार्यविषयत्वमपि । अत एव संज्ञाभूतत्रिशब्दस्यामि त्रयादेशो नेति ॥ तन्न । अभियुक्तोक्तश्लोकस्यापूर्वत्वाभावसिद्धान्तात् । अत एवात्वं त्वं सम्यद्यतेऽमहान्महाम्भूतस्त्वङ्गवतीतिभाष्योक्तवाक्ये त्वादेशदीर्घयोरप्युपपत्तिः । नापि संज्ञाभूतत्रिशब्दस्यामि परे त्रयादेशस्यापत्तिः । संज्ञाया एकद्रव्योपनिवेशिनीत्वात्तत आमः सम्भवस्यैवाभावात् । न च तादृशत्रिशब्दानामेकशेषेण तत्त्रय इति वाच्यम् । चेस्त्रय इतिसूत्रघटकत्रिशब्दमात्रोच्चारणेन यस्यार्थस्य श्रीशीपस्थितिस्तदर्थेन त्रित्वसंख्याविशिष्टसंख्यात्मकेन विशिष्टस्य त्रिशब्दस्य ग्रहणादन्यथा रात्रिशब्दावयवत्रिशब्दस्याप्यादेशप्रसङ्गः स्यान्न हि तादृशः संज्ञाभूतस्त्रिशब्दोऽस्ति । न चैवमपि संज्ञाभूतयुष्मदस्मदोस्त्वाहाद्यादेशापत्तिरिति वाच्यम् । उक्तरीत्या तेषामपि परिहारसंभवात् । अन्यथा त्वाद्यादेशानां रूपमाचार्यत्वेन युष्मद्युपपद इत्यादिसौत्रप्रयोगानुपपत्तिरिति दिक् ॥ सर्वादीनि तदन्तानि चेति । येन विधिरितिसूत्रभाष्यपठितप्रयोजनं सर्वनाम्न्यसंज्ञायामिति वार्त्तिकरीत्येदम् । एतेन । महासंज्ञयोपस्थापितयोर्योगार्थरूढ्यर्थयोर्विशिष्टवैशिष्ट्यावगाहिवाक्यार्थबोधपरया सूत्रार्थवर्णनेनाप्येकपदोपस्थापितयोरपि विशेषणविशेष्यभावेन शाब्दबोधस्याख्यातोपस्थितिसंख्याकारकयोरिवोत्पत्तौ बाधकाभावात् । अश्रुत्वन्नत्वादिति । उद्देश्यतावच्छेदकरूपेणोद्देश्यस्य ज्ञानरूपसिद्धिं विना विधेयत्वेनाभिमतस्य तत्त्वेनान्वयासम्भवात् । भिन्नं भसंज्ञेनसुदिश्य माध्यो विधेय इति न्यायस्य लक्ष्यत्वादिति भावः ॥

नन्वेकपदोपस्थापितयोः कृतोद्देश्यसाधनत्वयोः परमते धात्वोः फलव्यापारयोः पृथक् शक्तिवादिमते उद्देश्यविधेयभावेनान्वयापत्तिवारणाय फलावच्छिन्नव्यापारे शक्तेः स्वीकारात्स्वमतेपि कृत्यत्वात्पृथगुपस्थितयोस्तथान्वय इष्ट एवेत्यत आह। रूढ्यर्थयोगार्थयोरिति । यः शब्दः केवलयौगिकस्तत्र पृथगुपस्थितयोरुद्देश्यत्वविधेयत्वाख्यप्रकारताविशेषितावच्छिन्नविषयताशालिबोधः स्वीक्रियते न तु योगरूढस्थलेऽन्यत्र तथाऽदर्शनादिति भावः । अन्यतरवियोगेनेति। अत्र न सम्बन्धाभावो वियोगः । अन्वर्थसंज्ञोपस्थितसर्वार्थवाचकस्य विशेषतायास्तेनापि स्वीकारात्तयोरसम्बन्धस्य वक्तुमशक्यत्वात् किन्तु योगरूढस्थले योगार्थरूढ्यर्थयोर्यत्रोपस्थितिस्तत्रान्यतरस्य यत्रोद्देश्यत्वन्तत्रापरस्योद्देश्यतावच्छेदकत्वं यत्र वा तदन्यतरस्य विधेयतावच्छेदकत्वमिति नियमः कृत्प्रत्ययस्य भवत्कल्पिते वाक्यार्थबोधे त्याग इति भावः । एतेन । उक्तनियमत्यागप्रसङ्गेन । आक्षेपकमपि नास्तीत्यत आह ।तद्विनेति। मानाभावाच्चेति । पदश्रुत्युपस्थापितार्थस्यैव शाब्देऽन्वयप्रतियोगित्वमिति नियमात् । अत एव प्रविश्य पिण्डोमित्यादौ वाक्यार्थे वाक्यैकदेशस्य शक्तिर्भाष्यसिद्धान्तानुसारिभिः स्वीक्रियते । तदनुमानादिति । सर्वार्थवाचकानुकरणानुमानादित्यर्थः॥ सर्वादिगणपठितानि सर्वार्थवाचकानुकरणानि । महासंज्ञोद्देश्य बोधकत्वेन पाणिन्यभिप्रेतत्वात् इति व्यतिरेक्यनुमानस्य सम्भवादिति भावः । एतेन तदनुगुणानां सन्निवेशे तोस्वादिव्यापारस्य हेतुत्वन्न तु महासंज्ञाकरणस्येतीदमसङ्गतमित्यपास्तम् । अत्रोपेति । संज्ञोपसर्जनप्रतिषेध इतिवार्तिके । ननु लौकिकोपसर्जनस्य वार्त्तिके ग्रहणे तदोः सः सावीति सूत्रस्थभाष्यविरोधः । तत्र हि किमर्थमनन्त्ययोरित्युच्यते । अन्त्ययोर्मा भूत् । नैतदस्ति प्रयोजनम् । अत्वमन्त्ययोर्बाधकं भविष्यति । अनवकाशा हि विधयो बाधका भवन्ति । सावकाशश्चात्वम् । कोवकाशो द्विशब्दः । उदाहरणमात्रमेतत् । अन्यत्र सोः सर्व एव त्यदादयोवकाशाः । सत्वमपि सावकाशम् । कोऽवकाशः। अनन्त्यम् । एवमुभयोः सावकाशयोः परत्वात्सत्वम्प्राप्नोति । किञ्च स्यात् । हे स इति । एङ्ङ्हस्वात्सम्बुद्धेरिति सम्बुद्धिलोपो न स्यात् । न चानन्त्ययोरित्युक्तेऽपि त्यदाद्यत्वे सन्निपातपरिभाषया लोपो न स्यात् । परिभाषाया अनि-

त्वेत्वात्। इह च या सा इत्यत्र सत्त्वे टाप् स्यात्। न यासयोरिति ङिङ्के आश्रीयमाणे अनेकोऽर्थः कल्पः स्यात्। तस्मादनन्त्ययोरिति वक्तव्यम् वक्तव्यम् एवं वक्ष्यामि। तदो सः सौ। ततः अदसः। अदसश्च दकारस्य सौ भवति। इदमिदानीङ्किमर्थमिदमर्थम्। अदस एव दकारस्य नान्यस्य दकारस्येति। यदि नियमः क्रियते द्वीयतेरप्रत्ययः। इ इति प्राप्नोति। स्व इति चेष्यते। यथालक्षणमप्रयुक्ते इति। अत्र त्यदाद्यत्वकरणेन शास्त्रीयस्योपसर्जनस्य ग्रहणम्। लौकिकस्य तस्य वार्तिके ग्रहणे तु भाष्यासङ्गतिः। स्पष्टैवेति चेन्न। नञ्सूत्रभाष्ये नञ्समासस्य पूर्वपदार्थप्राधान्येऽस इत्यादावत्वसत्त्वयोरनापत्तिरुक्ता। शास्त्रीयस्य तस्य ग्रहणे तु पूर्वपदार्थप्राधान्यपक्ष इवोत्तरपदार्थप्राधान्यपक्षेप्यत्वसत्त्वयोरनापत्त्या तद्भाष्यासङ्गतिः स्फुटैव। तस्मान्न्यायसिद्धानेकभाष्यविरोधात्तदोः सः सावितिभाष्यस्यैकदेशश्लिष्टत्वात्तदेतदाह। तदोः स इतीति। फलाभाव इति। विहितविशेषणाश्रयणेनैव दोषाभावस्योपपादनात्। विशेषणान्वयाभाववदिति। एकार्थीभाववशात्। प्रत्ययेन। केन। अत एव। अवयवनिषेधे फलाभावादेव। पूर्वमेव कुत्साविवक्षा यत्र तत्र तत्सूचकः प्रत्ययः स्यादेवेत्याह। कृताकचा समासो भवत्येवेति। तत्र। साकच्कघटितसमासे। यदुक्तन्त्वच्छब्दस्य तान्तसञ्ज्ञावे तत्र काकचोर्विशेष इति। तद्दूषयति। त्वदधरेति। समुदायस्यैव निषेध इत्यर्थस्यावश्यकत्वमाह। जसाधारेत्यादि। तेन हि निषेधस्य विकल्पः शीभावे कर्त्तव्ये क्रियते। यद्यवयवस्य जसाधारे शीभावे कर्त्तव्ये तेन निषेधविकल्पः स्यात्तदा लुग्विषये शीभावाप्रसक्त्या तद्वैयर्थ्यं स्पष्टमेव। एवञ्च तस्मिन् सूत्रे द्वन्द्वपदस्य समुदायपरत्वेऽर्थाधिकारानुरोधात्पूर्वसूत्रेपि द्वन्द्वपदं समुदायपरमिति भावः। पर्यवसितार्थमाह। उद्भूतावयवेति। न बहुव्रीहाविति वदिति। अनुवादकमिति शेषः। इतरेतरयोगद्वन्द्वेपि समुदायस्य विशेष्यतायां साधकमाह। अत एवेति। समुदायस्य विशेष्यत्वादेवेत्यर्थः। सूत्र इति। तत्सूत्रभाष्य इत्यर्थः। केचित्तु परमसर्वादाविवावयवद्वारकसर्वार्थवाचकत्वस्य द्वन्द्वेपि सत्त्वादुपसर्जनत्वाभावो गोस्त्रियोरितिसूत्रस्थं वार्त्तिकन्तु तत्रैव द्वन्द्वेऽप्युक्तमित्यादिना भाष्यकृता प्रत्याख्यानादेकदेशश्लिष्टमेव विभाषा दिक्समास इति सूत्रे बहुव्रीहाविति किमर्थं द्वन्द्वे मा भूत्। दक्षिणोत्तरपूर्वाणामि-

ति। नैतदस्ति। द्वन्द्वे नेति प्रतिषेधो भविष्यतीति भाष्ये उक्तम्। एवञ्च न बहुव्रीहाविति बहुव्रीहौ चेत्यत्रापि चिकीर्षित इत्यध्याहारेण प्राग्बहुव्रीहेर्निषेधेनाकञ् प्रवर्त्तत इति एकद्विका इत्यस्य सिद्धिः। अथ वा चिकीर्षित इत्यध्याहाराभावेऽपि इतरेतरयोगेऽवयवस्य प्राधान्यात्प्राप्तसंज्ञाया विद्यमानानीत्यध्याहारेण निषेधो भविष्यतीत्यक्षतव्यूहपरिभाषया पूर्वमप्यकञ्प्रवृत्तिरित्याहुः। अवेदं चिन्त्यते। अवयवव्यवहारकसर्वार्थवाचकत्वादुपसर्जनत्वाभाव इत्यसङ्गतम्। उपसर्जनत्वाभावे विशेषणत्वाभावस्यैकविभक्तिकत्वाभावस्य वा प्रयोजकता न त्वेतस्य। तादृशाभावाद्द्वन्द्वश्च प्रकृते नास्ति विशेषणत्वात्, नञ्सूत्रस्थप्रागुपपादितरीत्या समूहस्य प्राधान्यात्। किञ्च द्वन्द्वे नेतिवार्त्तिकमप्रत्याख्यातमिति यत्तदपि भाष्यानवबोधमूलकम्। द्वन्द्वेष्युक्तमितिग्रन्थे नान्यथासिद्धेरेवोद्भावनात्। एवं हि भाष्ये उक्तम्। द्वन्द्वेऽप्युक्तम्। किमुक्तम्। परवल्लिङ्गमिति। शब्दशब्दार्थाविति। तत्रोपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणमिति। एवमेव कुक्कुटमयूर्यावित्यत्र परवल्लिङ्गमिति सूत्रभाष्येऽपि ह्रस्वत्वमाशङ्क्य समाहितम्। तत्र कैयटः। शब्दशब्दार्थाविति। लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोऽर्थश्च तन्त्रेणैकशेषेण वोच्यत इत्यर्थः। आतिदेशिकस्य श्रवणमिति तस्यानुपसर्जनत्वात्तदन्तस्य चाप्रातिपदिकत्वान्न ह्रस्वाभावादिति। एवं वदता कैयटेनापीतरेतरयोगद्वन्द्वे समूहस्य प्राधान्यं सूचितमेव। भाष्यक्षतापि द्वन्द्वे चेतिवार्तिकस्य गोस्त्रियोरितिसूत्रस्थस्य युक्त्याऽनावश्यकत्वं सूचितन्तु तत्र समाहारस्य विशेषणत्वप्रदर्शनेन। अक्षतव्यूहपरिभाषयेत्यप्यसङ्गतम्। तस्याः परिभाषाया अभावस्यान्यत्र प्रपञ्चितत्वादिति दिक्। असम्भवादिति। निषेधस्य प्राप्तिपूर्वकत्वात्प्रथमादिषु प्राप्तेरेवाभावात्। यद्यपि नेमशब्दे सम्भवोस्ति तथापि बहुनामनुरोधो न्याय्य इतिन्यायेन नेति न सम्बध्यत इत्युक्तम्। हेतुरुक्त इति। केवलस्य संज्ञायाः प्रयोजनाभाव इत्येवंरूपः। तीयस्य ङित्त्वेनोपसङ्ख्यानमितिवार्तिकस्य द्वितीयतृतीयशब्दयोः प्रवृत्तिसूचनायाह। द्वितीयतृतीयाविति। न्यूनतामपरिहरति। प्रतिपदोक्तेति। नन्वङ्गमाचालाघवानुरोधेनासुङादेश एव श्रुतो न क्षत इत्यत आह। प्रतिपत्तीति। असुङिति न्यासे आदेशत्वेनाभिप्रेतस्य स्वरूपस्य ज्ञाने हलन्त्यमुपदेशेजितिसूत्रद्वयस्यापेक्षामत्त्वाद्गौरवमिति

भावः । किञ्च जराशब्दादाचच्चाणञिजन्तात्त्रिप्यजादौ विभक्तौ स्थानिवद्भावेन जराशब्दत्वादसुडादेशे जसौ जस इतिरूपापत्तिरपि बोध्या । न च णिलोपस्य स्थानिवत्त्वम् । क्ङिति लुगमिति निषेधात् । परत्वस्य वचनस्यासार्वत्रिकत्वानुरोधेन प्रतिपत्तिलाघवायेत्येवाभिहितमित्यवधेयम् । उत्तरपदाधिकारः केवलपदाधिकारश्चेति । उत्तरपदाधिकारे प्रयोजनमिष्टकेषीकामालानामिति । इष्टकचितम् । पक्वेष्टकचितमित्यादि । केवलपदाधिकारे । वसुस्रंसुध्वंस्वनडुहां दः । परमानडुद्भ्यामित्यादि । अङ्गाधिकारे महान् परममहानित्यादि । षष्ठी स्थानेयोगेति सूत्रे षष्ठीपदं षष्ठ्यन्तपरम् उच्चार्यमाणमित्यध्याहार एतेन यत्फल्गितन्तदाह । षष्ठ्यन्तमित्यादि । ननु स्थानिवद्भावेन तत्त्वबुद्धावपि कथन्निर्दिश्यमानत्वमत आह । अनेनेति । तस्मिन्सूत्रे आदेशग्रहणेनानुमानिकादेशस्यापि तत्र ग्रहणात्तत्र निर्दिश्यमानपरिभाषाप्रवृत्तौ तदैयर्थ्यं स्पष्टमेवेति । एकदेशविकृतन्यायस्य लौकिकत्वाल्लोके चाक्षपरिमाणार्थवाचकस्य न्यूनाधिकयोरप्रवृत्तेरतिदेशशास्त्रेण तत्त्वमेवातिदिश्यते । दृष्टान्तस्यापि पुरुषार्थो निवर्त्तक इति भाष्योक्तेः । न च जराशब्देन तदन्तोपस्थितावपि न कथन्तत्त्वबुद्धिरिति वाच्यम् । संज्ञाशब्दानामेष स्वभावो यदाद्दशाकृत्यवच्छिन्नस्य संज्ञा कृता तादृशाकृत्यवच्छिन्नोपस्थापकत्वमेवेत्याशयात् । न च संज्ञाशब्दविषयेऽपि चेन्निर्दिश्यमानपरिभाषाप्रवृत्तिस्तदाऽस्य चाविति सूत्रस्य मालीभवतीत्यादौ प्रवृत्तिर्न स्यात् । अणुदित्सूत्रेणाकारस्य संज्ञात्वबोधनाद्दीर्घस्यानिर्दिश्यमानत्वादिति वाच्यम् । न भूसुधियोरिति ज्ञापकेन ग्रहणकशास्त्रगृहीतानामपि निर्दिश्यमानकार्यबोधनात् । वैचित्र्यायेति । इदमेव चात्र वैचित्र्यं यस्य शास्त्रस्य यत्रोपयोगस्तस्य तत्रैव लेख इति नियमाभाव इति । सिद्धान्तमाह, इदमिति, परत्वाज्जरसितिकथनम्, अत एव, पूर्वविप्रतिषेधस्येष्टत्वादेव, कैयटस्याऽप्यत्र सम्मतिमाह, अत एवेति, उक्त एवास्याप्यर्थः, तत्र हि भाष्यकृता नादेशोऽदादेशश्चास्त्विति लाघवमभिप्रेत्योक्तम्, कैयटस्य तद्भाष्यं व्याख्यायाह, अन्ये त्वतिजरसिनातिजरसादिति सिद्धये इन आह्य विहितावित्याहुः सन्निपातपरिभाषाया अनित्यत्वाज्जरसादेशं वदन्तः । भाष्यकारस्तु सन्निपातपरिभाषामाश्रित्य जरसादेशमनभ्युपयन्नतिजरेणातिजरा-

दिति भाष्यमिति मत्वा गौरवमुद्भावितवानिति । गौरवमिति । इकारदीर्घो-च्चारणरूपमित्यादिः । जरसःप्रवृत्तिकृदृत्तिकारसम्मतिमप्याह । वृतिकार इति। अत्र केचिदित्युक्त्वा स्वस्य तत्रापरितोषो ध्वन्यते । तमेव स्पष्टयति । यथा तु भाष्यमिति । लुग्वाधेनेति । अस्य विशेषविहितत्वेनेत्यादिः । एषा तु । सन्निपा-तपरिभाषा तु । न प्रवृत्तियोग्यतेति । यथा प्रथमैकवचनेऽतिजरं वर्त्तत इत्यत्र । मानाभावादिति । तादृशविशेषविषयतायाम्मानाभावादित्यर्थः । स्वोक्तार्थे कैयटस्यापि सम्मतिमाह । टाङसीतीति । अत्रैव भाष्यसम्मतिमप्याह । ध्व-नितञ्चेदमिति । अत्र तत्र हीत्यस्योक्त इत्यत्रान्वयः । इति भवितव्यमिति । ए-तेन विभक्त्यादेशोत्तरं सन्निपातपरिभाषया जरसादेशाभाव इति ध्वनितम् । तेषाम्परत्वादिति । याडाप इत्यादीनामित्यर्थः । विभक्त्यादेशविषये पूर्वविप्र-तिषेवाश्रयणेऽप्याकारप्लुतस्य न वैयर्थ्यमित्याशयेनाह । अतोति । परम-सिद्धान्तमाह । एरे लिति । विभक्तिसंबन्धिकार्यमात्रमिति । अत्र सम्बन्धी-त्युपादानादादेश एव पूर्वविप्रतिषेध इत्येतन्नेति बोधितम् । अत एव । विभक्ति-सम्बन्धिकार्यमात्रस्य पूर्वविप्रतिषेधेन प्रवृत्तेः पूर्वमिष्टत्वादेव । अदीर्घ इतिव-दिति ॥ अत्र वैपरीत्ये दृष्टान्तः । अयं यथाऽरब्धस्तथा जरसादेशस्य स्थानिव-त्वप्रतिषेधो नारब्ध इत्यर्थः । तदभिमान इति । इकारोच्चारणं जरसादेशे क्त-सेऽयीकारश्रवणार्थम् । तच्च सन्निपातपरिभाषाया अनित्यतास्वीकारं विना वक्तुमशक्यमिति तद्भावः । भाष्यान्तरमाह । इष्टमेवैतदिति । एतेनैस्करणम्परि-भाषाया अनित्यत्वे ज्ञापकमिति यत्केनचिदुक्तं तन्निरस्तम् । नद्यैरित्युत्तरा-र्थन्तत्सत्वाच्च । प्राचीनैः पद्दन्नितिसूत्रस्यादेशविधायकत्वेन व्याख्यानङ्कृतन्त-दनुरोधेन व्याचष्टे । आदेशैरिति । स्वानुरूपाः स्वसदृशाः सादृश्यञ्चात्र वर्णतोऽ-र्थतश्च विवक्षितम् । वर्णत इत्युक्ते शरणशब्दस्य न पदादेशः । न च पदादेश-स्य वैकल्पिकतया पदा चरणेनेतिरूपद्वयमिष्टमेवेति वर्णत इत्युक्तिर्विफलेति वाच्यम् । चयषां प्राङ्मकारादित्यधिकारपठितेन स्वाङ्गानामकुर्वादिनामितिसूत्रेण कवर्गरेफवकारादीन्वर्जयित्वा चयषां स्वाङ्गानां द्वितीयमुदात्तमित्यर्थकेन चर-णशब्दस्य मध्योदात्ततया शेषनिघातेनानुदात्तादित्वस्यानुदात्तन्तत्वस्य च स-त्त्वेन विनिगमनाविरहात्तत्तद्धर्मक्रतसादृश्यस्यापि परिग्रहात्कदाचित्पदेत्यादि-

शब्दघटके पच्छब्देऽनुदात्तादित्वानुदात्तत्वस्यापि प्राप्त्याऽनुदात्तादेः पदेति प्रयोगस्यापत्तिरित्याशयात्। अथत इत्युक्तेः श्लोकपादवाचकस्यादेशाभाव इति। अत एव। अन्यतरस्यामित्यनुवृत्तेरेव। उपपन्नो भवतीति। आदेशानाश्रित्यत्वे तु आस्ये नेत्यादिप्रयोगाणामनुपपत्तिरिति भावः। नन्वनुदात्तस्येतिसूत्रस्थान्यतरस्यामितिशब्दस्य चेत्स्वरितत्वेनानुवृत्तिस्तदा ये च तद्धित इतिसूत्रेऽपि तत्सम्बन्धः स्यादेवं सति तत्सूत्रस्थवार्त्तिकस्यापि वैकल्पिकत्वं सिद्धमेवेति वा केशेष्वित्यत्र वाग्रहणवैयर्थ्यापत्तिरत आह। ये चेति। तत्र सूत्रे। ये चेति सूत्रे। वाग्रहणासम्बन्धेति। वार्थार्थकान्यतरस्यामित्यस्यासम्बन्धेत्यर्थः। निश्रियोरिति। शब्दस्वरूपपरत्वाद्विरूपत्वेऽपि समानार्थत्वाभावादेकशेषाभावः। ह्रत्यनुसारिण इति। एतन्मते पद्दन्नितिसूत्रवद्ये च तद्धित इतिसूत्रस्याप्यादेशविधायकतया तत्रैवाचापि प्रकृतिविशेषाच्चेषेणैव सिद्धे शिरस्शब्दस्य ग्रहणन्न कार्यमिति लाघवम्। नसाम्मृताभित्यादौ नुडादेस्तु आत्मनेपदेषु न प्राप्तिरिति वदन्तः। भाष्यानुसारिमतमाह। परे त्विति। अत एव। अन्यतरस्यामित्यस्यास्वरितत्वादेव। इत्युक्तमिति। यदि त्वादेशविकल्पोऽन्यतरस्यामित्येतत्सम्बन्धेज स्यात्तदा शीर्षन्नादेशाभावे शिरमशब्दस्य प्रयोगः सिद्ध्येद वेति प्रकृत्यन्तरकथनं व्यर्थमेव स्यात्। शिरो मे शीर्यते मुखम्। इदन्ते शिरोभिनत्ति। तद्वा अथर्वणःशिर इति। शिरसो ग्रहणं कर्त्तव्यमिति। तदुक्तभाष्ये। ये च तद्धित इत्यत्र शिरसो ग्रहणं कर्त्तव्यम्। किम्प्रयोजनम्। आदेशार्थम्। आदेशो यथा विज्ञायेत। प्रकृत्यन्तरञ्मा विज्ञायि। किञ्च स्यात्। यकारादौ तद्धितेऽस्कारान्तस्य श्रवणम्प्रसज्येत। शीर्षण्यो हिमुखो भवति। शीर्षण्यः स्वर इति। ननु शीर्षश्छन्दसीतिसूत्रस्थं शीर्षन्निति प्रकृत्यन्तरमादेशो मा विज्ञायीतिवार्त्तिकमनुपपन्नं स्यान्निर्दिश्यमानादेशाभावेनादेशाप्रसक्तेरिति चेदत्र कैयटः। यद्यपि शिरस इति स्थानी साक्षान्न निर्दिष्टस्तथापि समानार्थत्वादादेशेनाक्षिप्येत। यद्यपि पूर्वसूत्रादन्यतरस्यांग्रहणानुवृत्त्या इष्टसिद्धिर्भवति। तथाप्युत्तरत्रानुवृत्तिराशङ्क्येतेति तत्परित्यागेन प्रकृत्यन्तरपक्षो निर्दोष आश्रित इति। एतेन पद्दन्नादिसूत्रेऽपि प्रकृत्यन्तरत्वमेव द्रष्टव्यम्। अत एव तत्र भाष्ये पादादीनामिति वक्तव्यमिति नोक्तम्। उत्तरत्र। ये च तद्धित इत्यत्र। निर्दोष इति। छन्दसि सर्वविधीनां वैकल्पिकत्वमिति त्वगतिकगतिरिति भावः। केशेषु वाच्येष्वस्कारान्तस्यापि प्रयोग इष्ट इत्यभिप्रायेणाह। वाकेशेष्विति चेति। अत एव। प्रकृत्यन्तरत्वादेव। अत एव। तद्विषये प्रकृत्यन्तरत्वस्यानिष्टत्वादेव। सुडनपुंसकस्येति सुडिति नागमग्रहणम्। सर्वनामस्थाने चासम्बुद्धाविति सूत्रेऽसम्बुद्धाविति विशेषणात्। आगमग्रहणन्तु तद्व्यर्थं स्यात्। टाटकारेण प्रत्याहार इत्यपि न। औटष्टित्त्वसामर्थ्यादित्याशयेनाह। व्याख्यानादिति। लघुत्वात्। अत एव ज्ञापकादिति। अनपुंसकस्येति निर्देशरूपादित्यर्थः। वाक्यभेदाभावेन लघुत्वात्। केषाञ्चिदिति। अस्माद्भो-

जी ब्राह्मणः । अलवणभोजी ब्राह्मण इत्यादेः । स्वादिष्वितिसूत्रे स्वादिष्वितिपदेन न सप्तमीबहुवचनादेर्ग्रहणम् । असर्वनामस्थानग्रहणादित्याशयेनाह। सुरत्वेति। अत्र सूत्रे सुपीत्यनेनापि सुब्मात्रग्रहणे सिद्धे आदिग्रहणं व्यर्थं स्यादित्यादिग्रहणसामर्थ्यादन्येषामपि प्रत्ययानां ग्रहणम् । ते च प्रत्ययाधिकारपठिताः । तेष्वविशेषादुपात्तस्य कप्प्रत्ययस्यैवावधित्वमित्याशयेनाह । व्याख्यानादिति। कप्प्रत्ययस्यावधित्वेन निर्देशे सति यत्फलितन्तदाह । तदन्तेष्वित्यर्थ इति । तेन । यचि भमितिसूत्रेऽसर्वनामस्थानपदसम्बन्धेन । अशास्त्रीयेऽपीति । भपदसंज्ञयोराकडारीयतया येन नाप्राप्तिन्यायेन यचिभमितिशास्त्रस्य स्वादिष्वितिसूत्रबाधकत्वे सिद्धे बाध्यस्य बाधकशास्त्रविषयाविषयकत्वं कल्प्यते एतेनाशास्त्रीयस्यापि फलस्य सिद्धिः । भाष्यप्रामाण्यादिति। तत्र हि वेतस्वानित्यत्र कुमुदनडवेतसेभ्य इति ड्मतुपि टिलोपे तसौ मत्वर्थ इतिसूत्रविहिताभसंज्ञा सान्तनिष्ठपदत्वप्रतिबन्धद्वारा रुत्वाभावार्था भवतीत्युक्तम् । वक्तुं युक्तमिति । अस्य ग्रन्थस्य परन्तु नोक्तमाचार्यादित्युच्यमाने यद्यपि मात्रालाघवमस्ति तथापि पदगौरवं स्यात् । मात्रालाघवेनेति परिभाषा प्रायः पदगौरवविषये नाश्रीयत इति ज्ञापयितुमिति शेषः । सङ्ग्रहावाप्त्येकशब्दोपादानादिति । अर्थान्तरबोधकस्यानुपयोगादिति भावः । अवधारण सम्यक्षत इति । संज्ञाद्वयं यदि स्यात्तदाप्येकत्वस्य प्रत्येकवृत्तित्वेनैका संज्ञा जातेवेति तदुपादानसाकाङ्क्षादवधारणलाभः । द्वयोः सावकाशयोः परेति । यथा धनुषा विध्यतीत्यत्र परत्वादुपादानसंज्ञा बाधिका करणसंज्ञा । निरवकाशत्वे सैव । यथा शसादौ यचि भमित्यनेन पदसंज्ञाबाधिका भसंज्ञा । क्वचित्त्वेवमेव भसंज्ञाबाधिका पदसंज्ञा । यथा भवदीय इत्यत्र भवतष्ठक्छसाविति छसि सिति चेति पदत्वम्।एतेन संज्ञानामपि बाध्यबाधकभावेऽन्यत्र बाधकत्वे प्रसिद्धं यद्धि निमित्तन्तदेव निमित्तमाकडारीयसंज्ञाविषयेऽप्याश्रीयत इति दर्शितम् शास्त्रग्रामाण्यात् । अदर्शनेनेति ।यथा तत्तच्चत्वजातत्वेन नाच्चत्वनाम्नः प्राप्तावपि देवदत्तादिसंज्ञा क्रियते।अपादनमिति । कर्मपदम् । कारकाणीति कर्तृपदम् । विरोधाभावेन । संज्ञानां स्वरूपतो विरोधाभावेन।तेन फलद्वारा विरोधसद्भावेऽपि न क्षतिः।विरोधादित्यादिनाबाध्यबाधकभावप्रयोजकान्तरस्य सामान्यविशेषभावस्य परिग्रहः।तेन। परत्वेन। अन्तरङ्गत्वादिति।पूर्वोपस्थितनिमित्तकत्वरूपेत्यादिः। बाध्यसामान्यचिन्तेति।राजन्यबहुवचनद्वन्द्व इतिसौत्रनिर्देशस्याच मानम्। नत्वाकडारीयसंज्ञाविषये परत्वेन व्यवस्था इति यत्तन्न कार्यकालपक्षे घटते।उभयोरपि कार्यरूपैकदेशस्थत्वादत आह।आकडारस्येति।नन्वेवमेवाङ्गसंज्ञयापि समावेशो न स्यादत आह। भपदसंज्ञाविधाविति। इत्यर्थेनेति।एतेनाङ्गाधिकारे भस्येत्यस्यापाठेनाङ्गसंज्ञया भपदसंज्ञयोः पर्यायो भवत्वित्यपास्तम्। अन्यचापिसमावेशमुपपादयति।पुरुषसंज्ञेत्यादिना। ननु पुरुषसंज्ञापरस्मै पदसंज्ञा एतयोर्णलुत्तमो वेति ज्ञापकेन समावेशोपपादनेऽपि पुरुषसंज्ञात्मनेपदसंज्ञयोः समावेशो नोपपद्यते।न च तङानावात्मनेपदमिति

सूत्रेण तङ आत्मनेपदसंज्ञाविधानसामर्थ्यात्समावेशो भविष्यतीति वाच्यम्। पर्यायत्वसम्पादनेनापि चारितार्थ्यसम्भवादिति चेन्न। प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणम् प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणङ्कर्त्तव्यमिति वार्त्तिके न समाधानात्। एतेनापूर्वात्मनेपदग्रहणेनोभयोः समावेश उपपादनीय इत्युक्तम्। न चात्मनेपदग्रहणे आत्मनेपदस्यैव पुरुषसंज्ञा स्यान्न परस्मैपदानामिति वाच्यम्। आत्मनेपदग्रहणमपृथक् कर्त्तव्यमित्यभिप्रायात्। एवंसति वा क्वभेदो भविष्यति। पूर्वसूत्रञ्च परस्मैपदविषयकमेव। अथ वा णलुत्तमो वेति सूत्रमेव सामान्यापेक्षज्ञापकमाश्रीयते। प्रथमादिसंज्ञा एतत्प्रकरणस्थसंज्ञान्तराणां बाधिका न भवन्तीति ज्ञापकस्यविशेषापेक्षत्वे उत्तमसंज्ञयासमावेशोपपादनेऽपि प्रथममध्यमसंज्ञाभ्यां समावेशो न स्यात्। एकदेशविकृतन्यायेनेति। स्थानिवद्भावेनेत्यर्थः। न तु लौकिकस्यैकदेशविकृतन्यायस्यात्र प्रवृत्तिरर्द्धाधिकविकारात्। आवर्त्तेति। अत्राद्यवृत्तिर्न समुदायस्य किन्तु पूर्वविधावित्यस्य। अचः परस्मिन्नित्यस्य पूर्ववाक्यस्थस्य तत्रानुवृत्त्यैव वाक्यार्थपर्यवसानसंभवात्। प्रत्यैषिषन्निति। वीगतीत्यत्र प्रश्लिष्टस्यैकारात्मकधातोः सन्नन्तस्य रूपम्। अत्र शपैकादेशस्य स्थानिवत्त्वान्न जुस्। अत एव। पञ्चमीसमासाश्रयणादेव। इत्युक्तमिति। सिद्धान्तेनेत्यादिः। तेन। उभेग्रहणेन। इत्यर्थेपि। इत्यर्थे स्वीकृतेपि। तस्मिन्नपि। ऐर्ल्लन्निति। अनित्यत्वं सूचितमिति। निष्ठायां सेटीति सूत्रे सेड्ग्रहणात्। तद्धि कारितमित्यादाविटि कृते एव णिलोपो न तु ततः प्रागित्यर्थम्। अन्यथा ख्यन्तादनिण्निष्ठाया असम्भवेनानिटि णिलोपो माभूदित्यत्तात्पर्यकत्वे तस्य वैयर्थ्यापत्तेः। इटि कृते एवेत्यवधारणफलन्तु यदीटः प्राङ् णिलोपः स्यात्तदानुदात्तादेकाचः क्त्वः परत्वादिटो निषेधः स्यात्स माभूदिति। अयञ्च पञ्चमीसमासस्यानित्यत्वाभावे जातेऽपि णिलोपे पञ्चमीसमासेन वारयितुं शक्यत इति कालावधारणवैयर्थ्यं स्पष्टमेव। न च ज्ञपेः सनीवन्तेतीड्विकल्पात्ततो निष्ठायां यस्य विभाषेतिसूत्रे णेरनिषेधादस्ति सम्भव इति वाच्यम्। दरिद्रित इत्येतत्सिद्ध्ये यस्य विभाषेतिसूत्रे एकाच इत्यनुवृत्तेः। अनित्यत्वे ज्ञापकान्तरमप्याह। प्रविगण्येतीति। अचादन्ताच्चुरादेर्गणधातोः क्त्वाप्रत्यये समासे ल्यपि ल्यपि लघु पूर्वादितिणेरयादेशः पञ्चमीसमा-

स्य नित्यत्वे न स्यात् । अपिना पूर्वोक्तज्ञापकसमुच्चयः । अत एव । अनित्यत्वादेव । न मानमिति । वाच्यहत्या तादृशार्थालाभात् । यत्तु प्रविगणय्येति भाष्योदाहरणे लघुपूर्वत्वं व्यपदेशिवद्भावेन णौ जातस्य लोपस्य स्थानिवद्भावे सति तस्याकारस्यैवेति ततः परत्वाल्ल्यबादेशो भविष्यत्यतोऽनित्यत्वफलमिति । तन्न । प्रदिधिषय्येत्यत्र दिधिषूशब्दादाख्यानण्यिजन्तात् स्त्र्याख्यायां प्रशब्देन समासे षष्ठीसमासानित्यत्वपक्षे लघुपूर्वषकारात्परत्वाद्भवति । यस्य स्थानिवद्भावस्तस्यैव व्यपदेशिवद्भावेन लघुपूर्वत्वमभ्युपैति वक्तुमशक्यमूकारस्य दीर्घत्वादित्याशयात् । मूलेऽङ्व्यवाय इत्येवेति । अव्यवधानाभावेन रषाभ्यामितिसूत्रेण न किन्तु रषाभ्यामित्यनुवर्त्तमानेऽट्कुप्वितिसूत्रेण । न च रषाभ्यामितिसूत्रे षग्रहणस्यैवं सति वैयर्थ्यमिति शङ्क्यम् । पुष्णातीत्यत्र चारितार्थ्यात् । यत्तु तस्य दोष इतिवचनमपि न सुने इतिसूत्रकृतयोगविभागाल्लभ्यमिति तन्नेति दूषयति । न सुन इतीति । अत एव । योगविभागस्य भाष्यासम्मतत्वादेव । सिद्धकाण्डम् । सिज्लोप एकादेश इत्यादि । वैयर्थ्यापत्तेरिति । शोकादीनामपि शब्दत्वात् । न च सुप्त्वेन सादृश्यवादिमतेऽपि न लुमतेतिनिषेधानित्यत्वेन मांस्यचनीत्यादेरिव हृच्छोक इत्यादेरपि सिद्धिर्भविष्यतीति वा शोकेत्यादि व्यर्थमिति वाच्यम् । अनित्यस्यापि वचनस्य यत्र साधकत्वात्राप्रवृत्तिरित्यभिप्रायेण वा शोकेत्यादिवचनचारितार्थ्यात् । अन्यत्र शस्प्रभृतिभिन्ने । तेन पदङ्घ्रिरितीति । अत्र पादशब्दस्य पदादेशः । तत्र शङ्कते । न च कोशस्थेति । भाष्यरीत्या अनादेशत्वात् । अस्य किन्तु प्रकृत्यन्तरत्वमेषाम् इति शेषः । तत्त्वेपि । अनादेशत्वेपि । अत एव पादहृदयशब्दयोः पदहृच्छब्दरूपादेशे सुनिमित्तके कृते सन्निपातपरिभाषया सुलोपो न स्यादिति पदङ्घ्रिस्मरण इति स्वान्तं हृन्मानसमित्यसङ्गतमिति पूर्वपक्षस्य नावसरः । के चित्तु शब्दत्वेनैव सादृश्यम् । न लुमतेतिनिषेधस्यानित्यत्वादप्रवृत्तिकल्पनापेक्षया सादृश्यप्रयोजकव्यापकधर्मकल्पनायां गौरवाभावात् । एवं सति पदादीनामादेशत्वमेव । हृदयस्य हृदितिसूत्रन्तु नित्यार्थम् । वा शोकष्यञिति तु नियमार्थमेव्वे वोभयोः स्यान्यादेशयोः प्रयोगोऽन्यत्र स्यानिन एवेति । एवंनासिकाया नसित्यपि नित्यार्थमेव । तेन नासिकाक्षुद्र इति न । न च पदन्न इतिसूत्रे

सुप्रभृतिष्वित्ये वास्त्विति वाच्यम् । अस्यग्यङ्च्च्व्यङ्च्च्व्यन्देभ्यः सोरन्तरङ्गानपीति-न्यायेन लुकि कृते स्वादिपरत्वाभावेनादेशाभावापत्तेरित्याहुः । अत्र दच्चिन्त्यम् । शसः सुप्संज्ञायाः शास्त्रीयतया तेन रूपेण सादृश्यकल्पनापेक्षयाऽशास्त्रीयेन शब्दत्वेन सादृश्यकल्पनेऽल्पकल्पनाप्रयुक्तं गौरवं स्फुटमेव । किञ्च वा शेकेत्यस्य नियमार्थत्वकल्पनापेक्षया विधायकत्वे लाघवमेव । एवञ्च भाष्यरीत्या प्रङ्क्त्यन्तरत्वकल्पनमेव समुचितमिति ॥ ननु कोशपठितानां शब्दानां लोकप्रसिद्धशब्दानुकरणत्वेन तेषादेशस्य प्रवृत्तिर्नोचिता । एवञ्च पदाङ्घ्रिरित्याद्युपपत्तये सादृश्यप्रयोजकधर्मचिन्तनमयुक्तमत आह । कोशे शब्दा इति । अर्थपराः । अर्थविशिष्टशब्दपराः । न त्वनुकरणानीति शेषः । ननु तत्तदर्थनिरूपितशक्तिग्रहस्य कोशाधीनत्वं सुप्रसिद्धन्तच्च नोपपद्यते अर्थानां शक्तिग्रहाभावादनुपस्थितेरत आह । शक्तिग्रहस्त्विति । यदा विष्णुर्नारायण इत्यादिशब्दघटितकोशजन्यबोधविचारस्तदा तद्घटकमेकं विष्णुपदं पक्षीकृत्यानुमितिः कल्पनीया । इदं विष्णुपदम् । अर्थवाचकम् । साधुपदत्वात् । गोपदवदित्येवं रीत्या साध्यहेतुकल्पनयाऽनुमित्या । सामान्यतः । सामान्यधर्मावच्छिन्नविधेयतया । अयं भावः । अर्थवाचकत्वे साधुपदत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वावगाहिव्याप्तिज्ञानेनार्थवाचकत्वत्वे व्यापकतावच्छेदकत्वावगाही साधुपदत्वत्वे व्याप्यतावच्छेदकत्वावगाही परामर्शो जन्यते । ततो विष्णुपदमर्थवाचकमित्याकारानुमितिः । ततोऽर्थो विष्णुपदवाच्य इत्याकारकस्मारकं ज्ञानम् । ततस्तादृशः संस्कारः । ततोऽर्थविशेष्यकविष्णुपदवाच्यत्वप्रकारिका स्मृतिर्विष्णुपदोच्चारणे सति तादृशबोधकत्वशाल्यते । एवमेव नारायणपदादपि । ततः समानविभक्तिकत्वरूपाकाङ्क्षाप्रकारकपदविशेष्यकज्ञानसत्त्वे प्रतिबन्धकाभावे विष्णुपदवाच्याभिन्नो नारायणपदवाच्य इत्याकारकः शाब्दबोधस्तदाह । एवञ्चेत्यादिना ॥ ननु पर्यायशब्दस्वरूपप्रतिपादनपरे श्रुतिविशेषे यथापदानां स्वरूपपरत्वन्तथा कोशेष्यपेक्षितमत आह ॥ अन्येदेवीति । तदसंगतिः । प्रत्युदाहरणासङ्गतिः । एतेन पर्यायशब्दस्वरूपप्रदर्शकवाक्यघटकशब्दानामर्थपरत्वे भाष्यसम्मतिरुद्भाविता । एकशेषस्तर्हि विरूपाणामित्यनेन स्यादत आह । एकशेषस्त्विति । पूर्वोक्तार्थे सूत्रसम्मतिमाह । अ-

त एवेति। तादृशतात्पर्यादेव। एवञ्च यत्तदेतेभ्य इतिनिर्देशो विरूपाणामपीलक्ष्याव्यनित्यत्वे ज्ञापक इति द्रष्टव्यम्। तथा चोक्तममरसिंहेन। भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः। कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते इति। भेदस्य लिङ्गभेदस्य लिङ्गविशेषस्य आख्यानाय द्वन्द्व एकशेषश्च न कृतः। यथा क्रादिनी वज्रमस्त्री स्यात्कुलिशश्चिदुरम्पविरिति। तथा स्वरूपभेदप्रतिपादनाय समानलिङ्गानामपि तौ न कृतौ। यथा विष्णुर्नारायण इत्यत्र॥ तथा सम्बन्ध्यर्थविशेषभेदेन भिन्नानां भेदाख्यानाय संकरो न कृतः। यथा स्वर्गसंबन्धिनां भूमिसंबन्धिनाञ्च। खरादिवर्ग इतिरीत्या पृथङ् निर्देश एव कृत इति। एतदपवादमाह। क्रमादृत इति। यत्र स्त्रीपुन्नपुंसकानां क्रम एव विवक्षितस्तत्र संकरो भिन्नलिङ्गानां मिश्रणरूपः कृत एव यथा स्तवः स्तोत्रं स्तुतिर्नुतिरिति॥ प्राचाम्मतं खण्डयति। एतेनेति। पूर्वोक्तव्याख्यानेन। अत एव। शब्दपरत्वेन भिन्नार्थत्वादेव। अभियुक्तोक्तं शक्तिग्राहकत्वमुपपादयति। एत इति। प्रकारार्थत्वाभावेपीति, यद्यच्च श्रूयमाणपदादीनां शास्त्रनिष्पाद्यत्वं स्यात्तदा प्रकारार्थकतां विना निर्वाहो न स्यात्तदेव तु नास्ति अनुकरणत्वात्तथा चाद्योभादुदात्त इतिवच्छास्त्रस्य न प्रवृत्तिरिति भावः। षष्ठ्यन्तत्वलाभायेति, एवञ्च संख्यादिपूर्वस्योत्तरपदस्यान्हशब्दस्येत्यर्थः संपद्यते, ननु विजुपे छन्दसीतिसूत्रे छन्दसीत्युपादानादिच् छन्दस्येवेति कथं विश्वपाशब्दस्य लोके साधुत्वमत आह, स चेति, न हि कीलालप आगतमिति वाक्यं छन्द इति भावः, क्विब्विषये विशेषमाह, क्विपस्त्विति, अत एव, अन्यत्रानभिधानादेव, अत एव, शंस्थेत्यादिषु क्विपोऽभावादेव, के चिदिति, ईत्वमकारादाविति वार्त्तिकविद्वेषिणः, आहुरिति, ईत्वमकारादावित्यनेनेत्त्वं वारयितुं शक्यमिति भावः, यद्यपि वकारादौ प्रत्यये घुमास्थेतीत्वं वचनेन चेन्निवार्यते तदा वार्त्तिककारमते प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वेन यू स्त्र्याख्यावित्यस्य शंस्थेत्यादिपदस्य च क्विपापि साधनं सम्भवति तथापि विचः प्रथमोपस्थितत्वात्स एवोक्तः, ननु प्रथमयोरिति सूत्रानन्तरं लाघवाद्दीर्घाच्छसीति सूत्रमस्त्वित्यत आह, दीर्घाच्छस्येवेतीति, विपरीतनियमापत्तेरिति, अचेष्टापत्तिः कर्तुमशक्या, तस्मादितिसूत्र एव भाष्यकृत्कैयटभट्टकुंसान्पश्य कुण्डिना-

न्यस्येतिप्रयोगासङ्गत्यापत्तेः, विश्वपाश्वब्दादिचि विधिशास्त्रस्य सिद्धान्तरीत्या प्राप्तिमुद्भावयति, प्रत्याहारेष्विति, न्याय्यत्वादिति, लक्ष्यस्योद्देश्यतावच्छेदकाक्रान्ततया निषेधार्थेतिन्यायेन दीर्घादितिसूत्रप्रवृत्तेर्न्याय्यत्वादित्यर्थः। सानिति प्रत्युदाहरणमिति, हाहाशब्दस्य तु हाह इत्येव रूपम्, लोट इष्ट एवेति। वार्त्तिकैकवाक्यत्वात्, आबन्त्यनिवृत्त्यर्थमेवेति, रमाः पश्येत्यादौ, नन्वेवमाबन्तादाचारक्विबन्तात्कर्त्तरि क्विपि धातुत्वात्सूत्रीत्या लोपः प्राप्नोति, वार्त्तिककारमते तु नेतिफलभेदोस्त्येवेत्यत आह, आबन्तेति। अत एव, यदभावकल्पनेनानुपपत्तिपरिहारस्तदभावकल्पनादेव, अधात्वयवाकारोच्चारणमिति, हाहाशब्दादीनाम्, एतेन, स्वारसिकपूर्वोक्तप्रयोगविरोधेन॥ आचारेति। आदन्तप्रकृतिकेत्यादिः। इति च वर्त्तत इति, न च यूपदन्तत्वन्दीर्घशोधकमिति ह्रस्वपदार्थे नानन्वय इति वाच्यम्, अनुवृत्तस्य यूपदस्य षष्ठ्यन्ततयो विपरिणामेन यवोर्यौ ह्रस्वौ तदन्तमित्यर्थात्, गुणः कृतात्मसंस्कार इतिन्यायात्, नन्वेकसंज्ञाधिकारादित्यनुपपन्नम्, आकडारादितिसूत्रस्य संज्ञाप्रवृत्तिव्यवस्थापकत्वादित्यत आह, कडारा इति, एवञ्चाधिकारपदम्बुद्धिस्थपरम् एका संज्ञेत्यस्य बुद्धिस्थत्वादित्यर्थः, यद्यप्यसखीतिपर्युदासबलेन शब्दस्वरूपस्य विशेषस्य लाभो भवति, तथापि पर्युदासलभ्यस्य विलम्बितोपस्थितिकतया झटितिविशेषलाभार्थमिति फलितन्त्वाह, स्पष्टतयेति, यत्तु मत्यै इत्यत्रानवकाशत्वान्नदीसंज्ञैव भविष्यतीत्युक्तम् तच्चायुक्तम् असखीतिपर्युदासात्सखिशब्दे समासाघटके गवां पत्यै स्त्रियै इत्यत्र पतिशब्दे च पतिः समास एवेतिनियमाद्विसंज्ञाया अप्राप्तनदीसंज्ञायास्तत्र चारितार्थ्यादिति, तन्न, इकारांशे चारितार्थ्येप्युकारांशे चारितार्थ्याभावात् ङिति ह्रस्वस्येतिसूत्रेणोकारस्य स्त्रियां वर्त्तमानस्य नदीसंज्ञा भविष्यतीति घिसंज्ञासूत्रे उकारस्यानदीसंज्ञकस्यैव ग्रहणन्तत्साहचर्यादिकारस्यापि तादृशस्यैव ग्रहणम्भविष्यतीति शेषग्रहणं व्यर्थमित्याशयात्, परन्तु साहचर्येणैतादृशार्थकल्पने क्लेश इति स्पष्टप्रतिपत्तये शेषग्रहणम्, मात्रे इतीति, ननु यूग्रहणाननुवृत्तादकारान्तमात्रस्य घिसंज्ञायां घेर्ङितीतिगुणे सिद्धे ऋतो ङीतिसूत्रेण ङौ गुणविधानं घिसंज्ञकस्य ऋतो ङिति गुणो नित्यर्थे ज्ञापकं भवि-

यतीति मात्रे इतिरूपमन्यथासिद्धङ्किन्तु पित्रा इत्यत्र नाभावापादनमेव कर्त्तुमुचितमिति चेन्न। ङौ गुणविधानेनैवं ज्ञाप्यवचनकल्पनायां घेर्ङितीतिशास्त्रस्य बाधकल्पना स्यात्तदपेक्षया तेन घिसंज्ञासूत्रे यूग्रहणमनुवर्त्तते इत्येव ज्ञापनीयं लाघवादेवञ्च मात्रे इत्यत्र गुणाभावस्य पित्रेत्यत्र नाभावाभावस्य च सिद्धिर्भविष्यतीत्याशयादाह। ऋतो ङीतीति। पदलाघवाभिप्रायेण शङ्कते। पुंसीति लिति। ननु न मु न इतिसूत्रे नकाराकार उच्चारणार्थः। नकारमात्रे विधायकतायाः नुम्विषये पर्यवसानेपि साक्षात्तथानुच्चारणादतो नकारपदस्य नकारवटिते लक्षणा भविष्यतीति नायन्दोष इत्यत आह। न मु न इति निषेधस्थिति। वार्तिकविरोधादिति। टाया आदेशष्टायामादेश इति च तदर्थ इति वार्तिकार्थप्रदर्शनपरभाष्येष्यादेशपदोच्चारणेनादेशविषय एव तत्प्रवृत्तेरिष्टत्वात्तद्विरोधापत्तेरित्यर्थः। नुमि कर्तव्ये सुत्वस्य निषेधो नेत्यत्र सूत्रसम्मतिमप्याह। अत एवेति। तत्तात्पर्यकत्वे लाघवान्नीत्येव ङीतिवदेत्। नीत्यस्य नकारसम्बन्धिनीत्यर्थसम्भवात्। ने इतिनिर्देशेप्युभयलाभ इति चेत्तत्राह। आगन्तुनेति। एकस्यैव नेशब्दस्य सूत्रस्थस्य तादृशशब्दद्वयोपस्थापकत्वतात्पर्येण निर्देशकल्पना ततस्तत्तादृशशब्दद्वयोपस्थितिकल्पना। तयोर्मध्ये एकत्रागन्तुकाकारकल्पना ततो नकारमात्रोपस्थितिरेकत्र। अपरत्र नाइतिशब्दस्येतिरीत्या ज्ञानगौरवमित्यर्थः। न ह्रस्य ङस्येत्वमिति। न च शब्दार्थयोस्तादात्म्यादाङ्शब्दस्य ओङ्शब्दस्य च प्रत्ययमात्रबोधकतया व्यवसिताल्यत्वान् ङकारस्येत्संज्ञा प्राप्नोतीति वाच्यम्। धातुप्रत्ययेत्यत्र प्रत्ययपदस्य प्रत्ययाधिकारपठितप्रत्ययसमानानुपूर्वीकशब्दपरत्वात्। यद्यत्रेत्संज्ञाप्रवृत्तिः स्यात्तदा सामर्थ्यात्तदुपस्थाप्ये इत्वप्रयुक्तकार्यं स्यात्तदाह। अत एवेति। इत्वाभावादेवेत्यर्थः। न गुण इति। घेर्ङितीति सूत्रस्य ङिति गुण इत्यर्थकत्वमितिवादिमतरीत्या गुणप्राप्तिर्बोध्या। अत एव। ओङोपि ङकारस्येत्वाभावादेव। ननु रमे इत्यत्रावश्यं याटि प्राप्ते शीभाव आरभ्यतेऽतोऽपवादे शीभावे कृते न याटः प्राप्तिरित्यत आह। वार्तिकमतेऽपीति। असम्भवे एवापवादत्वमिति हि तन्मतं स चासम्भवः प्रकृते नास्तीति भावः। घेर्ङितीति। अयम्भावः। एतत्सूत्रभाष्योक्तरीत्याऽनुवर्तमानस्य सुपीत्यस्य ङीत्येतद्विशेषत्वमस्तु। यस्मिन्विधिरितिपरिभाषया ङकारादावि-

त्यर्थोऽस्तु । एवञ्चाङ् ..त्यत्रौङ इत्यत्र च ङकारस्येत्संज्ञास्वीकारेऽपि न क्षतिः । इदं सूत्रञ्च घेर्ङीत्येवास्तु । आङयारेतिवार्तिके च ङा इत्येवास्तु । तेन प्रवाहवा इत्यत्र गुणस्य सिद्धिरितिमात्यमित्येति ङेरामादेशे आण्नद्या इत्याण्ङ्यात् ङादित्वाभावात् अचापि ङीत्यस्यानुवृत्त्या ङकारादित्वस्याश्रयणात्तस्यास्त्विधित्वात् न चेष्टापत्तिः । क्रखनद्याप इति नुडापत्तेः । सिद्धान्ते तु येन नाप्राप्तिन्यायेन नुड्बाधके आटि कृते परिशेषात्तत्र षष्ठीबहुवचनस्य ग्रहणमिति सिध्यति । न च ङेरामिति सूत्रेऽपि ङेर्ङामित्येवास्तु एवञ्चैतस्य स्वतो ङादित्वान्न स्थानिवद्भावोपयोग इति वाच्यम् । ङेर्ङामादेशे कृते लशक्तितोल्संज्ञाया आडागमस्य च प्राप्तौ वार्णपरिभाषयेत्संज्ञाम्बाधित्वा आट् स्यात् ततश्च प्रत्ययादित्वाभावान् ङकारस्येत्त्वानापत्तेः । अत एवान्तरङ्गत्वान् ङकारस्येत्संज्ञालोपयोराटः पूर्वमप्रवृत्तिर्भविष्यतीत्यपि निरस्तम् , वार्णपरिभाषाया अन्तरङ्गपरिभाषापवादत्वादित्यादिकन्दिगित्यनेन सूचितम् । अर्स्वारितत्वादिति । यथासङ्ख्यसूत्रे स्वरितेनेत्यस्य सम्बन्ध इति भावः , स्पष्टार्थमिति , यथासङ्ख्यसूत्रे शब्दतः सङ्ख्यासाम्यन्नार्थत इत्यस्य स्पष्टतया ज्ञापनार्थमिति के चित् , तन्न , यथासङ्ख्यसूत्रभाष्ये किमुदाहरणमिको यणचीति कथितं तद्विरोधात् तत्र हि जातिपक्षाश्रयणेनार्थत एव यथासङ्ख्यस्योपपादनात् . एचोयवायाव इत्यत्रानुपपत्तेश्च , इदुङ्ग्रामिति किमिति , अनुवृत्तिप्रयोजनप्रश्नः ' ङेरित्यषष्ठ्यन्तत्वात्तत्राहचर्यात् घेरित्यस्य षष्ठ्यन्तत्वसम्भावनया आह , ङिप्रकृतेरिति , तत्त्वप्रतिज्ञयेति , सुखसुखार्थत्वप्रतिज्ञयेत्यर्थः . अत एव , तकारस्येत्संज्ञासत्त्वादेव, प्राचीनोक्तं खण्डयति , यदि त्विति , स्वभाववादस्येति , परार्थत्ववादस्येत्यर्थः, उभयत्र । सुखसुखार्थे इत्संज्ञके च,समत्वादिति, यथोच्चारणार्थानामितरोच्चारणे सहायकत्वन्तथेत्संज्ञकानामपि स्वसम्बन्धिनः परिनिष्ठितरूपसाधने सहायकत्वमित्यर्थः,न चैवमिति , अस्य परेणवाच्यमित्यनेनान्वयः, एवम् „ उच्चारणार्थकानामपि लोपफलकेत्संज्ञास्वीकारे , तत्प्रवृत्तिः , तित्स्वरितमित्यस्य प्रवृत्तिः , ध्वनित इति ' तत्र हि श्नाश्नलोप इत्यत्र भ्रमः शकाराभावे नाश्नलोप इत्येवास्तुइतिपूर्वपक्षे नन्दितेत्यत्र प्रसक्तातिव्याप्तेः क्ङितीत्यनुवृत्त्या वारणे नन्दमान इत्यत्रातिव्याप्तिरित्युक्ता एवन्तर्हि नशब्द एव क्ङितीत्यनेन विशेष्यते , क्ङि-

तौ नशब्दादितिविभक्तिविपरिणामेनोक्तम्, यदीयम्परिभाषा स्यात्तदाऽनयैव नन्दमान इत्यत्र दोषाभावे सिद्धे विभक्तिविपरिणामकरणं व्यर्थः स्यादितिरीत्या परिभाषाभावो ध्वनित इत्यर्थः, प्रत्ययपदस्य विधानकालिकप्रत्ययत्ववति लक्षणायाम्बीजमाह, अत एवेति 'तादृशार्थं प्रत्ययपदलक्षणासत्त्वादेव। सावितिसप्तमीबहुवचनस्य ग्रहणमितिशङ्काव्युदासायाह, सावितीति, अन्त्यस्यालोऽवधित्वादल्त्वेन रूपेण तत्सजातीयोऽवधिमान् गृह्यत इत्याह, अवध्येति, अत एव, अल एवावधिमत्त्वादेव, संज्ञाविधानमदृष्टार्थमिति, न च वर्णग्रहणे च सर्वत्रेति हल्ग्रहणस्य सुतिसीत्येतद्विशेषणतया हलन्तानां स्वादीनाङ्ग्रहणे हन्यादित्यत्र लोपापत्तिस्तद्वारणायाभेदेन लोपनीयविशेषणार्थमदृक्तग्रहणमस्विति वाच्यम् 'अदृक्तसंज्ञाविधानाभावेऽपि सिद्धन्तु विशेषणविशेष्ययोर्यथेष्टत्वादित्युक्तत्वेन लाघवाय स्वादीनां विशेषणत्वे नैवातिप्रसङ्गवारणे तेषां विशेष्यत्वं स्वीकृत्य अधिकोपादानमयुक्तमित्याशयात्। विशेष्यत्वे नेति। हल्ग्रहणस्य तद्विशेषणत्वे नेति शेषः। इधा तदुपस्थित्या, परिभाषोपस्थित्या अत एवातिखट्वे इत्यादौ सुलोपप्राप्तिः, तदन्तविधिद्वयाभावे तु सुतिसीनां यतो विधानन्तदोदेराबन्तादित्यर्थस्य न्याय्यप्राप्ततयाऽत्र सुलोपो न प्राप्नोति। इत्यारभ्येति। अस्य उक्त इति शेषः, अन्ययोत्तरकालिकक्रियान्वयाभावाल्यपोऽसाधुत्वापत्तेः, तस्यैव, नान्तलक्षणदीर्घस्यैव, खिखीतितीशब्दप्रकृतिकः, तदयवेकारस्थानिकः, अत्रपक्षे, वर्णसंज्ञापक्षे, सिद्धान्तार्थमाह। यस्येति चेतिसूत्रेति। पिण्ड्य इत्यादिसिध्यर्थमिति। अन्यथा पिण्डय इतिसमुदायस्य धातुभिन्नत्वाद्दीर्घः स्यादिति भावः। उतश्च प्रत्ययादितिवदिति। एतेन गुणः कृतात्मसंस्कार इतिन्यायसञ्चारः सूचितः। यदुक्तं यस्येति चेतिसूत्रभाष्यात्खिति तदर्ण्यति। तत्र हीति। अस्य इत्युक्तमित्यत्रान्वयः। अत्रार्थे भाष्यान्तरमपि साधकमित्याशयेनाह। ख्यात्यात्सूत्र इति। ननु विकृतनिर्देशाभावाप्यतिसखेरित्यत्र लाक्षणिकत्वात्सखिशब्दस्य नोक्तनिमित्तत्वसम्भव इत्यत आह। विहितवीति। एतेन लक्षणप्रतिपदोक्तपरिभाषया यथाऽसखीतिनिषेधो न प्रवर्तते तथा सखिपतिभ्यामित्युच्यमानेपि नातिसख इत्यत्रातिप्रसङ्ग इति यस्येतिसूत्रस्थभाष्यं ख्यात्या-

सूत्रस्थभाष्यविरुद्धमिति विरोधोद्भावनन्निरस्तम् । अलमिति । अनेनान्यदपि सूचितम् । तथाहि । लोपाभावेऽप्यतिसखेरित्यत्र पूर्वान्तवद्भावेन सखिशब्दत्वेपि स्वाश्रयसख्यवयवभिन्नत्वमाश्रित्य घिसंज्ञेति तु न युक्तम् । अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मस्य युक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात् । किञ्च पूर्वान्तवद्भावेन विशिष्टे सखिशब्दत्वातिदेशे तदवयवेकारे सखिशब्दावयवत्वमर्थसमाजग्रस्तमिति संज्ञो न स्यात् । किञ्च लिङ्गविशिष्टपरिभाषायाः प्रकृते न प्रवृत्तिः । विभक्तौ लिङ्गविशिष्टाग्रहणमिति परिभाषया निषेधात् । एवञ्चातिसखिशब्दे घित्वम् भवत्येवेति । अत्र प्राचीनानुयायिनः । यदि सख्यवयवभिन्नयोरिदुतोस्तदन्तस्य वा घिसंज्ञा तदा ख्यत्यादितिसूत्रस्वभाष्यविरोधः । तत्र हि अतिसखेरित्यत्र माभूदितिविकृतनिर्देशप्रयोजनकथनावसरेऽतिसखेरितिगुणघटितप्रयोगो दृश्यते स भवन्मते नोपपद्यते । ननु तदपि ख्यन्तप्रकृतिकमसखीतिपर्युदासस्तु न प्रवर्तते लाक्षणिकत्वादिति चेत् । एवं सति सखिपतिभ्यामितिनिर्देशेष्यतिख्यामिर्वारयितुं शक्यते । तेनोक्ते कर्तव्ये लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्त्तत इति वक्तुमशक्यम् । एकस्मिन्नेव प्रयोगे तस्यैव परिभाषायाः प्रवृत्त्यप्रवृत्तेर्विरुद्धत्वात् । किञ्च ~~यस्मिन्स्थस्य स~~ख्यवयवे लक्षणाकल्पने गौरवम् । भाष्योक्तं यस्येति चेतिसूत्रस्थं त्वेकदेशयुक्तिः । तत्र हि इवर्णस्य ईति किमुदाहरणम् । हे दाच्चि । दाच्या दाच्यैः । आद्ये दाच्चि । ई सु इति स्थिते शब्दपरविप्रतिषेधेन दीर्घात्पूर्वं ङसत्वन्ततो दीर्घे सति तस्यैव श्रवणप्रसङ्गः । न चान्तरङ्गत्वाद्दीर्घत्वम् । वार्णकार्यस्यावलवत्त्वेन ङसत्वस्यैव प्राप्तेः । द्वितीये दाच्चि इ आ इति स्थिते शब्दपरविप्रतिषेधेन यणादेशे परस्य क्ते पूर्वस्यैकारस्य श्रवणप्रसङ्गः । सवर्णदीर्घे कर्त्तव्ये यणादेशस्य स्थानिवत्त्वन्तु वक्तुमशक्यम् । पूर्वपरविधित्वात् । न च यणि कर्त्तव्ये स्थानिवत्त्वम् । वर ई इतीकारप्रश्लेषेणैकारनिमित्तकविधिर्भवति न स्थानिवदिति निषेधादिति तस्याशयः । न त्वयं सिद्धान्तः । फलाभावात् । पट्ट्या मृद्व्येत्यचः परस्मिन्नितिसूत्रस्वभाष्योदाहरणासंगत्यापत्तेश्च । तृतीये दाच्चि ई इति स्थिते स्त्रीभ्यो ढगिति ढकि परस्य लोपे पूर्वस्य श्रवणप्रसङ्गः । तद्धितनिमित्तकः पूर्वस्य लोपस्तु वक्तुमशक्यः । परलोपस्य स्थानिवत्त्वात् ।

एवं सिद्धान्त्येकदेशिनोक्ते पूर्ववाद्याह नैतानि सन्ति प्रयोजनानि । सवर्णदीर्घत्वेनाप्येतानि सिद्धानि । अच कैयटः । यत्राङ्गबाणयोर्युगपत्प्रसङ्गस्तत्र वार्णपरिभाषाप्रसङ्गः । अन्तरङ्गम्बलीय इत्येतदपवादत्वात् । यद्यपि हे दाचीत्यत्र पदस्य विभज्यान्वाख्यानेऽस्ति युगपत्प्राप्तिस्तथाप्यत्र क्रमेणान्वाख्यानमेव कृत्स्नात इत्याशयः । यण्ढको त्वाङ्गविधे न भवतः । ततः पुनः सिद्धान्त्येकदेशिनोक्तम् । अतिसखेरागच्छति । अतिसखेः स्वमिति । अस्याप्येकदेशयुक्तित्वं प्रागुपपादितमेवेत्याहुः । अत्रेदमवधेयम् । यदि सखिशब्दस्य तदवयवे लक्षणयाभाष्यान्तरविरोधः स्यात्तदाऽस्य भाष्यस्यैकदेशयुक्तित्वन्तथा तु न दृश्यते । किञ्च भाष्यकारस्येवर्णस्येति परे लोप इत्यस्येदमुख्यमेवोदाहरणमित्यभिप्रेतमिति प्रतीयते । यथा हे दाचि । दाच्या । दाचेय इति प्रयोजनत्रयं व्युत्पाद्य नैतानि सन्ति प्रयोजनानीत्युक्तन्तथाऽतिसखेरागच्छति । अतिसखेः स्वमितिप्रयोजनकथनोत्तरमेतदपि न प्रयोजनमिति नोपन्यस्तम् । किन्तु इदन्तर्हि प्रयोजनमिति प्रदर्शितम् । तेनास्य सिद्धान्त्युक्तिरेव । प्रयोजनान्तरञ्च नोपन्यस्तम् । ख्यत्यात्परस्येति सूत्रेप्येवमेव प्रयोगः कृतस्तस्मान् ध्यप्रकृतिक एवायम् । उक्तभाष्यद्वययोजनाय विहितविशेषणानाश्रयवक्तव्यप्रतिपदोक्तपरिभाषाया अप्रवृत्तिरपि तात्पर्यविषयैव । अत एव ख्यत्यात्परस्येति सूत्रे सखिपतिभ्यामित्युच्यमाने इह न स्यात् । सखीयतेरप्रत्ययः । सख्युः पत्युरिति । व्याख्यातञ्च कैयटेन । विद्यमानं खमस्य स सखः । तमिच्छत्यात्मन इति क्यच् । क्यचि चेतीत्वम् । यदि लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिर्विवक्षिता स्यात्तदाचाव्याप्तिः स्फुटैव । न च यस्येतिसूत्रेण ईति परे यदीवर्णलोपो न स्यात्तदा ह्यन्तस्य सखीशब्दस्य सखी सख्याविति प्रयोगौ दृश्येते तयोरुपपत्तिर्न स्यात् सख्यशिश्वीति ङीषि सवर्णदीर्घे एकादेशे पूर्वान्तवद्भावेनानङ्खिदङ्भावयोः प्रवृत्तिप्रसङ्गादिति तस्याः कथनेन न्यूनतेति वाच्यम् । प्रकृतभाष्यस्योपलक्षणत्वादिति । इष्टतोऽवधारणार्थ इति । एवकाराभावे पतिशब्द एव समासे घिसंज्ञ इत्यपि नियमाकारः स्यात्तथा चातिसखेरागच्छति । अतिसखेः स्वमितिप्रयोगविरोधः स्पष्ट एव । पतिः समास एवेतितियमे सीतायाः पतये नमः । नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतावित्यादिस्मृतिपु-

राणीयप्रयोगविरोधमपरिहरति । स्मृतिपुराणेष्वित्यादिना । पतिरित्याख्यातः पतिरित्येवंरीत्याप्युपपत्तिरन्यत्र स्फुटा । धात्वादेरितिनिर्देशाद्विपरीतनियमो नेत्याश्रयणे तु प्रतिपत्तिगौरवम् ॥ बह्वृच्पूर्वेऽतिप्रसङ्गस्तस्यालक्ष्यत्वे सम्भवति तत्रैव किमानमत आह । अत एवेति । तस्यालक्ष्यत्वादेव । पतिशब्दस्य पत्ययविकारलक्षणिकत्वे मानमाह । एतेनेति । सुपतिना सुसख्या इत्यादीष्टेति । शेषो घ्यसखिपतीतिन्यासे सुपतिनेत्यस्यासिद्धिः । सखिशब्दस्य सख्ययवत्तात्क्षणिकत्ववत्पतिशब्दस्यापि पत्ययवयवं लक्षणा वाच्या । अन्यथा सख्ययवभिन्नत्वमिकारस्य विशेषणमित्येकधर्मावच्छिन्नेऽन्वयाभावेन इन्द्रानुपपत्तिः स्यात्तथा च सुपतिनेत्यस्यानुपपत्तिः स्फुटैव । किञ्च पतिश्च मित्रञ्चेति सहविवक्षायान्द्वन्द्वे पतिमित्र इत्येवेष्यते तस्यासिद्धिरित्यपि बोध्यम् । पतिसखी समास एवेतिनियमे सुसख्येत्यस्यासिद्धिर्बोध्या । कतिशब्दस्य नित्यबहुवचनान्तत्वोपपत्तिमाह । किमः संख्येत्यादि । भाष्ये स्पष्टत्वादिति । तत्र हि किमियेतत्परिप्रश्ने वर्त्तते । परिप्रश्नश्चानिर्ज्ञाते । अनिर्ज्ञातञ्च बहुषु भवति । द्वयोः पुनर्निर्ज्ञातमेवेत्युक्तम् । एवञ्च बहुवाच्यत्वस्यैव नियमेनोपस्थित्या बहुवचनान्तत्वमाश्रयमेवेति भावः । न ग्रहणमिति । उभयगतिरिह भवतीतिपरिभाषासत्त्वादिति शेषः । अत एव । तादृशपरिभाषासत्त्वादेव । एवञ्च यदन्तपर्युदास एव तस्याम्परिभाषायां ज्ञापकः । अत एव । लोकप्रसिद्धार्थकस्य ग्रहणादेव । एतन्न्याय इति । क्वचिन्नाक्वचिन्न्याय इत्यर्थः । ननु बहुगणशब्दस्यापि संख्याप्रदेशे एकादिशब्दानामिव ग्रहणे सिद्धे सूत्रेऽनयोरुपादानं व्यर्थमत आह । सूत्रे बहुगणग्रहणन्विति । एतत्तत्त्वं पूर्वमेवोदितम् । नियतविषयपरिच्छेद इति । नियतो यो विषयपरिच्छेदस्तद्धेतुत्वादित्यर्थः । परिच्छेदे नियतत्वञ्चेतरव्यावृत्तविषयकत्वम् । परिच्छेदो ज्ञानविशेषः । बहुगणयोर्न मात्रात्तयात्वमिति भावः । चादिसंख्याव्याप्यकः । चादिसंख्या व्याप्या यस्य सः । अत एव । बह्वादीनामसंख्यात्वादेव । एवं सति यद्यप्यत्रोक्तमेकादिकया चापि संख्यायत इति तद्विरोधः । अत्रापि शब्दस्वारस्येन यथा बह्वादिकया संख्यायते तथा एकादिकयाप्यतोऽनयोरपि ग्रहणमित्यत आह । यत्तु भाष्य इति । एवञ्च । संख्यानकरणत्वं यथाकथञ्चिद्विवक्षित-

त्र साचादिति न विरोधः । प्राचीनोक्तङ्खण्डयति । एतेनेति । उक्तभाष्यविरोधेनेत्यर्थः । बहुत्ववाचिन इति । बहुवाचिन इत्यर्थः । लाघवान्नियमशरीरान्तरमाह । यद्वेति । ननु यदीदं सूत्रन्न नियमार्थन्तदा सङ्घवैपुल्यवाचकयोरपि ग्रहणमाप्नोतीत्यत आह । संघवैपुल्येति । संख्यानकरणत्वम्परम्परयापि न डतिमात्रस्यापि तु तदन्तस्येति संज्ञाविधावपि तदन्तविधिरित्याशयेनाह । डत्यन्तेतीति । अत एव । तदन्तस्य संज्ञासत्त्वादेव । करणादाहत्येति । अन्यथा समानफलकानेकसंज्ञाकरणस्याप्रामाणिकत्वमितिन्यायविरोधः स्यात् । ननु संज्ञात्वयकरणादसमानफलकत्वङ्लभ्यत इत्यत आह । तेन हन्तीति । समानफलकत्वाकल्पनेऽप्यतिप्रसङ्गः स्यादेवेति भावः । लोपसंज्ञया आसां समावेशमुपपादयति । अन्यदेशस्थत्वे नेति । गौणे नेति । प्रियपञ्चान इत्यत्र नेत्यर्थः । नन्वेवन्तदन्ते परमपञ्चेत्यत्र कथन्निर्वाह इत्यत आह । परमपञ्चेत्यादाविति । स्पष्टञ्चेदमिति । उपसर्जनप्रतिषेधखण्डनाय अङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति । यद्येवम्परमपञ्चेत्यत्र लुङ् प्राप्नोति । षट्प्रधान एष समासः इत्येन । प्रमाद इति । तेन हि गृह्यमाणविभक्तेरित्यस्यैवं व्याख्या स्यात गृह्यमाणानां सम्बन्धिनी या विभक्तिस्तदर्थगतसंख्याकर्मादिवाचिनी तस्या इत्यर्थः । यद्येवमिति । गृह्यमाणाया विहिता विभक्तिरित्येवं सेवन्यमन्यमानस्य प्रश्नः । आर्थः सम्बन्धो गृह्यत इत्युत्तरेऽभिप्राय इति । परन्त्वस्य भाष्यग्रन्थस्य गृह्यमाणाहितविभक्तेरित्यर्थः स्वारसिकः प्रतीयते एवं सति परमपञ्चेत्यत्र लुङ् न प्राप्नोति । लोके गणनायाम्प्रसिद्धानाङ्ग्रहणन्न हि परमपञ्चादयस्तथा प्रसिद्धा इति प्रश्नः । संख्याप्रकारकसंख्येयविशिष्टकप्रतीतिजनकत्वेन विशिष्टस्यापि षट्त्वमस्त्येव गणनायाम्प्रसिद्धानामिव ग्रहणमित्यत्र मानाभाव इत्युत्तरेऽभिप्रायः । अधिकमन्यत्र स्फुटम् ॥ मा भूदिति । प्रत्ययपदम्प्रत्ययत्वपर्यायाधिकरणपरमिति भावः । इदमेव प्रत्ययपदम्प्रत्ययावयवेऽपि प्रत्ययत्वव्यवहारस्य गमकमिति युक्तमेव । एतत्फलमाह । एवञ्चेति । प्रत्ययावयवेऽपि । प्रत्ययत्वव्यवहारस्य युक्तत्वे साधकान्तरमाह । सात्यदेति । अन्यथा सातेः सकारस्य प्रत्ययत्वाभावादेवाप्राप्ते स्तद्वैयर्थ्यं स्पष्टमेव । तत्रैवेतीति । तेन सुट्षष्प्राप्ते इत्यत्र दीर्घाभावः । न च गवे हितमित्यादावेत्वावच्छिन्ननिमित्तकेऽ-

षादेशेऽस्थिधिवादस्थानिवद्भावाभावादिदं विध्यर्थमिति शङ्क्यम् । अच्त्वस्यापि प्रत्ययासाधारणत्वाभावात् । प्रत्ययनिमित्तकमेवेति । लक्षणशब्दस्य निमित्तपरत्वात् । इत्येके इति । प्राच्यः । अपर इति । सिद्धान्तिनः । ननु प्रत्ययनिमित्तकं कार्यं स्यादिति व्याख्याने प्रत्ययलोपसूत्रेणैव कार्यप्राप्तिर्वाच्या । एवं सति परिवोरित्यत्र व्यञः क्विपि सम्प्रसारणे कृते क्विपो लोपे प्रत्ययलोपशास्त्रेण तुन्दीर्वत्वयोः प्राप्तौ पर्यायस्तयोः स्यादेकदेशस्थत्वादत आह । इहापीति । प्रतिपादितमिति शेषः । अन्यथा । तदेशस्थत्वानङ्गीकारे । सूत्रस्य सिद्धान्तार्थमाह । लुप्त इत्यादि । लब्धाङ्गसंज्ञकेति । लुप्तप्रत्ययनिरूपितेत्यादिः । तेन । लुप्तप्रत्यये परतो यः पूर्वस्तदुद्देश्यकत्वनिवेशेन । भसंज्ञा च नेति । सुबिति पदसंज्ञा यथा समुदायोद्देश्यिका तथा भसंज्ञा न समुदायोद्देश्यिका किन्तु लुप्तप्रत्यये परतो यः पूर्वस्तदुद्देश्यिकेति भसंज्ञायां प्रत्ययलक्षणप्रतिषेध इति भसंज्ञा नेत्यर्थः । अङ्गसंज्ञा यथा लुप्तेऽपि प्रत्यये भवति तथोपपादयति । अङ्गसंज्ञा त्विति । एवञ्चाङ्गसंज्ञायां नलुमतेतिनिषेधाभावादङ्गसंज्ञायां लब्धाङ्गसंज्ञकोद्देश्यकभत्वे प्रत्ययलक्षणप्रतिषेधाङ्गत्वे कर्त्तव्ये निषेधः प्रवर्त्तते । कैयट इति । तत्र हि युवशब्दान्तस्याङ्गस्यानाकौ भवत इत्यर्थे नन्दनप्रियः कारकप्रिय इत्यत्र वाक्यस्थ विभज्यान्वाख्याने नन्दनशब्दात्कारकशब्दात् च या विभक्तिस्तस्याः सुपो धात्विति लुकि कृते ऽनाकौ न प्राप्नुत इति पूर्वपक्षे अङ्गावयवयोर्युव् इत्येतयोरनाकौ भवत इत्यर्थाभिप्रायेण मा भूतां यासौ सामासिकी विभक्तिस्तस्यां । यासौ समासादिभक्तिस्तस्यां भविष्यत इति समाधाने कृते यत्र तर्हि समासादिभक्तिर्नास्ति । नन्दनदधि । कारकदधि । इति पुनः शङ्कायामेवन्तर्हि न वा परनिमित्तं संज्ञा च प्रत्ययलक्षणेन । न वेह परनिमित्तमाश्रीयते अस्मिन्परतः युवोरनाकौ भवत इति । किन्तर्हि अङ्गस्य युवोरनाकौ भवतः अङ्गसंज्ञा भवति प्रत्ययलक्षणेनेति भाष्ये स्थितम् । अत्र कैयटः । न ह्येह विभक्तिः प्रत्ययान्तरं वा निमित्तत्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः । केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते । अस्ति च प्रत्ययलक्षणेनाङ्गसंज्ञा । नहि तस्यां विधीयमानायां नलुमताङ्गस्येति प्रतिषेधः प्रवर्त्तते लब्धाङ्गसंज्ञकस्य कार्यान्तरे

विधातव्ये स प्रतिषेधः प्रवर्त्तते न चाङ्गसंज्ञाऽङ्गस्य कार्यमिति प्रतिषेधाभाव इति। अत्र कैयटेनारुचिः सूचिता। न लुमता तस्मिन्निति वार्त्तिकरीत्याङ्गपदं पूर्वमेवोपलक्षणमित्यङ्गसंज्ञायामपि प्रतिषेधः प्राप्नोतीति तस्मान्नलुमतेतिनिषेधानित्यत्वेनाङ्ग संज्ञा भवतीति भाष्याशयः कल्प्यः। अत एव। न लुमतेतिनिषेधानित्यत्वादेव। स्त्रीप्रत्ययलुकीति। न चाक्रते लञ्चत्वे ऋदन्तत्वविरहात्स्त्रीप्रत्यय एव कथमिति शङ्क्यम्॥ पित्यलादिगणे पृथिवी क्रोष्टु मातामह पितामहेतिपाठात्तृज्वद्भावात्पूर्वमपि स्त्रीप्रत्ययप्रवृत्तेः। ननु लञ्चत्सूत्रस्थभाष्योक्तरीत्या यत्राङ्गस्येत्यस्योपस्थितिस्तस्य परनिमित्तकत्वन्न स्यात् एवञ्चोरदत्वस्य परनिमित्तकत्वाभावात्स्थानिवद्भावस्याप्राप्त्या वन्नस्थेत्यत्र वकारस्य न सम्प्रसारण इति सम्प्रसारणनिषेधो न स्यादिति तस्यावश्यम्परनिमित्तकत्वमाश्रयणीयमिति पञ्चक्रोष्टृ इत्यस्यासिद्धिरित्याशयेन शङ्कते। न चेति। अङ्गसंज्ञाद्वारेति। अङ्गस्येत्यनेन सह तस्य सूत्रस्यैकवाक्यतयाङ्गत्वज्ञानस्य वाक्यार्थज्ञाने कारणतयाऽङ्गत्वज्ञानस्य परप्रत्ययज्ञानप्रयोज्यतयोरदत्वस्यापि परप्रयोज्यत्वेन स्थानिवद्भावप्रवृत्तिरित्येव भाष्यप्रामाण्यात्कल्पते न तूरदत्वस्य परनिमित्तकत्वं साक्षादिति भाष्ययोरविरोध इति भावः। एतन्मते च लुप्तप्रत्यये परतो यः पूर्वो लब्धाङ्गसंज्ञक इत्यर्थो न किन्तु तादृशप्रत्ययपूर्वस्य यत्कार्यमाङ्गमनाङ्गं वा तस्मिन् कार्ये निषेध इत्येव विवक्षितम्। अत एव। अनित्यत्वेन न लुमतेतिनिषेधाप्रवृत्त्याऽङ्गसंज्ञासत्त्वादेव। यथाकथञ्चिदिति। शब्दाध्याहारेणोपपादनात्क्लेशः। अत्र कार्यकालपक्षमाश्रित्य वन्नस्थेत्यस्य सिद्धिः कैयटेनोक्ता सा नोचितेत्याशयेनाह। आकडारादीति। कार्यकालत्वमभ्युपेत्याह। वस्तुतस्त्विति। एतेन पदैकवाक्यतयाऽन्वयासम्भवेन। आहत्या। अङ्गस्येत्यस्याहत्या। प्रवृत्ते। युवोरनाकौ लञ्चत्क्रोष्टुरित्यत्र च। लक्ष्यानुरोधात्। नन्दनदधि। कारकदधि। पञ्चक्रोष्टृ इत्यादिलक्ष्यानुरोधादित्यर्थः। तदाशयः। युवोरित्यादिसूत्रस्थभाष्याशयः। ननूकरीत्योरदत्वस्य परनिमित्तकत्वे चर्करीतीत्यादावत्त्वं कथमत आह। चर्करीत्यजेति। चर्करीति। अजर्घा इत्यस्य सिध्यर्थमन्यकल्पितमर्थन्निरस्यति। अङ्गाच्चिन्नेति। पदैकवाक्यताऽन्वयो न संभवतीत्याशयेनाह। अपास्तमिति। किञ्चाङ्गसंज्ञाद्वारकपरम्परयोरदित्यस्य पर-

निमित्तकतया भाष्योक्तप्रयोजननिर्वाहाङ्गाश्रयानुक्ताद्वृत्तिकल्पनङ्गौरवग्रस्तमि त्यपि बोध्यम् । युष्मदादीनान्त्रिषु सारूप्यमात्रमुक्तम् त्वलिङ्गत्वमत एवा लिङ्गाव्ययसन्निधान एवैषान्निरूपणन्न कृतमित्याशयेनाह । डेप्रथमयोरमि ति सूत्र इत्यादि । साम आकमितिसूत्रस्थभाष्यविरोधम्परिहरति । साम आकमितीति । शङ्कावारणायेति । न च निजान्त्रयाणामितिनिर्देशात्सकारा न्तत्वशङ्काया इवास्या अप्यशङ्काया वारणम्भविष्यतीति वाच्यम् । अस्य ग्रन्थ स्य दोषोपलक्षणत्वात् । तेन परमत्रिशब्दाख्यानार्थे णिचि टिलोपे कृते क्रौ णिलोपे च कृते क्रौ लुप्तमिति स्थानिवत्त्वनिषेधे निर्दिश्यमानात्रयवत्त्रय शब्दस्य त्रयादेशे परमत्रयाणामित्यत्रान्त्यरेफस्यादेशापत्तिर्दोषो बोध्यः । के चिदितीति । प्रसादकारादय इत्यर्थः । तेषामेव शङ्कान्तरन्निरस्यति । न चेति । अत एव । गौणमुख्यपरिभाषायान्तादृशस्यैव गौणत्वस्य गौणपदार्थत्व देव । तदेवोपपादयति इतरेति । एतच्च गौणमुख्यपरिभाषाप्रवृत्तिसम्भवमभ्युपेत्य वस्तुतस्तु तस्याः सम्भव एव नेत्याह । यदकार्य एवेति । अत एव । नित्यद्विवचनान्तत्वादेव । अत्र नित्यपदोपादानेन द्विशब्दप्रकृतिकसुपो द्वि शब्दार्थद्वित्वानुवादकत्वमेवेति नियमो बोध्यते तच्च द्वित्वमप्रधानम्प्रधानं वेत्यन्यदेतत् । अभ्युच्चयायेति । सम्भावितदोषाणान्नानारूपत्वसूचनाय । तेन भवानित्यस्य द्विपर्यन्तानामिति नियमास्वीकारेपि व्यक्तिपक्षेऽत्वसन्तेति सूत्रे भवच्छब्दोपस्थितिसामर्थ्यात्स्त्री त्यदाद्यत्वाप्रवृत्तिकल्पनेन सिद्धिसम्भवेपि न ग्रन्थासंगतिः । अत एवाक्षरमादाह । भवन्ताविति । भाष्यप्रामाण्येनेति । तत्रापि सरसी यदीत्यनेन कथनेन । ईदृशेभ्यः । आदन्तेभ्यः । क्विपोऽनभिधानमिति । अयम्भावः । जनसनखनामिति सूत्रे धियौ धियः पियौ पिय इत्यादावियङादेशे कर्त्तव्ये ईत्वस्यासिद्धत्वम्प्राप्नोतीत्याशङ्क्य नैतदीत्वङ्किन्तर्हि ध्याप्योः सम्प्रसारणमेतदित्युक्तम् । अभ्युपेत्यापीत्वं व्याश्रयत्वादसिद्धत्वन्न भविष्यतीति तु परास्तम् । घुमास्थेतिसूत्रे च घृतपावानः । वसायावान इत्यत्र पाधातोः क्वनिपि सतीत्वम्प्राप्तमिति तद्ग्राहकत्वर्थमीत्वे वकारप्रतिषेधो वक्तव्य इत्युक्ता यदीत्वे वकारप्रतिषेध इत्युच्यते कथन्धीवरी पीवरीत्याशङ्क्य नैतदीत्वं किन्तर्हि ध्याप्योः सम्प्रसारणमेतदित्युक्तम् । एत-

क्ष्मिन्वार्त्तिके यदीत्वे वकारप्रतिषेध इति एतस्य प्रत्याख्यानस्य तत्प्रयोजनस्य धृतपावान इत्यादेर्वनिपा साधनरूपस्य भाष्यस्य च फलैक्यायानभिधानङ्कल्पनीयम् । ईत्वे वकारप्रतिषेध इति सामान्यत एवोक्तत्वत्त्वे वकारादिप्रत्ययसामान्ये प्रतिषेधे क्विप्यपि प्रतिषेधः प्राप्नोति । वनिपा तत्साध्यप्रयोजनसाधनरूपप्रत्याख्यानपक्षे क्वियीत्वमाप्नोतीति फलभेदः स्यादिति । नन्वेवं रीत्या धीवर्यादीनामप्यनभिधानमाप्नोतीत्यत आह । धीवरी पीवरीत्यादीति । आदिना धीरित्यादिसङ्ग्रहः । अत एव क्विप्च क्तिनिप्च चेनेतिसङ्गच्छते । पर्यालोचनया सिद्धाद्वार्त्तिकात्सिद्धमिति । अत्र पर्यालोचनया सिद्धादित्यनेनैताद्दशानुपूर्वोक्तवार्त्तिकानुपलम्भेपि न क्षतिरिति ध्वनितम् । जनसनेति सूत्रे धियौ धिय इत्यत्र यडादेशे कर्त्तव्ये धाधातोः क्विपि यदीत्वन्तस्यासिद्धत्वमाप्नोतीत्याशङ्क्य नैतदीत्वङ्किन्तर्हि ध्याप्योः सम्प्रसारणमेतदित्युक्तम् । एवङ्घुमास्थेतिसूत्रे पावान इत्यत्रेत्यत्रत्यर्थमवकारादाविति वार्त्तिकस्वीकारे कथन्धीवरी पीवरीति प्रश्ने नैतदीत्वमिलुक्ता ध्याप्योः सम्प्रसारणमेतदित्युक्तत्वेन सिद्धादित्यर्थः । सूत्रभाष्य इत्यस्य सूत्रयोर्भाष्य इत्यर्थः । वार्त्तिकादिति । ध्याप्योः सम्प्रसारणञ्चेत्यतः । ननु धीर्ध्यायतेर्धातेरिति भाष्यविरोध इत्यत आह । धीर्ध्यायतेरित्यादि । ननु शंस्य। शब्दे स्यः क चेतिसूत्रस्थचकारेण क्विपि कृते ईत्वमवकारादाविति वार्त्तिकप्रत्याख्यानपक्षे इत्वापत्तिरित्यत आह । शंस्या इत्यत्रेति । एवञ्च तत्रत्यं क्वियदं क्विविवाचरतीति क्विप् विजित्यर्थकमिति भावः । सत्येष्ठा इत्यत्राप्येवमेव । यदि वातप्रमीशब्दोऽपि प्रामाणिकस्तर्हि सोऽन्यथा साधनीय इति मनसि निधायाह । मीङ् मान इति । व्याख्यानादिति । किम्पुनरिदन्दीर्घयोर्ग्रहणमाहीं खिद्खयोरिति विकल्प्य दीर्घग्रहणपक्षे यू इत्यत्र पूर्वसवर्णदीर्घस्य ङिति ह्रस्वश्चेति सूत्रे सामानाधिकरण्यस्य चानुपपत्तिमुद्भाव्य ह्रस्वग्रहणे शकटिबस्विति नदी बन्धुनीति पूर्वपदान्तोदात्तस्य बहुशकटिरित्यत्र नद्यृतश्चेति कपः प्राप्तिश्चोक्ता दीर्घयोर्ग्रहणमिति सिद्धान्तितम् । पूर्वसवर्णदीर्घस्तु दीर्घाज्जसि चेत्यत्र वा च्छन्दसीत्यनुवृत्त्या साधितः । ङिति ह्रस्वश्चेति सूत्रे तु यौर्यौ ह्रस्वावित्येवं वैयधिकरण्यान्वयेन साधित

इत्येवंरूपाद्याख्यानादित्यर्थः । मात्र इति । जननीवाचकोऽयम् । कर्मख्यणग्रङ्गावारणायाह । मूलविभुजादित्वात्क इति । तन्त्रादिघटकेकारादेरवाचकत्वादगौर्यादिघटकस्यापि द्योतकतया तस्याप्यवाचतया वर्णसंज्ञापत्तौ न युक्त इत्यपि बोध्यम् । तदप्तसंज्ञायामाच्छीनद्योरित्यत्र प्राप्तामनुपपत्तिमपरिहरति । आच्छीनद्योरित्यादाविति । ग्रामख्यादेर्व्यावृत्तिरिति । एतत्प्रवृत्तिनिमित्तस्य ग्रामकर्मकनयनकर्तृत्वस्य पुंसाधारणत्वेन लिङ्गान्तरविशिष्टार्थानभिधाय कत्वाभावात् । प्रवृत्तिनिमित्तैक्ये सतीति । इदञ्च लिङ्गान्तरविशिष्टार्थानभिधायकत्वपदार्थकुक्षिप्रवृत्तिप्रतियोगिविशेषणम् । तथा च लिङ्गान्तरविशिष्टार्थस्य येन रूपेणाभिधायकं तेनैवरूपेण स्वाभिधायकं यत्तस्य न नित्यस्त्रीलिङ्गत्व व्यवहारः । स्वजन्यबोधीयलिङ्गान्तरविशिष्टार्थनिष्ठविशेष्यतावच्छेदकावच्छिन्नस्त्रीनिष्ठविशेष्यताशालिशब्दबोधजनकं यत्तद्भिन्नशब्दत्वन्नित्यस्त्रीलिङ्गत्वमिति फलितम् । क्वचिन्निर्वृत्तेनेति । यदा केन चित्पुरुषेण स्त्रीमात्रविषयकबोधेच्छया खलपूशब्दः प्रयुक्तस्तेन च सामग्रीविशेषात्तन्मात्रविषयक एव बोधो जनितस्तस्य च लिङ्गान्तरविशिष्टार्थानभिधायकत्वान्नदीत्ववारणाय लिङ्गान्तरविशिष्टार्थाभिधायकतावच्छेदकधर्मशून्यत्वं वक्तव्यमेवञ्च ङ्याप्प्रातिपदिकात्कुमार्यादीनां क्यजन्तसमानानुपूर्वीकत्वान्नदीत्वन्न स्यादतः प्रवृत्तिनिमित्तैक्य इत्युपात्तमिति भावः नन्वेवमिति । एवंविधस्य नित्यस्त्रीत्वस्य स्वीकारे बहुव्रीहिघटकतत्तत्पदानामन्यपदार्थबोधकतया एतस्य लिङ्गान्तरविशिष्टार्थाभिधायकत्वापत्त्वात् ।तस्य । श्रेयसीशब्दस्य । यथोद्देश इति । भविष्यतिकिञ्चिदनेन प्रयोजनमित्यभि सन्धिमात्रेण संज्ञाप्रवृत्तेस्तस्मिन्पक्षे स्वीकारात् कुमारीत्यादौ । कुमारीमिच्छन्कुमारीवाचरतीत्येवंसिद्धकुमारीशब्दादौ । अवयवस्त्रीविषयत्वादिति । अत्रावयवशब्दो वृत्तिप्रकृतिशब्दपरः । तेन क्यजन्ते न दोषः । केचित्तु एवं सत्यग्नादिशब्दानामाचारक्विप्प्रकृतिककर्तृविजन्तानां स्त्रियां वृत्तौ तस्माच्छसो न इति नत्वापत्तिस्तथा शकन्यादिस्त्रीलिङ्गशब्दानामुकारोत्वा पुंवृत्तावाङो नाभावस्यास्त्रियामिति निषेधादनापत्तिरिति चिन्त्यमेतदित्याहुः । तन्न । तस्माच्छस इति सूत्रस्य पुमर्थप्रतिपादकशब्दस्य शस्प्रकृतिके शसो नस्य पूर्वसवर्णदीर्घात्परस्य नत्वमित्यर्थो-

इत्र नत्वप्राप्तेरभावात् । एवमाङो नेत्यस्यापि आङो यतो विधानन्तदादेरस्त्रियां विद्यमानात्परस्य नाभाव इत्यर्थः स्यात्तथा चोक्तरीत्या शकटीशब्दस्य पुंवत्तौ नाभावोपीष्ट एवेति दिक् । यदुक्तं कार्यकालपक्षेऽपीति तद् दूषयति । आकडारस्य संज्ञानामिति । कथं बाध्यबाधकभाव इति । तत्पक्षे विधिप्रदेशरूपैकदेशगतत्वेन संज्ञानाम्नोर्वापर्याभावेन बाध्यबाधकभावो न स्यादिति भावः । के चिदिति । अत्रारुचिबीजन्तु न तेन ग्रन्थेन नदीसंज्ञाविधायकशास्त्रस्य तत्तत्कार्यविधायकशास्त्रैकवाक्यताऽभिप्रेता किन्तु यदा नदीत्वप्रयुक्तकार्यप्रवृत्तिश्चिकीर्षिता तस्मिन्काले नदीसंज्ञां कृत्वा सा कल्पनीया न तु भविष्यति किञ्चिदितिन्यायेन पूर्वं नदीत्वप्रवृत्तिरेतावतापि नद्यन्तकार्यस्य प्रवृत्तिर्भविष्यतीति नानुपपत्तिरिति । यत्तु के चिदितिप्रतीकमुपादाय संज्ञयोः कार्यार्थमन्यदेशगमनेऽपि न स्वदेशीयत्वत्यागो व्यवहारार्थन्तत्तद्देशगतानां व्यवहर्तृणामिवेत्यस्वरस इति । तत्र अधिकारो नाम त्रिप्रकारः कश्चिदेकदेश स्थः सर्वं शास्त्रमभिज्वलयतीतिभाष्यफक्किकाव्याख्यावसरे कश्चित्परिभाषारूप इति कैयटव्याख्यानेन परिभाषाविषय एव स्वदेशात्यागेन कार्यसम्पादनमिति कल्पना । संज्ञाविषये तु कार्यकालपक्षेऽयादिभ्यः परैव प्रगृह्यसंज्ञेति प्रगृह्यसंज्ञायाः परत्वात्सो मादिति सूत्रभाष्ये उक्तत्वेन संज्ञाविषये स्वदेशत्यागेन व्यवस्थाया भाष्यसम्मतत्वात् । यत्तु बहुश्रेयसीत्यत्र ह्रस्वे गुणः स्यादिति कश्चिदाह । तदूषयति । ह्रस्वेकृत इति । ह्रस्वविधानसामर्थ्यादिति । एवञ्च ह्रस्वपदं स्वाभाविकह्रस्वपरमवश्यमिति भावः । भाष्ये स्पष्टमिति । एकदेशस्यापि क्वचिदनुवृत्तिर्भवतीति भाष्ये स्पष्टम् । यथा दामहायनान्ताच्चेति सूत्रे संख्यादेरित्यनुवर्त्तते अव्ययादेरिति निवृत्तमित्युक्तम् । ननु मात्रवाचकस्याप्यनःशब्दस्य नपुंसकलिङ्गत्वात्सर्वनामत्वेन न गुणापत्तिरित्यत आह । तस्य नपुंसकत्वेपीति । ननु ह्रस्वपदस्य स्वाभाविकह्रस्वपरत्वे पर्जन्यवल्लक्षणन्यायेन मात्रशब्देऽपि तस्य प्रवृत्तिः स्यात् तथा च हेमातरित्यत्र गुणानापत्तिरत आह । अयमिति । अन्ये तु न लुमतेतिनिषेधस्यानित्यत्वेऽनित्यवचनस्यौत्सर्गिकी प्रवृत्तिर्लक्ष्यानुसारादप्रवृत्तिरित्येवं व्यवस्था सर्वजनसम्मता सा च लक्ष्यस्य स-

प्रतिपन्नत्वे भवति । प्रकृतेस्तु गुणादर्शनेनानित्यस्याप्यप्रवृत्तौ न मानमिति चिन्त्यमेतत् । एवङ् गुणश्रुत्येक्परिभाषाप्रवृत्तिरित्यपि चिन्त्यम् । अम्बार्थनद्योः । क्रमात्सम्भवव्यभिचारयोरभावेनैक्परिभाषाया इहानुपस्थापनादित्याहुः । अत्रेदं वक्तव्यम् । पक्षे गुणः स्यादेवेति यत्तदनित्यस्य सामान्यतः प्रवृत्तिमभ्युपेत्य । वस्तुतस्तु गुणइत्यनुक्ता ह्रस्वपदोपादानमिक्परिभाषानुपस्थित्यर्थमेव । यतूक्तमम्बार्थनद्योः सम्भवव्यभिचाराभाव इति । तच्चिन्त्यम् । हे देवीत्यत्राम्बार्थके सम्भवस्य हे अम्बेत्यत्र व्यभिचारस्य सम्भवात् । एवं सत्यम्बेति न सिध्यतीत्यत्रैव दूषणनिर्भरः । न चेक्परिभाषोपस्थित्याम्बार्थकस्येगन्तस्यैव चेद् गुणः स्यात्तर्हि नदीपदोपादानमनर्थकं स्यादिति वाच्यम् । अम्बार्थभिन्ननद्यन्तस्य गुणविधायकत्वेन चारितार्थ्यात् । न चेक्परिभाषयेगन्ताम्बार्थकस्य ग्रहणे नदीपदोपादानेनैव सिद्धेऽम्बार्थग्रहणं व्यर्थमिति वाच्यम् । मातरमतिक्रान्तङ् कुलमतिमाल तस्य सम्बोधनं हेऽतिमातरित्यत्रानःशब्दस्यैव न लुप्तेति निषेधानित्यत्वेन गुणसम्पादकत्वेनाम्बार्थग्रहणस्य चरितार्थत्वात् । यदपि नदीसाहचर्यात्स्त्रीलिङ्गस्यैवाम्बार्थस्य ग्रहणेनानःशब्दे क्लीबे न दोष इति तदपि न । साहचर्यपरिभाषाप्रवृत्तिस्त्रीकारे इगन्तत्वेनापि नदीसाहचर्यसम्भवान्नालशब्देऽम्बार्थके एव स्यान्नत्वम्बेत्यादाविति साहचर्यपरिभाषाया अनित्यत्वात्प्रकृतेऽप्रवृत्तिरित्येवाभिमतमिति दिक् ॥ गुणो भवत्येवेति । इदञ्च ह्रस्वविधानस्य सामान्यापेक्षज्ञापकत्वाभिप्रायेण । यदि तु सम्बुद्धिनिमित्तकगुणस्यैवाप्रवृत्तिकल्पनन्तदा तु न दोष इति दिगित्यनेन सूचितम् । अस्वपो ह्रस्वान्नित्यत्रेति । स्वपेर्लङ । सिप् । अङ्गाद्यो ह्रस्वयोरित्यट् । शप्लुक् । सस्य रुत्वम् । हशि चेत्युत्वम् । अत्रादृगुणम्बाधित्वाऽटश्चेति वृद्धिः प्राप्नोति । न चान्तरङ्गायां वृद्धौ बहिरङ्गस्योक्तस्यासिद्धत्वं शङ्क्यम् । नाजानन्तर्यंपरिभाषया निषेधात् । पररूपमिति । अतो गुणइत्यनेन । न चाङ्विधानसामर्थ्यान्न पररूपमिति वाच्यम् । डेरामि कृते नुड्बाधकतयाटश्चरितार्थत्वात् । यत्तु ह्रस्वनद्यापइतिसूत्रानन्तरं ङेर्नेत्येव वदेदिति चिन्त्यमेतदिति । तदेव चिन्त्यम् । एवं सति षट्चतुर्भ्य इत्यत्रापि नकारसम्बन्धापत्तौ विधिनिषेधोभयसामर्थ्याद्विकल्पापत्तेः । विधिप्रकरणानन्तरन्त्वथा

पाठे श्रीग्रामण्योरित्यस्यापि निषेधसम्भावना स्यात्। व्याख्यानादिति। व्यवस्थायामित्यादिनिर्देश्यमूलकात्। नद्याम आडपवादत्वेन तस्मिन्कृते कथमाडिति कस्य चिच्छङ्कायां व्यवस्थार्थमाह। यद्यपीत्यादि। सर्वथाऽनवकाशत्वादिति। आटि कृते निर्दिश्यमानस्याटा व्यवधानादिति भावः। आगमादेशयोरपि बाध्यबाधकभावे दृष्टान्तमाह। अपवाद इति। अत एव। येननाप्राप्तन्यायेन बाधस्थलीयव्यवस्थाविलक्षणव्यवस्थास्वीकारादेव। गुणो यङ्लुकोरितिसूत्रभाष्य इति। तत्र हि डोढौक्यते। तोत्रौक्यत इत्यत्राभ्यासह्रस्वत्वस्य दीर्घौऽकित इतिदीर्घत्वस्य च प्राप्तौ परत्वाद्दीर्घत्वं स्यादिति शङ्कायामभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त इति परिभाषा उक्ता। ययाविलत्र ह्रस्वत्वस्यावकाशः। दीर्घत्वस्य तु कृते ह्रस्वत्वेऽवकाशस्मृर्वपत्ती मन्यते। तस्याः परिभाषायाः प्रयोजननिरूपणावसरे गणेरीत्वं हलादिः शेषस्य। गणेरीत्वमपवादत्वाद्धलादिः शेषञ्च बाधत इत्युक्तम्। ततोऽग्रे भाष्ये न गणेरीत्वमपवादत्वाद्धलादिः शेषबाधते किन्तर्ह्यनवकाशत्वादित्युक्तम्। अत्र गणरूपाभ्यासान्त्यस्येत्त्वमित्यर्थे हलादिः शेषे कृते तादृशाभ्यासाभावेनेत्त्वन्न स्यादिति तदनवकाशमित्यभिप्रायः। दीर्घौऽकित इतिसूत्रस्थाकिदृग्रहणेनाभ्यासविकारेषु बाधका न बाधन्त इत्येवं परिभाषा ज्ञापिता। तयाऽजीगणदित्यत्र हलादिःशेषेण णकारनिवृत्तौ पश्चाद्गकाराकारस्येत्त्वम्। अनवकाशत्वेन बाधस्थले बाधकत्वेनाभिमतस्य पूर्वमप्रवृत्तिरित्येव तत्र कृते यदुत्सर्गस्य प्राप्तिस्तर्हि भवत्येव। येन नाप्राप्तन्यायेन बाधस्थले तु यत्रोत्सर्गप्रवृत्त्युत्तरमप्यपवादस्य प्राप्तिस्तत्रापवादत्वाभिमतस्य प्रवृत्तावुत्सर्गस्य प्राप्तिसत्त्वेऽपि न प्रवृत्तिरित्येव व्यवस्था। यथा सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतान्तक्रङ्गौन्ड्यिन्यायेत्यत्र दधिदानोत्तरं तक्रदानस्य प्राप्तिसत्त्वेऽपि तक्रदानेन दधिदानस्य बाध एव। अनवकाशस्थले तु यथा सर्वे ब्राह्मणा भोज्यन्तामाठरकौण्डिन्यौ परिवेविष्टामित्यत्र भोजनपरिवेषणयोर्विरोधेपि परिवेषणानन्तरमाठरकौण्डिन्ययोर्भोजनभवत्येवेति। यत्तु हयवरट्सूत्रभाष्ये न्यायोपन्यासानन्तरत्रेदानीन्तौ भुञ्जाते इत्युक्तन्तत्तु कालविशेषेण विरोधप्रतिपादनपरमिति न तद्विरोधः। शब्दान्तरप्राप्तेराऽनित्ययोरिति। शब्दान्तरप्राप्तेराऽऽटोऽनित्यत्वमाटि कृतेऽमादे-

शस्य तु निर्दिश्यमानपरिभाषयाऽप्राप्तिरित्यर्थः । एकदेशश्रुक्तिरिति । आमो निरवकाशत्वेनाङ्बाधकतयाऽतुल्यबलवत्त्वेन परत्वादित्यनुचितमिति सा एकदेशश्रुक्तिः । ननूङ् च गमादीनामितिनिष्पन्नस्य क्विबन्तभूशब्दस्य धातुत्वादेव सिद्धे भूशब्दोपादानमनर्थकमत आह । भूशब्द इति । समानाधिकरणमिति । वैयधिकरण्ये क्ष्नियतीत्यादौ जातेर्यङि लोपो व्योरिति लोपेन यद्यपि सिध्यति तथापि तुल्यन्यायादुत्तरसूत्रेऽपि तथात्वापत्तौ दिदिवतुरित्यत्र यणापत्तिः । इयङो ङित्त्वस्य वैयर्थ्यं च स्यादिति भावः । इत्यन्यस्येति । आङ्ङित्त्वात्तदन्तविधिर्न्याय्यः । भूशब्दे तदन्तविधेर्ग्रहणवतेत्यनेन निषेधः स्यादिति न शङ्क्यम् । तस्याः परिभाषाया प्रत्ययविधिविषयत्वात् ॥ अत्र प्रकरण इति । क्ष्नियो दीर्घादिति निर्देशेन सामान्यापेक्षज्ञापकमाश्रीयते इति भावः । पर्युदासपरतया व्याख्याने फलमाह । उदियायित्यादाविति । ईङ्क्षतावितिधातोः क्विबन्तस्य रूपम् । न चैवमपि क्ष्निडियायित्यादौ दोष एवेति वाच्यम् । प्रत्यासत्त्या यङालन्तस्य कार्यिता तद्घात्ववयवपूर्वत्वस्य विवक्षितत्वात् । स्पष्टार्थमिति । पूर्वोक्तप्रत्यासत्तेः स्पष्टप्रतिपत्त्यर्थमित्यर्थः । अत्र धातुग्रहणन्वचि श्नुन्वति सूत्रादेकदेशे स्वरितत्वादनुवर्त्तते । ननु सूत्रे पूर्वशब्दसत्त्वे धात्ववयवसंयोगपूर्वत्वावच्छिन्नप्रतियोगिताकभेदस्य लाभेन सुश्रियावित्यादाविकारे तादृशभेदाभावादतिप्रसङ्गो वारयितुं शक्यते । धात्ववयवसंयोगभिन्नादित्यर्थे तु रेफे संयोगभेदसत्त्वेन ततः परत्वाद्यणादेशो दुर्वार इति पूर्वग्रहणस्यावश्यकतया पूर्वग्रहणस्य स्पष्टार्थत्वकथनासङ्गतिरिति चेन्न । असंयोगादित्येतदुपादानसामर्थ्यात्संयोगपदस्य संयोगघटकाविषयकप्रतीत्यविषयपरतयातत्त्वस्य संयोगावयवसंयोगोभयसाधारणत्वात् । यथा स्यादिति । श्नुतत्वात्तस्यैव विशेषणं यथा स्यादित्यर्थः । ननु सूधात्ववयववोकारेऽतिप्रसङ्गवारणाय एरित्युपात्तमिति कुतो नोक्तमित्यत आह । लुलुवतुरित्यादाविति । नियमादिति । उवर्णान्तस्य चेत्सुप्येवेतिनियमादित्यर्थः । सुपि चेदुवर्णान्तस्यैवेतिनियमवारणायाह । विपरीतेति । नदीत्वम् । अवयवस्य धीशब्दस्येति शेषः । प्रवृत्त इति । एतेन प्रकृष्टन्यायतीत्यर्थे नित्यस्त्रीत्वाभावात्प्रथ्य इत्यनुपपन्नमिति निरस्तम् । दुर्ध्यायतीति । अत्र दुरित्यस्य गतित्वम् । द्वितीये

दुरित्यस्य सत्त्वभूतार्थविशेषणत्वशङ्काव्युदासायाह । धीर्ध्यानमिति । एतेन दुरिति धात्वर्थस्यैव विशेषणमिति सूचितम् । तद्वाचकमिति । तच्छब्दस्य तद्वाचके लक्षणा । एतन्न्यादेवाह । यस्य धातोरिति । एवञ्च यत्क्रियेत्यत्र षष्ठीतत्पुरुषः । ननु भीचेति सूत्रं षष्ठीबाधनार्थमेवास्त्वित्यत आह । भीचार्थेति । अन्योक्तिं खण्डयति । विभक्तिप्रकरण इति । भीचार्थानामिति सूत्रस्य बुद्धिक्रतापायमाश्रित्य पूत्याख्याद्भाष्यकारमतेन हृश्चिकभिय इत्यत्र समाधानमभिधाय सूत्ररीत्या समाधानमाह । किञ्चेति । इत्यपि बोध्यमिति । एवञ्च प्रक्रते एवमेव विवक्षितमिति भावः । सुध्युपास्य इत्यत्रापि यणनिषेधमाशङ्क्याह । अनन्तरस्येतीति । प्रकारान्तरमप्याह । सुपीति वेति । अनित्यत्वादिति । एतेन नाजानन्तर्यपरिभाषाविषयेऽनित्यत्वमेव स्वीकार्यं सा परिभाषा च न कर्त्तव्या । परिभाषासत्त्वे यत्र तयाऽन्तरङ्गेऽजानन्तर्यसत्त्वेऽसिद्धत्वनिषेधस्तत्रापि नित्यत्वाद्धिरङ्गपरिभाषाया अप्रवृत्तिरिति भावः । गौणमुख्यन्यायवदिति । अत्र वतिप्रत्ययप्रयोगो गौणमुख्यन्यायादेतस्य भिन्नत्वमितिवादिमतेन । वस्तुतस्तु गौणमुख्यन्यायेनैव तदपि गतार्थम् । व्याख्यानादिति । यद्यपि निमित्तादिभेदेनातिदेशस्य षड्विधत्वमस्त्यसिद्धन्तथापि प्रक्रते रूपातिदेशस्यैव सर्वकार्यसाधकता निमित्तातिदेशे व्यपदेशातिदेशे वा लजन्तत्वप्रयुक्तकार्यलाभेऽपि ऋदन्तत्वप्रयुक्तकार्यन्न स्यात् । अर्थातिदेशस्य तु सम्भव एव नोभयोरप्यकार्यत्वात् । तादात्म्यातिदेशस्तूभयोः सहप्रयोग एव यथा परशुना हृश्चित्यत्र सहप्रयोगे सुबामन्वित इति वर्त्तते न तथा प्रक्रते सम्भवत्येकार्थत्वादेव सहप्रयोगस्यासम्भवात् । शास्त्रातिदेशे कार्यातिदेशे वा तुन्नन्तस्य रेफात्मकयणादेशलाभेऽपि तस्योदात्तस्थानिकत्वाभावादुदात्तयणो हल्पूर्वादिति स्वरो न स्यादिति परिशेषाद्रूपातिदेश एवोचित इत्येवंरूपादित्यर्थः । प्राधान्यादिति । प्राधान्यञ्चात्र सर्वेष्टसाधकत्वरूपम् । यस्य कस्यचिद्रूपस्य नातिदेश इत्याह । पक्षादेरिति । प्रयोगनियमार्थमिति । असम्बुद्धौ सर्वनामस्थाने स्त्रियाञ्च लजन्तस्यैव प्रयोग इत्येवंरूपप्रयोगनियम इत्यर्थः । व्युत्पत्तिपक्षे इति । उणादीनाम्व्युत्पन्नानां संज्ञाशब्दानाञ्चेदेतेषामेव । एतेन यत्फलिषन्तदाह । अन्येषामिति । तेषामिति । नेष्टादीनामित्य-

र्थः। वार्त्तिकेनेति। ऋत्विक्षु चानुपसर्गस्यानिट्त्वञ्चेत्यनेन। प्रशास्तृशब्दस्तु तृजन्त एवोणादिव्युत्पन्नः। अप्रामाणिकमिति। एवञ्च नायन्नियमव्यावर्त्त्य इति भावः। ननूदात्तशब्दस्य रूढत्वमस्ति उणादिभिन्नकृद्व्युत्पन्नानान्तु यौगिकत्वमनुभवसिद्धमिति कथमेतदित्यत आह। पङ्कजादिवदिति। प्राचीनसम्मतरीत्या व्याख्याय भाष्यरीत्याह। खुल्तृचाविति। तृ इत्येवेति। अप्तृन्नित्यादि सूत्रेपि तृ इत्येव वक्तव्यमिति भावः। इत्युक्तमिति। एवञ्चायन्नियमो योनिसम्बन्धवाचिविषयक इत्युद्गात्रशब्दे दीर्घः स्वत एव सुलभ इति भाष्यप्रयोगाद्दीर्घ इति कथनन्निष्फलमेव। भाष्यान्तरमप्याह। नेष्टृ त्वष्टृ इति। भाष्यवार्त्तिकयोरिति। तृन्विधौ ऋत्विक्षु चानुपसर्गस्य। ऋत्विक्षु चानुपसर्गस्येति वक्तव्यम् होता पोता। अनुपसर्गस्येति किमर्थम्। प्रशास्ता। प्रतिहर्त्ता। एतस्य प्रत्युदाहरणपरतया प्रदर्शनेन तृंस्तृचौ शास्तिच्छादिभ्यः संज्ञायां चानिटावित्यनेन तृजिति कल्प्यम्। नयतेः षुक् च। चात्तृन्। नेष्टा। त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च चात्तृन्निति हि तत्राभिहितम्। नियमफलञ्चिन्त्यमिति। मूले यन्नियमव्यावर्त्त्यत्वेनोक्तन्तेन पितृमातृप्रभृतीनान्नेति तदन्यथा सिद्धम्। तेषान्नित्यनुबन्धकतृप्रत्ययान्ततया तृजन्तत्वाभावेन दीर्घाप्राप्तेरिति भावः। प्रथमोपस्थितत्वात्। अष्टाध्याय्यामप्रथमोपस्थितत्वात्। तन्नेखः। अप्तृन्नित्यस्योल्लेखः। विशेषविहितत्वात्। तृन्तृचोः साक्षादपादानेन प्रतिपदोक्तत्वात्। स एव। अप्तृन्नित्येव। तृतीयादावचेवोभयमिति। एवञ्च सामानाधिकरण्यसम्बन्धेन तृतीयादित्वविशिष्टं यदजादित्वन्तदवच्छिन्नस्योभयोः प्रयोगे निमित्तता। तयोर्मध्ये तुन्नन्तस्य प्रयोगः प्राप्त एव। तृजन्तस्य प्रयोगः शास्त्रबोध्य इति तत्रैव विशिष्टधर्मावच्छिन्नस्य प्रयोजकत्वम्। यत्र तु तादृग्धर्मावच्छिन्नाभावस्तत्र तृजन्तप्रयोगाभावः। शसि तृतीयादित्वाभावात् भ्यामादावजादित्वाभावात् क्रोष्टुपुत्र इत्यत्र तु विशेष्याभावादेव विशिष्टाभावः सुलभः। प्रयोगनियमार्थमिति। तृज्वदेव सर्वनामस्थाने स्त्रियाञ्च न तु तुन्नन्त इत्येवंविधौ ह्यत्र नियमः। फलतीति। विधेयत्वेन प्रधानीभूतस्य तृज्वद्भावसङ्कोचकल्पनापेक्षया निमित्तत्वेनाभिमतस्य सर्वनामस्थानस्य तुन्नन्तनिरूपितपरत्वं यथा न

भवति तथा कल्पनमुचितमिति भावः । एतेन । सर्वनामस्थाने स्त्रियाञ्च क्रोष्टृ शब्द एवेतिनियमेन । अपास्तमिति । उक्तनियमे तृतीयादावच्युभयोः प्रयोगस्य सिद्धत्वादेतदपि नियमार्थमेवेति नियमस्य वर्णितत्वादिति भावः । एवमपि । विभाषेत्यस्यानियामकत्वेन अन्यत्र तृजन्तस्यैवेतिनियमफलकल्पनेन क्रोष्टूनित्यसंगतमिति भावः । योगविभागेति । तृतीयादावच्येवोभयमन्यत्र तृजन्तस्येवेवङ्कल्पनायां सर्वनामस्थाने तृजन्तप्रयोगसिद्धा तृज्वत् क्रोष्टुः स्त्रियामित्येव वदेत् । एवञ्चान्यत्र तुन्नन्तमेवेति सिद्धम् । तत्र शङ्कते । न चेति । मृगवाचीति । मृगशब्दोऽत्र पशुजातीयपरः । एतेन अत्रैवादाविदंसूत्रत्रयन्तु मृगालवाचि क्रोष्टुक्रोष्टृशब्दयोर्व्यवस्थार्थमित्युक्तमिह तु मृगवाचीत्युक्तमिति पूर्वापरविरोध इत्यपास्तम् । तथाचोक्तं विश्वकोशे । मृगः पशौ कुरङ्गेपि करिनक्षत्रभेदयोः । याज्ञायाम्मृगयायाञ्च स्त्री तु वनितान्तर इति । तेन । भाष्यमानस्यापि क्व चिल्लसवर्णग्राहकत्वज्ञापनेन । कौस्तुभोक्तिञ्च खण्डयति । यत्त्विति । तपरत्वेन प्रयोगे श्रूयमाणैकमात्रिक एवादेशः स्यादित्यर्थकल्पनेनेति भावः । राविव संयोगान्तस्य सस्य लोप इत्याकारकत्रियमन्निरस्यति । विपरीतेति । क्रियाविशेषणत्वादिति । लुनात्यर्थफलांशविशेषणत्वादित्यर्थः । द्वारादिषु स्वशब्दपाठेन तदादिग्रहणस्य चोदितत्वात् । श्वादेरिञीति ज्ञापकेन वा तदादेरेवैजागमस्येष्टत्वात्स्वार्थिक इत्यनुपपन्नमत आह । द्वारादिष्विति । अग्रहण इति । इतिपक्ष इति शेषः । नन्वनुकार्यानुकरणयोरभेद इति पक्षेऽर्थवत्त्वाभावात्कथं विभक्तिरत आह । अनुकार्यञ्चेति । नन्वनुकरणे किञ्चिद्विकारे कथमर्थोपस्थितिरत आह । ईषदिति । वाचकेति । अनुकरणेत्यर्थः । अर्थः । अनुकार्यम् । तत्र दृष्टान्तमाह । क्षिर इति । ननु सूत्र एव विभक्त्यभावस्यैवंरीत्या कल्पने गवित्यत्रमाङ्गेत्यत्र पदान्तत्वाल्लोपः स्यादत आह । गवित्यत्रमाङ्गेतोति । आहुरिति । सिद्धान्तानुसारिणः । अत एव । ऋत इति तपरत्वादेव । अत एव । उत्वाप्रवृत्तेरेव । ईषत्स्पृष्टो दुर्वार इति । न च प्रथमयोरितिसूत्रस्य पूर्वसवर्णादेशविधायकत्वमयन्तु प्रयत्नभेदान्न सवर्ण इति कथमियामशङ्केति वाच्यम् । तत्रत्यसवर्णपदस्य सजातीयपरत्वेनास्याच्व-

विशिष्टदन्त्यत्वेन सजातीयत्वाप्राप्तिरित्यर्थात् । तच्चत्यं सवर्णपदं सवर्णसंज्ञकपरमेवेति न तस्य प्राप्तिरितिदूषणस्य स्फुटत्वात्तदुपेक्ष्य दूषणान्तर उक्तोत्तरत्वादिति । ऋलृक्ऋकारद्वयैकादेशे प्रथमस्य ऋकारलृकारस्थानिकैकादेशे द्वितीयस्य साधुत्वमिति प्रतिपादितत्वादित्यर्थः । के चित्तु णस्सूत्रस्थ भाष्यप्रामाण्येन लृकारस्य णादेशो दुर्लभ इति गल्भेत्यसंगतमिति यत्तद्दूषयितुन्तन्मतमाह । यत्विति । भाष्येति । इत्थं हि तच्च भाष्यम् । उरण्रपरः । अण्प्रत्याहारः पूर्वेण णकारेण परेण वा । अनन्दिग्धं पूर्वेण न परेण । कुत एतत् । पराभावात् । नह्यृ;स्थाने परेऽणः सन्ति । ननु चायमस्ति । कर्तृर्थम् । ऋर्थमिति । यदि परेण स्यात्तर्हि यणोपि रपरत्वापत्तौ रेफद्वयश्रवणप्रसङ्गः । रो रीतिलोपेन सिद्धम् । एवन्तर्हिसामर्थ्यात्पूर्वेण न परेण यदि परेण स्यादणग्रहणमनर्थकं स्यादुरजित्येव ब्रूयादिति । तच्च । गल्भा इत्यादौ । ऋकारस्यापि रपरत्वे यद्यपि लोपेन सिद्धिस्तथाप्यत्र लपरत्वे लद्वयं श्रूयेतेति सामर्थ्यवर्णन मयुक्तमिति भावः । फलाभावेनाप्रवृत्त्या । उरण्रपरेत्यस्याप्रवृत्त्या । आग्रयादिति भाष्यकारस्येत्यादिः । आग्रय इत्यनेन सूचितामरुचिं सूचयन्नाह । वस्तुत इति ईदृशानाम् । लृकारस्थानिकलादेशघटितानामनार्षप्रयोगाणाम् । चिन्त्यमिति यत्तु सूत्रकारमते ऋकार लृकारयोस्सावर्ण्यं भावेन ऋकारस्य लकारेऽप्यृ;स्थानेऽणोभावान्न लपरत्वप्राप्तिरिति णकारोच्चारणं पूर्वणकारेण प्रत्याहारे ज्ञापकमिति भाष्योक्तं युक्तमेव । वार्त्तिककारमते ऋकारलृकारयोः सवर्णसंज्ञा सत्त्वादृ;स्थाने जातस्य लकारस्य लपरत्वार्थम्परेण णकारेण प्रत्याहारो भविष्यतीत्यपि न । नाज्झलाविति सूत्रे परश्चतानीत्यत्र दोषवारणायाज्झलोः प्रतिषेधे झकारप्रतिषेधोऽज्झल्त्वादि ति वार्त्तिकारम्भेण तन्मते लोपस्य झरो झरीति हलोयमामिति सूत्रविहितस्य वानित्यतया गल्भेत्यत्र लकारस्य लपरत्वेऽपि लोपेन विशेषाभावादिति ।तन्न । भाष्यकारैर्लोपस्य झरोऽचीतिज्ञापकेन वैकल्पिकत्वस्य वर्णनात्तन्मते प्रकृते परेणणकारेणाण्ग्रहणे लद्वयं श्रूयेताज्ग्रहणे;तु नेतिवैषम्यस्य दुरपह्नवतयाणग्रहणस्य ज्ञापकत्ववर्णनासङ्गतिरिति यथोत्तरम्मुनीनाम्प्रामाण्यादीदृशानामनभिधानस्यावश्यकत्वादिति दिक् । नन्वेवमन्तरङ्गत्वादादृगुणे ततः सादेशेऽन्तरूपापत्तिरत आ-

ह । सादेशात्पूर्वमिति । भाष्येण विरोधादिति । तत्सूत्रभाष्ये कस्यायमप्रतिषेध इति शंकायां सर्वप्रतिषेध इतिसमाधाने कृते यद्येवमन्वग्निरुषसामग्रमख्यत् । प्रत्यग्निरुषसामग्रमख्यदित्यत्र यणादेशस्य प्रतिषेधः प्राप्नोतीत्युक्त्वाएङ्प्रकरणासिद्धम् । एङः अतीति वर्त्तते । यद्येवमध्यपठितेऽतोरोरप्लुतादप्लुत इत्यत्राप्येङ्ग्रहणसम्बन्धः स्यात्तथा चाग्नेरत्र वायोरत्रेत्यत्रैङः परस्योक्त्वमाप्नोतीत्याशङ्क्य पदान्ताभिसम्बद्धमेङ्ग्रहणमनुवर्त्तते न चैङः पदान्तान्यरोतरस्तीति तत्रोक्तन्तेन विरोधादित्यर्थः । योगविभागसिद्धस्य । उत्तर पदत्वे चापदादिविधाविति वार्त्तिकप्रत्याख्यानसमय स्वादिष्वितिसूत्रे स्वादिषु पूर्वस्य पदत्व योगविभागेन साधितन्तस्य । ननूत्तरपदस्योक्तरीत्या निषेधेपि पूर्वपदस्य पदत्वात्पूर्वान्तवद्भावेन सेद्वत्यस्य पदत्वं स्यादिति पूर्वरूपन्दुर्वारमित्यत आह । आतिदेशिकस्यापीति । यदि तु प्रत्याख्यानप्रकारस्य गुरुतया लाघवार्थमुत्तरपदत्वे चापदादिविधाविति वचनमारभ्यते तदाप्याह । उत्तरपदत्व इति । तद्घटितेति । उत्तरपदघटितेत्यर्थः । उत्तरपदघटितत्वञ्चोत्तरपदाविषयकप्रतीत्यविषयत्वन्तच्च स इत्यत्र समुदायावयवसाधारणमिति भावः णित्कार्यस्यासंभवादिति । प्राधान्यात्कार्यातिदेश इति भावः । ननु ग्रसस्तङितस्यापि सम्भवादेतत्साहचर्यात्सुवेवेत्यनुपपन्नमत आह । अचीत्यधिकारादिति । यदुक्तमपवादत्वादात्वे न ह्रस्वबाध इति तत्रोपपत्तिमाह । सूत्रे तपरकरणेनेति । तङ्चिचगुश्च्वेऽतिप्रसङ्गवारणाय कृतम् । तपरसूत्रे चाण्ग्रहणानुवृत्त्या समुदायस्यानण्त्वात् परसूत्राप्रवृत्तेस्तपरत्वं व्यर्थमितितदकारस्याविवक्षायान्तात्पर्यग्राहकमिति भावः । मूलोक्तन्दूषयन्सिद्धान्तमाह । परे त्विति । नन्वेवं चित्रगुरित्यादौ दोष इत्यत आह । चित्रगुरित्यादाविति । अत्र स्थानिवद्भावेन णित्वस्य प्रतिषेधः । अत्रैव । गोतोणित्रिति सूत्र एव । नन्वेवङ्कारस्य विवक्षितत्वे द्योशब्दे दोष एवेत्यत आह । द्यौः सर्वनामेति । तत्र हि अम्प्रत्ययानम् । गां पश्य । किम्प्रत्ययः कारणन्न सिध्यति । ह्रस्ववलीयस्त्वात् । परत्वाद्ह्रस्वः प्राप्नोति । न वाऽनवकाशत्वात् । अनवकाशमात्वं ह्रस्वम्बाधिष्यते सावकाशम् । कोऽवकाशः । द्यां गच्छ । द्यौश्च सर्वनामस्थाने ह्रस्वविधेया । किम्प्रयोजनम् । य द्याव इन्द्र ते शतं शतं भूमीरुत स्युः यावता चेदानीं द्यौरपि सर्वनामस्थाने ह्रस्वं रुच्यते । अनवकाशमात्वं ह्रस्वम्बाधिष्यत इत्युक्तम् । यद्यपि स्थानिवत्सूत्रभाष्ये

णेः पूर्वणित्त्वात्स्वरेषु स्थानिवद्भावप्रतिषेध इतिवचनस्थणित्त्वग्रहणस्तपरकरणाल्लिङ्गमित्यनेन प्रत्याख्यातम् । तदनुरोधेनैवौतोम्शसोरितिसूत्रे योश्च ङ्ङिर्वक्तव्य इतिवार्त्तिकव्याख्यानावसरे कैयटेन ओतो णिदिति सूत्रे पठितव्यम् । गोत इत्योकारान्तोपलक्षणार्थं वा व्याख्येयम् वर्णनिर्देशे हि तपरत्वमस्त्रिङ्गमिति व्याख्यातम् । तथापि गोतो णिदितिसूत्रभाष्ये तपरकरणं किमर्थमिह मा भूत् चित्रगुः शबलगुरिति । नैतदस्ति । ङ्णित्त्वे कृते न भविष्यति । स्थानिवद्भावात्प्राप्नोति । अत उत्तरम्पठति । तपरकरणमनर्थकम् स्थानिवत्त्वप्रतिषेधात् । प्रतिषिध्यतेऽपि स्थानिवद्भावः । गोः पूर्वणित्त्वात्स्वरेषु स्थानिवद्भावो न भवतीति । स चावश्यम्प्रतिषेध आश्रयितव्यः । इतरथा हि सम्बुद्विजसोः प्रतिषेधः । यो हि मन्यते तपरकरणसामर्थ्यादपि न भविष्यतीति सम्बुद्विजसोस्तेन प्रतिषेधो वक्तव्यः स्यात् । हे चित्रगो । हे चित्रगव इति । अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह । न हीदानीं क्व चिदपि स्थानिवत्स्यादित्युक्तम् । एतद्भाष्ये यत्तपरकरणप्रयोजनमुक्तञ्चित्रगुरिति तद्व्याख्यानावसरे तपरस्तत्कालस्येत्यत्राणिति नानुवर्त्तत इत्यनणोऽपि तत्कालस्य ग्रहणम् । इतरथा हीति, यदि स्थानिवत्त्वनिषेधो नाश्रीयते तदा सत्यपि तपरकरणे संबुद्धौ जसि गुणे कृते स्थानिवत्त्वात्तत्कालत्वाच्च णित्त्वं स्यात् । प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते गोरूपस्य लाक्षणिकत्वाणित्वाप्रसङ्ग इत्युक्तं कैयटेन । एतेन स्थानिवत्त्वप्रतिषेध एव भाष्यकारस्य निर्भर इति कैयटस्यापि सङ्गतम् । ओकारोपलक्षणत्वेन व्याख्यानस्त्वेकदेश्युक्तिसूचनायेति विभावनीयम् ॥ उदाहृत इति । आङ्त्वात्तदन्तेऽपि प्रवृत्तिः सिद्धान्तेऽपि । गोत इतितपरकरणादोकारमात्रं विवक्षितमितिमते हे भानो इत्यत्र प्रसक्तामतिव्याप्तिं वारयितुं यद्विहितविशेषणतया व्याख्यातन्तत्रापिपदोक्तपरिभाषयापि सिद्धमित्याह । यदि त्विति । अत्र यदीति न पाक्षिकत्वसूचनाय किन्तु शास्त्राणि चेत्यमाणानीतिवदसन्दिग्धे सन्दिग्धवचनम् विधेयस्यार्थस्य दार्ढ्यसूचकमेव ।

वर्णग्रहणेऽप्रवृत्तिसूचकं यदादेच उपदेशेऽशितीति सूत्रस्थमुपदेशे इतिपदम्तदनित्यत्व एव ज्ञापकमिति भावः। उरिति। ऋभुरित्यर्थः॥ केचित्तु, ऋतोऽशब्दस्वीकारे तृतीयैकवचनादावप्यस्य प्रयोगः स्यात्तथा च स्वरितो वेतिसूत्रस्थभाष्यविरोधः स्यादतोऽस्यानभिधानमेव युक्तमित्याहुस्तन्मतं खण्डयितुमाह। यत्त्विति। स्वरितो वेतिसूत्रस्थभाष्यविरोध इति। एवं हि तत्रत्यभाष्यम्। एकादेशस्वरोऽन्तरङ्गः। एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः। किम्प्रयोजनम्। अयवायावेकादेशश्चटस्वरैकाननुदात्तसर्वानुदात्तार्थम्। अयं भावः। उदात्तानुदात्तयोर्य आदेशस्तस्योभयान्तर्यात्स्वरितत्वे प्राप्ते एकादेशउदात्तेनोदात्तइत्यनेनोदात्तत्वं विधीयते। अयश्चोदात्त एचोऽयवाय्व इत्येतद्ध्याऽसिद्ध इत्यादेशे स्थानिस्वरेण स्वरितवृद्ध्यान्तरतम्यात्स्वरितः स्यादिति। अय्। ह्वच इदम्। म्लच्छ इदम्। अवादेशे नास्ति। आय्। कुमार्या इदम्। अत्र कुमारीशब्द उदात्तनिवृत्तिस्वरेणान्तोदात्तः। तत एकारस्यानुदात्तस्याऽऽगमे यणादेशे चोदात्तयणो हल्पूर्वादित्याट उदात्तत्वे आडेकारयोरुदात्तानुदात्तयोर्द्वित्वेकादेश उदात्तस्तस्यायादेशः। आय्। ह्वचावच। उदात्तानुदात्तयोरेकादेशस्तस्य एकादेश उदात्तेनोदात्त इत्येतद्भवति तस्य सिद्धत्वं वक्तव्यम् उदात्त आवादेशो यथा स्यात्। एकादेशस्वरः। गाङ्ङेऽनूप इति। अत्रगाङ्शब्दोऽणन्तत्वादन्तोदात्तस्ततस्सप्तम्येकवचनस्यानुदात्तस्य पूर्ववत्स्वरिते प्राप्ते एकादेश उदात्तेनेतिसूत्रेणोदात्तस्य जातस्य सिद्धत्वे सति पुनरनूपशब्दाकारेण सहैकादेशस्योदात्तभवति। असिद्धत्वे सति तु स्वरितानुदात्तयोरेकादेश आत्मरतम्यात्स्वरित एव स्यात्। शटस्वरः। तुदती। अत्र तास्यनुदात्तेदिति शताऽनुदात्तः। शप्रत्यय उदात्तस्तयोरेकादेशस्योक्तरीत्योदात्तस्य सिद्धत्वे सति शतुरनुम इत्यनेन नद्या उदात्तत्वम्। अत्र ह्यस्तोदात्तादिति वर्त्तते। एकाननुदात्तः। तुदन्ति। लिखन्ति। अत्र ह्येकाननुदात्तशब्देनानुदात्तम्पदमेकवर्जमित्येष स्वरोऽभिधीयते। अत्र विकरण उदात्तः। लसार्वधातुकानुदात्तत्वन्तत एकादेशस्वरस्यानेन विधीयमानस्यानुदात्तम्पदमित्येतद्ध्याऽसिद्धत्वे धातोरनुदात्तत्वन्न स्यात्। सर्वानुदात्तः। ब्राह्मणास्तुदन्ति। ब्राह्मणा लिखन्ति। अत्र विकरणैकादेशे कृते तिङ्ङतिङ इ-

ति निघाते कर्त्तव्ये एकादेश उदात्तेनेत्यस्यासिद्धत्वादान्तरतम्यात्प्राप्तस्वरितस्याधिक्यातिङ्ङतिङ इत्यनुदात्ते क्षते पश्चादेकादेश उदात्तेनेत्यस्य प्रवृत्तावुदात्तश्रवणप्रसङ्गः। चिपाद्यामितत्सूत्रपाठफलन्तु। प्रपचतीति। सोमसुत्यचतीति। आद्ये निपातत्वादाद्युदात्तेतिशब्दस्य य इकारस्तेन सह तिशब्दस्येकारस्यैकादेशे क्षते पूर्वान्तवद्भावेन ईकारस्य तिङन्तावयवत्वेन यद्येकादेश उदात्तेनेत्यस्यासिद्धत्वन्न स्यात्तदोदात्तवत्तिङन्तपरत्वाद् गतिनिघातप्रसङ्गः। द्वितीये तिङतिङ इतिनिघात इकारस्य न भवतीति सामान्यतोऽस्य शब्दस्यानभिधानमित्याहुस्तन्मतन्निरस्यति। तृतीयादिष्विति। यत्रावादेशप्रसङ्गस्तस्यानभिधानकल्पनेन भाष्यस्योपपन्नत्वादिति भावः। उपलक्षणतया। ओश्चेत्योकारान्तसामान्यस्योपलक्षणमित्येतत्परतया। वस्तुतस्सामान्यत एव पूर्वोक्तभाष्यद्वयसंवादादनभिधानमुचितमित्याशयेनाह। परे त्वीदृशानामितीति। इत्याहुरिति। भाष्यकारस्यैवेदमादिः।

॥ इत्यजन्ताः पुंलिङ्गाः ॥

रमेतीति। ग्रन्थमध्ये मङ्गलार्थमस्यादावुल्लेखः। ङ्याब्ग्रहणस्यान्यार्थत्ववर्णनादाह। एकादेशस्येति। वाचेत्यादाविति। इदम्मूलरीत्या। एतेन व्यापकतया लिङ्गविशिष्टपरिभाषया सर्वत्र निर्वाह इति सूचितम्। अभत्वात्। सर्वनामस्थानत्वेनाभत्वादित्यर्थः। ननु सन्निपातपरिभाषया लोपो न स्यादत आह। सन्निपातेति। तृतीयासमास इति समस्याः प्रथमार्थत्वेनावयवस्य सर्वनामतया स्याट् स्यादत आह। सर्वनाम्नो विहितस्येति। उद्देश्यत्वासम्भवादिति। उद्देश्यस्य षष्ठ्यन्तपदबोध्यत्वस्य दर्शनेन प्रकृते स्याटः षष्ठ्यन्तपदबोध्यत्वाभावादाहत्या तथा कल्पने गौरवादिति भावः। व्याख्यानादिति। आगमापेक्षया ङितषष्ठ्या अवयवावयविभावार्थकत्वङ्कल्पनीयमेवञ्च स्थानपदार्थनिरूपितसम्बन्धोर्थकत्वस्यादर्शनमूलकादिति भावः। आपश्चेतीति। वाक्यभेदस्यावश्यकतया पञ्चम्यन्तस्यापि षष्ठ्यन्तत्वं वाक्यान्तरे कल्प्यत इति भावः। न चैवमप्याबन्तत्वाभाव इति। यद्यपि सुड्विधावाबन्तत्वस्य न निवेशस्तथापि तद्विधौ यथा पूर्वान्तवद्भावेन सर्वनामत्वन्तथा तुल्यन्यायात्स्याडागमविधावपि वाच्यमेवञ्च पूर्वान्तवद्भावाश्रयणे आबन्तत्वाल्लाभ इति भावः। अत एव। एका-

देशनिष्पन्नस्याङ्गाभावादेव । सिद्धान्तिसम्मतत्वाभावादिति । एवञ्च पूर्वान्त्वङ्गावेन सर्वनामत्वन्तदवयवस्यैवाकारस्य श्रूयमाणस्य परादिवङ्गावेनाङ्गमिति समुदायस्यावन्तसर्वनामत्वमर्थसमाजग्रस्तमिति भावः । प्रकारान्तरेणाप्येतत्सिद्धिमाह । परे स्त्रियामिति । सुट् नेति । एतेन ह्रस्वनद्यापः इति सूत्रे परिशेषेण षष्ठीबहुवचनस्यैव ग्रहणमित्यस्य सिद्धिः । तत्त्वम् । प्रतिपदोक्तत्वम् । उत्तरापदस्य गुणवाचकत्वादिति । उत्तरात्वप्रकारकज्ञानविशेष्यस्य लक्षणया तद्बोध्यत्वेन गुणस्योत्तरात्वप्रकारकज्ञानविशेष्यत्वरूपस्य बोध्यतावच्छेदकतया तदवच्छिन्नबोधकत्वादित्यर्थः । न च वाक्यादुद्देश्यविधेयभावस्य प्रतीतादपि समासान्तस्याबोधेन कथमस्य विग्रहस्य समाससमानार्थकत्वमिति वाच्यम् । समासादपि तादृशबोधस्य लोहितोष्णीषा इत्यादौ दर्शनात् । नन्वपुरीति वक्तव्यमित्यस्यान्तरायाम्पुरीति पूःशब्दसामानाधिकरण्य एव निषेधबोधकत्वमिति प्रतीयते एवञ्चान्तरायै नगर्यै इत्यत्र कथन्निषेध इत्यत आह । पूःशब्दार्थस्येति । सामान्यतोऽपि वार्त्तिकमिति । तत्र हि उलकवतीनाम्प्रतिषेधः । उलकवतीनाम्प्रतिषेधो वक्तव्य इत्युक्तम् । अम्बाले । अम्बिके । अत्र वार्तिके अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः । इदञ्च वार्त्तिकमम्बार्थं ह्रस्वरं यदीत्यनेन प्रत्याख्यातम् अत्वरपदमत्वरम् प्रत्याख्यानपक्षे हे अक्क हे अक्केत्यत्र ह्रस्वत्वसत्त्वाङ्गत्वमविष्यति । उलकवतीनामित्यस्यारम्भे तु नेति फलभेदपरिहाराय उलकवतीनामित्यस्यासंयुक्तडकारादिमङ्गिन्नविषयकत्वमिति भावः । अम्बार्थं ह्रस्वरमित्यत्र यद्ह्रस्वरमिति तच्छ्रुतत्वादम्बार्थस्यैव विशेषणन्न त्वङ्गस्येत्याह । ह्रस्वराम्बार्थकेति । मूलोक्तयद्यपीतिशङ्कायास्तात्पर्यमाह । एवञ्चेति । जरसादेशे कृते स्थानिवद्भावेनाम्बादेत्वादीनामाप्तौ चेत्यर्थः । नित्यत्वादिति । उक्तरीत्या एत्वादीनाङ्कृताकृतप्रसङ्गित्वादित्यर्थः । क्वचिदजादित्वाभावादिति । नुडाटोः । क्वचित्सन्निपातेति । एत्वस्य सन्निपातलक्षणत्वे सन्निपातविघातकस्य जरसोऽनापत्तिरेवञ्चैतदर्थन्न प्रश्लेष इति भावः । एवम्मूलोक्तरीत्या जरसादेशविषये स्थलत्रयेपि न प्रश्लेषफलमित्यभिप्रायेण शङ्कते । यद्यपीति । एवमेत्वेपीति । परत्वात्कृते सकृन्नतिन्यायान्न जरसादेशस्य प्राङ्ग इति शेषः । अत्र यदुक्तमिति । भिस्भ्यादेशस्यैव जरसादे-

शात्पूर्वम्प्रवृत्तिरित्यादि । स्थानिवद्भावेनाङ्गमिति यस्मूलक्षतोक्तं तच्च गङ्गते । न चेति । अयमाशयः अतिखट्वायेत्यत्र दीर्घस्य स्थानिभूते ह्रस्वाकारे चेदात्वन्तदा तदादेशे दीर्घे तद्बुद्धिः स्थानिवद्भावेन स्यात् । न च ह्रस्वेपि स्थानिवद्भावेनैव तद्बुद्धिः कार्येति वाच्यम् । ह्याब्ग्रहणेऽदीर्घ इतिवार्त्तिकेन निषेधात् । अदीर्घो दीर्घभिन्न आदेशो न स्थानिवदिति तदर्थः । अत्र ह्याब्ग्रहणे ह्रस्वादेशो न स्थानिवदित्येव तु नोक्तम् । अविष्ठासु जातः अविष्ठ इत्यत्र जातार्थप्रत्ययस्य अविष्ठाफल्गुनीति सूत्रेण लुकि लुप्तद्वितलुकीतिटापो लुकि स्थानिवद्भावेन अविष्ठ इत्यस्याबन्तत्वापत्तौ हल्ङ्यादिलोपापत्तेः । अदीर्घ इत्यत्र दीर्घपदेन सवर्णदीर्घस्यैव ग्रहणमाआबित्यारभ्यैषेण वार्त्तिकप्रत्याख्यानपरभाष्यप्रामाण्यात् । तेन गङ्गीयतेः क्विप् गङ्गीः । अत्र वार्त्तिकारम्भापत्तेपि सवर्णदीर्घभिन्नस्येकारस्य स्थानिवद्भावेनाप्त्वात्तदादेशात्परत्वाद्धल्ङ्यादिलोपो न । भाष्यनय इति । एतन्मते स्थानिवद्भावेन ह्रस्वे आङ्गमस्त्येव । तद्बुद्धिश्च पुनर्दीर्घे स्थानिवत्त्वेन स्यादिति भावः । अत्र यच्च इति । अतिट्वस्य अः अतिखट्वाः । अत्र वार्त्तिकमते न हल्ङ्यादिलोपप्राप्तिः । सूत्रकारभाष्यकारमते तु प्राप्तिरिति फलभेदः । आदिना गङ्गीरित्यस्य परिग्रहः । अत्र सूत्ररीत्या प्राप्तिः वार्त्तिकभाष्यकारमते तु नेति फलभेदः प्राप्नोतीत्यर्थः । वक्ष्यमाणरीत्या । परे त्वितिमते वक्ष्यमाणया स्थानिवद्भावस्य दीर्घात्पूर्वम्फलाभावादप्रवृत्तिरित्येवमाकारादियुक्तिस्तद्रीत्या । अङ्गस्य विशेषणत्वादिति । विशेषणविशेष्यभावस्य सिद्धान्तविशेषणविशेष्ययोर्यथेष्टत्वादिति ग्रन्थेन फलानुसारित्वस्योक्तत्वादिति भावः । एतेन । आबन्ताङ्गाभावेन । अस्य । तदादिविधेः । मूलन्दूषयति । परे त्विति । अतिखट्वायेत्योकारस्य । औदित्यादाविति । अदोऽभवदित्यादौ दोषवारणायैषा तत्र सञ्चारिता । न चेहेति । खट्वा इत्यत्र । औचित्यादिति । यत्र विशेषणविशेष्यभावानुग्राहकं वचनमस्ति तत्र तदनुसारी विशेषणविशेष्यभाव एवोचितः । अत एव । लाक्षणिकत्वे नैव निर्वाहादेव । स्पष्टमेव । आबन्ताङ्गाभावेन दोषस्यैवाप्राप्तेः । आबन्तं यदङ्गमित्यर्थलक्ष्यसिद्धिमप्याह । किञ्च खट्वाया अर्द्ध इति । इदमेकदेशिसमासारब्धवादिमतेन । एतत्प्रत्याख्यातभाष्यकारमते त्वेकदेशिसमासविषये कर्मधारयस्यैव स्त्रीकारादत्र स्त्रीप्रत्ययस्या-

नुपसर्जनत्वादेव दोषाभावः । मूले कृतान्द्वितीयशङ्कामयुक्तत्वेन निराचष्टे ॥ किञ्चेति । लाक्षणिकत्वेन समाधाने भाष्यान्तरसंवादमाह । याडाप इतिसूत्रभाष्येऽपीति । भाष्याभ्यामिति । प्रथमे सूत्रद्वयोदाहरणविषये शङ्कासमाधानकरणादन्त्ये त्वतिखट्वायेत्यत्रैव शङ्कासमाधानकरणात् । सुधीभिर्विचार्यमिति । अनभिधानकल्पने भाष्यान्तरानुग्रहचिन्तनमुपलक्षणत्वे तु सर्वत्रैकोक्त्यैव निर्वाह इत्युपलक्षणत्वं युक्तमिति के चित् । अत्रेति । व्रश्चेति सूत्रे इत्यर्थः । आहुरिति । भाष्यानुग्रहाभावोऽत्रारुचिः । यत्तु पदस्य विशेषणत्वेन तदन्तलाभ इति तन्न युक्तमित्याशयेनाह । पदस्येतीति । क्रुग्रहणप्रयोजनमाह । च्छ्वोः शूडित्यत्रेति । अत्रापि । व्रश्चेतिसूत्रेऽपि । तत्र । झलामिति सूत्रे । तदप्राप्तौ । जश्त्वाप्राप्तौ । सूत्रनिर्देशमात्रेण शास्त्राप्राप्तिकल्पनायाम् प्रतिवन्दीमाह । उपदेश इति । अत्र मते । केचिन्मते । कारणतावच्छेदकावच्छिन्नाभावस्यैव कार्याभावप्रयोजकता दृष्टेति स्त्रीत्वादित्ययुक्तमत आह । पुंस्त्वाभावेति । अत एव । पर्युदासप्रतियोगिसूचनाभिप्रायादेव । अत एव । आद्यवाक्ये स्त्र्याख्यपदस्य नित्यस्त्रीलिङ्गावित्यर्थकत्वादेव । कटप्रुव इति । अस्य लिङ्गान्तरविशिष्टार्थाभिधायकत्वं स्पष्टमेव । सिद्धान्तमाह । परे त्विति । अत्र कटप्रुवे ब्राह्मणेइत्यत्र । अत्र ङिति ह्रस्वश्चेति सूत्रे ॥ एकदेशे स्वरितत्वाकल्पनलाववानुरोधेनाह । यद्वेति । अत्र । ङिति ह्रस्वश्चेतिसूत्रे । एवञ्च वाक्यद्वयेऽपि स्त्र्याख्यपदं स्त्रीवाचकावित्येतन्माचार्थकमेव । एवञ्च ङित्परं यदङ्गं स्त्रीबोधकन्तदा नदीसंज्ञकमित्यर्थः पर्यवसन्नः । अत एव । एवंविधवाक्यार्थनिष्पत्तेरेव । अत्रप्रत्यवाख्यायकेति । अस्य इति वार्त्तिक इत्यत्रान्वयः । प्रवृत्तौ । अर्थान्तरोपसंक्रान्तौ । अतिस्त्रियै । स्त्रियमतिक्रान्तायै । अतिशकट्यै । शकटीमतिक्रान्तायै । स्त्रियै । स्त्रीरिवाचरते । एषु नित्यस्त्रीत्वाभावाद्यू स्त्र्याविति सूत्रस्याप्राप्तौ प्रथमलिङ्गग्रहणञ्चेत्यस्य या प्राप्तिः साऽनेन वार्त्तिकेन निराक्रियते । ङिति ह्रस्वश्चेत्यनेन तु विकल्पो भवति । दीर्घघटितवाक्ये चेन्नित्यं स्त्रियां वर्त्तमानावित्यर्थकस्त्र्याख्यपदसंबन्धः स्यात्तदा प्रकृत सूत्रस्याप्यप्रवृत्तौ रूपासिद्धिः स्फुटैव । निषेधविकल्पत्वमसम्भवीति । निषेधस्य प्राप्तिपूर्वकत्वात्प्रकृते च प्राप्तेरेवाभा-

वादिति भावः । एतच्च । अप्राप्तविभाषात्वच्च । अत एव । निषेधविकल्पत्वासम्भवादेव । नन्वेवमुपक्रमे निषेधविकल्पपरतया कृतं व्याख्यानं विरुध्येतेत्यत आह । उपक्रम इति । ह्रस्वयोर्ग्रहणमितिपक्षोपपादन इति । तत्र हि किम्पुनरिदन्दीर्घयोर्ग्रहणमाहो स्विद्ध्रस्वयोः किञ्चातः । यदि दीर्घयोर्यू इति निर्देशो नोपपद्यते । अथ ह्रस्वयोः । हे शकटे अत्रापि प्रसज्येत । नैष दोषः । अवश्यमत्र विभाषा नदीसंज्ञैषितव्या । दीर्घग्रहणपक्षे ह्रस्वान्तस्याप्राप्ता विधेया ह्रस्वग्रहणपक्षे नित्यप्राप्ता पक्षे बाध्या वचनेनेत्याशयेनोक्तमवश्यमिति । उभयं हीष्यते हे शकटि हे शकटे इति च । इह तर्हि शकटिबन्धुरिति नदीबन्धुनीत्येष स्वरः प्राप्नोति । अत्र पूर्वपदान्तोदात्तत्वं स्यात् । सिद्धान्ते तु शकटिशकट्योरिति फिट्सूत्रेण त्रयाणाम्पर्यायेणोदात्तत्वात्पूर्वपदप्रकृतिस्वरेण त्रयोप्यत उदात्ता भवन्ति । इह च बहुशकटिरिति नष्टतश्चेति कण् प्रसज्येत्याशङ्क्य यू स्त्र्याख्यौ नदी । नेयङुवङ् स्थानावस्त्री । वाऽमि । ततो ङिति । ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसंज्ञौ न भवतः । ततो ह्रस्वौ । ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः । इयङुवङ्स्थानौ वा नेति निवृत्तमित्युक्तम् । इदञ्च नियमार्थम् । ङित्येव ह्रस्वौ यू नदीसंज्ञावित्येवं नियम इत्यभिप्रायः । एतेन तस्य पक्षस्योपपादनम्भवति, न च यूस्त्र्याख्याविति सूत्रस्थैवं सति ङिद्विन्न प्रवृत्तिर्न स्यादिति वाच्यम् । तत्राणुदित्सूत्रसहायेन दीर्घग्रहणसम्भवेन यूग्रहणचारितार्थ्यसम्भवात् । यद्यप्यूकालोऽजितिसूत्रे उक्तमशब्दसंज्ञेत्यनुवर्त्तनाच्छब्दस्य संज्ञायां सवर्णग्रहणन्नेति ततश्चात्र दीर्घग्रहणासम्भवः प्राप्नोति । तथापि नेयङुवङ्स्थानाविति ज्ञापकादस्त्रीतिपर्युदासाच्च सवर्णग्रहणसम्भवः । न चास्मिन्पक्षे नित्यनदीसंज्ञया घिसंज्ञाबाधनाच्छकट्ये इत्यत्र गुणो न स्यादिति वाच्यम् । द्वितीययोगविभागात्तथाहि शेषो घ्यसखीतिसूत्रे शेषग्रहणन्न करिष्यते । घि इति योगो विभज्यते । स्त्र्याख्यौ यू ह्रस्वौ ङितीत्यनुवर्त्तते घिसंज्ञौ भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति । ततोऽसखि । सखिवर्जितौ च यू ह्रस्वौ घिसंज्ञौ भवतः । स्त्र्याख्यौ ङितीति च निवृत्तम् । तेनात्र दोषाभावः ॥ अथ वा नदीसंज्ञायाः परत्वाद्घिसंज्ञा पुन्नपुंसकयोश्चरितार्था बाधिका भविष्यति । परन्तु

योगविभागनियमकल्पनायाङ्गौरवमिति यू स्त्र्याख्यावित्यत्र दीर्घयोर्ग्रहणमिति शिष्टैर्व्याख्यातम्। भाष्यात्तदलाभादिति। भाष्ये हि प्रवृत्तौ च प्राक् चप्रवृत्तेः स्त्रीवचनावेवेत्थं तावदुक्तेर्नित्यस्त्रीलिङ्गावित्यनुक्तेश्च तदलाभः। ननु नेयङुवङ्स्थानाविति सूत्रेऽप्येवमेव संबन्धः स्यादिति तल्लाभ इत्यत आह। नेयङुवङौति। अत्रार्थे भाष्यसम्मतिमाह। यस्माङ्ङस्येति। एतादृशव्याख्यानफलमाह। अत एवेति। तादृशव्याख्यानादेव। सिद्धान्ते शङ्कते। नन्विति। ननु लुङन्तस्य चिलिङ्गत्वे पुंस्त्वप्रयुक्तनत्वञ्चा ब्राह्मणान्पश्येत्यत्रापि स्यादत आह। चञ्चा ब्राह्मणानिति। स्त्रलिङ्गप्रयुक्तकार्याभावस्येति। अतिदिश्यमानधर्मविरुद्धस्त्र्याश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्तादृशकार्याभावस्याप्यतिदेशस्वीकारः। तादृशातिदेशस्वभावेनैव सिद्धौ स्त्रलिङ्गप्रयुक्तकार्याभावातिदेशे गौरवादाह। यद्वेति। कार्याप्रवृत्तिरिति। अस्य स्वभावसिद्धैवेति शेषः। युक्तवद्भावादिति। आदिना लुब्योगसङ्ग्रहः। पुंस्त्वे वाच्य इति। सूत्रे पुंसीति धर्मपरमिति भावः। सूत्रे णैवेति। यू स्त्र्याख्याविति सूत्रे णैवेत्यर्थः। एवञ्च प्रथमलिङ्गग्रहणादितिभाष्यमसङ्गतं स्यादिति भावः। स्त्रीत्वविशिष्टमेव य इति। पूर्वोक्तभाष्यदर्शनादयमर्थः कल्प्यते। स्त्रीत्वविशिष्टमेवेति नियमासम्भवमाशङ्कते। यद्यपीति। तल्लत्वे। लिङ्गान्तरसत्त्वे। तल्लत्तेति। पुंस्त्वसत्तेत्यर्थः। एवञ्च खरकुर्यै ब्राह्मणायेत्यत्र न सूत्रेण सिद्धिरिति भावः। एवम्। खरकुर्यै इतिवत्। अत्र सूत्र इति। वाक्यद्वयेऽपीति शेषः। कैयटमतेऽयमपि दोष इत्यर्थः। तदनापत्तिः। विकल्पाभावापत्तिः। व्योर्ङस्वाविति। वाचकत्वमत्र षष्ठ्यर्थः। योगविभागेनेति। एतेनादितो भिन्नान्येवैतानीति कस्य चिदुक्तिः प्रयुक्ता। ननु मत्यामित्यत्रेत्रियोगिनामादेशे तस्मिन्यणि कर्त्तव्ये सन्निपातविघातः स्यादत आह। सन्निपातेति। चिभार्य इति। अत्र तिस्रादेशे तच्छ्रवणापत्तिः। ननु तथापि पुंवद्भावेन सिद्धमत आह। तृतीयान्तेनेति। तिसृभिर्भार्य इति। ननु भार्यशब्दस्य संज्ञाशब्दत्वेन क्रियायोगाभावात्कर्त्तृकरणे कृतेत्यस्य कथं प्राप्तिरत आह। भार्यो भरणीय इति। ऋहलोर्ण्यत्। न च भृञोऽसंज्ञायामिति क्यपा भाव्यम्। भार्यशब्दस्य चचिये रूढतयाऽसंज्ञायामिति पर्युदासात्। नन्वेवं तिसृभिरित्यनन्वितमिति तु न तिसृभिर्युक्त इत्यर्थक-

स्य वाक्यैकदेशन्यायेन प्रयुक्तस्य चिशब्दस्य शक्त्यर्थकस्य समासाङ्गीकारात्। इह चिभरणीय इत्यपि प्रत्युदाहरणम्। चितुरोरित्यस्येति। उद्देश्यतायास्तत्रक्तत्वात्। ऋत इत्युपादाने त्वयोग्यत्वान्न तयोरनुवृत्तिः। रादेशेनेति। अजादिविभक्तावित्यादिः। तिस्रादेशविधानन्तु हलि चरितार्थम्। ननु रादेशस्य बाध्यसामान्यचिन्तया गुणाद्यपवादत्ववनुडपवादत्वमपि स्यादिति तदंशे विप्रतिषेधासंगतिरत आह। अत्रेति। वार्तिक इत्यर्थः। मूलमिति। यदि नुड्बाधकत्वं स्यात्तदा रादेशे कृते नुटोऽप्राप्त्या दीर्घाप्राप्त्या तिस्रिसृवैयर्थ्यमिति तेन सूत्रेण नुड्बाधकत्वाभावो ज्ञाप्यत इति भावः। एतेन। वक्ष्यमाणविशेषेण। अन्तरङ्ग इति। तथा च नुटा सह विप्रतिषेधविचारासंगतिरिति भावः। तमेव विशेषमाह। अतो निषेधादेवेति। न तिस्रितिनिषेधादेवेत्यर्थः। अर्थसंज्ञाकृतेति। अर्थसंज्ञाशब्दयोर्द्वन्द्वं कृत्वा कृतशब्देन सह समासेऽर्थेकृतं संज्ञाकृतं वा नाश्रीयत इति फलितम्। आमीति। अस्य चयादेश इत्यत्रान्वयः। यत्तु चयादेशस्य विशेषापेक्षत्वाद्बहिरङ्गत्वल्लिखादेशस्य तु विभक्तिसामान्यापेक्षत्वादन्तरङ्गत्वमिति न चयादेशस्यान्तरङ्गत्वात्पूर्वमुक्तो न तिस्रिति सूत्रासङ्गतिरिति तन्मतन्दूषयति। वस्तुत इति। स्वरूपेण। यथा चेस्त्रय इत्यत्राम आम्त्वेन रूपेण। केन चिद्विशेषरूपेणेति। यथा रुदादिभ्यः सार्वधातुक इत्यत्र सार्वधातुकत्वेनोपादाने सार्वधातुकत्वज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययत्वज्ञानवावश्यकमिति तत्र विशेषापेक्षस्य बहिरङ्गत्वम्। इदमेवापेक्षमन्तरङ्गञ्च ह्यपेक्षं बहिरङ्गमिति वदतो मतेन वस्तुतस्त्वेतादृशबहिरङ्गत्वङ्ज्ञापि नाश्रितमिति भाष्यानुसारिमतेनाह। विशेषापेक्षस्येति। मूलोक्तन्दूषयति। लज्वत्सूत्रे भाष्य इति। इत्यर्थ इति। श्रुतानुमितयोरितिन्यायोऽत्रानुप्राहकः। सत्यमेवमस्तु नाम क्ते चयादेशः स्यादत आह। तत्रामिति। चेस्त्रय इति सूत्र इत्यर्थः। अर्थाधिकारादिति। आमि सर्वनाम्न इति सूत्रे षष्ठीबहुवचनग्रहणस्यैव सिद्धान्तत्वात्। ननु पुनः प्रसङ्गविज्ञानेन नुमित्यसङ्गतम्। बाध्यसामान्यचिन्तया रादेशस्य सर्वापवादत्वस्य व्यवस्थापनादत आह। न तिस्रितिज्ञापकेनेति। आगमविषय इति। अनेन सामान्यशब्देन सुमोपि सङ्ग्रहः। एवंज्ञाप्यस्य वचनस्य कल्पनायाश्चाश्रयमेव साधकमाह। प्रत्ययोत्तरेति।

इमाविति। प्रियतिसृणी प्रियतिसृणि इतिप्रयोगाविति्यर्थः। ननु ङे इत्यचापरनिमित्तकत्वेनान्तरङ्गे टापि कर्त्तव्ये विभक्तिनिमित्तकत्वदाद्यत्वस्यासिद्धत्वाद्रूपासिद्धिः स्यादत आह। बहिरङ्गासिद्धत्वमिति। युवोरनाकावित्यत्रेति। एतेनेयम्परिभाषा निर्मूलेति कस्य चिदुक्तिः प्रत्युक्ता। वस्तुतो घटघटीग्रहणान्निङ्गविशिष्टपरिभाषाऽनित्या तेनैषा गतार्थेत्याशयेनाह। व्याप्नुवन्त्र इति। इयङेवानुवर्त्तत इति। एकदेशे स्खरितत्वात्। तत्र ङस इति। इयङुवङ्पदघटितवाक्य इत्यर्थः। इति बहुव्रीहिरिति। व्यधिकरणबहुव्रीहेरपि सप्तमीविशेषण इतिज्ञापकात्साधुत्वम्। एतेन मूलोक्तार्थस्य वाच्यार्थपरतयैवोपपत्तेरस्याधिकरणल्युडन्तस्थानशब्दस्येयङुवङोः स्थानाविति षष्ठीसमासं कृत्वा फलितार्थपरतया वर्णनमयुक्तमिति सूचितम्। अचेयङुवङोरित्यस्य षष्ठ्यन्तस्य यूदित्येतद्विशेषणतयोपपत्तेः स्थानशब्दोपादानसामर्थ्याद्यङ्लक्षणदाह। सा च बाधकाविषय इति अत्रातङुणसंविज्ञानबहुव्रीहिलभ्यार्थमाह। सा चोपलक्षणमिति। पूर्वोक्तमर्थम्प्रमाणयति। तदुक्तमिति। प्रथमलिङ्गे त्यस्य प्रत्याख्यानावसरे यू स्त्राख्याविति्सूत्रे। प्रकृष्टन्ध्यायतीत्यर्थकस्येति। प्रकृष्टध्यानकर्तृत्वप्रवृत्तिनिमित्तकस्येत्यर्थः। पदान्तरं विना स्त्रियां वर्त्तमानत्वन्नित्यस्त्रीत्वमित्यस्य वृत्तिकारादिसम्मतस्य लाभप्रकारमाह। अयं भाव इति कैयटोक्तेति। पूर्वोक्तेन प्रवृत्तिनिमित्तेनोभयाभिधायकत्वात्। ईदृशनित्यस्त्रीत्वालाभ इति। किन्तु न कदापि पुंसः प्रतिपादकाविति्येवैवकारव्यवच्छेद्यं लभ्यते। ऋकारसाहचर्येणेति। ऋकारस्य वृत्तिप्राग्वर्त्तिन एव ग्रहणस्य सिद्धान्तिसम्मतत्वात्। अत एव प्रियतिसा इत्यत्र न कप्। प्रकृतेर्वृत्तेः प्राक् यथा नदीत्वन्न तथोपपादयति। धीशब्देति॥ कैयटोक्तमनूद्य खण्डयति। आर्ध्वै इतीति। मतद्वय इति। वृत्तिकारकैयटमतयोरित्यर्थः। लक्ष्मीशब्दापेक्षयेत्यर्थ इति। धातुत्वेन यणादेशस्य न्याय्यत्वात्। विशिष्टस्यापीति। न भूसुधियोरितियण्निषेधात्। आरम्भसामर्थ्यादिति। तस्यात्र सम्बन्धे प्रकृतसूत्रस्यापि पूर्वसूत्रविषय एव प्रवृत्त्या पूर्वसूत्रेणैव सिद्धेः। तदन्तशब्दानामिति। ऋन्नान्तशब्दानामित्यर्थः। ऋन्नाभ्यामितिद्विवचननिर्द्देशे गौरवञ्चेत्यपि बोध्यम्। विरहपोषकत्वात्। विरहे सति विरहिणोऽनवधान-

वतीति हि लोकप्रसिद्धम् ॥ समास इत्येतल्लाभप्रकारमाह । उत्तरपद इत्यनेनेति । अस्य । वर्षाभूशब्दस्य । अमरातस्त्रीप्रत्ययोऽस्माद्भवतीति ज्ञानेऽपि यादवकोशोपपत्त्यर्थम्बाह्वादित्वकल्पनमिति भावः । अमरसम्मत्याह । अन्य इति । गौरादिपाठादिति । स्वाकृतिगणत्वकल्पनया । यादवकोशोपपत्तिमाह । भेक्ष्यामिति । इतिवदिति । तत्रैवाचापि स्त्री. ख्य प्रकृतिमात्रप्रतियादने कोशतात्पर्यङ्कल्पते इति भावः । मूलासङ्गतिमपरिहरन्तात्पर्यमाह । गौरादित्वादीति । तदनुसारेण । माधवमतानुसारेण । अनन्तरस्येतिन्यायेन ङीप एव निषेधः स्यादत आह । स्त्रियां यत्राप्नोतीति ॥ केचिदित्यनेन सूचितामरुचिमप्रकाशयन्नाह । स्वस्रादिष्विति । भाष्यस्वरस इति । तत्र हि सन्निपातपरिभाषायाः प्रयोजननिरूपणावसरे तिसृचतसृत्वं ङीब्विधेः । तिसृचतसृत्वं ङीब्विधेरनिमित्तम् । तिस्रस्तिष्ठन्ति । चतस्रस्तिष्ठन्ति । तिसृचतसृभावे कृते ऋन्नेभ्यो ङीबिति ङीप्प्राप्नोति । सन्निपातलक्षणो विधिरनिमित्तन्तद्विघातस्येति न दोषो भवति । इत्युक्ता नास्त्येतत्प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे ङीप् भवति । यदयत्र तिसृचतसृ इति नामि दीर्घत्वस्य प्रतिषेधं शास्तीत्युक्तम् । यदि स्वस्रादिष्वनयोः पाठः स्यात्तदा तेनैव निषेधे सिद्धे ज्ञापकानुसरणक्लेशो व्यर्थः स्यादिति भावः ॥

॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥

येन नाप्राप्त इतिन्यायादिति । उत्सर्गाप्राप्तियोग्येविष येऽचारितार्थ्यं ह्येतन्न्यायप्रवृत्तौ बीजन्तप्रकृतेष्यस्येव । न चोत्सर्गशास्त्रस्य प्रवृत्युत्तरं यत्रापवादत्वेनाभिप्रेतस्य प्राप्तिस्तत्रापवादत्वव्यवहारो भवति । प्रकृते तूत्सर्गस्य लुकः प्रवृत्युत्तरं नाभावस्य प्राप्तिः स्यान्यभावादिति कथमपवादत्वव्यवहार इति वाच्यम् । अपवादशब्दस्य निरवकाशत्वेन बाधक इत्यर्थात् । यत्रापवाद इति कथनमभावे लुगभावार्थन्तच्च नोचितं सन्निपातपरिभाषयैव लुगभावस्य सिद्धेरिति । तत्र । लुकः पूर्वमभावस्य निरवकाशत्वेन प्रवृत्तिरित्यर्थादेव तात्पर्यात् कृते त्वभावे सन्निपातपरिभाषया लुगभावस्य सिद्धिरिति त्वन्यत् । यत्तु लाघवादतोमित्यत्र म इत्येव छेदः । द्वितीयैकवचने आदेः परस्येत्यका-

रस्य मकारे द्वितीयमकारस्य संयोगान्तलोपेन सिद्धम् । यद्यपि संयोगान्त्यलोपे यणः प्रतिषेध इति वार्त्तिकारम्भपक्षे संयोगान्तलोपः प्राप्नोति । झल्यग्रहणापकर्षपक्षे तु नेतिफलभेद आपतति । तथापि संयोगान्तलोपसूत्रे झल्यग्रहणस्य वाक्यभेदेन सम्बन्धं कल्पयित्वा फलभेदः परिहरणीय इतिमतन्तद्दूषयति। अमिति छेद इति । अत एव । अमिति छेदस्य सूत्रकाराभिप्रायविषयत्वादेव न तु म् इति छेद उक्त इति । यदि म् इतिछेदोऽभिमतः स्यात्तदा वर्णग्रहणे च सर्वत्रेति तदन्तविध्यर्थमङ्गाच्चेपमात्रङ्कर्त्तव्यम् । येन यदाचित्मन्तत्तस्य विशेषणमिति न्यायेन तादृशाङ्गात्परा या सम्बुद्धिरित्येव लाघवाद्देत् वैयधिकरण्ये नान्वयो ह्रस्वदानुवृत्तिश्च न कार्येति भावः । केचित्तु सन्निपातपरिभाषया ज्ञानमित्यत्र दीर्घवारणमयुक्तम् । यथा एङ्ह्रस्वात्संबुद्धेरिति सूत्रे ह्रस्वग्रहणानुवृत्त्यभावे कुण्डशब्दात्सम्बुद्धौ अमादेशे आदेः परस्येत्यकारलोपे सुपि चेति दीर्घे हे कुण्डामिति प्राप्नोतीति सन्निपातपरिभाषाया अनित्यत्वाभिप्रायेणोक्तन्यायेन म् इति छेदपक्षेपि दीर्घे कर्त्तव्ये सन्निपातपरिभाषाया अप्रवृत्तिर्भविष्यतीत्याहुः । अत्रेदमवधेयम् । अमिति छेदपक्षेऽदन्तसन्निपातनिमित्तकस्यामादेशस्य न सान्तात्तत्सन्निपातविघातकदीर्घस्प्रति निमित्ततेति सन्निपातपरिभाषाया अप्रवृत्तिस्तस्मिन्पक्षे सम्भवति । म् इति छेदपक्षे तु सन्निपातलक्षणविधेर्मकारादेशस्य सन्निपातविघातकदीर्घानिमित्तत्वं समुचितमेवेति ॥ ननु यस्येति चेतिसूत्रेण यकारमात्रस्यैव लोपविधानमस्त्वित्यत आह । व्याख्यानादिति । सूर्यतिष्येत्युत्तरसूत्रे यग्रहणोपादानमूलकव्याख्यानादित्यर्थः । स्वरूपकथनमिति । अस्य न तु व्यावर्त्तकमिति शेषः । सर्वे इत्यत्रातिप्रसङ्गस्तर्हि स्यादत आह । सर्व इति । व्याख्यानादिति । जसमाहचर्यमूलकात् । अत एव तानीति सूत्रे एकश इति प्रयोगसङ्गतिः । बलवत्त्वात् । प्रकरणाद्योपस्थितिस्तदपेक्षया श्रुतार्थस्य श्रोत्रोपस्थितिकत्वेन बलवत्त्वात् ॥ अत एव । श्रुतानुमितयोरितिपरिभाषासत्त्वादेव । भावे घञि प्रस्तुतार्थासङ्गतेराह । कर्मणीति । प्रायो वाद इति । लिङ्गानुशासनस्य लौकिकत्वात् । अत एव सम्बन्धमनुवर्तिष्यत इति भाष्यस्य सम्बध्यत इति सम्बन्धमिति व्याख्या कैयटेन कृता । स्वरूपभङ्गभिया न कृत इति । एवञ्च नित्यस्यापि शास्त्रस्य सूत्रेषु छन्दोवत्कृञ्चाणीतिव-

चमेन छन्दस्त्वातिदेशेनाप्रवृत्तिरिति भावः । विधानस्य सर्वथेति । इतरार्थगतसंख्याभिधायिन इत्यर्थे विधानक्रियाया अनन्तर्भावात् । अङ्गन्तथेति । अर्थद्वारकं विभक्तिविशेषणमित्यर्थः । व्याख्यानादिति । लक्ष्यानुसारिव्याख्यानादित्यर्थः । अजरांसीतिप्रयोगसाधनाय प्रक्रियामाह । परत्वादितीति । नुमप्यनित्य इति । अपिना जरसादेयग्रहणम् । तस्य च नुमागमे कृते नुमः समुदायभक्ततया तदवयवजराशब्दस्य नुमागमेन व्यवधानादनित्यत्वमिति बोध्यम् । अत्र यदुक्तव्यमिति । श्रीभावात्परत्वाज्जरसित्यसङ्गतम् विभक्त्यादेशानामेव पूर्वविप्रतिषेधेनेष्टत्वादित्याद्युक्तम् । असंभवादिति । सान्तसंयोगावयवनकारस्यान्त्यत्वाभावेन तन्निरूपितोपधात्वस्यासम्भवात् । अत एव । सर्वनामस्थान इत्यस्य सान्तसंयोगविशेषणत्वादेव । अङ्गविशेषणत्वे हंसशब्दावयवाकारस्यापि स्यादिति भावः । तस्याङ्गांशे उत्थिताकाङ्क्षत्वेऽप्याह । यद्वेति । न चान्त्यविकार इतिपरिभाषायाः प्रकृतेऽतिप्रसङ्गनिवारकतया स्वीकारे भ्मङ्हत इत्येव सूत्रं कर्त्तव्यम् । नोपधाया इति वर्त्तते अङ्गस्येति प्रकृतम् । तच्च विशेष्यम् । भ्मङ्हत इत्यस्य विशेषणतया सान्तभ्मङ्हच्छब्दान्तश्च यदङ्गन्तदवयवो यो नकारस्ततः पूर्वस्याचो दीर्घ इत्यर्थस्वीकारेण सर्वेष्टसिद्धौ सयोगग्रहणमन्तग्रहणञ्च व्यर्थमिति वाच्यम् । अन्तरीत्यन् । तसरतीतित्सर् । अन् च त्सर् च अन्त्सरौ । तावाचष्टेऽन्त्सयति । ततः क्विपि अन्त्स इति प्रातिपादिकान्ततः सुपि प्रतिना समासे प्रत्यन्त्सशब्दात्सुप्यौजसादावदीर्घार्थं संयोगग्रहणस्यावश्यकत्वात् । संयोगग्रहणे तु प्रत्यासत्त्या नकारात्व्यवहितसान्तो यः संयोग इत्यर्थाश्रयणेन दोषपरिहारसम्भवात् । एतद्ग्रहणप्रत्यासत्तिविवक्षया दोषाभावसूचनार्थमेव बह्वनां संयोगसंज्ञोक्तिर्भाष्यीया सङ्गच्छते । णिलोपस्य स्थानिवत्त्वन्तु न । क्ङिति त्वात् । सूत्रे संयोगग्रहणाभावे प्रकृतोदाहरणेऽन्त्यवर्णतदृर्णयोरितराव्यवधानाभावेनान्त्यविकार इति परिभाषाया अप्राप्त्या आद्याकारेतिप्रसङ्गश्च तदृर्णविशेषणभिन्नत्वस्यानिवेशेऽपि भेदत्रयविशिष्टेन तकारेण व्यवधानात् । यदि त्वन्त्यवर्णतदृर्णभिन्नो योऽत्वघर्यात्यधिकरणाविषयकप्रतीत्यविषयस्तद्व्यवधानाभावो निवेश्यते तदा नायन्दीष इत्यवधेयम् । मांसस्य पचि गुड्धञोरित्य-

ष्येतदिति । युड्वजोः प्रकृतिभूतो यः पचधातुस्तस्मिन्मांसस्यान्तं लुपेदिति तदर्थः । प्रभृतिग्रहणस्य प्रकारार्थत्वेन तयोरपि पहत्व इतिसूत्रे णैवादेशो भविष्यतीति भावः । अभिमान इति । एतद्बीजमागमभिहितम् । मूले पहत्व इतिसूत्रे छन्दसीत्यनुवृत्तं वृत्ताविति युक्तत्सूचितामरुचिं सूचयन्नाह भाष्यस्वरस इति । पदादीनामप्रकृत्यन्तरत्वस्य तत्सिद्धान्तसिद्धत्वात् । क्लीववदर्थ इति । न च नपुंसकशब्दस्य सूत्रोपात्तस्य गुणिवाचकतया क्लीववदर्थ इत्यनुपपन्नमिति वाच्यम् । नपुंसकशब्दस्यार्थे आद्यजन्तत्वात् । ननु विभक्त्यर्थस्य संसर्गतया भानाभ्युपगमात्प्रकृत्यर्थस्य द्रव्यस्य प्राधान्यमस्त्येवेति । वेत्यत आह । विभक्त्यर्थ इति । काण्डे कुण्डे इति विभक्त्यर्थप्रधानमिति भाष्याद्विभक्त्यर्थस्य संसर्गत्वेऽपि प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतायास्तत्र स्वीकारे बाधकाभावात् । शब्देन प्रतिपादितेऽर्थे विशेष्यत्वस्वीकारः सर्वसम्मतः । संसर्गताख्यविषयतायाः प्रकारत्वविशेष्यत्वविरुद्धत्वे साधकाभावः । अत एव वह्निर्नास्तीत्यत्र नञर्थे वह्निपदार्थस्य वह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन अन्वये वह्नित्वमवच्छिन्नत्वप्रतियोगित्वञ्चेति त्रितयमेव विशेषणविशेष्यभावापन्नं संसर्ग इत्युक्तं परैः । न केवलं मतम्यन्तस्थल एव विभक्त्यर्थस्य प्राधान्यं किंतु प्रथमाद्यन्ते पीति सूचयन्नाह । प्रथमाया अपीति । ननु श्रीपं ज्ञानवदित्यनुपपन्नम् । श्रीपाणीत्यत्रैव विशेषसद्भावादत आह । दीर्घान्तत्वप्रयुक्त इति । माधवमिति । यद्यत्र नुम् स्यात्तदा टिलोपः स्यात् । अनित्यस्य वचनस्य प्रायिकप्रवृत्तौ भाष्यसम्मतिमाह । अत एवेति । पीलुशब्देऽतिप्रसङ्ग इति । अर्थभेदेपि शब्दैक्यमितिमतेनेदम् । न च येन शब्देन पुमान् भाषित इत्यस्य वाचकतासम्बन्धेन पुमर्थविशिष्टस्य पुंवद्भाव इत्यर्थो वाच्यस्स च न सम्भवति पुमर्थविशिष्टस्य नपुंसकवृत्तित्वासम्भवादिति वाच्यम् । असम्भवपरिहारायातद्गुणसंविज्ञानबहुव्रीहिसमासाश्रयणेन पुमर्थोपलक्षितस्य पुंवद्भाव इत्यर्थो वाच्यस्तथा सत्यप्ययमतिप्रसङ्ग इति भावः। यस्मिन् प्रवृत्तिनिमित्त इति । सप्तम्याश्रयणेन यस्मिन्प्रवृत्तिनिमित्ते सतीत्यनेन यत्प्रवृत्तिनिमित्तप्रकारिका पुमर्थविशेष्यिका प्रतीतिर्भवति तत्प्रवृत्तिनिमित्तमन्यपदार्थ इति पर्यवसितम् । ततोऽर्थाद्यत्र समानप्रवृत्तिनिमित्तकत्वं लभ्यते एवमपि यदि शब्दस्यार्थभेदे-

प्यैक्यन्तदाऽतिप्रसङ्गः पीलुशब्दे तदवस्थ इति विशेषार्थभेदाच्छब्दभेदः स्वीकार्यस्तथा सति येन शब्देन यस्मिन् प्रवृत्तिनिमित्ते सति पुमान् भाषितो भवति तत्प्रवृत्तिनिमित्तवत्त्वन्तत्प्रवृत्तिनिमित्तस्यैकत्वे नपुंसकवृत्तेः सम्भवतीत्याशयेनाह । भाषणक्रिययेति । विनिगमनाविरहादाह । समानानुपूर्वीक इत्यादि । अत्र समानानुपूर्वीकत्वोपादानम्मद्युशब्देऽतिप्रसङ्गवारणाय । समानार्थ इत्यत्रार्थः प्रवृत्तिनिमित्तरूपः । अतिदेश फलमाह । अयञ्चेति । तत्रयुक्तेति । क्लीबत्वविशिष्टार्थवृत्तित्वप्रयुक्तेत्यर्थः । न चैवं नब्विषयस्येतिविहितस्वरस्याप्यतिदेशापत्तिः । भिन्नकर्तृकत्वात् । ननु यद्युदात्तादिशब्दैरनुपात्तस्याविवक्षा ज्ञाप्यते तदा चतस्रः पञ्चेत्यत्र चतुरः शसीत्यस्याप्रवृत्तिसिद्ध्यर्थञ्चतसर्यादुदात्तनिपातनङ्करिष्यते स निपातनस्वरश्चतुरः शसीत्यस्य बाधको भविष्यतीत्युक्तभाष्ये तत्र सङ्गच्छेत प्रकृतेप्यविवक्षा स्यादत आह । त्रिचतुरोरितीति । एवञ्चैतादृशे विषये विवक्षार्थमेवासति यत्न इत्युक्तम् । अन्यत्रापि तत्फलमाह । बधादेशेपीति । अन्तोदात्तेऽनुदात्ते धोच्चारणीय इति । हन्तेर्धातुस्वरेणान्तोदात्तत्वात् । अनुनासिकलोपार्थमनुदात्तत्वप्रतिज्ञानादुपदेशेऽनुदात्तत्वाच्चेति भावः । नन्वेवन्नब्विषयस्येतिसूत्रेणास्थिशब्दस्याद्युदात्ततया तस्थेकारस्यानुदात्ततया तदनुरूपेऽनुदात्ते उच्चारणीये उदात्तोच्चारणेनैव विवक्षासिद्धौ ऽदात्तशब्दोच्चारणं व्यर्थमित्यत आह । परमास्थिशब्देति । अत्र प्रथमादिशब्देन केवलास्थिशब्दस्य द्वितीयेनानुदात्तस्य सङ्ग्रहः । उदात्तनिवृत्तिस्वरेण । अनुदात्तस्य च यत्रोदात्तलोप इति सूत्रविहितेन । लोपाभावे आह । दधनीत्यादाविति । तत्स्वरकेति । उदात्तस्वरकेत्यर्थः । अत्रापि । अस्थिदधीतिसूत्रेऽपि । तच्च । नपुंसकपदञ्च । पुन्नपुंसकयोः सत्त्वादिति । मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः । अर्हादिगणे पाठात्पुन्नपुंसकयोर्मधु इत्यभियुक्तोक्तेः । नित्यनपुंसकेति । पूर्वोक्तभाषितपुंस्कत्वाभावात् । ननु यदि मकरन्दादिवाचकस्योभयलिङ्गत्वन्तदा मधोस्तृप्ता इत्यस्य विनापि व्यत्ययमुपपत्तौ लिङ्गव्यत्ययोदाहरणपरभाष्यविरोध इत्यत आह । भाष्य इति । क्षीरवाचीति । पुंसि प्रवृत्तौ यन्निमित्तम्मकरन्दत्वादि तस्य नपुंसकप्रवृत्तौ निमित्तत्वन्नास्तीति भावः । नित्यत्वादेवे-

ति । ह्रस्वसन्धौ कृतेऽकृते च नुमः प्राप्तेर्नुम्नित्यः । ह्रस्वसन्धावस्यापि नित्यतयोभयोः समत्वात् । तदेवोपपादयति । तदन्ते नुमि कृतेपीति । नुम्विशिष्टस्येति । अङ्गस्येति शेषः । तद्ग्रहणेन । क्रोष्टृग्रहणेन । ननु निर्दिश्यमानस्य विभक्तिपरत्वाभावात्कथमस्यास्तृज्वद्भावस्येत्यत आह । सूत्रे षष्ठीनिर्देशाभावादिति । निर्दिश्यमानपरिभाषायाः षष्ठी स्थानेयोगेतिसूत्रसिद्धत्वात् । प्रकृते तु ह्रस्वत्क्रोष्टुरितिप्रथमानिर्दिश्यस्य सत्त्वेन परिभाषाया अयमविषय इति भावः । नन्वेवनुमागमोत्तरम्पुनस्तृज्वत्त्वमाप्नोतीत्यत आह । सकृद्गतीति । सकृद्गतिन्यायानङ्गीकारे पूर्वविप्रतिषेधारम्भो व्यर्थ एव स्यात् । अयम् । पूर्वविप्रतिषेधः । संकोचकत्वे । विभाषा तृतीयादिष्वचीतिसूत्रमात्रविषयकत्वे । निर्धारणस्यानेकविषये संभवाद्बहुवचनापत्तेराह । सौत्रमेकवचनमिति । समप्रविभागपक्षाभिप्रायेणाह । एचां पूर्वभाग इति । प्रत्याहारनिर्देशे जातिपक्षस्यैव सिद्धान्ततत्वाद्यथासंख्यमाप्नोतीत्यत आह । यथा प्राप्तमेवेति । ननु सुजाते ए अश्वसूनृत इत्यत्रैकमात्रिकस्यैकारस्य प्रसिद्धत्वात्त्र एव ह्रस्वप्राप्तावेकारस्य स्यादत आह । ह्रस्व एच् तु नास्त्येवेति । पूर्वोक्तोदाहरणे प्रसिद्धस्तु सात्यमुग्रिराणायनीयैर्विशिष्य विहितः स तच्छाखामात्रविषय इति भावः । ऐचोश्चोत्तरभूयस्त्वादिति प्रत्याख्यानवार्त्तिकानुसारेणाशङ्कते । न चेति ॥ प्लुतावैच इदुतावितिसूत्र इति । तत्र हि ऐश्तिवायन इत्यत्र मात्राऽवर्णस्य मात्रा इवर्णोवर्णयोरिति तत्रोभयोः शाखान्तरेण प्लुतविधाने उभयोर्विद्वद्भिः प्राप्नोति तद्व्यावृत्त्यर्थमिदुतोः प्लुतवचनमितिरीत्या प्रयोजनमादावुक्तम् । अयं च दोषो यथा गर्भो विवर्द्धमानः सर्वाङ्गपरिपूर्णो विवर्द्धते तथेहाप्यैचः शाखान्तरेण प्लुत उच्यमान उभयावयवविद्वद्भिरूपः प्राप्नोतीति मत्वा क्षतः । ततश्चावयवस्य प्लुते सत्येक एवायं वर्णश्चतुर्मात्रः स्यात् । ततः सिद्ध्येदुतोर्दीर्घवचनात् । सिद्धमेतत्कथमिदुतोर्दीर्घौ भवतीति वक्तव्यम् । तदेतत्कथङ्कृत्वा सिद्धभवति । यदि समः प्रविभागः । मात्राऽवर्णस्य मात्रा इवर्णोवर्णयोः । एतेन भाष्यकृता ऐचोश्चोत्तरभूयस्त्वादिति यद्वार्तिककृतोक्तन्न युक्तम्पूर्वापरविरोधादित्याशयेन पर्यनुयोगः कृतः । तदेवोपपादयति । अथ हि अर्द्धमात्रा अवर्णस्य अर्ध्दमात्रा इवर्णोवर्णयोः अर्द्धतृतीयमात्रः प्राप्नो-

ति। अथ हि अध्यर्धमात्राऽवर्णस्य अर्धमात्रा इवर्णोवर्णयोरर्धचतुर्थमात्रः प्राप्नोति। सूत्रञ्च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्र यथेष्टप्रसङ्ग इति। तत्र सौर्यभगवतोक्तम्। अनिष्टिन्नो हि वाडवः पठति। इष्यत एव चतुर्मात्रश्रुतः। अत्र भाष्ये पूर्वोत्तरपदयोर्विरुद्धयोः कथनेन विषमविभागो विनिगमकाभावान्न युक्तः किन्तु समप्रविभाग एवेति दृढीकृतम्। सौर्यभगवतेति। सौर्यन्नाम नगरन्तत्र्ये नाचार्येणैतदुक्तम्। किम्। वाडवः पठतीति। इष्यत एवेति। इदञ्चतुर्मात्रिकत्वं समप्रविभागपक्ष एवोपपद्यत इति बोध्यम्॥ प्रागेवात्वमिति। नञ्चेषाशङ्का प्रराणामितिरूपसाधनाभिप्रायेण किन्तु नुल्घटितं रूपमसङ्गतमित्यभिप्रायेण। मानाभावादिति। एवञ्च पूर्वमात्त्वाप्रवृत्तौ नुटि सति सन्निपातपरिभाषया पुनरात्वप्रतिबन्धे दीर्घो युक्त एवेति विषयसप्तमीत्वमप्रक्षते वक्तुमप्यशक्यमित्याह। आत्वे क्षत इति। निमित्तस्य सन्निपातस्य। ह्रस्वसन्निपातस्य। तद्विषये। नुड्विषये। सन्निपातपरिभाषाविषय एव नेति। परिभाषाघटकस्य सन्निपातलक्षणविधिपदस्य नुड्विघ्नपरत्वादिति तद्भावः। अत्र विषयशब्दो भावप्रधाननिर्देशेन विषयत्वपरः। नन्वेवमदन्ते षष्ठीबहुवचने परे दीर्घसाधनाय नामीतिसूत्रस्य प्रवृत्तिकल्पनमतङ्गतम्। सुपि चेत्येव तस्य सिद्धत्वादित्यत आह नामीति दीर्घस्त्विति। माधवाशयमाहुरिति। अचारुचिबीजन्तु कष्टायेतिनिर्देशेनानित्यायाः परिभाषाया दीर्घे कर्त्तव्येऽप्रवृत्तिकल्पनेऽपि रायो हलीतिसूत्रविहिताकारे कर्त्तव्येऽप्रवृत्तौ पूर्वोक्तार्थकल्पनायाञ्च साधकाभाव इति। नपुंसकविशेषे प्रवृत्तातिप्रसङ्गं वारयति। ग्रामणीति। समुदितप्रातिपदिकेति। सम्प्रति प्रातिपदिकसंज्ञा क्षदन्तस्येति ह्रस्वत्वबहिरङ्गम्। तत्तु ह्रस्वक्षिपावेव निमित्तत्वेनापेक्षत इत्यन्तरङ्गं इति भावः। न च पित्क्षतः प्रत्ययत्वात्तेन यस्मादिहितस्तदादेरित्यस्योपस्थितौ सौत्रह्रस्वग्रहणस्य तद्विशेषणतया पित्क्षत्यस्मादिधीयते तदादेर्ह्रस्वान्तस्य पिति क्षति तुगित्यर्थे तुगागमोऽपि समुदायापेक्ष इति वाच्यम्। क्षन्नेजन्तसूत्रभाष्ये सन्निपातपरिभाषायाः प्रयोजननिरूपणावसरे ह्रस्वत्वन्तुम्विधेर्ग्रामणि कुलमित्युक्तम्। अत्र ह्यौत्तरपदिके ह्रस्वत्वे कृते यदि ह्रस्वस्य तुक् स्यात्तदौत्तरपदसन्निपातविघातः स्पष्ट एव।

आख्यातञ्चोपाध्यायैर्यदा वर्णमात्रस्य तुगागमोऽवयववावयवस्य समुदायावयवो न भवति तदेदमयोजनमिति । तङ्गाथप्रामाण्येन यथाच तुकोऽन्तरङ्गत्वन्तयैव कल्पनमुचितमिति प्रकृतेपित्कृत्प्रत्ययेनाक्षिप्तस्यापि तदाद्यंशस्य विशेषणत्वमेव कार्यित्वन्तु वर्णमात्रस्येत्याशयात् । वस्तुतोऽचान्तरङ्गपरिभाषा न प्रवर्त्तते ज्ञापकादित्याशयेनाह । ये खिति । स एवार्थ इति । उभयोर्भेदमभिप्रेत्येदम् । वस्तुतस्तूभयोरैक्यमेवेत्याह । किञ्च तस्या अपीति । अत एव । उभयोरप्येकत्वादेव । अनिमित्तं स्यादिति । दाक्षिः म्लाक्षिरित्यत्र यथा । यद्युपजीव्यविरोधस्यान्याय्यत्वमिति परिभाषान्तरं स्यात्तदाऽनित्यत्वेन सन्निपातपरिभाषाया अप्रवृत्तिं स्वीकृत्य दोषाभावे साधितेऽपि द्वितीयया वर्णविचालो न स्यादिति दोषस्तदवस्थ एव स्यात् । तत्र शङ्कते । न चेति । प्रत्ययः । इञ्प्रत्ययः । सन्निपातलक्षणो न । अकारान्तप्रकृतेर्विधीयमानः प्रत्ययो न प्रकृतिप्रत्ययसन्निपातलक्षणः । अङ्गसंज्ञा तर्हीति । अकारान्तप्रकृतोञ्प्रत्ययसन्निपातनिमित्ताङ्गसंज्ञाऽञ्लोपे निमित्तञ्च स्यादित्यग्रिमभाष्यतात्पर्यार्थः । यद्युपजीव्यविरोधस्यान्याय्यत्वमितिपरिभाषैकवाक्यतापन्ना सन्निपातपरिभाषा तदा यत्रोपजीव्यविरोधप्रसङ्गस्तत्रैव सन्निपातपरिभाषाप्रवृत्तिर्वाच्या । अङ्गसंज्ञाविषये चोपजीव्यविरोधाभावेन तत्र सन्निपातपरिभाषासञ्चारे भाष्यविरोध इति भावः । तस्यैकेति । अङ्गसंज्ञा तर्हीत्यस्य । अन्यथा । एकदेश्युक्तित्वानङ्गीकारे । सा । अङ्गसंज्ञा । नन्वेवङ्गन्मे जन्तइतिसूत्रस्थभाष्ये तुग्विषये बहिरङ्गपरिभाषोपन्यासविरोध इत्यत आह । ग्रामणिपुंव इति । अत्र षष्ठीतत्पुरुषः । पूर्वोत्तरपदनिमित्त इति । एतेन ह्रस्वत्वस्य बहिरङ्गत्वं सूचितम् । एकदेशिन इति । तत्त्वञ्च पूर्वोक्तज्ञापकबलेन कल्प्यते ॥

॥ इत्यजन्ता नपुंसकलिङ्गाः ॥

झलीति यद्यौपश्लेषिकाधारे सप्तमी पदान्त इत्यपि तथा स्यादितिभ्रमवारणायाह । पदान्ते विद्यमानस्येति । अत्रान्तशब्दस्य चरमावयववाचकतया ह्रस्य तद्वत्तित्वं व्यपदेशिवद्भावेन बोध्यम् । पदचरमावयवस्य ह्रस्ये-

ति तु फलितम्। प्रक्रियालाघवमात्रेण कृतां कस्य चिच्छङ्काचिरस्थति। ङस्विति। असिद्धेरिति। झषन्तत्वाभावात्। व्याख्यानादिति। एतच्चार्थे स्पष्टम्। एतच्च। दादि-दस्यौपदेशिकदादित्ववति वर्त्तनञ्च। ध्वननं व्युत्पादयति। तत्र हीति। अदादेरितीति। एवञ्च धुगित्यत्र ढत्वस्याप्राप्तिरेव। नेति निवृत्तमिति। समासघटकनञ्पदमत्र विवक्षितम्। अत्र भाष्ये नेतिनिवृत्तमित्युक्तत्वेतीति तेन निषेधार्थकोऽत्रशब्दो नास्तीति लभ्यते। ननु यद्यदादेरित्युच्यते तदा वा दुहेत्यनेन घत्वाभावे ढत्वन्न स्यादत आह। दुहेस्विति। तत्र समुच्चयार्थो वाशब्द इति भावः। फलान्तरेति। लक्षणाप्रयोज्यशाब्दबोधफलातिरिक्तफलान्तरेत्यर्थः। दादिपदाभावेऽपि धातुसामान्ये प्राप्तघत्वस्यादादिधातौ विधीयमानढत्वेन बाधे परिशेषादादेरेव घत्वमवितीति भावः। सामर्थ्यादिति। अनुवृत्तिसामर्थ्यादित्यर्थः। अत एव। दादिपदस्यौपदेशिकदादित्ववत्त्वकत्वादेव। प्रत्यक्षमाख्यानमुपदेश इति लक्षणलक्षितोपदेशविषयतावशिष्टदादित्ववद्भेदस्य दामलिडित्यत्र सत्त्वेन ढत्वस्य घत्वाभावस्य च सिद्धिरित्यर्थः। तदेकवाक्यतया। उत्तरपक्षैकवाक्यतया। अत्रैकवाक्यत्वं समानफलकत्वमेव। न चोद्देशोपदेशयोः संकरेण व्यवहारो लोके दृश्यत इति वाच्यम्। उत्तरत्र दादिपदानुवृत्तिसामर्थ्येनात्र तयोर्भेदाङ्गीकारात्। एवञ्चोभयोः पक्षयोर्यथा न विसंवादस्तथैव व्याख्यानमुचितम्। न चैवमिवाधोगित्यत्राडागमे कृते दादित्वाभावेऽप्युपदेशे दादित्वस्य सत्त्वाद्धत्वं सिद्धमेवेत्युत्तरभाष्यासङ्गतिरत आह। तदनन्तरमिति। अजानत इत्यस्य शङ्कायामित्यत्रान्वयः। एकाच इतिसूत्रार्थमिति। दादेरितिसूत्रे वैयधिकरण्येनान्वयस्य दृष्टत्वात्तद्वदेवैकाच इति सूत्रेऽपि भविष्यतीति भावः। दृहानावश्यकत्वमिति। दादिपदलक्षणायाः सूचितत्वात्। यत्तु सीरदेवादयः। औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणमितिपरिभाषया प्रकृते उपदेशे दादेरित्यर्थलाभ इत्याहुस्तेषाम्मतन्दूषयति। औपदेशिकेत्यादि। इति वक्तुं युक्तमिति। यथासङ्ख्यन्तु न। अस्वरितत्वात्। ननु मध्योर्ग्रहणमितरभक्ष्यादित्यर्थमवितीत्यत आह। मध्योर्ग्रहणस्येतरेति। यथा दधधातोर्यङ्लुकि द्वौ दादित्र अत्र हेर्धादेशे कृते भषभावः प्राप्नोति तद्व्यावृत्त्यर्थम्। तद्दाडित्यादौ-

ति । तद्वहतीति तद्वाट् । ननु धातुत्वशरीरघटकक्रियाया प्रधानीभूताया ग्रहणस्योचितत्वेन कथमत्र धातुत्वमत आह । अत्वसन्तस्येति । अत्र । धुगित्यादौ । प्रत्ययनिमित्तत्वाभावादिति । दाण्डिनायनेतिसूत्रेण ङीषन्त्येत्यत्र तत्वनिपातनेन ङीषा परिभाषा ज्ञापिता एवञ्च ज्ञापकस्य प्रत्ययनिमित्तकङीषन्त इत्येव सिद्धे तत्वनिपातनं व्यर्थमित्येवमेवोपपादनार्हतया प्रत्ययनिमित्तककार्यस्थल एव प्रवृत्तिरिति भावः । एतदंशे ज्ञापकमप्याह । अत एवेति । तस्याः परिभाषायाः प्रत्ययनिमित्तककार्यस्थल एव प्रवृत्तिस्वीकारादेव । न च पदसंज्ञायाः प्रत्ययनिमित्तकतया प्रत्ययनिमित्तकत्वभङ्गभावस्यात्येवेति वाच्यम् । ज्ञापकसाजात्यात्सा ज्ञाप्यप्रत्ययनिमित्तककार्यस्थल एव प्रवृत्तेः । अत एव प्रणङ्भ्यामित्यत्र कुत्वम् । सुधियावित्यादावियङ् प्रध्यावित्यादौ यण् च न भूसुधियोरिति निषेधेन परिभाषाया अनित्यतया साधनीयः । यत्तु धातोरुच्चमानमित्यस्य धातुविशेषानुपूर्वीपुरस्कारेणोक्तन्न तु धातुसंज्ञब्देनोच्चमानन्तदप्यत एवाचि श्नुधात्वादेरनेकाच इत्येतद्विषये न प्रवृत्तिरिति । तन्न । एवं सति प्रसृड्भिरित्यत्रानुदात्तस्य चर्दुपदेत्यनेनानागमापत्तेर्भाष्योक्तायास्तस्यत्वापत्तेः । नन्वेवमिति । यणः स्थाने प्रयुज्यमान इति व्याख्याने ॥ भाष्यविरोधादिति । यद्यदुहितरामित्यत्र यथासंख्येन सम्बन्धमाश्रित्य दोषो वार्यते तदा लकारोपदेशाभावे यथासंख्यस्य वक्तुमशक्यतया लकारोपदेशस्य प्रयोजनयङ्कासमाधानयोर्निर्हेतया तद्विरोधापत्तेरित्यर्थः । तद्वारितेति । तत्त्यायेनेत्यादिः । वाक्यस्य संज्ञेतिपक्ष इति । वर्णसंज्ञापक्षेप्रसक्त्यान्योन्याश्रयपरिहाराय यणः स्थाने इग् भवतीत्येवंरूपवाक्यस्य संज्ञापक्ष इत्यर्थः । इत्युक्तयेति । अनुवादप्रदेशे वाक्यस्य कार्यासम्भवेन लक्षणाया आवश्यकत्वात् । द्युभ्यामित्यादावपीति । एतेन प्रकृते यथासंख्यसम्बन्धाश्रयणेनेत्यत्रापि सूचिता । अत एव । सम्प्रसारणजातस्यानुवादप्रदेशे ग्रहणादेव । ननु सम्प्रसारणपूर्वत्वे समानाङ्ग्रहणमितिवार्त्तिकेनाच्चहारुण इत्यत्र न दोष इत्यत्र आह । समानाङ्ग्रहणन्विति । एक आदिश्यत इति । सम्प्रसारणाच्चेत्यनेनेत्यादिः । स्थानिवद्भावेन तु न सम्प्रसारणत्वमस्विधित्वात् । वचरामाख्यातिति । इलइति सूत्रारम्भसामर्थ्यादेतस्मिन्कर्त-

व्येऽनल्विधाविति निषेधस्याप्रवृत्तिः कल्प्यते इति भावः। तुल्यन्यायादाह। न सम्प्रसारण इति। अन्तरङ्गत्वादिति। पूर्वापस्थितनिमित्तकत्वरूपान्तरङ्गत्वाश्रयत्वादित्यर्थः। अनित्यत्वादिति। नाजानन्तर्यपरिभाषाज्ञापकस्यानित्यत्व एव ज्ञापकत्वादित्यर्थः। इहाप्रवृत्तेः। एवञ्च परत्वात्पूर्वरूपे यकारस्य न संप्रसारण इत्यनेन निषेधः। सवर्णदीर्घस्य नित्यत्वन्तु शब्दान्तरप्राप्त्या परिहरणीयम्। न चैवमिति। पूर्वरूपोत्तरं सवर्णदीर्घे पूर्वरूपनिष्पन्ने स्थानिवद्भावेऽपि तदादेशे सम्प्रसारणत्वाप्राप्तेरिति भावः। न सम्प्रसारण इति सूत्रन्तु विध्यादेल्यादौ चरितार्थम्। स्थानिवत्वादिति। एवञ्च पूर्वरूपनिष्पन्नादेशस्याचः परस्मिन्निति स्थानिवद्भावेन न सम्प्रसारण इति निषेधः। न चाचः परस्मिन्निति पूर्वरूपादेशस्य स्थानिवद्भावेन यकारस्य सम्प्रसारणनिषेध उकारेण व्यवधानान्न प्राप्नोतीति वाच्यम्। यूनस्तिरितिनिर्देशेन युवन् शब्दविषयकत्व निषेधशास्त्रस्य विशिष्य कल्प्यते तत्सामर्थ्यान्निर्दिष्टपरिभाषाया अप्रवृत्तेः एवमेवाच्चदकुलमित्यत्र सम्प्रसारणजातत्वाभावाद्वल इति दीर्घो न। तेनालोन्त्यस्येतीति। वाह इतिषष्ठीनिर्देशात्प्राप्तान्त्यलोन्त्यपरिभाषा सम्प्रसारणग्रहणस्योऽविशेषणत्वेन ततो व्यावर्त्यते। लाघवमूलिकां शङ्कामाशिरस्यति। ऋख इति। शूडित्यत्रापीति। इत एव ज्वरत्वरेत्यनोऽग्रहणानुवृत्तेः। अचच्यूरित्यत्र हल इति दीर्घो भविष्यतीतिशङ्कां वारयति। अतद्भावितत्वेनेति। मूले णिजन्तादिजित्युक्तमेतेन सर्वसारूप्यमस्येति प्रतीयते परत्वेतन्नेति सूचयति। अनेनेति। अङ्गभसंज्ञेति। अङ्गसहितभसंज्ञेत्यर्थः। एतेन केवलभसंज्ञाया ह्रस्वखस्वश्वयोरित्यनेन प्रातिपदिकेपि परे दर्शनेन व्यभिचाराद्यत्ययाक्षेपकत्वाभावेऽपि न यत्न्यासङ्गतिः। तादृशप्रत्ययाक्षेपे सति अङ्गभसंज्ञानिमित्तप्रत्ययपरो यो वाहशब्दस्तदन्तं यदङ्गन्तदवयवस्य निर्दिश्यमानावयवस्य सम्प्रसारणमूठ् स्यादिति वाक्यार्थः सम्पन्नः। एतत्फलन्तु वाहवाट्शब्दावयवस्य प्रथमवाहशब्दस्य सम्प्रसारणाभावः। अन्यथा वाहान्तं यदङ्गन्तदवयवस्य निर्दिश्यमानस्येत्यर्थेन स्यात् एतेनोठोऽपरनिमित्तकत्वेन णिलोपस्य स्थानिवद्भावेपि न क्षतिरित्यपास्तम्। ननु विचः सर्वत्रादर्शनेन णिजन्तादिजित्यसङ्गतमत आह। णिज्ग्रहणमिति।

ननु क्विपि सति सम्प्रसारणापत्तिरत आह । वच्यादिभ्य इति । णिलोपस्य स्थानिवद्भावेनापि सम्प्रसारणं वारयितुं शक्यमित्याशयेनाह । प्रतिपदोक्ततयेति । सम्प्रसारणन्तु क्विति विधीयते न तु क्विशब्दमुच्चार्य विहितमिति तस्मिन्नानेन स्थानिवत्त्वनिषेधः । तेन । क्विशब्दमुच्चार्य विधीयमानकार्यं विधायकशास्त्रे कर्त्तव्य इत्यर्थकरणेन । काम्यच्सूत्रोक्त इति । तत्र हि यतः सुबन्तादयं विहितोऽतः फलाभावात्ककारस्य नेत्त्वमिति व्युत्पाद्य इदन्तर्हि प्रयोजनमुपयट् काम्यति कितीति सम्प्रसारणं यथा स्यात् । एतदपि नास्ति प्रयोजनम् । यजादिभिरत्र किं विशेषयिष्यामः । यजादिभ्यो विहित इति । अयं सुबन्तादिहित इति नात्र सम्प्रसारणप्राप्तिः । अथापि कथञ्चिदित्कार्यं स्यादेवमपि न दोषः । क्रियते तन्यास एव । सुप आत्मनः क्यच्च काम्यच्चेति । एवञ्च प्रत्ययादिश्चकारस्तस्य चुटू इत्यनेनेत्संज्ञा अथापीति । यजादिभिः किन्न विशेष्यते कार्यित्वेनैव यजादयो निर्दिश्यन्त इति भावः । यद्यपि वाक्काम्यतीत्यादौ द्वितीयपक्षे सम्प्रसारणम्प्राप्नोति । तथापि धातोः कार्यमुच्यमानन्तत्प्रत्यय इतिपरिभाषया समाधेयम् । न फलभेद इति । यदि क्विशब्दमुच्चार्येत्यर्थो न स्यात्तदा प्रकृते क्विनिमित्तकसम्प्रसारणे कर्त्तव्ये स्थानिवद्भावनिषेधात्सम्प्रसारणन्द्वितीयपक्षे प्राप्नोति । प्रथमपक्षे तु नेति फलभेदः स्पष्ट एव ॥ वस्तुतस्तु छन्दसि सहः वहश्चेतियोगविभागकरणाद्वहश्चेतिसूत्रे छन्दसीति न सम्बध्यते । न च योगविभागः कव्येतिसूत्रे वहमात्रसम्बन्धार्थ इति वाच्यम् । एकयोगनिर्दिष्टानामेकदेशोप्यनुवर्त्तत इतिपरिभाषया तावन्मात्रस्याप्यनुवृत्तिसम्भवात् । किन्त्वस्मिन्पक्षे मण्डूकप्लुत्या छन्दसीत्यस्य कव्येतिसूत्रे सम्बन्धो वाच्यः । अस्माभिस्तु प्रष्ठौहेत्यादिभाष्यप्रयोग एवेत्याशयेनाह । वस्तुत इति ॥ अनडुहश्चेत्यत्र सान्त्याच्चः परदेश एवामो नुमश्चोत्पत्तिर्वाच्या सा च विरोधान्न सम्भवतीति विशेषविहितेन नुमा बाधा आशङ्क्य स्यादत आह । मूले विशेषविहितेनेति । नुम उपजीवकत्वेनेति । आदित्यधिकारादामोऽत्र सङ्ग्रह एव नुमः प्राप्तिरनेन तयोर्बाधः । वैयर्थ्याभावादिति । यं विधिम्प्रतीति न्यायात् । विषयभेदेऽपीति । तदप्राप्तियोग्ये विषये ह्यचारितार्थ्यमपवादत्वे बीजन्तदप्यस्तीति भावः ।

अपवादत्वस्यैवासम्भवादिति। उभयोरपूर्वबोध्यत्व एव बाध्यबाधकभावो युक्तो नैवमुक्तं सम्भवतीति भावः। ध्वनितञ्चेदमिति। तत्र ह्याद्यप्रत्ययग्रहस्य प्रयोजनमुक्तं सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणेन यथा स्यात्लोपोत्तरं यत्प्राप्नोति तत्प्रत्ययलक्षणेन मा भूदिति। किम्प्रयोजनम्। ग्रामणिकुलम्। सेनानिकुलम्। औत्तरपदिके ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुङ्मा भूदिति। आद्यप्रत्ययग्रहणसत्त्वे यद्येतादृशार्थलाभस्तर्योक्तं कैयटेन। प्रत्ययग्रहोत्र लुप्तसप्तमीको निर्देश्यते। तेन प्रत्यये सति यत्कार्यंनदृष्टं तल्लोपेऽपि भवतीति। न च ग्रामणीरित्यत्र क्विपि सति तुग् दृष्टो ह्रस्वाभावात्। कृते क्विपो लोपे ह्रस्वत्वे च तुक्प्राप्तिः ततो भगवता यदि तर्हि यत्प्रति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति लोपोत्तरं यत्प्राप्नोति तन्न भवति। जगत् जनगत् इत्यत्र तुङ् न प्राप्नोति। लोपोत्तरं ह्यत्र तुगागम इत्युक्तम्॥ अत्र विलोपात्पूर्वमपि गमः क्वाविति स्य प्राप्तिसत्त्वादनुनासिकलोपे क्विपि सति तुकः प्राप्तिरिति चेदत्र कैयटः द्युतिगमिजुहोतीनां द्वे चेति गमेः क्विप्। अन्तरङ्गत्वात्पूर्वं विलोपः। गमः क्वाविति यं लोपोङ्गविशेषापेक्षत्वाद्बहिरङ्गः॥ विलोपस्यापरनिमित्तकत्वेनान्तरङ्गत्वमिति भावः॥ भिन्नविषयत्वाद्येन नाप्राप्तिन्यायो न भवति॥ सति त्वस्मिन्न्याये नैव विलोपः स्यादिति॥ एतच्चासम्भवे एवापवादत्वमिति वार्त्तिकरीत्या॥ वस्तुतस्त्वचि रादेशस्य नुडपवादत्वमाशङ्क्य न तिस्रिति ज्ञापकेन भाष्यकृता नुट् साधितस्तद्रीत्या विषयभेदेऽपि गमः क्वाविति स्यापवादत्वं स्यादेवञ्च पूर्वमनुनासिकलोपे तुकः प्राप्तिसत्त्वेन तुगभावप्रतिपादनपरभाष्यमसङ्गतं स्यादेतेन लोपेनानुत्पत्तेरेवान्वाख्यानेन प्रत्ययलोपस्याभावरूपस्य पूर्वकालसिद्धतयाऽनुनासिकलोपस्यापवादत्वन्नेत्याशयः कथास्तेनेदम्वनितमित्यर्थः॥ एवमेव॥ शास्त्रेणानुत्पत्त्यन्वाख्यानस्थले प्रत्ययलोपव्यवहारादेव॥ तत्सूचोदाहरणत्वम्॥ प्रत्ययलोपे प्रत्ययलक्षणमितिसूत्रोदाहरणत्वमित्यर्थः॥ अनुवादस्थल इव विधेयविषयेऽपि इत्यज्ञां विनैवोच्चारणार्थानाविद्वत्तिवादिमतमसङ्गतमिति सूचयितुं शङ्कते॥ नन्विति॥ विधेयविषय इति॥ एतेनानुवादस्थले लक्षणया निर्वाहेपि न विधौ परः शब्दार्थ इतिन्यायेन विधेयविषये लक्षणाया असम्भवः सूचितः॥ ननु-

च्चारणार्थत्वमुत्तरवर्णस्य पूर्ववर्णोच्चारणे साहाय्यकत्वरूपमन्यत्र हयवरडित्यादौ दृष्टन्न तु पूर्ववर्णस्य तथान्यत्र दृष्टमित्यस्वरसादाह ॥ किञ्चेति ॥ द्वितीयवर्ण इति ॥ स च प्रकृते औकारः ॥ पूर्वोक्तार्थे भाष्यान्तरसंवादमप्याह ॥ अत एवेति ॥ उच्चारणार्थानामित्संज्ञां विना निवृत्त्यभावादेव । विधेयबोधकशब्दघटकतयोच्चारितहल्विषये व्यवस्थामुक्ताऽज्विषयेऽप्याह । तथा विधेति । अनुनासिकपरस्येति । अनुनासिकः परोऽवयवो यस्येत्यर्थः । तादृशश्च क्ष्विदादिरेव तेष्विकारस्योच्चारणार्थमुच्चारितस्यानुनासिकत्वादुपदेशेऽजित्यनेनेत्संज्ञया निवृत्तिरित्युक्तभवति । अत एव । उच्चारणार्थानामित्संज्ञासत्त्वादेव । सजादेशकरणेनेति । अमंस्थेत्यत्रानिदितामितिनलोपापवादस्तु हनः सिजिति नलोपार्थं कित्त्वविधानेन ज्ञापकेन वारयितुं शक्या । ननु भुज्युः शंयुरित्यादौ युवोरनाकावित्यस्यातिप्रसङ्गमाशङ्क्यानुनासिकपरस्य स्थानित्वेन निर्देशः स्वीकृतः । एवञ्च ल्युडादावपि तादृशस्यैवानुवाद आवश्यकस्तथा सति तदादेशस्य स्थानिवद्भावेनोगित्वादुगित्कार्यमाप्नोतीत्याशङ्क्याह । ल्युडादावुकारस्येति ॥ नन्वेषूकारस्यानुनासिकत्वाभावे कथमतिप्रसङ्गवारणमिति चेन्न ॥ युवोर्यवांश एवानुनासिकत्वं स्वीकृत्य तादृशानामेव स्थानिवत्त्वेनाश्रयणात् । अत एव ॥ अनुनासिकत्त्वाभावादेव ॥ टाबन्तप्रयोग इति ॥ उगित्त्वे तु ङीप्स्यात् । अमरस्य प्रमाद इति । यदि तु ख्यन्तप्रकृतिकयुजन्तमेतदित्युच्यते तदा तु न दोषः । परन्तु तदर्थपरत्वसम्पादने क्लेशः । यदुक्तम्पूर्वत्र विधेयेति तत्फलमाह ॥ अनुवादविषये त्विति ॥ यथा आतो धातोरित्यादौ ॥ व्यवसितान्त्यत्वाभावेन ॥ धातुप्रातिपदिकप्रत्ययनिपातागमादेशानामेव व्यवसितपदार्थत्वेन भाष्ये उक्तत्वात् ॥ न चात इति विभक्तिदर्शनेन प्रकृतिभागस्य प्रातिपदिकत्वमस्त्येवेति वाच्यम् ॥ धात्वादिसाहचर्येण स्वस्वरूपातिरिक्तार्थबोधकानामेव तत्र प्रातिपदिकपदेन ग्रहणात् ॥ न च नमोवरिवसितिसूत्रपठितचित्रङ्शब्दस्य स्वरूपबोधकतया प्रातिपदिकपदेन तदसङ्ग्रहः स्यादिति वाच्यम् ॥ सर्वस्यापि शब्दस्य स्वस्वरूपबोधकतया स्वस्वरूपातिरिक्तलौकिकार्थस्य विवक्षिततया चित्रङ्शब्दस्य तथात्वात् ॥ शब्दार्थयोर्भेदाभेदौ स्वमतसिद्धावेवेति नाप्रसिद्धिः ॥ विभक्त्युत्पत्तिप्रयोजकप्रातिपदिकत्वमभ्युपे-

त्यप्याह ॥ फलाभावेन चेति ॥ यद्यप्यात इति तकारस्य फलं लाक्षणिकस्याप्याकारस्य ग्रहणं वर्णग्रहणेपि लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तेः सिद्धान्तिसम्मतत्वात्तथापि तच्छुद्धस्यैव तकारस्य न तु इत्संज्ञकस्य तकारस्येतीत्संज्ञायाः फलाभावोऽस्त्येव। मुद्तिथीरित्यादाविकारादेरुच्चारणातिरिक्तफलाभावोऽस्त्येव । तदर्हते लक्षणेति ॥ उच्चारणार्थवर्णघटितसमुदायस्य स्वरूपमितिसूत्रबलाच्छक्तत्वेन क्लृप्तस्य तादृशवर्णरहिते लक्षणा ॥ लक्षणाप्रयोजकसम्बन्धश्च स्वघटकसाजात्यम्। सा। लक्षणा। न विधाविति। विधौ विधेयबोधकपदे परः शक्यादन्यो लक्ष्यार्थः स्वबोधकत्वसम्बन्धेन नास्तीत्यर्थः। एवञ्चौदादिपदे विधेयत्वेन विवक्षिते तकारादेरित्संज्ञयैव निवृत्तिः। न चैतेषु प्रातिपदिकानाम्प्रतिषेधोऽक्तक्तवतूत्तान्तानामितोत्संज्ञाप्रतिषेधः स्यादिति वाच्यम्। चित इत्याद्यनुवादसामर्थ्येन निषेधाप्रवृत्तेः। ननु यदीकानिर्देशस्तदा गमहनेतिसूत्रेणोपधालोपः स्यादत आह। गमेरिडितिवदति। अनेन निर्देशेनेकः कित्पदेनाऽग्रहणं कल्प्यत इतिभावः। अत एव। इकः क्लृप्तत्वेन तदन्तस्य प्रातिपदिकत्वादेव। सनादिप्रत्ययानुकरणे तु प्रकृतिविदत्यतिदेशानित्यत्वेन प्रातिपदिकत्वं सुलभम्। अत एवेत्यारभ्य केचिदित्यन्तेनान्यमतानुवादः। अत्रार्धर्चबीजन्तु प्रकृतिवदित्यतिदेशानित्यत्वेनैवसकलप्रयोगसिद्धिः कार्या। अन्यथा भुवो वुगित्यादावुपपत्तिर्न स्यादिति। नन्वितिशङ्कायाः पर्यवसानमाह। एवञ्चेति। स्वरितापत्तिः। द्यौरित्यत्रौकारस्य स्वरितापत्तिःस्वरितत्वमकारान्तरेण प्राप्तमभ्युपेत्य समाधत्ते दिव इति। स्रंसनधर्मणः। अनुदात्तत्वधर्मवतः। फलाभावादिति। तितस्वरितमितिसूत्रप्रवृत्तिफलाभावात्। प्रकारान्तरेणापि तदप्रवृत्तिं साधयति। तिति प्रत्ययेति। नन्वेवम्पृथिवी उत द्यौरित्यत्र पठ्यमानमन्तोदात्तत्वमुपपद्येतेत्यत आह। अन्तोदात्तमिति। सुद्यौरित्यत्र स्थानिवद्भावेन हल्ङ्यादिलोपो यथा न भवति तथोपपादयति। अखिधावित्यर्थेति। पदान्तादित्यनुवृत्तस्य। एङः पदान्तादिति सूत्रात्। अन्तोदात्तो निपात्यत इति। अन्तस्य दिवशब्दान्तस्य वकारस्य स्थाने प्राग्वदुदात्तो निपात्यत इत्यर्थः। तत्फलमाह। तेन द्युभिरिति। अत्र दिवशब्देऽकारस्योदात्ततया स्रंसनधर्मणो वकारस्य स्थाने जायमान उकारोऽनु-

दात्तः स्यात्तत्रेकारस्य यण्, दात्तस्वरित इत्यनेनोकारः स्वरितः स्यादित्युकारस्योदात्तत्वनिपातनमुदात्तस्य श्रवणार्थम्। न चानेन निपातनस्य रेणङिदडमितिसूत्रेण प्राप्तविभक्तिस्वरस्यापि बाधो भविष्यतीति दिवो झलिति तन्निषेधोव्यर्थ इति वाच्यम्। अहर्विमलद्यु इत्यत्र पूर्वपदप्रकृतिस्वरबाधनेन दिव उत्सूत्रस्थनिपातनस्वरस्य चरितार्थतया द्युभिरित्यत्र विभक्तिस्वरस्य परत्वाप्राप्तस्य निषेधार्थन्दिवो झलितिसूत्रस्यावश्यकत्वात्। प्रकृते तु उदात्तस्वरितयोरित्यस्यासिद्धत्वान्निपातनस्वरेणोकारस्योदात्तत्वमेव भवति। तथोक्तमिति। सम्प्रसारणजातत्वाभावात्। कैयटाद्युक्तिं खण्डयति। यत्त्विति। एतेन। प्रागुक्तरीत्या प्रकारान्तरेणैव दीर्घाभावस्य सिद्धत्वेन। बह्वृपेत्रस्य बहिरङ्गत्वप्राचीनमतसिद्धान्तद्वीत्या दूषणान्तरमाह। दीर्घस्य बहिरङ्गतयेति। अत एव। दीर्घस्य बहिरङ्गत्वादेव। तस्य दीर्घस्य तु जुगूर्षतीत्यादिरवकाशः स्यात्। अत एव। बहिरङ्गत्वादेव। अत्र दीर्घस्य परनिमित्तकत्वेनापि बहिरङ्गत्वम्। ष्णान्ता षडिति सूत्रे रेफप्रश्लेषेणैवेष्टसिद्धावत्र चतुर्ग्रहणन्न कार्यमित्यभिप्रायेण कृतामाशङ्कान्निरस्यति। रेफान्तस्यापीति। तिसृभ्यतस्र इत्यत्र प्राप्तातिप्रसङ्गस्य सन्निपातपरिभाषया वारणेऽपि चतुरश्शब्देतिप्रसङ्गमाह। चत्वार इत्यत्रेति। तत्र। षड्भ्य इति सूत्रे। पदलाघवाभाव इति। न च षट्चतुर्भ्यो हलादिरिति सूत्रेप्येवं सति चतुर्ग्रहणन्न कार्यमिति लाघवमस्त्येवेति वाच्यम्। एवमपि पदलाघवाभावस्य तदवस्थत्वात्। न च चतसृणामित्यत्र रान्तत्वमादेशे कृते नास्ति। स्थानिवद्भावस्तु वक्तुमशक्योऽलविधित्वादिति कथं षडित्यनेन विभक्त्युदात्तत्वमिति वाच्यम्। लक्ष्यानुरोधात्प्रकृते यथोद्देशपक्षस्यैवाश्रयणेनादेशात्पूर्वं जातषट्त्वस्य तदादेशे स्थानिवद्भावेन सौलभ्यात्। प्राचीनोक्तिं खण्डयति। के चित्त्विति। अर्थपरमिति। द्विवचनेन निर्देशे कर्त्तव्ये बहुवचननिर्देशसामर्थ्यात्। शब्दद्वारकमिति। स्ववाचकशब्दात्परत्वमेवार्थात्परत्वम्। नन्वर्थात्परत्वाश्रयणेऽपि प्रियपञ्चन्शब्दात्परस्यामः शब्दात्परत्वमस्त्येवेत्यत आह। सचार्थः प्रधान एवेति। तामुक्तिं खण्डयति। तन्नेति। अयमाशयः। प्रत्ययानामप्रकृत्यर्थान्वितस्वार्थबोधकत्वं व्युत्पत्तिसिद्धमिति यत्र षडाद्य-

थः प्रकृत्यर्थः स्यात्तदा तेषु प्रत्ययार्थान्वयो वाचः स च न सम्भवतीति लाघवादाह । परत्वस्येति । अवधित्वसम्बन्धेनेत्यादिः । एवं च । आरोपे सति च । प्रथमपक्षाभिप्रायेणाह । तत्र सम्बन्ध इति । द्वितीयपक्षाभिप्रायेणाह । तन्निरूपितेति । आरोपितपरत्वनिरूपितेऽवधित्वरूपसम्बन्ध इत्यर्थः । क्रियाकारकयोः सम्बन्धस्य विभक्तिर्वाचिकेतिसिद्धान्तात् । ननु प्रत्ययार्थस्यावधित्वस्य स्वाश्रयवाचकत्वसम्बन्धेन षडाद्यर्थेऽन्वयो भविष्यतीत्यत आह । परम्परासम्बन्धेनेति । साक्षात्सम्बन्धेन । यत्रैकस्मिन्नेव पदार्थात्मकसम्बन्धे द्वयोः सम्बन्धिनोः प्रतियोगित्वानुयोगित्वयोः सम्भवः स साक्षात्सम्बन्ध इत्युच्यते न च तयोरेकस्मिन्परम्परासम्बन्धे घटके सम्भवः । ननु तथात्वाभावेऽपि प्रकृते तथास्त्वित्यत आह । अत एवेति । प्रकृतिप्रत्ययार्थयोः परम्परासम्बन्धेनान्वयाभावादेव । गौणाधारादाविति । गङ्गायाङ्गावः । कूपे गर्गकुलमित्यादौ । स्वरितत्वप्रतिज्ञानादिति स्वरितेनाधिकारः अधिकङ्कार्यमित्यर्थात् । गङ्गायामत्स्य इत्यादौ मुख्ये आधारे चरितार्था सप्तमी गौणेऽपि भवति । यदि परम्परासम्बन्धेन प्रकृत्यर्थप्रत्ययार्थयोरन्वयोपि व्युत्पन्नः स्यात्तदा गङ्गायाङ्गाव इत्यादौ मुख्ये आधारे सप्तमीं विधाय तत्र प्रकृत्यर्थस्य परम्परासम्बन्धेनान्वयोपपत्तौ स्वरितत्वकल्पनाक्लेशो व्यर्थः स्यादिति भावः । अत एव । साक्षात्सम्बन्धस्य विभक्तिवाच्यत्वादेव । अत एव । उक्तरीत्या परत्वस्यासम्भवादेव । अर्थग्रहणमितिपक्ष इति । तत्र हि स्त्रीग्रहणं स्त्रीप्रत्ययग्रहणमुत स्त्रीशब्दग्रहणमाहोस्विदर्थग्रहणमिति पक्षत्रयसंभावना कृता । तेषु प्रथमपक्षे स्त्रीप्रत्ययस्य प्रतिषेधो विज्ञायेत एवं सति श्येनभार्यः । एतभार्य इत्यत्रार्थस्यानिवृत्तत्वान्नकारश्रवणप्रसङ्गः । स्थानिवद्भावप्रसङ्गेन पटुभार्य इत्यत्र यणादेशप्रसङ्गेन चायम्पक्षो निराकृतः । स्त्रीशब्दग्रहणमिति द्वितीयपक्षे स्त्रीरूपार्थवाचकस्य शब्दस्य पुमर्थवाचकशब्दातिदेश इत्यर्थके अङ्गारका नाम शकुनयः तेषां कालिकाः स्त्रियः कालिका वृन्दारिका अङ्गारकवृन्दारिकाः प्राप्नुवन्ति । हंसस्य वरटा कच्छपस्य डुली । तत्र वरटावृन्दारिका हंसवृन्दारिकाः । डुलीवृन्दारिकाः कच्छपवृन्दारिकाः प्राप्नुवन्तीति दोष उक्तः । अर्थग्रहणमितितृतीयपक्षेऽपि अङ्गारकवृन्दारिका इत्यादिदोषमभिधाय शङ्कि-

तम्। भाषितपुंस्कादित्युच्यते तेनैतेषु न भविष्यतीति। तत एवमभिहितम्। भाषितपुंस्कानुपपत्तिश्च । न ह्यर्थेन पौर्वापर्यमस्तीति। ततः सिद्धान्तितम्। तस्मादस्तु मध्यमः पक्ष इति। व्याख्यातश्चोपाध्यायैः। शब्दग्रहणपक्षे साक्षादुत्तरपदेन पौर्वापर्यसम्भवादिति। अधिकन्तत्रैव स्पष्टम्। केचित्तु शब्दावधिकपरत्वस्यार्थावधिकत्वे न बाधकम् शब्दार्थयोस्तादात्म्यात्। न ह्यर्थेनेतिभाष्यन्तु तयोरौपाधिकभेदाभ्युपगमेनेति वदन्ति। अत्रेदं वक्तव्यम्। शब्दार्थयोस्तादात्म्यमिति यद्यपि सिद्धान्तिसम्मतम्। तथापि प्रक्रियादशायाम्भेदेनैव सर्वा कल्पना । अत एव स्वं रूपं शब्दस्येतिसूत्रभाष्ये तत्सूत्रप्रयोजनकथनावसरे शब्देनोच्चारितेनार्थो गम्यते। अर्थे कार्यस्यासम्भवादिह च व्याकरणे अर्थे कार्यस्यासम्भवः अग्नेर्ढगिति न शक्यते अङ्गारादिभ्यः परो ढक्कर्तुमितिरीत्योक्तम्। यदि तादात्म्याभिप्रायेण व्याक्रिया भाष्यसम्मता स्यात्तर्ह्येवमुक्तिर्विरुध्येत। नन्वेवन्दिक्शब्दयोगे पञ्चमीतिव्यवहारानुपपत्तिः। तत्राप्यर्थगतसम्बन्धमादायैव शब्दसम्बन्धस्य वक्तव्यत्वादत आह । दिक्शब्दयोग इति। पूर्वत्रासिद्धमितिवचनस्य हित्वविषये पूर्वत्रासिद्धत्वन्नेत्यर्थेन हित्वमपि पूर्वत्र कर्तव्येऽसिद्धन्नेत्यर्थोपि सम्भाव्यते तदभिप्रायेण शङ्कते। नन्विति। णत्वात्पूर्वमेव हित्वमिति। परत्वादिति शेषः। ननु पदहित्व एव तस्य वचनस्य प्रवृत्तेराह । वाक् वाक् इति। तत्प्रवृत्तेरिति । पूर्वत्रासिद्धेतिवचनप्रवृत्तेरित्यर्थः। भाष्योदाहरणे वावसान इतिचर्त्वम्। अन्यथा। तद्वचनप्रवृत्त्यभावे। गस्यैव हित्व इति। न च वावसानइतिचर्त्वस्य जश्त्वापवादतया चर्त्वाभावपक्षे एव गकार इति कथमेतदिति वाच्यम्। षान्ता षट् इतिनिर्देशेन क्वचिदपवादात्पूर्वमप्युत्सर्गप्रवृत्तिरित्याशयात्। अत्रार्थे भाष्योदाहरणमपि मानम्। अत्यस्य चर्त्वे। वावसान इत्यनेन। ननु खरि चेति पूर्वगकारस्यापि चर्त्वं भविष्यतीत्यत आह। अवसान इति। वर्णहित्वविषये परिभाषाप्रवृत्तावपि शङ्कते। न चेति। अवावसाने जायमानचर्त्वशास्त्रस्यासिद्धत्वे तेन निष्पन्नकार्यस्याप्रवृत्तिबुद्धौ ककार एव गकारबुद्धिः। गकारे। गकारबुद्धौ। उक्तरीत्या। अवसानेचर्त्वासिद्धत्वेन। गश्रवणम्। झलाञ्जशोन्तेतिविहितगश्रवणापत्तिः। इत्यप्यर्थ इति । एवं सति झलां जशिति जश्त्वे चर्त्वस्यासिद्धमिति भावः। एतेन । वक्ष्यमाणप्रकारेण।

तमेव प्रकारमाह। एतदेवेति । सामान्यतो द्वित्वविषये प्राप्तस्यासिद्धत्वाभावस्यैकदेशानुवादरूपत्वं द्वित्व इतिवचनस्येत्यर्थः। पूर्वपत्वं खण्डयति। पूर्वत्रेति। पूर्वत्रासिद्धीयमित्यस्य पूर्वत्रासिद्धमित्यधिकारभवशास्त्रमित्यर्थः। तत्र उपतिष्ठत इत्यध्याहारः । एवञ्च रषाभ्यामिति सूत्रे पूर्वत्रासिद्धमित्यस्याद्वित्व इत्यस्य चोपस्थितौ रषाभ्याम्परस्य नो णो भवति । अयञ्च द्वित्वभिन्नपूर्वत्रासिद्धो भवतीत्यर्थः। एतेन यत्फलितन्तदाह। पूर्वत्रासिद्धीयमद्वित्व इति । रोः सुपीति सूत्रे सुपीत्यनेन प्रत्याहारग्रहणङ्कृतो नेत्याशङ्कानिवारणायाह। अत्र खरीति। रोर्यदि विसर्गस्तर्हि सुप्येवेति नियमो भवत्वित्यत आह। विपरीतेति। ननु चतुर्भ्यादौ सत्यपि द्वित्वे चतिविरहः। भरो भरीतिलोपेन रूपसिद्धेरत आह। भरो भरीतीति। प्रधानन्यायेनेति। प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्यय इतिन्यायेनेत्यर्थः । ननु पञ्च ब्राह्मणा इत्यादावपि पञ्चत्वसङ्ख्याया आश्रयांशे विशेषणतया प्राधान्याभावेन तन्न्यायविषयता प्रकृते न सम्भवति उभयसत्वे हि स न्याय इत्यत आह । संख्यापदेनेति । न्यायानाश्रयणेनापि गौणव्याहृत्तिमाह। अन्वर्थेति। षड् ब्राह्मणा इत्यत्र यथा षट्शब्दे प्रयुक्तेऽन्यव्यवच्छेदो भवति संख्येयस्य प्राधान्येन प्रतीतिर्भवति तथा प्रकृतेपि । षडिवाचरतीत्यर्थेत्र विवक्षित इति भावः। अस्याः। षट्संज्ञायाः। डुसंज्ञयेति। न हि तदा निरुक्तार्थकत्वमस्य सम्भवतीति भावः । ननु डुसंज्ञापक्षे तादृशार्थकत्वाभावेऽपि षट्संज्ञापक्षे तु सम्भवोऽस्त्येवेत्यत आह । सर्वनामेत्यादि। मुख्यं समाधानमाह। सर्वनामसंज्ञासूत्रस्थेनेति। अङ्गाधिकारे यदुच्यते गच्छमाणविभक्तेस्तङ्गवतीतिभाष्येणेत्यर्थः। तस्मोद्गीणे षट्त्वसत्त्वे नुड्व्याहृत्तिरेव सम्पादनीयेति तत्त्वम्। नन्वयमस्ति कर्त्रे हर्त्रे इतिभाष्यादिति । आदौ न हि पदान्ताः परेऽण इतिसमान्यतोऽभिहितन्ततो नन्वयमस्तीत्यनेन परोऽण् अज्रूप एव दर्शितो न तु हल्रूप इति परस्याणोऽनुनासिकत्वयोग्यस्याज्रूपस्य स्वीकारः सम्भवति न तु हलः। अचानुनासिकत्वयोग्येत्यभिधानात्खर् अन्तर् प्रातरित्यस्य लिह् इत्यस्य सत्त्वेऽपि न क्षतिः । तेषामनुनासिकत्वयोग्यत्वासम्भवात्। अमोऽनुनासिका न क्षतीत्यत्रेः । कमलित्यत्र लकारस्य तादृशस्य सम्भवेऽपि नन्वयमस्तीत्यनेनाच एव प्रदर्शनेन तस्याप्यनभिधानम्। ननु ण्यन्त-

कतिपयादिसम्भवोऽस्येवेत्यत आह। क्विपीति । न च प्राग्दीव्यतोऽणित्यत्र यथा दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणेऽन्तथा कतिपयशब्दैकदेशयान्तानुकरणे यान्तस्य सम्भवोऽस्येवेति वाच्यम्। पूर्वोक्तभाष्यसारस्यैवानुकार्यस्वरूपभङ्गभिया च तत्रानुनासिकत्वयोग्यतायाः सम्भवेऽप्यनभिधानङ्कल्पत इति भावः। ननु प्रशाम्शब्दस्य स्वरादौ पाठेनाव्ययत्वमिति प्रशामाविल्याद्यनुपपन्नमत आह। अयमिति। अव्ययमितिमहासंज्ञाबलेनासत्त्ववाचिनो ग्रहणेनास्य तत्र पाठश्चरितार्थः । स्वरादीनां तु पाठसामर्थ्यात्सत्त्वार्थकत्वेऽप्यव्ययत्वम् । मूले किमः कः स्यादिति । अत्र किम्शब्दो जिज्ञासिते शक्तः । अत्रेदमवधेयम्। उद्देश्यवाचकस्य किंशब्दस्य विधेयवाचकशब्दसमभिव्याहारे तत्प्रतीपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वोपलक्षितो यो वक्तृजिज्ञासितो धर्मस्तद्धर्मावच्छिन्नबोधकता वाच्या। स च धर्मः को ब्राह्मणः कः पण्डित इत्यादौ चैत्रत्वादिरूप एव। न तु जिज्ञासाविषयतावच्छेदकांशे तस्यानुगमकस्य शक्त्यैक्यसम्पादकस्य धर्मस्य विशेषणत्वम्। तेन रूपेण जिज्ञासाविषयतावच्छेदकधर्मस्य शाब्दबोधे मानाभावात्। एवञ्च को ब्राह्मण इत्यतो ब्राह्मणत्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन जिज्ञासितो यो धर्मस्तद्वान् ब्राह्मण इत्याकारकोऽन्वयबोधः श्रोतुः। वक्तुश्च किञ्चिद्धर्मावच्छिन्नोद्देश्यतानिरूपित ब्राह्मणत्वावच्छिन्नविधेयताशालिज्ञानमस्मे जोयतामित्याकारिका जिज्ञासा प्रथमं भवति । सा च वक्तृवाक्यजन्यसमभिव्याहृतब्राह्मणादिपदार्थतावच्छेदकावच्छिन्नविधेयतानिरूपितकिञ्चिद्धर्मावच्छिन्नोद्देश्यताकबोधेन निवर्तते। न चैवम्प्रमेयो ब्राह्मण इतिवाक्यादपि तादृशजिज्ञासानिवृत्तिः स्यात्। एतद्वाक्यस्य किञ्चित्प्रमेयत्वादिरूपधर्मावच्छिन्नोद्देश्यकबोधजनकत्वादिति वाच्यम्। पूर्वोक्तानुगमकधर्मोपलक्षितधर्मस्य विधेयन्यूनवृत्तित्वेनापि विशेषणीयत्वात्। विधेयबोधककिम्पदस्य तु समभिव्याहृतपदार्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो यो धर्मस्तदवच्छिन्ने शक्तिः। यथा द्रव्यङ्किमस्तीत्यादौ। यत्र सर्वनामसंज्ञकः किंशब्दः प्रयुज्यते तत्र पूर्वोक्तादिशा बोधः कल्पनीयः। वितर्कबोधककिंशब्दस्य त्यव्ययसंज्ञकस्य प्रयोक्तृसमवेतसम्भानात्मकज्ञानबोधकता।

यथा किमिन्दुः किम्पद्मं किमु सुकुरविम्बं किमुमुखमित्यादौ । तादृशज्ञाने च प्रकारितासंबन्धेनेन्द्वादिपदार्थस्यान्वया । तादृशज्ञानस्य तु विशेष्यतया प्रथमान्तार्थेऽन्वय इति ॥ यत्र तु कति घटाः सन्तीति प्रयुज्यते तत्रापि जिज्ञासित एव किम्पदार्थः । डतिप्रत्ययार्थः सङ्ख्यात्वावच्छिन्नः । एवञ्च संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोदेश्यतावच्छेदकताकज्ञानं जायतामित्याकारेच्छाविषयाभिन्नसंख्याविशिष्टाः सन्तीति बोधः । दश घटाः सन्तीतिवाक्यात्मा आकाङ्क्षा निवर्त्तते । यत्र कस्य राजा पटुरित्यादावुद्देश्यतावच्छेदकीभूतषष्ठ्यर्थे किंशब्दार्थान्वयस्तत्र यादृशधर्मविशिष्टसम्बन्धे येन सम्बन्धेन जिज्ञासितान्वयस्तत्र तेनैव सम्बन्धेन विशेषधर्मावच्छिन्नान्विततादृशसम्बन्धधर्मितावच्छेदकबोधः । एवं सर्वत्रोहनीयम् । नन्वव्ययसर्वनाम्नामितिसूत्रेण किंशब्दादकचि कृते शब्दान्तरत्वादादेशो न स्यादतआह । तन्मध्येति । ननु स्वार्थे परिपूर्णस्य कुत्सार्थसम्बन्ध इत्यन्तरङ्गत्वात्पूर्वङ्भावादेशेऽकचि कक इति स्यादत आह । अङ्गानपेक्षत्वेनेति । अङ्गसंज्ञापेक्षत्वेनेत्यर्थः । यद्यपि प्रियकुत्सनादियोगः सुबन्तस्यास्ति तथापि सुपः शब्दतो निमित्तत्वेनानुपादानादन्तरङ्गत्वमकचः । कादेशे तु विभक्तेः शब्दतो निमित्तत्वेनाश्रयणाद्बहिरङ्गत्वमिति भावः ॥ अत एव । तन्मध्यपतितन्यायविषयेऽपि निर्दिश्यमानपरिभाषाप्रवृत्तिस्वीकारादेव । अन्तरङ्गत्वादिति । अकचःकुत्साविषयतिङन्ताद्विधानेन बहिरङ्गत्वन्यादेशस्य तु तदन्तर्गतद्विभक्तेपेक्षत्वेनान्तरङ्गत्वमितिभावः । कैयट इति । एतेनारुचिः सूचिता । यथा स्थानिवद्भावविषये स्थानिवुध्यैव कार्यप्रवृत्तेस्तत्र निर्दिश्यमानपरिभाषाया अप्रवृत्तिस्तथा तन्मध्यपतितन्यायेनापि तद्बुध्यैव कार्यप्रवृत्तेरेतद्विषयेऽपि निर्दिश्यमानपरिभाषाया अप्रवृत्तिकल्पनेनैवसाकच्कुस्यादेशसिद्धावाद्रत्याश्रयणं व्यर्थमिति । एतेन निर्दिश्यमानपरिभाषाया व्याख्यानावसरे परिभाषेन्दुशेखरेऽकज्विषये निर्दिश्यमानपरिभाषाया अप्रवृत्तिरुक्ता इह तु साकच्कस्य कार्यप्राप्तौ निर्दिश्यमानपरिभाषाप्रवृत्तिं स्वीकृत्य समाधानं कृतमिति विरोध इतितदेतत् प्रत्युक्तम् । इदमो मः । यद्यपि इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम् । अदमस्तु विप्रकृष्टमादिति परोक्षे

विजानीयादित्यभियुक्तोक्तवचनेन सन्निकृष्टसामान्ये शक्तिरिदम्शब्दस्येति लभ्यते सन्निकर्षश्च परमाणुरित्यादिसाधारण इत्ययम्परमाणुरित्यादिव्यवहारापत्तिः। तथापि सन्निकर्षप्रयोज्या या लौकिकविषयता तच्छालिनी या बुद्धिस्तद्विषये इदमशब्दस्य तादृशबुद्धिविषये समीपतरपदार्थे चैतदः शक्तिः। मात्रालाघवानुरोधेनाह। हल्यश्चितीति। श्चित्वात्सर्वादेशोऽयम्। गौणेऽनादेशाप्रवृत्त्यर्थन्त्यदादीनामिति के चिदनुवर्त्तयन्ति तदयुक्तमिति सूचयन्नाह। अक इति पर्युदासादिति। संयोगवद्विप्रयोगस्य विशेषावगतिहेतुत्वादवत्सा धेनुरानीयतामित्यत्र सम्भवद्वत्ससम्बन्धवती या गौः सैवानीयते तथेहाप्यक इत्यनेन ककारयोग्यतावान्वायावर्त्यत इति भावः। नानर्थक इतिपरिभाषाया अभावेऽपि हलि लोप इत्यत्र यथा दोषाभावस्तथाह। प्रत्याख्यान इति। आद्यन्तशब्दयोरवयवबोधकतयाऽवयवस्य चा वयविनमिति नित्यसाकाङ्क्षत्वेनाह। विशिष्टशक्तयेति। आदिशब्दस्य स्वाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वघटितसमुदायघटकवर्णाभावविशिष्टं यत्तादृशसमुदायघटकवर्णस्य स्वपूर्वत्वसम्बन्धेन वैशिष्ट्यान्तद्विशिष्टे शक्तिः। अन्तशब्दस्य तु स्वपूर्वत्वसम्बन्धावच्छिन्नतादृशसमुदायघटकवर्णस्य योऽभावस्तादृशसम्बन्धेन तादृशसमुदायघटकवर्णविशिष्टस्तत्र शक्तिः। उभयत्र वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन असहाये न स्युरिति। सर्वत्र विशिष्टाभावसत्त्वात्। उपमेय इति। एकस्मिन्नितिसप्तमीदर्शनादित्यर्थः। मथुरावत्पाटलिपुत्रे प्राकार इतिवाक्यात्पाटलिपुत्राधिकरणकप्राकारतौल्यप्रतीतेरेवानुभवसिद्धत्वादिति भावः। इति स्थित इति। अस्य त्वदादयत्वे कृत इति शेषः। ननु स्मैआदेशे कृतेऽपि अनादेशस्य प्राप्त्याऽनादेशस्यापि स्मैभावतुल्यतया नित्यत्वान्ङेस्मै इत्यनुपपन्नमत आह। स्मैआदेशे त्विति। अकोकोरित्यनयोरिति। अनाप्यक इत्यस्य नेदमदसोरकोरित्यस्य चेत्यर्थः। उभयत्रापीति। सावेकाच इति सूत्रेऽपकर्षेणान्तोदात्तादित्यस्योडिदमितिसूत्रे चानुवृत्त्याऽन्तोदात्तादित्यस्य सम्बन्धादित्यर्थः। सर्वानुदात्तमिति। प्रकृतिरनेन प्रत्ययस्त्वनुदात्तौ सुप्पितावित्यनेनानुदात्त इति भावः। अत्रार्थे साधकमाह। एभिरग्न इति। यथास्य साकच्कार्थत्वन्तदाह। श्चित्वादिति। तदुदाहरणमिमकाभ्यां सुष्ठु कृतम्। आभ्याभ्युक्तमिति। उत्तरसूत्रेति। तत्र हि

इति भावः। अत्रार्थे साधकमाह। एभिरग्न इति। यथास्य साकच्कार्थत्वं तदाह। शित्त्वादिति। तदुदाहरणमिमकाभ्यां सुष्ठूक्तम्। आभ्यां भुक्तमिति। उत्तरसूत्रेति। तत्र हि त्रतसौ निमित्तत्वेनोपात्तौ तयोश्च संज्ञोपसर्जनयोरसम्भवात्सर्वनामसंज्ञकस्यैव स्थानित्वमित्युत्तरसूत्रेण जायमानादेशस्य संज्ञोपसर्जनभिन्नस्यैव बोध्यत्वमित्यर्थाधिकारानुरोधात्पूर्वसूत्रस्थमग्रहणमपि संज्ञोपसर्जनभिन्नस्यैव बोधकमिति भावः। अन्यार्थत्वापत्तेरिति। अन्यस्य त्यदाद्यत्वेन सिद्धावनेनाकारादेशविधानमनन्यार्थं स्यात्तथा चानन्यविकार इतिपरिभाषया त्यदाद्यत्वोत्तरमनेन दकारस्य स्यात्तदर्थम्ओराजीतिवद्विकारमात्रबाधनार्थं वा एतत्स्यादित्यर्थः। स्पष्टञ्चेदभाष्य इति। तत्र हि अन्वादेशश्च कथितानुकथनमात्रन्द्रष्टव्यम्। तदेश्यं विजानीयादिदमा कथितमिदमेव यदानुकथ्यत इति तदाचार्यः सुहृद्भूतान्वाचष्टे अन्वादेशश्च कथितानुकथनमात्रमिति। मूले नलोप इत्युपात्तस्य लोपो नेत्यर्थोपि सम्भाव्यत इत्यतो व्याचष्टे। नकारलोप इति। कार्यकालपक्षाभिप्रायेण शङ्कते। न चात्रेति। पर्युदास इति। यद्ययम्प्रसज्यप्रतिषेधः स्यात्तदा प्रकल्प्यापवादन्यायेन पूर्वम्भातिपदिकसंज्ञाया अप्रवृत्तिसम्भावना स्यादिति भावः। ध्वनितञ्चेदमिति। तत्र हि कार्यकालपक्षाभिप्रायेणाग्नी इत्यत्राप्रगृह्यस्येत्यनुनासिकप्रतिषेधे क्रियमाणे प्लुतस्य सिद्धत्वाद्दिमात्रत्वाभावात्प्रगृह्यसंज्ञा ईदूदेदितिविधीयमाना न प्राप्नोतीत्याशयेन एवमपि यस्मिन्हे प्रगृह्यकार्यन्तत्प्लुतस्य न प्राप्नोतीत्याशङ्क्य यथोहेशपक्षमाश्रित्येदं समाहितम्। यथोहेशेऽपि शङ्कते। न चेति। निषेधाप्रवृत्त्येति। अप्रत्यय इतिनिषेधाप्रवृत्त्येत्यर्थः। यदुक्तं छन्दसीति तदुपपादयति। राजनीत्यादाविति। अत एव। अनभिधानादेव। न लुमतेतिनिषेधानित्यत्वे लाघवमप्याह। एतदनित्यत्वेति। अल्पप्राणत्वादीति। अत्रादिना निरनुनासिकत्वपरिग्रहः। लुक एवौचित्यादिति। एवञ्च पूर्वोक्तरीत्या न लुमतेतिनिषेधानित्यत्वकल्पनमेव वरम्। एतद्ललब्धमेवेति। ङौ निषेधस्योत्तरपदे छन्दसि यच सुपामिति ङेर्लुक् तत्र वा सम्भवस्तयोर्मध्ये उत्तरपदे प्रतिषेधात्परिशेषाच्छन्दस्येवोदाहरणम्। बाह ऊडित्यत्र ङापितत्वेनेति। इदमन्यत्र निरूपितम्। ननु जस्त्रोर्ङ इत्याकारकं वचनम्मुनित्रयानुक्तमित्यप्रामाण्यशङ्कायामाह।

जत्वयोग इति । शित्त्वादाविति । त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मता इति तत्रोक्तेः । अत एव । वर्णान्तराभावादेव । सर्वविभक्त्यन्तेति । अत्र सर्वशब्दो यथासम्भवमनेकार्थकः । तत्राप्येकस्मादनेकविभक्त्यसम्भवादनेकविभक्त्यर्थान्तर्भावाय षष्ठीं कृत्वा समासः कार्य इति भावः । भावसाधन इति । अत्र भावो धात्वर्थः तस्मिन् बुद्धिस्थे सति विधिशब्दः क्रियतेऽतो भावसाधन इत्युक्तम् । धात्वर्थस्य प्रथममुपस्थितत्वात्तदनुसारेणाह । तत्र स्वरादीति । यद्यपि सूत्रे सुप्शब्दः प्रथममुच्चारितस्तथापि भावसाधनस्य प्रथमोक्तत्वात्तदनुरोधेनादौ स्वरादीत्युक्तम् । स्वरोदाहरणम् । पञ्चोर्मम् । अत्र नलोपस्यासिद्धत्वे सत्यर्मे चावर्णेनृदृच् त्रजिति स्वरो न । कर्मसाधनः । विधीयमान इत्यर्थः । सुब्विधौ यथा । राजभिरित्यादि । अत्रैसभावो न । सुब्विधिशब्देऽनेकविभक्त्यर्थान्तर्भावाद्राजभ्यां राजसित्यादि सिद्धम् । अत्र तुक्शब्दस्य पृथङ्निमित्तत्वे ह्रस्वहच्छत्वम् । भ्रूणहच्छायेत्यत्र तुङ् स्यादिति कृति तुगिति । न चैवं कृतीत्युपादानं सफलमेवेति सामर्थ्यात्तुक एव विशेषणमित्युक्त्यसङ्गतिरिति वाच्यम् । सामर्थ्यादित्यस्य स्वार्थान्वययोग्यतावच्छेदकधर्मवत्त्वादित्यर्थात् । अन्यनिवृत्तिफलक इति । एवमभिधानेनान्यनिवृत्तेरशाब्दत्वं सूचितम् । सिद्धविषयकेति । सिद्धः शास्त्रान्तरसिद्धो विषयो यस्येत्यर्थः । अत एव । नियमस्थलेऽन्यनिवृत्तेः फलितत्वादेव । भक्ष्यनियम इति । अत्र नियमपदोपादानेन परिसङ्ख्यापि नियम एवेति भगवता ध्वनितम् । तदाह । तदेव सूचयन्नाह । वच्छिन्नोद्देश्यकेति । अत्रोद्देश्यत्वं स्थानित्वनिमित्तत्वान्यतरत्वरूपम् । निमित्तत्वञ्च यद्बुद्धिर्यत्कार्यप्रयोजिका तत्त्वम् । अत एव दण्डिछित्वत्र विधायकत्वशङ्का सङ्गच्छते । तत्रादेशविधायकस्यादेशप्रत्ययययोरित्यस्य प्रवृत्तौ प्रत्ययत्वावच्छिन्नस्य बुद्धिनिमित्तमत्वयत्वञ्च नैतादृशमिति भावः । इदमिति । सुब्विधिपदमित्यर्थः । न च भिस्त्वस्य सुप्त्वव्याप्यत्वाभावेन तदवच्छिन्नोद्देश्यके ऐसादेशेपि नियमावानुपपत्तिरिति वाच्यम् । केवलभिस्त्वस्य सुप्त्वव्याप्यत्वाभावेऽपि निमित्ततावच्छेदकस्याङ्गसंज्ञाप्रयोजकत्वविशिष्टभिस्त्वस्य सुप्त्वव्याप्यतया तदवच्छिन्नोद्देश्यकादेशस्यापि सङ्ग्रहसम्भवात् । वैरूप्यापत्तेः । किञ्चिदंशे विधायकत्वं किञ्चिदंशे नियामकत्वमिति स्वीकारे विभिन्नस्वभावत्वापत्तेरित्यर्थः । यद्यपि

संज्ञाविधावित्यस्य पञ्चेत्यत्र नलोपे कृतेऽपि षट्संज्ञाप्राप्ति नलोपस्यासिद्धत्वाट्टापो निषेधरूपप्रयोजनमूले एव स्फुटन्तथापि तत्र षट्संज्ञां विनालुकोऽप्राप्त्या नलोपस्यैवाप्राप्तिः स्यादतः प्रथमं षट्संज्ञाप्रवृत्तिर्वाच्या तामादाय यथोद्देशपक्षाश्रयणेन तत्प्रयोजनमन्यथा सिद्धम् । न च पञ्चभिः सप्तभिरित्यत्र नलोपासिद्धत्वेन षट्त्वे झल्युपोत्तममितिसूत्रप्रवृत्तिः प्रयोजनमिति वाच्यम् । स्वरविधावित्येव सिद्धेरत आह । संज्ञाविधावित्यादि । दण्डिदत्तौ । दत्तदण्डिनाविति । एवंरूपौ द्वावपि शब्दौ भाष्येऽत्रैव संज्ञाविधावित्यस्य प्रयोजनकथनादिष्टाविति निश्चीयते । अत एवोक्तमिष्यते त्वनियम इति । पूर्वनिपाते नलोप इति । परनिपाते तूत्तरपदत्वे चापदादिविधाविति निषेधः पदसंज्ञायाः स्यादिति भावः । इति सूत्रार्थात् । एतादृशार्थे प्रकृतोदाहरणे प्रयोजनकथनपरभाष्यमेव मानम् । कृति तुग्विधाविति । अत्र गमकत्वाद्वृत्तिः । अस्मादेवेति । कृतितुग्ग्रहणादित्यर्थः । यदि संज्ञाकृतं बहिरङ्गत्वमप्याश्रीयते तदाऽन्तरङ्गे तुकि कर्त्तव्ये पदसंज्ञासापेक्षनलोपस्यासिद्धत्वात्तुगभावे सिद्धे कृतितुग्ग्रहणं व्यर्थं स्यात् । नन्वल्पापेक्षमन्तरङ्गमबहुपेक्षं बहिरङ्गमित्याश्रित्य संज्ञाया अधिकाया आश्रयणाद्बहिरङ्गत्वमिति न वदामः । किन्तु बहिर्भूतभिस्निमित्तकपदत्वनिमित्तकत्वेन नलोपस्य बहिरङ्गत्वं वदाम इति चेत्तत्राह । बहिर्भूतनिमित्तकेति । सन्निपातपरिभाषयेति । अवयवावयवस्य समुदायानवयवतया ह्रस्वहभिरित्यत्र तुकि सति भिस्सन्निपातविघातः स्पष्ट एव । वस्तुतस्तु नान्तभिस्सन्निपातनिमित्तको नलोपस्तादृशसन्निपातविघातकतुकोऽनिमित्तमिति भाष्याशयः । ननु यत्रान्तर्वर्त्ति विभक्त्याश्रितो नलोपस्तत्रैव ह्रस्वहधनमित्यादौ तुकं व्यावर्त्तयितुन्तदस्वित्यत आह । सन्निपातानिमित्तकेति । तदभावे । तुग्ग्रहणाभावे । सन्निपातपरिभाषया कृन्निमित्तकतुकोऽपि व्यावृत्तिः स्यादिति नियमार्थकृति तुग्ग्रहणमस्वित्यभिप्रायेणाशङ्कते । न च सन्निपातेति । केचित्तु इन्हे धीतिसूत्रस्थधिशब्दस्य पूर्वोक्तान्योन्याश्रयपरिहाराय भाविविधाश्रये लक्षणमाश्रित्यानियमस्य दण्डिदत्तौ दत्तदण्डिनाविति सिद्ध्यर्थं प्रकृतसूत्रे संज्ञाग्रहणकरणापेक्षया इन्हसंज्ञाप्रवृत्तिकाले यस्य विभक्त्यपूर्वमयोज्यमित्येवार्थोस्तु । प्रकृते इन्हसंज्ञाप्रवृत्तिकाले नलोपस्यासिद्धत-

याऽनियमः सिद्ध एवेति प्रकृतसूत्रे संज्ञाग्रहणन्नकर्त्तव्यमिति लाघवम्। किञ्च यदि इन्द्रे घीतिसूत्रस्थघिपदस्य भाविघित्वाश्रये लक्षणाऽऽश्रीयते तदा भानुच्छत्रे क्षत्रभानू इत्यनियमः प्राप्नोति। भानुशब्दस्य पूर्वपदत्वे तुका भवितव्यमिति भाविघित्वस्याभावात्। इन्द्रसंज्ञाप्रवृत्तिकालिकघित्वस्य पूर्वनिपातप्रयोजकत्वे तु नियमः सिद्ध्यतीत्याहुः। तच्चेदञ्चित्यम्। इन्द्रसंज्ञाप्रवृत्तिकालिकंघित्वम्पूर्वनिपातप्रयोजकमाश्रित्य पूर्वोक्तानियमसिद्धिमाश्रित्य प्रकृतसूत्रस्थसंज्ञाग्रहणाकरणेपपादनमशक्यम्। ग्रामणिदेवदत्तौ वातप्रमिहृषावित्यादौ पूर्वनिपातो यदिगन्तस्य स्यात्तदा इको ह्रस्वोऽङ्यो गालवस्येतिसूत्रेण ह्रस्वे कृते घिसंज्ञा स्यात्तत्रेगन्तस्यैव पूर्वनिपात इत्येवन्नियमः सिध्यति। ह्रस्वत्वस्य बहिरङ्गासिद्धत्वन्तु न बहिरङ्गरिभाषाया अनित्यत्वात्। प्रकृते च तस्या अप्रवृत्तौ दत्तदण्डिनौदण्डिदत्तावितिभाष्यमेव मानम्। एवञ्च घिपदस्य भाविघित्वाश्रये लक्षणाया आवश्यकत्वे दण्डिदत्तौ दत्तदण्डिनावित्यादावनियमसिद्ध्यर्थम्प्रकृतसूत्रे संज्ञाग्रहणस्यावश्यकत्वात्। अत एव प्रकृतसूत्रभाष्ये संज्ञाग्रहणस्येदम्प्रयोजनं दत्तम्। न च घिपदस्य भाविघित्वाश्रये चेल्लक्षणा तदा इन्द्रे घीतिसूत्रस्थ हरिहरावित्यत्र हरिशब्दस्य पूर्वनिपातसिद्धिः प्रयोजनत्वेनोक्ता सा न सङ्गच्छेत। हरिशब्दस्य घिसंज्ञायाम्पूर्वनिपातस्याप्रयोजकत्वादिति वाच्यम्। इन्द्रे घीतिसूत्रस्थघिपदस्य तन्त्रेण शक्यलक्ष्योभयबोधकत्वात्। यदि तु लक्षणाहेत्वोरितिसूत्रे हेतुशब्दस्य परनिपातकरणे न पूर्वनिपातप्रकरणमनित्यमिति विभाव्यते तदा दण्डिदत्तौ दत्तदण्डिनावित्याद्यनायासेन निर्वहतीति प्रकृतसूत्रस्थं संज्ञाग्रहणमकर्त्तुं शक्यम्। इदमिति। तुग्ग्रहणमित्यर्थः। तदभावे। तुग्ग्रहणाभावे। व्यधिकरणमिति। तेन पदावयवस्येक इत्यर्थः पर्यवसन्नः। तेनेति। सर्वनामस्थानग्रहणसम्बन्धेन। यदि चात्र सर्वनामस्थानग्रहणसम्बन्धः स्यात्तदा सर्वनामस्थाने परे यदि दीर्घ इनादीनान्तदा शावेवेति नियमः स्यात्तदा हृत्वहणी इत्यादौ दोषः स्यादिति॥ ननु नियमशास्त्राणां विधिरूपेण प्रवृत्तेः सिद्धान्तित्वादिति निषेधे प्राप्त इत्यनुपपन्नमित्यत आह। एतत्फलभूत इति। नियमस्येतरनिवृत्तिफलकत्वात्॥ यद्यपि घिस्वोरितिन्यासे न मात्रालाघवन्तथापि पदलाघवाभिप्रायेण कृताग्रङ्का-

न्निराचष्टे । शिखोरिति वक्तव्य इति । उत्तरार्थ इति । अत्वसन्तस्येति सूत्रार्थः । तत्रतेषु मध्ये । ननु येन नाव्यवधानन्यायप्रदर्शनमसङ्गतम् । हृत्रहयतीत्यादौ व्यवधानाभावेपि णिति प्राप्तिसत्त्वादित्यत आह । इदमिति । श्रौताव्यवधानत्वादिति । नकारे परे कुत्त्वविधानसामर्थ्याच्छ्रौताव्यवधानस्य निमित्तत्वमाश्रीयत इति भावः । णत्ववारणाय । कुमति चेतिप्राप्तणत्ववारणायेत्यर्थः । प्रक्रान्तोपयुक्तम् । हृत्रघ्न इत्यत्रातिव्याप्तिवारकम् । कुमति चेत्यस्य चेति । तेन हृत्रघ्न इत्यादौ नातिप्रसङ्गः । यद्यपीदम्प्रयोजनं सन्निपातपरिभाषया गतार्थम् । तथापि प्रघनाघनः प्राघानीत्यर्थमुपायान्तरस्यावश्यकत्वेन सेह नोक्ता । हादेशे कुव्यवाय इतिवार्त्तिकमत्पूर्वग्रहणस्योपलक्षणत्वे नैव गतार्थमिति केषां चिन्मतं तदनुसारेणाह । इदमत्पूर्वग्रहणमिति । अत्पूर्वस्यैवेति यथाश्रुतनियमे तु बहुहृत्रहाणीत्यत्राव्याप्तिः स्यादिति भावः । बहिरङ्गदीर्घासिद्धत्वादिति । प्रत्ययसापेक्षत्वेन दीर्घस्य बहिरङ्गत्वम् । यथोद्देश एवेति । एवञ्चान्तरङ्गस्य णत्वस्यासिद्धतया बहिरङ्गपरिभाषाया अप्रवृत्तिरिति भावः । तत्यच्छेपि । कार्यकालपक्षेऽपि । इत्यत्र दोषाच्चेति एवञ्चात्र सूत्रमते णत्वमाप्नोति वार्त्तिकमते तु नेति फलभेद इति तत्परिहारायात्पूर्वग्रहणस्योक्तार्थोपलक्षकत्वाश्रयणमावश्यकम् । वस्तुतस्तु योगविभागकरणमत्पूर्वग्रहणस्योपलक्षणत्वञ्चाश्रयणीयन्तदपेक्षया वार्त्तिकारम्भ एवोचित इति । कुव्यवाये हादेशेष्विति । अत्र कुव्यवायपदङ्कव्यवधाननिमित्तकणत्वविधिलाक्षणिकम् घटकपदबोध्यत्वं सप्तम्यर्थः । हादेशेष्वित्यस्य तेषु सत्सु इत्यर्थः एवञ्च तद्विधिघटककुपदस्य हादेशबोधकत्वे प्रतिषेधः । बहुवचनम्व्यापकशास्त्राणां लक्ष्याणां वा बहुत्वात् । अच्छ्धातोरिति । नत्वजन्तस्येति शेषः । व्याख्यानादिति । प्रत्यय इत्यादिनिर्देशमूलकात् । विवक्षार्थत्वादिति । नन्वेतादृशविलक्षणार्थबोधकतयाऽचामिति चरितार्थमित्यस्य नियामकत्वकथनासङ्गतिरिति वाच्यम् । अचामित्यस्य नियमार्थत्वम्भाष्य एव प्रतिपादितमिति तत्रामाख्येन द्विविधो नियम आद्दत्या कल्पनीयः । एकश्च मूल एवोक्तः । अञ्चतेश्चेन्नलोपिन एवेति द्वितीयोप्यभिप्रेतः । अत्र मानमचामिति निर्देश एव । व्याख्यानादिति । नपुंसकस्येतिसूत्राज्झल्ग्रहणापकर्षेणाचो-

मित्येतत्साङ्गचर्येण वेति व्याख्यानादित्यर्थः । भाष्ये षष्ठमिति । तत्र हि युवोरनाकाविति चेद्वातुप्रतिषेधः । युत्वा । युतवान् । एतच्छङ्कायामनुनासिकपरयोर्युवोर्ग्रहणमिति समाहितम् । अनुनासिकः परावयवो ययोरित्यर्थः । ततो यद्यनुनासिकपरयोर्ग्रहणन्तदेत्संज्ञा प्राप्नोतीत्याशङ्क्य तत्र को दोषः । नुमागमप्रसङ्गः । तत्प्रतिषेधो वक्तव्यः । अन्यथा नन्दनः कारक इत्यत्र नुम्प्राप्नोति । नुम्विधौ झलग्रहणम् । झलन्तस्य उगित इष्यते इत्युक्तम् । मूले निपातनादिति । मंहेः कनिप्रत्ययः हस्य घः । अवुगागमश्चेत्येवन्निपातनेनाश्रीयते इति भावः । वस्तुत इदम्परमतेनेति सूचयन्नाह । वनो र चेति-सूत्र इति । एतेन मघोनीत्यत्र वनो र चेत्यस्य प्राप्तिशङ्कापि निरस्ता ॥ ननु धनार्थान्मघशब्दादन्तोदात्तान्मतुपि झखनुड्भ्यामिति मतुप उदात्तत्वे मघोदात्तत्वासिद्धिरत आह । मघवानमीमह इति । कैयट इति । एतेन अर्वणस्तृमघोनश्च न ग्रिथञ्छान्दसं हि तत् । मतुवन्योर्विधानाच्च छन्दस्युभयदर्शनादितिभाष्यविरोधरूपाऽरुचिः सूचिता । प्यङ्गीकारादिति । अन्यथा फलभेदे प्रत्याख्यानासङ्गतिः स्यात् । काव्यप्रयोगस्य दृढतरमानत्वाभावादोह । मघवान्नजीषीत्यस्यापीति । लोकेऽसाधुत्वमिति । छान्दसमिति तत्रोक्तेः । रूपे वैलक्षण्याभावेपि स्वरे वैलक्षण्यमस्त्येवेत्यभिप्रायेण शङ्कते । न चेत्यादि ॥ ननु निपातितान्तोदात्तमघवन्शब्दस्य मघोन इति रूपं यद्यपि सिद्धन्तथापि वनिबन्तस्य विपरीतं प्राप्नोतीत्यत आह । छन्दस्यापाद्येति । एवञ्च विभाषा छन्दसीत्यनेन षष्ठीयुक्तश्छन्दसीति सूत्रे छन्दसीतियोगविभागसिद्धेन सर्वविधीनां वैकल्पिकत्वान्नवनिबन्तस्य लोपेन विपरीतमिति भावः । नाञ्चेपसम्प्रसारणे इति । नित्यत्वात्तृआदेशे कृत इत्यादिः । ननु स्थानिवद्भावेनान्तत्वमाश्रित्य स्याञ्चेप इति चेत्तत्राह । अलोऽन्त्यस्येति । मघवन्शब्दस्यैव स्थानित्वमिति । धीवन्शब्दस्यैव च स्थानित्वमित्यपि बोध्यम् । एकदेशविकृतन्यायेनेति । अन्शब्दैकदेशो नकारस्तेन विकृत इति सम्भाव्यते तत्रायप्रवृत्तिः सा च न सम्भवति अर्ङविकारसत्त्वादित्याह । अर्ङेति । अचाङ्त्वभागमादाय । ध्वनितमिति । तत्र हि स्वादीनां सम्प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमितिवार्त्तिकप्रत्याख्यानाय स्वयुवेति सूत्रानन्तरमञ्चेपोऽन इत्य-

त्वाल्लोप इति विभज्यान इत्युभयोः शेष इत्युक्तम्। उक्तव्याख्यानञ्चेन्नादियते तदाऽन इत्यस्योभयशेषत्वेऽपि दोषतादवस्थ्यमेवेति तथाकथनेनैवं व्याख्यानमनितमित्यर्थः। सर्वानुदात्तमिति। श्वन्शब्दे य उदात्तस्तस्य लोपेन निवृत्तावित्यादिः। उदात्तनिवृत्तिस्वरेण। अनुदात्तस्य च यचेत्यनेन। बहुश्वेति। बहवः श्वानो यस्यामित्यर्थः। अत्रश्वन्शब्दस्योपसर्जनतया श्वन्शब्दस्य गौरादिपाठेपि न ङीषः प्राप्तिः। वार्णपरिभाषाया इति। अत्र मानं सतुक्कनिर्देशः। स हि विश्वः प्रश्न इत्यत्र तुकोऽश्रवणाय। अनुवृत्त्येवेति। ह्रः सम्प्रसारणमित्यतोऽनुवृत्त्येत्यर्थः। तस्माच्चनिषेध इति। अनन्तरस्येतिन्यायाप्रवृत्तिकल्पनेनेत्यर्थः। स्थानिवत्त्वेन सम्प्रसारणत्वेऽपीति। हल इति सूत्रारम्भसामर्थ्यादन्त्यविधावितिनिषेधाप्रवृत्तौ पूर्वरूपनिष्पन्नस्य सम्प्रसारणत्वात्। यग्रहणेनैव सिद्धेति। एतेन तदर्थम्प्रकृतसूत्रे सम्प्रसारणग्रहणन्न कार्यमिति सूचितम्। एतन्निषेधकतयेति। वन्नश्वेत्यत्र सम्प्रसारणाभावसाधकतया न सम्प्रसारण इत्यंशसार्थक्येऽपि सम्प्रसारणग्रहणस्य युवन्शब्दे यकारस्य सम्प्रसारणाभावसाधकतयेत्यर्थः। तथा च प्रकृते निर्दिष्टाङ्गविकलतस्मिन्निति परिभाषाप्रवृत्तिराश्रीयत इति भावः। अत्र चेदमपीति। निषेधसूत्रमपीत्यर्थः। अपिना भस्येत्युपस्थितमिदभवति यचि भमित्यादिभाष्यसङ्ग्रहः। लक्ष्यभेदादिति। यं धर्ममुद्देश्यतावच्छेदकञ्बुद्धिस्थङ्कृत्वा यत्कार्यम्प्रयमङ्गतन्तद्धर्मावच्छिन्ननिमित्तकन्तदेव कार्यन्तस्मिन्लक्ष्ये पुनर्न प्रवर्त्तते इति लक्ष्ये लक्षणं सकृदेवेत्यर्थः। एवञ्च प्रकृते युवन्शब्दावयवत्वं बुद्धिस्थं कृत्वा सम्प्रसारणे कृते पुनर्यत्वावच्छिन्ननिमित्तकं सम्प्रसारणम्प्राप्नोत्येव। एतेन कार्याश्रयवर्णभेदेन लक्ष्यभेदाश्रयणे उदवोढामित्यत्र महिवहोरोदितिसूत्रेणौकारे कृते पुनर्लक्ष्ये लक्षणस्येतिन्यायेन वृद्धिवारणपरभाष्यं विरुध्येत। अत्रापि पूर्वमकारस्य पश्चादोकारस्येति वर्णभेदोस्त्येवेति निरस्तम्। हलन्तधात्ववयवाच्चत्वस्य प्राथमिकवृद्धिप्रवृत्तिनिमित्तावच्छेदकतया तद्धर्मावच्छिन्ननिमित्तिका वृद्धिर्नेत्यस्य सुवचत्वात्॥ उचित इति। लाघवात्। आर्वतम्यदमित्यादौ तद्धिते प्रवृत्तये आह। प्रत्ययत्वेनेति। बहुव्रीहिरिति। न विद्यते नञ् यस्य सोऽनञ्॥ अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नप्रतियोगिताकनञभावबो-

नित्यर्थः । अत्र न स्यादिति । न चैतद्वाक्यघटकाद्वाजमितिपदान्नञ्भिन्नात्परत्वमस्त्येवेति वाच्यम् । पदविभागेन पाठकालेऽर्वत्स्वित्यत्र न स्यादित्याशयात् । प्रथमैकवचनमिति । अनुनासिकौकारस्यान्तरतम्याज्ज्ञातस्य पाठात् । ननु मूलोक्तमनञित्यस्यानर्वेतिप्रत्युदाहरणमसङ्गतम् सुपरत्वादत आह । अनञित्यस्येति । यज्वशब्दसदृश इति । एतेन यदागमपरिभाषया नुड्विशिष्टस्यार्वन्ग्रहणेन ग्रहणम्भवतीति बोधितम् । न चैवमपीहागमविशिष्टस्यैवार्थवत्त्वमित्यर्थवत्परिभाषया केवलस्य ग्रहणङ्कथमिति वाच्यम् । अर्थतोवयवस्य निर्दिश्यमानस्येत्यर्थेन प्रतिष्ठापयतीत्यत्र षत्ववत् चादेशः स्यादित्याशयात् । इह । पथिमथ्यृभुक्षेतिसूत्रे । नन्वाआदितिप्रश्लेषेण विधानेऽनेकाल्त्वात्सर्वादेशत्वापत्तिरत आह । विशेष्यविशेषणभावेनेति । एवञ्च प्रकृतसूत्रे स्थानिवदादेश इतिसूत्रादादेशपदमाकृष्य सम्बध्यमानमादेशत्वपर्याप्तमधिकरणपरम्प्रकृते चादेशत्वपर्याप्तिरेकस्मिन्नेवाकारेऽपरत्र त्वाकारे आदेशतावच्छेदकत्वमिति भावः । ननु नकारस्यानुनासिकस्यान्तरतम्यादनुनासिक एव स्यात्प्रश्लेषे तु सर्वाकार इत्येव प्रश्लेषफलं किन्न स्यादत आह । भाष्ये त्वनुनासिकेति । तदुक्तमष्टन आ विभक्ताविति सूत्रे । अष्टनजनादिपथिमथ्यृभुक्षेष्वान्तरतम्यादनुनासिकः प्राप्नोति । अष्टाभिः । अष्टाभ्यः । जातः । जातवान् । पन्थाः । मन्थाः । सिद्धमनण्त्वात् । अण् सवर्णान् गृह्णातीत्युच्यते । न च आकारः अण् । उच्चारणसामर्थ्याद्धा । अथ वा शुद्धोच्चारणसामर्थ्यान्नविष्यतीति । ततस्तपरस्तत्कालस्येति प्राप्नोतीति शङ्कायामप्युच्चारणसामर्थ्यादित्येवोक्तम् । इदं सर्वमिति । पूर्वपक्षसमाधानरूपम् । तत्राप्तस्य । पक्षद्वयप्राप्तस्य । अत एव । गुणानाम्भेदकत्वमितिपक्षाभिप्रायकत्वादेव । तपरस्तत्कालस्येतीति । ननु गुणाभेदकत्वेत्युक्तम् । नन्वप्रत्यय इति त्वणुदित्सूत्रप्राप्तस्यैव निषेधकमत आह । अप्रत्यय इति चेति । अत एव । अण्ग्रहणस्य तत्रासम्बन्धादेव । तत्परिभाषेति । भाव्यमानेनेति परिभाषेत्यर्थः । तस्याव्यापकत्वमिति । अप्रत्ययग्रहणस्याव्यापकत्वमित्यर्थः । मदुक्तरीत्येति । प्रत्ययसंज्ञकपरत्वेन व्याख्यानमित्यर्थः । तेन । भाव्यमानेनेतिवचनेन । समानजातीयो भिन्नधर्मेति । सूचोच्चारितशब्दबोध्यतावच्छेदकसामान्यधर्मस्य व्याप्यो यस्तद्वान्ति-

त्वान्यधर्मस्तद्वान् उच्यते इत्यर्थः। सूत्रोच्चारितशब्दबोध्यतावच्छेदकत्वविशेषणाज्जत्वस्य सामान्यधर्मगुणत्वव्याप्यत्वेऽपि न क्षतिः। एतेन। वक्ष्यमाणदूषणेन। तदेवाह ॥ अत्र शुद्ध्यर्थमिति। भाष्येति। शुद्धोच्चारणसामर्थ्यादितिपूर्वलिखितभाष्येत्यर्थः। तेषामनभिधानाभिप्रायेणैव शङ्कते। न चेति। ज्ञानगौरवेति। पररूपापत्तिशङ्कायाः क्लृप्तेन वारणे ज्ञानगौरवेत्यर्थः। ननु ह्रस्वाकारानन्तरस्थेहीर्वस्तदा आदृग्रहणानुवृत्त्यैव सिद्धेऽडिधानं व्यर्थमत आह। आदित्यनुवृत्त्यैवेति। अन्यथा। तपरकरणस्य फलान्तरसाधकत्वे। भस्य टेः। केचित्तु भाड्डिदित्येव सूत्रमस्तु भसंज्ञकात्परो यः प्रत्ययस्तस्य ङित्त्वातिदेशे टेरित्येव सिद्धमित्याहुः। अत्रेदमूहनीयम्। ङित्त्वातिदेशयोग्यस्य प्रत्ययस्यैहानुपस्थितेरतिदेशासम्भवात्। भसंज्ञया तस्याक्षेपं कल्पयित्वा आक्षिप्तस्य शाब्दबोधे भानं स्वीकृत्यैवं कल्पने टेरितिसूत्रान्तरानुसंधाने गौरवमिति। संख्येत्याकृत्यत इति। तच्च पूर्वत्र यद्यपि शब्दपरम्॥ तथापि प्रकृते लौकिकार्थपरम् नलोपस्यासिद्धत्वादिति। नाम्त्वस्य सुब्व्याप्यत्वात्तच्चासिद्धत्वस्य नियमेनाव्याहृत्तेः। पकाराकारस्य दीर्घवारणायेति ननु पकाराकारस्य दीर्घव्याहृत्तिरनन्यविकार इतिपरिभाषयैव भविष्यतीत्युपधाग्रहणं व्यर्थमिति चेन्न। अतृन्निति सूत्रार्थमिन्हन्निति सूत्रार्थश्च तुल्यत्वात्। आद्ये उपधापदासम्बन्धेऽयन्दीर्घो येन नाप्राप्तिन्यायेन हन्तृजन्ते कृतो ङीति गुणस्य बाधकः स्यात्तथा च कर्त्तारौ नक्षारावित्यादिरूपासिद्धिप्रसङ्गः। द्वितीये उपधापदासम्बन्धेस नियम उपधादीर्घस्यैवेति नियमो न स्यात्तथा च हृचह्नायत इत्यादावङ्गत्वार्धातुकयोरिति दीर्घोपि न स्यादिति बोध्यम्। ननु पञ्चानामित्यत्र नान्तसन्निपातेन नुटि कृते तदादि निमित्तकपदत्वेसन्निपातपरिभाषया नलोपो न स्यादत आह। ह्रुवः पञ्चानामिति। ग्रहणकशास्त्राविषयत्वं सूचयन्नाह। अनण्त्वादिति। न स इति। अनुनासिक इत्यर्थः। पथिमथ्यृभुक्षामित्यत्रेवाच न निर्वाह इत्याह। प्रश्नेषणापीति। वाचक्नव्या। वाचनिष्ठया क्नव्या। शक्त्येतियावत्। अष्टाभ्य औशित्यत्राष्टभ्य उङित्येवास्तु ङित्वादन्त्यादेशेऽकारोकारयोरेकादेशे ह्रस्वेरेचीतिह्रस्वावष्टाविति भविष्यतीति कस्य चिच्छङ्कानिरस्यति ॥ उङिति तु नोक्तमिति। इ-

तिन्यायेनेति। अयजे इन्द्रम्। ग्रामे इह। सर्वे इत्यमित्यत्र यथा पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादाय सवर्णदीर्घस्याधित्वा गुणः प्रवर्त्तते तथापि अकारोकारयोः प्राप्तगुणस्याधित्वान्तरङ्गत्वात्सवर्णदीर्घे पश्चाद्गुणे रूपासिद्ध्यापत्तेः। यदि चायज इ इन्द्रमित्यादिस्थितौ सवर्णदीर्घस्य पदान्तरसम्बन्धिवर्णापेक्षत्वेन बहिरङ्गत्वङ्गुणस्य तु तत्पदसम्बन्धिवर्णापेक्षत्वेनान्तरङ्गत्वमिति युक्तस्तत्र गुणेन दीर्घबाधः प्रक्रते तु जश्शसोरकारसकारस्थानिकोकारस्य य एकादेशस्य प्रत्ययमात्रसम्बन्धिवर्णापेक्षत्वादन्तरङ्गः प्रत्ययावयवप्रक्रत्यवयवसम्बन्धेकादेश एव तु बहिरङ्ग इतीण्डिगीतिन्यायवैषम्यमिति विभाव्यते तदा उङितिन्यासे यद्यपि मात्रालाघवन्तथापि प्रक्रियागौरवं दूषणमस्मिन्न्यासे बोध्यम्। तस्य लक्षणसम्पन्नाकारस्य। अष्टाभ्य इतिनिर्देशस्यैवापूर्वार्थकल्पकत्वे ह्रस्वेव तथा कल्पनापत्तिरत आह। अयमाव इति। इदमः सन्निकृष्टार्थबोधकतया ज्ञापकसिद्धस्यैव वैकल्पिकत्वमतीयते तच्चानुपयुक्तमत आह। आत्वमात्रमिति। आत्ववैकल्पिकत्वे ज्ञापकमिति। आत्त्वस्य नित्यत्वे हि ह्रस्वस्यैवाभावात्तदर्थमिति भावः। साक्षकाशस्येति। अनान्तत्वेन षट्त्वाभावात्। झल्युपोत्तममिति तु पञ्चभिरित्यत्र चरितार्थम्। ननु स्थानिवद्भावेन नान्तत्वमस्तीत्यत आह। अस्विधित्वेनेति। पुनः प्रसङ्गविज्ञानेति। तस्य न्यायस्य प्रक्रते प्रवृत्तिबोधनद्वारेत्यर्थः। सकृद्गतिन्यायपक्षेऽप्याह। यथोद्देशेति। अयमावः। भविष्यति किञ्चिदयोजनमित्यभिसन्धिमात्रेण विभक्त्युत्पत्तेः प्रागेवान्तरङ्गत्वात् षट्संज्ञायां विभक्तौ नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपषट्त्वस्य स्थानिवद्भावेनातिदेशेऽष्टाभिरित्यत्रापि झल्युपोत्तममित्यस्य प्राप्तिरित्यष्टन्स्वरो निरवकाशतया झल्युपोत्तममित्यस्य बाधकस्तथा चाष्टाभिरित्यत्रेवाष्टभिरित्यत्रापि स्वादित्येतद्ग्राह्यत्वर्थं क्रियमाणं ज्ञापकमिति। सन्निपातपरिभाषयेति। नान्तसन्निपातेन जायमानस्य नुटस्तद्विघातकात्त्वनिमित्तत्वन्नेत्यर्थः। ननु यदि नात्वन्तर्ह्यष्टनो दीर्घादित्यस्याप्राप्तेर्विभक्त्युदात्तत्वन्न स्यादत आह। अन्तोदात्तत्वमिति नलोपस्यासिद्धत्वादिति। नलोपः प्रातिपदिकान्तस्येतिसूत्रे सम्बध्यमानं यत्पूर्वत्रेति तस्य पूर्वसम्बन्धिकार्ये इत्यर्थः। पूर्वशास्त्रञ्चाच नुट्विधायकमपि तत्सम्बन्धि

कार्यङ्नुटतत्सम्बन्धिनान्तसन्निपातोऽपीति परम्परया पूर्वसम्बन्धिसन्निपातस्तस्मिन्कर्त्तव्ये नलोपस्यासिद्धत्वम् । न च सन्निपातस्य नलोपः सुप्पूरित्यत्रापाठात्कथन्तत्रासिद्धत्वमिति वाच्यम् । नुटः सुप्व्याप्यधर्मावच्छिन्नसम्बन्धितया परम्परया तत्सम्बन्धिसन्निपातस्यापि सुप्व्याप्यधर्मावच्छिन्नसम्बन्धित्वादित्यभिमानः । तमभिमानन्निराचष्टे । पूर्वत्रेति । तत्र । नुटि अभ्युपेत्याह । सन्निपातस्येति । शास्त्रासिद्धत्वस्य सिद्धान्तिसम्मततयाशास्त्रीयकार्ये एवासिद्धत्वमुचितमिति भावः । तस्याः सन्निपातपरिभाषायाः । अत एव । वास्तविकसन्निपातविघातमादाय सन्निपातपरिभाषायाः प्रवृत्तिस्वीकारादेव । परिभाषानित्यत्वेन । सन्निपातपरिभाषाया अनित्यत्वेन । तस्यासिद्धत्वात् । नलोपस्यासिद्धत्वात् । सन्निपातविघातमभ्युपेत्य दोषमपरिहृत्य वस्तुतः सन्निपातविघात एव नास्तीत्यभिप्रायेणाह । किञ्चेति । कृतात्वेऽपीति । अपिना नलोपसङ्ग्रहः । नन्वेवं कृतात्वेऽपि चेत् षट्त्वमाश्रीयते तदा हलीत्यपकर्षो व्यर्थ इत्यत आह । कार्यकालपक्ष इति । प्रतिपत्तिगौरवम् । हलीत्यस्यापकर्षेण व्याख्यानापेक्षयेत्यादिः । प्राचामनुरोधेन । त्रिपाद्यां सर्वथा बहिरङ्गपरिभाषाया अप्रवृत्तेः ॥ आदेशेति । औशदेशेत्यर्थः । विशिष्टः । आनुपूर्वीप्रकारकनिश्चयविषयः । अस्मिन्पक्षे यथालक्षणमित्यस्य कार्यङ्कर्त्तव्यमिति शेषपूरणेन पदार्थानतिवृत्ती समासङ्कृत्वा लक्षणमनतिक्रम्य कार्यङ्कर्त्तव्यमित्यर्थः कार्यः । द्वितीयपक्षे तु नञ्समासेन लक्षणाभावप्रतिपादकस्यालक्षणशब्दस्य योग्यतार्थकयथाशब्दस्य समासः । एवं सति यत्र लक्षणाभावस्य योग्यता तस्य शास्त्राविषयतयाऽनभिधानमेव लभ्यते । तथा चास्यासाधुत्वम् । प्रथमपक्षे चात्वाभावयुक्तस्य साधुत्वमित्येवं विरुद्धार्थप्रतिपादनन्न युक्तमित्याह । किञ्चेति । अत एव अन्त्यव्याख्यानस्य युक्तत्वादेव । कैयटेनेति । एवञ्च कैयटस्याप्यनभिधान एव तात्पर्यमिति भावः । अत एव । एतादृशानामनभिधानादेव । के चित्तु वस्तुतस्तु सर्वविभक्तिपरस्य प्रियाष्टन्शब्दस्य नानभिधानङ्किन्त्वजादिविभक्तिपरस्येत्याहुः । तन्न । एवमप्यष्टन इत्येव ब्रूयादितिग्रन्थस्यारस्यभङ्गापत्तेः । यन्मूले निरूपदादित्युक्तन्तल्लाभप्रकारमाह । नुमोऽसमास एवेति । असमास एव क्विन्प्रत्ययस्येत्यस्य प्रवृत्तेः फलमिति नि-

रूपपदादेवानेन क्विनो विधानमिति भावः । उच्चारणार्थेकारस्यायीति । उच्चारणार्थमुच्चारितानां विधेयविषये इत्संज्ञां विना निवृत्त्यभावस्य पूर्वमुपपादितत्वात् । क्विन्प्रत्ययस्येत्यत्रेति । एवञ्च नकारोच्चारणस्य चरितार्थत्वान्नकारोच्चारणसामर्थ्यात्स्वमित्यत्रागमस्यागमानुदात्तत्वं बाधित्वा आद्युदात्तत्वमित्येवं सामर्थ्यवर्णनसङ्गतमिति सूचितम् । इदन्नकारोच्चारणफलन्तदनुबन्धकग्रहणे नातदनुबन्धकस्येतिपरिभाषामनाश्रित्य । तदाश्रयणे तु क्विप्रत्ययस्येत्युक्तावप्यदोष इत्यवधेयम् । रुदिवेति । अत्र प्राप्तस्य रुदादिभ्य इतीटः प्रतिषेधः स्यादिति भावः । क्वचित्तु रुरुदिवेति पाठः । न चात्र नेड्वशीतिप्राप्तस्यापि प्रतिषेधस्य क्त्वादिनियमेन निवृत्त्या रूपसिद्धिर्निर्बाधैवेति वाच्यम् । क्त्वादिनियमो हि मध्येपवादन्यायेनैकाच उपदेश इति ञ्नित्यादिर्नित्यमिति सूत्रेण वा प्राप्तस्य निवर्त्तको न तु नेड्वशीति सूत्रप्राप्तस्येत्याशयात् । परन्त्वेवं सति बभूविवेति रूपस्य पुरःस्फूर्त्तिकत्वात्तत्त्यागस्य निर्बीजस्यापत्तेः । अशोकवनिकान्यायेन योजनन्तु क्लिष्टम् । ननु तिङः क्त्वस्नाभावेऽक्त्वार्थधातुकेति सूत्रे सार्वधातुकग्रहणमेव ज्ञापकन्तर्हि चिनुयादित्यादौ दीर्घाभावाय । यदि तिङः क्त्वस्नाः स्युस्तदा क्त्वर्युदासेनैव दीर्घाभावे सिद्धे तदैयर्थ्यं स्पष्टमेव । किञ्च तिङः क्त्वस्नायाङ्क्रदन्तत्वात्प्रातिपदिकसंज्ञायामतिशायन इति सूत्रेणैवातिशायनिकप्रत्ययस्य सिद्धौ तिङश्चेति सूत्रमपि व्यर्थं सत्तस्मिन्नर्थे ज्ञापकमभिप्रेतीत्यत आह । ज्ञापकेनेति । वरं करणमिति । तादृशार्थबोधकशब्दोपादाने शब्दोक्तदर्थोपस्थितिः । व्याख्यानेन कल्पने विवक्षितार्थस्यानुमितिर्वाच्या । अनुमितिसामग्री च गुरुतरव्याप्तिज्ञानादिघटितेति भावः । वस्यैव क्वसोत्पत्तिरिति । न च वस्य क्वसोपयोः प्राप्तौ क्वसस्य पूर्वत्रासिद्धत्वाद्वलोपस्यैव प्राप्तिरिति वाच्यम् । एवं सति सूत्रारम्भसामर्थ्यात्क्विन्नन्तस्येत्यर्थोपि सम्भाव्येत स चानिष्ट इत्याशयात् । सूत्रारम्भसामर्थ्येन पूर्वत्रासिद्धत्वबाधेप्याह । तथा सतीति । न च घोषस्याल्पप्राणस्य च वकारस्य तादृशौ गकार एव वक्तुमुचित इति वाच्यम् । वर्गाणान्तृतीयचतुर्थौ अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संहतकण्ठा नादानुप्रदाना अघोषा इति शिक्षायां घकारवकारयोः समानधर्मत्वप्रतिपादनेनास्य ग्रन्थस्य तच्छिक्षानुसारित्वात् । एवं दन्त्योष्ठावस्थापि महा-

प्राणता तत्रोक्ता मूलोक्तरीत्या तु क्विनो ग इत्येवोचितम्। उत्तरार्थत्वमपि न कुग्रहणस्येत्याह। नशेर्वेत्यत्रेति। ननु निरुपपदादृजेरिति पूर्वसूत्रान्नेत्यत्र क्विनोऽभावात्कथन्तस्य प्राप्तिरत आह। अतइनिणिति। धातुपाठेतीति। तस्य प्रथमोपस्थितत्वात्। व्याख्यानादिति। शीघ्रोपस्थितिमूलकाद्व्याख्यानादित्यर्थः। इति मत इति। एतेनेदन्नापूर्वङ्किन्तु अन्येभ्योऽपि दृश्यत इतिसूत्रस्थदृशिग्रहणस्यैवेदम्फलमिति सिद्धान्तः सूचितः। व्याख्यानादिति। परिव्राजाविवादिलक्षणदर्शनमूलकाद्व्याख्यानात्। संज्ञापदानुकर्षणादिति। एवञ्च यत्र पूर्वोत्तरपदघटिता संज्ञा तत्रैव दीर्घः कोशघटकपदानि तु प्रत्येकं संज्ञास्वरूपबोधकानि न तूभयघटिता संज्ञा तत्रोपात्तेति भावः। स्कोरितिसूत्रस्थ मूलोक्तयथाश्रुतार्थे पृथक् स्थातेत्यादावतिप्रसङ्गः प्राप्नोति तत्परिहारायाह। झलीत्यनुवर्त्तमानमिति। सङीतिवार्त्तिकाच्चेति। इदञ्च नापूर्वं वार्त्तिकङ्किन्तु परेश्च घाङ्योरितिसूत्रभाष्ये सङि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि वक्तव्यानि। गिरी गिर इत्यत्र लत्वम्। पयो धावतीत्यत्र धि चेति सलोपः। काष्ठशक् स्थातेत्यत्र स्कोरिति कलोपः। क्रुञ्चेत्यत्र चोः कुरिति कुत्वम्। धुर्य इत्यत्र हलि चेतिदीर्घत्वञ्चैतद्व्यावर्त्यन्तत्वोक्तम्। तदेकदेशोऽयम्। के चित्त्विति। वार्त्तिकप्रत्याख्यानवादिमतमेतदिति स्पष्टमेव। स्वमतमाह। प्रत्याख्यानमेकेति। पृथक् स्थाता। पयः स्थितिरित्यादिप्रयोगाणां लोकप्रसिद्धत्वादनभिधानकल्पनाया-मानाभावादिति भावः। तदोः सः सौ। अत्रानुवर्त्तमानत्यदादीनामित्यस्यावयवार्थकषष्ठ्या त्यदाद्यवयवतकारदकारयोरित्यर्थः। त्यदतच्छब्दयोर्बुद्धिविषयचैत्रत्वाद्यवच्छिन्ने शक्तिः। न चाच बुद्धिविषयत्वं चैत्रत्वस्य तदाश्रयस्य वा विशेषणं वाच्यमेवं सति बुद्धिविषयत्वस्योक्तविशेष्यांशे प्रकारतया शाब्दबोधे भानापत्तिरिति वाच्यम्। चैत्रत्वमैत्रत्वावच्छिन्ने त्यदादीनां शक्तिस्वीकारे शक्यतावच्छेदकानाद्यानात्वाच्छक्त्यानन्त्यस्य यदा चैत्रत्वावच्छिन्नविषयको बोधस्तदा मैत्रत्वाच्छिन्नविषयकबोधस्य चापत्तिरिति स्वविषयतावच्छेदकत्वसम्बन्धेन बुद्धिविशेषोपलक्षिते धर्मावच्छिन्नेशक्तिः स्वीक्रियते। बुद्धिविशेषस्योपलक्षणीभूय शक्यतावच्छेदकतया अनुगमक इति न तेन रूपेण शक्यतावच्छेदकस्य शाब्दबोधे भानापत्तिः। अनुगतधर्मावच्छिन्ना शक्यतावच्छेदकता चैकेति न नानार्थ-

त्वापत्तिश्च । तच्छब्दः क्वचिदप्रक्रम्यमाणपरामर्शकः । स देवदत्तो यस्तत्र स्थित इत्यादौ । एतस्यैव तत्पदस्य यत्पदेनार्थप्रत्यायने नियमेनापेक्षा । तत्पदसमभिव्याहारज्ञानं विना यत्पदस्यापि तादृशानुगमकधर्मग्रहाभावेन शक्तिग्रहासम्भवाच्छाब्दबोधाजनकत्वस्योपपत्तेः । अत एव तमानय य इहास्तीतिवाक्यस्य वक्तृबुद्धिस्थघटकर्मकानयनबोधकत्वम् । अत्रैव यत्तदोर्नित्यसम्बन्ध इति व्यवहारः । यत्र तु प्रक्रान्तपरामर्शकस्तत्र यत्पदाभावेऽप्यर्थबोधोभवत्येव । यथा समृद्धपुरो राजास्तीत्यादिकथनानन्तरं तमभिगच्छेत्युच्यते तत्र यत्पदाभावेऽप्यर्थबोधो भवति । एवं यच्छब्दस्य तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितो यो धर्मस्तदवच्छिन्ने शक्तिः । अत एव नियमेन तत्पदापेक्षा ॥ लाघवमूलिकां कस्य चिच्छङ्कानिरस्यति । तोरिति त्विति । अनेष इत्यत्रैतच्छब्दस्य नञा समासे नलोपे तस्माच्छ्युडचीतिनुटि नकारस्यैतच्छब्दावयवतया सस्यापत्तेः । सृष्टश्चेदन्तस्माच्छ्युडचीतिसूत्रे भाष्ये । तत्र हि तस्मादित्यस्याभावे नञ एव नुटः प्राप्तिमाशङ्क्य एवन्तर्हि पूर्वान्तः करिष्यते । तत्रायमप्यर्थः । तदोः सः सावितिसूत्रे तदोर्ग्रहणन्न कर्त्तव्यम्भवति । तवर्गनिर्देशे इह प्राप्नोति । अनेषः करोति । न चात्र निर्दिश्यमानपरिभाषया न भविष्यतीति वाच्यम् । अर्थवत्परिभाषैकवाक्यतया निर्दिश्यमानपरिभाषायाः प्रवृत्तौ तकारस्यापि न स्यादिति तादृशरूपप्रदर्शनपरभाष्यप्रामाण्येन द्वयोरपि परिभाषयोस्त्यागात् यावता पूर्वान्तः । एष दोषो न भवति । ततः पूर्वान्तत्वेऽनेष इत्यत्र नलोपमाशङ्क्य नुग्विधानसामर्थ्येन तं वारयित्वा ङमुटः प्राप्तिमुद्भाव्य परादित्वपक्ष एव स्थापितः । न चाजादिपदसन्निपातेन जातस्य नुकः कथन्तद्विघातकङमुटमिति निमित्तत्वमिति नायन्दोष इति वाच्यम् । नञोऽकचि चित्वादन्तोदात्तत्वे च कृतेऽर्मशब्देन नकशब्दस्य समासेऽकनर्ममित्यत्रार्मे चावर्णं द्वाच्चाजितिपूर्वपदाद्युदात्तत्वाभावापत्तेरतः परादित्वस्यावश्यकत्वात् ॥ अत्र कैयटः । परादावपि नुटि तस्यासित्वात्तोः सस्यादित्वेऽपि क्रियमाणे सत्वन्न भविष्यतीति चिन्त्यमेतदिति तद्दूषयितुमुपक्रमते । न चेति । अस्यैव । सत्त्वस्यैव । नुटो यद्यपि पूर्वोत्तरपदसापेक्षत्वन्तथाप्यङ्गसंज्ञानिमित्तबहिर्भूतसुबनपेक्षत्वेनान्तरङ्गत्वं सत्त्वस्य तु त-

दपेक्षत्वाद्बहिरङ्गत्वमिति भावः। यत्त्वन्तर्भूतसुबपेक्षत्वेन सत्त्वमन्तरङ्गमिति तन्न। अन्तर्भूतसुपः प्रत्ययलक्षणेनापेक्षा वाच्या। सा च न सम्भवति। न लुमताङ्गस्येति प्रतिषेधात्॥ वस्तुतस्तूत्तर पदाधिकारस्थबहिरङ्गस्य परिभाषाया अनित्यत्वान्नासिद्धत्वमित्यवश्यं वाच्यम्। अत एवात्मानं श्रियमन्यते यत्तत्कुलं श्रीमन्यमित्यत्र खश्नि इच एकाच इत्यमि खमोर्नपुंसकादिति लुक्सिद्धिः। श्रीशब्दस्य नपुंसकवृत्तित्वन्तु प्रष्ठादीनां पुंयोगात्स्त्रियामिव श्रीशब्दस्य परित्यक्तस्य लिङ्गस्य स्वीक्रियते अत एव ह्रस्वत्वस्य सिद्धिः। युष्मच्छब्दस्य स्वसम्बोध्यतावच्छेदकत्वोपलक्षितचैत्रत्वादावच्छिन्ने शक्तिः। स्वं युष्मच्छब्दोच्चारयिता। संबोध्यत्वञ्चोच्चारितशब्दजन्यबोधाश्रयत्वेनेच्छाविषयत्वम्। इच्छापि प्रत्यासत्या स्वसम्बन्धिनी विवक्षिता। एवञ्चोच्चारणकर्तृसम्बिनी योच्चारितवाक्यजन्यशाब्दबोधाश्रयत्वप्रकारिकेच्छा तद्विशेष्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मच्छब्दस्य शक्तिः। अस्मच्छब्दस्य तु स्वोच्चारणकर्तृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तिः। अत्र स्वपदमस्मच्छब्दपरम्। न चैवन्देव्युवाच गर्जगर्जत्तणम्मूढ मधु यावत्पिबाम्यहम्। मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु देवता इतिवाक्यस्य युष्मदस्मच्छब्दाभ्यान्देवीमहिषासुरयोर्बोधानुपपत्तिः। देव्या एतद्वाक्योच्चारणकर्तृत्वाभावादिति वाच्यम्। अस्मिन्वाक्ये देव्युच्चारितत्वस्य महिषासुरे च सम्बोध्यत्वस्य भ्रमाच्छोतुर्देव्यादिप्रतीतिर्न तु तत्तैतद्वाक्यघटकास्मच्छब्दस्य शक्तिरित्यभ्युपगमात्। यद्वा तादृशानुपूर्वीज्ञानरूपसामान्यलक्षणया देवीवाक्यस्यापि ज्ञाने तस्मिन्देव्युच्चरितत्वं मानसज्ञानेन गृह्यते। एवमस्मच्छब्दार्थघटकोच्चारणांशे स्वातन्त्र्यविशेषणदानेनानुकरणादिस्थले नानुवादकादिबोधः। स्वातन्त्र्यञ्च स्वार्थतात्पर्यकान्यदीयोच्चारणानधीनत्वमिति दिक्। पृथक् पदमिति। लुप्तषष्ठीकम्। अत एव। पृथक् पदत्वादेव। ङे प्रथमयोरित्यस्यैकपदत्वे प्रथमयोरितिद्विवचनस्याञ्जस्येनोपपत्तिसम्भवेपि कयोः प्रथमयोरितिशङ्काया असङ्गतिस्स्फुटैव। लिङ्गादिति भाष्यमिति। तत्र हि ङे प्रथमयोरितिप्राप्तस्य निषेधोऽयम्। नत्वस्तुद्वितीयायाञ्चेत्यत्वे पूर्वसवर्णदीर्घे तस्माच्छस इतयेव सिद्धमित्याशङ्क्यम्। नकारादेशविधायकत्वे हि न इत्येव वदेदिति तद्भावः। युष्मान्नाङ्गणी

रित्याद्यर्थत्ववविधानमिति त्वन्यत्। यद्वा विभक्त्योर्ग्रहणमित्यर्थं द्वितीयायाश्चेतिसूत्रं ज्ञापकम्। यदि प्रत्ययग्रहणं स्यात्तदा द्वितीयायाश्चेत्यस्याभावेप्यात्वं युष्मदस्मदोरित्यनेनानादेशत्वात्सिद्धमेवेति तदर्थमेव। न च योचीत्येतदर्थमस्त्विति वाच्यम्। योऽचीतिसूत्रेऽनमौटोरितिकरणेनैतेषु यत्वं प्रतिषिद्धे आत्वस्य भावात्। युष्मानस्मान् इत्यत्रापि शसो नेत्यनेनादेर्नकारे शेषे सुपिचेतिदीर्घत्वे संयोगान्तलोपेन सिद्धम्। अतित्वमित्यर्थमिति। अत्र युष्मदेकार्थबोधकत्वाभावेन त्वादेशाप्राप्तिरिति भावः। अत एव। अन्त्यलोपस्वीकारादेव। निर्देशः सङ्गच्छत इति। अन्त्यलोपे हि सुटः प्राप्तेरिति शेषः इत्याद्यनुसारेणेति। वक्ष्यमाणोऽभिप्रायः। तमेवाह। त्वदादीनामिति। ननु हलन्तत्वेऽपि त्वाद्यवयवाकारस्योच्चारणार्थकस्येत्संज्ञालोपाभ्यान्निवृत्तिर्वाच्येति नात्र पक्षे लाघवमत आह। यद्यप्युच्चारणार्थानामिति। ननु हलन्तादन्तपक्षयोर्णिजन्तेनैकरूपसाधकत्वमत आह। णिजन्तादिति। न टाबितीति। स्त्रियामित्यस्य प्रकृतिविशेषणतायाः क्लृप्तत्वादिति भावः। इदम्। अन्त्यस्य लोप इत्येतत्। उपलक्षणमिति। तेन दृष्ट इत्यस्याध्याहारेण सूत्रार्थः कार्य इति भावः। उपलक्षणत्वे मानाभाव इति चेत्। शेषग्रहणमेवेत्यवधेहि। अन्यथा टिग्रहणमेव कुर्यात्। आदेशविधौ यस्योपयोगस्तदितरभाग एव शेषपदार्थः। ननु यत्र न मपर्यन्तस्यादेशस्तत्र का गतिरिति चेत्। त्वाद्यादेशविधावुद्देश्यतावच्छेदिका या आनुपूर्वी तदवच्छिन्नभिन्नत्वस्य विवक्षितत्वात्। वार्णादाङ्गमितिपरिभाषाप्रवृत्तिमुपपादयति। अकारस्येति। परोक्तं खण्डयति। शेष इत्यस्येति। तदप्रवृत्तिरिति। वार्णादाङ्गमितिन्यायाप्रवृत्तिरित्यर्थः। नन्वेवं टिलोपान्त्यलोपयोरन्यतरपक्षस्यैवाश्रयणे युष्मभ्यमित्यादौ टिलोपपक्षे हलन्तस्यैव श्रवणापत्तिरत आह। अत्र वदन्तीति। उदात्तनिवृत्तिस्वर इति। मदिक्प्रत्ययान्तत्वेनान्तोदात्तत्वात्। स्वसिद्धान्तमाह। वस्तुतस्त्विति। ननु लिङ्गाभावादित्यनुपपन्नं लिङ्गयोगस्य सत्त्वादत आह। अत्र लिङ्गाभावादीति। ननु त्वदाद्यकारष्टाब्विधेरित्यनेन टापि कर्त्तव्ये यथा सन्निपातपरिभाषायाः प्रवृत्तौ भाष्यं विशिष्य साधकन्तथा न प्रकृतेसाधकमत आह। अत एवेति। टापि कर्त्तव्येऽपि क्वचित्सन्निपातपरिभाषायाः प्रवृत्तिस्वीकारादेवेत्यर्थः। न-

त्वेवं भ्यसोभ्यमितिसूत्रस्थपत्वइयाभ्युपगमसूचकभाष्यविरोध इत्यत आह । अभ्यम्सूत्र इति । न्याय्य इत्येतदेवोपपादयति । अत एवेति । अभ्यमितिछेदादेव । व्याख्यानादिति । वचनशब्दोपादानमूलकाद्व्याख्यानादित्यर्थः । अन्यथा द्वित्वे इत्येव वदेत् । नन्वेवमपि द्विवचने इत्यस्य ससम्बन्धिकतया कस्य विशेषणमित्यत आह । तच्च । समर्थयोरित्यर्थः । गृह्यमाणयुष्मदस्मदोरेवेति । ननु तथाप्यङ्गाधिकारपठितेषु अङ्गस्येत्यस्य यथाऽधिकारवशाल्लाभस्तथा युष्मदस्मदोरित्यस्याप्यनुवृत्त्यैव लाभ इत्यनयोः को विशेष इति चेत् । अवान्तरवाक्यार्थबोधपूर्वको महावाक्यार्थबोध इति हि सुप्रसिद्धम् । प्रकृते च युष्मदस्मदोरित्यारभ्यावान्तरवाक्यार्थबोधो युष्मदस्मदोरित्येतत्पदार्थोपस्थितिजन्यः क्लृप्त इति युवावावित्येतत्सूत्रघटकपदाभ्यान्नियताकाङ्क्षया युष्मदस्मदोरित्येतच्छीघ्रोपस्थितिकतयाऽपेक्ष्यते । अङ्गस्येत्यस्य तु पश्चादपेक्ष्येत्यभिप्रायेण गृह्यमाणयुष्मदस्मदोरित्युक्तमिति गृहाण । यत्पदार्थं विनाऽवान्तरवाक्यार्थबोधो निराकाङ्क्षो न भवति तस्मिन्पदार्थे गृह्यमाणत्वव्यवहारः । अधिकारस्य मपर्यन्तस्येत्यस्याभावेऽपि युवकामावकामित्यस्य सिद्धिरिति शङ्कते नन्विति । त्वयकेत्यादिसिद्धय इति । अनुपदोक्तव्यवस्थाया अभावे त्वकयेत्यादिप्रकृते स्यादिति भावः । मपर्यन्तस्येत्यस्याभावे समुदायस्य त्वमादेशोऽपि अचइतिन्यासेनाकारस्यैकारादेशे त्वया मयेत्यस्य सिद्धिरित्याह । नन्वचेति । युवकाभ्यामितीति । अत्र भकारादिविभक्तिपरत्वेन पूर्वमेवाकचि मपर्यन्तस्येत्यस्याभावे समुदायस्य युवावादेशेऽकचः अवर्णानापत्तिरिति भावः । अकचि कृते तन्मध्यपतितन्यायेन स्थानिवुध्यैव स्थानिवद्भाव इव समुदायस्यादेशापत्तिः । एताट्टशे विषयेऽकजूवटिते निर्दिश्यमानभिन्नत्वबुद्धिसम्भवेन निर्दिश्यमानपरिभाषया युवकाभ्यामित्यस्यासिद्धिरिति नाशङ्कनीयम् । त्वयेत्यादेरसिद्धिरिति । अधिकाराभावे समुदायस्य त्वादेशेऽचइतिन्यासेऽपि वकारस्यान्यस्यैकारादेशे वश्रवणानापत्तिरिति भावः । नन्वचेगितिन्यासः कार्यस्तेन हलन्तादेशेयेगागमविधानेनेष्टसिद्धिर्भविष्यतीति चेन्न । अतियुष्मया अत्यस्मयेत्यस्य वक्ष्यमाणस्य रूपस्यासिद्धापत्तेः । न स्यादिति । एवं सति मयेत्यस्यासिद्धिरेवं सति स्यादिति भावः । तत्सत्त्वादिति । पर्यन्तशब्दसत्त्वादित्यर्थः । पर्यन्तशब्दसत्त्वे यथा न दोषस्तदुपपादयति । प-

र्यन्तशब्देनेति । अत एव । एतादृशस्थले आदेशाभावस्येष्टत्वादेव । अचैव स्यादिति । युष्मयत्यादिविषय एव स्यादित्यर्थः । ननु णिलोपस्याचः परस्मिन्निति स्थानिवद्भावेन नायन्दोष इत्यत आह । क्ङौ लुप्तमिति । प्रवृत्तिस्य स्यादिति । सूचोदाहरणसिद्धय इत्यस्यादिः । नन्वभिव्यक्तेतिन्यायेन नायन्दोष इत्यत आह । अभिव्यक्तेति । अत एव । तत्रादेशाभावस्येष्टत्वादेव । के चित्तु णिजन्तप्रकृतिकक्त्रिवन्तेष्वादेश इत्यभिप्रायेण व्याचक्षते तन्मतमुपन्यस्यति । यत्त्विति । तत्रैव स्यादिति । न चैतन्मतेऽभिव्यक्तेतिन्यायस्य प्रातिपदिककार्येपि प्रवृत्तेः कथमेतदिति वाच्यम् । सूचारब्धसामर्थ्येन तन्न्यायाप्रवृत्तेः । सति तु तस्मिन्निति । परिशब्दे सतीत्यर्थः । सामर्थ्यात् । परिशब्दोपादानसामर्थ्यादित्यर्थः । दान्त इति । तत्र मपर्यन्तशब्दार्थस्य मुख्यस्य सम्भवात् । क्विपि च सिध्यतीति । न च कटिपर्यन्तमितिप्रागुपपादितार्थस्य जागरूकत्वात्कथमेतदिति वाच्यम् । मस्तकप्रभृतिपादाङ्गुष्ठपर्यन्तम्पटेनाच्छादितेयमित्यादावङ्गुष्ठात्परस्य भागस्याभावेपि तादृशव्यवहारदर्शनेन निरुक्तनियमाभाव इत्याशयः । मणिमन्त्रादिन्यायेनेति । यद्यग्रिमभागाभावेऽपि पर्यन्तशब्दप्रयोगस्तदा परिशब्दसत्त्वेऽपि सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्सामानाधिकरण्येनान्वयस्यात्तत्रातिबन्धाय मणिमन्त्रन्यायावलम्बनमेव तैः कर्त्तव्यमिति भावः । किञ्च यः कटिपर्यन्तं वास इत्युक्तेऽर्थः प्रतीयते स एव पादाङ्गुष्ठपर्यन्तं वास इत्यत्रार्थो न प्रतीयतेऽपि तु ततो विलक्षण इति पर्यन्तशब्दस्य स्वावधिकपरभागसत्ताविशिष्टावधिवाचकत्वं वक्तव्यम् । अङ्गुष्ठपर्यन्तमित्यत्र त्वङ्गुष्ठान्तमित्यतो विलक्षणार्थानवगतेः पर्यन्तशब्दस्तत्र लाक्षणिको वाच्य इति मणिमन्त्रन्याय एव पर्यवसानम् । सामानाधिकरण्यासम्भवादिति । वाच्यार्थेन सामानाधिकरण्यासम्भवादित्यर्थः । तादृशव्याख्यानकर्तृमते भाष्यविसंवादमप्याह । किञ्चेति । तद्गुणसंविज्ञान इति । अतद्गुणसंविज्ञानस्य स्वीकारे मकारस्यरित्त्वेवादेशः स्यादिति भावः । अङ्गकार्ये पुनर्नाङ्गकार्यमित्यत्राङ्गस्य कार्यमिति न षष्ठीतत्पुरुषः । अतिरिच्छत्रमित्यत्र ह्रस्वत्वे कृते तुगनापत्तेः । किन्तु परिभाषायामङ्गशब्दोऽङ्गाधिकारपरः । सप्तम्यन्तेन सुप्सुपेतिसमासस्तथा च यत्फलितन्तदाह । अङ्गाधिकारस्य इति । अत्र च ज्ञापकज्ज्यादादीयस इ-

त्यादिधानमन्यथा बहोर्लोप इत्यतो लोपग्रहणानुवृत्त्या आदेः परस्येत्यादेर्लोपेऽञ्चत्वावधातुकेति दीर्घे ज्यायानित्यस्य सिद्धौ तद्व्यर्थम् । एषा च परिभाषा द्वयोरेकस्येतिनिर्देशादनित्येति स्पष्टमन्यत्र । ननु मकारान्तरप्रश्लेषे तच्छ्रुषणापत्तिः । न च संयोगान्तलोपप्राप्तिः । मकाररूपविशेषणबोधकतया तस्य पदान्तरत्वेन तदप्राप्तेरत आह । शसो नेत्यनेनेति । अत्र मानन्तु त्यदादीनाम इतिसूत्रस्थभाष्यमेव । तत्र टिलोपष्टाबभावार्थः शेषे लोप इति स्मृतः । लुप्तशिष्टे हि तस्याङ्गः कार्यसिद्धिमनोषिण इत्यत्र टाबभावस्यैव टिलोपफलत्वमुक्तत्र तु श्यादेशाभावस्य । लुप्तशिष्ट इति । लुप्ते सति यः शिष्टस्तस्मिन्सति कार्यस्य टाबभावस्य सिद्धिरित्यर्थः । तत्र सन्निपातपरिभाषया टाबभावोपपादने तु प्रकृतेऽपि सन्निपातपरिभाषयैव टाबभावसम्भव इत्याशयेनाह । परे त्विति । सन्निपातपरिभाषाप्रवृत्तिस्वीकारे ससुट्कनिर्देशस्य वैयर्थ्यम्परिहरति । सुट इति । अत एव । आगमस्यागमिसम्बन्धिसन्निपातविघातकत्वाभावादेव । मकारप्रश्लेषे भाष्यान्तरविरोधमप्याह । अत एवेत्यादिना । अत एव । मकारप्रश्लेषाभावादेव । तदसङ्गतिः । भाष्यासङ्गतिः । अत एव । सन्निपातपरिभाषया श्यादेशप्रतिबन्धादेव । अङ्गसम्बन्धिकार्यविषयत्वादिति । ज्ञापकसाजात्यादङ्गाधिकारीयकार्ये कृते पुनरङ्गाधिकारीयाङ्गसम्बन्धिकार्यान्तरप्राप्तावविधिरिति तस्यार्थ इति भावः । नैषेति । अङ्गवृत्तपरिभाषेत्यर्थः । अत एव । तस्या अनन्यथासिद्धप्रयोजनसाधकत्वाभावादेव । न च परिभाषाभावे पिबतीत्यत्र गुणः स्यादिति शङ्कनीयम् । पिबादेशस्यादन्ततया लघूपधत्वाभावेन गुणाप्राप्तेः । व्यर्थं स्यादिति । तस्यापि सूत्रस्यैकार्थत्व एव प्रवृत्तेः । तत्फलमिति । विभक्तावित्येतत्सम्बन्धफलमित्यर्थः । प्रत्ययइतिसूत्रस्य तु न प्रातिपदिकोत्तरपदपरत्वाभावात् । व्याख्यानादिति । अत्र भाष्ये ङेप्रथमयोरितिप्राप्तस्यामः प्रतिषेधोऽयमित्याशङ्कितन्तद्दर्शनमूलकादित्यर्थः । परिशेषलब्धमिति । अस्याजादीयत्वेन बाधादित्यादिः । हलीत्यनुवृत्ताविति । आत्वविधायक इत्यादिः । तदुक्तमिति । अभ्यमित्येव तु क्वेदो न्याय्य इत्यादिना । ससुट्कनिर्देशफलमुपदर्शयितुमाशङ्कते । नन्वाकम इति । अत्र ससुट्कनिर्देशसामर्थ्यादाकमि कृतेऽपि सुट्नेति केचिद्वदन्ति तन्न युक्तमित्याशयेनाह । अयमाव इति । एवमेव । आदेश-

स्य प्रयोगः स्थानिनोऽप्रयोग इतिरीत्यैव । यद्धर्मावच्छिन्नविषयकबुद्धिप्रसङ्गे आदेशबुद्धिः कर्त्तव्यत्वेन शास्त्रेण बोध्यते कृते आदेशे तस्मिन्स्थानिभङ्गावेन तद्धर्मावच्छिन्नबुद्धिरेव भवतीति प्रकृते आकमादेशे कृते सामूत्वबुद्धिरेव भवति न त्वाम्त्वबुद्धिरित्युद्देश्यतावच्छेदकावच्छिन्नाभावान्न सुटः प्रसक्तिरिति भावः । न स्थानिवद्भावप्रसक्तिः । न स्थानिवद्भावेनाम्त्वप्रसक्तिः । ननु यत्राकमादेशोत्तरं स्थानिवद्भावेनाम्त्वबुद्ध्या सुटः प्राप्तिस्तत्राकमि कृते ससुट्कनिर्देशसामर्थ्यात्सुड् भवतीत्येव किन्न स्यादत आह । अत एवेति । साम्त्वावच्छिन्नबुद्धेरादेशप्रवृत्तिस्वीकारादेव । सा बुद्धिश्च सर्वत्राकमादेशात्पूर्वमाहार्य्यैव वाच्या अत एव नुडागमोपि न तदाह । आदेशस्येति । आकम्नुडभावाविति । आकम् च नुडभावश्चेति द्वन्द्वः । प्राचीनोक्तं खण्डयति । न च यत्रेति । भाष्यविरुद्धेति । अतित्वाकमिति प्रयोगासाधनेन भाष्योक्तरूपासाधकतया भाष्यविरुद्धेत्यर्थः । एत्वनिवृत्त्येति । अकारोच्चारणाभावे बहुवचने झल्येदित्वनेन प्राप्तस्यैत्वस्य निवृत्त्येत्यर्थः । नन्वनयोः केवलद्वित्वैकत्ववाचकत्वमनुपपन्नमिति द्वैकत्ववाचिनीत्यनुपपन्नमत आह । द्वित्वैकत्वविशिष्टेत्यर्थः । मुख्यविशेष्यः । प्रकारतानात्मकविशेष्यतावान् । त्वमावित्यपीति । कर्मपदमिति शेषः । अत एव । पूर्वविप्रतिषेधाश्रयणादेव । शेष इत्यनुवर्त्तयति । एतेन पूर्वविप्रतिषेधाश्रयणापेक्षया शेषइत्यनुवर्त्त व्याख्यानमेव युक्तम् । लघु चेति सूचितम् । वक्ष्येति । अवयवषष्ठीत्यर्थः । तेन पदावयवस्य मवर्णावर्णात्परस्येत्यर्थः सम्पद्यते । तत्फलमाह । ह्रस्वान्तावितिं । अत एव । अवयवषष्ठीत्वस्वीकारादेव । अन्तपदाभावे प्रातिपदिकाभिन्नपदावयवस्येत्यर्थे नमनमित्यत्र नलोपापत्तिः । यदि तु पदस्येति विशेषं प्रातिपदिकेति नेति च तद्विशेषणमिति प्रातिपदिकाभिन्नान्तं यत्पदमिति व्याख्यायते तदा सौत्रमन्तग्रहणं सष्टार्थम् । ननु मुख्यस्य प्रातिपदिकान्तस्य लाभार्थमन्तग्रहणमस्तु व्यपदेशिवद्भावेन यत्प्रातिपदिकान्त्यान्तस्य मा भूत् तेन नृः संख्याया इत्यत्र तदभावसिद्धिरत आह । नृः संख्याया इत्यत्रेति । कृत्सने च सुपीति । सगतिरपि तिङित्यनुवर्त्तते । कृत्सने चागोत्रादौ सुबन्ते परे सगतिरपि तिङन्तमनुदात्तमित्यर्थः । पचति प्रति । प्रपचति प्रति । अतः प्रागिति । अत्रापि पदादित्यधिकारस्थेदेवदत्तः पचति प्र-

ति इत्यत्रैव निपातः स्यान्न तु पचति पूतीत्यादावित्यतः प्रागित्युक्तम्। तन्नाभिति। सर्वानुदात्तत्वलाभेत्यर्थः। नन्वादेः परस्येत्यादिनिर्देशार्थमेव सर्वग्रहणङ्कृतो नेत्यत आह। आदेरिति। स्थानषष्ठ्यभावादिति। स्थानषष्ठीनिर्देशे ह्यलोन्त्यपरिभाषायास्तदपवादभूताया आदेः परस्येत्यस्याश्च प्रवृत्तिः। छन्दोहीनवाक्यस्थस्यापीति। अत्र मानमाह। ग्रामे कम्बल इति। ननु तौ चानुदात्तावित्यनेन विहितादेशानुवादेनानुदात्तत्वविधानमिति प्रतीयते तच्चायुक्तम् वाक्यभेदापत्तेरत आह। गुणविशिष्टयोरिति। अनुदात्ताभिन्नौ वान्नावौ भवत इत्यादिक्रमेणार्थात्। षष्ठ्या युष्मदस्मदोरितिसूत्रे प्रथममुपादानेपि प्रसिद्धक्रममादायोदाहरणमाह। श्रीश इत्यादि। उभयत आश्रयण इति। पदात्परत्वस्य सिद्ध्यर्थम्पूर्वान्तवद्भावस्य षष्ठ्यादिविशिष्टत्वसिद्ध्यर्थं परादिवद्भावस्य चाश्रयणादिति भावः। आदेशे सतीति। सन्धेः पूर्वत्ववाच्चरत्वेनापादादित्वात्। पूर्वपत्त्वेण उक्तिङ्कण्डयति। उभयत आश्रयणेऽपीति। उक्तरीत्येति। सर्वस्य पदस्येत्यधिकारात् श्रूयमाणविभक्तिकस्येत्यस्य लाभो यथा तदाह। अहानौ स्वश्शब्द इति। त्वमयोरप्राप्तये आह। युवयोरिति। वृत्तावित्युक्तान्तस्य फलमाह। विग्रहे त्विति। संख्याविशेषभानादिति। तत्र बहुत्वव्याप्यतावच्छेदकधर्मावच्छिन्नवाचकतत्तच्छब्दसत्त्वादिति शेषः। अयम्भावः। उच्चारितः शब्दप्रत्यायक इतिरीत्या यत्र विशेषधर्मावच्छिन्नवाचकविभक्त्यश्रवणन्तत्रतत्तद्धर्मावच्छिन्नविषयकः शाब्दबोधो भवति। यथा सरसिजमित्यादौ। यदि तु तादृशेषु रूढिस्वीकारादेतद्घटकसरःपदादिशक्यार्थभानञ्चेत्तदा तत्तद्विभक्त्यर्थसंख्याभानेऽपीष्टापत्तिः। पदान्तरार्थस्याभानञ्चेदनुभवसिद्धन्तदा विभक्त्यर्थस्याप्यभानं भविष्यतीति मन्यते तदा स्तोकान्मुक्त इत्यादौ तस्य भानस्बोध्यम्। यत्र तु न विभक्त्यश्रवणन्तत्र न संख्याविशेषभानम्। किन्त्वभेदैकत्वसंख्याया भानम्। अजहत्स्वार्था वृत्तिरितिपक्षेऽपि पूर्वपदस्य संख्याविशेषबोधकत्वे यत्र गमकसङ्गावस्तत्र तस्या अपि प्रतीतिः। यथा द्विपुत्रो मौद्गिको मासजातस्तावकीन इत्यादौ। प्रथमे द्विशब्द एव बोधकः द्वितीये एकेन सुब्लुकेन क्रयणाभावाद्बहुत्वावगतिर्न तु तद्ग्राह्यसंख्यायाः। तृतीये कालविशेषबोधनाय मासपदप्रयोगादस्त्येव संख्याविशेषभानम्। चतुर्थे तवकादेशकरणादेकत्वावगतिः। युष्मत्पुत्र इत्य-

ति इत्यनेन निघातः स्यान्न तु पचति पूतीत्यादावित्यतः प्रागित्युक्तम्। तन्नाभेति। सर्वानुदात्तत्वलाभेत्यर्थः। नन्वादेः परस्येत्यादिनिहत्यर्थमेव सर्वग्रहणङ्कृतो नेत्यत आह। आदेरिति। स्थानषष्ठ्यभावादिति। स्थानषष्ठीनिर्देशे ह्यलोन्त्यपरिभाषायास्तदपवादभूताया आदेः परस्येत्यस्याश्च प्रवृत्तिः। छन्दोहीनवाक्यस्थस्यापीति। अत्र मानमाह। ग्रामे कम्बल इति। ननु तौ चानुदात्तावित्यनेन विहितादेशानुवादेनानुदात्तत्वविधानमिति प्रतीयते तच्चायुक्तम् वाक्यभेदापत्तेरत आह। गुणविशिष्टयोरिति। अनुदात्ताभिन्नौ वान्नावौ भवत इत्यादिक्रमेणार्थात्। षष्ठ्या युष्मदस्मदोरितिसूत्रे प्रथममुपादानेपि प्रसिद्धक्रममादायोदाहरणमाह। श्रीश इत्यादि। उभयत आश्रयण इति। पदात्परत्वस्य सिद्ध्यर्थम्पूर्वान्तवद्भावस्य षष्ठ्यादिविशिष्टत्वसिद्ध्यर्थं परादिवद्भावस्य चाश्रयणादिति भावः। आदेशे सतीति। सन्धेः पूर्वत्रवाच्चरत्वेनापादादित्वात्। पूर्वपत्तिम उत्क्रामयति। उभयत आश्रयणेऽपीति। उक्तरीत्येति। सर्वस्य पदस्येत्यधिकारात् श्रूयमाणविभक्तिकस्येत्यस्य लाभो यथा तदाह। अहानौ स्वशब्द इति। त्वमयोरप्राप्तये आह। युवयोरिति। वृत्तावितियुक्तन्तस्य फलमाह। विग्रहे त्विति। संख्याविशेषभानादिति। तत्र बहुत्वव्याप्यतावच्छेदकधर्मावच्छिन्नवाचकतत्तच्छब्दसत्त्वादिति शेषः। अयमाशयः। उच्चारितः शब्दः प्रत्यायक इतिरीत्या यत्र विशेषधर्मावच्छिन्नवाचकविभक्तिश्रवणन्तत्रतत्तद्धर्मावच्छिन्नविषयकः शाब्दबोधो भवति। यथा सरसिजमित्यादौ। यदि तु तादृशेषु रूढिस्वीकारादेतद्घटकसरःपदादिशक्यार्थभानञ्चेत्तदा तत्तद्विभक्त्यर्थसंख्याभानेऽपीष्टापत्तिः। पदान्तरार्थस्याभानञ्चेदनुभवसिद्धन्तदा विभक्त्यर्थस्याप्यभानं भविष्यतीति मन्यते तदा स्तोकान्मुक्त इत्यादौ तस्य भानम्बोध्यम्। यत्र तु न विभक्तिश्रवणन्तत्र न संख्याविशेषभानम्। किन्त्वभेदैकत्वसंख्याया भानम्। अजहत्स्वार्था वृत्तिरितिपक्षेऽपि पूर्वपदस्य संख्याविशेषबोधकत्वे यत्र गमकसङ्गस्तत्र तस्या अपि प्रतीतिः। यथा द्विपुत्रो मौद्गिको मासजातस्तावकीन इत्यादौ। प्रथमे द्विशब्द एव बोधकः द्वितीये एकेन मुद्गेन क्रयणाभावाद्बहुत्वावगतिर्न तु तद्व्याप्यसंख्यायाः। तृतीये कालविशेषबोधनाय मासपदप्रयोगादस्त्येव संख्याविशेषभानम्। चतुर्थे तवकादेशकरणादेकत्वावगतिः। युष्मत्युत्तर इत्य-

याबोधकत्वमाचोक्तौ पचतीत्येतन्मात्रस्य वाक्यत्वापत्तिरतस्ताटशसमुदाय-निवेशः। इदञ्च सपूर्वाया इत्यत्रेति। तत्र हि युष्मदस्मदोरन्यरतस्यामनन्वादेश इति वक्तव्यम्। ग्रामे कम्बलस्तव स्वम्। ग्रामे कम्बलस्ते स्वम्। ग्रामे कम्बलो मे स्वम्। ग्रामे कम्बलो मम स्वम्। एतदुदाहरणदर्शनेन तेमयावेकवचनस्ये-त्यस्यैव वैकल्पिकत्वमिति प्राप्ते अपर आह। सर्व एव वान्नावादय अनन्वा-देशे वा वक्तव्याः। न तर्हीदानीमिदं वक्तव्यम् सपूर्वाया विभाषेति॥ वक्तव्य-श्च। किं प्रयोजनम्। अन्वादेशार्थम्। अन्वादेशे विभाषा यथा स्यादित्युक्त-म्। एतेन प्रघट्टकेनान्वादेशे युष्मदस्मदोरित्यारभ्य ये आदेशा विहितास्तेषा-न्नित्यत्वं लभ्यते तदेतदवोक्तमन्वादेशे नित्यमिति॥ न च वाहाहैव। एत-त्सूत्रोपात्तैः सर्वैर्योग एकस्मिन् प्रयोगेऽर्थद्वारोक्त न सम्भवतीति तेषामन्यतमेने-ति। चादीनामवाचकत्वादाह। समुच्चयादिद्योतकत्व इति। साक्षाद्योगश्च ह-रिस्त्वां मां च रक्षत्वित्यत्र सुप्रसिद्ध एव। अत्र चकारद्योत्यसमुच्चये युष्मदस्मदर्थ-योरन्वयात्। हरौ हरिश्च मे स्वामीत्यत्र तु स्वार्थहरिहरान्वितस्वामिपदार्थान्व-यित्वमस्मदर्थस्य न तु साक्षात्तदन्वयित्वमतो न निषेधः। पश्यार्थैरितिसूत्रे अ-नालोचन इतिपर्युदासेन बहिरिन्द्रियजन्यज्ञानार्थकधातुयोग एव स्यादत आह। अनालोचनेति। इन्द्रियांशे बहिष्टम्पर्युदासेन न विविक्षितमिति भा-वः। स्वान्वितान्वयित्वेति। भक्तस्तव रूपम्पश्यतीत्यत्रेन्द्रियजन्यं यन्मानसं ज्ञानम्तावत्यर्थस्तेन युक्तस्य रूपपदार्थस्य युष्मदर्थेऽन्वयः। उक्तार्थे प्रमाणमाह। तदुक्तमिति। अत एव। तत्तच्छब्दयोगे विधीयमानकार्यस्य साक्षाद्योग ए-व प्रवृत्तेरेव। भक्तस्त्वमितिवाक्ये यच्छब्दोपादानाभावात्कथञ्चिदाकाङ्क्षा प्रतिपत्तिरत आह। प्रक्रान्तार्थत्वादिति। तेनेति। मध्यमणिन्यायेन चायत इत्यस्योभयत्रान्वयस्वीकारेणेत्यर्थः। आमन्त्रणमामन्त्रितमिति। अत्रामन्त्रणशब्दः करणसाधनः। तदन्तविधिरिति। अस्य अन्यथा संज्ञाविधित्वान्न स्यादिति शेषः। अत एव। तदन्तविधिस्वीकारादेव। संज्ञेति। आमन्त्रित-संज्ञेत्यर्थः। हे हे भो इत्यादीनामपीति। आदिपदेन नपुंसकवार्यादिशब्दसंग्र-हः। अन्यथेति। तदन्तविध्यभावे। अन्तरङ्गानपीतिन्यायेनेति। अत्रान्तर-ङ्गत्वं संज्ञायाः प्रतिसम्बन्ध्यन्तरानपेक्षत्वेन। लुकस्त्वव्ययत्वनपुंसकत्वप्रातिप-

दिकत्वापेक्षत्वेन बहिरङ्गत्वम्। न च निमित्तनिमित्तिनोर्विभेदस्यान्यत्र दृष्टत्वेन प्रकृते संज्ञासञ्ज्ञिनोर्भेदाभावेन कथमस्य संचार इति वाच्यम्। तादात्म्यस्य भेदाभेदरूपतया तद्घटकभेदमादायान्तरङ्गपदार्थस्य सम्भवात्। वस्तुतस्तु नात्रान्तरङ्गन्यायसञ्चार उचितः अन्तरङ्गनिमित्तविनाशकलुक एवानेन लुग्विधानात्। प्रकृते तु निघातविधायकामन्त्रितस्यैतिङ्गापकेन तदन्तविधिसम्भवेन लुक्यपि प्रत्ययलक्षणेनामन्त्रितसंज्ञायाः प्राप्तिरस्त्येव। तद्धि पदात्परस्यामन्त्रितस्य निघातविधायकम्। यदि विभक्तिमात्रस्य संज्ञा स्यात्तदा पदात्परस्य संज्ञायोगस्याभावेन तद्वैयर्थ्यं स्पष्टमेव। ननु परमगोदुहौ परमगोदुह इत्यादौ संभवः अत्र ह्युत्तरपदस्य कार्यित्वाभावेनान्तर्वर्त्तिविभक्त्योत्तरपदस्य पदत्वादिति चेन्न॥ अनुदात्तौ सुप्पितावित्येव सिद्धेः। संबोधने शक्तेरिति। एवञ्च रामशब्दात्सम्बोधने यथा प्रथमा प्रातिपदिकार्थ इत्यनेन तथा प्रकृतेपि। प्रथमेत्यनुवृत्त्यैव सिद्धे सेतिपदं सम्बोधनविषये या प्रथमा तदन्तस्य संज्ञासिद्ध्यर्थम्। सम्बोधने शक्तिरितिकोशग्रामाख्यात् कल्प्यत इति भावः। स्वसिद्धान्तमाह। अन्ये त्विति। अन्यत्र। राम इत्यादौ। अत्र। हैह इत्यादौ। उक्तार्थानामिति न्यायस्य नात्र विषयतेत्याशयेनाह। प्रातिपदिकोक्तत्वेति। नन्वेवं सेति व्यर्थमत आह। सेति त्विति। निघातनिषेध इति। भोशब्दस्यामन्त्रितस्येत्यनेन निघाते कर्त्तव्येऽविद्यमानवत्त्वेप्यामशब्दात्परत्वेन प्राप्तस्येत्यादिः। न च भोशब्दस्याविद्यमानवत्त्वेऽपि स्वाश्रयसत्त्वमादाय ततः परत्वादेव निघातः प्राप्नोतीति वाच्यम्। एवं सति राजन्तव राज्यमित्यादौ तवेत्यस्य तेमयेत्यनेन तेआदेशः स्यादिति अविद्यमानवद्भावविधानस्यैव वैयर्थ्यं स्यात्। तस्माद्यदामन्त्रितादव्यवधानेन कार्यमाप्नोति तत्कार्यमविद्यमानवद्भावेन प्रतिबध्यते। एतावता राजन्तवेत्यादिसिद्धिर्यत्तु व्यवधानेनामन्त्रितात्परस्य प्राप्नोति तद्भवत्येवेत्यभिप्रायात्। आमन्त्रितम्पूर्वमिति सूत्रे पूर्वशब्दोपादानेन पूर्वम्परस्य कार्येऽविद्यमानवन्न तु स्वापेक्षया यत्पूर्वन्ततो व्यवहितपरस्येति भावः। अविद्यमानवद्भावप्रयोजनमाह। अग्ने तवेत्यादि। आदिना विद्याबन्धवबलन्तदेव लक्ष्मीपते तेऽङ्घ्रियुगमित्यस्य परिग्रहः। नन्वेवं नृसिंहाश्रमेति ख्यातिरित्यत्रोक्तप्रकारोसम्भवात्ते आदेशो न स्यादत आह। नृसिंहेति।

विनीतौ वामित्यादाविवेति। अत्र वामित्यस्य प्रथमान्ततया विभक्तिप्रतिरूपकत्वस्वीकारं विना कथमपि साधुत्वासम्भवः। वक्ष्यमाणरीत्या प्राप्तायां मूलासङ्गतेः परिहारायाह। अस्येति। नन्वग्ने तेजस्विन्नित्यत्राग्न इत्यस्य पादादित्वेनापादादाविति निषेधो भविष्यतीति मूलासङ्गतिरत आह। अनुदात्तमित्यादि। सम्बन्धानर्हत्वेनेति। अस्य सूत्रस्याविद्यमानवद्भावनिषेधकत्वादनुदात्तपदस्यासम्बन्धः। न चानुदात्तत्वविधानार्थमेव तस्य सम्बन्धोक्तिरिति वाच्यम्। वाक्यभेदापत्तेश्चकारस्य तदर्थमनुपादानाच्च। सर्वमिति तु व्यर्थत्वान्न सम्बध्यत इति भावः। देव करोषीति। अत्र देवेत्यस्याविद्यमानवद्भावनिषेधे करोषीत्यस्य निपातः स्यात्। न च भावप्रधानमाख्यातमितिसिद्धान्तादत्र करोषीत्यस्य क्रियाविशेष्यकबोधजनकतया न देवेत्यनेन समानविशेष्यकबोधजनकत्वमिति सामानाधिकरण्याभावादेव निषेधाप्राप्तिरिति वाच्यम्। प्रकृतिप्रत्ययौ सहार्थमब्रूतस्तयोः प्रत्ययार्थः प्रधानमित्यौत्सर्गिकनिदर्शनाभिप्रायेणास्योपादानात्। यद्वा देवाचिक मान्यहीतिवाक्यार्थस्य्युत्पादकं यद्दीव्यत्यर्थकैर्धैर्वानिति वाक्यान्तरैकदेशस्य देव दीव्यतीत्यस्योपलक्षणमिदम्। तत्र गुणप्रधानभावविपर्ययः स्पष्ट एव। पर्यायेष्विति। नन्वत्र प्रवृत्तिनिमित्तभेदाभावात्कथं सामानाधिकरण्यमत आह। सामेति। ननु ऋत्विगादिसूत्रे उपपदानुपादानादृचेः सुपीत्यनुपपन्नमत आह। निपातनसाहचर्यादिति। ऊष्णक्शब्दसाहचर्यादित्यर्थः। अत एव सुपीतिप्रकरणाबाधः। नन्वनिदितामित्यत्र यदि नञ्समासङ्कृत्वा बहुव्रीहिस्तदा नन्यादित्यत्र नलोपापत्तिरत आह। इत्संज्ञेकार इति। एवञ्च बहुव्रीहिगर्भो नञ्तत्पुरुषः कार्य इति भावः। न प्रवृत्तिरिति। भर्त्सनाचितप्रत्ययस्याञ्चतिविशेषणत्वमिति भावः। नन्वत्र इतिप्रत्याहारग्रहणमेवास्त्वित्यत आह। व्याख्यानादिति। आतो धातोरितिलोपविधानसामर्थ्यान्न प्रत्याहारस्य मिदचोन्त्यादितिनिर्देशान्न तादृशशब्दसामान्यस्य वचोऽशब्देतिनिर्देशान्न तादृशानुपूर्वीकानर्थकशब्दस्य ग्रहणमित्येवंरूपादित्यर्थः। प्रत्यञ्चाविति। यद्यप्यत्र नुम् तथापि पूर्वकालिकस्य नस्य लोपोक्त्येवेति लुप्तनकारत्वस्याविघातः। नेदं वर्गग्रहणमिति। चवर्गग्रहणमित्यर्थः। व्याख्यानादिति। अजादौ गुणवचनादेवेतिनिर्देशमूलकादित्यर्थः। ननु चाविसूत्रेऽण इत्य-

स्य सम्बन्धे कर्तृच इत्यादिरुपासिद्धिरत आह। कर्तृ इत्यादिनामिति। तदुक्तं इल इतिसूत्रे । इह कस्मान्न भवति ढतीयः। अणप्रकरणाट्टकारस्याप्राप्तिः । अण इति वर्त्तते । क्व प्रकृतम् ।ढ्रलोपे पूर्वस्य दीर्घोण इति। तर्हि इकः काश इत्वनेनेग्गृहणेन व्यवच्छिन्नन्नशक्यमनुवर्त्तयितुम् । इग्गृहणस्य चाणविशेषणत्वात् अणविशेषणमिग्गृहणम् । अण इक इति। यदि तर्हि अणविशेषणमिग्गृहणञ्चौ दीर्घो भवतीतीह न प्राप्नोति । अवाचाश्रवाचे । नैष दोषः । अणग्रहणमनुवर्त्तते इग्गृहणन्निवृत्तम्। एवमपि कर्तृचः कर्तृचा अत्र न प्राप्नोति। यथालक्षणमप्रयुक्ते । मा भूद्दीर्घत्वमिति कैयटः । अथ वोभयन्निवृत्तम् । कस्मान्न भवति ढतीय इति। निपातनात् । द्वितीयढतीयचतुर्थतुर्याण्यन्यतरस्यामिति। प्रत्यङ्गस्थे ति। अन्तरङ्गस्थे त्यर्थः। सर्वनाम्न इत्याक्रम्यत इति। अदसोदेरितिवार्त्तिकमत एव सेगच्छते। उपसर्जनत्वेऽप्यस्य यथा प्रवृत्तिस्तदाह। सामर्थ्यादिति। अवयवषष्ठीति। तेनादसो दात्परस्य तदवयवस्योकारो दश्च म इति सूत्रार्थइति भावः। उपलक्षणमिति। अदोनुपदेश इति निर्देशात्। इदमिति। समाहारद्वन्द्वइतिव्याख्यानान्नित्यर्थः। नित्यत्वादिति। कृताकृतप्रसङ्गित्वात् । ननु क्रस्वत्वमपि शब्दान्तरस्थे तिन्यायेनानित्यमत आह। अपरनिमित्तकत्वे नेति॥ यथाश्रुतमूलग्रन्थादन्यबाधइत्येव परिभाषायः स्वरूपमिति प्रतीयते तच्च थड इतिसूत्रविरुद्धमत आह । थडः सम्प्रसारणमितिसूत्र इति। अनन्त्यविकार इति। अनन्त्यस्य विकारो येन शास्त्रेण तत्रान्त्यसदेशस्थे त्युपतिष्ठत इतिपरिभाषार्थः स्यादेवञ्च णो नः धात्वादेः षः स इतिसूत्रयोरन्त्यसदेशस्थे त्यस्योपस्थितौ णो न इतिसूत्रेण नकारादेशो नेतेत्यादिष्वेव स्यात्तथा धात्वादेरिति सत्वं सोतेत्यादावेव स्यान्न तु नमति सिञ्चतीत्यादौ। न चेष्टापत्तिः। नेर्गदनदेति सूत्रे नदेत्यस्योपसर्गात्सुनोतीति सूत्रे स्तौतिसेधेत्यादिनिर्देशस्यानुपपत्तिप्रसङ्गादतोऽन्त्यसदेशानन्त्यसदेशयोरित्यं तत्पूरणेन व्याचष्टे । अन्त्यसदेशानन्त्यसदेशयोरिति । एतस्याः परिभाषाया आवश्यकत्वमाह। अक्लोपोऽन इत्यादि। या क्लेशेनान्यथासिद्धिरुद्भाविता सापि कार्यकालपक्षे न तु यथोद्देशे। आकडारेत्यभपदसंज्ञाविषये तु यथोद्देशपक्ष एव न तु कार्यकाल इत्याशयेनाह। किञ्चेति। एतदेकेति । अक्लोपैक-

वाक्यतापन्नेत्यर्थः । नन्वेवं भाष्यविरोध इत्यत आह । अङ्गः सम्प्रसारणमितीति । एवञ्च परिभाषैव भाष्यकाराभिप्रेता न प्रत्याख्यानमित्याशयेनाह । अत एवेति । अस्याः परिभाषाया न्याय्यत्वादेवेत्यर्थः । केचित्तु यदत्रोक्तं कार्यकालपक्षे नलोपैकवाक्यतापन्नपदत्वस्य भत्वेन बाधो न स्यादिति तन्न युक्तम् । आकडारादेकेत्येव सिद्धे संज्ञापदोपादानेन सम्यक् ज्ञायमानेत्यर्थेन कार्यार्थम्प्रधानदेशे गमनेऽप्युपदेशदेशीयत्वव्यवहारन्न त्यजतीत्यर्थो विवक्षितः । तथा च भसंज्ञया पदसंज्ञाबाधः सुघट एवेति वदन्ति । तन्न । उपदेशदेशीयत्वव्यवहारात्यागेपि समानकालप्राप्तिकयोर्भत्वपदत्वयोर्बाध्यबाधकभावो युक्तः । यत्रादौ भसंज्ञायान्तत्वयुक्तकार्ये च कृते पश्चात्पदसंज्ञा प्राप्ता सा पूर्वजातभसंज्ञया बाधयितुन्न शक्यते भसंज्ञायाः पूर्वजातत्वात् । एवञ्च प्रकृते नलोपापादनं युक्तमेव । किञ्च संज्ञायाः कार्यार्थतया यत्र न भसंज्ञया स्वीयङ्किञ्चिच्छ.स्वीयङ्कार्यं साधनीयमस्ति तत्र तस्याः प्रवृत्तिर्न स्यात्तथा च पदसंज्ञायाः स्वादिष्वितिविधीयमानायाः प्रवृत्तिः स्यादेव । एवं सति श्वलिह्या गोदुहा वाचेत्यादौ ढत्वधत्वकुत्वादिकार्याणामापत्तिः स्यादेवेति दिक् । परिभाषार्थं विवृणोति । अन्त्यसदेशस्येतीति । तत्त्वञ्च । अन्त्यसमानदेशत्वञ्च । तद्वर्णेति । अन्त्यसमानदेशत्वेनाभिमतवर्णेत्यर्थः । इतराव्यवधाननिवेशस्य फलमाह । चलीकृप्यत इति । न च हंसशिरांसीत्यत्राप्यन्त्यवर्णः सकारस्तद्वर्णो रकाराकारस्य योनकारो व्यवधायकोऽस्तीति व्यवधानाभावघटितायाः परिभाषाया अप्रवृत्त्यापत्तौ हंसाकारस्यापि दीर्घत्वं स्यादिति वाच्यम् । तत्तत्कार्यविधायकशास्त्रोद्देश्यघटको योऽन्त्यो वर्णो यश्च तत्समानदेशत्वेनाभिमतो वर्णस्तादितरोच्चपर्यात्यधिकरणाविषयकप्रतीत्यविषयो विवक्षितः । एवं सति नकारस्योच्चपर्यात्यधिकरणाविषयतया तादृशो यो वर्णोऽकारादिस्तदव्यवधानस्य प्रकृते सत्त्वान्नानुपपत्तिः । अत एव । इतराव्यवधाननिवेशादेव । अनया । अनन्त्यविकारइतिपरिभाषया । अत एव । तदुदाहरणस्थानयोऽसिद्धे रेव । परिभाषास्वीकारे भाष्यविरोधम्परिहरति । नैतस्या इति । अः सेरित्यत्राकारजातीयवर्णपरमकारग्रहणम् । नन्वेवन्त्यदायत्वविषय इत्यनुपपन्नमत आह । त्यदादीनामिति । ननु सकृदुच्चारितादसेरितिपदाल्लब्धमर्थद्वयलाभइत्यत आ-

ङ्। अत्र तन्त्रेऽिति । वार्त्तिकोक्तमतत्रयान्यतमस्य यस्य युक्तत्वन्तदाह । अचाऽमुयडिति । अत्र । अदद्युड्शब्दे । लत्वं उक्तरीत्येति । चलीकृप्यत इत्यत्रात्यवर्णतदर्णयोरितरव्यवधानसत्त्वात् । अत्र । अदद्यूड्शब्दे । न्याययुक्तत्वमुपपादयति । अत्र एदेति । नोक्तेरिति । ओकारसकारेफान्तभिन्नस्यादस इति तस्यार्थः । अः सेरितिपक्षमिति । द्वतीयपक्षमित्यर्थः । नन्वेतावता न्याययुतत्वं कथमत आह । अत्रेति प्राप्नोतीति । अत्र । भाष्ये । इति भवितव्यमिति । एतेन न्याययुतत्वं स्पष्टमेवोक्तम् । परन्तु तदग्रे इदमेवेष्यते इत्येवोक्तं किन्तु भवितव्यमित्येवोक्तं तेन सम्प्रत्यभाव उक्तोऽतोऽप्रयुक्तत्वलाभः । ननु विष्वक्देवयोरित्यस्याभावेऽपि चकारसमुच्चयसर्वनाम्न उपस्थितत्वात्कथमस्याचीत्यादिप्रसङ्ग उक्तोऽत आह । चस्याप्युपलक्षणमिति । तथा चोत्तरपदेन पूर्वपदस्याङ्गेऽप्रत्यान्तेऽञ्चतौ परे यत्पूर्वपदन्तस्यादेश इत्यर्थापत्त्याऽतिप्रसङ्गः स्यादिति भावः । अत्र ज्ञाप्यांशो धातुग्रहणे तदादिविधिरित्येव । एतद्वचनफलमन्यत्रेत्यभिप्रायेण मूलेऽन्यत्रेत्युक्तम् । प्रकृतसूत्रे तु न फलमप्रत्ययग्रहणसत्त्वात् ॥ अन्यथा । ज्ञाप्यस्य वचनस्याभावे । परिभाषाज्ञानेति ॥ न च समः समिरितिन्यासेऽप्यनेकालितिपरिभाषाया ज्ञानस्यापेक्षाऽस्त्येवेति साम्यमिति वाच्यम् । अवश्यते इत्यं ज्ञायाः ङिच्चेत्यस्य चापेक्षा मन्यते त्वनेकाल्त्वस्यैवेति लाघवम् । इगितिन्यासे चाद्यन्तावित्यस्यापेक्षेति गौरवमिति भावः । नन्वव्ययसर्वनाम्नामिति समोऽकचि कृते सम्यादेशपक्षे ककाराश्रवणश्रवति ङिङादेशे इगागमपक्षे वा ककारस्य श्रवणमिति रूपेऽपि विशेषस्य स्पष्टतया कथम्परिभाषाज्ञानकृतगौरवस्यैवाभिधानमिति चेन्न । प्रकृतसूत्रभाष्येऽकचि कृतेऽपि ककाराश्रवणे समिरितिसमुदायरूपादेशस्य फलमिति नोक्तमिति न्यूनतापरिहाराय यत्र कृत्वाविवक्षा तत्रापि प्रथममुत्तरपदनिमित्तकादेशकृतोऽकजिति स्वीकारात् । अथ वोत्तरपदार्थे समशब्दतमभिव्याहारेण प्रकृष्टेतरोत्कृष्टे विषये कृत्वादिविवक्षैव नेति । यदुक्तमलुप्ताकारेच्छताविति तन्नाभप्रकारमाह । अलोप इत्यत्रेति ॥ न लोपो यस्येतिव्याख्यानेऽवयवापेक्षायेत्यस्य यदवयवस्येत्यर्थकरणे गतौ नलोपविषये तिर्यादेशाभावात्तेरत एवं व्याख्यातम् । मूलोक्तसामानाधिकरण्येन व्याख्याने वक्ष्यमाणा-

नुपपत्तिरत आह । पूजारूपार्थस्येति । पूजा गम्यत इति । कर्तुरित्यादिः । ननु प्राच इतिप्रयोगो यत्र तत्र चेत्पूजा विवक्षिता तदा नलोपो न स्यादिति तु न पूजाविवक्षा तदाऽङ्गोपस्यापि प्रवृत्तिः स्यात्तथा चोदात्तनिवृत्तिस्वरस्यापत्तिरत आह । प्राच इत्यादीति । अत्र हि प्रकर्षेणाञ्चतीतिगत्यर्थाञ्चुधातोः क्विप्प्रत्ययः । प्रकर्षश्च गतिमात्रत्व एवार्थेऽवयवयोर्विवक्षितः । प्राचामहद्दादित्यादिनिर्देशादेतादृशेष्वङ्गोपो न । यदि तु स स्यात्तदा ऋदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य प्राक्शब्दस्यावयवो लुप्यत इत्युदात्तनिवृत्तिस्वरः स्यादेव । एतेन । प्रागुक्तसूत्रार्थेनाञ्चतीत्यस्य प्राच इत्यादिरूपाणामसाधनेन ॥ ननु क्रुञ्चीत्यत्र नलोपाभावोऽपि निपात्यत इति यथाश्रुतमूलोक्तमप्ररेव घाङ्कितिसूत्रभाष्यविरुद्धमत आह । ओपधत्वेति । सूत्र इति । तत्र हि सञ्ज्ञीतिवचनस्य क्रुञ्चा इत्यत्र चोः कुरभ्लोरिति कुत्वाभावः फलमित्युक्त्वा निपातनादेतत्सिद्धम् । किन्निपातनम् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां चेत्युक्तम् । यद्ययं स्वतो नकारोपधः स्यात्तदा कुत्वस्याप्राप्तेर्भाष्यमसङ्गतमेव स्यात् । अत एव क्रुञ्चादित्यत्र लोपो न । यदुक्तम्मूले नलोपाभावोऽपीति तत्रापिशब्दार्थमाह । अपिनेति । सञ्ज्ञीतिवचनस्य प्रत्याख्यानपक्ष इदम् । कुत्वाभाव इति । जस्येत्यादिः । तदारम्भपक्षे आह । सञ्ज्ञीति । ननु षत्वं स्कोरिति सलोप इति क्रमेणाभिधानमयुक्तं सलोपे षत्वस्यासिद्धत्वादत आह । सलोप इति । एवञ्च मूलकारस्यापि तादृशः क्रमो न विवक्षितः किन्तु लक्षणयोः प्राप्तिमात्रमिति भावः । ननु नात्र सकार इति कथं सलोप इत्यभिधानमत आह । व्रश्चेः क्विपीति । ननु यदि शतृवद्भावस्तदा शतुरनुम इतिसूत्रे बृहन्महत इति वार्त्तिकं व्यर्थमत आह । शतुरनुम इतीति । शतृवदित्यत्र तृतीयान्ताद्दतिर्न तु सप्तम्यन्तात्तेन महतीतरत्यत्रोक्तयेति ङसविकल्पः सिध्यति ॥ अत एव । अधातोरित्यस्यातुपदार्थविशेषणत्वाभावादेव ॥ नन्वतुशब्दस्य पृथक्पदत्वेऽपि तस्याङ्गविशेषणत्वेन यथाऽवन्तस्येत्यर्थलाभस्तथाऽसन्तस्येत्यपि लाभे सीत्यमन्तग्रहणं व्यर्थमत आह । अङ्गविशेषणत्वेति ॥ अत्रेदमवधेयम् । सूत्रेऽस्मिन्भवतुक्तवतुमतुप्वतुप्डवतुडमतुपामवयवानां सामान्येनानुकरणम् । अत एव भवान् क्रुञ्चान् घटवान्तावान्कुमुदानि त्यादिसिद्धिः । नन्वत्वन्तत्वमङ्गवि-

शेषणमुत प्रत्ययस्य विशेषणम्। नाद्यः। दीर्घप्रवृत्तिसमये तस्यात्वन्तत्वाभावात्। भवानित्यत्रापि सर्वादिपठितभवतुशब्दावयवोकारस्योपदेशेऽनुनासिक इतिसूत्रेणेत्संज्ञायान्तस्य लोपेऽनुबन्धरहितस्यैव सत्त्वात्। सर्वेष्वपि सानुबन्धकनिर्देशेषु रूपमाश्रीयते रूपनिर्ग्रहश्च नान्तरेण लौकिकप्रयोगन्तस्मिंश्च सानुबन्धकानामप्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते कोसावुपदेशो नामेति घसंज्ञासूत्रीयभाष्योक्तरीत्योपदेशे योत्वन्तस्तस्य ग्रहणमिति विज्ञास्यत इति चेत्। एवं सति सर्वादिपठिताव्युत्पन्नभवतुशब्दस्य भवानिति यद्यपि सिध्यति तथापि भातेर्डवतुरिति व्युत्पन्नस्योपदेशाभावाद्दीर्घो न स्यात् व्युत्पत्तिपक्षेऽवयवावयवस्य समुदायावयवत्वेनाच सिध्यत्येवेति चेत्। एवमपि मतुप्वतुबन्तेन सिध्यति। अत एव न द्वितीयः॥ प्रत्ययस्याप्रकृतत्वाच्च॥ शब्दस्वरूपस्याध्याहारेण वाक्यार्थबोधसम्भवेप्युपदेशेऽत्वन्तत्वाभावाद्दीर्घ एवेति चेत्। अचाङ्वार्त्तिककाराः। अत्वन्तस्य दीर्घत्वे पित उपसंख्यानमिति। तत्तर्हि उपसंख्यानं कर्त्तव्यं न कर्त्तव्यम् पकारलोपे कृते नातुबन्तमेतद्भवति अत्वन्तव। यथैव तर्हि पकारलोपे कृते नातुबन्तमेवमुकारलोपे नात्वन्तम्। ननु च भूतपूर्वगत्याऽत्वन्तम्। सूत्रेऽत्वन्तस्योपादानात्तदंशे भूतपूर्वगतिः। अतुबन्तस्य त्वनुपादानान्न भूतपूर्वगतिस्तदंश इति भावः। तत उक्तयुक्त्या भूतपूर्वगतिर्व्यवस्थापिता। तदनुबन्धकपरिभाषया क्तवत्वन्तादीनामग्रहणम्प्राप्नोतीति तु नाशङ्कनीयम्। उकारपकारयोः समुदायानुबन्धत्वेन तस्याः परिभाषाया इह विषयाभावात्। एतेन प्रकृतसूत्रे सत्वन्तग्रहणेऽतोरन्तोऽत्वन्त इति समासङ्कृत्वा तस्यात्वन्त शब्दस्याङ्गविशेषणत्वेनात्वन्तान्तं यदङ्गमित्यर्थस्यावश्यकतया मतुबन्ते मुख्यस्य तस्य सत्वेन भवतुशब्दे च व्यपदेशिवद्भावेन तस्य सत्त्वमुपपाद्य सौत्रान्तशब्दस्य सार्थक्योपपादनम्परास्तम्। ननु परमित्यसङ्गतन्दीर्घस्य नुमोप्राप्तिविषये चरितार्थ्याभावादत आह। वचनसामर्थ्यादिति॥ वस्तुत एवम्प्रकारेण चरितार्थ्यमयोग्यमित्याशयेनाह। अभिमान इति। सत्यपि सम्भवे बाधनमितिभाष्यकारमताभिप्रायेणाह। अभ्युच्चय इति। उक्तमेवार्थमाशङ्कासमाधानाभ्यामाह। न चेत्यादिना। उपसंहरति। तस्मादिति। अनुनासिकोकारविशिष्ट इति। अनुनासिकोकारोपलक्षित इत्यर्थः॥ नलो-

पिनोऽञ्चतेरेवेति । तेन प्राङ् सुमुखीत्यादौ पूजायामुगितश्चेति ङीप् नेति बोध्यम् । तेन उक्तनियमाश्रयणेन । उक्तनियमलाभे बीजमाह । न्यायेति । अञ्चतेश्चेन्नलोपिन एवेति । एताट्टशनियमफलम्पूर्वोक्तमेव । अत्र गोमन्तमिच्छतीत्यर्थकगोमानित्यत्र धातुत्वात्कथन्नुमिति । सनाद्यन्तत्वेन धातुत्वात् । औपदेशिकधातुविषयक इति । ज्ञापकसाजात्यात् । हे इत्यनुवृत्तेवेति । यद्यप्येकाच इतिसूत्रे हे इतिविधेयसमर्पकन्तथापि तस्य तत्त्यागः पूर्वोभ्यास इत्यत्र ह्लादिस्थ इत्यत्रानुवाद्यसमर्पकत्वे बाधकाभाव इति भावः । द्वित्वविशिष्टार्थकमिति । उभेग्रहणसामर्थ्यात्प्रकृते द्वित्वस्य पर्याप्तिसम्बन्धे नाभ्यस्तसंज्ञोद्देश्यतावच्छेदकत्वं विवक्षितमन्यथा आश्रयतया तस्योद्देश्यतावच्छेदकत्वं स्यात् । एकाचो द्वे इतिसूत्रे द्वित्वाश्रयस्य द्वितीयोच्चारणविषयस्य विधेयत्ववत् । अग्रब्दार्थत्वादिति । लक्ष्यानुसारिगर्गदण्डन्यायेनैव पर्याप्तिसम्बन्धस्योद्देश्यतावच्छेदकतावच्छेदकत्वलाभे तदर्थमधिकोपादानङ्गौरवग्रस्तमिति । एतच्च भाष्येऽसति प्रयोजन इत्येवमभिधानेन सूचितम् । विभावयन्त्विति । यथा वार्त्तिककृदुक्तं सहग्रहणमत्याख्यातन्तथा पराभिप्रेतं सहग्रहणमपि प्रत्याख्यातमेव ऐर्ल्लिन्नित्यत्राभ्यासलोपे जुसभावार्थन्तथा ईर्ल्लिन्नित्यत्र नाभ्यस्तादिति नुन्निषेधश्च स्यादिति तदभावार्थञ्चोभेग्रहणमिति कस्यचिन्मतन्निराकरणायाह । तच्चेति । ननु शपा सहैकादेशेष्वुभयत आश्रयणेन न जुस्प्राप्तिरत आह । एकादेशात्पूर्वमिति । सनकारशकारयोरित्यर्थः । अन्तादेशेइति । तत एकादेशे इति शेषः । न प्रकृते स्थानिवद्भावोपयोग इत्याशयेनाह । किञ्चेति । यदुक्तञ्च जुसिति तत्र हेतुं सूचयति । यथोद्देश इत्यादिना । अस्मदुक्तप्रकार एवावश्यक इति दर्शयति । अत एवेति । पञ्चमीसमासाश्रयणादेव । सामर्थ्यादिति । सूत्रारम्भसामर्थ्यात् । न त्वनन्तरस्यास्थिदधीतिसूत्रस्थस्य नङ इति शेषः । तस्याचाप्राप्तेः । ज्ञानमात्रमिति । न तु पश्यार्थैरितिसूत्र इव चाक्षुषं ज्ञानं विवक्षितं साधकाभावादिति भावः । ननु षत्वापवादत्वादित्यसङ्गतम् । कुत्वस्य षत्वाप्राप्तिविषये चारितार्थ्यादिति तथावक्तॄणामाशयमाह । किन्यत इत्यदि । जश्त्वापवादोऽपीति । कुत्वविषये जश्त्वस्यावश्यप्राप्तेः । इदञ्चिन्त्यमिति । जश्त्वापवादत्वकथनमित्यर्थः । भाष्यकृतोक्तेरिति । एवं हि क्विन्प्रत्ययेतिसूत्रभाष्यउक्तम् ।

प्रत्ययग्रहणं किमर्थम् । न क्विनः कुरित्येवोच्येत । क्विनः कुरितीयत्युच्यमाने यकारस्यैव कुत्वं प्रसज्येत । ननु च लोपे कृते न भविष्यति । अनवकाशकुत्वं लोपं बाधेत । सावकाशं कुत्वम् । कोवकाशः । अनक्यः । अनक्य इति । क्विन्प्रत्ययापेक्षया अनक्यः । पदस्य त्वक्य इति कैयटः । कथम्पुनः सत्यक्येऽनक्यस्य कुत्वं स्यात् । सत्यपि सम्भवे बाधनभवतीति न्यायेन लोपस्याधित्वा कुत्वं स्यादिति भावः । आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य कुत्वभवति । यदयं क्विनः कुरितियत्वर्गेनिर्देशं करोति । इतरथा हि तद्गुणमेवार्थं निर्दिशेत् । तद्गुणम् । वकारगुणम् । इदन्तर्हि प्रयोजनम् । येभ्यः क्विन्प्रत्ययो विधीयते तेषामन्यप्रत्ययान्तानामपि कुत्वं यथा स्यात् । मा नो अस्राक् । मा नो अद्राक् इति । सृजिदृशिभ्यां माङि.लुङ् । तिप्सिच् । बहुलञ्छन्दसीति इडभावः । हल्ङ्यादिलोपः । सृजदृशोरित्यमागमः । वदव्रजेति वृद्धिः । बहुलञ्छन्दस्यमाङित्यवबहुलग्रहणादङागमः । संयोगान्तलोपः । ब्रश्चेतिषत्वे प्राप्ते कुत्वम् । जस्य गः शस्य खः । वावमान इति चर्त्वम् । अत्र सृजेर्विशेषविहितेन षत्वेन पदान्ते रज्जुसृड्भ्यामित्यनेव कुत्वमारभ्याध्येतेति कैयटेनोक्तम्पूर्वत्रासिद्धमित्यसिद्धत्वं कुत्वस्य नास्ति प्रत्ययग्रहणसामर्थ्यात्षत्वाद्यपवादत्वात्कुत्वस्येति । अत्रापवादत्वं वीप्सागर्भबहुलोक्त्याश्रयणेनोपपादनीयम् । तच्च भाष्योक्तप्रयोगदर्शनमात्रेण न युक्तं प्रयोगद्वयस्यापि छान्दसतया छन्दसि सर्वविधीनां वैकल्पिकतयाऽसिद्धत्वस्याप्यभावकल्पनेन प्रयोगद्वयस्यापुपपत्तेरिति भावः । उदक्षस्यर्ग इति । कर्मण्यण् । पूर्वत्रासिद्धे तन्निषेधादिति । न च न पदान्तसूत्रस्थभाये वेतस्वानित्यत्र त्वस्य प्रातिपदिकरूपणावसरे पदचरमावयवविधायकातिरिक्तस्य चैपादिकस्य ग्रहणमिति व्यवस्थापितमिति त्वस्य पदचरमावयवतया तस्मिन्कर्तव्ये कथन्निषेधप्रवृत्तिरिति वाच्यम् । प्रत्यासत्त्या लोपनिमित्तनिमित्तकपदत्वचरमावयवविधायकातिरिक्तस्य चैपादिकस्य ग्रहणमित्यर्थकल्पनेनापि तस्य भाष्यस्योपपत्तेः । इदम् । नुम्बिसर्जनशीयेतिसूत्रम् । अत एव । अधिकारत्वादेव । एवञ्चैतदेकवाक्यतयाऽदेशविधायकमादेशप्रत्ययययोरितिसूत्रमेव तस्य त्वच न प्रापिधौ सुसकारस्यादेशप्रत्ययावयवभिन्नत्वादिति भावः । प्रत्येकं सम्बन्ध इति । इन्द्राम्ने अूयमाणत्वात् । व्याख्यानादिति । अत्रैव सूत्रे निसेः प्रतिषेधो यक्त-

ष्य इत्येतदार्त्तिकप्रत्याख्यानपरभाष्ये निंस्से निंस्स्वेत्यत्र षत्वं प्रत्ययसकारस्य प्राप्तन्तद्वारणाय व्यवायशब्दस्य प्रत्येकं सम्बन्ध उक्तस्तन्मूलकादित्यर्थः ॥ हयवरट्सूत्रस्थमिति । नुमी योऽनुस्वारइतिव्याख्यानेन शरग्रहणेन गतार्थत्वाभावस्तत्रोक्तः ॥ विडिडित्यत्र शाखाणां यथा प्राप्तिस्तथा दृष्टान्तपरतया शिष्यबुद्धिवैशद्याय प्रक्रियामाह । सपादसप्तेत्यादि तक्षोतेः क्विबिति । एतेन खन्ते कलोपाप्राप्तावपि न क्षतिरिति सूचितम् । न च परेस्वेतिसूत्रस्थभाष्यरीत्या एभ्यः क्विबेव नास्तीति कथमेतदिति वाच्यम् । तस्य भाष्यस्य विशेषविषयत्वात् । तदेवाह । णिलोपस्येति । एवञ्चाख्यन्त एव तदभावो न तु खन्त इति भावः । इत्यन्यत्र विस्तर इति । यथा स्वरितो वेतिसूत्रे कैयटेनोक्तम्मधुश्रुतमाचष्टे मधुगितीष्यते इति । एतच्च संयोगादिलोप एव सङ्गच्छते । अत्र हि पूर्वत्रासिद्धे न स्थानिवदित्यस्य तस्य दोष इतिवचनेन निवारणे णिलोपस्य स्थानिवत्त्वात्संयोगादिलोपो दुर्लभः । सकारोच्चारणन्तु संयोगान्तलोपेऽपि सकारस्य रुत्वविसर्गयोश्चरितार्थम् । परन्तु क्वौ लुप्तमिति वचनसत्त्वे तेन स्थानिवत्त्वनिषेधे सति सिध्यति । एतदभिप्रायेणोक्तं क्वौ लुप्तमिति तु न सार्वत्रिकम् । न तु तद्वचनमेव नास्तीति । अधिकमन्यत्र स्पष्टम् । तदभाव इति । ककाराभाव इत्यर्थः । वसुसादेश इति । न चैवमपि वस्वु स्तम्भ इतिधातोरेकानुबन्धकत्वाद्ग्रहणं स्यादिति वाच्यम् । सामान्यग्रहणार्थेन वसुसादेशस्य सकारेणैव वामदेवाद् ङड्ङाविति सूत्रज्ञापितपरिभाषाया इहाप्रवृत्तेः । किञ्च शचादेशवसोः स्थानिवद्भावेनैकानुबन्धत्वलाभे वस्वादेशे उकारोच्चारणन्तदनुबन्धकपरिभाषाया अप्रवृत्त्यर्थमिति क्वसोर्ग्रहणस्य सिद्धिः । धातोरपि तर्हि ग्रहणं स्यादिति चेत् । वसुसादेशे सकारोच्चारणेन द्वयनुबन्धयोर्ग्रहणमित्याशयात् । पदान्तपदाद्योरेकादेशस्येति ॥ तदुक्तभाष्ये । शकन्धु । हृचेच्छक्तम् अपचेच्छक्तमित्यादावसिद्धत्वमाशङ्क्य सम्प्रसारणङीप्सु सिद्ध एकादेशः । कुतः । पदान्तपदाद्योरेकादेशस्यासिद्धत्ववचनात् ॥ अत्र कैयटः । पदस्येति वर्त्तते । अन्तादिग्रहणञ्च पूर्वसूत्रादनुवर्त्तते तेन पदादिपदान्तयोरेकादेशोऽसिद्धो भवतीत्यर्थो लभ्यत इति । अत्र धात्वादेरित्यत आदिग्रहणम्पदान्ताद्वेत्यतोऽन्तग्रहणमनुवर्त्तत इति बोध्यम् । वस्वेकाजाद्धसामिति । नियमशास्त्राणां

विधिमुखेन प्रवृत्तिरितिसिद्धान्ताभिप्रायेणेदम् ॥ मूलन्दूषयन् स्वसिद्धान्तमाह । परे तु पदावधिकेऽन्वाख्यान इति । पदसंज्ञाप्रयोजकविभक्तिपर्यन्तविभागेन प्रकृतिप्रत्ययोः स्थापनङ्कृत्वाऽन्वाख्यान इत्यर्थः । प्रतिपदविधित्वेनेति । न च वस्वेकेतिसूत्रेऽपि वसोरित्यस्योच्चारणात्प्रतिपदविधित्वं समानमिति वाच्यम् । वस्वेकेतिसूत्रजन्यवाक्यार्थबोधस्य एकाजाद्यर्थापेक्षत्वेन तदपेक्षया वसोरितिसूत्रजन्यवाक्यार्थबोधस्य पूर्वं सम्भवात् । वस्तुतस्तु प्रतिपदेत्यत्र वदशब्दो न शक्तपरः । किन्तु पदसंज्ञायोग्यपरः । एवञ्च पदसंज्ञा प्रयोजकविभक्तिप्रकृतिबोधकशब्दविशेषमुच्चार्य तदुद्देशेन विहितत्वम्प्रतिपदविधित्वम् । यथा स्वाम्पीत्यत्र नित्यात्परादपि नुमः प्राक् प्रतिपदोक्तत्वेनात्रिति दीर्घो भवति । न च सेदुषः पपुष इत्यादौ विभक्तौ न प्रकृतिभागस्य पदसंज्ञा भसंज्ञया बाधादिति वाच्यम् । तथात्वेऽपि प्रकृतेः पदत्वयोग्यताऽस्त्येव । योग्यताप्रयोजकत्वस्यैव विवक्षितत्वात् । एवञ्च वस्वेकाजादितिसूत्रस्य वसोः परः वलाद्यार्द्धधातुकस्येड्विधायकत्वन्न तु विभक्तिप्रकृतिबोधकशब्दविशेषोद्देशकविधित्वमिति नैतस्यै तादृशप्रतिपदविधित्वम् । वसोरितिसूत्रस्थवसुशब्दस्तु आत्मान्तस्य संज्ञेति तादृशविभक्तिप्रकृतिबोधकत्वमस्त्येवेति प्रतिपदविधित्वेन सम्प्रसारणस्य पूर्वम्प्रवृत्तिर्युक्तैव । न च पूर्वं सम्प्रसारणेऽपि जातस्य सम्प्रसारणस्यासिद्धत्वादिट् स्यादिति वाच्यम् । तस्याः परिभाषाया अनित्यतया लक्ष्यानुरोधेनाप्रवृत्तिस्वीकारेऽपि लक्ष्यसिद्धिसम्भवात् । निष्फलेति । नन्वकृतव्यूहपरिभाषाया न कृतो व्यूहो निमित्तविनाशेऽपि कार्यस्थितिरूपो यैरित्यर्थिकाया अस्वीकारे तस्थाविलादौ पूर्वप्रवृत्तष्टुत्वस्यानिवृत्तौ रूपासिद्धिरिति चेन्न । स्तौतिस्तोभतीत्यादिनिर्देशेन सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्ये विषये चैपादिकस्य पूर्वमप्रवृत्तिरिति ध्वननात् । ननुपदावधिकेऽन्वाख्याने यद्यपि परिभाषां विनापि सिध्यति तथापि क्रमेणान्वाख्यानपक्षेऽकृतेतिपरिभाषा स्वीकार्यैवेत्यत आह । लक्ष्यानुरोधादिति । औपदेशिकेति । महत इत्यादिः । भिन्नसान्तसंयोग इति । औपदेशिकधातुसम्बन्धिभिन्नो यः सान्तसंयोग इत्यर्थः । विवक्षितइत्यस्य यथा लाभस्तम्प्रकारन्दर्शयति । भाष्य इति । स्वरसिद्ध्यर्थमिति । परमपुमानित्यत्र परत्वादेर्धे सति पूर्वमसुडि कृते समासान्तोदात्तत्वभवदसुङ्

एव यथा स्यादित्येवमर्थमित्यर्थः । यदि सर्वनामस्थान इति विषयसप्तमी न स्यात्तदाऽन्तरङ्गत्वादादौ पुंशब्दोकारस्योदात्तत्वे सकारस्य सर्वनधर्मणो हलः स्थाने जायमानस्यादेशस्यान्तरतम्यादनुदात्तत्वमप्रसज्येत । न चासुङ्कृतेऽकारस्यान्तत्वङ्कृतमित्यसुङः पुनः स्वरः स्यादिति वाच्यम् । अन्तरङ्गे स्वरेकर्त्तव्ये बहिरङ्गस्यासुङोऽसिद्धत्वात् । इति भाव इति । यदुपदेशिवद्भावेन साधनत्वविषयसप्तम्यापि साधयितव्यमिति भावः । वचनमेव । असुङ्युपदेशिवद्वचनमिति वचनमित्यर्थः । ततः पूर्वम् । विभक्तिबुद्धिनिमित्तत्वेनबहिरङ्गादसुङः पूर्वमित्यर्थः । स्वरप्रवृत्तौ । समासान्तोदात्तत्वप्रवृत्तौ । दोषात् । परमपुमानित्यत्र पूर्वसमासान्तोदात्तत्वप्रवृत्तौ मकाराकारस्योदात्तस्याश्रवणप्रसङ्गात् । स्त्रियामिति सूत्रभाष्ये त्विति । एतेन डुमसुन्प्रत्ययेनास्य साधनभाष्यविरुद्धमिति सूचितम् । निष्कलेति । उच्चारणार्थत्वस्वीकारेऽपि लाघवाभावात् । ननु सुव इत्यत्र मूले यथोक्तन्धातुभिन्नस्यासन्तस्येति तथा व्याख्याने धातुभिन्नस्य समुदायस्यासन्तत्वाद्दीर्घः स्यादेवेत्यत आह । अधातोरित्यस्येति । एवं सत्यधातोरित्यत्र धातुपदन्धात्ववयवलाक्षणिकन्तच्च नञा समस्तमसो विशेषणमन्तपदेन चासमर्थसमासः सौत्रत्वाद् द्रष्टव्यः । षष्ठीति । एवञ्चालोन्त्यपरिभाषयोपस्थितस्येदं विशेषणमित्यदसोऽवयवस्यान्त्यस्यौकारः स्यात् सुलोपश्चेति सूत्रार्थः एवं सति येन नाप्राप्तिन्यायेनेदन्त्यदादीनाम इत्यस्य बाधकन्तदाह । औत्वन्त्यदाद्यत्वापवाद इति ॥ नन्वदस इति ॥ पञ्चम्येवास्तु । तदोः स इतिसूत्रादनुवर्त्तमानस्य सावित्यस्य अदस पञ्चम्या षष्ठ्यन्तत्वकल्पनया सोरेव डौआदेशो विधेयः । विभक्तिविपरिणामक्लेशपरिहारानुरोधेन तु सोर्डौ इत्येवास्त्वित्युक्तमित्याशयेन शङ्कते । ननु सोरिति । टिलोप इति । नित्यत्वादित्यादिः । डित्त्वसामर्थ्यादित्यप्यस्यादिः । नित्यत्वात्सत्वबाधित्वेति । न च त्यदादीनामिति सङ्ग्राहकशब्दाददस इत्यस्य पार्थक्येन कल्पनायामदसो दः स इत्यंशो न चरितार्थ इति तत्सामर्थ्यादिदमेव वाक्यन्त्यदाद्यत्वस्य बाधकं भविष्यतीति वाच्यम् । साकच्केऽस्य चारितार्थ्यात् । ननु डौआदेशः सत्यपि सम्भवे बाधनम्भवतीतिन्यायेन त्यदाद्यत्वापवाद इति प्रथमं डौआदेशे कृते परत्वाच्छब्दान्तरात्प्राप्तोऽनित्यं टिलोपं बाधित्वा सत्वे पुनःप्रसङ्गविज्ञानन्यायेन टिलोपेऽसाविति सिद्धम् । न

च सकृद्गतिन्यायाङ्गीकारे कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वाट्टिलोपप्रवृत्तेः स्वीकारेऽपि वा दोष एवेति वाच्यम् । प्रकृतसूत्रेऽदस इति योगं विभज्य तदोः स इत्यनुवर्त्यादस एव दकारस्य सत्वं नान्यस्य दकारस्येतिनियमेनानन्त्यग्रहणप्रत्याख्यानरीत्याऽधुनापि विभक्तस्यादस इत्यस्यारम्भसामर्थ्यात्त्यदाद्यत्वबाधकतयेष्टसिद्धेरिति चेन्न । अनन्त्यग्रहणप्रत्याख्यानरीत्या दोषाभावेऽपि योगविभागादिक्लेशेन प्रत्याख्याने गौरवमित्यनन्त्यग्रहणमन्त्यव्यावर्त्तकमावश्यकमितिसूचकारमतन्त्रत्वे टिलोपे पूर्वोक्तरीत्या पूर्वमप्रवृत्तेऽन्त्यत्वात्वाप्राप्तौरूपासिद्धिप्रसङ्ग इत्याशयात् । एत ईदितिसूत्रे बहुवचनइत्यस्यबहुवचने पर इत्यर्थकरणे पूर्वपरयोरेकादेशे दात्परैकारस्य बहुवचनपरत्वासंभवादसंगतिः स्यादत आह । षष्ठुवचनशब्द इति । एवञ्च मूले विभक्तिकार्यमागित्यस्य मध्यमणिन्यायेन पूर्वपराभ्यामित्यन्वेष्टव्यम् । एकवचनोपपत्तये आह । सु इतिसमाहार इति । ऐसुनेति । किन्तु बहुवचने झल्येदित्यत्वे एत ईदितीकार इति शेषः ॥

इति हलन्ताः पुंलिङ्गाः ॥

पदोन्ते विद्यमानस्येति । न च हस्यैव पदान्तत्वन्तु तस्य पदान्ते विद्यमानत्वमिति वाच्यम् । पदचरमावयवस्यैव व्यपदेशिवद्भावेन पदान्ते विद्यमानत्वसम्भवात् । पदादादिरिति पत्व इति । एवञ्च यन्मूल कृता षत्वांशे निपातनमाश्रितं तल्लिङ्गान्तरीत्या ॥ कैयटादिमत इति । यथा वीप्सागर्भबहुव्रीह्याश्रयणात् कुत्वं षत्वस्य बाधकन्तथा ढत्वस्यापि बाधकमिति भावः । व्याख्यानादिति । अङ्गिः संस्कृतमितिनिर्देशस्य दर्शनमूलकादित्यर्थः । यथा अणो द्याच इत्यत्राण इत्युपात्तन्त्वाट्टश्च शब्दः प्रयोगे नास्तीति द्वितीयस्यौपदेशिकस्य ग्रहणन्तथा सानुबन्धकस्य ग्रहणञ्चेत्यकृतेऽपि विवक्षितंस्यात्तदपि निर्गतानुबन्धकस्य पकारोपलक्षिताकारस्योद्देश्यता स्यादिति प्रकृते पकारविशिष्टस्य प्रयोगे उपलम्भादङ्गिरिति सूत्रे निर्देशो नोपपद्येतेति न प्रत्ययग्रहणम् । सजूरिति । षत्वस्यासिद्धत्वाद्रुत्वम् । वोरितिदीर्घः । मूलमेवेति । इदन्न भिस्येव किन्तु यद्विभक्तौ यंस्येवं तस्यां सर्वत्र ॥

इति हलन्ताः स्त्रीलिङ्गाः ॥

विमलदिवीइत्यत्रो क्तयङ्ग्राह्यात्तत्रये मूले आह । अन्तर्वर्त्तिनीमित्यादि । अत एव । पूर्वपदस्य पदत्वादेव । दधिसेचाविति । निरुपपदात्सिचेर्विचि सुब्लुप्त्यनन्तरं समास इति पक्ष इदम् । भषभाव इति । तस्य वस्तुतः पदादेः कार्यविधायकत्वेपि पदादिशब्दानुवादेन विधायकत्वाभाव इति भावः । नन्वेवं शुक्लकर्णः शङ्कुकर्ण इत्यादौ कर्णो वर्णलक्षणादित्यनेन वर्णलक्षणवाचकात्परो यः कर्णशब्द उत्तरपदभूतस्य आद्युदात्तो भवतीत्यर्थकेनाद्युदात्तत्वन्न प्राप्नोतीत्यत आह । उत्तरपदादिति । एवञ्च परिभाषायामुत्तरपदशब्दः केवलयौगिक एव विवक्षित इति भावः । उत्तरपदस्यकार्यित्व एवेति । तत्फलन्मासकुम्भवापेनेत्यत्र पदव्यवायेपीतिसूत्रेण निषेधसिद्धिः अधिकमन्यत्रोक्तम् । नन्वेवं बहुच्पूर्वके बहुवाचाविल्यादौ दोष एवेत्यत आह । बहुच्पूर्वक इति । इत्येवमेव पठितमिति । इवञ्चैतादृशनियमेन यङ्लुबन्तदेवोत्तरपदत्वे चापदादिविधाविल्यनेन प्रदर्शितम् । नन्वेतावता वार्त्तिकारम्भपक्ष एव लब्धो न प्रत्याख्यानपक्ष इत्यत आह । एतत्प्रत्याख्यान इति । गुरुतर इति । स च शब्दरत्ने विवेचितः । नञ्घटितैतद्वचनपाठेनेति । पदादिविधावेव प्रत्ययलक्षणन्न पदान्तविधाविति नियमार्थेनोत्तरपदत्वे च पदादिविधाविति वचनेनेत्यर्थः । न स इति । प्रत्याख्यानप्रकार इत्यर्थः नन्वेवमपि पूर्वदण्डिप्रियइत्यत्र त्रिपदे बहुव्रीहावन्तरतत्पुरुषे दण्डिशब्दस्योत्तरपदत्वात्प्रत्ययलक्षणप्रतिषेधे पदत्वाभावान्नलोपो न स्यादत आह । उत्तरपदशब्देनेति । व्याख्यानादिति । वार्त्तिकप्रत्याख्यानपक्षेऽसर्वनामस्थाने यचीत्यत्र सुब्त्यनुवर्त्त्य यकारादावजादौ सर्वनामस्थाने पूर्वम्पदन्न मध्ये चेत्तत्परकं सुबन्तमस्ति तदपि पदन्नेतिरीत्या व्याख्याने निर्दिष्टपरिभाषयाऽव्यवहितसुबन्तस्यैव पदत्वनिषेधो लभ्यते तदेकवाक्यतया वार्त्तिकारम्भपक्षेऽपि तथैव युक्तामित्यभिप्रायकात् । एवञ्च तत्समासप्रयोजकैकार्थीभावप्रयोज्यसमासीयचरमपदाव्यवहितपूर्वत्वानाक्रान्तस्य पदत्वव्यपदेशे कर्त्तव्ये तस्य कार्यित्वे च प्रत्ययलक्षणप्रतिषेध इति बोध्यम् । अयञ्चेति एनदादेशश्चेत्यर्थः । सामर्थ्यादिति । द्वितीयापदोपस्थापिते अमि एनदित्येतद्वाक्यबोधितस्यादेशस्य विधानम्प्रतियन्निमित्तत्वन्द्वितीयैकवचनस्य तत्सामर्थ्यादित्यर्थः । एनादेशोपीति । पुंसीति शेषः । ननु सूच एवैनत्कर्त्तव्यः

एनमिति तु त्यदाद्यत्वेन सिद्धमित्यत आह । येन नेति । अत एव । एनादेशस्यावश्यकत्वादेव । अन्यचैनो वक्तव्य इतीति । अन्यथा एनादेशस्य श्रवणमेव न स्यात् । ननु त्यदाद्यत्वस्यैनदादेशो यद्यपवादस्तदा भाष्ये यद्येनत्क्रियते एनो न वक्तव्यस्त्यदाद्यत्वेन सिद्धमित्युक्तन्तद्विरुध्येतेत्यत आह । अपवादत्वमजानत इति । तर्ह्यग्रे भाष्ये एनादेशस्यावश्यकत्वं कुतो नोक्तमत आह । भाष्यकृतावित्ति । अत्र । एकदेश्युक्तौ । अत्र विशेषमाह । अनयोरिति । एतदस्तसोरिति । ननु सूत्रान्तरसाहचर्याश्रयणं सूत्रान्तरस्य व्यवस्थापकमित्येतत्सिद्धान्तविरुद्धमिति चेन्न । तस्मिन्सूत्रे तसोरित्युपादानेन तयोश्च सर्वनामत्व एव सम्भवनमित्युपसर्जने तेन सूत्रेणादेशाभाव एव किन्तु प्राधान्येन प्रसिद्धस्वीयसर्वार्थवाचकस्यैतच्छब्दस्य तस्मिन्सूत्रे स्थानित्वेन ग्रहणमित्यर्थाधिकारानुरोधेन प्रकृतसूत्रेऽपि सर्वनाम्न एवैतच्छब्दस्य ग्रहणमित्येव साहचर्यपदेन विवक्षितमित्याशयात् । न प्रवृत्तिरिति । एतेनोपसर्जने एनदादेशस्य चारितार्थ्येन त्यदाद्यत्वापवादत्वोक्तिर्विरुद्धेति दूषणस्य नावकाश इति सूचितम् । तत्रार्थे भाष्यमपि साधकमित्याशयेनाह । त्यदाद्यत्वेनेति । एनतमादायेति इत आरभ्य पूर्वोक्तमेवार्थं तस्यैव दृढीकरणाय निरूपितमित्यन्तेन पुनराह यद्यप्येनदस्त्यदाद्यत्वापवादत्वेनेत्वत्रैनदो दान्तत्वमुक्तमिह तु तान्तमुक्तमिति विरुद्धमाभाति । तथापि समासे दान्तेपि चर्त्वे सति रूपे न विशेष इत्याशयेन तान्तोल्लेखः । ननु यद्युपसर्जनेऽस्यादेशस्याप्रवृत्तिस्तदा यद्येवमेनश्चितको न सिध्यति एनच्छितक इति प्राप्नोतीतिभाष्यविरोधः तत्रादेशोच्चारणन्तु सामर्थ्यालुका लुप्तेपि भवतीतिपूर्वमुक्तन्तदभिप्रायेणेत्यत आह । अन्वादेश इति । विशेषाभावेनेति । नकारस्य रुत्वे सति यदुत्त्वम्भवति तस्याधुनाऽप्राप्तेः । नकारोच्चारणसामर्थ्येनेति । अङ्ग इति वक्तव्ये विभक्तिलोपङ्कृत्वाऽकारोत्तरनकारे प्राप्तस्यापि लोपस्याकरणेनेत्यर्थः । भ्यामादौ व्यावृत्त्येति । नकारोच्चारणेन यत्र न नकारस्य श्रवणन्तत्र रुत्वस्याप्रवृत्तिरितिकल्पनेनेत्यर्थः । पूर्वपक्षिमते भ्यामि नलोपस्य सत्त्वेन तत्र रुत्वस्याप्रवृत्तिस्तन्मते स्यादिति भावः । अन्यथा । व्यावृत्त्यभावे । ननु आगच्छाहो रूपन्दर्शयिष्याम आगच्छाहो राचिरेषा गतेत्यादौ रुत्वकृतो विशेषः स्पष्ट एवेत्यत आह । भाष्यप्रामाण्याच्चे-

ति। वार्त्तिकस्य ज्ञापकतापरं यङ्लाथन्तत्वामाख्यादित्यर्थः। ननु तङ्लाथप्राख्यादत्र नलोपो नेत्येव कल्पनमस्त्वित्यत आह। तज्ज्ञापकेति। आहत्तेन तेन सूत्रेण यथा नलोपाभावलाभस्तथाकारमाह। आहत्तस्येति। मूलकारोल्लिखिताशङ्कासमाधानविषये विशेषमाह। इदमिति। नलोपापवाद एवेति। येन नाप्राप्तन्यायेनेत्यादिः। ननु सम्बुद्धौ नलोपाप्राप्तिविषये तयोश्चारितार्थ्यात्कथं येन नाप्राप्तिन्यायप्रवृत्तिरत आह। निषेधविषय इति। ध्वनितञ्चेदमिति। येन नाप्राप्तन्यायविषयत्वमित्यर्थः। प्रत्ययविधिविषय इति। ज्ञापकसाजात्यादित्यादिः। तस्य। रुत्वस्य। ननु यदि रुत्वरत्वयोरसिद्धत्वन्तदा पूर्वं न्दीर्घ एव स्यादिति कथमेतदित्यत आह। अक्रतेति। ननु बहुव्रीहाणीत्यत्रात्पूर्वत्वाभावात्कथमणत्वमत आह। अत्र यदिति। अत्पूर्वग्रहणं हस्यानिककवर्गाभाववद्धन्तेरुपलक्षणमित्यादि। सृज्धातुविषये षत्वस्य अपवादत्वात्कथमसिद्धत्वमतस्तस्य चारितार्थ्यमाह। षत्वन्विति। भाष्यप्रयोगस्य विशेषविषयत्वमुपपादयति। अनेनेति। अनव्ययेति। भाष्योक्तप्रयोगसाजात्यात्। ननु सृष्टमित्यादौ झलि षत्वस्य सावकाशत्वमुक्तमिति कथङ्कुत्वापवादत्वमत आह। सृजियज्योरिति। अत एव। षत्वस्य पूर्वम्प्रवृत्तिस्वीकारादेव। ननु स्रग्लिक्शब्दयोर्निपातनेन कुत्वस्वीकारे निपातनस्याप्यपि कुत्वसाधकत्वापत्तिरत आह। निपातनेनेति। अनयोः। स्रग्लिक्शब्दयोः इदमेव न्याय्यमिति। षत्वप्राप्तिशङ्काप्येवं सति न भवतीतिभावात्। ननु पूर्वोक्तरीत्याऽसृक्शब्दसाधनेऽव्ययपूर्वपदप्रकृतिस्वरः अनुपदोक्तरीत्या साधने त्वन्तोदात्तत्वापत्तिरिति स्वरभेदापत्तिरिति चेन्न। लोके यद्यप्युदात्तोऽयमिष्टस्तदोणादयो बहुलमिति बहुलवचनेन साध्यः। वेदे तु बहुलञ्छन्दसीत्यस्तेयवेत्याशयात्। वार्त्तिकरीत्येति। तस्मिन्बह्वर्जीति पाठेन केवले ऊर्जशब्दे तत्प्रवृत्तिः सम्मतैव। न चैवमिति। अचः परो यो झल इतिव्याख्याने। इत्यनुवर्त्त्येति। अच्पदमप्यत्रान्तमेवेह सर्वनामस्थान इति सप्तमीबलात् षष्ठ्यन्तमविष्यति। नन्वच इति पञ्चमी नपुंसकस्येतिसूत्रे कृतार्था। सर्वनामस्थान इति सप्तम्यपि सर्वनामस्थाने परत उगितो नुम्विधायकत्वे नोगिदचामितिसूत्रे युजेरसमासइतिसूत्रे च चरितार्थेति प्रकृतसूत्रे उभयनिर्देशे पञ्चमीनिर्देशो बलीयानितिपरिभाषया

सर्वनामस्थान इतिसप्तम्यन्तस्यैव षष्ठ्यन्तत्वम्भविष्यतीति चेन्न । सर्वादीनीति सर्वनामानीतिनिर्देशेन पञ्चम्यन्तस्यैव षष्ठ्यन्तत्वकल्पनात् । युक्त्यन्तरमाह । अनुवृत्तिसामर्थ्यादिति । नन्वेवंकाष्ठतङ्कीत्यत्र नुम्न स्यादचः परस्य झलोऽभावादत आह । काष्ठेति । झलत्वजातेरिति । वर्णग्रहणे जातिग्रहणमितिपरिभाषायाः सत्वात् । बह्वर्जेत्यत्र बह्वर्जि नुम्प्रतिषेधइति वार्त्तिकानन्तरमस्य पाठादिति । अल्लोपस्येति । यङोऽकारलोपस्येत्यर्थः । जायन्त इति । अस्य नव सावित्यादौ प्रत्येकं सम्बन्धः । इन्द्वान्ते श्रूयमाणस्येति । ननु इन्द्वान्ते श्रूयमाणस्य इन्द्वघटितसमासघटकस्य प्रत्येकं सम्बन्धोऽन्यत्र दृष्टः इदन्तु न तथेतिकथमेतदिति चेन्न । नेदन्द्वान्त इत्यपूर्वं वचनङ्किन्तु साहित्यविशिष्टानान्द्वविधानात्साहित्यस्यचैकधर्मावच्छिन्नान्वयित्वरूपतयाऽन्वयितावच्छेदकावच्छिन्नस्य च समासघटकपदोत्थापितस्यापि धवखदिरौ छिन्धीत्यादिवाक्यजन्यशाब्दबोधे भानात्तदत्र विभक्तिव्यवधानेऽपि नवपदार्थेन्वयो भविष्यतीति भावः । प्रत्येकमेवेति । प्रत्येकान्वितनवपदसाहचर्यात् । सोभुंका लुप्तत्वान्नुम्नेति । यत्तु अनपुंसकस्येतिपर्युदासान्नपुंसके स्वमोः सर्वनामस्थानसंज्ञाभावान्नुमः प्राप्तेरेवाभावाच्चिन्त्यमेतदिति । अत्राहुः । यथा पुंसि झलाद्यादिलोपेपि प्रत्ययलक्षणेन नुमागमो भवति तथाऽत्रापि श्रुतो नेत्याशङ्कावारणायाह । लुका लुप्तेति । एतेन लुका लोपो नपुंसके भवतीति पञ्चम्यन्तेनास्य नपुंसकत्वादिति स्मारितन्नतु लुका लोप एव नुमभावे हेतुत्वेनोपात्तः । एवञ्च नपुंसकत्वान्नपुंसकेच सर्वनामस्थानत्वाभावोदितिशेषो बोध्य इति । अपरे तु गवाक्शब्दस्येतिपञ्चम्यन्तगवाक्शब्दस्य शब्दशब्दसामानाधिकरण्येन पुंल्लिङ्गतया तत्रैव प्रत्ययलक्षणेन नुमाशङ्कायामेवमुक्तम्प्रत्ययलक्षणनिवृत्त्यर्थमिति सञ्जगदिरे । अन्ये तु गवाक्शब्दौद्वौ । एकः सुबन्ते गोशब्दे उपपदे अञ्चतेः क्विन्नन्तः । अपरो निरुपपदाच्चेः क्विनि कृते तदन्तात्सुबुत्पत्त्यनन्तरं सुबन्तस्याक्शब्दस्य गोशब्देन सह समासे कृते निष्पन्नः । तयोर्मध्ये प्रथमस्य नपुंसकत्वेपिद्वितीयगवाक्शब्दे उत्तरपदस्य पुंल्लिङ्गतया तत उत्पन्नो यः सुप् समाससंज्ञाप्रयोजकः प्रत्ययलक्षणेन तमाश्रित्य नुमाशङ्कानिवारणायोक्तमत्र लुका लुप्तत्वादिनतीति वदन्ति । वस्तुतस्तु कारणाभावस्य कार्याभावप्रयोजकता सुप्रसिद्धैव । कारणाभावश्च न का

रणप्रतियोगिकाभावः। किन्तु कारणतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव। अन्यथा कारणाधिकरणेपि कारणगगनोभयाभावसत्त्वात्कार्याभावस्यापत्तेः। प्रकृते च न प्रत्ययमात्रस्य नुमागमकारणत्वङ्किन्तु सर्वनामस्थानसंज्ञापरत्वोभयविशिष्टस्यैव। अन्यतरविशेषणाभावे च विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य सम्भव इति परत्वात्मकविशेषणाभावप्रयुक्तो यः कारणतावच्छेदकावच्छिन्नाभावः सोत्र लुका लुप्त इत्यनेन दर्शितः। सर्वनामस्थानसंज्ञाभावश्च न दर्शितः। संज्ञिसत्त्वे हि संज्ञया भवितव्यम्। संज्ञी च लुका लुप्तत्वान्नास्तीति न काचिदेवमुक्तौ क्षतिरिति चिन्त्यमेव चिन्त्यम्। वा न पुंसकेतिसूत्रे नाभ्यस्तादिति सूत्राच्छतुरित्यनुवर्त्तते तस्याभ्यस्तात्परत्वं ददन्ति ददतीत्यत्र सम्भवति अतो मूले व्याख्यातं शता इति तदर्थमाह। शतृप्रत्यय इत्यर्थ इति। वेतिवर्त्तत इति। न चेह वाग्रहणानुवृत्तिर्मास्तु यद्ययन्नित्यः स्यात्तदाऽनेनैव सिद्धे शप्श्यनोरिति सूत्रं व्यर्थमेव स्यादित्युत्तरसूत्रारम्भादस्य वैकल्पिकत्वमुत्तरसूत्रस्य च नित्यत्वमिति व्यवस्थासम्भवादुत्तरसूत्रे नित्यग्रहणञ्च न कार्यमिति वाच्यम्। वैपरीत्यस्याप्यापत्तेः। एवन्तर्ह्युत्तरसूत्रे नित्यग्रहणमस्तु तद्घटितोत्तरसूत्रसामर्थ्यङ्कल्पयाम इति चेत्। सामर्थ्यकल्पनापेक्षया कृतस्यैव वाशब्दस्यानुवृत्तौ लाघवमित्याशयः। नुम्ग्रहणन्तु स्पष्टार्थमिति। इदितो नुमितिसूत्रान्नुम्ग्रहणानुवृत्त्यैव सिद्धेः। न चानुवर्त्तमाननुम्ग्रहणं वाशब्दसम्बन्धं वा नपुंसकेतिसूत्र इतीह नित्यार्थम्नुनर्नुम्ग्रहणमिति वाच्यम्। उत्तरसूत्रे नित्यग्रहणादिह वाशब्दानुवृत्तेरिष्टत्वात्। उत्तरसूत्रे तु नित्यग्रहणसत्त्वाद्वाचार्थविरोधेन केवलनुम्शब्दस्यैव सम्बन्धो भविष्यतीतीह नुम्ग्रहणन्निष्प्रयोजनमेव। यद्यस्मिन्नपि सूत्रे वाशब्दः सम्बध्यते तदाऽनुवर्त्तमाननुम्शब्दस्यैककार्यनिरुक्तानां सहैव प्रवृत्तिरितिन्यायेन केवलनुम्शब्दस्य शप्श्यनोरितिसूत्रे सम्बन्धो न स्यादिति चेदेककार्यनियुक्तानां क्व चिदेकदेशोप्यनुवर्तत इतिन्यायेन केवलस्य नुमः सम्बन्धो भविष्यतीत्यस्तु। एतादृशार्थस्य यद्यपि लाभस्तथापि स्पष्टार्थन्नुम्ग्रहणमिति भावः। उभयत आश्रयण इतिवचनस्य स्वमतेऽभावादाह। तेन व्यपवर्गालाभेनेति। व्यपवर्गो व्यपदेशभेद इति यावत्। अन्यथा। आदित्यस्यानुक्तौ। अत्र क्वचिद्वान्तीति पाठः स तु युक्तः। भावाभावयोर्मध्ये भावानुष्ठानस्य युक्तत्वात्। अङ्गस्य कार्य इति। तस्मिन्सूत्रेऽङ्गग्रहणात्। ननु पच-

म्तीत्यत्र शीनदीपरत्वाभावात्कथन्नुमित्यत आह । पचन्तीत्यादीति । इदमिति । निरवकाशत्वमतिपदोक्तत्वमित्येतत् । छदिरुपधीति । अत्र उगवादिभ्य इतिसूत्रे इति वक्तुं युक्तम् । अथ वा छदिरुपधिवलेर्ढञिति सूत्र इत्यत्र बहुव्रीहिसमासेन छदिरुपधीतिसूत्रं यत्सूत्रव्याख्यानावसरे व्याख्यातन्तत्सूत्र इत्यर्थः । तत्र हि यञ्ञ्यावञः पूर्वविप्रतिषिद्धम् । सनङ्गूपानह्यौ प्रयोजनम् । यञ्ञ्यौ भवतोऽञः पूर्वविप्रतिषेधेन । किम्प्रयोजनम् । सनङ्गूपानह्यौ प्रयोजनम् । यतोऽवकाशः । शङ्ख्यन्दारु । पिचव्यः कर्पासः । अजोऽवकाशः वार्ङ्म् । वारत्रम् । अत्र नद्रीवर्द्रीशब्दाभ्यां वरत्रापर्यायाभ्यामञ् । सनङ्गुनाम चर्मविकारस्तस्मादुभयम्प्राप्नोति । सनङ्गव्यं चर्म । ञ्यस्यावकाशः । औपानह्यं दारु । अजः स एव । उपानन्नाम चर्मविकारस्तस्मादुभयम्प्राप्नोति । औपानह्यं चर्म ॥ ढञ् च । ढञ् च भवत्यञः पूर्वविप्रतिषेधेन । ढञोऽवकाशः । छादिषेयन्तृणम् । अजः स एव । छदिर्नाम चर्मविकारः । तस्मादुभयम्प्राप्नोति । छादिषेयञ्चर्म । ढञ् भवति पूर्वविप्रतिषेधेनेति । छदिर्नामेति । छादनं छदिः तच्च चर्मविकारोपि सम्भवति । छादनमित्यत्र करणे ल्युट् । तच्च तृणविकारः । क्वचिच्चर्मविकारोपि । अत्र कैयटः । अत्राहुः छदिरुपानह्योः प्रतिपदम्प्रत्ययविधानादयुक्तो वप्रतिषेधः । तथा चोक्तम् । परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषाम्मिथः प्रसङ्गे परबलीयस्त्वमिति चिन्त्यमेतदिति । अत्राहुरित्यक्षरसबीजन्तु निरवकाशत्वे सत्येव प्रतिपदविधित्वम्बाधकत्वे प्रयोजकन्नान्यथेति । एतादृशकल्पनायामत्यं विप्रतिषेधपरम्भाष्यमेव मानम् । शेषादिति । तत्र हि शेषग्रहणमनर्थकम् । ये प्रतिपदं विधीयन्ते ते बाधका भविष्यन्तीत्याशङ्कानवकाशा हि विधयो बाधका भवन्ति समासान्ताश्च कबभावे सोवकाशा इत्युक्तम् । स्वसिद्धान्तमाह । परे त्विति । सङ्गतिन्यायादिति । वस्तुतस्त्वेतन्न्यायस्य प्रकृतेऽनुपयोग एव । एकस्मिन्नुमि कृते द्वितीयस्य नुमो वाच्यार्थविरोधादप्रवृत्तेर्न नुम्द्वयप्रसङ्गः किन्त्वनयोर्यत्परन्तदेव पूर्वम्प्रवर्त्तते इत्याशयेनाह । किञ्चान्त्यादच इति । अपरोक्तमभ्युपेत्याह । किञ्च सत्यपीति । झल्ग्रहणेनेति । अयोगवाहानां शर्षूपदेशात् ॥

॥ इति हलन्ता नपुंसकलिङ्गाः ॥

निपातसंज्ञेति। प्रायोऽखराद्यिपाता इतिसूत्रानन्तरं स्वरादीतीत्यादि अव्ययीभावस्येत्यन्तम्पठित्वा चादय इति पठनीयमित्यभिप्रायः। यत्राव्ययग्रहणन्तत्र निपातग्रहणमेवास्तु। इत्यापत्तेरिति। ननु तत्रापि चादय आद्युदात्ता इतिपठनीयमिति चेन्न। येषां क्त्वादियोगे निपातसंज्ञा तेषान्तद्योगाभावेऽप्याद्युदात्तत्वापत्तेः। यद्यपि न्यङ्क्वादी स्वरितावितिफिट्सूत्रेण विशिष्य स्वरितत्वविधानेन निपाता आद्युदात्ता इत्यस्य बाधो वक्तुं शक्यस्तथापि स्वरादावित्यादिपदग्राह्ये प्रातरादावयमतिप्रसङ्गो बोध्यः। एतेन। इष्टव्यवस्था या अलामिन। अन्यत्र। उद्योतादौ। अनुकरणेति। प्रयोगस्थानामित्यादिः। सर्वेषामिति। अपादानत्वाधिकरणत्वकर्मत्वशक्तिप्रधानानाम्। अधिकरणशक्तिप्रधानानीति। अत एव हृत्यघटकानामेषां क्रियायामेवान्वयः। ननु क्रियाप्रधानमाख्यातमितिवन्न चिरमित्यस्य स्वार्थक्रियाविशेषकबोधजनकत्वं दृष्टमत आह। क्रियाप्राधान्यमिति। भाष्यप्रामाण्यादिति। तत्र हि स्थतेर्धञन्तस्य प्रत्ययसन्नियोगेन मान्तत्वं सूत्रे निपात्यते एवं चिरशब्दोऽपि कालविप्रकर्षाभिधायी चिरेण तवागमनमहम्पश्यामि त्वच्चिरात्तस्माद्देशादागतोऽसीत्यादावकारान्तो दृश्यते तस्यापि मान्तत्वं प्रत्ययसन्नियोगेननिपात्यते इत्यर्थकवाक्यान्युक्तानि। इदं त्वत्रबोध्यम्। सायंशब्दस्य घञन्तस्य संख्याविसायपूर्वस्येतिनिर्देशादकारान्तस्य प्रायाणिकत्वेपि मान्तोव्ययसंज्ञकोऽव्ययमस्ति। अत एव प्रातःसन्ध्या सनत्रया सायंसंध्यसभास्करेतिप्रयोगस्योपपत्तिः चिरशब्दस्त्वनव्ययमेव स च शब्दशक्तिस्वभावादेकवचनान्त एव। तस्य तावदेवचिरम् यावन्न विमोक्ष्ये चिरभुङ्क्त इत्यादौ परिदृश्यमानस्तु क्रियाविशेषम्। यत्र तुक्रियावाचकम्पदन्न श्रूयते तत्र तदन्वययोग्यक्रियावाचकशब्दाध्याहारो बोध्य इति। इतिविहित इति। विनिगननाविरहात्सर्वेषाङ्ग्रहणम्। ननु यदुहतो निवत इत्यादिप्रयोगविरोध इत्यत आह। उपसर्गेति। वदग्रहणं व्यर्थमिति। अत एव परिगणनसमये तसिवतीति वत्प्रत्ययोऽपि पठितः। निपातलोकेरिति। तत्र हि परस्परसाहचर्येण निपातयोरेव ग्रहणमित्युक्तम्। नन्वस्तीत्यस्य विभक्तिप्रतिरूपकत्वादेवाव्ययत्वे सिद्धे पृथक्पाठो व्यर्थ इत्यत आह। धनवानित्यर्थकमिति। सत्त्व-

चनस्येति । एतेन विभक्तिप्रतिरूपकत्वाभावो ध्वनितः । न सिद्धिरिति । अस्ति नास्ति दिष्टमितिसूत्रनिर्दिष्टस्य तेनाव्यत्वसिद्धावपि धनवाचिनो न सिद्धिरित्यर्थः । स्वसिद्धान्तमाह । तेनैवेति । यथाऽधिकरणशक्तिप्रधानस्यापि प्रातरादेर्वृत्तिविषये शक्तिमत्प्रधानत्वन्तथाऽस्यापि अस्तिमानित्यादिवृत्तिविषये सत्त्ववाचित्वकल्पनेन सत्ताकर्तृबोधकत्वञ्च विरुध्यते । धनबोधादिति । न तु सत्ताकर्तृसामान्याभिधायकत्वम् । शब्दशक्तिस्वभावात् । कथञ्चिदिति । विशेषार्थाभिधायकत्वे नियतस्य कस्य चित्तात्पर्यग्राहकस्य कल्पनेन । सत्त्ववाचकत्वे बोध्य इति । असत्त्ववाचकस्यैवाव्ययत्वमिति भावः । न च स्वरादिषु सत्त्ववाचकानामपि दर्शनेनेदमसङ्गतमिति वाच्यम् । प्रयोगदर्शनवशादन्यत्र तथा कल्पनेऽप्यस्य सत्त्ववचनस्याव्ययत्वे प्रमाणाभाव इति भावः । अत एव विधेर्वाक्ये नमसा सह त्वयेतिप्रयोगस्याप्युपपत्तिः । के चित्तु एतादृशानां विभक्तिप्रतिरूपकत्वमिच्छन्ति । ते बहुषु स्थलेषु क्लेशसहनेन मान्याः । ननु प्रपूर्वकात्तम्धातोः क्विपि सति प्रताम्शब्दावयवस्य धातुत्वान्नत्वापत्तिरत आह । प्रतानितोति । अपदान्तत्वादिति । तादृशानाम्प्रयोगस्थानामिदमनुकरणमिति भावः । अस्य । प्रतामादेः । भाष्यस्वरसोऽप्येवमिति । न च तस्मिन्नेव भाष्ये यदयम्प्रशान्शब्दं स्वरादिषु पठतीत्युक्तान्तद्विरोध इति वाच्यम् । तस्य भाष्यस्यान्यथैवोपपत्तेः । तथाहि । क्वदन्तं यन्मकारान्तमिति पाठे प्रतामौ प्रतामः इत्यत्रातिप्रसङ्गमाशङ्क्याचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेनाव्ययसंज्ञा भवति । यदयम्प्रशान्शब्दं स्वरादिषु पठतीत्युक्तम् । अत्र प्रशामौ प्रशाम इति शान्तिमद्वाचकस्य । गणे तु शान्त्यर्थकस्य लिङ्गाद्यनन्वय्यर्थकस्य पाठः । तत्र यथा स्वरादीनाम्प्रयोग एव विसर्गो न तु गणे तथाऽस्यापि प्रयोगे नत्वम् । अत्र यद्यपि कैयटेन मो नो धातोरितिनत्वस्यासिद्धत्वान्नित्यमव्ययत्वमिति व्याख्यातम् । तथापि स्वरादिसंवादेन गणे विकाराभावकल्पनेऽङ्गुष्ठकल्पना नेति । अप्रामाणिकः पाठ इति । निपातत्वादेव सिद्धेः । नन्वव्यये नञ्कुनिपातानामित्यत्र पृथक्पाठवैयर्थ्यमस्य निपातत्वे स्यादत आह । अव्यये नञिति । अकरणिरिति । अत्र समासस्वरबाधकाव्ययपूर्वपदप्रकृतिस्वरबाधकोत्तरपदप्रकृतिस्वरेण रकाराकारस्योदात्तत्वे प्राप्ते पुनर्नञः पृथक्पाठात्पूर्वपदप्रकृतिस्वर एव

भवति। अर्थं ह्याक्रोशे नञ्यनिरित्यनिप्रत्ययान्तः। प्रच्छिप्तः पाठ इति। चादिगणे पाठेनाव्ययत्वसिद्धेः। न चैवमसत्त्वार्थकस्यैवाव्ययत्वं स्यान्न तु सत्त्वार्थकस्येति सत्त्वार्थकस्य लक्ष्मीवाचकतया तस्य ङकारित्संज्ञकत्वाभावात्। निरनुबन्धको निषेधार्थकमाशब्दोऽसत्त्वार्थस्तु पठित एव। माङि लुङिति सूत्रे ङकारोच्चारणात्तस्मिन्नुपपदे लुङन्तस्यैव साधुत्वम्। एतेन मास्वित्यादिप्रयोगाणाम वैदिकानामसाधुत्वम्बोध्यम्। मा निषाद प्रतिष्ठान्वमगमः शाश्वतीः समा इति रामायणस्यपद्ये माङो न प्रयोगः किन्तु निरनुबन्धकस्य अत एवाटो निषेधाभावः। अव्युत्पन्नाविति। वतुबन्तयोः सत्त्वार्थकतया निपातसंज्ञाया अप्राप्तेः। अत्र। उपसर्गविभक्तिविषये। प्रतिरूपकत्वं साम्यम्। अर्थतः दृशब्दतश्चेति। शब्दत एव सादृश्यविवक्षायां विप्रशब्दावयवप्रशब्दस्याप्यव्ययत्वं स्यात्। अर्थत एव सादृश्यस्य ग्रहणे वाशब्दसमानार्थकस्य विकल्पशब्दस्यापि स्यात्। न च विकल्पशब्दस्य सत्त्वार्थकतया न वाशब्दसमानार्थकत्वमिति वाच्यम्। आराच्छब्दसमानार्थकस्य समीपशब्दस्याव्ययत्ववारणाय शब्दतः साम्यस्यावश्यकत्वात्। विनीतो वामिति। अयत्र युष्मदस्मदोरितिसूत्रेण व्युत्पन्नः। षष्ठ्यन्तत्वाभावात्। न च तत्समानार्थत्वाभावः। सम्बोध्यार्थबोधकतयाऽर्थतः साम्यमस्ति शब्दतस्त्वस्त्येव। यत्रयत्र सदृशग्रहणन्तत्र किञ्चिन्यूनत्वमस्त्येव। अन्यथा तत्त्वमेव स्यात्। एतेन। अर्थतोऽपि सादृश्यस्य विवक्षणेन। अत एव। तदित्यस्याव्ययत्वादेव। तच्चितोर्योग इति। जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्यातच्चितोर्योगः षडस्माकमनादय इत्यत्र तदित्यव्ययमन्यथास्य तच्छब्दस्य चिच्छब्देन द्वन्द्वो न स्यादित्यर्थः। तच्चितोरित्यत्र तच्छब्दचिच्छब्दौ षष्ठ्यन्तसमानार्थकौ प्रथमान्तौ तयोः समासः। क्रियायोगेऽपीति। अस्योपसर्गत्वाभाव इत्यत्रान्वयः। तादेशाभाव इति। यद्युपसर्गत्वं स्यात्तदाऽच उपसर्गात्त इति तादेशः स्यात्। न चोपसर्गसंज्ञाभावकल्पनापेक्षया तत्वाभावकल्पनमेव किन्न स्यादिति वाच्यम्। गुणप्रधानसन्निधौ प्रधानबाधापेक्षयाऽप्रधानबाधस्यौचित्यादिति भावः। शिवादीति। सत्त्वं रजस्तमः क्रमेण शिवादीत्यत्रापि सत्त्वादिप्रधानमायोपाधिकम्ब्रह्मैव विवक्षितन्तेन विष्णवादीति वक्तव्ये शिवादीत्युक्तिरकारो वासुदेवः स्यादित्यभियुक्तोक्तिविरु-

ङ्तिशङ्काया अनवकाशः। व्याख्यानादिति। लाक्षणिकत्वाविशेषमूलकादित्यर्थः। अन्ये। अवतेष्टिलोपश्च त्यनेनावतेर्मन्प्रत्ययो भवति प्रत्ययस्य टेश्च लोपो भवतीत्यर्थकेनौणादिकेन सिद्धे। नियमादप्राप्तेरिति। अयञ्च नियमो यद्यपि कौमुद्यामुणादौ चिरव्ययमित्यत्र डीरित्यस्यानुवृत्तिङ्कृत्वा सूत्रव्याख्याने सति डीप्रत्ययान्तस्य चेदव्ययसंज्ञा तर्हिच्युन्तस्यैव न तु तद्रहितस्येति लभ्यते। तथाऽप्येतादृशनियमे रातेर्डैः गमेर्डोरितिसूत्राभ्यां सिद्धयो रैगोशब्दयोरव्ययसंज्ञाया व्यावृत्तिर्न प्राप्नोतीत्यतः सामान्यत उणादिप्रत्ययान्तानां चेत् च्युन्तानामेवेत्याकारक उक्तः। परन्त्वेवन्नियमे उच्चैर्नीचैरित्यनयोर्डैसिप्रत्ययान्तयोरव्ययसंज्ञा न प्राप्नोति। अनयोः स्वरादिषु पाठो व्यर्थो भवेदिति चेत्तामर्थ्यकल्पनयाऽव्ययसंज्ञास्वीकारापेक्षया नियमसंकोच एव उचित इत्याशयेनाह। गुणादीत्यादि। ननु चिरव्ययमिति सूत्रस्य नियमार्थत्वमनुपपन्नमदोभवदित्यत्रैव च्युन्तानामपि गौणत्वे नाग्रहणसम्भवात्तस्य विधायकत्वमेव समुचितमत आह। स्वरादिनिपातमित्यत्रेति। अनित्यत्वादिति। अस्या अर्थवद्ग्रहणपरिभाषामूलकत्वादर्थवद्ग्रहणपरिभाषायाश्चेणः षोध्वमितिसूत्रस्याङ्ग्रहणेनानित्यत्वस्य ज्ञापनात्तदनित्यत्वेनैवेयमप्यनित्येति भावः। साधीय इत्यपीति। अत्रेदमव्ययम्बोध्यम्। नत्वेतदीयसुबन्तम्। पटीयानितिवत्प्रकर्षस्य तत्राप्रतीतेः। अत एव कस्तत्र साधीय इति प्रयोगः सङ्गच्छते। तद्धितश्चेतिसूत्रे सर्वशब्दो न प्रकारकात्स्न्र्ये सर्वान्नोनो भिक्षुरितिवद्वर्त्तते। अव्ययेभ्यः सप्तानामपि विभक्तीनामेकवचनान्युत्पद्यन्त इतिपक्षे सूत्रस्यासम्भवदुक्तिकतापत्तेः। किन्तु सर्वः पटो दग्ध इत्यत्रेवावयवकात्स्न्र्ये वर्त्तते तेन यत्फलितन्तदाह। वचनत्रयात्मिकेति। अवयवकात्स्न्र्यार्थकसर्वशब्दस्वीकारेऽपि नोपपत्तिरित्याशङ्क्यते। नन्विति। सुपां विधानमिति। स्त्रीजसेतिसूत्रेणेति शेषः। ननु सर्वासां सामान्यसूत्रेण जातानाङ्कर्मणि द्वितीयेत्यादिसूत्रेण नियमः क्रियत इति पक्षेऽस्य सूत्रस्योपपत्तिर्भविष्यतीत्यत आह। किञ्च विहितानामिति। नन्वेकस्मात्प्रातिपदिकात्सर्वेषां विधानमेवानुपपन्नं प्रत्ययविधौ निर्दिष्टपरिभाषया प्रातिपदिकाव्यवधानेनैवोत्पत्तिर्भवति अव्यवधानञ्चैकत्रैव संभवति न सर्वत्रेति चेन्न। प्रकृतिभेदकल्पनेन तत्तत्प्रकृतिपरत्वस्य तत्रतत्र प्रत्ययेसम्भवादित्याह। प्रधानप्र-

त्ययानुरोधेनेत्यादि । तत्र । तेषु नियमेषु । अर्थनियममुपपादयति । कर्माद्यर्थयोग्येति । कर्मणि द्वितीयैवेति नियमेन हि यत्र कर्मादिसम्भवस्तत्रैवान्यासान्निवृत्तिः सम्पद्यत इति प्रत्यासत्त्या कर्माद्यर्थयोग्येत्यस्य लाभः । आदिपदादेकत्वाद्यर्थयोग्यप्रातिपदिकाच्चेदेकत्वादौ विभक्तिस्तदैकवचनाद्येत्येवंरूपः । अनियतत्वादिति । अव्ययानाङ्कर्माद्यर्थयोग्यत्वाभावेन तत्तदर्थे विभक्त्यन्तरव्यवच्छेदेन नियतानान्तत्तद्विभक्तीनामनियमादित्यर्थः । प्रातिपदिकार्थेतिसूत्रस्यापि नियामकतया तद्विषये यथा नियमसम्भवस्तथाह । कर्मादिरहित इत्यादि । मात्रपदव्यवच्छेद्यार्थकथनमेतत् । अत्र पक्षे । एवंविधार्थनियमपक्षे ॥ अथ प्रत्ययनियममाह । कर्माद्यर्थयोग्येति । अत्रापि पक्षे । प्रकृतार्थापेक्षप्रत्ययनियमपक्षे । अव्ययेभ्यो लभ्यन्त इति । कर्मादौ विहितानान्द्वितीयादीनाङ्करणादावेव व्याहृत्तेः । सामान्यापेक्षप्रत्ययनियममाह । अथेति । पूर्वोक्तज्ञापकादेवेति । अव्ययादाप्सुप इति ज्ञापकादेवेत्यर्थः ॥ वक्तुमशक्यमिति । एकस्मिन्नर्थे नियताया विभक्तेरर्थद्वयबोधकतायां वक्तुमशक्यत्वात् । न तु तदभावे ॥ कर्मत्वाद्यभाव इत्यर्थः । सुप्तिङन्तसाधारण्येनास्य प्रवृत्तिम्बोधयितुं सामान्येनार्थमाह । विभक्तिविधावुद्देश्यतावच्छेदकेति ॥ इतरे । द्विवचनबहुवचने । एवञ्च । सामान्यसूत्रसिद्धौ च । नन्वेकस्य वचनमेकवचनमिति व्युत्पत्त्या एकवचनमितिसूत्रेणैकवचनमव्ययेभ्यो न प्राप्नोतीत्यत आह । द्विबहुत्वग्रहणसामर्थ्यादिति । अयम्भावः । यद्यप्येता महासंज्ञा इत्यासामन्वर्थत्वं सम्भाव्यते तथापि सूत्रे द्विबहुत्वग्रहणसामर्थ्यादन्वर्थत्वन्न्यज्यते । अधुनास्य सूत्रस्यौत्सर्गिकत्वमुपपादयति । द्वित्वबहुत्वयोरिति । नन्वेतावतापि प्रथमोपस्थितः सुरेवैताद्दशे विषये स्यादत आह । विनिगमनाविरहेति । ननु प्रथमोपस्थितत्वमेव विनिगमकन्तत्राह । अत एव । सर्वविभक्त्येकवचनस्वीकारदेव । चरितार्थमिति । सोरेवोत्पत्तौ तस्यैव निवृत्तिः स्यादिति प्रत्याहारनिर्देशो व्यर्थः स्यात् । नन्वव्ययार्थे कर्मत्वाद्यभावाद्द्वितीयैकवचनादीनामप्राप्तावपि प्रथमा तु स्यादिति कथमेतदप्राप्तप्रापणार्थमित्युक्तमतः प्रथमाया अप्राप्तिमुपपादयति । प्रथमापोति । नानेन । एकवचनमित्युत्सर्गसूत्रेण । कर्तृत्वकर्मत्वसत्त्वेन । एतेन कर्त्तरि कर्मणि याया विभक्तयो विहितास्तासामुत्पत्तिरुक्ता । तद्यथा । पचतिकत्र्यभव-

ति । पचतिकल्पस्य भवनम् । पचतिकल्पेन स्थीयते । पचतिकल्पमभ्यस्य पचतिकल्पस्य दर्शनमभ्यचतिकल्पाय गच्छतीति । स्वत एकत्वेन । एका क्रियेतिभाष्यान्निवृत्तभेदायाः क्रियायास्तिङन्तेभ्यः प्राधान्येन प्रतीयमानाया एकत्वात्तदनुरोधेन तत्र कल्पप्रत्ययान्तादेकवचनस्यैवोत्पादेन न चास्याप्राप्तप्रापणार्थत्वेऽव्ययेभ्यस्तिङामप्येकवचनापत्तिरिति वाच्यम् । सुब्विधायकशास्त्रैकवाक्यतयाऽस्य विधायकत्वात् । अनेकनियमेति । कर्मणि द्वितीयेत्यादिनियमेत्यर्थः । यदि द्वितीयादीनामप्येकवचनं स्यात्तदा द्वितीया कर्मण्येवेत्यादिसामान्यापेक्षनियमबाधः स्यष्ट एव । ननु नियमस्य विधिमूलकत्वाद्विधेरुपजीव्यत्वेनाभ्यर्हितत्वात्तत्वमेव प्राथम्यं ग्रहीष्यत इत्यत आह । निजामिति । अत्यबहुवचनेन बहुत्वस्योपस्थितौ तस्य बहुत्वस्य स्वव्यापकसंख्याद्वारैव सङ्ख्येयपरिच्छेदकतया प्रथमोपस्थितत्वेन त्रित्वस्य विषयपरिच्छेदकत्वं स्यात्तथा च त्रयाणां लाभः सिद्ध एवेति त्रयाणामिति व्यर्थं स्यादिति भावः । अत्र । अव्ययविषये । इत्यादिपक्षान्तराणि । अत्रादिना सप्तानामपि विभक्तीनामेकवचनानीत्यस्य सङ्ग्रहः । असङ्कतानीतिबहुवचनं समुदायापेक्षया बोध्यम् । तेन सर्वविभक्त्येकवचनमिति पूर्वोक्तिविरोधो न । नन्वेकत्वे एकवचनमिति यद्युच्यते तदा घट इत्यादिशब्दोच्चारणे सति तत एकत्वप्रकारकनिश्चयस्सम्भवति । तेनैवैकत्वसंशयप्रतिबन्धो निर्वहति । एकस्मिन्नित्यस्याभावे तु कथमेकत्वनिश्चयश्शक्तिग्राहकाभावादत आह । घट इत्युक्ते इति । संख्यावदर्थत्वेनेति । एतेन सत्त्वभूतत्वात्मकस्य विशेषस्य लाभः । तथा च घटः एकत्ववान् । द्वित्वाद्यभावविशिष्टत्वेसति सत्त्वादित्याकारको न्यायो बोधितः । अत्र चाक्षुषविषयः पट एव दृष्टान्तः । यद्वा सत्त्वरूपत्वेनाखिलसंख्योपस्थितौ द्वित्वाद्यभावनिश्चये सति स्मृतैकत्वप्रकारकोपनीतभानम्भवतीत्याशयेनाह । प्रकरणाच्चेति । यथा सम्पन्नो व्रीहिरित्यत्र जातावेकत्वान्वयः प्रश्नुना यजेतेत्यत्र व्यक्तौ तदन्वयः प्रकरणात्तथेति भावः । यत्र तु स्वरार्थं कर्मत्वाद्यन्वययोग्यता तत्र द्वितीयाद्येकवचनम्भवत्येव । द्वितीयादीनान्तेषु नियतत्वात् अव्ययीभावात्तु नाव्ययीभावादित्युक्तेः सर्वविभक्त्येकवचनम् ॥ न च तेभ्यो द्वितीयादीनाद्विवचनबहुवचने तेन ज्ञापकेन कथन्न स्या-

तामिति वाच्यम् । असर्वविभक्त्यव्ययमिति न्यासपक्षे सर्वत्रानेनाव्ययसंज्ञासिद्धौ पञ्चसूत्री न कार्येति भाष्येण द्विवचनानुत्पत्तिबोधनात् । भाष्योक्तपक्षा इति । अव्ययेभ्यः सप्तानामपि विभक्तीनां त्रीण्यपि वचनानीत्यादयः । तत्र । आस्थालाविल्यत्र पठितो य आस् तेनेण आसिरिति सूत्रविहित आसिर्ग्रहीत इति शेषः । नानुवर्त्तत इति । वहिहाधाभ्यश्छन्दसीत्यत इत्यादिः । अत्र च । छन्दसीत्यस्याननुवृत्तौच । छान्दसत्वे तु सुपां सुलुगित्येव लुकः सिद्धेः । ननु मेजन्तयङ्लुक्स्य क्रादिशेषणत्वे कारयामित्यादौ सुपो लुङ् न स्यादत आह । आम इतीति । तेन । क्रदन्तविशेषणत्वाभावेन ॥ क्रत एजन्तत्वेनेति । स्थानिवद्भावेन क्रत्त्वम् । एजन्तत्वन्तु व्यपदेशिवद्भावेन । यथा चात्रानल्विधाविति निषेधाप्रवृत्तिस्तथान्यत्र प्रतिपादितम् । यथोद्देशपक्षाभिप्रायेणाह । न च बहिरङ्गत्वमिति । लुग्विधायकसूत्रैकवाक्यतया संज्ञाशास्त्रस्य कार्यकालपक्षे प्रवृत्त्यङ्गीकारात्समत्वमित्याशयेनाह । संज्ञायाः कार्यार्थत्वादिति । संज्ञाकार्यस्य । लुकः । तत्त्वेन । सुप्संबन्धित्वेन । तत्त्वात् । बहिरङ्गत्वात् । ननु महासंज्ञाकरणेन लिङ्गाद्यनन्वयिन एवैषाव्ययसंज्ञा प्रवर्त्तत इत्याशय इत्यस्य कथमव्ययसंज्ञाप्राप्तिरत आह । लिङ्गसंख्येति । बाधादिति । अव्ययसंज्ञाया इत्यादिः । मानाभाव इति ॥ संज्ञामात्रेण सन्निपातविघातभावात् । एज्विषयेति । एज्विषयसन्निपातनिमित्तकं यदात्वन्तदीयो यः सन्निपातः एज्विषयत्वरूप एव तद्विघातकश्च क्ङिति चेति निषेधस्तस्य निवृत्तावपीत्यर्थः । क्ङिति चेतिनिषेधसूत्रस्य यत्र प्रवृत्तिस्तत्र नैवः प्रवृत्तिरित्येज्विषयत्वनिषेधविषयत्वयोः परस्परं विरोध इत्यतो निषेधशास्त्रम्परम्परया सन्निपातलक्षणात्वसम्बन्धिसन्निपातविघातकन्तस्य निवृत्तिरस्विति समुदायार्थः । ननु किदिति कार्यातिदेशः अतिदिश्यमानञ्च कार्यन्निषेधरूपमेव तस्य सन्निपातपरिभाषया निवृत्तौ तत्सन्नियोगशिष्टत्वमपि न भविष्यतीत्यत आह । तत्र हीति । व्यपदेशातिदेशः । व्यवहारातिदेशः । कार्यातिदेशं वारयति इत्त्वप्रवृत्तिकाल इति । यदीत्त्वभवनसमानकालिकभवनकर्तृकित्कार्यङ्किञ्चिदसिद्धं स्यात्तदा स्यात्कार्यातिदेशस्तथाऽत्र नास्तीति भावः । तस्मात् । अनन्यगतिकत्वात् । अनया । सन्निपातपरिभाषया । अतिदेशसंज्ञानामपीति । अत्र बहुवचनं लक्ष्यभेदाभिप्रायेण । साक्षात्परम्परयेति । साक्षाद्यथा । ग्राम-

णिकुलमित्यत्रोत्तरपदसन्निपातनिमित्तकं ङ्कित्त्वन्ताट्टापसन्निपातविघातकस्य तुकोऽनिमित्तम् । अतिदेशविषये परम्परया यथा । उपादास्तेत्यत्रैज्विषयसन्निपातनिमित्तमात्वं स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो य एज्विषयसन्निपातस्तद्विरोधित्वेन विघातकः किद्वदपदेशस्तन्निमित्तकप्रवृत्तिको यो निषेधस्तस्यानिमित्तं यथा भवति तथा ताट्टापव्यपदेशस्याप्यनिमित्तम् । संज्ञाविषये परम्परया यथा । आधये चिकीर्षत्वे कृभ्वकारेभ्य इत्यत्र विभक्तिसन्निपातनिमित्तकं यङ्लुगैत्वरूपं कार्यन्तत्स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यः सन्निपातस्तद्विघातकलुक्प्रयोजकाव्ययसंज्ञाया अप्यनिमित्तम् । एतेन । पूर्वोक्तार्थकथनेन । अव्ययसंज्ञया अप्रवृत्तौ समाधानान्तरमाह । अक्कजाद्यैकेति । नन्वेवमेव लुगीकवाक्यतापन्नाया अप्यव्ययसंज्ञाया वारणसिद्धौ सन्निपातपरिभाषया वारणपरिभाषविरोधः प्राप्तेरेवाभावादित्यत आह । लुगीकेति । शब्दतः । शब्दरूपस्य निमित्तस्य सत्त्वेन । न च निमित्तपदेन सप्तम्यन्तमेव निमित्तङ्गृह्यते । लुकि तु सुपः स्थानित्वेनाश्रयणन्न सप्तम्यन्तशब्दोपात्तत्वेनेति वाच्यम् । अव्ययादाप्सुप इति सूत्रे सुपः स्थानित्वेनाश्रयणेऽपि सुपः प्रत्ययतया प्रत्ययग्रहणपरिभाषैकदेशस्य सुप् यस्माद्विधीयते तदादेरित्यस्योपस्थितौ क्त्वोजन्तसूत्रैकवाक्यतया सुबभिन्ने प्रत्यये परे यदव्यवहितपूर्वङ्कृदन्तम्क्त्वोजन्तन्ततः परस्य सुपो लुगित्यर्थादेकनिमित्तकत्वङ्गुणैत्वलुकामस्त्वेवाश्रयात् । वस्तुतस्तु आधय इत्यादावप्यसिद्धत्वेन निर्वाहः सम्भवति । साक्षात्सुपः षष्ठ्यन्तशब्दोपात्तत्वाभिमित्तत्वेनाश्रयणाल्लुगीकवाक्यतापन्नसंज्ञाया अन्तरङ्गत्वात्। भाष्यकृता तूपायस्योपायान्तरादूषकत्वादिति न्यायेन प्रयोजनान्तरफलकपरिभाषयापि लक्ष्यसिद्धिर्भवतीत्याश्रयेण परिभाषैव दोषवारकतयोपन्यस्ता । नन्वत्युच्चैसावित्यादौ लुग्व्याहत्तये विहितविशेषणत्वमवश्यं वक्तव्यम्। तथा चाधय इत्यादावपि लुङ्न भविष्यतीति तेष्वतिप्रसङ्गमाशङ्क्य सन्निपातपरिभाषया समाधानपरभाष्यमनुपपन्नमत आह । अङ्गसंज्ञायामिति । अङ्गसंज्ञाविधायकसूत्रे इत्यर्थः । यद्यपि लुग्विधायकसूत्रमङ्गाधिकारीयन्न भवति तथापि सुपः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया सुपो यस्माद्विधानन्तदादेरव्ययात्परस्येति सूत्रार्थो भविष्यति । एवञ्चात्युच्चैसावित्यादौ यस्मात्सुपो विधानं तदादेर्नाव्ययत्वमाधय इत्यादौ तु वि-

धानकाले यद्यपि नाव्ययत्वन्तथापि यस्मादिधानन्तदादेरुत्तरकालिकाव्ययत्वमाश्रित्य प्राप्तस्य लुकः सन्निपातपरिभाषया वारणमुचितमेवेति भावः। ननु स्वरादीनां यद्यपि स्वः पश्येत्यादौ कर्मार्थकत्वसम्भवेन द्वितीयैकवचनान्तत्वं सम्भवति। तथाप्यधिकरणशक्तिप्रधानाव्ययस्य न कर्मार्थकत्वसम्भव इत्यत्युच्चैसावित्यादौ समासानुपपत्तिरत आह। अधिकरणेति। अव्ययत्वमिति। तदन्तविधिना प्राप्तमपीति शेषः। अभिमान इति। वक्ष्यमाणोऽभिप्रायः। वाचनिक इति। विशेषस्याप्रक्रान्तत्वेऽपि प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वक्तव्यात्। नबन्ताच्छब्दस्वरूपस्य विशेषत्वेऽपि तदन्तविधिर्भवतीति भावः। तादृशार्थानामिति। लिङ्गाद्यनन्वय्यर्थानामित्यर्थः। आवश्यकत्व इति। यदि सर्वस्याप्यनुकरणमेतत्स्यात्तदा सर्वेषु विवेचितार्थाभेदस्य विरहाच्छब्दस्य विपर्यासरूपाप्रमितिजनकत्वं स्यात्तच्चानुचितमिति भावः। यदुक्तमभिमान इति तत्सूचितङ्कथयन्स्वसिद्धान्तमाह। वस्तुत इति। अत्रार्थस्य। महासंज्ञाबललब्धस्य। ननु प्रधानाप्रधानन्यायो ह्यर्थनिर्देशविषयः। यथा पुमान् स्त्रियेत्यत्र पुमर्थशब्दस्य स्वार्थकस्य च निर्देशे। अत्र हि ब्राह्मणवत्ता ब्राह्मणीवत्त्वयोर्यः सहोक्तौ प्रधानाप्रधानन्यायेन प्रधानस्त्रीपुंसभिन्नाप्रधानस्त्रीपुंसङ्गतस्यापि विशेषस्य सत्त्वादेकशेषो न भवति। प्रकृते तु स्वरादिनिपातेतिशब्दपरत्वर्थपरमिति न प्रधानाप्रधानन्यायावसर इत्यत आह। सर्वनामसंज्ञासाहचर्येणेति। साहचर्यमत्र सादृश्यम्। तत्र यथा सर्वनामेतिमहासंज्ञाकरणेन विलक्षणोऽर्थः क्रियस्तथाऽत्राप्यव्ययमितिमहासंज्ञाकरणेनैतादृशोऽर्थः कल्प्यत इति भावः। प्रसिद्धान्तरङ्गेति। प्रसिद्धश्चान्तरङ्गश्चेति समासङ्कृत्वा प्रसिद्धमित्यादिस्वव्याख्यानभूतं यत्पदान्तरानपेक्षानुपसर्जनीभूतमिति तेन कर्मधारयः समासः। अत्र प्रसिद्धमित्यनेन संज्ञाशब्दव्यावृत्तिः संज्ञाशब्दो हि यदा संज्ञिबोधनाय प्रयुज्यते तदा चैत्रनामकोयमित्येवंरीत्या प्रयोगो भवति तथाचाहि। स्वरनामक इत्येव प्रयोग इति पदान्तरसापेक्षतां स्फुटैव। अन्तरङ्गमित्यस्य व्याख्यानमनुपसर्जनीभूतमिति। उच्चैःशब्दो हि केवलः प्रयुक्त ऊर्ध्वदेशनिष्ठाधिकरणतां प्रतिपादयति तस्य स्वार्थमात्रप्रतिपादकतयाऽन्तरङ्गत्वम्। अत्युच्चैसावित्यादौ तु यथा वृत्तिघटकस्य राजपुरुष इतिसमासावयव-

स्यैकार्थीभाववलाद्राजशब्दस्य राजसम्बन्धिपुरुषप्रतिपादकता पुरुषशब्दस्य च राजसम्बन्धिपुरुषप्रतिपादकता तथोच्चैःशब्दस्याप्यूर्ध्वदेशाभिन्नाधिकरणकर्मकातिक्रमणकर्तृप्रतिपादकतया बहिरङ्गत्वमिति भावः । एतेन प्रसिद्धानुपसर्जनीभूतेत्येव सिद्धेऽधिकविशेषणद्वयोपादानमनर्थकमिति शङ्काया निरासः । अव्ययात्परयोराप्सुपोरित्यर्थे उच्चैरौ उच्चैराभ्यामित्यत्रातिप्रसङ्गशङ्कायामाह । उच्चैरावित्यादि । अततेर्डप्रत्यये टिलोपे प्रथमे अशब्दस्य द्विवचनेन सहैकादेशे परादिवद्भावात्सुप्त्वेन तस्य द्वितीये ताट्शादशब्दाट्टापि तथैव आप्त्वाङ्ङ्क् प्राप्नोति । अथवा प्रथमे वासुदेववाचकादशब्दद्विवचने द्वितीये इदंशब्दस्याभ्यां ब्राह्मणीभ्यामित्यस्यैकदेशे आभ्यामित्यस्मिन्नतिप्रसङ्गशङ्का ॥ अत एव । मानाभावादेव । नन्विदमिति । अलिङ्गत्वमित्यर्थः । अचोपसंहार इति । अव्यय उपसंहार इत्यर्थः । प्रत्ययपरत्वे । विभक्तिसंज्ञकप्रत्ययपरत्वे कारकशब्दश्च वाचकशक्तिपरः । यद्वा कारकस्य तादात्म्येनाभावोऽत्र विवक्षितः । अन्यतरेति । विभक्तिवचनशब्दयोरन्यतरेत्यर्थः । तद्विषय इति । लिङ्गविषय इत्यर्थः । स्वरादीनामत्र लिङ्गाभाववत्त्वेन साट्शब्दोक्तिर्न सर्वत्रादिपदबोध्ये किंत्वव्ययीभावातिरिक्ते तत्र नपुंसकत्वस्य विशिष्य विधानादित्याह । लिङ्गाभावेनेत्यादि । तदभावादिसाट्शादित्यादि । तदभावादिकृतसाट्शादित्यर्थः । यद्विविधं रूपमिति अस्य लिङ्गसम्बन्धकृतमित्यादिः । प्रसङ्गादिति । अव्ययनिरूपणस्य प्रक्रान्तत्वात्तेषु अवाप्योः प्रवेशादेतयोः स्मरणे सति निरूपणमेतयोरावश्यकमिति स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गनिर्वाहः । चिन्त्य इति । के चित्तु छान्दसा अपि क्व चिद्भाषायामभवन्तीत्याश्रित्य समादधुः । ननु कथं वाचेत्यादिप्रयोगाणां सिद्धिरत आह । निश् दिशोरिति । अत एव । एतद्वचनसाध्यहलन्तप्रकृतिकटाबन्तस्य प्रयोगाभावादेव । अस्य भाष्योक्तमित्यत्रान्वयः । अन्ये । देवविशमित्यत्र । एवंविषय इति । तत्रैव भाष्ये यस्तर्ह्यनकारान्तात्क्रुञ्चा उष्णिहा देवविशेति तत्र हलन्ताट्टापि कृते सुबुत्पत्तिराबग्रहणप्रयोजनमित्युक्ता । अत्राप्यकारान्तान्तं प्रवृत्तिर्लक्ष्यते । क्रुञ्चानालभेति । उष्णिहकक्रुभौ । देवविशश्च मनुष्यविशश्चेति । ततः शङ्कितत्वास्ति विशेषः अकारान्तादम उत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति । स्वरे विशेषः । यदिक्षिवन्तौ-

यस्तदा ह्रदुत्तरपदप्रकृतिस्वरेणान्तोदात्तात्परविभक्तेरनुदात्तत्वं भवति । यदा तु मूलविभुजादित्वात्कास्तत्वंस्तदा थाथादिस्वरेणान्तोदात्तात्परविभक्त्या सहैकादेशे पदमन्तोदात्तमिति । तस्मात्क एष एवं विषयः । तस्मादिति । पूर्वोक्तानामन्यथासिद्धत्वात् ॥

॥ इत्यव्ययप्रकरणम् ।

॥ श्रीगणेशाय नमः ॥

नमस्कुर्वे जगद्वन्द्यं सीतापतिमजं विभुम् ॥
यन्ध्यात्वा सिद्धिमखिलाम्प्राप्नुवन्ति महर्षयः ॥ १ ॥

स्त्रियाम् । एतत्सूत्रं व्याख्यातुभाष्ये शङ्कितम् स्त्रियामित्युच्यते का स्त्री नामेति । अयमभिप्रायः । अयं शब्दो न क्वचिदर्थविशेषेऽत्र शास्त्रे संकेतितोऽतः पारिभाषिकमर्थमभिधातुन्नालम् । नाप्ययञ्जातिशब्दः । रमा मानुषी खट्वागवादिसाधारण्येन प्रयोगदर्शनात्सर्वसाधारणस्यानुगतसंस्थानस्याभावेन तद्व्यङ्ग्यत्वस्य तत्रासम्भवात् । नापि लोके यत्प्रसिद्धं शेफस्यवयवे समवेतत्वेसति प्राणित्वम् । योनिसमवेतत्वे सति प्राणित्वम् । तदुभयासमवेतत्वे सतिप्राणित्वङ्क्रमेण पुंस्त्वं स्त्रीत्वन्नपुंसकत्वमिति घटखट्वाज्ञानादिसाधारणस्य पुंस्त्वादिव्यवहारस्यानुपपत्तेरत आह । अचेतनखट्वादित्वादिसाधारणमिति । सत्त्वादीनामिति । सत्त्वरजस्तमसाङ्गुणानामुपचयः पुंस्त्वम् । तेषामपचयः स्त्रीत्वम् । साम्यञ्च क्लीवत्वमित्यर्थः । साम्यमेव च स्थितिपदेनोच्यते । तदुक्तभाष्ये । तटे सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति । अयम्पुमान् । इयं स्त्री । इदन्नपुंसकमिति । तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमाख्यातुम् । अवश्यङ्किञ्चित्सङ्कतान्त आश्रेयः । कोसौ सङ्कतान्तः । संस्थानप्रसवौ लिङ्गमाश्रेयौ । किमिदं संस्थानप्रसवाविति । संस्थाने स्थायतेर्ड्ट् स्त्री सूतेः सप् प्रसवे पुमानिति ॥ अत्र सांख्यमतावष्टम्भेन सङ्कतान्त इत्युक्त्या सांख्यशास्त्रानुसारित्वं व्याकरणस्येति सूचितवान् । अत्र संस्थानप्रसवशब्दाभ्यान्तृतीयाऽवस्थापि लक्ष्यते । संस्थानन्तिरोभावः । एतदेवापचयशब्देनोच्यते । यद्यपि संस्थानं संघः स्थायेते शक्नोणिते यस्यामितिव्युत्पत्त्या लोकेऽपि स्त्रीशब्दो ड्रट्प्रत्ययान्त एतस्यैवार्थस्य प्रतिपादकः । तथापि स्त्रीत्वस्य खट्वादिसाधारण्योपपत्तये तिरोभावपरत्वमेव तस्य स्त्रीकृतम् । एवं सूतेः सबित्यनेन सूङ्धातोरौणादिको म्सुन्प्रत्ययः सस्य

प् इत्यादेशो ङसश्चेत्येवंरीत्या पुम्स्शब्दो व्युत्पादितः सूतेऽपत्यञ्जनयतीत्यर्थेन यद्यपि प्राणिनि पुरुष एव पुम्स्शब्दस्य शक्तिर्लभ्यते तथापि तस्य ब्रह्मादिसाधारण्योपपत्तये प्रवृत्तिराविर्भावरूपा पुमानित्यनेनोच्यते । एवं यदा न तिरोभावो न वा प्रवृत्तिः किन्तु साम्यावस्था सैव स्थितिर्नपुंसकशब्देनोच्यते । ततः पुनः शङ्कितम् कस्य पुनः संख्यानं स्त्री प्रवृत्तिर्वा पुमानिति । गुणानाम् । केषाम् । शब्दस्पर्शरूपरसगन्धानाम् । सत्त्वरजस्तमांसि गुणाः तेषाम्परिणामरूपा एव तेभ्योऽभिन्नाः शब्दादयः पञ्च गुणाः । सर्वाः पुनर्मूर्त्तय एवमात्मिकाः । गुणसमुदायो द्रव्यम् । सर्वस्य जगतः सुखदुःखमोहरूपतया तत्कारणत्वेन सत्त्वादिरूपत्वङ्कल्प्यते । ततः सर्वपदार्थव्यापित्वं पुंस्त्वादीनान्दर्शितम् । प्रवृत्तिः खल्वपि नित्या । अत्र प्रवृत्तिरित्यनेन लिङ्गसामान्यलक्षणञ्चिदर्शितम् । नित्या । सार्वदिकत्वात्सार्वत्रिकत्वाच्च । सत्त्वादीनामाविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इति कैयटः । यद्यपि पुरुष आत्मपदव्यवहार्यो नित्यो परिणामी तथापि भोक्तृत्वाप्रकृतिधर्मापन्न इव भवति । अत एव पुरुषश्चितिश्चैतन्यमिति लिङ्गचययोगः । भोक्तृत्वावस्थायाभोग्यवस्तुग्रबलितमेव चैतन्यम्प्रतीयते तदेव च शब्दगोचरम् । यथा गच्छति पुरुष इति क्रियायोगस्तद्वत् । न ह्येह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्त्तमप्यवतिष्ठते वर्त्तते वा यावदनेन वर्त्तितव्यम् । अपायेन वा युज्यते । तच्चोभयं सर्वत्र । यद्युभयं कुतो व्यवस्था । विवक्षातः । संख्यानविवक्षायां । स्त्री प्रसवविवक्षायां पुमान् उभयोरविवक्षायान्नपुंसकमिति । एतेन प्रघट्टकेन शास्त्रीयलिङ्गस्य केवलान्वयित्वन्निदर्शितम्भवति । अर्थनिष्ठमिति । अत एव स्वमोर्नपुंसकादिति सूत्रभाष्ये नपुंसकादित्यनेनासन्दिग्धेनार्थग्रहणेन भवितव्यम् न हि नपुंसकन्नाम शब्दोऽस्ति इत्युक्तम् । अर्थनिष्ठत्वञ्च तादात्म्येन । यद्यपि शब्दार्थयोरपि तादात्म्येन तदभिन्नाभिन्नस्येतिन्यायेन शब्दनिष्ठत्वमपि सम्भाव्यते तथापि तादात्म्यस्य भेदाभेदरूपतयाऽर्थाभेदेन प्रतीयमानत्वमेवोक्तभाष्यात् कल्प्यते । पुंल्लिङ्गः शब्द इत्यादिव्यवहारस्तु वाच्यवाचकयोरभेदाध्यवसायात् । अथ वा मतुप्प्रत्ययङ्कृत्वा गुणवचनेभ्य इति लुक् । केवलान्वयीति । अत्र केवलान्वयित्वमन्योन्याभावप्रतियोगितानवच्छेदकत्वम् । तदेवोपपादयति । इयमित्यादिना ।

ननु त्रयाणामपि लिङ्गानाङ्केवलान्वयित्वे दारशब्देन स्त्रीत्वस्याप्यश्वशब्देन पुंस्त्वस्य ज्ञानशब्देन क्लीबत्वस्यापि प्रतिपादनापत्तिरत आह। केन चिच्छब्देनेति। तत्सम्भवे त्विति। यथा पशुना यजेतेत्यत्र लौकिकपुंस्त्वविशिष्टस्य शास्त्रीयलिङ्गस्य शब्दसंस्कारकत्वमिति न स्त्रिया यागाङ्गत्वम्। पशुशब्दो हि स्त्रीलिङ्गोऽपि। पश्वानता पुमितिवेदे दर्शनात्। अजादिशब्दवाच्ये स्त्रीत्वे टाबिति मूलेोक्तार्थस्यैव स्वीकारे तुरगीत्यत्र टाप्प्राप्नोति। अजादिष्वश्वशब्दस्य पाठेनाश्वशब्दवाच्यस्त्रीत्वस्य तुरगशब्दार्थे सत्त्वादत आह। तद्वाच्यार्थगतमिति। एवमुक्तौ तु तद्वाच्यार्थस्य यादृशविशेषणविशिष्टस्य तच्छब्दजन्योपस्थितिविषयता तादृशविशेषणावच्छिन्नतद्विषयताविशिष्टं यत्स्त्रीत्वमिति विवक्षितम्। शब्दादुपस्थितिश्चार्थस्य शब्दप्रकारिकाऽर्थविशेषिका जायते। अश्वशब्दजन्योपस्थितिविषयताविशिष्टं यत्स्त्रीत्वन्तदश्वशब्दसामानाधिकरण्येन भासते न तु तुरगशब्दसामानाधिकरण्येन। तथा च तत्तच्छब्दसामानाधिकरण्येन भासमानं यत्तच्छब्दवाच्यस्त्रीत्वन्तस्मिन्न्याय्ये तत्तच्छब्दाट्टाबितिफलितम्। अन्ये। मूले। तस्य। स्त्रीत्वस्य। विशेषत्वापत्तिरिति। प्रकृतिप्रत्ययौ सहार्थमब्रूतस्तयोः प्रत्ययार्थः प्रधानमितिन्यायात्। द्योत्यत्वे तु न विशेषत्वापत्तिः प्रकृतिप्रत्ययाविति न्यायस्य वाचकविषयकत्वात्। लिङ्गस्य द्योत्यत्वे युक्तिमाह। वागादिष्विति। अत एव। स्त्रीत्वस्य द्योत्यत्वादेव। ननु द्योतकविषयेऽप्युक्तार्थानामिति न्यायसञ्चारः कुतो नेत्यत आह। व्यतिलुनीत इति। स्त्र्यादिशब्दा धर्मपरा धर्मिपरा अपि। अतः स्त्रियामित्यधिकारेऽपि स्त्रीत्वे द्योत्य इत्युक्तिर्न विरुध्यते। तदुक्तभाष्ये। स्त्रियामिति। स्त्र्यर्थाभिधाने चेट्टावादयो भवन्ति द्विवचनबहुवचनयोरनुपपत्तिः। कुमार्यौ कुमार्यः। किङ्कारणमेकत्वात्स्त्रीत्वस्य। यद्यपि तत्तदर्थभेदेन तत्तत्सम्बन्धिविशिष्टं स्त्रीत्वमपि भिद्यते तथापि शब्दभेद एव स्त्रीत्वस्य भेदक इत्यभिप्रायेणेदम्। अनेकप्रत्ययानुपपत्तिश्चागार्य्यायणी कारीषगन्ध्या इत्यादौ। एकोऽयमर्थः स्त्रीत्वन्नाम तस्यैकेन प्रत्ययेनोक्तत्वाद्द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति। ततः सिद्धान्तितम्। स्त्रियाः प्रातिपदिकविशेषणत्वात्स्त्रार्थे टाबादय इति। ननु ये नित्यं टाबन्ता एव प्रयुज्यन्ते तेषामप्यनेनैव साधुत्वमन्वाख्येयम्। तत्र चेदकारान्तस्य क्वचिच्छन्नि-

निर्णयः स्यात्तदा टाप्समभिव्याहारेऽधिकस्य स्त्रीत्वस्याभिव्यक्त्या टापो द्योतकत्वनिर्णयो भवेत्। न तथा खट्वामालादिष्ववधारयितुं शक्यते। न चातिखट्व अतिमाल इत्यत्र तथा दृश्यत एवेति वाच्यम्। तत्राप्याकारान्तस्यैव ह्रस्वत्वं न तु खतोऽदन्तत्वन्तस्येति चेन्न। सर्वेषां स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्। मक्षको मक्षक इति मा भूत् तस्मात्सिद्धमेतद्भवतीति भाष्येण क्वचिद्गणविशेषे खट्वामालयोः पाठकल्पनेन समाधानात्। सर्वत्रामधातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकमिति भाष्यान्तरेण समाधानाच्च। एवम्पञ्चभिः खट्वाभिः क्रीतः पटः पञ्चखट्व इत्यादौ टापो लुक्यदन्तताया दर्शनाच्चेति। नन्वजादीनामुक्तिर्ङीपो ङीषश्च बाधनायेत्युक्तन्तच्चायुक्तमजादिशब्दोपादानेन विधीयमानस्य टापो ङीषि कृतेऽपि चारितार्थ्यादत आह। येन नेति। ननु वक्ष्यमाणज्ञापकेन तदन्तविधावजादिभ्यस्तदन्तेभ्यश्च टाप् स्त्रीत्वे द्योत्य इत्यर्थः स्यात्तया च पञ्चाजीत्यत्र दोषः स्यादत आह। व्याख्यानादिति। एवञ्च सूत्रेऽजादीति लुप्तषष्ठ्यन्तम् पृथक् पदम्। व्याख्यानादित्यस्य लक्ष्यदर्शनमूलकादित्यादिः। एवञ्च प्रकृतसूत्रे स्त्रियामित्येतदजादीत्यस्यैव विशेषणम्। अन्यत्र। वनो र चेत्यादौ व्याख्यानादिति। वक्ष्यमाणज्ञापकमूलकादित्यादिः। तत्फलमाह। एवञ्चेति। पञ्चसुत्वरीति। सुयजोर्ङ्वनिप्। वनो र चेति सूत्रेण विहितयोर्ङीर्ङ्योर्विकल्पेन विधायकम्बहुव्रीहौ वेतिवार्त्तिकमिति केषाञ्चिन्मतेनेदम्। वस्तुतो वक्ष्यमाणरीत्याचानुपधालोपित्वान्न तेन ङीप्। एवञ्च बहुधीवरीत्यस्योपलक्षणमिदम्। नन्वजादीत्यस्य पञ्चम्यन्तत्वेऽपि पञ्चाजीत्यत्र टाम्न प्राप्नोति। समासप्रत्ययविधाविति ग्रहणवतेति परिभाषया वा तदन्तविधिनिषेधादत आह। अजादिभ्य इतीति। वनो र चेत्यत्रेति। अत एवातिधीवरी सिध्यति। अजादीनामेवेति। एवं सति स्त्रियां यदजादि तस्मात्तदन्ताद्यर्थेऽपि नात्र टाप्प्राप्तिरिति भावः। अनुपसर्जनाधिकारेणेति। तर्हि बहुकुरुचरेत्यत्र ङीपोनुत्पत्तये क्रियते। यदि स्त्रियामित्युपात्तस्यैव विशेषणं स्यात्तदा टितस्तत्र स्त्रियां वृत्त्यभावात्सोऽनर्थकः स्यादिति भावः। सामर्थ्येनेति। अजादिशब्दवाच्यं यत्स्त्रीत्वमितिव्याख्यानसामर्थ्येनेत्यर्थः। तदुक्तभाष्ये। तदन्तविधिज्ञापनानन्तरं

यद्येतज्ज्ञाप्यते पञ्चाजी दशाजी अत्रापि प्राप्नोति । नैष दोषः । अजादिभिरत्र स्त्रियं विशेषयिष्यामः । अजादीनां या स्त्रीति । अत्र कैयटः । अजादिप्रातिपदिकाभिधेयसमवेतस्त्रीत्वमिह गृह्यत इति । ये तु अनुपसर्जनाधिकारे ये उपात्तास्तेषामेव विशेषणं स्त्रियामिति । एवं सति बहुकुरुचरेत्यत्र प्राप्तेरेवाभावेनानुपसर्जनाधिकारो न कार्यः । एवमजायत इति सूत्रे स्त्रियामित्यस्याजादीत्यस्य पञ्चम्यन्तत्वेप्येतद्विशेषणत्वमिति पञ्चाजीत्यत्र न प्राप्तिः । बह्वो रचेत्यत्र तु तदन्तविशेषणत्वमपीति वदन्ति । तेषामर्द्धजरतीयत्वस्वीकारः स्पष्ट एव । शूद्रा चामहत्पूर्वेत्यत्र महच्छब्दस्यानुकरणत्वाल्लौकिकार्थानभिधायकतयात्वत्र । जातिश्चेदिति । स्वप्रवृत्तिनिमित्तभूता जातिश्चेदित्यर्थः । एतत्फलमाह । पञ्चशूद्रीतीति । जातिवाचकत्वाभावादिति । पञ्चव्यक्तिविवक्षायामेव समासविधानात् । एवञ्च यत्र शूद्रत्वजातिमप्रवृत्तिनिमित्तीकृत्य शूद्रशब्दस्य वाचार्थे प्रवृत्तिस्त्रत्रैव टाप् । पुंयोगे त्वितीति । आरोपितशूद्रत्वपुरस्कारेण स्त्रिया बोधेऽपि न शूद्रत्वजातेर्मुख्यः सम्बन्धोऽत्र विवक्षित इति भावः । न चात्र गौणत्वमिति । न च पदकार्येष्वयन्न्याय इत्योत्सूत्रे सिद्धान्तितमिति कथमियमाशङ्केति वाच्यम् । यत्र प्रातिपदिकावस्थायामेव गौणत्वप्रतीतिस्त्रत्र प्रातिपदिककार्येष्वपि तत्तत्पदशब्दस्य गौणवृत्त्याश्रयत्वोपलक्षणत्वादिति गौणमुख्यन्यायप्रवृत्तिरिति भावः । सिद्धान्तितार्थमाश्रित्य दूषयति । सट्टेति । परिभाषास्थपदशब्दः पदसंज्ञकपर एवेति भावः । अमहत्पूर्वाशब्देऽसमर्थसमासोऽसूर्यम्पश्येतिवत्तेन यत्फलितन्तदाह । महत्पूर्वो न टापमिति । महाशूद्रशब्दः समुदाय एवोभीरजातिवचनः गौरखरेन्द्रगोपादिशब्दवत् । तत्र समुदायव्युत्पादनायाऽवयवार्थे स्त्रीत्वमविवक्षित्वैव समासः क्रियते ततः समुदायार्थे स्त्रीत्वविवक्षायां समुदायस्य जात्यन्तरबोधकत्वादनेन टापो निषेधे जातेरिति ङीष् । अनेन यदा समुदायस्य जातिप्रवृत्तिनिमित्तकत्वविवक्षा तदा प्रतिषेधः यदा तु महत्त्वविशिष्टा शूद्रा न त्वन्यजातीयेति विवक्षा तदा महाशूद्रा इत्येव । ननु जातेरित्यस्याभावेऽपि नायन्दोषः । अन्तरङ्गत्वात्सुब्त्पत्तेः प्राक् टापि ततः समासे जातस्य टापो निवृत्त्ययोगान्निषेधो जातावेव पर्यवस्यतीत्यतो दोषमुपपादयति । तत्फलमिति । जातिमात्रेति । अत्र मात्र-

पदेन स्त्रीत्वव्यवच्छेदः । जातिपरत्वे दृष्टान्तो मृगचीरकुक्कुटाण्डवदिति । एतेन यथा कुक्कुट्यादीनामण्डादिस्थितिवचनस्य कुक्कुट्याण्डमितिविवक्षया समासङ्कृत्वा प्रत्याख्यानङ्कृतन्तथाऽत्रापि समास इति निदर्शितम् । ततः स्त्रीत्वविवक्षेति । एतेन पूर्वं टावुत्पत्तिशङ्काव्युदासः । जातिरित्यस्यासम्बन्ध इति । अमहत्पूर्वेत्यनेन टापो निषेधे सतीति शेषः । ननु समुदायस्य जातिवाचकत्वाभावात्कथं ङीषः प्राप्तिरत आह । अनुपसर्जनाधिकारेणेत्यादि । एवञ्च जातिवाचकात्तदन्तादिति तत्राप्यर्थः स्यादिति भावः । जातिरित्यस्योभयत्र सम्बन्धश्च भाष्यकारीयव्याख्यानेन लभ्यते । तत्र हि । शूद्रा चामहत्पूर्वा । शूद्रा चामहत्पूर्वेति वक्तव्यम् । शूद्रा । अमहत्पूर्वेति किमर्थम् । महाशूद्री । जातिः । जातिरितिवक्तव्यम् या हि महती शूद्रा महाशूद्रा सा हि भवतीति । महाशूद्रेतिसमुदायस्य जातिवाचकत्वं व्युत्पादयति । आभीरी त्विति । आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः । वैश्याशूद्रीस्तु राजन्याद्याहिथोग्री सुतौ स्मृतौ । ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते । माहजातिवृत्तित्वमिति । प्रतिपादकतासम्बन्धेनेत्यादिः । तेन शूद्रत्वावच्छिन्नविषयताशालिबोधजनकत्वमस्खलितम् । तत्र शूद्रत्वमारोपितमुख्या तु सासा जातिः । अत्रास्तीति । तथा चास्त्येव टापः प्रसङ्गः । नन्वेवन्तदन्तविधिज्ञापकत्वङ्कथमत आह । तदर्थसमवेतेत्यादि । अनुलोमसङ्करणाम्माहजातिवृत्तित्वे मानमाह । अत एवेति । आरोपितमाहजातिवृत्तित्वादेवेत्यर्थः । पूर्वोक्तार्थे प्रसक्तभाष्यविरोधमुद्धर्तुमाह । यत्त्विति । अत्रत्यग्रन्थेन माहजातिवृत्तित्वं स्पष्टमेव लभ्यते । केचिदिति । अत्रारुचिबीजन्तु यदि छागशब्दस्याजादौ पाठस्तदा छागीतिप्रयोगस्योच्छेद एव स्यादिति यदि छान्दसस्तादृशः प्रयोगस्तदा व्यत्ययेन साधनीयो नो चेदसाधुरेवेति । नन्वेवमपि प्रत्ययग्रहणपरिभाषया निर्यवमतीत्यत्र न स्यादत आह । भवत्विति । अत्र मानन्तु कथमिदं विज्ञायते उगितः प्रातिपदिकादिति आहोस्वि दुगिदन्ताआतिपदिकादिति । यदि विज्ञायते उगितः प्रातिपदिकादिति सिद्धम् भवती महती अतिभवती अतिमहतीति न सिध्यतीति भाष्यमेव । वनो र चेतिसूत्रे उपात्तस्य वनः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तदन्तपरन्तस्य पुनः प्रातिपदिकविशेषण-

त्वेन वनन्तात्मादित्यर्थे बहुधीवरीत्यस्य सिद्धावपि धीवरी सुखरीत्यस्यासिद्धिरत आह। व्यपदेशिवद्भावेति। येन विधिस्तदन्तस्येतिसूत्रस्थन्तस्य चेतिवक्तव्यमिति वार्त्तिकपर्यालोचनया तु तदन्तविधिलभ्य एवायमर्थः। तस्यापर्यालोचनयेदम्। ननु तदनुबन्धकपरिभाषया वनिप एव ग्रहणमुचितमत आह। सूत्र इति। अन्यतरानुबन्धोच्चारणे तदनुबन्धकपरिभाषाप्रवृत्तिरिति भावः। न चैवं ह्राकः ककारो ह्रस्व ब्रोहिकालयोरितिसूत्रे सामान्यग्रहणार्थ इतिग्रन्थविरोध इति वाच्यम्। तस्य ग्रन्थस्य गस्थकन् प्रुसृल्व इति पूर्वोत्तरसाहचर्यादेकानुबन्धकस्यैव ग्रहणं स्यादिति सामान्यग्रहणार्थः ककार इत्येतत्परत्वात्। एतल्लिङ्गार्थमिति। शर्वरीत्यस्य सिद्ध्यर्थमित्यर्थः। परविशेषणत्वे तु न स्यादिति भावः। अर्थवत इति। कर्त्तृरूपार्थविशिष्टस्य ग्रहणमिति भावः। ननु वनो र चेतिसूत्रभाष्ये रविधाने बहुव्रीहेरुपसंख्यानमतिषिङ्वादित्येवोक्तमिति त्येतदनुपपन्नमत आह। एतच्चेति। सिङ्डीविति। अस्य वैकल्पिकेत्यादिः। एवञ्च विकल्पलाभः स्पष्ट एव। अत एव। एतस्य वार्त्तिकस्यान उपधालोपिन इतिसूत्रसिङ्डीवनुवादत्वादेव। नन्वेतद्विषये वनो र चेत्येव सिद्धमत आह। वनो र चेत्येतत्त्विति। प्रकृतोदाहरणे बहुधीवरीत्यत्र न ऋन्नेभ्य इति ङीप्। अनो बहुव्रीहेरिति सूत्रेण निषेधात्। ङापि सति यत्र वैलक्षण्यन्तदाह। द्विवचन इति। कृतसमासान्त इत्येतल्लाभप्रकारमाह। उत्तरसूत्र इति। दण्डाक्षं खण्डयति। पूर्वसूत्र इति। तत्र हीति। ये प्रतिपदं विधीयन्ते तेऽस्य बाधका भविष्यन्तीति शङ्कायामित्यादिः। सावकाशत्वादिति। एवञ्चापवादत्वोक्तिर्विरुद्धेति भावः। बहुव्रीहेरूधस इत्यत्रापि भाष्य इति। तत्र हि ऊधसो नकारो लिङ्गाधिकारे इति वार्त्तिकम्। बहुव्रीहेरूधस इतिसूत्रानन्तरन्नञेति कर्त्तव्यम्। समासान्तप्रकरणे ऊधसो नङिति सूत्रञ्च कार्यम्। बहुव्रीहेरूधस इति सूत्र एव नञेत्यपि वाच्यम्। अलोऽन्त्यपरिभाषया नकारादेशे ऊधस्नीति भविष्यति। समासान्तेषु धनुषोऽनङिति वाच्यमिति भावः। तेन कुण्डोधाः पर्जन्यः कुण्डोधो धेनुकमित्यत्र पुन्नपुंसकयोर्नानङ्। न वा समासान्ताधिकारे स्त्रीग्रहणात्। समासान्ताधिकार एव स्त्रीग्रहणङ्कर्त्तव्यम्। ऊधसो नङितिसूत्रानन्तरं स्त्रियामिति वक्तव्यम्। इतरथा हि क्वविधिस्थ

ङ्गः । ङीषुत्पत्तेः प्राक् शेषाद्विभाषेति कप् स्यात् । तच्चैवावश्यमूधसो नङिति वाच्यम् । समासान्तस्य कपो बाधनार्थमिति भावः । कस्याम्पुनरवस्थायां कप्प्राप्नोति । प्राक् ङीषुत्पत्तेः । प्राक् तावन्न प्राप्नोति किङ्कारणम् न हि ङीष् विभाषा यद्यत्र कप् स्यात्तदा ङीष् विधानमनवकाशं स्यादितिकैयटः । ततो न हि ङीष् विभाषा । कप् तु विभाषा कपोऽवकाशः । अन्योबहुव्रीहिः । अयवकः । अव्रीहिकः । ङीषोऽवकाशः विभाषा कप् । यदा न कप् सोऽवकाशः । कुण्डोघ्नी घटोघ्नी । कप्प्रसङ्गे उभयं प्राप्नोति परत्वात्कप् स्यात् । तस्मात्सुष्ठूच्यते न वा समासान्ताधिकारे स्त्रीग्रहणादितरथा हि कबविधिप्रसङ्ग इत्येवमुक्तम् । अत एव । टाबृचीत्यस्य तदनपवादत्वादेव । पादशब्दसमानार्थकत्वन्द्रढयति । श्रूयते चेति । प्रत्याख्यानैकवाक्यतया यत्पर्यवस्यति तदाह । तदा हीति । कृतसमासान्तस्यैकपदीति । अकारान्तस्य तु एकपदेति । ङीपो वैकल्पिकत्वेन तदभावे एकपादिति । एवञ्चेति । प्रत्याख्यानैकवाक्यतयेत्यर्थः । ननु कृतसमासान्तस्य ऋचनभिधानेनाप्येकवाक्यता कुतो नेत्यत आह । पादन्तस्येति । सूत्रेरीत्येति । एतत्सूत्रस्य विकल्पेन ङीब्विधायकतया टाबृचीत्यस्य प्रत्याख्यानेऽपि ङीवन्तं स्यादेवेति टाबृचीतिसूत्रारम्भेऽपि तत्रान्यतरस्यांग्रहणानुवृत्त्या तत्साधनीयमत एव भाष्यकृता पदशब्दाट्टाबुत्पत्तिर्भविष्यतीत्युपपादितम् तु पादन्तस्यानभिधानेन पादोन्यतरस्यामित्यस्याऽप्रवृत्तिरुद्भाविता । ननु पद्येत्यत्र टापि कर्त्तव्ये पूर्वत्रासिद्धमित्येवासिद्धत्वे सिद्धे षट्संज्ञाप्राप्तिं नलोपासिद्धत्ववर्णनमनुपयुक्तमत आह । आपः परीति । नन्वेवमपि नलोपासिद्धत्वस्य न फलम् । पूर्वकालजातषट्त्वस्य समुदायनिष्ठस्य स्थानिवद्भावेन सिद्धेरत आह । इदमिति । तदन्तेप्रीति । अधिकारलब्धस्य प्रातिपदिकादित्यस्य विषेषस्य षडादि विशेषणमिति तदन्तविधिप्रवृत्तेः । न च बहुवचननिर्देशादप्रवृत्तिः । तस्य व्यक्तिबहुत्वाभिप्रायकत्वात् । ध्वनितमिति । एतत्सूत्रभाष्ये कस्मायम्प्रतिषेध इति प्रश्ने आचार्यदेशीयेन ङीबनन्तरस्य प्रतिषेध इत्युत्तरिते टाप् कस्मान्नेति शङ्कायान्नलोपासिद्धत्वेनाचार्यदेशीयेनैव समाहितम् । ततः पुनः परिगणितेष्वेव नलोपस्यासिद्धत्वशङ्कायां श्नियवुद्विपरीत्यर्थन्नलोपः सुवितिसूत्रे सुविति न प्रत्ययग्रहणङ्किन्त-

हिं स्त्रीजसेति सुशब्दमार भ्य चापः पकारेण प्रत्याहार इत्युत्तरे बहुचर्मिकेत्यत्रेत्ते दोषे शिष्टे णोङ्ङाविति स्त्रियां यत्राप्नोतीति व्याख्यानेन सिद्धान्तिना सर्वनिषेध इत्युक्तन्तेनान उपधेति ङीपोऽपि निषेध इति ध्वनितमित्यर्थः । मूलकाराद्युक्तन्दूषयति । परे त्विति । अन्योक्तम्बहिरङ्गासिद्धत्वन्दूषयति अत्र बहिरङ्गासिद्धत्वाप्राप्तिरिति । अत एव । भूतपूर्वगत्याश्रयणादेव । एवञ्च लक्ष्यसिद्धये यथोद्देशपक्ष एव प्रकृते आश्रीयत इति कथितम्भवति ! अयम् । मन इतियोगः । उक्तरीत्या स्त्रियां यत्राप्नोतीति व्याख्यानेन । वचनसामर्थ्यात् । यदि नित्यो ङाप् तदाऽनो बहुव्रीहेर्मनश्च ङाबित्येव सूत्रङ्कर्त्तव्यमिति भावः । वाक्यभेदेति । योगविभागङ्कृत्वेत्यादिः । एवञ्चान्नन्ताद्बहुव्रीहेर्ङीबन्यतरस्यामिति वाक्यनिष्पत्तिः । अयञ्च ङीन्नापूर्वः किन्तु नान्तात्प्राप्तस्यैव ङीप उज्जीवनमिति फलितम् । नियमार्थमिति । अनो योऽसौ विकल्पः स उपधालोपिन एवेति नियमार्थमित्यर्थः । एवं सति बहुधीवरीत्यत्रैतत्प्रकरणस्थ एव ङीप् । ननु नियमशास्त्राणान्निषेधरूपेण प्रवृत्तिरितिपक्षे यद्यप्युक्ता व्यवस्था तथापि विधिरूपेण प्रवृत्तिरितिसिद्धान्ते बहुधीवरीत्यत्र प्रकरणान्तरस्थ एव ङीप्स्यादत आह । अन उपधेति चेति । अन उपधा । यद्यपीदं सूत्रमष्टाध्याय्यामप्रकरणान्तरे पठितन्तथापि भाष्ये यद्दनो रचेति सूत्रे अनो बहुव्रीहेरुपधालोपिनो वेतिपठितं तत्तुल्यतया व्याख्यानयोग्यमितीह मूले व्याख्यातं तदेतदभिप्रेत्याह । न सम्बध्यत इति । वाच्यार्थविरोधात् । तदुपपादयति । तस्य गृह्यमाणेति । गृह्यमाणस्य । अवयवस्य । असम्बन्धे प्रमाणमाह । ध्वनितञ्चेदमिति । इदमिति । अनुपसर्जनादित्यस्यानेन सह मिलित्वा वाक्यार्थबोधाजननम् । बहुव्रीहेरितिप्रकरणस्थमुपधालोपिनो वेति । वनो रचेति सूत्र एवानो बहुव्रीहेरिति पठित्वा उपधालोपिनो वेति पठितम् । एवं न्यासे उपधालोपिन इत्यत्रानुपसर्जनादित्यस्य सम्बन्धयोग्यतैव न अस्य योगस्य पूर्वत्वात् । न च बह्वनि दामानि येषान्ते बहुदामोनस्थानतिक्रान्ताऽतिबहुदामा इत्यत्र ङीबभावार्थमनुपसर्जनादित्यस्य सम्बन्ध आवश्यक इति वाच्यम् । स्त्रियामित्यस्य गृह्यमाणबहुव्रीहिविशेषणतयैवातिप्रसङ्गभङ्गे सम्भवत्येतदर्थमनुपसर्जनोधिकारो न कार्य इत्यभिप्रायात् । यत्तु मनोरमायां यदनो बहुव्रीहेरित्यस्यान-

न्तरमुपधालोपिनो वेति सूत्रमस्वितयुक्तम् तत्रत्यम् इत्यस्यानन्तरमितीति प्रतीकमुपादायोक्तमनो बहुव्रीहेर्डाबुभाभ्याम् । अनुपसर्जनात् । उपधालोपिनो वेतिपाठ्यमिति शब्दरत्ने । यथाश्रुतेऽनुपसर्जनादित्यस्य सम्बन्धो दुर्घटः । अत एव बहुदामानि पुराण्यतिक्रान्ता नगरीत्यत्र ङीन्नेत्युक्तन्तेनास्य विरोध इति । तन्न । मनोरमाव्याख्यानपरशब्दरत्नग्रन्थस्य स्त्रियामितिप्रातिपदिकविशेषणमिति पक्षेऽनुपसर्जनादित्यस्यारुच इति पक्षाभिप्रायकत्वात् । विध्यर्थमिदमिति । अन उपधेतिसूत्रमित्यर्थः । नन्वत्रापि विधानसामर्थ्यान्ङीन्निषेधडापां पर्यायसिद्धावन्यतरस्यामिति व्यर्थमत आह । अन्यतरस्याङ्ग्रहणन्त्विति । केचित्तु डाबुभाभ्यामन्यतरस्याम् । अनुपसर्जनात् । उपधालोपिनो वा इति ङीप्सूत्रे च योगविभागेनोक्तरीत्याऽनो बहुव्रीहेरित्यनुवर्त्यान्नन्ताद्बहुव्रीहेर्डाब्वा । एतेन ङीपा सह विकल्पसिद्धिः । अन उपधालोपिन इतिसूत्रन्तूक्तरीत्या नियमार्थम् । एतत्फलार्थमेव तत्र वेति । अनुपसर्जनस्येत्यस्य प्रयोजनन्तूक्तमेव । बहुराज्ञीत्यादौ ऋन्नेभ्य इत्येव ङीप् । अत एव बहुधीवरीत्यस्य सिद्धिः । एवञ्च बहुव्रीहौ वेति न कार्यमित्याहुः । अनेन । कारप्रत्ययकरणेन । यदि केति समुदायो विवक्षितः स्यात्तदाऽकचि न स्यात् । आपीत्यस्य ककारविशेषणत्वं साक्षादुद्देश्यविशेषणत्वम्वा । उभयथाऽनुपपत्तिरित्याशयेन शङ्कते । न चेति । ननु परेणाकारेणैकादेशे परादिवद्भावेन भविष्यतीत्यत आह । एकादेशेप्यचः परेति । साक्षादुद्देश्यविशेषणत्वकल्पेऽप्याह । आपि परत इति । ननु सूत्रारम्भसामर्थ्याद्व्यवधानेऽपि प्रवृत्तिरिति चेन्न । रथकट्यादावतिप्रसङ्गात् । समाधत्ते । आनन्तर्यांशइति । अकारव्यवधानेऽपीति । अनेनापीति ककारविशेषणमिति सूचितम् । ननु केतिसंघातग्रहणमिति पक्षेऽपि न यासयोरितिज्ञापकेन सौत्रमकारवैशिष्ट्यमादायेत्त्वप्रवृत्तिर्भविष्यतीत्यत आह । न यासयोरिति । प्रत्ययस्यत्वांशेति । एतिकेत्यत्र लक्ष्ये केतिसंघातस्य प्रत्ययस्यत्वांशानुपपादनादित्यर्थः । प्रत्ययसंज्ञासूत्रोच्चारितशब्दबोध्यस्य न तु बोधकस्येत्संज्ञोत्तरकालमेव प्रत्ययसंज्ञाप्रवृत्तेः । वर्णग्रहणेऽपि येन नाव्यवधानन्यायेन सर्विकेत्यादावेव स्यान्न त्वेतिकेत्यादाविति शङ्कते । न चेति । अपहारेणेति । स्थानिवद्भावप्रवृत्तिकाले स्थितस्यार्य परनिमित्तोऽजादेश इति

बुद्धिः सा तु न सम्भवति तस्य टापा सहैकादेशेनापहारादिति भावः। अत एव पूर्वोक्तरीत्या एकस्यैव स्थानिवद्भावस्य प्रवृत्तेरेव। स्वग्रहणं तु स्पष्टार्थमिति। प्रत्यये कीत्यैव सिद्धेरिति भावः। न च कान्तात्प्रत्ययादित्यर्थापत्तावकच्येव स्यादिति वाच्यम्। क्विपकादीनाञ्चेतिनिषेधवैयर्थ्यापत्तेः। देविकाशिंशपेतिनिर्देशासंगतेश्चेति। ननु तथापि कादौ प्रत्यय इत्येव किन्न स्यादिति वाच्यम्। न यासयोरितिसूत्रवैयर्थ्यापत्तेः। बहुव्रीहिणेति। न सुब्यस्येतिबहुव्रीहिणेत्यर्थः। प्रसज्यप्रतिषेधेनेति। स आप् सुपः एरी नेतिरीत्या। पर्युदासेन व्याख्याने सुब्भिन्नात्सुबन्तभिन्नादित्यर्थो वा स्यात्तदाह। पर्युदासे हीति। उत्तरस्याकारस्येति। पूर्वशब्दाभावे कादितिपञ्चम्युपपत्तये दिग्वाचकशब्दाध्याहारप्रसङ्गे परशब्दाध्याहारेण कटुकेत्यत्रोत्तरस्याकारस्य स्यादिति भावः। न च सर्विका पूर्विकेत्याद्यसिद्धिरेव कुतो नोद्भावितेति वाच्यम्। तेषु कदाचित्पूर्वशब्दाध्याहारे यद्यपि सिध्यति तथापि तत्र पाक्षिको दोषः कटुकेत्यत्र तु सर्वथेत्वमनिष्टमेवेति तदेव निदर्शितम्। यदि चोदीचामिति सूत्रेऽनुवर्त्तमानं कादिति ककारनिष्ठपूर्वत्वनिरूपितावधित्ववाचकमन्यथा तत्रत्ययकेत्यत्र यो यकारस्तत्पूर्वस्य कात्परत्वासम्भवः स्यात्। किञ्च यः ककारस्तदुपादानं व्यर्थं स्यात्। ककारपूर्वस्य कात्परत्वानपायात्। नित्यं क्रीडाजीविकयोरितिनिर्देशाच्चेति कादिति पञ्चम्यन्तन्न परत्वनिरूपितावधित्वविशिष्टवाचकमिति विभाव्यते तदा पूर्वस्येति स्पष्टार्थम्। आदिर्ञ्ञिरिति। केवलमामकेति सूत्रविहितो ङीप् तु नाचास्य यौगिकत्वात्। तस्य संज्ञाछन्दसोः प्रवृत्तेः। तद्विरोधादिति। सन्निपातपरिभाषाविरोधात्। विभक्तिसन्निपातनिमित्तकस्यात्त्वस्य ताट्शसन्निपातविघातकटान्निमित्तत्वन्न स्यात्। इत्त्वभूतेति इत्त्वप्राप्तो यो निर्देशः इत्त्ववटित इति यावत्। ज्ञापकेनेति। तकारादेः प्रत्ययस्यावयवो यः ककारस्तस्मात्पूर्वस्य नेति निषेधेनेत्यर्थः। ननु यत्र टापो लुक्तत्रेत्त्वस्य श्रवणार्थमिकारनिर्देशोऽस्त्विति कथमेतन्निषेधकमित्याशङ्कानिवारणायाह। पञ्चभिरिति। तदाशयः। भाष्यकाराशयः। न चाचः परस्मिन्निति स्थानिवत्त्वेन पञ्चमृत्तिक इत्यत्रेत्त्वस्य श्रवणं सुवचम्। लुका लुप्तन्न स्थानिवदिति निषेधात्। न चान्तरङ्गे इत्त्वे बहिर्भूत इतलुङ्निमित्तत्वेनटाऽलुको बहिरङ्गस्यासिद्ध-

स्वेनेत्वभविष्यतीति वाच्यम्। अन्तरङ्गानपीतिपरिभाषाया बहिरङ्गपरिभाषापवादत्वात्। अत्र मृदस्तिकन्निति वदुपाधिभ्यान्त्यकन्निति सूत्रे त्यिकनि कर्त्तव्येऽकारोच्चारणादित्वन्न भविष्यतीति प्राचोक्तन्दूषयति। अत्र त्यिकनीति। उभयोः। प्रत्ययलक्षणस्थानिवद्भावयोः। अत एव प्रत्ययलोपसूत्रस्य नियमार्थत्वपरभाष्यसङ्गतिरन्यथैतादृशे विषये न लुमतेतिनिषेधात्प्रत्ययलक्षणाप्रवृत्तावपि स्थानिवद्भावेन तन्निमित्तकार्यं स्यादिति नियमार्थत्ववर्णनमसङ्गतं स्यात्। अत एव। उभयनिषेधादेव। वार्त्तिकमतेऽपीति। तन्मते न लुमतेतिसूत्रेण प्रत्ययलोपइतिसूत्रस्य विधायकस्य निषेधेऽपि स्थानिवत्त्वेन गुणः स्यादेवेति भावः। न गुण इति। एवञ्च नियामकत्वस्वीकर्तृभाष्यकारवचनप्रामाण्यान्नुमतौशब्देन लोपे सति कथमपि प्राप्तन्निमित्तककार्यन्न भवतीति कल्पयत इति भावः। देवकेत्यस्य साधुत्वमुपपादयति। देवदत्तशब्दादिति। मतभेदेनेत्त्वविकल्पः शकुनावेवेत्यत आह। अत्रापीति। अन्यच। शकुनिभिन्ने। ननु हन्दारका दैवतानीति कोशोहन्दारकशब्दो नित्यपुल्लिङ्ग इत्यत आह। मुख्यवाचीति। अत एव भाष्ये हन्दारका हन्दारिकेत्युदाहृतम्। मुख्यवाचकस्य त्रिलिङ्गत्वे तु त्रिषूत्तर इत्युपक्रम्य हन्दारकौ रूपिमुख्यावित्यमरसिंहोक्तिः प्रमाणम्। उदीचामात स्थाने। अत्रार्थगतं स्त्रीत्वमाकारे आरोप्य यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः। यकपूर्वे त्यस्य यकौ पूर्वौ यस्या इत्यर्थः। निर्दिष्टपरिभाषेति। तस्मादिति परिभाषेत्यर्थः। इयञ्चाव्यवधानांशमात्रप्रापिका उत्तरत्वेत्यंशरहितोपतिष्ठते। पञ्चमीनिर्देशश्च यकौ पूर्वौ यस्या इति विग्रहे द्रष्टव्यः। तच्च पूर्वशब्दसत्त्वात्तेन विरोधादुत्तरांशस्य नोपस्थितिः। एतत्फलमाह। तेन कुशराशब्देति। नेत्यनुवृत्तावपीति। अनुवृत्तेः फलमित्वविधायकपूर्वसूत्रेण समाननिमित्तकत्वलाभ इति। अन्यथा पूर्वसूत्रस्य सम्पूर्णस्यानुवृत्तिं कृत्वा व्याख्यानस्यावश्यकतया गौरवापत्तेः। स्त्रीबोधकाकारस्येति। स्त्रीबोधकश्चासावाकारश्चेत्यर्थः। अवयवषष्ठीति। स्त्रीबोधकस्याकारस्येत्यत्रावयवषष्ठ्येव स्यादित्यर्थः। अत्र बहुलच्यसंस्कारश्च सांकाश्यिकेत्यस्य सिद्धिरूपः। तदनुपादानादिति। साक्षादुच्चारितत्वन्तत्तच्छब्दानुवादेन विहितत्वं वा प्रतिपदोक्तत्वन्तदुभयमप्यत्र नास्तीति भावः। ननु स्त्रीप्रत्ययशब्दस्य मूलेऽभावात्स्त्रीप्रत्ययः

किमिति मूलोक्तमयुक्तमतस्तद्योजयति। यकपूर्वेति। पूर्वोक्ताभिप्रायेणाह। अयमपीति। भस्त्रैषेति योग इत्यर्थः। यत्तु, नञ्पूर्वाणामपीति ज्ञापकादिहेत्त्वविधौ तदन्तविधिर्नेति तद्दूषयितुमाह। येन विधीति। भस्त्रादिग्रहणमिति। एतेन प्रकृते तदन्तविधिर्भाष्यसम्मत एवेति ध्वनितम्। उपसर्जनेऽस्य चरितार्थ्येनेति। निर्भस्त्रिकेत्यादौ गोस्त्रियोरिति ह्रस्वत्वे पुनष्टापि कृतेऽस्यापो भाषितपुंस्कादिधानेनाभाषितपुंस्के त्यस्य प्राप्तिरिति भावः। अकचि कृत इति। अवयवगतकुल्साविवच्चायामिदम्। समुदायगतकुल्साविवच्चायामाह। अकृते वेति। ततोऽकचीति। समुदायार्थगतकुल्साविवच्चायामित्यादिः। समासादिति। प्रत्ययलक्षणेनेत्यादिः। नञ्तत्पुरुषस्योत्तरपदार्थप्रधानतया सर्वनामत्वात्तद्विषये प्रक्रियामुक्त्वा बहुव्रीहौ विशेषं वक्तुमाह। बहुव्रीहाविति। प्रियैतत्का इति। न बहुव्रीहाविति सूत्रारम्भवादिमतेन। प्रत्याख्यानरीत्याह। प्रियैतत्का वेति। हा एषा इत्येतद्विषयेऽसम्भवमुपपादयति। एषा हेतीति अप्राप्तेरिति भाव इति। एवञ्चानुपसर्जन एवानेन भवितव्यन्तत्वाकचि कृते आतः स्थानिकत्वासम्भव इति सूचितम्। ननु संज्ञाभूतस्यैतत्सूत्रोदाहरणत्वकथनमयुक्तम् उत्तरसूत्रेण तत्त्वसिद्धेरत आह। संज्ञापूरण्योरिति। पुरुषसाधारणप्रवृत्तिनिमित्तमुपपादयति। आत्मीयत्वपुरस्कार इति। कान्तेऽपीति। तेषां प्रातिपदिकत्वमाचापेक्षत्वेन स्त्रीप्रत्ययादपि प्रागुत्पत्तेः। पदलाघवमूलिकामाशङ्कान्निराकरोति। स्त्रीविषयादिति। मूलोक्तबहुव्रीहेरित्युपलक्षणम्। स्त्रिकेति तत्पुरुषेऽपि नित्यमेवेत्त्वमिति बोध्यम्। यत्तु, मूलोक्तमनुपसर्जनादितिसूत्रमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति तदयुक्तमन्यत्रापि प्रयोजनसम्भवादिति यत्तद्दूषयितुमुपक्रमते। आचारेति। कर्त्रर्क्विबन्तानामिति। इदमनडुच्छब्दो गौरादिषु पठ्यते तस्मादाचारक्विबन्तप्रकृतिककर्त्रर्क्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यशङ्कायान्द्रष्टव्यम्। एतेनादन्तत्वाभावात्क्विबन्ते कथम्प्राप्तिरित्यपास्तम्। यद्यपि ह्रस्वनद्यापइतिसूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारे क्विब्स्तीति आचारक्विबन्तेऽनुपसर्जनाधिकारचारितार्थ्यशङ्कैवायुक्ता। तथापि हलन्तात् क्विपस्त्वाट्टस्य सत्त्वमभ्युपेत्य समाधानमाह। एतज्ज्ञाप्येति। उक्तार्थज्ञापकतापरेत्यर्थः। स्त्रीगोत्यत्र इति। इदमुत्तरकाले स्त्रीत्वसत्त्वात्स्त्रीप्रत्य-

यापादनाय । गृह्यमाणेति । स्त्रियामण् योऽकारस्तदन्तादित्यर्थस्य सम्मतत्वेन गृह्यमाणाण् विशेषणत्वात् । अत्र स्त्रियामण् योऽकार इत्यनेन यदणन्तात् स्त्रियाम्प्रत्ययविधानन्तस्याणो यत् स्त्रीत्वविशिष्टे उत्पत्तिस्तदेव स्त्रीत्वम्प्रत्यासत्या विवक्षितम् । अत एव । निरुक्तस्त्रीत्वस्य विवक्षितत्वादेव । काशकृत्स्निनेति । अत्र काशकृत्स्निना प्रोक्ता मीमांसा इत्यर्थे काशकृत्स्निशब्दादणि कृते तदन्तात्स्त्रियां ङीपि पुनरध्येत्र्यामणि तस्याणोलिङ्गविशिष्टपरिभाषया प्रोक्तार्थकप्रत्ययान्तं यन्ङीवन्तन्ततः परत्वेन लुकि लुकङितेति ङीपो लुकि श्रूयमाणस्याण अध्येत्र्यामवर्त्तनादित्यर्थः । अणन्तसमुदायस्य तु यः शिष्यत इतिन्यायेनाध्येत्र्यां ह्वत्तेष्टाब् भवत्येवेति भावः । तद्व्यावर्त्त्यमिति । अनुपसर्जनाधिकारव्यावर्त्त्यमित्यर्थः । प्रातिपदिकाधिकारसत्त्वेनाण्मात्रस्याप्रातिपदिकत्वादणन्तादित्यर्थसम्भवेऽपि अणन्तान्तादित्यर्थो न स्यात् । एवं सति बहुकुरुचरेतिसमुदायस्य न टिदन्तत्वमतो नास्मान्ङीपः प्राप्तिरिति भावः । ननु स्त्रियामित्यस्य गृह्यमाणविशेषणता पूर्वमुक्ता एवञ्च तदन्तविधौ ज्ञापितेऽपि कथम्बहुकुरुचरेत्यत्राधिकारव्यावर्त्यतेत्यत आह । ज्ञापिते त्विति । प्रधान्यात् विशेष्यत्वात् । एतेन न ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति न्यायावसरः सूचितः । एतदारभ्भात् । अनुपसर्जनादितिसूत्रारभ्भात् । ङीप्प्रकृतीति । प्रातिपदिकमित्यर्थः । अत एव । स्त्रियामित्यस्य प्रातिपदिकविशेषणत्वादेव । एवञ्च । अनुपसर्जनादितिसूत्रे कृते च । अनुपसर्जनादित्यस्यापि प्रातिपदिकविशेषणत्वे भक्षितेऽपि लशुने न शान्तो व्याधिरितिन्यायेनाधिकारसूत्रवैयर्थ्यमेव स्यादतस्तस्य गृह्यमाणविशेषणत्वमेव गुणः कृतात्मसंस्कार इतिन्यायादिति भावः । प्रत्ययविधौ प्रतिषेधादिति । ननु येनविधिरितिसूत्रव्याख्यानावसरे समासप्रत्ययविधाविति प्रतिषेधवाक्यमुपक्रम्य उगिदचां सर्वनामस्थानेधातोरिति प्रतिषेधवाक्यैकवाक्यतयाऽयन्निषेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये । प्रत्ययविधिविषयेण गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्तीत्यनेनैकवाक्यत्वलाभात् । उगिदचामिति त्वेकदेशानुवादः । अत एव वनो र चेत्यादौ प्रत्ययग्रहणे तदन्तग्रहणमित्यस्य नायन्निषेध इत्युक्तन्तेनास्य ग्रन्थस्य विरोधः । टिड्ढेतिसूत्रे विशेषरूपेण प्रातिपदिकग्रहणाभावादिति चेन्न ।

अस्य ग्रन्थस्यानुपसर्जनादितिसूत्रस्थभाष्योपक्रमानुसारित्वात् । तथाहि । अनुपसर्जनादिति किमर्थम् । बहुकुरुचरा । बहवः कुरुचरा यस्यामिति बहुव्रीहिः । कुरुचरशब्द उपसर्जनमिति ङीन्न भवति । नैतदस्ति प्रयोजनम् । कुरुचरशब्दात्यय्यो विधीयते तत्र कः प्रसङ्गो यद्बहुकुरुचरशब्दात्यान्नैव प्राप्नोति नार्थः प्रतिषेधेन । तदन्तविधिना प्राप्नोति । इत्यन्तग्रन्थेन बहुकुरुचरेत्येतदनुपसर्जनादित्यस्य प्रयोजनमुक्तम् । अत्र टिदन्तश्चरशब्दो न तु कुरुचरशब्द इति कुरुचरशब्दादित्यनुपपन्नमित्याशङ्कानिवारणायाह कैयटः । टिड्ढाणञित्यत्र टित्यातिपदकङ्गृह्यते । तत्र किञ्चित् साक्षाट्टिद् भवति यथा नदट् चोरडिति । किञ्चित्त्ववयवघटित्वद्वारेण । अवयवे हि यत्र टित्त्वमकिञ्चित्करत्वञ्च समुदायार्थान्तर्विज्ञायते स चावयवः क्वचिद्वातुष्टिद्भवति । यथा स्तनन्धयीति । क्वचित् ष्युञ्युलादिस्तद्वितः । क्वचित्कृत् ल्युडादिः । तत्र यं समुदायं योऽवयवो न व्यभिचरति तदर्थमवयवस्य टित्त्वमित्यभिप्रायेणोक्तङ्कुरुचरशब्दादिति । अत्र यं समुदायमित्यनेन टप्रत्ययस्य टित्त्वेन कुरुचरशब्द एव टिन्न तु बहुकुरुचरशब्द इति दर्शितं भवति । अत उत्तरमपठति । प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते । समासप्रत्ययविधौ प्रतिषेध इत्यनेन । ग्रहणवतेत्यपि वर्णग्रहणवर्जमित्येतदन्तार्थानुवाद एवेति भावः । ज्ञापकन्तु पूर्वत्र तदन्ताप्रतिषेधस्य । एवमुक्ते ततः किमेतस्य ज्ञापने प्रयोजनमिति प्रश्ने बहुधीवरी बहुपीवरी अतिधीवरी अतिपीवरीति प्रयोजनमुक्तम् । अत्र कैयटः । वनो र चेत्यत्र बह्वन्तस्य प्रातिपदिकस्य ग्रहणात्तदन्तविधिर्न स्यादिति भावः । ननु प्रातिपदिकस्य विशेषरूपेण प्रकृतसूत्रे ग्रहणाभावाद् ग्रहणवतेत्यनेन तदन्तविधिप्रतिषेधकथनमयुक्तमेवेति चेन्न । ग्रहणवतेत्यस्य प्रातिपदिकत्वव्याप्यधर्मविशिष्टं यच्चोपादीयते तत्र तदन्तस्य ग्रहणन्नेत्यर्थस्य विवक्षितत्वात् । अस्ति च टित्वदप्रातिपदिकत्वव्याप्यधर्मविशिष्टबोधकमिति स्यादत्र निषेध इत्याशयात् । तथाहि । टिदिति न प्रत्ययग्रहणपरिभाषया तदन्तपरम् । टित्त्वस्य नदट् देवट् चोरडितिसमुदाये दर्शनेन तस्य प्रत्ययाप्रत्ययसाधारणतया प्रत्ययमात्रग्रहणाभावात् । न च टिद्योऽकारस्तदन्तादित्यर्थोस्त्विति वाच्यम् । नदी देवी चोरी

स्तनन्धयीतिरूपाणामसिद्धापत्तेः। एतेषु हि समुदायस्य टित्त्वन्न तु अकारस्येति। न चाधिकारप्राप्तप्रातिपदिकादित्यस्य टित्यदं विशेषणमिति येन विधिरित्यनेन तदन्तग्रहणमस्तु नदी देवीत्यादौ व्यपदेशिवद्भावेन सिद्धम् मुख्यव्यवहारस्य चिरन्तनीत्यत्र सत्त्वादिति वाच्यम्। स्तनन्धयीत्यस्यासिद्धापत्तेः। अत्र हि धातोष्टित्त्वन्न चैतत्तदन्तमतोऽवलक्षणया टित्यदम्परिभाषिकम् इष्टकारविषयताप्रयोज्या या प्रतिपादिकत्वसमानाधिकरणटिद्व्यवहारविषयता तदाश्रयपरम्। तत्त्वञ्च प्रवृत्तिनिमित्तम्। प्रयोज्यप्रयोजकभावस्वरूपसम्बन्धरूपः साक्षात्परम्परासाधारणः। साक्षादिष्टकारविषयताप्रयोज्यता टिद्व्यवहारे नदीत्यादौ। स्तनन्धयी चिरन्तनीत्यादिसमुदाये परम्परया। तदेतदुत्यादितङ्ङियटग्रन्थसंवादेन टिढाणञित्यत्रेत्यादिना। एवञ्चेष्टकारविषयताप्रयोज्यप्रातिपदिकत्वसामानाधिकरण्यविशिष्टविषयताश्रयत्वम्प्रातिपदिकत्वव्याप्यो धर्मस्तद्विशिष्टबोधकस्य टित्यदस्य सूत्रे उपादानाद् गृह्यमाणप्रातिपदिकविषयतासत्त्वात्तदन्तविधिनिषेधाद्बहुकुरुचरेत्यत्र न प्राप्नोतीत्यनुपसर्जनाधिकारज्ञापकता सङ्गच्छते। कुरुचरेत्यत्र तु टित्त्वादेव ङीप्। तदुक्तम्भाष्ये। कुरुचरशब्दात्प्रत्ययो विधीयते तत्र कः प्रसङ्गो यद्बहुकुरुचरशब्दात्स्यादिति। पूर्वोक्तभाष्ये यदुक्तम्पूर्वत्र तदन्ताप्रतिषेधस्येति तदनुपसर्जनादिति तदन्तविध्यभावसिद्ध्यर्थानुवाद इत्याशयेन। अपरे तु गृह्यमाणप्रातिपदिकविषय इत्यस्य यदानुपूर्व्यवच्छिन्नस्य प्रातिपदिकसंज्ञा तदानुपूर्वीरूपेण यत्रोपादानन्तत्रेत्यर्थः। एवञ्च टिढ्ढेति सूत्रे तादृशरूपेणोपादानाभावान्न तदन्तविधिनिषेधप्राप्तिरिति नानुपसर्जनादित्यस्य टिढ्ढेति सूत्रे फलम्। किन्तु कौरव्यमाण्डूकाभ्याञ्चेत्यादिसूत्रेण विधीयमानः स्त्रीप्रत्ययः प्रियकौरव्या प्रियमाण्डूकेत्यादावुपसर्जने न भवतीति बोध्यम्। प्रियकुरुचरेत्यादिभाष्यन्तूपलक्षणमित्याहुः। तत्फलमिति। तदन्तविधिफलमित्यर्थः। अन्यथा तदन्तविध्यभावे। इत्यापद्येत। इत्यप्यापद्येत। प्रत्ययग्रहणपरिभाषया कुम्भकारशब्दस्यानणन्तत्वे नावयवात्कारशब्दात्स्त्रीप्रत्ययेऽवयवात्कारीशब्दाट्टाक तान्नरूपिताङ्गत्वस्य विशिष्टेऽभावेन ककारोकारस्य द्वित्वं न स्यात्। ङीपि। अवयवाण्डोपि। कुम्भविशिष्टस्य। कुम्भकारीशब्दार्थस्य। तदेतदुपपादयति। कदा-

चिदिति । एतेन यदा समुदायादुत्पत्तिस्तदा कौम्भकारेयसिद्धिः सूचिता । निष्कृष्य । अर्थद्वारकशब्दान्तरसम्बन्धाभावं समाद्य । एकार्थीभावः । विवक्षाविषयेण सहैकार्थीभावः । ननु क्रुदग्रहणपरिभाषया बहुकुरुचरेत्यादौ समुदायाद्यप्रोतीत्यत आह । क्रुदग्रहणपरिभाषेति । ननु कुम्भकारेयनिवृत्त्यर्थश्चेत्तदन्तविधिः स्वीक्रियते तदा ज्ञापितेपि तस्य दुर्वारतया ज्ञापनमयुक्तमित्याशयेन शङ्कते । न चेति । व्यपदेशिवद्भावेनेति । लौकिकेनेत्यर्थः । लोके यथा प्रधानीभूतो राजामात्यो राजानमिति गुणीभूतोऽपि राजेति व्यपदिश्यते लोकैस्तथा समुदायार्थमिति गुणीभूतोऽप्युत्तरपदार्थः पूर्वपदार्थनिरूपितप्राधान्यविशिष्ट इति तदर्थप्रतिपादकस्य तदन्तत्वव्यवहारो भविष्यतीत्यभिमानः । परोक्तमर्थमदूषणमभ्युपेत्य समाधत्ते । एतदर्थीति । असहाय एवेति । लौकिकोपि व्यपदेशिवद्भावोऽसहाये एवेष्यते न तु ससहाये । बहुषु पुत्रेषु सत्सु नैकस्मिन्नयमेव जेष्ठो मध्यमः कनीयानिति व्यवहारः किन्त्वेकस्यैव सत्वे तस्मिन्नयमेव मे ज्येष्ठो मध्यमः कनीयानिति व्यवहारः । अस्मिन्नेवार्थेऽयमधिकारोऽपि ज्ञापक इति भावः । भाष्येऽपि व्यपदेशिवदेकस्मिन् कार्यमवतीति वक्तव्यमित्युक्तम् । सिद्धान्तानुसारेणाह । अर्थवत्सूत्रेति । इदमेतत्संज्ञाफलभूतेत्यस्य यथाश्रुतार्थानुसारेण । एतत्संज्ञाफलभूतविभक्तिभिन्नस्योपपदस्यापेक्षासत्त्वेऽपि न पूर्वोक्तरीत्यानुपपत्तिरित्यत आह । तदादिनियमाभावेनेति । न तु न्यूनेति । अयमाशयः । यथा प्रत्ययग्रहणपरिभाषयाऽधिकस्य प्रत्ययान्तत्वं व्यावर्त्यते न तु न्यूनस्य । अत एव इयानित्यादौ तद्धितान्तत्वनिबन्धनप्रातिपदिकत्वसिद्धिस्तथा प्रत्ययग्रहणपरिभाषापवादभूतस्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषयापि प्रत्ययग्रहणपरिभाषाव्यावर्त्यस्याधिकस्य स्त्रीप्रत्ययान्तत्वमबोध्यते न तु न्यूनस्य स्त्रीप्रत्ययान्तत्वं बोध्यत इत्यर्थः । किञ्च न तु न्यूनस्येति यदुक्तन्तच्चैतदधिकारस्यापि ज्ञापकत्वमबोध्यम् । अन्यथा । उक्तप्रकारत्वानङ्गीकारे । अवयवस्य । कुम्भकारेत्यत्र कारेत्यस्य । यत्तु, तदुक्तन्निष्कृष्यैकार्थीभाव एव वृत्तिनिमित्तमित्युक्तमिति तमेवार्थन्द्रढीकर्त्तुमाह । येनविधिरितीति । उक्तन्यायादिति । प्रत्ययग्रहणे यस्मादिति न्यायादित्यर्थः । अत्रत्यभाष्येऽनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकतोक्ता सर्वादिसूत्रभाष्ये तु

प्रत्याख्यायत इत्युक्तमिति विरोधशङ्कानिवारणायाह । यत्तु सर्वादीति । वार्त्तिककृतेति । इत्थं हि वार्त्तिकग्रन्थः अनुपसर्जनग्रहणमनर्थकम् । प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । आपिशलमधीते आपिशला ब्राह्मणीत्यत्र तदर्थमपि न स्त्रियां योण् विहित इत्येवं रीत्या गृह्यमाणविशेषणम् स्त्रीत्वम् । पूर्वत्र तदन्तस्य ग्रहणं यथा स्यादित्यर्थमपि न । अमहत्पूर्वग्रहणेन तत्र तस्य ज्ञापनादिति । कुम्भकारीत्यादौ तु कारशब्दादेव ङीप । ढक्तु स्त्रीप्रत्यये तदादिनियमाभावात्समुदायादेव । नावयवादनभिधानादिति तदाशयः । वस्तुतस्तु सर्वादिसूत्रस्था प्रत्याख्यायत इत्युक्तिरत्यवार्त्तिकम्प्रथममभिप्रेत्य अत एव भाष्यकृता अत उत्तरम्पठतीत्यनेन तस्य वार्त्तिकत्वसिद्धान्तत्वं सूचितम् । उत्तरवाक्ये तु आचार्यदेशीयस्य । पूर्वत्र तदन्ताप्रतिषेधेप्युत्तरत्र चारितार्थ्यानुपपादनात् । संज्ञोपसर्जनप्रतिषेध इत्यस्य प्रत्याख्यानाय हि तत्रेदं सूत्रमन्यथा व्याख्यातम् । संज्ञोपसर्जनव्याहृत्तिरिन्यथा तत्र साधितेति तदर्थमपि नेति प्रकृतसूत्रस्थवार्त्तिकतात्पर्यम् । इदन्तर्हि प्रयोजनमित्यारभ्य सिद्धान्युक्तिर्वार्त्तिकप्रत्याख्यानाभिप्रायेणेति विभावनीयम् । यथाश्रुतार्थे पञ्चाश्चेत्यस्य वारणासम्भवादाह । प्रत्यासत्त्येति । प्रत्ययलक्षणेन ठगन्तत्वेपि वर्णाश्रये प्रत्ययलक्षणाभावान्न तदवयवादन्तत्वम् । ननु स्थानिवद्भावेन शार्ङ्गीयस्यैवातिदेशो भविष्यतीत्यत आह । न ङ्यपीतिलिङ्गादित्यादि । ननु वैयर्थ्ये सति ज्ञापकत्वन्तदेव तु नेत्याशयेन शङ्कते । न चेति । द्वड्डिरिति । उतो द्वड्डिरितिसूत्रविहितेत्यर्थः । विमिगमनादिरित्यादि । ङित्त्वेत्यस्य चारितार्थ्यं वाच्यन्तदुक्तार्थज्ञापकतया वानिग्लक्षणद्वड्डिनिषेधार्थत्वेन वा सम्भवति । एकत्रैव तु साधकन्नास्तीति भावः । शङ्कोक्तन्न ङ्यपीति सूत्रप्रयोजनमन्यथा सिद्धमपीत्याह । उत औदिति वक्तव्य इति । नन्वेवम् । लाश्रयानुबन्धकार्यस्यैवाभावकल्पने । अव्यवस्थां वारयति । लक्ष्यानुरोधेनेति । हलः श्नइतिसूत्रभाष्ये श्नानजादेशस्य शकारो ङित्त्वार्थः । तेन कुषाण पुषाणेति सिद्धम् । एतच्च स्थानिवद्भावेन सिद्धमित्युक्त्वा सार्वधातुकादेशेऽनुबन्धास्थानिवत्त्वे तज्ज्ञापकमित्युक्तम् । तत्प्रयोजनं हेरपित्त्वन्न प्रतिषेध्यमिति । तथा तातङि ङकारो नोच्चार्य इति च । यद्येतज्ज्ञाप्यतेऽचिनवमसुनवमकरवमित्यचादेशस्य स्थानिवद्भावेन पित्त्वन्न स्यात् तथा सति ङित्त्वाद्गुणो न स्या-

दिति दूषणमभिधाय तस्मान्नार्थोऽनेन ज्ञापकेन । यानि प्रयोजनानि क्रियन्ते न्यास एव । एवमपि भवेत्पित्करणसामर्थ्यात्पित्कृतं स्यात् ङित्करणसामर्थ्यान् ङित्कृतमपि प्राप्नोतीति शङ्कितम् । एवमपि ब्रूतादित्यत्र स्थानिवद्भावेन पित्त्वादनुदात्तत्वम् । ब्रुव ईडतीडागमश्च । यत्तु खलु पिति ङित्कृतम्प्राप्नोति ङिति च पित्कृतं केन तन्न स्यात् । तस्माद्वक्तव्यम्पिन्न ङिद्भवति ङिच्च पिन्न भवतीति । न वक्तव्यम् । एवं वक्ष्यामि सार्वधातुकं ङिद्भवति पिन्न । एवन्तावत्पितो ङित्त्वंम्प्रतिषिद्धम् । ततो ङिच्च पिन्न भवतीति । एवं ङितः पित्त्वम्प्रतिषिद्धम् । तेन तातङः स्थानिवद्भावप्राप्तम्पित्त्वम्प्रतिषिद्धमितिरीत्योक्तन्तदनुसारेणाह । परे खिति । वक्ष्यमाणेत्यादौ तु गतिमाह । तस्मादिति । ननु यासुटो ङित्त्वस्य-ङिदादेशानाङ्ङित्त्वाभावे ज्ञापकतोक्ता सा न संगच्छेत तिस्रिष्वप्सु चारितार्थ्यादत आह । यत्खिति । ननु शानचः शित्त्वस्य प्रत्याख्यानमयुक्तम । गाङ् लिटीति सूत्रे गाङो ङित्त्वं सानुबन्धकादेशेऽनुबन्धास्थानिवत्त्वे ज्ञापकमिति गाङ् लिटीतिसूत्रभाष्यविरोधादत आह । यदपीति । ननु निरनुबन्धकस्य शिलाया ढः सभाया यः ढम्छन्दसीत्यस्य पुरस्फूर्त्तिकत्वात्सानुबन्धकङ्गिमित्युदाहृतमत आह । निरनुबन्धकस्येति । पूर्वोक्तयोः स्वभावतो नपुंसकात्वपुंस्त्वयोः सत्त्वादिति भावः । स्पष्टञ्चेदमिति । ननु चायमस्ति । शिलाया ढ इति । नैष स्त्रियां वर्त्तते । अत्र कैयटः । शिलेव शिलेयमिति नपुंसकलिङ्ग एव शिलेयशब्दः स्वभावात् । अयन्तर्हि सभाया यः ढम्छन्दसीति । एषोऽपि न स्त्रियां वर्त्तते । कथं स्त्री नाम सभायां साध्वी स्यात् । यन्नसभायां विदुषामिव पुरुषाणां साधुत्वाधिकारात् । ननु सभायां साधुरियं ब्राह्मणपंक्तिः परिषदेति सम्भवति स्त्रिया साधुत्वम् । एतेन छन्दसि समेयशब्दस्यैवंविधायां स्त्रियाम्प्रयोगाभाव इति विज्ञायते । एतेन स्वभावतः पुंस्त्वन्निदर्शितम् । अत एवेति । अयचः प्रत्ययान्तरत्वादेव । अनुबन्धद्वयोपादानमिति । अस्य प्रकृतसूत्र इति शेषः । वरजत्याहुर्त्तरिति । अत एव तमीश्वरा साधु चचार सादरेति सिद्धम् स्थेशभासेति वरच् ईश्वरीति तु पुंयोगे सिद्धम् । ईशधातोर्वनिपि वनो र चेति वाऽत्यर्थ इति । यद्यप्यत्र छचादिभ्यो ण इति णस्तथापि ताच्छीलिके णेऽपीति परिभाषया ङीष् । वयस्यचरम इति । प्रथमवयोवाचित्वाभावाद्वयसि प्रथम

इति यथाश्रुतसूत्रेण तु न सेसिद्धिः। पुनरत्र ग्रहणम्। वार्त्तिके ग्रहणमित्यर्थः। तयोः ङीबन्तङीषन्तयोः। यत्तु तरुणतलुनयोर्वार्त्तिके ग्रहणङ्गौरादिपाठोप्यनयोर्मास्तु किं तु बह्वादौ पाठोऽनयोः कार्यस्तेन बह्वादिभ्यश्चेति पक्षे ङीष्। तदभावे वयस्यचरम इति ङीप्भविष्यतीति स्वरस्यापि सिद्धिरिति। तन्न। नञ्स्नञीति प्रतीकमुपादाय तरुणतलुनशब्दयोरवयोर्थङ्ग्रहणम्। तरुणी सुरेति। प्राणिधर्मो हि वय इति कैयटेन समाधानस्य सूचनात्। वार्त्तिकेऽवयसि टाबन्तप्रयोगनिवृत्त्यर्थमनयोरुपादानमावश्यकम्। न चैतावतान्तोदात्तस्य सिद्धिस्तदर्थं गौरादिषु बह्वादिषु वा पाठ इत्यत्र फलतो न विशेषः। ननु यञोऽपि टिड्ढेतिसूत्र एवोपादानङ्कृतो न ज्ञतमत आह। प्राचां ष्फ इत्यत्रेति। नन्वनपत्याधिकाराच्छिद्याऽनपत्याधिकारस्यादित्यनुपपन्नमत आह। अपत्याधिकारस्थभिन्नादिति। व्याख्यानादिति। आपत्यग्रहणङ्कर्त्तव्यमितिवार्त्तिकमूलाद्व्याख्यानादित्यर्थः। नन्वापत्यग्रहणमितिवार्त्तिकस्यापत्ये भव इत्ये वार्थः कर्त्तव्यः स चार्थो ह्रैप्येऽपि सम्भवति। या ह्रीपे भवा सा कस्य चिदपत्यभवत्वे वेति चेन्न। एतद्वार्त्तिकप्रत्याख्यानैकवाक्यतया प्रतिपदोक्तपरिभाषयाऽपत्यशब्दस्यापत्याधिकारपरतयापत्यशब्दस्य तदधिकारभवपरत्वात्। तथाहि। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैवं विज्ञायते कञ्क्रारपः यञश्चेति। कथन्तर्हि कञ्क्रारपोऽयञश्चेति। अयमयञ्प्रत्ययो गर्गादिभ्यो विधीयते तत्राकारोऽनुनासिक इत्संज्ञक इह विशेषणार्थ इति यञो ग्रहणाभावाद् ह्रैप्ये नातिप्रसङ्गः। यस्कादिभ्यो गोत्रे यञञोश्चेत्यत्राप्यकारप्रश्लेषः। न च विच्छिद्य पाठेऽनुकरणे प्रकृतसूत्रघटकेऽकारश्रवणापत्तिरिति वाच्यम्। आर्षः संहितापाठ एव। व्याख्यातृकल्पितः पृथक् पाठः। अनुकरणादुपस्थिते स्विल्संज्ञयाऽकारनिवृत्तिः। एतेन। यञोऽकार इति व्याख्यानेन। उदीचामिति सावकाशमिति। एतेन शार्ङ्गरवादौ वतण्डपाठवैयर्थ्यशङ्का परिहृता॥ ननु यञोयोऽकार इत्येवं व्याख्यानाभावे वतण्डीत्यत्र ष्फप्रत्यस्य ङीना परत्वाद्बाध एव स्यात् ङीनश्चारितार्थस्याधुनैव दर्शितत्वादत आह सर्वत्र ग्रहणादिति। सर्वत्र ग्रहणापकर्षणादित्यर्थः। अत्रेदमवधेयम्। प्रकृतसूत्रे तद्धितग्रहणस्य फलन्न प्रातिपदिकसंज्ञाद्वारा ङीप्सिद्धिः षित्त्वादेव सिद्धेः। नापि यस्येति चेति लोपः। सवर्णदीर्घेण सिद्धेः। किन्त्वन्यतो-

ऽप्ययमितिज्ञापनद्वारा यस्येति चेति लोपार्थन्तेनासुरिग्रहणादपीति । वस्तुतस्त्वेतदपि न । ष्फडितिन्यासेन सिद्धेः । यत्तु, गौकक्ष्यशब्दाद्गर्गादित्वाद्यञि ततः क्रौड्यादित्वेन ष्यङि चापि प्रकृतसूत्रेण ष्फप्रत्यये चिकीर्षिते भस्याढ इति पुंवद्भावे गौकक्ष्यशब्दाद्यञन्तात्ष्फे गौकक्ष्यायणी सिध्यति । तद्धितसंज्ञाभावे तु पुंवद्भावाप्राप्त्या यञन्तत्वाभावेन ष्फो न स्यादिति तदपि न । क्रौड्यादिषु गौकक्ष्याशब्दस्य पाठाभावेपि क्षत्यभावात् । चामु, षाद्यञश्चाब् वक्तव्य इत्येव सिद्ध उदीचामते प्राचामते तु चापो बाधस्यापि विषये सर्वत्रग्रहणापकर्षात् ष्फः । तेन गौकक्ष्यायणीत्यस्य सिद्धिरिति । एतदपकर्षे बीजन्तु तत्सूत्रव्याख्यानावसरे स्फुटीभविष्यति । ननूपदेशग्रहणानुवृत्त्या षोडशशब्दे नातिप्रसङ्ग इत्यत आह । षष उत्वमित्यत्रेति । इदं प्राचामनुरोधेन । स्वसिद्धान्तरीत्याह । वस्तुत इति । ननु प्रत्ययान्तस्य षकारस्येत्संज्ञा हलन्त्यमितिसूत्रेणेष्टैवेति किमत्रादिग्रहणानुवृत्त्या । न चेष्टनोऽवयवस्य मध्यस्थस्यापि स्यादिति वाच्यम् । तस्य न स्वाभाविकत्वम् किन्तु तस्य सकारमध्यगत्वमेव कल्पाते । तस्य सकोरस्यादेशप्रत्ययययोरिति सूत्रेण षकार इति स्वीक्रियते। षत्वस्य च षः प्रत्ययस्येति सूत्रदृष्ट्याऽसिद्धत्वान्नेत्वप्राप्तिरित्याशयादाह । आदिरितीति । उपरञ्जकतयेति । यद्यपि मध्यान्तस्थषकारयोरुक्तरीत्या नानेन सूत्रेणेत्संज्ञेति परिशेषादादेरेव भविष्यति । तथापि परिशेषात्तादृशार्थकल्पनापेक्षया आदिग्रहणसम्बन्धस्य स्वरूपानुवादकस्य स्वीकारेणैवेष्टसिद्धिरित्याशयः । अविषी महिषीत्यादौ तु टित्त्वादेव सिद्धम् । टिषप्रत्ययस्य चित्त्वेनाविषमहिषशब्दयोरन्तोदात्ततयोदात्तनिवृत्तिस्वरेणान्तोदात्तत्वमपि भविष्यति । प्रत्ययग्रहणे कृतेऽपि खजादावतिप्रसङ्गं वारयति । खच्खजादाविति । द्यो तितेऽपीत्यर्थ इति । एतत्पक्षस्यैव सिद्धान्तित्वात् । घचश्चित्त्वसामर्थ्यादिति । अग्र्याद्यत् । घच्छौ चेतिसूत्रविहितो घच् । क्वचिदिति । द्वौ ब्राह्मणौ व्यतिलुनीत इत्यादौ । तदाश्रयणे । द्योतकसमुच्चयाश्रयणे । प्रकृतसूत्रे नित्यत्वार्थकं सर्वत्रग्रहणञ्च कार्यमित्याह । प्राचामित्यस्येति । सर्वत्रग्रहणापकर्षे सति यत्फलितन्तदाह । तद्बाधकत्वमेवेति । ङीब्बाधकत्वमेव । इदम्परिशेषसिद्धार्थकथनम् । एतेन चाप उभयबाधकत्वं स्यादनन्तरस्येतिन्यायाश्रयणे तु

ष्फस्यैव बाधकत्वात् स्यादितिशङ्काया नावकाशः । ननु चापि कृतेऽप्येकादेशस्य पूर्वान्तत्वेन ष्फप्राप्त्या सर्वचग्रहणं व्यर्थमेवेत्यत आह । चापि कृते त्विति । एतत्सूत्रे सर्वचशब्दोपादानन्तु वैचित्र्याय । ष्फाणाविति । तथा च शाकल्यायनी शाकल्यस्य छात्राः शाकला इत्येवन्न स्यात् । षष्ठीतत्पुरुष इति । कतस्यान्तः कतन्तः । कखस्यादिः कखादिरिति । अन्तशब्दः परसमीपस्यादिशब्दश्च पूर्वसमीपस्य वाचकः । बहुव्रीहिश्च तद्गुणसंविज्ञानः । एकशेषेण । स्वरभिन्नानामितिवचनेन बहुव्रीहेः शेषेण । जातित्वादिति । एतेन कौरव्यसाहचर्यान्माण्डूकशब्दोऽपत्यप्रत्ययान्त एवैतत्सूत्रे गृह्यते । तेन माण्डूकस्येयमार्येत्यर्थे तस्येदमित्यणन्तस्य माण्डूकशब्दस्य सत्त्वेऽपि न ग्रहणन्तेन यद्यसौ कूपमाण्डूकि तवैतावतिकः स्वय इति सिद्धमिति । ध्वनितम् ॥ नायन्तद्वाचक इति । वयोरूपप्रत्तिनिमित्तवाचकः । तत्र हेतुमाह । यापि व्याध्यादीति ॥ त्रीणि वयांसीति । तदुक्तमभियुक्तैः । पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रास्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हतीति । चत्वारि वेति । तदप्युक्तम् । आद्ये वयसि नाधीतन्द्वितीये नार्जितन्धनम् । तृतीये न तपस्तप्तञ्चतुर्थे किङ्करिष्यतीति । उभयथापि यौवनवचनस्य वधूटचिरण्टशब्दस्य प्रथमवयोवाचित्वाभावाद्वार्त्तिकमावश्यकम् । यत्र तु युवत्वाङ् कुमारीधर्मोपलभ्भेन प्रयोगस्तत्र तु कुमारीशब्दस्य लक्षणा । तत्र पुंसोसम्प्रयोगः प्रवृत्तिनिमित्तं न तु प्रथमं वयः । अत एव वृद्धकुमारीति न मु न इतिसूत्रभाष्ये प्रयोगस्योऽपि सिद्ध्यति । सर्वत इति । आरोहतः परिणाहतश्च येन मीयते काष्ठादिनिर्मितेन प्रस्थादिना तदेव गृह्यते । तत्रैव शक्तिग्रहात् । नन्वेवं विस्तकस्वल्ययोरपरिमाणत्वादेव निषेधे सिद्धे सूत्रे पृथक् तयोरुपादानं व्यर्थमत आह । सुवर्णेत्यादि । उन्मानस्य चेदिति । अपरिमाणपदेन ग्रहणमिति शेषः । द्विनिष्कीति । अस्य निष्कस्योन्मानत्वेऽपि नात्र निषेधः । उन्मानभिन्नस्य तु पारिभाषिकपरिमाणभिन्नत्वोन्निषेधो भवत्येव तदाह । द्वे वर्षे भूतेत्यादि । नन्वेवङ्काण्डस्याप्यपरिमाणत्वादनेनैव निषेधे सिद्धे काण्डान्तादिति निषेधसूत्रमनर्थकमत आह । काण्डान्तादिति त्विति ॥ अत्र भाष्ये द्वौ प्रतिषेधावुच्येते तत्रैकः शक्योऽवक्तुम् । परिमाणान्तद्वितलुकि । इद-

नियमार्थमविष्यति परिमाणान्तादेव तद्धितलुकि । न च समाहारे व्याहृत्यर्थ-म्परिमाणान्तात्तद्धितलुक्येवेति नियमः कुतो नेति वाच्यम् । लक्षणस्य लक्ष्यानु-सारित्वात् तेन समाहारे द्व्याढकीति भवतीति कैयटः ततो विस्ताचितकम्बलेभ्यो नेति । तद्धितलुकीति वर्त्तते पूर्वनियमेन सिद्धे इदमपि नियमार्थम् । उन्मानवा-चकाच्चेत्र तर्ह्येतेभ्य एवेति । एवम्प्रकारेणैकस्य नञोऽनुपादानेन यद्यपि सिद्ध-ति तथापि योगविभागनियमयोर्विपरीतनियमशङ्कायाञ्च वारणस्य क्लेशेन लाघवेन वा करणे प्रयासाधिक्यमिति मूले तथा नोक्तम् ॥ केचित्तु अपरिमाणवि-स्ताचितकम्बलेभ्यो न तद्धिते इत्येव सूत्रमस्तु लुग्ग्रहणन्न स्तु । द्विगोरित्यनुव-र्त्तते । तद्धितपदस्य तद्धितार्थपरतया तद्धितार्थे योऽपरिमाणान्तो द्विगुस्तस्मान्न ङीबित्यर्थोऽस्तु । तेन समाहारे पञ्चाश्वीत्यादिद्विगौ निषेधो न भविष्यतीत्या-हुः । तन्न । अपरिमाणाद्यन्ताद्विगोर्यस्तद्धितस्तदन्तान्ङीप्र स्यादित्यर्थोपि लभ्यते ततश्चाध्यर्द्धकार्षापणिकी अध्यर्द्धसाहस्री वड़वेत्यत्रापि निषे-धः प्रसज्येत । अत्र हि विभाषा कार्षापणेतिविकल्पेन लुग्विधानम् । यत्र तु तद्धितस्य लुक्नास्ति प्रत्ययलक्षणेन भविष्यतीति लुग्ग्रहणस्यावश्यकत्वात् ॥ पूर्वकालस्थितरूपरसादिपराहृत्तिलक्षणस्य पाकस्य द्वौ विस्रौ पचतीत्यत्रास-म्भवः सुवर्णे तादृशपाकासम्भवादाह । पचेर्द्वीभावेति । अन्यमतमाह । आ-चित इति । स्वमतमाह । आचितो दशेति । अत एव । प्रमाणशब्दस्य परिच्छे-दकमात्रपरत्वादेव । तत्र हीति । तदस्य परिमाणमिति सूत्रे हीत्यर्थः । उत्तरसू-त्रेति । संख्यायाः संज्ञासंघेतिसूत्रेत्यर्थः । अत एव षष्टिजीवितम्प्रमाणम-स्येत्यर्थे षाष्टिक इति सिद्धम् । ऊधस इति सूत्रस्य समासान्तप्रकरणस्थत्वेऽप्य-नङो न प्रत्ययत्वम् । ङकारोच्चारणसामर्थ्यात् । किन्त्वादेशत्वम् । स्थानिद्वारे-ण चायं समासान्तः । अत एव कम्न । तत्र । अनङ्वधौ । स्त्रियामित्युपेति । ऊधसो नकारो लिङ्गाधिकार इति हि तत्रत्यं वार्त्तिकम् । ननु बहुव्रीहेरूधस इति सूत्रमध्येऽपवादन्यायेन ङाप्निषेधयोरेव बाधकं स्यान्न तु अन उपधा-लोपिन इतिसूत्रविहितस्य ङीपस्तस्य परत्वादत आह । अन उपधेति । इत्यत्रे-ति । वाक्यभेदेन तत्र ङीष्विधानमित्यपि ज्ञेयम् । एतेन । तत्रानुवर्त्तनेन । ङीष्विधानं स्वरसिद्धयर्थं तेनाम्बोदात्तत्वं सिध्यति तदाह । ङीपि स्वितीति ।

यथाश्रुतमूलानुरोधेन कोशवाक्यस्यान्यथानयनमप्य नोचितमित्याशयेनाह। बालेत्यस्येति। लक्षणान्तरसिद्धमिति। अन उपधेतिलक्षणेन सिद्धमित्यर्थः। सत्त्वात्स्त्रीत्वमिति। स्वार्थिकाः प्रत्ययाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति न्यायात्। घृतादिपाठे साधकमाह। उतापरमित्यादि। प्राक्षुत्पत्तेरिति। स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपि बोध्यम्। तत्र। औषधे। रूढ इति शेषः। ननु सुमङ्गलीरियमित्यनुपपन्नमनेन सूत्रेण ङीपि हस्वङ्यादिलोपस्य दुर्वारत्वाद त आह। सुमङ्गलीरियमिति। ईप्रत्ययेति। छन्दसीवनिपौ च वक्तव्याविति वार्त्तिकेन विहिते ईप्रत्यये इत्यर्थः। नन्वप्राप्तस्य मतुपो निपातने शालायां वाच्यायामपि तादृशप्रयोगापत्तिरत आह। नुगिति। ननु यज्ञसंयोग इत्येतादृशाचेण पुंसो यज्ञसंयोग इत्यपि प्रतीयेतेत्यत आह। स्त्रिया इत्यर्थ इति। पतिशब्दो यद्यपि पुंलिङ्गस्तथापि स्ववाच्यकर्त्तृकयज्ञफलनिरूपितविलक्षणसम्बन्धः स्त्रियां यदा विवक्षितस्तदा पुंवाचकोऽपि तकारोत्तरेकारस्थानिकनकारघटितोऽयमेव स्वपूर्वत्वसंबन्धेन ङीप्विशिष्टः स्वभावात्तत्स्त्रियाम्प्रवर्त्तत इति भावः। अत्र यज्ञसंयोग इत्यनुपपन्नम्। यज्ञस्य क्रियारूपतया तत्र तियोगिकसंयोगाप्रसिद्धेरत आह। संयोगपदमिति। यज्ञेति यद्यत्कर्मणि दम्पत्योः सहाधिकारस्तस्य सर्वस्योपलक्षणम्। अवयववाचीति। न तु दिक्कालान्यतरावच्छिन्नवाची। तथात्वे स्वघटितप्रातिपदिकानवयवगतपूर्वत्वमादाय वाक्येऽतिप्रसङ्गः स्यात्। एवं सति विद्यमानः पूर्वावयवो यस्मिन्प्रातिपदिके तस्य प्रातिपदिकस्यावयवी यः पतिशब्दस्तस्य नकारादेश इत्यर्थः। व्यपदेशिवद्भावेन सम्भवस्मत्वाच्च। अव्यभिचारादिति। एवञ्चाधिकारप्राप्तस्य प्रातिपदिकस्य पत्युरिति विशेषणमिति तदन्तविधिः। ननु श्रुतानुमितयोरिति न्यायेन तस्य पतिशब्दविशेषणत्वमेवोचितमित्यत आह। सपूर्वस्येत्यनेनेति। एतच्च प्राचामनुरोधेन। वस्तुत इहार्थोप्यनुपसर्जनाधिकारस्तदाह। वहव इति। ननु विभाषा सपूर्वेतिसूत्रस्यापि यज्ञसंयोग एव प्रवृत्त्या बहुपत्नीति समस्तेऽपि शङ्कासत्त्वाद्यस्त एव किमिति शङ्केत्यत आह। विभाषा सपूर्वस्येत्यचेति। व्यस्ते कथमिति शङ्काया बीजमाह। बहुपत्नीत्वेनेति। उपचारो लक्षणा सा च स्त्रीप्रत्ययान्तस्य प्रकृतिसम्बन्धेन प्रवृत्तिर्ग्राह्यास्याम्। अन्यत्र लक्षणया प्रवृत्तौ न किञ्चिद्बाध-

कम्। लक्षणाया निमित्तमाह। पाणिग्रहणेति। गृह्यते यस्मिन्तद् ग्रहणम्। पाणेर्ग्रहणम्पाणिग्रहणमिति व्युत्पत्त्या पाणिग्रहणशब्दो विवाहपरः स्त्रीयविवाहवाचकपदप्रतिपाद्यविवाहसम्बन्धित्वमत्र शक्यसम्बन्ध इत्युक्तम्। दृढमानाभावादिति। प्रातिपदिकसामान्यादन्येभ्योऽपीत्यनेन धातुसामान्याच्च क्विपो विधानेऽपि भाष्ये कथं तुषजकस्य पत्नीति पूर्वपक्षङ्कृत्वा पत्नीव पत्नीतिसमाधानस्यैवोक्तत्वादिति भावः। नन्वेवम्पत्युर्नेतिसूत्रे यज्ञसंयोग इति व्यर्थमत आह। पूर्वसूत्र इति। वृषलस्य पतिरिति। अत्र पतिशब्दः स्वामिनीपरः। तेन चेति। निपातनेन चेत्यर्थः। अत एव। स्त्रीविशेषे रूढिस्त्रीकारादेव। ननु समानः पतिर्यस्या इत्यर्थोऽत्रानुपपन्नः। समानत्वस्य भेदघटिततया स्वस्मिन् स्वभेदासम्भवादाह। समानत्वञ्चैकस्यैवेति। भेदमारोप्येति। पत्नीगतस्य परस्परप्रतियोगिकभेदस्य तत्तत्सम्बन्धात्तत्तारोपः। व्याख्यानादिति। पूतक्रत्वादीनां पुंयोगप्रकरणे वचनमितिवार्त्तिकमूलकात्। अस्मिन्वार्त्तिके बहुवचनोपादानेन कपिञ्जलाधिकरणन्यायेन चित्वस्य पुरस्स्फूर्त्तिकतया तत्रैव पर्यवसानमिति भावः। तदभाव इति। तयोरभाव इत्यर्थः। सौत्र इति। स चात्र तकारे एव न तु दकारे इति स्पष्टं प्रतीयत इति शेषः। तदन्विति। वृत्तिकारादिव्याख्यानानुरोधेनेत्यर्थः। मूलादि दूषयन्स्वसिद्धान्तमाह। परे त्विति। अत्रापि। वर्णादनुदात्तादिति सूत्रेऽपि। तथैवोचितमिति। गृह्यमाणविशेषणत्वमेवोचितमित्यर्थः। तत्र साधकमाह। तत्र हीति। इति पक्ष इति। अस्मिन्पक्षे श्रस्त्रीश्यामा इवायमिति लौकिकविग्रहः। अस्मिन्पक्षे दूषणमुक्तं श्रस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वन्न सिध्यति। श्रस्त्रीव श्याम इति चेद्विग्रहस्तदा स्वतो ह्रस्वान्तस्यैव श्यामशब्दस्य प्रयोग इति तादृशप्रयोगनिर्वाहः सम्मति तु श्रस्त्रीश्यामा देवदत्त इति स्यादिति भावः। उपसर्जनस्येति ह्रस्वत्वमिति। समासवाच्यमुपमेयम्प्रधानं श्यामाशब्दार्थस्याप्रधानत्वादुपसर्जनत्वमिति तद्भावः। ईकारो न प्राप्नोतीति। अत्रापि कुम्भकपालं लोहितमिवेति विग्रहः कार्यस्तथा सत्युपसर्जनत्वाद्वर्णादनुदात्तादिति ईकारो न प्राप्नोतीत्यर्थः। चिषु स्थानेष्विति। सुप्सुपेतिसमासः। आर्षमत्र णत्वमिति। समानपदत्वाभावादट्कुप्वाङिति संज्ञात्वाभावात्पूर्वपदादित्यस्याप्राप्तिरिति भावः। श्वेतशब्दस्य घृतादिपाठे मानमाह।

श्वेतो वाजोति । क्षादेशस्यानेकाल्त्वात्सर्वादेशत्वमङ्गायामाह । नादेशापवाद इति । ङीप्सन्नियोगेति । ङीप्विधायकसूत्र एव भाष्ये पाठात् । तत्रवृत्तिनिमित्तकः । विशुद्धिप्रवृत्तिनिमित्तकः । न चैवमवदातः सितो गौर इति कोशानुपपत्तिः । विशुद्धत्वसाधर्म्यात्तत्राप्यवदातशब्दप्रवृत्तिसम्भवात् । वर्णादनुदात्तादितिसूत्रानन्तरमन्यत इत्यस्य पाठाद्विशेषभूतार्थवाचकस्य वर्णादित्यस्योपस्थितस्यान्यत्वे प्रतियोगितयाऽन्वये तित्तिरिकलमाषीति भाष्यप्रयोगानुपपत्तिरत आह । अन्यत्व इति । व्याख्यानादिति । उक्तप्रयोगदर्शनमूलकादित्यर्थः । आद्युदात्त इति । क्वन्प्रत्ययान्तत्वात् । अन्तोदात्त इति । प्रातिपदिकस्वरेणान्तोदात्त इत्यर्थः । स चेत्सूर्याद्यवयव इतिव्याख्यानफलमाह । सूर्यादीनामिति । सोऽसिद्ध इति । एवञ्च न सूर्यशब्दस्याङ्गत्वमिति भावः । उपधाग्रहणादेवेति । अन्यथा सूर्यादीनां ङीनिरूपिताङ्गानामवयवस्य य इत्यर्थे सूर्यचरीत्यत्रैव सौरी बलाकेत्यत्रासिद्धिस्यादिति भावः । ननूपधापदसत्त्वे सूर्यादीनामुपधाभूतो यकार एव सम्भवतीति यग्रहणव्यर्थमत आह । यग्रहणन्तूत्तरार्थमिति हलस्तद्धितस्येतिसूत्रार्थमित्यर्थः । तेन । नद्यत्रवाचकादिति व्याख्यानेन । नद्यत्रशब्दोच्चारणेनविहित इत्यर्थे तु सन्धिवेलेत्यादिसूत्रविहितस्यैव ग्रहणं स्यात्तथा चोक्तप्रयोगानुपपत्तिरिति भावः । इदमिति । पितृव्यमातुलेतिसूत्रविहितं वार्त्तिकमित्यर्थः । क्रियाशब्दोऽयमिति । क्रियाप्रवृत्तिनिमित्तक इत्यर्थः । कुडि दाहे इत्यस्येदित्त्वेन नुमि गुरुमत्त्वम् । अन्तर्भावितण्यर्थात्कर्त्तर्यकारप्रत्ययः । एतेनजातिवाचकत्वाभावो ध्वनितः । कुण्डशब्दस्य रूढत्वेऽप्याह । यदि लिति । अनेकविधसंस्थानेष्विति । एवञ्चानुगतसंस्थानव्यङ्ग्यत्वाभावान्न जातित्वमित्युक्तम्भवति । मतान्तरमाह । कमण्डलुसंस्थानेति । नियमार्थमेवेति । कुण्डशब्दाच्चेदमत्र एवेति नियमार्थम् । सूत्रन्त्वित्यस्यामत्रग्रहणन्त्वित्यर्थः । विधित्वानुरोधादिति । न तु जातिवाचकस्य नागशब्दस्यात्र सूत्र उपादानन्नियमार्थम् । विधिनियमसम्भवे विधिरेव ज्यायानिति न्यायात् । असङ्गतं स्यादिति । अस्य स्त्रीत्वमित्यादिः । इदमिति । प्रत्युदाहरणभूतस्य नीलेत्यस्य कथनोत्तरन्नीला रक्तेत्यर्थकथनमित्यर्थः । एवमभिधानेनोदाहरणे नीली इत्यत्रापि वार्त्तिकनिष्पन्नस्य प्रकृतित्वमिति प्रतीयते तत्र युक्तमित्याशयेनाह । प्रति-

पदोक्तत्वादिति नीलवर्णवती शाटीत्यर्थ इति। एवङ्कथनेन गुणगुणिनोरभेदोपचारो दर्शितः। ननु नील्या रक्तागौर्नीलीति वृत्तिकारमते जायमानस्य भवत्व तेऽसिद्धिरित्यत आह। नील्या रक्तेति। मैथुनादन्यदिति। भूषणादिकमित्यर्थः। वोत इति सूत्रे गुणशब्दो न क्लृप्तिमाक्लृप्तिमन्यायेनादेर्बोधक उत इत्यस्य विशेषणस्योपादानात्। नापि संसर्गिभेदकं यद्यत्सव्यापारं प्रतीयते। गुणत्वम्परतन्त्रत्वात्तस्य शास्त्रे उदाहृतमिति लक्षणलक्षितङ्गुणशब्दबोध्यम् विशेषणमात्रमप्रयमलक्षणेन संसर्गिभेदकमित्यनेनोच्यते। सव्यापारमिति द्वितीयं लक्षणन्त्वेतरव्यापाराधीनव्यापारकमित्यर्थः। आखुर्द्रव्यमित्यत्राखुशब्दस्य द्रव्यात्मकसंसर्गिभेदकतयाऽतिप्रसङ्गात्। क्रियायामतिप्रसङ्गाच्च। नापि नैयायिकपरिभाषाविषयः। मृद्वी पट्वीत्याद्यसिद्ध्यापत्तेरत आह। अत्र गुणवचनेति। इत्थं हि तत्र भाष्यम्। अर्थवत्प्रातिपदिकम्। गुणवचनञ्च। समासकृत्तद्धिताव्ययसर्वनामाऽसर्वलिङ्गा जातिरिति। गुणवचनञ्चेत्यत्रार्थवदित्यनुवर्त्तते। एवञ्च प्रातिपदिकसंज्ञागुणवचनसंज्ञयोरेकविषयत्वात्समावेशार्थञ्चकारस्य करणाच्चोभयोः समावेशः। कृत्तद्धितपदञ्च तदन्तपरम्। उभयत्र प्रातिपदिकमित्यनुवर्त्तते। एवञ्च प्रातिपदिकसंज्ञापूर्विका कृदन्तसंज्ञा तद्धितान्तसंज्ञेति एताभ्यामाप्रातिपदिकसंज्ञायाः समावेशः। प्रातिपदिकसंज्ञासामानाधिकरण्योपपत्तये कृत्तद्धितपदन्तदन्तपरत्वेन स्वीकृतम्। गुणवचनसंज्ञा त्वेताभ्यां बाध्यते। तेन कर्त्रीत्वन्द्वारवतीत्वमित्यत्र त्वतलोर्गुणवचनस्येति न पुंवत्त्वम्। न च गुणिपरशुक्लादीनां गुणवचनसंज्ञा तद्धितान्तत्वात्र प्राप्नोति मतुपोऽत्र लोपादिति वाच्यम्। श्रूयमाणतद्धितान्तस्य संज्ञाविधानात्। अथ वा गुणगुणिनोरभेदोपचारादेव गुणिनि शुक्लादिशब्दानामप्रवृत्तिसम्भवेन मतुप एवानुत्पत्तेः। रूपादिशब्दानान्तु न गुणवचनसंज्ञा। जातिसंज्ञया बाधात्। तेन तेभ्यः ष्यञ्। जातिसंज्ञा त्वसर्वलिङ्गत्वान्नवर्त्तते। एवमव्ययादिसंज्ञाभिरपि प्रातिपदिकग्रहणानुवृत्त्या समावेशः। न च प्रातिपदिकमात्रस्य गुणवचनसंज्ञा यदि तदा गुणवचनब्राह्मणादिभ्य इति सूत्रे ब्राह्मणादिग्रहणं व्यर्थमिति वाच्यम्। प्राणभृज्जातिलक्षणाण्बाधनार्थत्वात्। जातिसंज्ञया बाधाच्च। ऐक्यं राजपौरुष्यमित्यादौ ष्यञ् तु ब्राह्मणादित्वात्। एवंसंख्या। षट्। संज्ञा। एताः संज्ञा-

अपि बाधिकाः । एकद्रव्योपनिवेशिनी संज्ञा । रूपादिशब्दानाङ्गुणवचनसंज्ञां प्रकारान्तरेण वारयति । गुणवचनेत्यन्वर्थेति । बहुविशेषणानां वैयर्थ्यादिति । सत्त्वद्रव्यन्तमाश्रयते तत एव पाकादिना पूर्वगुणस्य निवृत्तिरपि भवति । विभिन्नजातीयेषु घटपटादिषु दृश्यते । एतेन जातिनिरासः । द्रव्यत्वं विभिन्नजातीयेषु जलपृथिव्यादिषु यद्यपि दृश्यते तथापि कदापि नापैति । असत्त्वप्रकृतिरिति । अद्रव्यस्वभावः । तेन भिन्नजातीयतन्त्वारब्धस्यासमवायिकारणनाशजन्यनाशप्रतियोगिनः पटस्य निरासः । क्रियाधारणायाह । आधेय इति । आधीयते उत्पाद्यते इत्यर्थः । एतेनानित्यत्वस्य लाभेऽक्रियाज इत्यनेन नित्यत्वस्य च लाभे नित्यानित्यवृत्तिजातिमानिति फलितम् । न चैवमपि तादृशसत्ताजातिमत्त्वस्य क्रियायां सत्त्वादतिव्याप्तिरेवेति वाच्यम् । द्रव्यावृत्तित्वस्यापि जातिविशेषणत्वात् । एतेनैव सर्वगुणसङ्ग्रहे सत्त्वे निविशते इत्यादि व्यर्थमिति भावः । किदिनिति । न चाच क्तादन्तसंज्ञया गुणवचनसंज्ञाया बाधादेव नातिप्रसङ्ग इति वाच्यम् । उणाद्यन्तानामव्युत्पन्नत्वस्यैव सिद्धान्तित्वात् । नन्वत इत्यस्य संबन्धादेव शुचिरित्यत्र नातिप्रसङ्ग इति वाच्यम् । तस्याचासम्बन्धात्तदाह । खरुसंयोगोपधान्नेति । अभिमान इति । अत्रारुचिस्तूणादीनां व्युत्पन्नत्वस्यापि तन्मते सत्त्वेन वक्ष्यमाणस्य वृत्तिकारसम्मतस्य व्यवस्थितविभाषात्वस्य सत्त्वेन च तेनैवदोषनिरासे उत इति न कार्यमिति । प्रत्युदाहरणमुचितमिति । न चाचापि संयोगोपधत्वात् संयोगोपधान्नेतिनिषेधो भविष्यतीति कथमेतत्प्रत्युदाहरणमिति वाच्यम् । खरुशब्दसाहचर्येण संयोगोपधस्याण्युकारान्तस्यैव ग्रहणमत एव पाण्डुरित्युदाहृत मित्याशयात् । नचात इत्यस्य सम्बन्धेन खरुसंयोगोपधान्नेति न कार्यमिति वाच्यम् । पट्वीत्यादीनामसिद्ध्यापत्तेः । विकलवाचीति । विकला ङ्याप्यस्यास्तस्यामित्यर्थः । उक्तरीत्या गुणवचनत्वाभावेनेति । संख्यासंज्ञया गुणवचनसंज्ञाया बाधेन । सर्वत इत्यस्यार्थमाह । अक्तोऽपि । अपिना क्तः । शोणात्प्राचामितिसूत्रात्प्राचामित्यनुवृत्त्यैव सिद्धे वोत इतिसूत्रे वाशब्दोपादानं व्यवस्थितविभाषात्वसूचनाय तदाह । व्यवस्थितेति । वृत्तिरिति । देवक्षत्रादित्यादिना तस्याः परिगणनाद्देवक्षत्रादिष्वस्यापाठादिति व्यवस्थितविभाषात्वन्न युक्तमि-

त्यरुचिः। तदुक्तप्रयोगसिद्धिस्तु लिङ्गस्य लोकाश्रयत्वात्तत्रार्थस्य शास्त्रीयलिङ्गाभावकल्पनेन। वाग्रहणन्तु सर्वमते विकल्पार्थम्। ङीप्ङीषोरिति। अयं हि व्युत्पन्नः पुराणप्रोक्तेति निपातानानुडभावः। एवञ्च टित्वान् ङीप् प्राप्तः। सामर्थ्यादिति। केवलस्य स्त्रियां वृत्त्यसम्भवात्तस्मादुपसर्जन एव प्रवृत्तिः। पुंयोगादिति सूत्रे परपञ्चमी न सम्भवतीत्यत आह। हेतौ पञ्चमीति। एवं सति कस्मादनेन प्रत्ययविधानमित्याकाङ्क्षापूरणायाह। आख्यायामितीति। आख्याशब्दस्य ससम्बन्धिकत्वादाह। उपस्थितत्वादिति। एवञ्च यादृशो वाक्यार्थः सम्पन्नस्तमाह। पुंयोगाद्वेतोरिति। सर्वं वाक्यमसति बाधके सावधारणमिति न्यायेनैवकारलाभः। विनापि प्रत्ययमितिवचनेन संज्ञाशब्दलोपेऽसति योगशब्दस्य संयोगपरत्वभ्रमनिरासायाह। योगः संबन्ध इति। देवदत्तेति। क्तिच्क्तौ चेतिसूत्रनिष्पन्नोऽयं स्वभावतः स्त्रियां वर्त्तते न तु पुंयोगस्तत्र निमित्तमिति भावः। आख्यायां किमिति। एतदभावेऽपि प्रातिपदिकादित्यधिकृतं संबध्यत एव। एवं सति निष्पन्नं वाक्यार्थमाह। तदभावे हीति। प्राचाम्नतं कटाच्चयति। पुंयोगोऽत्रेति। एतेन जन्यजनकभावनिरासः। तथा सति देवकीत्यादिप्रयोगाणाङ्का गतिरत आह। देवकीत्यादि स्त्रिति। आदिना कैकेयी शूद्रीत्यादिप्रयोगाणां संग्रहः। गोपालिकेत्यत्र गवां पालिकेति न विग्रहस्तदाह। गाः पालयतीति। इदम्प्राचाम्नतमनुरुध्य वस्तुतस्त्वाट्शविग्रहेऽपि न क्तिरित्याह। वस्तुत इति। ननु गतिकारकोपपदानामित्यत्र कारकपदोपादानेन कारकसंज्ञासमानाधिकरणसंज्ञानिमित्तकविभक्त्यन्तस्य समास इत्येव लभ्यत इति षष्ठ्यन्तस्य समासः सुबुत्पत्तेः प्रागिति कथं लभ्यत इत्यत आह। यथाकथञ्चिदिति। कथंचित्कारकत्वमिति। शेषत्वेनापि वस्तुतः कर्मण एव ग्रहणमिति भावः। अचत्यभाष्यादिति। एवं हि भाष्ये उक्तम्। गोपालिकादीनां प्रतिषेधः। गोपालिकादीनाम्प्रतिषेधो वक्तव्यः। गोपालिका। पशुपालिका इति। अत्र गोपालिकादीनाम्प्रतिषेधप्रतियोगित्वासंभवादाह कैयटः। सिद्धय इति वाक्यशेष इति। एतेन ल्युजकाभ्यां कर्त्तरीत्यस्य प्रवृत्त्या कर्मषष्ठ्या समासासंभवाच्छेषषष्ठ्यैव समासो वाच्यः तत्र यदि गतिकारकोपपदानामिति परिभाषाप्रवृत्तिर्न स्यात्तदाऽऽपः सुपः परत्वादिल्वन्दुर्लभमिति भाष्योक्तस्ये-

त्वघटितस्य प्रयोगस्य सिद्धये शेषषष्ठीविषयेऽपि गतिकारकेतिपरिभाषाप्रवृत्तिः। ननु प्रकृतसूत्रस्थभाष्यस्य गोपालशब्दं साधयित्वा ततः स्वार्थे केऽपि सिद्धिरित्यत आह। उपपदेति। तत्र हि षष्ठीसमासस्य वैकल्पिकत्वात्तदभावे चोपपदसमास इति षष्ठीसमासादुपपदसमासो विप्रतिषेधेनेतिवार्त्तिकोक्तस्य विप्रतिषेधस्य खण्डनायोक्तम्। अत्र विप्रतिषेधविचारेण षष्ठीसमासस्यापि सुबुत्पत्तेः पूर्वमेवोत्पत्तिरिति लभ्यते। अन्यथोपपदसमासस्य सुबुत्पत्तेः प्राक् प्राप्तिः षष्ठीसमासस्य तु तदनन्तरमिति विप्रतिषेधविचारोऽसङ्गत एव स्यादतः षष्ठीसमासस्यापि सुबुत्पत्तेः प्राक् प्रवृत्त्या प्राप्तिरिति स्पष्टमेव लभ्यते। षष्ठीसमासस्य सुबुत्पत्तेः प्राक् प्रवृत्तिमनभ्युपगम्यसमाधानान्तरमाह। यद्वेति। तन्निषेधस्य। टजकाभ्यां कर्त्तरीति निषेधस्य। अनित्यत्वात्। तत्रयोजको हेतुश्च जनिकर्तुः प्रकृतिरितिनिर्देशेनानित्यत्वात्। आद्युदात्तेति। धातुस्वरेणाद्युदात्तेत्यर्थः। एतेन। अन्तोदात्तस्य सूर्याशब्दस्यासाधनेन। ङीम्निषधेन। सूर्याऽत्रेतिन्यासेन। ननु सूरी कुर्त्योत्यनेनैव स्त्रीत्वाभिव्यक्तिसम्भवादियमिति व्यर्थमित्याशङ्कानिवारणायाह। सूर्यस्येति। ननु पुंयोगस्य दाम्पत्यभावरूपस्यैव पूर्वं व्यवस्थापितत्वात्तस्य विवाहितायामसिद्धेः कथमियं सूर्यस्य स्त्री। विवाहात्प्राक्सूर्यसम्बन्धेन कर्णस्योत्पत्तिरिति प्रसिद्धमिति चेन्न। सूर्यस्य स्त्री सूर्यी। देवतायां किम्। सूर्या। एतद्ग्राथे उक्तन्यायेन देवतावाचकस्य पुम्शब्दस्य तद्देवकर्तृकस्त्रीकारकर्मत्वसम्बन्धप्रयोज्या यस्यामुत्पत्तिः साऽपि तत्स्त्रीत्वेन गृह्यते इति स्त्रीकारात्। एवमेवेन्द्राणीत्वादीनामुपपत्तिः। न च जन्यजनकभावादिसाधारणः पुंयोगः कुतो न गृह्यत इति वाच्यम्। पुंयोगोपपादनावसरे यथैव ह्यसावकुर्वती किञ्चित्पापभर्तृकतान्वधबन्धनक्लेशांल्लभते एवमष्टशब्दमपीतिभाष्यस्वारस्यात्। तद्योग इति। महत्त्वादियोग इत्यर्थः। अत एवैषामित्यस्योपपत्तिः। हिमारण्ययोर्महत्त्व इत्यादीनि वार्त्तिकानि। एतेषु वार्त्तिकेषूपपात्तो योय उपाधिस्तद्योग एवैषां स्त्रियां वृत्तिः। यदा तु न तत्तदुपाधिविवक्षा तदा स्त्रीत्वमेव नेति तत्तद्योग एवेभ्यो ङीष् अन्यत्र टाप् इति भाष्यो न कार्यः। अत एवोक्तन्तद्योग एवैषामिति। विभाषेयमिति। एतेन मातुलोपाध्याययोरिति

वचनस्य पुंयोग एव प्रवृत्तिस्तच्च स्त्रीषः सिद्धत्वादानुगागममात्रं विकल्पते । ननु ब्रह्माणीतिवदिन्द्रमानयतीति व्युत्पत्त्या इन्द्राणीत्यस्यापि सिद्धिरिति इन्द्रवरुणेति सूत्रं व्यर्थमत आह । सूत्रन्विति । तेन । ताद्रूयबहुव्रीहिसमासाश्रयणेन । करणेति किमिति । क्रीताल्लपूर्वादित्येवास्त्विति प्रश्नः । स्वक्रीतेति । एवं सति कर्तृपूर्वादपि स्यादिति भावः । कैयट इत्यनेन सूचितामरुचिमकटयन्स्वसिद्धान्तमाह । अयमिति । धनक्रीतेत्यादिशब्दः । अत एव । तस्याः परिभाषाया अनित्यत्वस्यानभिमतत्वादेव । ननु तस्याः परिभाषाया अनित्यत्वाभावे गोष्ठादिष्वपि स्थाधातोः कैकान्तस्य सुवुत्पत्तेः प्राक् समासे पदादित्वाभावात्सात्पदाद्योरिति निषेधाप्राप्ते रादेशप्रत्यययोरित्यनेनैव षत्वे सिद्धे अम्बाम्बेतिसूत्रे गवादिग्रहणं व्यर्थमत आह । अम्बाम्बेतीति । उत्तरपदभूतस्य स्थः सकारस्य षत्वञ्चेदेभ्य एवेति तेन हृदिस्था शोभते मालेत्यत्र नेति भावः । एतेन गवादिग्रहणमेव गतीत्यादेरनित्यत्वे मानमित्यपास्तम् । नियमार्थत्वेन चारितार्थ्यात् । पदादादिरिति पक्षे तस्य तत्त्वासम्भवाच्च । वस्तुतस्तु न पदान्तसूत्रस्थपदान्तपदस्य पदेऽन्तः पदान्त इतिसमासप्रदर्शनेन पदे परे योऽन्तस्तस्य कार्ये कर्त्तव्य एव निषेध इति गोचेत्यादि सिद्ध्यर्थमनित्यत्वम्परिभाषायाः स्वीकार्यमन्यथाऽच इतिसूत्रनिष्पन्नलोपस्य स्थानिवद्भावादवङादेशस्याप्यापत्तिरित्याहुः । पदशब्दस्य पदत्वयोग्योपलक्षणत्वमिति त्वन्येषामाशयः विशिष्टस्य क्तान्तत्वमिति । यद्यपि वक्ष्यमाणरीत्या क्तान्तान्तादित्यर्थे क्तदग्रहण परिभाषां विनापि निर्वाहस्तथापि तदन्तविधिद्वयाभावेऽपि निर्वाहः प्रकृतेऽस्तीति भावः । समुदायोपाधिरिति । स्त्रीप्रत्ययान्तसमुदायविशेषणमित्यर्थः । करणगतम् । अभ्रगतम् । ईषदभ्रेण लिप्त इत्यर्थः । करणस्याल्पत्वे तल्लेपनस्याल्पत्वं सुकरमेवेत्याशयेनाह । क्रियागतमिति । अभ्रेणेषल्लिप्त इत्यर्थः प्रकृत इति भावः । स्त्रीप्रत्ययसमभिव्याहारस्तात्पर्यग्राहकः । प्रकारान्तरमाह । क्तान्तान्तादितीति । एवं सति प्रकृते क्तदग्रहणपरिभाषानाश्रयणेऽपि न क्षतिः । भिन्नशब्दस्य विशेषणवाचकत्वात्पूर्वनिपातशङ्कायामाह । जातिकालेति । पाणिग्रहीतीत्यस्य पाणिर्गृहीतो यस्या इत्यर्थः प्राग्रूप्यञ्च ग्रहणे क्वचित्तन्तदभिप्रायेणाह । अग्निसाक्षिकतयेति । यद्यपि भाष्ये भार्या-

यामिति नाभिहितन्तथापि तत्र विशेष इत्यभिधानादेवङ्गयनमित्यभिप्रायेणाह। भाष्ये त्विति। न चान्य एव विशेषः कल्याणतामिति वाच्यम्। पाणिगृहीती भार्या। यस्या हि यथाकथञ्चित्पाणिर्गृह्यते पाणिगृहीता सा भवतीति भाष्यात्तथोक्तमित्यभिप्रायात्। अस्राङ्गपूर्वपदादित्यत्र कर्मधारयसमासाश्रयणे बीजमाह। उत्तरसूत्र इति। न चास्राङ्गपूर्वपदादित्यत्र कर्मधारयाश्रयणेऽस्राङ्गादित्येव सिद्धे पूर्वपदग्रहणन्नाम्नि सूत्रे सफलमितिवाच्यम्। उत्तरसूत्रार्थमवश्यङ्कर्त्तव्यमित्याशयात्। एवञ्च। उत्तरसूत्रे तादृशार्थाश्रयणे च। तदाह। तदाशयेनाह। जातिपूर्वादित्यस्य प्रकृतसूत्रेऽपि सम्बन्ध एव समानानमित्तकत्वलाभेन नित्यशास्त्रबाधकत्वमिति भावः। पुत्रहतीत्यादावनेन सूत्रेण ङीष् भवतीतिवादिमतन्न युक्तमिति ध्वनयन्नाह। पुत्रादिनीत्यादाविति। स्पष्टार्थमिति। प्रकृतसूत्रे विवक्षितस्यार्थस्य स्पष्टं प्रत्ययार्थम्। फलान्तरमप्यस्तीत्याह। किञ्चेति। इदमुपलक्षणम्पूर्वोक्तमपि फलम्बोध्यम्। बहुव्रीहिविशेषणमिति। एवं सति साध्वी कल्याणपाणिपादेत्यादावतिप्रसङ्गः स्यादिति शेषः। शिखेति। यदि सूत्रे उपसर्जनपदन्न स्यात्तदा शिखेत्यत्र टापं बाधित्वा ङीष् स्यादिति भावः। अत्र भाष्यविरोधशङ्कां वारयति। यदपीति। एकदेश एव। शिखेत्यत्रैव। एतेन। अनेन निषेधेन तस्य सिद्धौ तत्र पाठे फलाभावेन। के चित्तु शिखेति प्रत्युदाहरणमित्यसंगतङ्कल्याणपाणिपादेत्यत्र दोषवारणायास्राङ्गपूर्वपदादित्यस्यात्र सूत्रेऽनुवृत्त्याऽस्राङ्गपूर्वपदात्परत्वस्य प्रकृतेऽभावेन ङीषोऽप्राप्तेरित्याहुः। तन्न। एतत्सूत्रव्याख्यायामुपक्रमेऽशिखेत्युक्तं न त्विदमेव प्रत्युदाहरणमित्यत्र भाष्यकृतो निर्भरः। अत्रत्यमूलग्रन्थस्यापि तदनुसारित्वात्। तथाहि अथोपसर्जनग्रहणङ्किमर्थम्। इह माभूत्। अशिखा। उपसर्जनग्रहणमनर्थकम् बहुव्रीह्यधिकारात्। उपसर्जनग्रहणमनर्थकम्। किङ्कारणम्। बहुव्रीह्यधिकारात्। बहुव्रीहेरिति वर्त्तते। बह्वजर्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम्। बह्वचो नेति प्रतिषेधं वक्ष्यति तद्बह्वज्ग्रहणमुपसर्जनविशेषणं यथा विज्ञायेत। बह्वच उपर्जनान्नेति। अथाक्रियमाणे बह्वज्ग्रहणे कस्य बह्वज्ग्रहणं विशेषणं स्यात् बहुव्रीहेरिति वर्त्तते। बहुव्रीहिविशेषणं विज्ञायेत। अस्ति चेदानीं कश्चिद्बह्वज्बहुव्रीहिर्यदर्थो विधिः स्यादस्तीत्याह। खडा खडी इति। अ-

ङौ हस्विकावयववविशेषः । बह्वजर्थमिति चेत् स्वाङ्गग्रहणात्सिद्धम् । स्वाङ्गग्रहणं क्रियते तद्बह्वज्ग्रहणेन विशेषयिष्यामः । स्वाङ्गाद्बह्वचो नेति । स्वाङ्गसमुदायप्रतिषेधार्थन्तु स्वाङ्गसमुदायप्रतिषेधार्थन्तर्ह्युपसर्जनग्रहणङ्कर्त्तव्यम् । स्वाङ्गाद्यथा स्यात् स्वाङ्गसमुदायान्माभूत् । कल्याणपाणिपादेत्याद्युक्ता एतदपि नास्ति प्रयोजनमस्वाङ्गपूर्वपदादिति वर्त्तते तेन स्वाङ्गं विशेषयिष्यामः । अस्वाङ्गपूर्वपदात्परं यत् स्वाङ्गमिति यच्चाचास्वाङ्गपूर्वपदात्परं स्वाङ्गन्न तदन्तो बहुव्रीहिः यदन्तश्च बहुव्रीहिर्नादोऽस्वाङ्गपूर्वपदात्परं स्वाङ्गमिति । इदन्तर्हि प्रयोजनं बहुव्रीहेरिति वर्त्तमाने उपसर्जनग्रहणमुपसर्जनमाद्यथा स्यात् निष्केशी यूका । अतिकेशी मला इतीत्युक्तम् । एतेन भाष्यीयग्रघट्टकेनोपसर्जनग्रहणस्य बहुव्रीहेरित्यस्य निवृत्तिरेव मुख्यप्रयोजनन्न तु पूर्वोक्तमुपक्रमस्थमभिखेति प्रदर्शितम्भवति। सूत्रस्थ स्वाङ्गशब्दस्य वार्त्तिककारीयपरिभाषाविषयत्वन्न तु केवलयौगिकत्वमिति प्रदर्शयितुमाशङ्कते । नन्विति । स्वमङ्गमिति । स्वीयमङ्गमित्यर्थः । स्वशब्दस्यात्मीयपरत्वात् । अद्रवम् । द्रवतीति द्रवम् । न द्रवमद्रवम् । मूर्त्तिः काठिन्यम् अथवा असर्वगतद्रव्यपरिमाणम् । अविभु परिमाणमिति यावत् । एतेनाकाशादेर्व्यावृत्तिः । तत्फलितार्थमाह । स्वर्गवदिति । तत् यस्यास्ति तत्स्वाङ्गम् । स्वेदस्य स्वाङ्गत्वप्राप्तिर्द्वितीयार्थ एवेति द्वितीयार्थ एव तात्पर्यम् । ज्ञानस्याद्रवत्वात्तत्रातिव्याप्तिवारणाय मूर्त्तिमदिति । सुमुखा शालेत्यत्रातिव्याप्तिवारणाय प्राणिस्थमिति । सुशोफेत्यत्रातिव्याप्तिवारणायाविकारजमिति । विकारो वातादिवैषम्यन्तस्माद्यन्न जातन्तत् । सुकेशी दीर्घकेशी रथ्येत्यत्र स्वाङ्गत्वसिद्धये आह । अतत्स्थन्तत्र दृष्ट्वेति । सुस्तनी सुस्तनां वा प्रतिमेत्यस्य सिद्धये तेन चेत्तत्तथा युतमिति । भाष्ये तु तस्य चेत्तत्तथा युतमिति पाठो दृश्यते तस्याप्ययमेवार्थः । तत्र करणस्य शेषत्वविवक्षया षष्ठी अत्रातत्स्थन्तत्र दृष्ट्वेति लक्षणान्तरमिति प्रतीयते तन्न युक्तम्प्रथमलक्षणेनैव द्वितीयलक्षणसङ्ग्राह्यस्य सङ्ग्रहसम्भवे लक्षणान्तरस्वीकारस्य गौरवपराहतत्वादित्याशयेनाह । एवञ्चेदमिति । पूर्वलक्षणेनासङ्ग्रहादाह । प्रतिमादीति । अत एव । तृतीयवाक्यस्याप्राणिविषयकत्वादेव । टाबन्तोऽयमिति । क्रुड निमज्जन इति धातोः पचाद्यजन्तादित्वादिः । विशेषविषयः । उरोविषयः । एवं सति तेन

समासे उपसर्जनह्रस्वत्वेऽदन्तत्वाप्राप्तिः। क्रोडाशब्दस्य टाबन्तस्य क्रोडादौ पाठाङ्गुजान्तरवाची यः क्रोडशब्दः स्त्रीनपुंसकलिङ्गो न ना क्रोडभुजान्तरमितिकोशप्रसिद्धस्तेन समासे ङीष्विकल्पो भवत्येव। कल्याणक्रोडी। कल्याणक्रोडा मयूरीति। केवलयौगिकत्व इति। राज्ञस्यन्तरसाधारणयोगार्थमात्रविवक्षायाम्। तेन रावणभगिन्यान्तस्य योगरूढत्वेऽपि सणत्वा संज्ञा विवक्षितेति तत्र खलस्य निषेधस्य च प्रवृत्तिरस्त्येव। नान्दीमुखो मातर इत्यत्र तु न नखमुखादित्यनेन निषेधः। तस्य नान्दी कर्मसमृद्धिः। सा मुखमग्रेयं यस्यास्ता इत्यर्थात्। कर्मसमृद्धौ मुखशब्दस्य मुखमिव मुखमिति प्रधानत्वाग्रहत्तिः। नखमुखात्संज्ञायामित्यत्र संज्ञापदेन पौरुषेयस्य ऐश्वरीयसंकेतातिरिक्तसंकेतस्य ग्रहणम्। मात्रषु च ऐश्वरसंकेत एवेति नानुपपत्तिः। अस्वरितत्वादिति। दिक्पूर्वपदादिति सूत्रघटकङीप्पदस्यास्वरितत्वादित्यर्थः। इदञ्च व्याख्यानं वृत्तिकृदनुसृत्य वस्तुतस्तु सख्यशिश्वीति सूत्रे भाषायामित्यस्योपादानाच्छन्दसीति स्वरितत्वादिगितिसूत्रे वाह इति सूत्रे चानुवर्त्तत एव। एवञ्चाद्युदात्तश्छान्दसमेवेत्याशयेनाह। परे ङिति। अन्तोदात्तमेवेति। ङीषन्तत्वादिति शेषः। एवञ्चेति। तयोः सूत्रयोस्तदनुवृत्तौ च। तन्निवृत्तिबोधनाय। छन्दसीत्यस्य निवृत्तिबोधनाय। अत एव। इतिशब्दस्य चार्थत्वादेव। क्वचिदस्याद्युदात्तत्वमिति। आधिनवो धुनयन्तामशिश्वीरित्यत्रेत्यर्थः। जातिशब्देनेति। करणे तृतीया। अर्थे। जातिस्वरूपे। स्वरूपग्रहणन्तु न भविष्यति। स्त्रीविषयत्वात्। लोके जननेन प्राप्यते सा जातिरितिरीत्या जातिशब्दस्य शुक्लादिगुणसाधारण्येन प्रवृत्तिदर्शनात्तस्यैव विवक्षायां गुणेऽतिव्याप्तिः। यदि तन्त्वान्तरप्रसिद्धे भिन्नेष्वित्यादिनित्यमेकमित्यादिलक्षणे वा आश्रीयेते तदापि शुक्लादिगुणानामेकत्ववादिमते तेष्वतिव्याप्तिरिति भाष्यसम्मतं लक्षणमेव सिद्धान्तिसम्मतं युक्तमित्याशयेनाह। भिन्न इत्यादि। अभिन्नयोः समानाकारयोः अभिधानप्रत्यययोर्ज्ञानव्यवहारयोर्निमित्तमित्यर्थः। अव्याप्तिमप्याह। युवत्वादाविति। उपदेशादिव्यङ्ग्येत्यर्थ इति। तादृशोपदेशप्रयोज्याऽयङ्गौरिति या प्रतीतिस्तद्विषय इत्यर्थः। यद्यपि शास्त्रे जातिरप्याकृतिपदेनोच्यते। तथापीहाकृतिपदमवयवसंस्थानपरत्वेन सामर्थ्याद्व्याख्यातम्। तत्रातिव्याप्तमिति।

तस्य संज्ञारूपतया नेष्टापत्तिः कर्तुं शक्या । तङ्गे देति । तदाश्रयदेहभेदेत्यर्थः । यत्राश्रयाणाभेदप्रतीतिस्तत्रैव जातित्वस्वीकारात् । प्रत्युताभेदप्रत्यय एवेत्याह । स एवेति । अत एव । अनुगतसंस्थानव्यङ्ग्यत्वनिवेशादेव । स्त्रीविषयत्वादपीति । अपिना कल्पभेदेन दुर्गाशरीराणाभेदेऽपि तेषां समानकालिकत्वाभावः सूचितः । तटत्वस्वरूपजातौ लक्षणङ्ग्राह्यति । अनुगतेति । नन्विदं लक्षणं हृषलत्वादिजातावव्याप्तमतो लक्षणान्तरमाह । नन्वित्यादिना । सापेक्षस्यलेऽपि वृत्तिप्रवृत्तौ गमकत्वमप्ययोजकन्तच्च प्रकृतेऽस्तीत्याह । भाष्यप्रामाण्यादिति । अत्रेदम्बोध्यम् । न केवलं द्वितीयलक्षणमेवाऽभिप्रेतम् । किन्तु प्रथममपि । तेन तटीत्वस्य सिद्धिरिति । उपदेश इति । ब्राह्मणाद्ब्राह्मण्यामुत्पन्नोऽयमित्यादिरूपः । तत्पित्रादिष्विति । ब्राह्मणपित्रादिर्ब्राह्मण एव अत्र तदपत्यादिष्विति नोक्तम् । ब्राह्मणेन क्षत्रियादिषूत्पन्नस्यान्यजातीयत्वसम्भवात् । तदपत्येति । अत्र तत्पित्रादिष्विति नोक्तम् । हृषलपितुरन्यजातीयत्वस्यापि सम्भवात् । अत्र भाष्ये आकृतिग्रहणेत्युक्ता अपर आहेत्यादिना लक्षणान्तरमणीतमिति तयोर्यावद्वैलक्षण्यन्तदाह । अत्राकृतीति । नित्यानित्येति । नित्यं ब्राह्मणत्वादि । अनित्यं युवत्वादि । इत्यादिनेति । एवं हि तत्रोक्तम् । अपर आह । प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः । असर्वलिङ्गाम्बह्वर्थान्ताञ्जातिं कवयो विदुः । कः पुनरेतयोर्जातिलक्षणयोर्विशेषः । यथा पूर्वलक्षणन्तथा कुमारीभार्य इति भवितव्यम् । यथोत्तरन्तथा कुमारभार्य इति भवितव्यमिति । अत्र कैयटः । द्रव्यस्य प्रादुर्भावविनाशाभ्यां या आविर्भावतिरोभावौ प्राप्नोति सा जातिः । जातेर्नित्यत्वान्न साक्षात्तयोर्जातौ सम्भव इत्याशयेन द्रव्यस्येत्याद्युक्तम् । नन्विदं यदाश्रयस्योत्पत्तिविनाशौ सम्भवतस्तत्र यद्यपि संभवति तथाप्यात्मत्वजातौ न सम्भवतीति चेन्न । प्रादुर्भावेत्यादिना यावद्द्रव्यभावित्वस्योपलक्षणात् । यावद्द्रव्यभावित्वञ्च स्वाश्रयद्रव्यसत्त्वप्रतीतिसमनियतप्रतीतिविषयत्वम् । समनियतत्वञ्च कालिकप्रत्यासत्त्या बोध्यम् । युगपद्गुणैरिति । गुणैः सह युगपद्द्रव्येण सम्बध्यते । यथा निर्गुणस्य द्रव्यस्य नोपलम्भस्तथा जातिरहितस्यापीत्यर्थः । देवदत्तेत्यादिसंज्ञानिरासायाह । बह्वर्थामिति । एतन्मते युवत्वादीनान्न जातित्वमयावद्द्रव्यभावित्वात् । एतन्मत इति । प्रथममते इत्यर्थः । न च हृषलस्यवि-

रादिगब्दाव्ययमरीत्या जातित्वाज्जातिलक्षणो ङीष् स्यादिति वाच्यम् । अजादिगणे तेषाम्पाठेन ङीषो बाधनात् । ननु पूर्वोक्तलक्षणभेदेन कुमारत्वस्य जातित्वसन्देहात्कथं साधुत्वव्यवस्थेति चेत् । अत्र कैयटः । पूर्वोक्तमेव लक्षणभाष्यकारस्य मतम् अपर आहेत्यभिधानादित्याहुरिति । वस्तुतस्तु लक्षणद्वयप्रणेतृऋषिद्वयप्रामाण्याज्जातिकार्यस्य युवशब्दादौ विकल्प एव । अत एव युवजानिर्युवतितरेत्यादौ द्विविधमप्यनुष्ठानमभगवत इति । सर्वलिङ्गत्वादिति । स्त्रीपुंसयोरपत्यान्ता इत्यमरान्नाडायनन्नपुंसकमिति दर्शनादपत्यप्रत्ययान्तस्य सर्वलिङ्गत्वन्तथा शाखाध्येतृवाचिनोऽपि सर्वलिङ्गत्वङ् कठः कठी कठङ्कुलमिति दर्शनादिति भावः । अपत्याधिकारादन्यत्र लौकिकङ्गोचन्तच्चापत्यमात्रमित्यभिप्रायेण कैयटेनैतद्वार्त्तिकव्याख्यावसरेऽपत्यमित्येव व्याख्यातमवन्ती कुन्तीत्यनन्तरापत्ये उदाहरणाच्च दीक्षितैरपि तदेवानुसृतन्तन्न युक्तभाष्यविरोधादित्याशयेनाह । शास्त्रीयमत्रेति । अत एव । शास्त्रीयगोत्रग्रहणादेव । न प्राप्नोतीति । गोत्ररूपस्यार्थस्य यूनि यः प्रत्ययस्तदर्थे विशेषणत्वात् । प्रौढ्येति । अनुपसर्जनादित्यस्य तदन्तविशेषणत्वेऽनुपसर्जनाधिकारस्यैव वैयर्थ्यं स्यादिति तस्य गम्यमाणविशेषणत्वमेवेति भावः । प्रतिषेधो न प्राप्नोतीति । एतस्य युवप्रत्ययान्ततया शास्त्रीयगोत्रे यः प्रत्ययस्तदन्तत्वाभावात् । न च यः प्रत्ययो गोत्रे उत्पन्नस्तदन्तत्वमस्त्वेवेति वाच्यम् । अणञ्नादनुपसर्जनादिति भाष्यस्य यः प्रत्ययो यून्युत्पन्नो लुप्तश्च तमाश्रित्यैव प्रवृत्ततया तप्रत्ययमाश्रित्य जातित्वं वाच्यमिति भावः । मा भूदेवम् । जातेश्चेति प्रतिषेधो मा भूदित्यर्थः । ग्लुचुकायनीति । प्राचामवृद्धादिति फिञन्तमेतत् । अन्यथा । अपत्यप्रत्ययमाश्रयग्रहणे । असङ्गतिश्चेति । जातित्वसद्भावाज्जातेश्चेतिनिषेधप्राप्तेर्जागरूकत्वात् । स्वसिद्धान्तरीत्याह । ग्लुचुकायनीभार्ये दोषस्त्विति । अत एव । अपत्यविशेषस्य गोत्रशब्देन ग्रहणादेव । व्याख्यानासङ्गतिमुक्त्वा रूपासिद्धिमप्याह । ब्राह्मो नारद इत्यसिद्धिरिति । एतस्यानन्तरापत्यप्रत्ययान्तत्वेऽपि जातित्वसत्त्वेनाजातावितिनिषेधः स्यादिति भावः । सामर्थ्येन । औचित्येन । अथ वा अपत्यस्य जातावितिविशेषणसामर्थ्येन । अनुपसर्जनादितिसूत्रभाष्यविरोधमुद्धरति । अनन्तरापत्येति । नन्वेवं रीत्या गोत्राद्यूनीतिसूत्रस्य लुग्विधायक-

त्वपक्षीयमेको गोत्र इति सूत्रस्थभाष्यमपि सुयोजमत आह। यूनि लिति। अस्त्रीविषयत्वाभावादिति । एवञ्च शाखायां ङीषोऽभावे टापि कठा शाखेति कर्मधारयसमासाभावे भवति कर्मधारयसमासस्य प्रवृत्तौ तु पुंवद्भावेन कठशाखेत्येव प्रयोगः। केचित्तु, कठशब्दस्य प्रोक्तार्थकणिन्यन्तस्य शाखायां प्रवर्त्तमानस्य योगार्थमादाय कल्यादिसाधारणतयाऽस्त्रीविषयत्वात्कठी शाखेति समासाभावे भवतीत्याहुः । अथ्येचर्थकाणन्तस्य स्त्रियामप्रवृत्तिमुपपादयति । स्त्रिया इति । स्त्रीयसिद्धान्तमाह । परे त्विति । उपदेशोपलक्षणमिति । एवञ्चोपदेशग्राह्या जातिरित्येव सिद्धम् । उपदेशग्राह्यत्वञ्च द्वाभ्यामकाराभ्याम् । यद्वेति पक्षे तु उपदेशाकृत्यन्यतरग्राह्येति लक्षणम्। लिङ्गानामिति। शास्त्रीयं लिङ्गं जातिरूपार्थेऽपि सम्भवतीत्याशयेनेदम्। तत्स्वरूपेति। जातिस्वरूपेत्यर्थः। तेन। तादृशस्वरूपानुवादेन । न चानुवादमात्रेणातिव्याप्तिर्वारयितुं न शक्यत इति वाच्यम्। विशेषणतयैतदर्थप्रवेशस्याभिप्रेतत्वात्। एवं सत्याकृतिग्रहणेत्येवेत्येवकारेण द्वितीयलक्षणकरणं व्यवच्छिद्यते । न त्वसर्वलिङ्गत्वे सतीति विशेषणमिति बोध्यम्। अत एव। जातावपि लिङ्गसम्बन्धसम्भवादेव। ननु यदा लक्षणद्वैविध्यन्तदा आद्यस्य द्वितीयलक्षणाप्राप्तप्रापणार्थतया तटन्वितिकोशबलेन तटशब्दस्य सर्वलिङ्गत्वेऽपि जातिकार्यं सिध्यति। एकलक्षणत्वे त्वसर्वलिङ्गत्वे सतीति विशेषणदाने न प्राप्नोतीत्यत आह। तच्च प्रायिकमितीति। केचित्। प्राञ्चः। विशेषणस्य लिङ्गानामित्यस्याभावेपि क्वचिज्जातित्वमिति तेषाम्भावः। स्वसिद्धान्तमाह। भाष्येति। ननु कोशस्य का गतिरत आह। तटमिति। सङ्कादित्वंशास्त्रप्रयोजनमाह। सङ्कादिति। एकत्वमनेकानुगतत्वमिति। एतेन जातिलक्षणयोग्यता दर्शिता। स्वरूपानुवादेन। वस्तुतः पूर्ववदेतदपि विशेषणन्तेन देवदत्तत्वादेर्व्यावृत्तिः। समानकालिकानेकेत्यस्य निवेशोपि पूर्ववत्। प्राग्वदेव। अतिदेश एव। अत एव। आकृतिग्रहणेत्यादेः पूर्वोक्तार्थाङ्गीकारादेव। अनेन। एकलक्षणेन। गुणैर्युगपत्सम्बध्यत इत्युक्ते केनेत्याकाङ्क्षायामाह। द्रव्येणेति। गुणैरिति प्रकृत्यादित्वात्तृतीया। तेनैककाले इत्यर्थकेन युगपच्छब्देन योगेपि न क्षतिः। द्रव्येणेति तु सहार्थयोगे द्वितीया। लक्षणान्तरत्वभ्रमनिरासाय। अत्र लक्षण इति। अत एव। पूर्वोक्तस्याप्येकलक्षणत्वा-


देव। एकवचनमेवेत्यनेन स्वव्याख्याद्दृढीकरणम्। अत एव। पूर्वस्यैकलक्षणत्वादेव। एतेन। अस्त्रीविषयादित्यस्य पूर्वोक्तार्थकरणेन। अपास्तमिति। सर्वत्र विसकण्टकत्वजातेः प्रवृत्तिनिमित्तत्वाभावान्नानुपपत्तिरिति भावः। अत एव। अस्त्रीविषयादित्यस्य पूर्वोक्तार्थाश्रयणादेव। बहुपुष्येति। यौगिकोऽयम्। न तु जातिप्रवृत्तिनिमित्तकः। ननु पाककर्णेतिसूत्रस्याप्राप्तप्रापणार्थतयाऽजात्यर्थमेतत्सूत्रमित्यपि वक्तुं युक्तमत आह। अजात्यर्थन्विति। निषेधादिति। तस्य ङीषबाधनार्थमारम्भात्। एतच्चास्मिन्नेव सूत्रे वार्त्तिककृता पठितम्। तच्च भाष्यकृता सदृक्काण्डप्रान्तयतैकेभ्यः प्रतिषेधो वक्तव्य इति व्याख्यातम्। एवं व्याख्याने योपधादित्यस्य सूत्रे श्रवणेन योपधप्रतिषेधे गवयहयेत्यादिना प्रतिप्रसवसूचनेन कृतम्। यदीदं सूत्रमजात्यर्थमित्येव स्यात्तदा अस्त्रीविषयादित्यस्य प्रकृतसूत्रेऽपि सम्बन्धात्पूर्वसूत्रस्यास्य चाप्राप्ते रदन्तत्वादेव टापि सिद्धे तदारम्भो व्यर्थः स्यादिति भावः। इदमेव च वार्त्तिकमजाद्यत इति सूत्रव्याख्यानावसरे मूले उपनिबद्धम्। पूर्वसूत्रेण। पाककर्णेत्यनेन। ननु तित्तिरिः ककुभो लाव इति कोशे ककुभशब्दसाहचर्यात्पुंस्त्वनिर्णयसम्भवान्नास्य स्त्रीत्वमत आह। स्त्रीपुंसयोरिति। इदमुपलक्षणम्। नपुंसकत्वस्यापि। नाडायनन्नपुंसकमितिकोशस्यौपगवङ्गुलमिति प्रयोगस्य च दर्शनात्। अन्यथा। नोङ्धात्वोरितिसूत्रेऽपि ङकारानुच्चारणे। बहुव्रीहाविति। ब्रह्म वेदो बन्धुषु यस्या इत्यर्थः। ननु ह्रस्वोकारादुङ्विधानमेवास्तु सवर्णदीर्घेण रूपसिद्धेरत आह। दीर्घोच्चारणमिति। भाष्ये स्पष्टमिति। तत्र हि किमर्थो ङकारः। विशेषणार्थः। नोङ्धात्वोरिति। नोधात्वोरित्युच्यमाने यवाग्वा यवाग्वै इत्यत्रापि प्रसज्येत। अथ दीर्घोच्चारणं किमर्थम्। ब्रह्मबन्धूः। वीरबन्धूः। न्यूतङ्वेति कप् प्रसज्येत। नैष दोषः। नद्यन्तानां यो बहुव्रीहिरित्येवन्तत्। न चैष नद्यन्तानाम्बहुव्रीहिः। शेषलक्षणस्तर्हि कप् प्राप्नोति। तस्मादीर्घोच्चारणङ्कर्त्तव्यम्। अत्र कैयटः। उकारद्वयन्दीर्घेण निर्दिष्टम्। तत्र द्वितीय उकारः परत्वाद्बाधकस्य शेषलक्षणस्य कपो बाधनार्थमिति भावः। ननु यद्येक एवोकारो विधीयते तदा स्वश्रूरस्योकाराकारलोपश्चेत्यनेनोङि कृते स्वश्रूरित्यस्य सिद्धिर्न स्यादत आह। स्वश्रूरिति त्विति। सिद्धमिति। तथा च तादृशनिर्देश एव तादृशरूपसधा-

को न तु तदर्थं वचनान्तरमिति भावः। ननु स्त्रिया वेदाध्ययनेऽधिकाराभावादध्वर्युरित्यसङ्गतमत आह। अध्वर्युशाखेति। यच्छाखाध्ययनेनाध्वर्युत्वभवति तच्छाखाध्यायिवंशोऽत्रेत्यर्थः। उत इत्यस्य सम्बन्धेऽलाबूशब्दाहीर्घान्तान्न स्यादत आह। उतइतीति। अलाबूरितीति। ऊङि सत्यलाब्वेत्यत्र नोङ्धात्वोरिति विभक्त्युदात्तत्वप्रतिषेधः सिद्धो भवति। गुणवाचीतीति। न तु जातिवाचीति शेषः। श्वशुरशब्दावयवद्याकारस्यलोपाशङ्कानिवारणायाह। श्वशुरः श्वश्रूतिनिर्देशादिति। ङ्याब्सूत्रस्यभाष्यस्वरसस्विति। तत्र हि ङ्याप्ग्रहणङ्किमर्थन्न प्रातिपदिकादित्येव सिद्धमिति प्रश्ने ऽप्रत्यय इति प्रातिपदिकसंज्ञाप्रतिषेधः प्राप्नोतीति समाधाने एवं सतित्यूङ्ग्रहणङ्कर्त्तव्यमिति पुनः प्रश्ने तिप्रत्ययस्य तद्धितत्वात्सिद्धमिति समाधाय ऊङन्तादपि पूर्वान्तवद्भावेन सिद्धमित्युक्तम्। श्वश्रूशब्दो यद्यूङन्तः स्यात्तदा तदर्थमूङ्ग्रहणस्यावश्यकत्वेन भाष्ये तस्यानुक्तत्वेन न्यूनतापत्तिरतोऽयमव्युत्पन्न इति कल्प्यत इति। ऊरूत्तरपदादित्यधिकारप्राप्तप्रातिपदिकविशेषणमूरूत्तरपदादिति बहुव्रीहिः। औपम्य इति सप्तम्यर्थो वाचकत्वम्। पूर्वपदस्योपमानवाचकत्वे समुदायस्यौपम्यवाचकत्वसम्भव इत्याशयेनाह। उपमीयत इत्यादि। अतः। उपमानवाचकस्य पूर्वपदस्यग्रहणेन। करभोपमोरूरित्यत्रेति। अत्र पूर्वपदस्योरुशब्दसामानाधिकरण्येनोपमानवाचकत्वाभावः स्पष्ट एव। यतः पूर्वपदस्योपमानवाचकस्य विवक्षातः एवोत्तरपदग्रहणञ्चरितार्थमन्यथोर्वङ्गादित्येव वदेत्। उपचारो लक्षणा सा च शक्यतावच्छेदकारोपात्मिका तदाह। शक्यशब्देति। स निमित्तमिति। सः। उपमानोपमेयभावः। सहेति इतीति। एवञ्च सहशब्दः सौत्रः क्रियाशब्दो न तु साहित्यवाचीत्युक्तम्भवति। मूलोक्तं यद्देति द्वितीयार्थकल्पनमेव समूलमित्याशयेनाह। सह विद्यमानाविति। सर्वस्यापि विद्यमानोरुमत्त्वेन विशेषणवैयर्थ्यशङ्कानिवारणायाह। अतिरमणीयावित्यर्थ इति। तत्र दृष्टान्तमाह। कमलानीति। तदा जायन्ते ते गुणा यदा सहृदयैर्दृश्यन्ते रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि। अत्र च शुद्धकमलत्वमुद्देश्यतावच्छेदकम्। शोभादिगुणयुक्तकमलत्वावच्छिन्नस्य विधेयत्वमिति नोद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्याच्छब्दबोधानुपपत्तिरिति। लोके कदूरिति कस्य बोधकमत आह। नागमा-

तुरिति। कमण्डलुशब्दश्च चतुष्पाज्जातिवचनः। अत एव चतुष्पाद्भ्यो ढञिति सूत्रस्थ कामण्डलेय इत्युदाहरणसङ्गतिः। पात्रवाची तु न स्त्रीलिङ्गः। अज इत्यस्याकारविशेषणत्वं शार्ङ्गरवादेस्तु नेति इन्द्वानुपपत्तिरत आह। शार्ङ्गरवादीति। अस्य। अज इत्यस्य। एवं टिड्ढेत्यत्रापीति। तस्य षष्ठ्यन्तत्वेऽनुपसर्ज नादितिविभक्तिविपरिणामेन तद्विशेषणम्। विनिगमनाविरहादाह। तद्वदत्रेति। अजोऽकारविशेषणत्वे फलम् शूरसेनीति। जनपदशब्दादित्यजोऽतश्चेति लुकि जातिलक्षणो ङीष्। तेनान्तोदात्तं पदम्। शार्ङ्गरव्याः साधुत्वमाह। अण्यादीति। शृङ्गरुशब्दादपत्येऽणि आदिर्ञिटुडवामिति योगविभागेऽन्त्याच्छृङ्गरुशब्दप्रकृतिकान् ङीप्युदात्तनिवृत्तिस्वरेणान्तोदात्तत्वम्। यदि तु गोत्रेऽण् तदा जातिलक्षणो ङीष् परत्वान् ङीपञ्बाधित्वा स्यात्तथापि प्रत्ययस्वरेणान्तोदात्तत्वमेव स्यादतो ङीनाद्युदात्तत्वसिद्ध्यर्थं विधीयत इति। सामर्थ्यादिति। पुत्रशब्दस्य पाठसामर्थ्यादित्यर्थः। नृनरयोरितिगणसूत्रे नरशब्दोपादानस्य प्रयोजनं वक्तुं शङ्कते। यद्यपीति। नरीति प्रयोगनिवृत्तिरेव प्रयोजनमस्त्वित्यत आह। नरीति त्विति जातिमात्रेति। अत्र मात्रपदेन पुंयोगव्यावृत्तिः। पुंयोगे तु नरीतीष्यत एव। अत एव किन्नरीणान्नरीणामिति प्रयोगोपपत्तिः। नरशब्दान्त्याकारस्य लोपेनापहारेऽलोन्त्यपरिभाषयाऽन्त्यस्य रेफस्य वृद्धिः स्यादत आह। अवार्ष इति। व्याख्यानादिति। नरः अ नरः कतन्तवत्यरूपम्। ना च नरश्चेति इन्द्व इति व्याख्यानादित्यर्थः। अनार्षमिति। तत्रादर्शनात्। आद्युदात्तस्य रूपस्य तर्हि कथं सिद्धिरत आह। नृनरस्य चेति। योगार्थमादायान्यत्रास्य प्रवृत्तिं वारयति। रूढ्येति। अत एव। रूढिस्वीकारेऽर्थभेदाभावादेव। उदीचाम्मत इति। प्राचाम्मते षष्ठ्यस्य सत्त्वादाह। उदीचाम्मत इति। सः। गौकक्ष्यशब्दः। न पाठ्य इति। षष्ठ्यन्तप्रत्ययस्तत्र पाठे भवति ततो यङ्स्वाबिति चाप् जायते स चाबधुना षाष्ठ्यज इत्यनेन सिद्ध इति भावः। ननु गौकक्षीपुत्र इत्यत्र षष्ठ्यः सम्प्रसारणमिति सम्प्रसारणन्न स्यादित्यत आह। सम्प्रसारणन्त्विति। नेष्टमिति। तदुक्तभाष्ये। षाष्ठ्यजश्चाप् वक्तव्यः। शार्कराक्ष्या। पौतिमाष्या। गर्गादियञन्ता एत इति कैयटः। तत्रायमर्थः। गोकक्ष्यशब्दः क्रौड्यादिषु पठ्यते स न पठितव्यो भवति। यदि न पठ्यते गौकक्षीपुत्र इति स-

म्मसारणन्न प्राप्नोति । इष्टमेवैतत्सङ्गृह्णीतम् । गौकक्ष्यापुत्र इत्येव भवितव्यम् एवं हि सौनागाः पठन्ति यङः सम्मसारणे गौकक्ष्यायाः प्रतिषेध इति । इयञ्च सौनागानामुक्तिस्तत्र गौकक्ष्यशब्दस्य पाठसत्त्वे बोध्या । नन्वस्य तद्धितादिकारस्योत्तरार्थत्वे इहकरणं व्यर्थमत आह । इहेति । के चिदिति । घटघटीग्रहणेनैव तदनित्यत्वस्य सिद्धेरिदमपि प्रयोजनमन्यथा सिद्धमित्यरुचिः ॥

॥ इति स्त्रीप्रत्ययप्रकरणव्याख्यानम् ॥



॥ श्रीगणेशाय नमः ॥

॥ श्रीमत्सीतारामाभ्यान्नमः ॥

ज्ञानानन्दमयन्देवञ्जानकीवल्लभं विभुम् ।
आधारं सर्वविद्यानां श्रीरामं समुपास्महे ॥ १ ॥

अथ स्त्रीप्रत्ययानामप्रातिपदिकप्रकृतिकत्वात् स्वादीनामपि तथात्वात्तेषामपि निरूपणमावश्यकमिति प्रसङ्गसङ्गत्या तदर्थान्निरूपयति । स्त्रीजसमौडितीति । प्रथमाया न कारकविभक्तित्वमिति वादिमतन्दूषयितुमुपक्रमते । इदमपीति । क्रियायोगश्च न साक्षात्कारकत्वे प्रयोजकः किन्तु साक्षात्परम्परासाधारणः । साक्षात् । यथा कर्मादीनाम् । परम्परया । यथा अधिकरणकारकस्य । एवमर्थमात्रस्यापि । सा च क्रिया यत्र क्रियावाचकमप्यदप्रयुज्यते तत्र चैत्रः पचतीत्यादौ तदर्थभूतैव । यत्र तु न प्रयुज्यते घटः पट इत्यादौ तत्राप्यस्तिर्भवन्ती परोऽप्रयुज्यमानोऽप्यस्तीतिन्यायेन गम्यमानास्तिक्रियायामेवान्वयः । स च प्रत्ययार्थकर्तृकर्मादिद्वारा । अत एव तिङ्समानाधिकरणे प्रथमेतिवार्त्तिकसङ्गतिः । कारकविभक्तित्वञ्च क्रियाजनकार्थकविभक्तित्वम् । इदमपीत्यपिना कारकाधिकारीयसंज्ञाप्रयोज्यसर्वविभक्तिसङ्ग्रहः । भाष्ये । अनभिहितपादे । कृत्तद्धितसमासैकशेषसनाद्यन्तधातवः । सुपतिङन्तं पदम् । कृत्तद्धितसमासाश्च । प्रत्ययः । परश्च । आद्यन्तवदेकस्मिन्नित्यधिकृत्य । प्रकृतिवदनुकरणं भवतीति । अनुकरणशब्देष्विति । वाचकतासम्बन्धेन स्थितस्येति शेषः । प्रातिपदिकार्थत्वादिति । प्रातिपदिकजन्योपस्थितिविषयत्वं हि प्रातिपदिकार्थत्वन्तच्च लिङ्गस्याप्यस्तीति भावः । अत्रोपस्थितिनिष्ठकार्यतायां अवच्छेदकः सम्बन्धोऽवच्छेदकता । प्रातिपदिकनिष्ठकारणतायास्तु स्वविषयकज्ञानावच्छेदकत्वम् । यस्मिन्निति । न च सामग्यन्तराभावे प्रातिपदिकमात्रोच्चारणेन कस्याप्यर्थस्योपस्थितिर्न भवतीति प्रातिपदिकजन्यनियतोपस्थितिकत्वञ्च कस्यापीति वाच्यम् । स्वस्वव्याप्येतरयावत्कारणसत्त्व इत्यस्यापि पूरणात् । स्वम् प्रातिपदिकम् । तद्व्याप्यस्तदीयसम्बन्धः ताभ्यामितरद्यावत्कारणमित्यर्थः । प्रातिपदिकजन्यनियतोपस्थितिकत्वञ्च प्रातिपदिकोच्चारणकालानन्तरकालत्वव्यापकोपस्थितिविषयत्वम् । कालश्च प्रातिपदिकोच्चारणानन्तरं यावत्क्षणसमूहेनार्थोभिव्यक्तिर्भवति तावान् समुदायः । नन्वेतादृशमप्रातिपदिकार्थत्वङ्गौर्वाहीक इत्यादौ

दिलाक्षणिकस्थले न कस्यापि वाहीकाद्यर्थस्येति तत्र प्रथमायाः साधुत्वन्न स्यादित्यत आह। अन्वयानुपपत्तीति। पदे एव। सुबन्त एव। न लक्ष्यासङ्ग्रह इति। एवञ्च मुख्ये स्वशक्त्य एव तेषां साधुत्वमभ्युपगम्यात्मदान्तरार्थसम्बन्धवेलायामन्वयतात्पर्यान्यतरानुपपत्तिप्रतिसन्धानन्ततः स्वशक्यतावच्छेदकारोपात्मिका लक्षणेति भावः। लिङ्गग्रहणसार्थक्यमाह। तटादिशब्दानामिति। सूत्रे मात्रशब्दोऽवधारणे तस्य च प्रत्येकं सम्बन्ध इत्याशयेनाह। लिङ्गस्यैवाधिक्य इति। नन्वेवन्नीलो घट इत्यादावपि नियतत्वांशनिवेशे प्रथमा न स्यात्। विशेषणविशेष्यभावस्याधिकस्य भानेन मात्रपदेन व्यवच्छेदादित्याशयेन शङ्कते। यद्यपीति। संस्कारेति। प्रथमारूपः। योऽप्यभेदो भासते सोऽपि विशेष्यविशेषणभावान्नातिरिक्तः। एवं सत्ययं वाक्यार्थ एव। विशेष्यविशेषणभावः परं द्विविधः। यत्र भेदः संसर्गतया भासते तत्र तत्सम्बन्धावच्छिन्नः। समानविभक्तिकनामार्थयोर्यत्रान्वयस्तत्रेतरसम्बन्धानवच्छिन्नः। न चैवं घटमश्नातीत्यादावपि प्रथमापत्तिः। कर्मत्वस्य क्रियासापेक्षत्वेन तस्य वाक्यार्थत्वादिति वाच्यम्। एवं सति कर्मणि द्वितीयेत्यादिसूत्राणां वैयर्थ्यापत्तेः। प्रातिपदिकपरदेशस्य प्रथमयाऽवरुद्धत्वादतस्तासां स्वविषये बाधकत्वमुपेयमिति भावः। न संसर्ग इति। राहोः शिर इत्यादावौपाधिकभेदमादाय षष्ठ्युपपादनपरभाष्यप्रामाण्येन तस्य संसर्गत्वाभावकल्पनात्। अन्यत्र मञ्जूषादौ। न च द्रोणो व्रीहिरित्यत्र प्रातिपदिकार्थे एव प्रथमास्तु तस्य च परिच्छेद्यपरिच्छेदकभावसम्बन्धेन व्रीहावन्वयोऽस्विति वाच्यम्। समानविभक्तिकनामार्थयोर्भेदसम्बन्धेनान्वयबोधस्याव्युत्पन्नत्वात्। अन्यथा राजा पुरुष इति वाक्याद्भेदसम्बन्धेनान्वयबोधापत्तेः। न च यदि परिमाणमात्रे प्रथमा परिमाणस्य च प्रत्ययार्थतया परिच्छेद्यपरिच्छेदकभावसम्बन्धेनान्वयस्तदा द्रोणो व्रीहिमानयेत्यपि प्रयोगः स्यादिति वाच्यम्। प्रातिपदिकार्थसाहचर्येण परिमाणमात्रे प्रथमापि यत्र समानविभक्तिकनामान्तरार्थेऽन्वयविवक्षा तत्रैव नान्यत्रेति कल्पनात्। अत एव तिङ्समानाधिकरणे प्रथमेतिवार्त्तिकविरोधो न। उक्तार्थत्वादिति। एकत्वादिष्वर्थेषु विभक्तिर्विधेया ते चार्थाः प्रकृत्यैव प्रतिपादिता इति तेषामभिधानाय विभक्तिर्न स्याद्यथा न हि भवति घटोऽस्ति कलश इति। नन्वेकत्वविशिष्टे एकत्वा-

मानाधिकरणे प्रथमेतिवार्त्ति कविरोधो न। उक्तार्थत्वादिति। एकत्वादिष्वर्थेषु विभक्तिर्विधेया ते चार्थाः प्रकृत्यैव प्रतिपादिता इति तेषामभिधानाय विभक्तिर्न स्याद्यथा न हि भवति घटोऽस्ति कलश इति। नन्वेकत्वविशिष्टे एकत्वस्यान्वयायैकवचनमस्त्वित्यत आह। प्रातिपदिकेति। संख्यान्तरेति। प्रकृत्यर्थतावच्छेदकातिरिक्तसंख्यान्तरेत्यर्थः। एकादिशब्दात्तर्हि द्विवचनादिकमुत्पद्यतामित्यत आह। अनन्वितार्थकेति। सर्वविभक्त्यापत्तिरिति। सर्वप्रथमापत्तिरिति भावः। ननु हिमानीन्द्राणीत्यादौ कथमप्रथमा महत्त्वपुंयोगयोराधिक्यादित्यत आह। लिङ्गविशिष्टपरिभाषयेति। प्रातिपदिकार्थमात्र इत्यत्र प्रातिपदिकपदं प्रातिपदिकप्रकृतिकलिङ्गबोधकप्रत्ययस्यापि बोधकमिति यस्मात्लिङ्गबोधकप्रत्ययान्तात्प्रथमोत्पत्तिरभिप्रेता तज्जन्यनियतोपस्थितिकोऽर्थो विवक्षितः स च प्रकृतेऽस्तीति भावः। उन्मानादिष्वपीति। पलम् सुवर्णमित्यादौ। न च प्रातिपदिकेन स्वार्थस्योक्तत्वात्तच्च कथमप्रथमेति वाच्यम्। प्रातिपदिकार्थे प्रथमाविधानसामर्थ्येन तत्रोक्तार्थानामितिन्यायाप्रवृत्तेः। यथा पञ्चकम्प्रातिपदिकार्थ इतिपक्षे कारकस्य प्रातिपदिकार्थत्वेऽपि तत्र द्वितीयादीनां विधानमन्यथा विभक्तिरहितस्य प्रयोगः स्यात्। स च न केवलेत्यादिवचनबाधितो नापि तेभ्यः कर्मादिप्रतीतिः कस्यापि भवति तथा प्रातिपदिकेन तदर्थे प्रतिपादितेऽपि प्रथमा भवतीति प्राचीनमतनिगर्वः। स्वसिद्धान्तमाह। परे त्विति। प्रवृत्तिनिमित्तमिति यस्माच्छब्दात्प्रथमाविधानन्तत्तच्छब्दप्रवृत्तिनिमित्तमित्यर्थः। स च। तदाश्रयश्च। आरोपिततदाश्रयः। प्रवृत्तिनिमित्तप्रकारकारोपविशेष्य इत्यर्थः। अत एव। आरोपिततदाश्रयग्रहणादेव। लाक्षणिकत्वेऽपि। गोपत्वप्रकारकारोपविशेष्यार्थबोधकत्वेऽपि। अत एव। प्रवृत्तिनिमित्ततदाश्रययोरेव। प्रातिपदिकार्थपदेन ग्रहणादेव। प्रातिपदिकार्थतया। प्रातिपदिकपदजन्योपस्थितिविषयार्थतया। तदैयर्थ्यम्। लिङ्गग्रहणवैयर्थ्यम्। अत एव। लिङ्गस्य प्रातिपदिकार्थत्वादेव। सिद्धान्तितमिति। स्त्रीत्वस्य प्रातिपदिकवाच्यत्वे हि स्त्रीप्रत्ययस्य तद्द्योतकत्वं युज्यते। पुंशब्दस्य प्रकृतित्व इति। पुंवाचकशब्दस्य प्रकृतित्व इत्यर्थः। एतेन पुंसि विद्यमानस्य शस इति नार्थ इति इति सूचितम्। वार्त्तिकविरोधशङ्कां वारयति। अभिहित इति। एतेन। उक्तव्याख्यानेन। तत्र

ये। वार्त्तिककारमते । लिङ्गग्रहणस्य सार्थक्याय भूमिकामारचयति । तटादिशब्दानामपीति । यदि प्रातिपदिकजन्योपस्थितिविषयस्यैव प्रातिपदिकार्थपदेन ग्रहणं स्यात्तदा लिङ्गस्यापि तटादिशब्दजन्योपस्थितिविषयतैयता प्रातिपदिकार्थपदेन तेभ्यः प्रथमासिद्धौ लिङ्गग्रहणं व्यर्थं स्यादिति भावः। ननु लिङ्गन्न ततो नियतोपस्थितिकमत आह । नियमांशनिवेशे खिति। अत एव अलिङ्गा लिङ्गप्रवृत्तिनिमित्तकाश्च प्रातिपदिकार्थमात्रे इत्येतदुदाहरणत्वेन प्रातिपदिकार्थे किमुदाहरणमिति प्रश्ने स्त्री पुमान्नपुंसकमित्येते दर्शिताः। अन्ये लिङ्गाधिक्य इत्यस्य। अत्रैवार्थे वृत्तिकारसम्मतिमप्याह। इदमेवेति। प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणस्याभिप्रेतत्वादेव । अव्ययपुमादयइति। अव्ययस्य प्रातिपदिकार्थइत्येतदुदाहरणे प्रमाणन्तु प्रातिपदिकग्रहणङ्गमयम्। उच्चैर्नीचैरित्यत्रापि यथा स्यादितिभाष्यमेव। अन्ये सर्व इति। क्षणादयः। तत्र लिङ्गप्रतीतेराधिक्यात्। एवं खट्वादिशब्दानामपि लिङ्गप्रवृत्तिनिमित्तकत्वा भावेन लिङ्गाधिक्य इत्येतदुदाहरणत्वमेव न च मृडानी हिमानीत्यादौ घुंयोगमहत्त्वादेरधिकस्य भानेन प्रथमा न स्यादिति वाच्यम् मृडानीत्यादावारोपितमृड़त्वं मृडसम्बन्धश्च प्रवृत्तिनिमित्तमस्य भानसत्त्वे । यदि त्वस्य न भानन्तदा त्वारोपितमृडत्वरूपप्रवृत्तिनिमित्तमेव प्रतीयते इति न मात्रेण व्यावृत्तिः। एवं हीमानीत्यत्र महत्त्वविशिष्टहिमत्वं प्रवृत्तिनिमित्तमिति स्वीकारात्। परिमाणग्रहणचारितार्थ्यमाह। द्रोणत्वादिप्रवृत्तीति। लिङ्गवदिति। यथा क्षणादिशब्दजन्यप्रतीतिविषयस्य लिङ्गस्य विशेषणतया भानन्तथा द्रोणः खारी आढकमित्यादिशब्दे यः परिमाणाभिन्नो द्रोण इत्याद्याकारो बोधो भवतीति द्रोणादिशब्दजन्यप्रतीतौ परिमाणस्याधिकस्य भानमतः परिमाणग्रहणमिति भावा द्रोणत्वादिकमखण्डोपाधिर्जातिविशेषो वा। तच्चेयत्तावशेषावच्छिन्नपलादिपरिच्छेन्नधान्यादिपरिच्छेदकत्वसभानाधिकरणम्। काकादिवाचकस्य तु लिङ्गाधिक्य इत्येतदुदाहरणत्वमेव। ननु परिमाणमपि यदि द्रोणाः दिशब्दार्थस्तदा द्रोणः परिमाणमिति सह प्रयोगानुपपत्तिरत आह: द्रोणः परिमाणेति। सम्बन्धेनान्यतरवैयर्थ्यमिति न्यायात्। अभ्युपेत्य वादोयम्। वस्तुतः सन्देहनिवृत्त्यर्थत्वात्तथा प्रयोग इत्याशयेनाह। द्रोणशब्दस्येति। मूलोक्त-

रीत्या परिमाणग्रहणस्य सार्थक्यं खण्डयति । मूलोक्तमिति । न च तिङ्समानाधिकरणे प्रथमेतिवार्त्तिकसम्मत्या समानाधिकरणनामान्तरान्वय एव परिमाणमात्रे प्रथमा इति प्रागुक्तत्वात्तद्रीत्या नायन्दोष इति वाच्यम् । यत्र द्रोणादिपदार्थस्य न समाधिकरणनामान्तरार्थेन्वयविवक्षा किन्तु तदर्थस्य सत्त्वमात्रप्रतिपादयिषा तत्र प्रथमानापत्तेरुक्तनियमास्वीकारात् । यदि कल्पनाऽतिप्रसङ्गभङ्गाय तादृशी क्रियते तदाप्याह । किञ्चेति । तिङ्समानाधिकरण्यं हि तिङर्थाऽभिन्नार्थाभिधायकत्वन्तच्च मूलोक्तरीत्या नास्तीति भावः । प्रत्युत तिङर्थेऽन्वय एव साधुत्वमितिवार्तिकाल्लभ्यते मूलोक्तरीत्याऽन्वये त्वसाधुत्वमस्य स्यादित्यपि बोध्यम् । कैयटोक्तम्परिमाणग्रहणस्यार्थक्यन्दूषयति । न चेत्यादिना । मेये । परिच्छेद्ये । कर्मव्युत्पत्त्या । परिमीयते यत्तत्परिमाणमितिरीत्या । असिद्धापत्तेरिति । अत्र सिंहशब्दस्य सिंहसदृशप्रतिपादकतया कस्यापि सदृशस्य निरुक्तप्रातिपदिकार्थत्वन्नास्ति । तद्दिति । पदे एव लक्षणेति प्रागुक्तरीत्या स्वार्थमात्रे सिंहे तस्य साधुत्वमिति रीत्या यदि सिंहो माणवक इति वाक्यं साधिति ब्रूषे तदा द्रोण इत्यादीनामपि साधुत्वं तथैव भविष्यतीति भावः । न च परिमाणमात्रविषयकप्रतीतिजनकात्प्रथमेत्यस्य द्रोणः स्वारीत्यादुदाहरणमिति कथं लिङ्गस्याप्येभ्यः प्रतीतेरिति वाच्यम् । परिमाणभिन्नत्वे सति प्रातिपदिकार्थलिङ्गान्यतरभिन्नो यस्तदविषयकत्वस्य प्रतीतिविशेषणत्वात् । ननु प्रातिपदिकेन प्रातिपदिकार्थस्योक्तत्वेऽपि प्रातिपदिकार्थे प्रथमेति वचनसामर्थ्यात्तदर्थगतसङ्ख्याया अनभिहितत्वमादाय प्रथमा एकादिशब्दस्थले तु सङ्ख्याप्यभिहितेति प्रथमा न स्यात् । यदि न केवलेतिसमयपरिपालनायाव्ययेभ्य इव प्रथमेति ब्रूषे तदैकादिशब्देभ्यो द्विवचनबहुवचनयोरप्यापत्तिरत आह । एको द्वावित्यादेति । सङ्ख्यावाक्यान्वयित्वेन । प्रातिपदिकार्थस्यानभिहितत्व इत्यर्थस्तु पूर्वोक्तरीत्या वक्तुमशक्यः किन्तु तदर्थगतसंख्यायामनभिहितायामित्येव वाच्यमेवं सति तादृशवाक्यस्यान्यच्च चरितार्थत्वादेको द्वौ चय इत्यत्र न स्यादिति भावः । नन्वेवं रामावित्यादौ प्रथमा न स्यात्तेषु लिङ्गाधिक्येऽपि तन्मात्राधिक्याभावादत आह । रामावित्यादाविति । संख्याधिक्येति । संख्याधिक्यविवक्षायामित्यर्थः । लिङ्गमात्राधिक्येऽपि प्रातिपदिकार्थगतत्वात्

दौ विवक्षित इत्यर्थः। न च राम इत्यत्र संख्याधिक्यसत्त्वेऽप्रथमा न स्यादित्येवकवचनान्तस्य पुरस्फूर्तिकत्वात् कुतो न शङ्का कृतेति वाच्यम्। द्वेरुकयोरितिसूत्रस्थैकशब्दस्य प्रत्याख्यानेनादोषात्। सौत्रमात्रग्रहणप्रयोजनमाह। मात्रग्रहणन्विति। मात्रग्रहणाभावे त्विति पाठः। अस्य इति नियमः स्यादित्यनेनान्वयः। कर्मण्येव द्वितीयेत्येवंविधनियमेन यत्र कर्मत्वाज्ञानन्तत्रैव द्वितीया व्यावर्त्त इत्यभिप्रायेणाह। यथा कर्मणीत्यादि। कर्मत्वाज्ञानसमानकालिकस्य। -कर्मत्वाभावसमानाधिकरणस्य। अर्थान्तरस्य। क्तीयादिप्रयोजककरणत्वादेः। अपादानत्वादिबोधेऽपीति। गां दोग्धि पय इत्यत्रान्तःस्थितद्रवद्रव्यवृत्तिविभागानुकूलव्यापारानुकूलव्यापारोऽर्थ इति स्वीकारे तद्योगेऽपादानसंज्ञाकर्मसंज्ञयोः प्राप्तावपादानमुत्तराणि कारकाणि बाधन्त इत्याकडारेतिसूत्रस्थभाष्योक्तरीत्या स्थितकर्मत्वमादाय द्वितीया यथा भवतीति भावः। दार्ष्टान्तिके योजयति। तथाऽनेनापीति। प्रातिपदिकार्थ इतिसूत्रेणापीत्यर्थः प्रातिपदिकार्थसत्त्व एव प्रथमा न तु तदसत्त्व इत्यस्य प्रातिपदिकार्थसत्त्वाभावविशिष्टशब्दव्यावर्त्तकता स्यादिति भावः। अनर्थकनिपातेभ्यः। पादपूरणार्थेभ्यः। तेषाम्प्रवृत्तिनिमित्ततदाश्रयरूपप्रातिपदिकार्थाभाववत्त्वात्। इष्टापत्तावाह। एवञ्च तत्समभिव्याहार इति। अनर्थकनिपातसमभिव्याहार इत्यर्थः। घटः पटो वै मम स्वं घटः पटो वै मे स्वमित्यादौ। तत्सत्त्व इति। मात्रपदसत्त्व इत्यर्थः। कर्मत्वादियोग्यार्थकेति। कर्मत्वाद्याधिक्ये प्रथमाव्यावृत्त्यर्थं हि मात्रग्रहणन्तेन पर्युदासन्यायेनैतल्लाभः। न चानर्थकनिपातेभ्यो मात्रग्रहणाभावे पूर्वोक्तरीत्या यदि प्रथमा न भवेत्तदाऽनर्थकस्य निपातस्य प्रातिपदिकसंज्ञेतिवार्त्तिकवैयर्थ्यमिति वाच्यम्। स्वरार्थन्तत्स्यात्। न च निपाता आद्युदात्ता इत्यनेन स्वरोभविष्यतीति वाच्यम्। अव्ययेभ्यः सुपामपि विभक्तीनामेकवचनानीति पक्षे द्वितीयाद्यर्थन्तदित्याशयात्। कर्मत्वयोग्यार्थकेति निवेशयित्वा यदि नियमस्तदाऽनर्थकनिपातेभ्यः प्रथमा सुतरां सिध्यतीति भावः। ननु भवदुक्तनियमे किम्मानमत आह। इदमेवेति। तदकरणलाघवेनेति। मात्रग्रहणाकरणलाघवेनेत्यर्थः। स्पष्टञ्चैदभाष्य इति। तत्र हि शङ्कासमाधानाभ्यामेवमुक्तम्। अथ मात्रग्रहणं किमर्थम्। एतन्मात्र एव प्रथमा यथा स्यात्। कर्मादिविशिष्टे मा

भूदिति । अत्र कर्मादिशब्दस्तच्छक्तिपरः । कटं करोति । नैतदस्ति प्रयोजनम् । कर्मादिषु द्वितीयादयो याः विभक्तयस्ताः कर्मादिविशिष्टे बाधिका भविष्यन्ति । अथ वाचार्यप्रवृत्तिर्ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति । यदयं सम्बोधने प्रथमां शास्ति अधिकस्यार्थस्य सङ्गावेपि प्रातिपदिकार्थसङ्गावनिमित्ताश्रयेण चेत्प्रथमा तदा सम्बोधनाधिक्येऽप्येवमेव प्रथमा भविष्यति पुनस्तल्किमर्थमिति भावः । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किमामन्त्रितमिति वक्ष्यामीति । यत्तर्हि योगविभागं करोति । इतरथा सम्बोधने आमन्त्रितमित्येव ब्रूयात् इति । भाष्यप्रदीपोद्योते निरूपितमिति । शेखरोक्तरीत्येव निरूपितम् । द्वितीयादयो याः विभक्तय इति । कर्मणि द्वितीयैवेत्येवमर्थनियमपक्षे द्वितीयादीनां स्वस्वविषये प्रथमाबाधकतया कर्माद्याधिक्ये प्रथमाया अप्राप्त्या मात्रग्रहणन्न कार्यमिति सूचितम् । यदि मात्रग्रहणन्न क्रियते तदा सम्बोधने चेतिसूत्रं लिङ्गादिग्रहणञ्च न कार्यमित्यपि ध्वनितम् । सम्बोधने चेतिसूत्रं व्याचष्टे । तत्र वर्त्तमानादिति । प्रातिपदिकादित्यधिकारतो लब्धम् । सूत्रकारमते मात्रग्रहणम्प्रातिपदिकार्थेतिसूत्रेऽस्तीत्यस्यारभ्यः । अभिमुखीकरणमिति । स्वोच्चारितशब्दबोध्यो योऽज्ञातार्थस्तद्बोधानुकूलव्यापारानुकूलो व्यापार इत्यर्थः । सम्बोध्यश्च स्वव्यापारप्रयोज्यो यस्ताट्शार्थबोधानुकूलो व्यापारस्तदाश्रय उच्यते । राम माम्पाहीत्यादौ ताट्शेऽज्ञातार्थबोधे प्रकृत्यर्थस्य समवेतत्वसम्बन्धेनान्वयः, तत्रैव विषयभूतार्थेऽभेदसम्बन्धेन प्रेरणाविषयमत्कर्मकरक्षणस्यान्वयः । सम्बोध्यतावच्छेदकत्वेन यो ज्ञातः स एवोच्चारयिताऽभिमुखीक्रियते तेन रूपेण । अत एव ब्राह्मणत्वेन यो ज्ञातः स एव हे ब्राह्मणात्रागच्छत्यं वमभिमुखीकृत्योच्यते न तु हे ब्राह्मणत्वेनेति । एवञ्च रामसमवेतो यो मत्कर्मकप्रेरणाविषयरक्षणाभिन्नार्थबोधस्तदनुकूलव्यापारानुकूलो व्यापार इत्याकारकः शाब्दबोधः । तत्फलम्प्रवृत्तिनिवृत्ती इति । हे देवदत्त तत्र गत्वा जलमत्र आनीयतामितिवाक्यप्रयोगो यत्र कृतो मैत्रेण तत्र देवदत्तस्य देवदत्तसमवेततद्देशाधिकरणकगमनविशिष्टजलकर्मकतद्देशापादानकप्रेरणाविषयानयनाभिन्नार्थबोधानुकूलव्यापारानुकूलो व्यापार इत्याकारकः शाब्दबोधो जायते तदनन्तरन्देवदत्तस्य प्रवृत्तिर्भवति । यत्र तु देवदत्त तत्रार-

र्थे व्याघ्रादिसेविते न गन्तव्यमिति यज्ञदत्तेनोक्तम्तत्र देवदत्तस्य प्रेरणाविषयतेच्छाधिकरणकगमनाभावाभिन्नार्थविषयकदेवदत्तसमवेतबोधानुकूलव्यापारानुकूलो व्यापार इत्याकारकशाब्दबोधे जाते तदनन्तरन्तेच्छाधिकरणकङ्गमनमनिष्टसाधनमिति मानसबोधे सति गमनान्निवृत्तिः । एवं यत्र प्रवृत्तिस्तत्र तादृशशाब्दबोधानन्तरम्प्रेरणाविषयत्वेन ज्ञातक्रियायामिष्टसाधनताज्ञानमनन्तरम्प्रवृत्तिरित्यूहनीयम् । तत्त्वासम्भवादिति । तेन रूपेण सम्बोध्यत्वासम्भवादित्यर्थः । एतेन सम्बोध्यस्योद्देश्यत्वे बीजन्दर्शितम् । सिद्धं हि लोके उद्देश्यभवति । अत एव । अस्यानुवाद्यविषयत्वादेव । एतदर्थान्वयः । उद्देश्यस्य सम्बोधनोन्तार्थतया तस्य क्रियायां विधेयभूतायामन्वयः । सम्बोधनपदस्य कारकवाचित्वव्यवहारोऽप्येतन्मूलक एवाभियुक्तानाम् । ननु पूर्वोक्तरीत्या बोधे सम्बोधनान्तार्थान्वयस्वीकारे तिङ्समानाधिकरणे प्रथमेतिवार्त्तिकविरोध इति चेत् । एवन्तर्हि सम्बोधनान्तार्थस्य विधेयभूतक्रियायां विशेषणतापन्नो य आख्यातार्थस्तत्रैवान्वयः स्वीकार्यः । बोधे सम्बोध्यवृत्तित्वस्य तु प्रत्यासत्त्या लाभः । अत एवं । सम्बोध्यतावच्छेदकरूपेणसम्बोध्यस्य यत्र सिद्धत्वन्तत्रैव सम्बोधनविभक्तिस्वीकारादेव । व्यवस्थयैव प्रयोग इति । यथा रामायणे वाल्मीकीये अयोध्याकाण्डे चित्रकूटे प्रसादनार्थं रामम्प्रति समागतभरतम्प्रति रामवाक्ये त्वं राजा भव भरत स्वयन्नराणां वन्यानामहमपि राजराक्षसानाम् । गच्छत्वम्पुरवरमद्य सम्प्रहृष्टः संहृष्टस्त्वहमपि दण्डकान् प्रवेक्ष्ये इतिपद्ये त्वं राजा भवेति सम्बोधनविभक्त्यन्तभिन्नं प्रागुक्तम् । ननु इन्द्रशत्रो वर्द्धस्वेति भागवते प्रयुज्यमानं सङ्गच्छते कथमिति चेदार्षत्वात् । एवं सति यादृशोऽर्थः फलितस्तमाह । राम मामाहीत्यादाविति । एवञ्च यद्रूपावच्छिन्नस्य सम्बोध्यता प्रतीयते तद्रूपावच्छिन्न एव त्वम्पदस्य यत्र प्रयोगस्तत्र परामृश्यते । सम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नस्य युष्मदर्थत्वात् । अत एव सम्बोधनविभक्त्यन्तसमानवचनकं समानविभक्त्यन्तमेव त्वमित्यादि पदं साधु । यत्र तु विधेयभूतक्रियावाचकन्न श्रूयते तत्र वाक्यार्थपर्यवसानाय यत्किञ्चित्शब्दन्दर्शयति । व्रजसि देवदत्त इत्यादि । यत्र तु देवदत्त त्वम्पण्डित इत्येवोक्तन्तत्र असीत्यस्याध्याहारः । अत एव विधेयभूतक्रियावाचकम्पदं लोडाद्यन्तमेव प्रयोक्तव्यमिति न नियम इति

दिक्। ननु व्रजानीत्यादौ जानीहीत्यादेरध्याहारे एकतिङ्वाक्यमितिलक्षणानाक्रान्तत्वात्तेषु निघातादीनामप्रवृत्तिः कथं स्यादत आह। एकतिङिति। श्रूतमाणैकतिङित्यर्थं इत्यत्र बहुव्रीहिः॥ इदं समाधानमाचीनरीत्या। यदि तु प्रविश पिण्डीमित्यत्रैव वाक्यैकदेशन्यायेन बोधः स्वीक्रियतेऽध्याहारपदार्थोपि स एवाश्रीयते तदा यथाश्रुतमेव साधु। उद्देश्यविधेयभावस्य कुतो लाभ इत्यत आह। उद्देश्यविधेयभाव इति। अभिमुखीभवनानुकूलव्यापारमाह। अभिमुखीति। अत एव। सम्बोधनविभक्त्यन्तस्य विधेयभूतक्रियायामन्वयादेव। यदि धिक्शब्देन योगः स्यात्तदा द्वितीया स्यादिति प्रथमान्तस्याध्याहृतो योऽसीतिशब्दस्तत्प्रतिपाद्यक्रियायामन्वयः। अनध्याहारे। असीत्यादिशब्दानध्याहारे। तदा धिक्शब्देन योगे द्वितीया भवतीति भावः॥

॥ इति प्रथमाविवरणम् ॥

कारके इत्यधिकृतस्य उत्तरसूत्रैकवाक्यतया बोधकत्वन्तदा स्याद्यदि तदर्थपरिज्ञानं स्यादतस्तस्यार्थमाह। कारकत्वमित्यादिना। कारकशब्दः करोति कर्तृकर्मादिव्यपदेशानिति विवक्षया क्रियापरः जनकमित्याध्याहारः। सप्तम्यर्थो निरूपितत्वम्। तस्य जनकशब्दार्थैकदेशजनकतायामन्वयः॥ एतेन क्रियाजनकत्वं कारकत्वमित्यर्थादुक्तप्रभवति। कारकाधिकारप्रयोजनमाह। ब्राह्मणस्येति। अकथितत्वेतिसूत्रमपादानत्वादीनामसन्निपूर्वकाविवक्षायां सर्वथा तदविवक्षायाञ्च प्रवर्त्तते इत्यग्रे वक्ष्यते। एवञ्च ब्राह्मणस्य पुत्रमित्यत्र सर्वथा तदप्राप्तिसत्त्वादकथितत्वेत्यनेन कर्मसंज्ञाप्राप्तिः स्यात्कारकाधिकारे कृते सति तु न। ब्राह्मणस्य कारकत्वाभावात्। कारकत्वाभावमुपपादयति। पुत्रेणान्यथा सिद्धेति। जनकत्वस्यानन्यथासिद्धनियतपूर्ववृत्तित्वरूपतया ब्राह्मणेऽवश्यकृतनियतपूर्ववर्त्तिन एव कार्यसम्भवे तद्भिन्नमन्यथा सिद्धमित्यन्यथासिद्धिसत्त्वेन कारकत्वाभावात्। अत एव। कारकाणां क्रियाजनकत्वादेव। स्वस्वावान्तरक्रियाद्वारेति। स्वस्वनिष्ठफलोत्पत्त्यनुकूलक्रियाद्वारेत्यर्थः। सर्वस्मिन्नेव कारक-

त्वेनाभिप्रेते फलानुकूला क्रियाऽस्त्येव। एतावान् परं विशेषः। यदा यन्निष्ठ-क्रियायाः प्राधान्येन धातुवाच्यत्वविवक्षा तदा तस्य कर्तृत्वम्। काष्ठम्पचति। स्थाली पचतीति यथा। यदा तु न तन्निष्ठव्यापारस्य प्राधान्येन धातुवाच्यत्व-विवक्षा तदा तेषान्न कर्तृत्वम्। किन्तु करणत्वादिकम्। तदुक्तं हरिणा। वस्तु-तस्तदनिर्देश्यन्न हि वस्तु व्यवस्थितम्। स्थाल्या पचत इत्येषा व्यवस्था दृ-श्यते यत इति। ननु यदा सन्निधाने स्थिता सन्मञ्चन्द्रविणन्देहीति दातारं याचते तदनन्तरं स ददातीति तदा सम्प्रदानव्यापारस्य दानक्रियापूर्वकालिक-त्वात्सम्भवति कारकत्वम्। यदा तु सोऽसन्निहितः। अथ च मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत्। दाता तत्फलमाप्नोति प्रतिग्राही न दोषभागित्युक्त्व-न ताट्टशसम्प्रदानमुद्दिष्टन्तदा तद्व्यापारस्य कथं कारकत्वन्तस्मिन् व्यापाराभा-वादत आह। असन्निहितेति। स्वज्ञानपूर्वकालत्वेनेति। स्वज्ञानम्पूर्वकालं य स्याः सा स्वज्ञानपूर्वकाला तस्या भावः स्वज्ञानपूर्वकालत्वम्। यथा यागस्य साक्षात् स्वर्गाव्यवहितपूर्ववृत्तित्वाभावेऽपि परमापूर्वद्वारा स्वर्गजनकत्वन्तथा विषयविधयाऽसन्निहितसम्प्रदानजन्यं यत्तद्विषयकं ज्ञानं तज्ज्ञानक्रियाऽव्यवहि-तपूर्वकालवृत्तीति सम्प्रदानस्यापि क्रियाजनकत्वमस्तीति भावः। फलस्यापीति। स्वज्ञानद्वारा व्यापारजनकत्वम्। प्रथमम्फलज्ञानन्ततः फलेच्छा ततस्तदुपायान्वे षणं ततस्तदुपाये फलसाधनताज्ञानन्ततउपायेच्छा तत उपायनिष्ठसाध्यत्वाख्य विषयताका प्रवृत्तिरित्येवंक्रमेण फलस्य क्रियाजनकत्वमिति भावः। वीप्सघटा-देरिति। बुद्धिसत्तासमाविष्टस्य घटशब्दवाच्यत्वात्। स्मृत्यादीनामिति। आदिना घटङ्करोतीत्यादिसङ्ग्रहः। अत्र क्रियापर इति। इदमुपलक्षणम्। तथायुक्तम्। स्पृहेरीप्सितः। वारणार्थानामितिसूत्रेऽप्यारूढ एव। अयम्भावः। कर्तुरिति न शेषे षष्ठी। पटो नीलो जायतामितीच्छया नीलकरणे यच्च प्रवृत्तिस्तत्र पटे नीलङ्करोतीति प्रयोगानुपपत्तेः। अधिकरणसंज्ञाम्बाधित्वा पटस्य कर्मत्वं स्यात्। किन्तु कर्तुरिति कर्तृषष्ठी। एवं सत्यस्य रूढत्वे कर्तृषष्ठ्यन्तस्यानन्वयापत्ति-रतः क्रियाशब्दोऽयमिति। न चाच्छिन्नक्रियायामन्वयो भविष्यतीति वाच्यम्-ऽतीतक्रियान्वयसम्भवे आच्छिन्नक्रियान्वयमादाय कारकषष्ठ्युपपादनन्नोचितमि-त्याशयात्। स्पष्टञ्चेदमिति। तत्र हि किमदाहरणम। माषेभ्यो गां वारयति।

भवेदस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः यस्य तु खलु गावो न माषाः कथन्तस्य माषा ईप्सिताः स्युः । अभिप्रेतपर्यायमीप्सितशब्दमन्यत इति कैयटः । तस्यापि माषा एवेप्सिताः । एवकारो भिन्नक्रमः । माषा ईप्सिताः एवेत्यर्थः । आतश्चेप्सिताः यदेभ्यो गा वारयति । अत्र कैयटः । ईप्सितशब्दः क्रियाशब्द आश्रीयते न तु रूढिशब्दः । तत्र वारणक्रियया परकीया अपि माषा वारयितुमीप्सिता भवन्ति । माश्नन्ते इत्येतेभ्योऽसौ गा वारयति । इह कूपादन्धं वारयतीति कूपेऽपादानसंज्ञा न प्राप्नोति न हि तस्य कूप ईप्सितः । कस्तर्ह्यन्धः ईप्सितशब्दस्य रूढत्वाभिप्रायेण प्रश्नः । तस्यापि कूप एवेप्सितः पश्यत्ययमन्धः कूपमा प्रापदिति ॥ क्रियाशब्दत्वमेवेप्सितशब्दस्येत्यभिप्राय इति । मतिरिच्छेति । पुनर्बुद्धिग्रहणात् । एवं सति यादृशो वाक्यार्थः सम्यन्नस्तमाह । एवञ्चेति । आप्तिशब्दस्य व्याप्तिपरत्वभ्रममनिरासायाह । आप्तिश्चेति । कर्त्ता च केनाप्तुमिच्छतीत्याकाङ्क्षायां शान्त्यर्थ आह । कर्तृपदार्थविशेषणीभूतेति । प्रधानीभूतव्यापारस्यैव कर्तृपदार्थघटकतया तादृशव्यापारेण सम्बन्धस्य च तज्जन्यफलाश्रयत्वरूपस्य प्रकृते ग्रहणमिति भावः । फले व्यापारजन्यता च साक्षात्परम्परासाधारणी । तेन तण्डुलम्पचतीत्यत्र साक्षात्प्रधानीभूतव्यापारजन्यविक्लित्यादिफलस्य चैत्रं ग्रामं गमयति विष्णुमित्र इत्यत्र परम्परया विष्णुमित्रनिष्ठव्यापारप्रयोज्यस्य संयोगरूपफलस्य च सङ्ग्रहः । फलस्य कर्मत्वमुपपादयति । फलस्यापीति । फलसम्बन्धित्वात्फलाश्रयत्वात् । अत एव । फलस्य कर्मत्वादेव । कर्मत्वसिद्धिः । कर्मसमानाधिकरणस्य कर्मत्वं न्याय्यमेवेति भावः । अत्रेदम्बोध्यम् । व्यपदेशिवद्भावेन फलाश्रयत्वात्फलस्य कर्मत्वन्न सकर्मकधातुस्थल एव । किन्त्वकर्मकधातूपस्थाप्यफलाश्रयस्यापि आस्ते शेते इत्यादौ कर्त्तुः कर्तृसंज्ञया बाधान्न कर्मत्वम् व्यपदेशिवद्भावेन फलाश्रयस्य तु भवत्येव । अत एव ओजःसहोम्भसा वर्त्तते इति सूत्राद्वर्त्तत इत्यनुवर्त्तमाने तद्व्याक्रियायाः समानाधिकरणक्रियावाचकत्वमनुपूर्वमीपलोमकूलमिति सूत्रे तदित्युपात्तम् । अत्र फलस्य कर्त्तुरितिसूत्रेण कर्मत्वभ्रम्येव । बाधिकायाः कर्तृसंज्ञाया अप्राप्तेः । फलेन कर्मणा सकर्मकत्वव्यवहारस्तु न । एतादृशकर्मणः सर्वत्रैव सम्भवेनाकर्मकत्वव्यवहारस्यैवोच्छेदापत्तेरिति । सङ्घासंज्ञया-

क्षिप्तमिति । करोतीति कारकमिति । किं करोति इति प्रश्ने साध्यत्वेन योऽर्थः प्रतीयते तन्निरूपितसाधनत्वमेव गृह्यते । सा च क्रियैव न तु द्रव्यन्तत्स्वभावतः सिद्धत्वेनैव भासते । एतत्पक्षे एकसंज्ञाधिकारात्तृज्ञाद्ययविधानेऽपि पर्याप्तः स्यादिति द्वयोः समावेशसिद्धये कारकं सदित्युक्तम् । गतिकारकोपपदादितिसूत्रे कारकशब्देन कारकसंज्ञकस्यैवोपस्थितिः । एवमेवैतदधिकारोक्तकर्त्रादिसंज्ञासु बोध्यम् । तेन ग्रामे वास इत्यादौ कारकत्वात्कृदुत्तरपदप्रकृतिस्वरस्याथवर्जिति विहितोऽधिकरणत्वात्सप्तमी च सिध्यति । भाष्योक्तप्रथमपक्षमुक्त्वा द्वितीयपक्षमाह । यद्वेति । तत्र ह्येवमुक्तं यावद्भूयात्क्रियायामिति तावत्कारके इत्युक्तम् । एवञ्च क्त्वा निर्देश उपपन्नो भवति कारके इति । कारकशब्दस्य क्रियापरत्वे युक्तिमाह । करोति कर्तृकर्मादिव्यपदेशानितीति । कारके इति वैषयिकाधारे सप्तमी तदाह । विषयत्वमिति । स्वरितत्वमिदन्दोषविशेषरूपङ्कारकशब्दे बोध्यम् । स्वरितेनाधिकार इति सूत्रस्य स्वरितेनाधिकङ्कार्यमित्यर्थादेतदधिकारोक्तसंज्ञाविशिष्टस्यैव ग्रहणमित्येव कार्यमुक्तं गृह्यते । नटश्रवणमिति । अत्र नटस्य श्रवणक्रियाजनकत्वेपि तस्य नैतदधिकारोक्ताः कर्त्रादिसंज्ञाः । कृदुत्तरपदप्रकृतिस्वरइति । उत्तरपदे श्रवणशब्दे लितीतिसूत्रेण प्रथमाकारस्योदात्ततया समुदायो मध्योदात्तः स्यात्कर्त्रादिसंज्ञाविरहात्तु न भवति । आदिना नरश्रुतिरित्यस्य सङ्ग्रहः । समावेशफलन्दर्शयति । ग्रामेवास इति । अत्राधिकरणसंज्ञाकारकसंज्ञयोः समावेशे सप्तमीथाथादिस्वरयोः सिद्धिः प्रथमपक्षे । द्वितीयपक्षे आह । तत्स्वरसिद्धिरिति । थाथादिस्वरसिद्धिरित्यर्थः । यत्तु कृदुत्तरपदप्रकृतिस्वरस्य पूर्वमुक्तत्वात्तत्पदेन तस्यैव परामर्श इति । तन्न । थाथादिस्वरस्य तदपवादत्वात् । यदपि स्तम्बेरम इत्यत्र सप्तमीकृदुत्तरपदप्रकृतिस्वरयोः सिद्धिः समावेशफलमिति कैयटः । अत्र थाथादिस्वरस्तु न । अपासाङ्चर्येणैरच एव तत्र ग्रहणात् । तदपि न । उपपदत्वेनेष्टसिद्धेः । व्यापारलाभ इति । कारकसंज्ञापक्षेऽन्वर्थसंज्ञावलात् क्रियापरत्वे तु स्वत एवेतिभावः । साधेष्विति । अयमभावः । कर्तृपदाभावे ईप्सितपदस्य क्रियाशब्दत्वेऽपि कारकवृत्तिव्यापारप्रयोज्यफलाश्रयस्य ग्रहणे कारकवृत्तिव्यापारप्रयोज्यं यत्फलन्तत्कं लिकतन्माषभक्षणन्तदपि प्रकृतधात्वर्थतावच्छेदकं यत्फलन्तत्प्रयोज्यभव-

ति बन्धधात्वर्थश्च देशान्तरसंचारविरोधिविलक्षणशङ्कुसंयोगानुकूलव्यापारानुकूलो व्यापारः। एवञ्च धात्वर्थतावच्छेदकफलन्देशान्तरसंचारविरोधिविलक्षणशङ्कुसंयोगानुकूलव्यापाररूपन्तत्प्रयोज्यता तादृशभक्षणेऽस्ति । यदा माषश्चेत्समीपदेशेनिहितशङ्कौ बद्धोऽप्यश्वो रज्जुदीर्घत्वेन माषभक्षणङ्कृतवान् ततस्तज्ज्ञाननन्तरमन्यत्र बद्धस्तत्र माषाणामप्रसक्तिक्रियाधिकरणत्वम्प्राप्तम्बाधित्वा परत्वद्बन्धधात्वर्थतावच्छेदकफलप्रयोज्यफलाश्रयत्वात्कर्मसंज्ञा स्यादधिकरणसंज्ञायास्तु कटे आस्ते इत्यादौ चारितार्थ्यमस्ति। कर्तृग्रहणसत्त्वे तु कर्तृपदकारकपदलभ्यधात्वर्थयोः प्रत्यासत्त्यै कत्वलाभे प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्ये यत्प्रकृतधात्वर्थफलन्तस्य लाभान्नातिप्रसङ्ग इति भावः। तदाह। तदभिप्रायेणाह ॥ कर्मणः ईप्सिताः कर्मवृत्तिव्यापारप्रयोज्यफलाश्रयाः न कर्तुः न प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयत्वेनोद्देश्याः। यतस्तादृशफलाश्रयत्वेनोद्देश्यस्य कर्मत्वमतः कर्मकारकस्य फले एवान्वयः। पयोग्न्वुभयव्यावर्त्तकत्वमेकस्य प्रकर्षस्य न सम्भवतीत्याशयेन मूलोक्तं योजयति। अवयवद्वारेति। कर्तुरिति षष्ठ्यर्थप्रतिसम्बन्धिनोऽभावे आकाङ्क्षाशान्तिर्न भवतीति तच्छान्त्यर्थमुद्देश्यपदमध्याहृत्य व्याचष्टे। कर्तुरुद्देश्यमिति। पयस उद्देश्यत्वमुपपादयति। यदा क्षतभोजन इति। तत्क्रियायाः। भक्षणक्रियायाः। पयोलाभेच्छाप्रयोज्यत्वन्तत्क्रियाया अतः पयउद्देश्यकत्वमिति भावः। विशिष्टोपादाने तु यथा नातिप्रसङ्गस्तथोपपादयति। ईप्सिततमेति। तदा पयसः संस्कारकत्वमात्रविवक्षा न तु प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयत्वविवक्षेति भावः। यदा तु संस्कारकत्वेन करणत्वस्य फलाश्रयत्वेन कर्मत्वस्य च विवक्षा तदा परत्वात्कर्मत्वमेव भवति। तमस्येति। तन्मात्रस्येत्यर्थः। तमयङ्ग्रहणाभावे कर्तृवृत्तिव्यापारवाचकधात्वर्थफलाश्रयत्वं यस्य यस्य तस्य सर्वस्य कर्मत्वप्राप्तौ वारणार्थानामित्यनवकाशं सङ्गारयतियोगे कर्मसंज्ञाबाधकमेव स्यादित्येतदुपपादयति। तदभावे हीत्यादिना। ननु प्रवृत्तिविघातस्यैव वारयत्यर्थतया संयोगस्य कथन्तदुपस्थाप्यत्वमत आह। वारयतीति। संयोगादीत्यादिपदेन भक्षणादिसङ्ग्रहः। उभयत्र ॥ सूत्रद्वये तमयङ्ग्रहणे हि यथा माषवक्तस्य कर्मत्वम्भवति तथाह। तमयङ्ग्रहण इति। ईप्सिततमत्वे। प्रकृतव्यापार-

वाचकधातू-ख्याप्यफलाश्रये कूपाग्न्यादौ । व्यापारप्रयोज्यप्रकृतधात्वर्थेति । एवञ्चैताट्टशप्रयोज्यत्वलाभफलकन्तमग्रहणमिति भावः । प्रत्यासत्तीति । कर्तृपदार्थतावच्छेदकतया प्रकृतधात्वर्थप्रधानीभूतव्यापारलाभे तत्फलस्य शीघ्रोपस्थितिकत्वात्तत्रापि प्रकृतत्वलाभः । प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्येति परित्यज्य प्रयोज्येति यन्निवेशितन्तत्प्रयोजनमाह । प्रयोज्यत्वनिवेशादिति । नन्वाधारनिष्ठत्वर्थमित्यनुपपन्नं फलाधारस्यैव कर्मसंज्ञाविधानादत आह । कर्तृकर्मद्वारेति । एवञ्च यस्य कर्तृकर्मद्वारा धात्वर्थाधारत्वं स एवाधार इत्युच्यते । तण्डुलम्पचतीत्यादौ तण्डुलादिकन्तु न ताट्टशपरम्परया आधार इति भावः । कर्मणि द्वितीयेत्यादिसूत्राणां स्वसिद्धान्तरीत्याऽर्थमाह । कर्मपदेनैतदिति । कर्मत्वशक्तिमानिति । एवं सति शाब्दबोधोऽपि कर्मत्वशक्तिमत्त्वेन । ननु कर्मणि द्वितीयाया एव विधानं न त्वन्यविभक्तेरिति द्वितीयादीनामित्यसङ्गतमिति चेन्न । गत्यर्थकर्मणीतिसूत्रविहितचतुर्थ्याः कर्तृकर्मणोरितिसूत्रविहितषष्ठ्याश्च सङ्ग्रहार्थन्तथाकथनात् । क्रियाकारकभावसम्बन्धेति । क्रियाकारकयोर्भावः क्रियात्वकारकत्वसमूहः तद्रूपः सम्बन्धश्चेत्यर्थः । कर्मत्वादिशक्तिविशिष्टस्य द्वितीयादिवाच्यत्वे कर्मणि द्वितीयेत्यादिसूत्रं साधकमिति सुप्रसिद्धमेव । सम्बन्धस्य वाच्यत्वे तु भाष्यं साधकमाह । राज्ञः पुरुष इत्यत्रेति । एतेनाश्रयत्वेनाश्रयस्य वाच्यत्ववादिप्राचीनमतन्निरस्तम् । एवं सति याट्टशो बोधस्तमाह । एवञ्चेति । अनभिहित इति सूत्रं यथा प्रत्याख्यातन्तन्मकारमाह । पञ्चकेत्यादि । एतदभावेऽपीति । एतयोः सूत्रयोरभावेऽपीत्यर्थः । तत्र पदेति । कर्मणीत्यस्य नियमार्थत्वपक्षे इत्यादिः । भाष्यप्रसिद्धम्प्रत्याख्यानप्रकारमुक्त्वाऽनभिहितसूत्रारम्भवादिसूत्रकारमतमाह । यदा त्विति । तत्त्वम् । वाच्यत्वम् । सूत्रम् । अनभिहित इत्येतत् । द्वयोः पक्षयोर्मध्ये द्योतकतापक्ष एव मुख्यो भाष्यसम्मतत्वात् । ननु पञ्चकञ्चेत्यादिपदिकार्थस्तदा कर्मादिषु विभक्त्यर्थत्वव्यवहारस्य भाष्यसम्मतस्य का गतिरत आह । भाष्य इति । विभक्त्यर्थत्वव्यवहार इति । सुपाङ्गमादयोऽप्यर्थाः संख्या चैव तथा तिङभिमित्यत्र तथा व्यवहार इत्यर्थः । ननु द्योतकविषये उक्तार्थानामितिन्यायस्य व्यभिचार पूर्वन्न प्रदर्शित इति कथन्तन्न्यायमाश्रित्य प्रत्याख्यानमत आह। द्योतक-

विषय इति। दृश्यत इति। तच्चत्यपूर्वपक्ष इति। शेषः। तच्च। तत्सूत्रस्थभाष्ये। केवलद्योतकस्थलमाह। अत एवेति। द्योतकविषयेऽपि तन्न्यायाङ्गीकारादेव। यथा प्रातिपदिकविषये पञ्चकपक्षाङ्गीकारस्तथा धातुविषयेऽप्याह। एवञ्चेति। अत एव उभयत्र पञ्चकपक्षाङ्गीकारादेव। अत एव। तत्तत्पञ्चकस्य तत्तद्वाच्यत्वादेव। अत एव। उक्तपञ्चकस्य धातुवाच्यत्वादेव। तद्दत्तात्। भावकर्मवाचकात्। उभयत्र। प्रातिपदिकस्थले धातुस्थले च। एवञ्च हरिम्भजतीत्यादितः कर्मीभूतहरिकर्मकभजनमितिरीत्या बोधः। अत एव सत्त्वप्रधानानि नामानीतिवाक्यं स्वार्थादिनिरूपिताप्राधान्यं यतो नामार्थस्यातः साधु सङ्गच्छते। पचतीत्यादौ चैककर्तृविशिष्टा वर्त्तमाना पचिक्रियेतिरीत्या बोधः। ननु प्रातिपदिकार्थे प्रथमैवेत्यपि कथन्तत्राप्यनभिहिताधिकारादत आह। सा हीति। अत एव। कर्मादीनामभिधानस्थले प्रथमायाः सर्वसम्मतत्वादेव। विशेषणात्सेति। भीष्मपदाद्द्वितीयेत्यर्थः। परिगणनप्रत्याख्यानमाह। यदा त्विति। एतत्पञ्चस्य यदि कर्मत्वं शक्तिविशेषरूपन्तदोपपत्तिसमुद्भु सम्भवति। प्राचीनमते तु फलाश्रयत्वमेव कर्मत्वमाश्रयता चाश्रयभेदेन भिद्यते प्रकृते तु नाश्रयभेदो यद्यप्यस्ति तथाप्याश्रयतावच्छेकदभेदादाश्रयताभेदमङ्गीकृत्य यथाकथञ्चित्कर्त्तव्या। अत्र प्राञ्चः। पथा अश्वेन पथा दीपिकया निशायाङ्ग्रामं व्रजति चैत्र इत्यादौ सर्वेषां कारकाणान्धात्वर्थे स्वातन्त्र्येण विशेषणतयाऽन्वयस्तथा कटभीष्ममित्यादावपि स्वातन्त्र्येणोभयोः क्रियायामन्वयत्वं शाब्दबोधे पार्ष्टिकन्तु परस्पराभेदावगाहि मानसमिति तन्न युक्तमित्याशयेनाह। बोधस्त्विति। तयोः। द्वितीयान्तपदद्वयार्थयोः। विशेष्यविशेषणभावेनैवेति। इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावेनैवेत्यर्थः। समानविभक्तिकनामार्थयोरसति बाधकेऽभेदान्वयस्यौत्सर्गिकत्वात्। कर्मभीष्माभिन्नकर्मकटकर्मकं करणमित्यादिरीत्या भीष्मं कटं करोतीत्यादिभ्यो बोधः। यदि स्वातन्त्र्येण क्रियायामेवोभयपदार्थान्वयबोधस्तदाऽभेदान्वयबोधसामग्र्याभावसम्पादनाय किञ्चित्प्रतिबन्धकङ्कल्पनीयमिति गौरवम्। किञ्चैतद्वाक्यजन्यशाब्दबोधानन्तरङ्कटो भीष्मो न वेतिसन्देहनिवृत्त्यर्थन्नियमेन तादृशमानसकल्पना कार्या एवं सति सा मानसव्यक्तिस्तत्प्रागभावस्तद्ध्वंसश्चकल्पनीय इत्यतिगौरवम्। किञ्च प्राचीनमते कटभीष्मङ्कुर्वित्याकारकवाक्य-

जन्यशाब्दबोधसामग्र्याः स्वातन्त्र्येण भीष्मभिन्नः कटः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यमितिरीत्या यत्र्यत्यच्चन्तत्व प्रतिबन्धकत्वङ्कल्पनीयमित्यतिगौरवमस्माभिस्तु शाब्दसामग्र्याः कटो भीष्म इत्याकारकयोग्यताज्ञानघटिततया तादृशयोग्यताज्ञानसत्त्वे विशेष्यतावच्छेदकप्रकारकज्ञानात्मककारणाभावादेव तादृशविशिष्टे वैशिष्ट्यमितिरीत्या यत्र्यत्यच्चन्तदापत्तिवारणे शाब्दसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वन्न कल्पनीयमिति लाघवमिति दिक् । ननु भीष्ममित्यस्य द्वितीयान्तार्थस्याभेदेन कटेऽन्वयस्वीकारे कारकाणां भावनाऽन्वयव्युत्पत्तिभङ्ग इत्यत आह । कारकाणामिति । अन्वयविषयेतीति । अस्य स्वीकारेणेति शेषः । नन्वेवङ्कृतः कटः सुन्दर इत्यत्र कटनिष्ठकर्मत्वस्याभिधानेपि सुन्दरपदार्थनिष्ठकर्मत्वस्यानभिधानाद्द्वितीया स्यादत आह । तिङ्कृतावितिं । यस्ययस्य कर्मतेति । साक्षात्परम्परया वेति शेषः । मूलादिकं खण्डयति । अत्र वदन्तीति । कर्मादिपदे इति । अस्योच्चारिते सति तज्जन्योपस्थितौ यथान विभक्तिवाच्यतावच्छेदकरूपेण भानन्त्रथेति । शेषः । रूपेण । कर्मत्वशक्तिमत्त्वेन । यथा वाशब्दजन्यविकल्पोपस्थित्यपेक्षया विकल्पपदजन्यविकल्पोपस्थितिर्विलक्षणा सत्त्वासत्त्वाभ्यान्तयोर्वैलक्षण्यस्यानुभवसिद्धत्वात् । समुदायशक्त्येति । औपगव इत्यत्र तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्ययविधानाच्चित्रगुरित्यत्र षष्ठ्यर्थे बहुव्रीहिविधानादिति भावः । एतदधिकारेति । अनभिहिताधिकारेत्यर्थः । औपगवश्चित्रगुरित्यत्र षष्ठ्यापादनन्तदा समुदायात्स्याद्यदा प्रातिपदिकार्थे विधीयमानया प्रथमया बाधो न स्यादित्याशङ्कानिवारणायाह । घट इत्यादाविति । दृष्टानामेवेति । प्रवृत्तिनिमित्ततदाश्रयरूपाणाम् । तद्भिन्नस्यैवेति । प्रवृत्तिनिमित्ततदाश्रयाभ्याभिन्नस्येत्यर्थः । षष्ठीवाच्यत्वेन दृष्टतयेति । अनभिहिताधिकाराभावेऽभिहितानभिहितसाधारणसम्बन्धमात्रस्य षष्ठी शेष इति सूत्रे शेषपदेन ग्रहणं स्यात् । अनभिहिताधिकारे तु क्तेऽनभिहितसम्बन्धस्यैव षष्ठीवाचतया औपगवश्चित्रगुरित्यत्र प्रतीयमानस्य तु प्रातिपदिकेनाभिहिततयाऽयं षष्ठ्यवाच्य इति प्रवृत्तिनिमित्तरूपोऽयं सम्बन्धः प्रातिपदिकार्थपदेन गृह्यत इति प्रथमा भवतीति भावः । अत एव प्रकृतसूत्रभाष्ये कर्मणि द्वितीयेत्यादिविषयेऽधिकारफलमुक्त्वाऽन्ते औपगवश्चित्र-

गुरित्यत्राधिकारफलमुक्तम् । वस्तुत इदमपि न प्रत्युदाहरणपक्षानित्याशङ्क्याह । वस्तुतस्त्विति । अत्रेति । भीष्मादौ । नान्या । द्वितीयादयः । एनमभिसम्बन्धमिति । क्रियाकारकभावरूपम् । तेन । अशेषत्वादित्यनेन । अस्मिन्नेवार्थे भाष्यान्तरमपि साधकमित्याह । तदुक्तमिति । स्वसिद्धान्तमाह । परे त्विति । साध्यत्वेन न भानमिति । यद्यपि शतेन क्रीत इत्यर्थे शताच्च ठन्यताविति सूत्रेण यति निष्पन्नस्य शत्यशब्दस्य शतकरणकक्रयणकर्मबोधकता तथापि प्रत्ययान्तसमुदायेनोपस्थिता या क्रिया तस्या न साध्यत्वेन भानम् । अत एव । साध्यत्वेनाभानादेव । मन्दुरायां शत्योऽश्व इति वाक्यान्मन्दुराधिकरणिका शत्यकर्तृका स्थितिक्रियैवानुभवसिद्धा नतु मन्दुराधिकरणिका शतकरणिका क्रयणक्रिया । कारकान्वययोग्या क्रिया धातूपस्थितैव न तु तद्धितशत्र्यूपस्थिता । अत एव शत्योऽश्वो देवदत्तेनेति न प्रयोगः । एवम्प्रासोदको ग्राम इत्यत्र प्राचीनसम्मतबोधप्रक्रियायान्दूषणमाह । एवम्प्राप्तेत्यादि । आदिना प्राप्तोदकेत्यस्य सङ्ग्रहः । कल्प्यः स्यादिति । इदञ्च न युक्तम् । वृत्तिविग्रहयोः समानविशेषणविशेष्यभावावगाहिबोधजनकत्वस्य सिद्धान्तिसम्मतत्वात् । विशेषणविशेष्यभावव्यत्यासे दोषमप्याह । किञ्चेति । प्राचीनसम्मतबोधे दोषान्तरमाह । किञ्चेति । तादृशबोधे रूपाधिक्यमप्याह । किञ्चेति । ननु कर्मत्वं क्रियानिरूपितत्वं तु द्रव्यानन्दनिरूपितमिति प्राप्तिकर्त्रानन्दकर्मेति कथम्बोध इत्यत आह । विशेष्य इति । आनन्दे । तत्पर्यवसानमिति । कर्मतानिरूपकत्वपर्यवसानम् । विशिष्टे । विशेषणविशिष्टे । सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाध इतिन्यायात् । प्रकृतमाह । एवञ्चेति । अत एव । उद्भूतकर्मत्वशक्तिमत्त्वेन भानाभावादेव । कैयटेनोक्तमिति । एवञ्च कारकशब्दजन्यप्रतीतिविशेष्याभिन्नप्रतिपादकः परमशब्दोपि नोद्भूतक्रियात्वधात्वर्थनिरूपितकारकशक्तिमत्प्रतिपादकः । गतिकारकोपपदादित्यस्य क्त्वात्ययप्रकृतिधात्वर्थनिरूपितोद्भूतशक्तिमत्कारकात्परत्व एव प्रवृत्तिरिति भावः । एतच्च हरिणाप्युक्तम् । स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते । विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति । स धर्मः शक्तिरूपः । विभक्त्यादिभिरित्यादिना दोषादिवेत्यादिविभक्त्यर्थशक्तिप्रधानाव्ययस्य दधि पश्येत्यादौ सुप्विभक्ति-

कप्रातिपदिकस्य च सङ्ग्रहः। उपकारः। उपकारकः। स्वावेशेन प्रातिपदिकस्य क्रियाम्प्रति विशेषणतानियामकः। अत एव। उङ्गूतकारकशक्तिप्रतिपादकत्वाभावादेव। तस्य कारककर्मादिशब्दप्रतिपाद्यशक्तेः। न क्रियान्वयनियम इति। द्रव्येप्यन्वयदर्शनात्। तथात्वे बाधकमप्याह। अन्यथेति। विभक्तिप्रयोजकरूपेण। उङ्गूतकर्मत्वशक्तिमत्त्वेन। एवञ्चाभिधानविषये प्रातिपदिकस्योङ्गूततत्तच्छक्तिविशिष्टेऽर्थे न वृत्तिरिति न तत्र सासा विभक्तिः। पूर्वोक्तार्थे भाष्यान्तरमपि साधकमाह। ध्वनितञ्चेदमिति। अत्र चोऽप्यर्थः। सूत्राप्रसिमुपपादयति। सुप इति। तत्र ह्येवमुक्तम्। अथेह क्यचा भवितव्यमिष्टः पुत्रः इष्यते पुत्रः। केचित्तावदाहुः। न भवितव्यमिति। किङ्कारणं स्वशब्देनोक्तत्वात्। स्वशब्देनेति। इष्टशब्दसामानाधिकरण्याऽत्युच्चइत्यनेन निर्मुक्तेपि कर्मसंज्ञाप्रयोजकस्य क्रियापेक्षकर्मभावस्यार्थस्य प्रतिपादनादित्यर्थः। अयमर्थः। यदा क्रियाफलस्य कर्मणः प्राधान्यमतिपिपादयिषितन्तदा वाक्यमेव प्रयुज्यते। पुत्र इष्ट इत्यादि नतु क्यजन्तः। तस्यास्यकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादिति कैयटः। अपर आहुः भवितव्यमिति। किङ्कारणम्। धात्वर्थेऽयं क्यङ्विधीयते स चधात्वर्थः केनचिदेव शब्देन निर्देष्टव्य इति। स चधात्वर्थ इति। इच्छायाः प्रत्ययार्थत्वन्दर्शयितुं वाक्यमुपादेयम् तत्र वाक्ये कर्तृप्रत्ययः प्रयुज्यताम्। कर्मप्रत्ययो वा। प्रत्यये तूत्पन्नेऽकर्मकत्वात् कर्मप्रत्ययो न भवति। इह भवन्तस्तावदाहुः। न भवितव्यमिति। समानार्थेन वाक्येन भवितव्यमित्ययान्तेन च। यस्येहार्थो वाक्येन गम्यते इष्टः पुत्र इष्यते पुत्र इति नासौ जातु चित्प्रत्ययान्तेन गम्यते नासौ जातु चिदिति। प्रत्ययान्तस्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादात् इति कैयटः। प्राच्यानुसारेणोक्तस्येति। तिङ्कृत्तद्धितसमासैरिति न परिगणनङ्गि-

---

एवञ्चेष्टशब्दसामानाधिकरण्येन पुत्रशब्दार्थगतङ्कर्मत्वङ्कर्मवाचिना क्तेनाभिहितमिति पुत्रशब्दस्य प्रातिपदिकार्थमात्रवृत्तित्वेन पुत्र इति सुबन्तस्य कर्मत्ववाचित्वाभावादित्यर्थः। निर्मुक्तेति। इतरसामानाधिकरण्याज्जातकर्मभावस्य न तु स्वत इत्यर्थः। अथ वा निर्मुक्तेति पाठः। तदा निर्मुक्तः स्ववाच्यतया परित्यक्तकर्मभावस्येत्यर्थः।

क्यजन्त। अकर्मकत्वात् धात्वर्थसङ्गृहीतकर्मकत्वात्

न्तूदाहरणमात्रमिति तन्नायः । प्राचामप्रतन्दूषयन्स्वमतमाह । परे त्विति । इ-
थते इत्यध्याहारः । इदमपि पररीत्या स्वमते तु अन्यत्राध्याहारपदार्थ उक्तः ।
अन्यथा । तदनध्याहारे । अन्याय्यमिति । यद्यप्येतर्हि सम्प्रतीदानीमधुना सा-
म्प्रतन्त्वर्थेति कोशात्साम्प्रतमित्यव्ययमिदानीमित्यर्थकमिति प्रतीयते । तथापि
निपातानामनेकार्थतया एवं व्याख्यातम् । एवमसुन्नारद इत्यबोधीत्यत्रेति-
शब्दे नोक्तत्वान्न द्वितीयेति प्राचोक्तं खण्डयति । एवमिति । अत एव । तिङ्-
कृत्तद्धितसमासैरिति परिगणनादेव । समास इति । निपातेनाधिकरणे उक्तेपि
सप्तमी भवतीति तदन्तस्य समास इत्यर्थः । ननु निपातेनाभिहितेऽप्यधिकरणे
वचनसामर्थ्यात्सप्तमीत्यन्यत्रोक्तमेवेत्यत आह । तद्वचनेति । अत एव ।
परिगण-
नादेव । तत्तच्छक्तिमत्त्वेन । अधिकरणत्वादिशक्तिमत्त्वेन । अत्र साधकमाह ।
शब्दशक्तीति । न दोषः । न सप्तम्या अनुपपत्तिः । तत्त्वञ्चेति । तथा युक्तत्वञ्चे-
त्यर्थः । उपक्रमस्थभाष्योक्तमुदाहरणमन्यथा सिद्धं यद्यपि तथापि तत्त्वम्मुख्य-
मेवोदाहरणं वक्तुमुपक्रमते । पराधीनेति । न दर्शनोद्देश्या इति । एतेन प्रकृत-
धात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वे नोद्देश्यत्वाभावान्न पू-
र्वसूत्रेण कर्मत्वसिद्धिरिति बोधितम् । तच्चेति । इष्येति शेषः । तथा लृ-
णादेरपीति । एतेन तादृशफलाश्रयत्वे नोद्देश्यत्वाभावः सूचितः । लृणादे
रपीतीति । समभिव्याहृतधात्वर्थफलं संयोगस्तदाश्रयत्वन्नृणादेरस्तीति
तथायुक्तत्वमस्ति । अनीप्सितपदप्रयोजनमाह । अनीप्सितपदाभाव इ-
ति । वारणार्थानामित्यनवकाशं स्यादिति । तथा च यदा यवेभ्यो ग-
वां वारणाय दण्डोद्यमनादिकृतत्तेनैव व्यापारेण गोषु सञ्चरन्त्यो म-
ह्यिोऽपि वारिता भवन्ति तादृशस्थले यवेभ्यो महिषीर्वारयतीति प्रयोगो न
स्यादनीप्सितमह्यिा अप्यपादानत्वस्य प्राप्तेरिति । विषेणौदनमिति । शतधा
धौतस्य घृतस्य हेयत्वेपि सितया संयोगे उपकारकत्वज्ञानेन तस्य करण-
त्वविवक्षेति भावः । तत्सत्त्वे त्विति । तथा युक्तमिति पदसत्त्वे त्वित्यर्थः । तादृश-
स्थले विषस्य स्वव्यापारजन्यत्वसम्बन्धेन प्रधानीभूतव्यापार एवान्वयविवक्षा
न तु गलाधःसंयोगरूपफलाश्रयत्वस्य विवक्षेति भावः । एवम्प्रयागाल्काशीञ्-
च्छतीत्यत्र प्रयागस्य प्रकृतधात्वर्थफलं संयोगस्तदाश्रयत्वविवक्षा नेत्यपि बोध्य-

म्। अपादानादीत्यत्रापादानादिशब्दो भावप्रधाननिर्देशेनापादानत्वादिपरः। एवञ्च यत्फलितन्तदाह। तत्तद्रूपेणेति। यथाश्रुतार्थकत्वेऽपादानत्वादीनां यत्र प्रसक्तिपूर्विका अविवक्षा तत्रैव स्यात्सर्वथा पूर्वविधेरप्रसक्तौ न स्यादिति भावः। पञ्चम्येवेति। गोः पयो दोग्धीति यथा। अपादानत्वाद्यविवक्षायां यद्रूपमन्वयितावच्छेदकत्वेन विवक्षितन्तत्त्विमित्याकाङ्क्षाशान्तये आह। केन रूपेणेति। तथैवेति। कर्मत्वादिशक्तिमत्त्वेनैव। सर्वप्राचीनोक्तं सम्बन्धित्वेन बोधङ् खण्डयति। तत्तच्छास्त्रेति। षष्ठीप्राप्येति। अस्मात इति शेषः। अत एव। अकथितञ्चेतिसूत्रविषयेऽपि कर्मत्वशक्तिमत्त्वेन द्वितीयाया बोधकत्वादेव। नवैरूप्यमिति। यदि पूर्वसूत्रविषये कर्मत्वेन बोधकत्वमङ्गीकृतसूत्रविषये तु सम्बन्धित्वेनेति तदा वैरूप्यं स्यादेवेति भावः। अत एव। कर्मत्वेनैव बोधादेव। आशङ्क्य इति। इयञ्चाशङ्का यत्रानेन सूत्रेण कर्मसंज्ञा तत्रापि कर्मत्वशक्तिमत्त्वेन बोध एव सङ्गच्छत इति भावः। ईप्सितमात्रस्येत्यनेन कार्त्स्न्यार्थकमात्रशब्देन यत्रेप्सितपदन्तस्य सर्वस्य सङ्ग्रहः। प्राचामुक्तिं खण्डयति। एतेनेति। तत्त्वेन। कर्मत्वेन। अनेन। अकथितमित्यनेन। अनेन संज्ञायां सम्बन्धित्वेन रूपेण बोध इति तेषामभिमानः। एतेनेत्यस्यार्थमाह। वदत इति। अत एव। दुहादीनां व्यापारद्वयार्थत्वाविवक्षायाङ्क्वादीनामपादानत्वादीनाञ्चाविवक्षायामस्यावश्यकत्वादेव। क्रियाजनकमिति। एतेन गवादिपदार्थानाम्ययआदिपदार्थेष्वन्वयविवक्षायान्नानेन कर्मत्वमिति भावः। एवमिति। पूर्वोक्तरीत्या सूत्रार्थव्यवस्थायाम्। ननु नटस्य द्वितीयरीत्या कर्मत्वप्राप्युट्टङ्नवत्प्रथमरीत्याप्युचितमित्याशङ्कानिवारणायाह। नटस्यापादानत्वेति। अनुपयोगे। नियमपूर्वकविद्यास्वीकारोभावे। न च गीतिद्वारा नटस्य क्रियाजनकत्वमित्यसंगतम्। गीतेरेव क्रियाजनकत्वसम्भवे नटस्यान्यथासिद्धत्वं स्यादिति वाच्यम्। व्यापारेण व्यापारिणोऽन्यथासिद्धत्वाभावात्। अन्यथा यागस्यापि स्वर्गजनकत्वन्न स्यात्। अपूर्वस्यैव तु तत्स्यात्। कर्मयुक्तन्न सर्वत्रैकरूपमित्याह। कर्मयुक्तमिति। तत्र। उक्तप्रकारद्वयमध्ये। प्रागेवेति। प्राग्पीत्यर्थः। तद्विषय इति। द्रुविशासिविषये। तत्र। द्रुविशास्व्यतिरिक्ते। एतेन। सति सम्भवे प्राप्तत्वस्वरूपस्यैव ग्रहणेन। एवञ्च। वौक्तव्यवस्थासिद्धैव। पू

अधिकरणान्येवेति । एतेन कर्तृकरणहेतूनाम्निरासः । एतेषु निदर्शनार्थमाह । करणन्तु नेति । धातोर्व्यापारद्वयार्थत्वेन कर्तुरित्येव सिद्धेऽकथितमितिसूत्रवैयर्थ्यमित्याशयेन शङ्कते । यद्यपीति । तत्रैव लादिसिद्धिरिति । प्रधानकर्मण्याख्येये लादीनाङ्दुहिकर्मणामित्येव सिद्धेः । ईदृशप्राधान्यस्य । प्रधानीभूतधात्वर्थविशेषणफलाश्रयस्य । नन्वेवं स्वसम्प्रदानकदानानुकूलव्यापारानुकूलव्यापार एव दण्डधात्वर्थो भविष्यति। तथा च गर्गाणामेव प्राधान्यमिति प्रधानगर्गानुरोधेन शतावृत्तिः स्यादिति समुदाये वाक्यसमाप्तिरित्यस्यैदंस्थलन्दृष्टान्तत्वेन भाष्ये उपात्तन्तद्विरोध इत्यत आह । गर्गाः शतमिति । भाष्यविरोध इति । शतस्यार्थप्राधान्यमादाय तस्य भाष्यस्योपपत्तेः । जिज्ञासाविषयार्थज्ञानानुकूलव्यापारानुकूलव्यापारः पृच्छिपर्यायचुदेरर्थ इति प्रधानीभूतव्यापारविशेषणव्यापारस्यार्थप्राधान्यमादाय यस्मति पृच्छा तस्य प्रतिपादको लकारः सिध्यतीत्याशयेनाह । एवमेवेति । अत एव । व्यापारद्वयार्थत्वेन द्विकर्मकत्वादेव । एतत्पक्षे अप्रधाने दुहादीनामित्यत्राप्राधान्यमनुद्देश्यत्वरूपञ्बोध्यम् । इदमावश्यकमिति । एकव्यापारार्थकत्वे गवादीनामकथितत्वेति सूत्रेण येषाङ्कर्मसंज्ञा तेषामुक्तप्राधान्यविशिष्टपयआदिकर्मभिन्नतयाऽप्राधान्यादेव पूर्वोक्ता व्यवस्था साध्येति भावः । ननु गवादीनां क्रियान्वयविवक्षायामपि कर्मत्वेनाविवक्षायां षष्ठी प्राप्नोतीत्यत आह । द्विकर्मकेष्विति । द्विकर्मकविषयेष्वित्यर्थः । मूलकारपठितदुहादिक्रमेणार्थमाह । अन्तःस्थितेत्यादिना । अत्र निष्ठान्तस्यार्थतावच्छेदकविभागस्योपलक्षणन्न तु दुहधात्वर्थकुक्षिनिविष्टम्। तेन न धात्वर्थसङ्गृहीतकर्मकत्वेनाकर्मकत्वापत्तिरितिबोध्यम् । अनभिधानादिति । अत्र मानं वक्ष्यते । अत एवेत्यादिना । सर्वत्र षष्ठ्यन्तार्थस्य क्रियान्वयविवक्षायां षष्ठ्यभाव इति तु न नियमः किन्तु क्व चिदेवेत्याशयेनाह । स्वान्वययोग्येति । तेन मातुः स्मरति । भजे शम्भोश्चरणयोरित्यत्र षष्ठीदर्शनेऽपि न क्षतिः । तत्रैव । तत्तामार्थ एव । तदेव मानमाह । अत एवेति । तत्र तदभावादेव । कर्तुरितिसूत्रभाष्य इति । इह हि तण्डुलानोदनम्पचतीति द्वार्थः पचिः । तण्डुलान्पचनोदनन्निर्वर्त्तयतीति । इहेदानीन्तण्डुलानामोदनम्पचतीति द्वार्थश्चैव पचिर्विकारयोगी षष्ठी तण्डुलविकारमोदनन्निर्वर्त्तयतीत्येवन्त-

क्तम्। द्वार्थः पचिरिति। विक्लेदनोपसर्जने निर्वर्त्तने पचिर्वर्त्तते। तण्डुलान्विक्लेदयन्नोदनन्निर्वर्त्तयतीत्यर्थः। तत्रोपसर्जनविक्लेदनक्रियापेक्षत्वात्तण्डुलानाङ्कर्मत्वम्। प्रधानभूतक्रियापेक्षत्वन्तु ओदनस्य। द्वार्थश्चैवेति। तण्डुलानां स्वस्विनं विकारविशेषमोदनं विक्लित्त्या निर्वर्त्तयतीत्यर्थः। सा च विक्लित्तिः सामर्थ्यात्तण्डुलानामेव विज्ञायते इति कैयटः। उभयानुकूलो व्यापारः। दिदापयिषाव्यञ्जको दीयतामित्याकारकशब्दोच्चारणरूपः। कर्मसंज्ञैवेत्येवेति। एतेन याचिष्टच्छिभिक्षियोगे पूर्वविधेः सर्वथाऽप्राप्तिः सूचिता। स्वामित्वसम्बन्धादिति। वसुधानिष्ठस्वत्वनिरूपितस्वामित्वात्मकसम्बन्धादित्यर्थः। याचेरिति। अस्य अत्रेत्यर्थः। तेनैवेति। कर्त्तुरित्यनेनैवेत्यर्थः। एवमिति। पूर्ववत्। न प्रत्यादेवापाय इति। अत्रायायो बौद्धः। विभागपूर्वकादान इति। विभागजन्यपाचस्थापनानुकूलव्यापार इत्यर्थः। भाष्योक्ता हीति। तदुक्तभाष्ये। किमुदाहरणम्। दुहियाचिरुधिप्रच्छिभिक्षिजामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितङ्विनेति। उपयोगनिमित्तमिति। उपयुज्यत इत्युपयोगः। पयः फलादि तस्य निमित्तम् गवादि। अपूर्वविधाविति। अत्र पूर्वग्रहणमन्योपलक्षणम्। विध्यन्तरविषयत्वाविवक्षायाम्। ब्रुविशास्योर्गुणः प्रधानं कर्म। तेन सचते सम्बध्यत इत्यर्थः। इत्यन्य इति। भाष्यतत्त्वविदः। तेषाम्। अकर्मकधातूनाम्। स्वम्। अकर्मकधात्वर्थत्वेन प्रसिद्धं ऽग्नेः। स्वकरणकसंव्यापनेत्यस्य स्वकरणकव्याप्त्यनुकूल व्यापार इत्यर्थः। मूलकाराभिप्रेतमस्य कर्मसंज्ञाविधायकत्वभ्रमं खण्डयितुमाह। यत्त्विति। तादृशवचनेति। कर्मसंज्ञाविधायकवचनेत्यर्थः। ननु कालभावाध्वगन्तव्या इति वचनमेव तादृशमस्तीत्यत आह। अकथितमिति। हिशब्दघटितत्वादिति। हिशब्दस्य प्रसिद्धार्थकत्वं स्वभावसिद्धम्। हिशब्दघटितेन वाक्येन भूतानुवाद एव क्रियत इति भावः। ननु हिशब्दो वाक्यालंकारे इदञ्च वार्त्तिकं विधायकमेवेत्यत आह। किञ्चेति। प्राक्तनमेवैतदिति। अत्र प्रशब्दआदित्वबोधकः। तेन प्रकृतशब्द आदिकृतत्वबोधकस्तच्चादुत्सर्गसूचलाभः। प्रकृतशब्दाच्च तस्येदमित्यण्। उत्सर्गसूत्रबोधितमित्यर्थः। अत एव। अस्यापूर्ववचनत्वाभावादेव। अत एव। उक्तभाष्यस्य स्वोक्तार्थकत्वादेव। अकर्मकधातूनामिव सकर्मकाणामपि कोलादिकर्मकत्वमा-

ह। सकर्मकविषय इति। एतेन व्याख्यानेनापि पूर्वोक्तवचनस्यापूर्वविधायकत्वाभावो ध्वनितः। तस्यापूर्वत्वे तस्य सकर्मकेष्वप्रवृत्त्या सकर्मकाणान्द्विकर्मकत्वन्न स्यादिति भावः। ननु सकर्मकधातूनाङ्कालादिकर्मणां द्विकर्मकत्वे तयोः कर्मणोर्गुणप्रधानभावः कथमत आह। तत्रेति। तत्र। तयोर्मध्ये। पर्यायोक्तेति। अस्य क्रियमाणास्विति शेषः। अस्य क्रियास्वित्यत्र सम्बन्धः। तेन ङ्ग उपपत्तिः। प्रकारान्तरेणापि कालस्य बहिरङ्गत्वमित्याह। अपि चेति। नन्वकर्मकत्वव्यवहारो धातूनाङ्कथमुपपद्यतामत आह। अकर्मकव्यवहार इति। तदुक्तमिति। हरिणेति शेषः। तैः कर्मभिः। कालादिकर्मभिः। द्रव्यैः। द्रव्यकर्मभिः। अयुक्त इति शेषः। धातुरित्यन्वयः। अकर्मकपदार्थघटकङ्कर्म द्रव्यात्मकमेव विवक्षितमिति व्यवहारदययोगात्सकर्मकत्वप्रयुक्तकर्मणि यो लकारो भावे वा तन्निमित्तत्वाय कल्पते। आस्यते मासः। मासमास्यते देवदत्तेनेति यथा। अत्र द्रव्यपदङ्कालादिभिन्नद्रव्यसामान्यपरम्। तेन कालादेरपि लिङ्गसंख्यान्वयित्वरूपद्रव्यत्वसत्त्वेऽपि न क्षतिः। गतिबुद्धीतिसूत्रे यच्छब्दकर्मकपदन्तद्याचष्टे। शब्दः कर्मकारकमिति। व्याख्यानादिति। क्वचिन्माक्वचिन्मन्यायेन कर्मशब्दस्य कर्मसंज्ञकपरत्वस्यौचित्यमूलकादित्यर्थः। यद्वा प्रकृतसूत्रे कर्मग्रहणोपपादनमूलकादित्यर्थः। अन्यथाऽर्थशब्दस्योत्तरत्र सम्बन्धेन। गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येव ब्रूयात्। तेन। तादृशव्याख्यानेन। ह्याययतीति। अनयोः शब्दार्थकत्वेऽपि शब्दः कर्मकारकं येवान्तादृशार्थकत्वन्नास्तीत्यर्थः। एतत्सूत्रघटकं णिच्पदं हेतुमत्यिच एव बोधकमत्र मानं व्याख्यानमुपवर्णितन्तदेव प्रकटयति। अत एवेति। हेतुमत्यिच्परत्वादेव। इति बोध्यमिति। णिच्सामान्यपरत्वेऽण्यन्तावस्था तत्र न संभवतीति भावः। गतिबुद्धीतिसूत्रस्य नियमार्थत्ववादिमतमुपपादयति। अन्यानधीनत्वेत्यादिना। अन्तरङ्गादपीत्यपिना परत्वोपजीव्यत्वयोः समुच्चयः। भाष्यकृत इति। तत्र हि कथमिदं विज्ञायते हेतुमत्यभिधेये णिज् भवतीति आहोस्विद्धेतुमति यो धातुर्वर्त्तत इति रीत्या विचारे अस्तु प्रकृत्यर्थविशेषणमित्युक्तम्। अत्र कैयटः। विनापि णिचा पञ्चभिर्हेतुभिः कृषतीति प्रयोजकव्यापारावगमात्प्रकृत्यर्थत्वं हेतुमत उपपद्यते इति। क्तौ दोषः। इह हि कृतः करोति। प्रेषितः करोतीति णिच् प्राप्नोति। प्रकृति-

विशेषणत्वपक्षे यथा प्रकृत्यभिहिते प्रयोजकव्यापारे णिजभवति । एवमुक्तप्रत्ययादिशब्दाभिहितेऽपि प्राप्नोति । हेतुमद्विषयत्वात्करोत्यर्थस्य । प्रत्ययार्थविशेषणत्वे तु उक्तार्थत्वान्निजभावः । इह तर्हि पाचयत्योदनन्देवदत्तो यज्ञदत्तेनेति उभयोः कर्त्रोर्लेनाभिधानम्प्राप्नोति । प्रत्ययार्थविशेषणत्वेन दोषः । प्रधानकर्त्तरि लादयो भवन्ति । प्रधानकर्त्ता लेनाभिधीयते । यस्मात्प्रधानं सिद्धा तत्र तृतीया कर्त्तरीत्येवेत्युक्तम् । अत्र प्रधानकर्त्ता लेनाभिधीयत इत्युक्त्या प्रधानाप्रधानसन्निधौ प्रधानकार्यस्य बलवत्त्वं सूचितम् । ततोऽयं प्रत्ययार्थविशेषणपक्ष एव पाचयत्योदनन्देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तरि कर्मसंज्ञा प्राप्नोतीति शङ्कायामेवं समाहितम् । गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणीत्येतन्नियमार्थम्भविष्यति । एतेषामेवाण्यन्तानां यः कर्त्ता स णौ कर्मसंज्ञो भवति नान्येषामिति एवमुक्तम्भाष्ये । अत्र कैयटः । ख्यर्थस्य प्राधान्यात्तेनेप्सितस्य प्रयोज्यस्य सिद्धा कर्मसंज्ञा । न च स्वव्यापारापेक्षया स्वातन्त्र्यात्परत्वात्कर्त्रसंज्ञा प्राप्नोतीति युक्तं वक्तुम् । प्रयोज्यव्यापारस्याप्राधान्यात्प्रधानाप्रधानव्यापारसन्निधौ च प्रधाननिमित्तस्य कार्यस्य युक्तत्वान्नियमेन तु प्रधानकार्यव्याहत्तौ गुणनिमित्तकार्यसद्भावात्कर्त्रसंज्ञत्वमवत्येव । तदुक्तं हरिणा । गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मताङ्गतः । नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयत इति । कैयटे स्पष्टमिति । तत्र ह्येवमुक्तम् । गुणप्रधानसन्निधौ प्रधानस्य प्रयोजकत्वे सम्भवति सति पृथग्गुणास्तद्विरुद्धं स्वकार्यन्न प्रयुञ्जते । ततश्च सिद्धायाम्प्रयोज्यस्य कर्मसंज्ञायाङ्क्त्यर्थादीनामेवाण्यन्तानाङ्कर्त्ता कर्मसंज्ञो भवति नान्येषामिति नियमः क्रियते । तेन पाचयत्योदनन्देवदत्तो यज्ञदत्तेनेत्यत्र कर्मसंज्ञा न भवतीति । नियन्तृकर्त्तृकेति । अत्र नियन्ता प्रयुप्रेरकमात्रम् । गत्यर्थत्वाभावेपीति । प्रापणं हि प्राप्त्यनुकूलव्यापारानुकूलव्यापारः । प्राप्तिश्च सम्बन्धमात्रन्न तु संयोग एव । सुखम्प्राप्तो विद्याम्प्राप्त इत्यादौ संयोगाभावेऽपि प्राप्तिव्यवहारादिति भावः । अत एव । प्राप्त्यर्थकस्य गत्यर्थकत्वाभावादेव । इत्येवेति । अत्र गत्यर्थत्वाभावेन नियमेन कर्मत्वाप्राप्तेः । ध्वनितन्न गतीतिसूत्र इति । तच्च ह्युक्तन्न वहिर्गत्यर्थ इति । नवेति सूत्रे चेति । तत्र ह्युभयत्रविभाषोगणनावसरे हृक्रोरित्युभयत्र विभाषेत्युक्त्वा प्राप्ते ऽभ्यवहरतिमुदाहृत्याप्राप्ते हरति भा-

रन्देवदत्तो हारयति भारन्देवदत्तमित्युक्तम् । अचाप्राप्त इत्यनेन प्राप्त्यर्थस्य गत्यर्थत्वाभावः सूचित एव । नन्वेवन्नीवह्योर्नेत्यनेन नयतेरण्यन्तावस्थायां यः कर्त्ता तस्य ण्यन्तावस्थायाङ्कर्मसंज्ञाप्राप्तिरेव नेति नीग्रहणं व्यर्थमत आह । नयतेस्त्विति । अत्र नयतेस्त्विति तुना तस्यापि न गत्यर्थत्वमिति नीग्रहणमुज्ञानियमलब्धाप्राप्त्यनुवाद इति ध्वनितम् । हिंसाङ्ग इति । बहुव्रीहिः । हिंसा दुःखोत्पत्त्यनुकूलो व्यापारः साऽङ्गं फलं यस्येत्यर्थः । मूलकारोक्तं खण्डयति । परे त्विति । तत्र पच इति । मानाभावादिति । एवञ्च पुत्रादिकर्मणाऽस्य धातोः सकर्मकत्वान्न गतिबुद्धीतिसूत्रप्राप्तिरिति भावः । येषामित्यादिना यदुक्तन्तल्लाभप्रकारमाह । अयम्भाव इति । इतिसूत्रमिति । कर्त्तव्यमिति शेषः । देशकालादिभिन्नेति । तेषां सर्वत्रैव सम्भवेन तैर्नाकर्मकत्वव्यवहारच्छतिरिति । कर्मणोऽविवक्षाप्रभेदन्दर्शयति। तदविवक्षा हेधेति । तदन्वययोग्येति । कर्मान्वययोग्येत्यर्थः । स च व्यापारव्यधिकरणफलरूपः । सत्त्वे वेति । तादृशफलस्य धात्वर्थत्वेऽपि तादृशफलाश्रयत्वन्न विवक्षितङ्किन्तु तद्धात्वर्थैकर्मत्वाभिप्रेतस्य सम्बन्धित्वेनान्वयित्वमात्रम् । कैयटमतन्दूषयन्स्वमतमाह । परे त्विति । लुनातेरिति । द्विधाभवनानुकूलव्यापारार्थको हि लुनातिः । तत्र व्यापारत्यागे लूयते केदारः स्वयमेव । पुनस्तस्यैव केदारस्य प्रयोज्यत्वविवक्षया हेतुमस्सिचि केदारस्यानेन सूत्रेण कर्मसंज्ञायां लावयति केदारन्देवदत्त इति भवति । अविवक्षितकर्मकस्याग्रहणे तु एतादृशप्रयोगानुपपत्तिः स्फुटैव । तत्त्वप्रत्यभिज्ञया फले पूर्वकालज्ञातफलाभेदस्य तदेवेदमितिप्रत्यभिज्ञया । तदुदाहरणन्तु । अर्थान्तरे वृत्तेरित्यस्योदाहरणन्त्विति । नदी वहतीति । अत्र स्कन्धग्रहणादिपूर्वकदेशान्तरप्रापणार्थकत्वस्याप्रतीतेः । भाष्य उदाहृतत्वाच्चेति । एवञ्चैतादृशभाष्यप्रयोगोपि शास्त्रेऽकर्मकपदेनाविवक्षितकर्मकाणां ग्रहणे मानम् । भाष्यान्तरविरोधशङ्कां वारयति । यत्त्विति । अस्मिन्भाष्यीयव्याख्याने न च केचिदितिकथनेन कालादिसम्बन्धसत्त्वासत्त्वाभ्यां सकर्मकत्वमकर्मकत्वमिति न युक्तमित्यर्थः प्रतीयते स च न युज्यते यथा क्रतपूर्वी कटम्भुक्तपूर्वी ओदनमित्यत्र पूर्वङ्कर्मान्वयाविवक्षयाऽकर्मकत्वन्तथा कालाद्यन्वयाविवक्षया कालादिभ्योऽप्यकर्मकत्वसम्भवादिति विरोधो नास्माकम्मते इत्याशयेनाह । क्वचिदित्य-

स्येति। हेत्वन्तरमाह। विनिगमनाविरहादिति। उक्तार्थे प्रमाणमाह। अत एवेति। उभयविधाकर्मकग्रहणादेव। मूलोक्तरीत्यनुसरणे तु शुष्टश्यादीनान्दैग्यकालादिभिन्नकर्मसम्बन्धवत्त्वेनाकर्मकत्वाभावादेषामकर्मकाधिकारे पाठो व्यर्थः स्यादिति भावः। नन्वकर्मकपदाच्च विद्यते कर्म यस्येति व्युत्पत्त्या धात्वर्थक्रियाबोधादकर्मकाद्धातोरित्यनुपपन्नमत आह। अकर्मकशब्दे चेति। ननु तथापि कथमविवक्षितकर्मणोऽकर्मकपदेन ग्रहणं यावता तस्यैव यदा कर्मणोऽन्वयविवक्षा तदा कर्मणोऽविद्यमानत्वे नाकर्मकपदवाच्यार्थविरोधादत आह। अर्थभेदेनेति। ननु कालाद्यन्वयित्वेन धातोरपि तत्त्वस्याधितमेवेत्यत आह। कर्मत्वेनेत्यादि। अत्र कर्मत्वेनेत्यस्य निवेशान्मातुः स्मर्यते इत्यादिसङ्ग्रहः। व्यभिचारिद्रव्येति। कटादिः। एतेन। उक्तभाष्यविरोधेन। अतिप्रसङ्ग इति। कैयटोक्तातिप्रसङ्ग इत्यर्थः। ननु हृक्रोः सकर्मकत्वाद् हृक्रोरितिसूत्रस्योभयत्रविभाषार्थत्वव्यवहारानुपपत्तिरत आह। तत्राभ्यवेति। अभ्यवहारयति सैन्धवानित्यादौ। करोतेश्चाकर्मकत्वादिति। विकारयति सैन्धवानित्यादौ। अर्थान्तरे। हरणार्थकहरतेरुत्पत्त्यनुकूलव्यापारार्थककरोतेश्च प्रयोगे। यत्वभिवादिदृशोरित्यस्य व्याख्यानावसरे वद सन्देशवचन इतिधातोराधृषीयस्यायन्निर्देश इत्याह तत्रेति सूचयन्नाह। हेतुमत्ययन्तस्येति। तेनाभिवदति गुरुन्देवदत्तः। अभिवादयति गुरुन्देवदत्तमिति भाष्यप्रयोगस्योपपत्तिः। तस्यैव। आधारस्यैव। व्याख्यानादिति। नेरल्पाच्तरमिति सूत्रबलेन पूर्वनिपाते कर्त्तव्येऽभेः पूर्वनिपातकरणमूलकादित्यादिः। अस्य। अभिनिविशश्चेति सूत्रस्य। अतिप्रसङ्ग इति। पापेऽभिनिवेश इत्यत्रातिप्रसङ्ग इत्यर्थः। कैयटोक्तन्दूषयति। परे त्विति। एतत्प्रवृत्तिरिति। पापेऽभिनिवेश इत्यत्र तु गुणदर्शनेन नास्य प्रवृत्तिरिति भावः। न मानमित्याहुरिति। अत एव देवत्रात इत्यादिपरिगणनविरोधो नेति भावः। भ्वादेरिति। निवासार्थस्येति शेषः। तेनाच्छादनार्थस्य न ग्रहणमिति फलितम्। रजनीमेकामित्यादाविति। आदिना हरिदिनमुपोषित इत्यस्य संग्रहः। अश्यर्थस्य नेतिवचनस्य प्रत्याख्यानप्रकारमाह। ग्रामे उपवसतीत्यत्रेति। उपपदविभक्तिमिति। उपपदस्य विभक्तिमित्यर्थः। षष्ठ्यर्थसम्बन्धस्य स्वयोगनिमित्तकत्वम्। षष्ठ्यपवादत्वाच्चेति। अत्र चशब्दो वार्थेऽता-

स्थायाम्। षष्ठ्यपवादत्वस्यैव सम्बन्धार्थकत्वसाधकत्वन्तु न युक्तम्। सर्वासां विभक्तीनां यदि कर्मणि द्वितीयेत्यादिसूत्रेण स्यात्तदा तत्र षष्ठी स्यात्तेषामारम्भे तु द्वितीयेति रीत्या कर्माद्यर्थकत्वमितिकल्पनया सम्बन्धार्थकत्वापातात्। उभसर्वयोरिति। प्रकृतिद्वित्वादेव द्विवचननिर्देशः। ननु नित्यमिति सूत्रेण द्वात्तविषये पूर्वमेवायज्विधानादुभशब्दस्य न तसिप्रत्ययप्रकृतित्वमत आह। उभांश इति। आम्बेडितान्तेष्वित्यनुपपन्नमाम्बेडितसंज्ञां विनाऽपि प्रकृते द्विर्वचनमात्रेणेष्टनिर्वाह इत्याशयेनाह। कृतद्विर्वचनेष्वित्यर्थ इति। उभयतः कृष्णमित्यादेः कृष्णसम्बन्धिपार्श्वद्वयाभ्यामागता इत्यर्थः। कृष्णाभक्तसम्बन्धिनिन्देति। एतेन यदर्थस्य सम्बन्धो धिक्शब्दार्थे प्रतीयते तद्वाचकाद्द्वितीयेति ध्वनितम्। धिङ्मूर्खेत्यादौ तु न सम्बोधनविभक्त्यन्तार्थस्य बोधनीयार्थान्वयित्वेन धिगर्थान्वयाभावात्। पर्यभिभ्यां चेति तसिलिति। न चाभिसुख्यार्थकस्याखण्डस्याभित इत्यस्यैव प्रतिपदोक्तत्वाद् ग्रहणं युक्तमिति वाच्यम्। परितःशब्दसाहचर्येण तसिलन्तस्यापि ग्रहणात्। रामलक्ष्मणावित्यादिवत्क्रियासाहचर्यस्यापि नियामकत्वमित्याशयेनाह। अन्तरेणेत्यटाबन्तेत्यादि। ननु रामलक्ष्मणावितिवन्न सहचरणमत्रोक्ते प्रसिद्धमत आह। साहचर्यं सादृश्यमिति। सहचरितासहचरितयोरितिपरिभाषायामेतादृशस्यैव साहचर्यस्य विवक्षितत्वादिति भावः। तेन। सदृशस्यैव ग्रहणेन। भाष्यानुरोधेनाह। यद्वेति। अनभिधानादिति। अत्र मानमन्तराशब्दोऽयमदृष्टापचार इति भाष्यमेव। अन्तरा त्वामामित्यत्र द्वितीया किममयोरन्तरा इत्यादौ षष्ठीत्यत्र किन्नियामकमत आह। अवधित्वरूप इति। मध्यार्थान्तरेति। एवञ्च मध्यत्वस्य नित्यसाकाङ्क्षत्वात्तादृशैकदेशे त्वामामितिद्वितीयान्तार्थान्वयः। अवधित्वरूपसम्बन्धस्यावधित्वेन रूपेण विषयत्वविवक्षायान्द्वितीया। तस्यैव सम्बन्धत्वेन बोध इति। अत एव हलोऽनन्तरा इतिसूत्रभाष्ये अविद्यमाना अन्तरा येषामिति प्रयोगः सङ्गच्छते। नन्वन्तराशब्दार्थानुयोगित्वेन हरिशब्दार्थस्यापि भानाद्धरिशब्दादपि द्वितीया स्यादत आह। हर्यादिपदादिति। न्यायेनेति। प्रकृते च हरिरस्तीत्यादिरीत्या हरिशब्दार्थस्य कर्तृत्वान्नयमिति भावः। क्रियायाञ्चेति। क्रियागतविशेषनेत्यर्थः। अस्याः। कर्मप्रवचनीयसंज्ञायाः। तयोः। गत्युपसर्गसंज्ञयोरित्यर्थः।

तेन । अनोर्गतित्वाभावेन । लक्ष्यलक्षणभावात्मको यः सम्बधस्तादृघटकलक्षणत्वे जपस्यान्वये लक्षणत्वान्वितलक्ष्यत्वस्य वर्षणक्रियायां सम्बन्धे सति तादृशसम्बन्धस्य लक्ष्यत्वघटिततया क्रियानिरूप्यत्वं स्पष्टमित्यनोः कर्मप्रवचनीयत्वम् । एवमेवान्यत्र कर्मप्रवचनीयसम्बन्धविषये ज्ञेयम् । तदेतदुपपादयति । लक्षणत्वञ्चेत्यादिना । ज्ञानजनकेत्यत्र ज्ञानं लक्ष्यस्याविशेषणैतादृशः सम्बन्धः । लक्षणत्वेनाभिप्रेतस्य ज्ञानजन्यज्ञानविषयत्वं सम्बन्धः । कदा दृष्ट इत्येवङ्रूपस्य चित्रस्य इदमुत्तरम् । मूलोक्तं संज्ञायाः फलबाधकत्वमुपपादयति । कर्मप्रवचनीयसंज्ञावकाश इत्यादिना । स्पष्टमिति । न च लक्षणेत्थमितिसूत्रसिद्धसंज्ञायाः जपमनु सिच्चतीत्यत्र षत्वाभावसाधकतया चारितार्थ्येन द्वितीयाविधायकत्वे मानाभावेन द्वितीयासाधकत्वेनेदमावश्यकमिति पुनः संज्ञाकरणेत्यनुपपन्नमेवेति वाच्यम् । तत्सूत्रविहितसंज्ञाया उपसर्गसंज्ञाबाधकतया चारितार्थ्येपि कर्मप्रवचनेति सूत्रेऽपि तस्योपस्थितिः स्यादेवेति द्वितीयायाः प्राप्तेः । नदीमन्वसितेत्यत्र तृतीयार्थः साहित्यमनुद्योत्यम् । साहित्यञ्च प्रकृतेऽनुयोगित्वलक्षणमेव । एवञ्च नद्यनुयोगिकसम्बन्धप्रतियोगित्ववती सेनेति बोधः । नद्या यद्यपि तादृशसम्बन्धानुयोगित्वन्तथापि कर्मप्रवचनीयानुद्योत्यानुयोगित्वे स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन नद्या अन्वयात्कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगित्वमक्षतमेव । हीने उपोऽधिके चेतिसूत्रयोर्हीनाधिकशब्दौ भावप्रधाननिर्देशेन हीनत्वाधिकत्वपरौ । तादृशसम्बन्धप्रतियोगित्वम्पूर्ववत् । अनुहरिमित्यत्रानुद्योत्ये हीनत्वे निरूपितत्वसम्बन्धेन हरेरन्वयः । न्यूनतापरिहाराय मूलानुक्तमुपोऽधिके चेतिसूत्रोदाहरणमाह । उपखार्याद्रोण इति यथेति । अत्राधिकत्वमुपद्योत्यञ्च खार्या निरूपितत्वसम्बन्धेनान्वयः । अधिकत्वञ्च अधिकरणाधिकरणकस्थितिकर्तृत्वरूपम्मारिभाषिकम् । तदेकदेशाधिकरणत्वे तेन सम्बन्धेनान्वयः । न तु स्वनिष्ठपरिमाणाधिकपरिमाणवत्त्वम् । द्रोणपरिमाणस्य खारीनिष्ठपरिमाणतो न्यूनत्वात् । तथाहि । पलम्मकुञ्चकम्मुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थस्तच्चतुःप्रस्थमथाढ़कम् । अष्टाढ़को भवेद्द्रोणो द्विद्रोणं शूर्प उच्यते । साद्वैः शूर्पैः भवेत्खारी द्विशूर्पा गोण्युदाहृता । तामेव भारज्ञानीयाद्वाहो भारचतुष्टयम् । शुष्कमेयेष्विदम्मानन्द्विगुण-

न्तद्रविषु तु इति। तदाह तेनोभयमिति। उभयम्। खारी द्रोणश्च। स्वनिष्ठपरिमाणाधिकपरिमाणाख्यायान्तु उपद्रोणे खारीत्युदाहरणबोध्यम्। आख्यायते। निरूप्यते। भक्तो विष्णुमति परि अन्वित्यत्र भक्तिमात्र आख्यायते। भक्तिश्वाराध्यत्वप्रकारकं ज्ञानम्। द्वितीयार्थश्च विषयित्वमत्यादिद्योत्यस्य भक्तपदार्थैकदेशभक्तावन्वयः। भागः स्वत्ववान् पदार्थः। तद्वाचकादर्श आद्यचि तादृशपदार्थस्वामिलाभः। एवञ्च स्वामिनि विषयभूत इति लब्धम्। लक्ष्मीर्हरिमतीत्यत्र स्वामित्वनिरूपितस्वत्वद्वितीयार्थः। तस्य लक्ष्मीपदार्थेऽन्वयः। सूत्रे वीप्सापदं व्याप्यत्वपरम्। तदेव वृक्षंवृक्षमतीत्यत्र द्विर्वचनविशिष्टवृक्षशब्दादिद्योत्यम्। तस्मिन्व्याप्यत्वे आधेयतासम्बन्धेन प्रकृत्यर्थस्यान्वयः व्याप्यत्वञ्च स्वनिरूपितव्यापकत्वसम्बन्धेन सेचनेऽन्वेतीत्येषां कर्मप्रवचनीयत्वम्। द्विर्वचनबलादेवेति। एवञ्च सम्बन्धपरिच्छेदकत्वाभावात्कथङ्कर्मप्रवचनीयत्वमिति भावः। सोऽयीति। व्यतिलुनीत इतिवत्प्रत्यादिरपीत्यर्थः। तत्त्वेन कर्मत्वशक्तित्वेन। उक्तार्थे भाष्यसम्मतिमाह। अत एवेति। प्रत्यादीनां क्रियाविशेषकत्वाभावादेव। अत एव। कर्मप्रवचनीयसंज्ञाया द्वितीयार्थत्वादेव। फलान्तरम्। कर्मप्रवचनीयसंज्ञाया फलान्तरम्। यद्दक्षिति। यच्छब्दस्य बुद्धिस्थपरामर्शकतया प्रकृते बुद्धिस्थो भागः परामृश्यते। एवञ्च मल्लबन्धियज्ञागकर्तृका एतद्देशाधिकरणिका सम्भाव्यमाना सत्ता तत्कर्मकस्मरणाविषयो दानमिति बोधः। अत्र कर्मप्रवचनीयसंज्ञाया अभावे उपसर्गसंज्ञासत्त्वादुपसर्गप्रादुर्भ्यामिति षत्वम्। ननु क्रुत इत्यत्राधिशब्दस्य क्रियायोगाभावान्नतित्वस्य प्राप्त्यभावेन गतिसंज्ञाबाधादित्ययुक्तमत आह। धात्वर्थमाचष्ट इति। उपसर्गाः क्रियायोग इति सूत्रे क्रियायोगपदं धातुना क्रियानिष्ठायाः स्वाश्रयतावच्छेदकावच्छिन्ना विषयता तच्छाल्युपस्थितिजनने सहकारित्वन्तच्च प्रकृतेऽप्यस्ति किन्तु क्रियात्वक्रियातिरिक्ततत्तत्विशेषविषयकबोधजनने सहकारित्वन्नास्तीति तदभावादेवानर्थकत्वव्यवहार इति भावः। सुः क्रियापूज्यत्व एव कर्मप्रवचनीय इत्याह। क्रियापूज्यत्वेति। सर्वेषामेव पदार्थत्वात्पदार्थ इत्यव्यावर्तकमत आह। पदस्येत्यादि। एतेन यस्याप्रयुज्यमानपदस्यार्थोऽपिना द्योत्यते तस्य पदस्याध्याहारोऽपिशब्दबलादिति कथ्यते। ननु सम्भावनायां लिङित्यसङ्गतन्तादृशसूत्रा-

भावादत आह । उपसंवादेति । अत्र यत्कर्मप्रवचनीययुक्तत्वादः प्रयुज्यत इति-भाष्यादप्रयुज्यमानस्येति लभ्यम् । दौर्लभ्यप्रयुक्तदौर्लभ्यञ्च सम्बन्धः सोऽपीद्योत्य एव । तदेतदुक्तमुद्दर्दं दौर्लभ्यप्रयुक्तं दौर्लभ्यद्योतयन्निति । प्रकृताभिप्रायमिति । एवञ्च कर्तृपदं कारकपरम् । सर्पिष इत्यत्र धातोरकर्मकत्वात्कर्मणोऽसम्भवात्कर्तृपदमेवोपात्तम् । क्रियाविषयमिति । स्तुतिक्रियाविषयमित्यर्थः । अपि स्तुयादितिशब्दाद्विष्णुकर्मिका एतत्कर्तृका शक्यत्वेन सम्भाव्यमाना स्तुतिरिति शाब्दबोधः । शक्त्युत्कर्षाविष्करणम् । शक्त्युत्कर्षस्य व्यञ्जनया बोधनम् । अपि-वेदान्तपारगमित्यादिशब्दाद्वेदान्तपारगकर्मकमेककर्तृकमुचितं हननं सम्भावनाविषय इति बोधे सम्भावनाविषयक्रियायामौचित्योत्कर्षबोधे औचित्ये सम्भावितत्वं व्यञ्जनया प्रतीयते । यत्क्रियायामौचित्यनिश्चितत्वस्या अनुष्ठानमेव । यत्र तु वाक्येऽपिपदन्न श्रूयते अथ च तत्क्रियाया अननुष्ठानमेव तात्पर्यविषयस्तत्रापिशब्दाध्याहारः । तद्यथा । विष्णोर्नाम न गृह्णीयात्न स्पृशेत्तुलसीदलम् । परनिन्दा न कर्त्तव्या परचिन्ता कदा च नेति । ननु गर्हायां लङ्पीतिसूत्रस्य सर्वबाधकतया अपि स्तुयाद्धलमित्यत्र कथं लिङित्यत आह । उपसंवादेतीति । वार्त्तिकेन । उपसंवादाशङ्क्योर्लिङित्यनेन । तत्कर्त्तुरिति । हलस्तुतिकर्त्तुरित्यर्थः । ननु धिक्शब्दस्य निन्दाप्रतीत्यर्थमयोगः सा चेद्धलपदसमभिव्याहारादेव प्रतीयेत तदा धिक्शब्दप्रयोगो व्यर्थोऽत आह । तदेवेति । निरन्तरसम्बन्धः । व्याप्तिरूपः । स च किन्निष्ठ इत्याकाङ्क्षायामाह । स चेति । नन्वेवङ्गुणादिभिरत्यन्तसंयोगे द्वितीयेति समुदायान्यतमे कालाध्वनिष्ठव्याप्यतानिरूपितव्यापकतायां विवक्षितायान्द्वितीयेत्यस्य लाभेऽपि द्वितीयाप्रकृत्यलाभ इत्यत आह । प्रत्यासत्येति । ननु यत्रैकमासव्यापक ऋणेश्लोचाध्ययनन्तत्र मासमधीते गणेश्लोचमिति न स्यान्मासान्तरे तत्श्लोचाध्ययनस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावस्य सत्त्वादत आह । बुद्धिस्थावदवयवेति । अवयवः । दिनादिरूपः । एवञ्च मासमधीत इत्यत्र मासपदम्बुद्धिस्थतत्तन्मासपरन्तदवयवयावद्दिननिष्ठव्याप्यतानिरूपितव्यापकता यत्र तत्रैव तादृशः प्रयोगः । मासपदञ्च त्रिंशद्दिन समुदायपरम् । दिनपदञ्चैकसूर्योदयावधिकापरसूर्योदय पर्यन्तस्थिताखण्डजन्यद्रव्यपरम् । न तु षष्टिघटीसमुदायो दिनपदार्थः । यत्रप्र-

त्यङ्मेकघट्यङ्क्षणेयस्तोत्राध्ययनन्तत्रापि घट्यन्तरेऽध्ययनस्याभावसत्त्वेन मासमधीत इतिप्रयोगानुपपत्तेः। मासनिष्ठा व्याप्यता च तादात्म्यसम्बन्धावच्छिन्ना। व्यापकता तु कालिकसम्बन्धावच्छिन्ना। व्यापकताघटकाभावश्च प्रतियोगिव्यधिकरणो विवक्षितः। अत एव तन्मासावयवदिनेऽपि यद्घट्यवच्छेदेन नाध्ययनन्तदवच्छेदेन कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाध्ययनाभावस्य सत्त्वेऽपि न मासमधीत इति प्रयोगानुपपत्तिः। एकादश्यां रात्रौ जाग्ट्यादित्यत्र द्वितीयातिप्रसङ्गनिराचष्टे। एकादश्यामिति। न चैवमप्येकादश्यान्नान्नभुक्तीतेति यच्चोच्यते तत्रैकादशीव्यापकस्य भोजनाभावस्य तात्पर्यविषयत्वाद्द्वितीयापत्तिरिति वाच्यम्। तादृशतात्पर्ये त्वेकादशीन्न भुक्तीत्येव प्रयोगात्। प्रकृते त्वेकादशीरूपस्य कालस्य भोजनाभावाधिकरणत्वविवक्षैव। स चाभावः प्रतियोगिव्यधिकरण एव विवक्षितोऽतो नानुपपत्तिः। न च मासमधीत इत्यत्र धातोरध्ययनपूर्वकव्यापने द्वित्तिकल्पनया कर्तुरित्येव कर्मत्वं सिद्धमिति कालाध्वनोरितिसूत्रवैयर्थ्यमिति वाच्यम्। मासन्दे वदत्तस्य कौटिल्यभोजनाभावश्चेति यत्र प्रयोगस्तदर्थमस्यावश्यकत्वात्। मासस्य द्विरधीत इति यत्र प्रयोगस्तत्र मासव्यापकत्वनिवृत्तावेव तात्पर्यन्तु मासाधिकरणकत्वनिवृत्ताविति क्त्वोऽर्थप्रयोग इति सूत्रेण षष्ठ्येव न त्वनेन द्वितीयेति बोध्यम्॥

इति द्वितीयाविवरणम्।

स्वतन्त्रः कर्त्ता। अत्र स्वतन्त्रपदमन्यानधीनव्यापाराश्रयपरम्। स च व्यापारो न शब्दावाच्यः किन्तु कारकाधिकारादुपस्थितक्रियारूप इत्याह। कारकाधिकारादिति। इदं ण्यन्तेऽप्यस्तीत्याह। क्रियाजनन इति। तत्र प्रयोज्यनिष्ठव्यापारात्मकक्रियाजनने प्रयोजकः स्वतन्त्र एव। किन्तत्स्वातन्त्र्यमत आह। स्वातन्त्र्यञ्चेति। प्रधानीभूतेति। अत्र प्राधान्यञ्च तद्वाच्यार्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वात्यत्वम्। एतादृशस्य स्वातन्त्र्यस्य विवक्षितत्वात्काष्ठम्पचतीत्यत्र काष्ठस्य कर्मत्वोपपत्तिः। धात्वर्थाश्रयत्वञ्च व्यापारतावच्छेदकस-

स्वन्त्रेन । तेन न कालिकसम्बन्धमादायातिप्रसङ्गः । कर्तृप्रत्ययसमभिव्याहार इतीति । अस्य च कर्तृप्रत्ययसमभिव्याहारे यः प्राधान्येन दृष्ट इत्यर्थोऽभिप्रेतः । एतेन कर्तृप्रत्ययसमभिव्याहारे प्राधान्यं यद्यपि कर्तृव्यापारस्य तथापि कर्मप्रत्ययसमभिव्याहारे फलस्यैव प्राधान्यात्तत्र देवदत्तेन पच्यते तण्डुल इत्यादौ देवदत्तादेः कर्तृत्वन्न स्यादितिशङ्काया नावकाशः । यद्यपि धातोः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले वा शक्तिस्तथापि तत्तत्प्रत्ययसमभिव्याहाररूपतात्पर्यग्राहकवशाद्यत्र कर्मणि विहितप्रत्ययसमभिव्याहारस्तत्र व्यापारावच्छिन्नफलस्यैव धातुनोपस्थितिः । णिजन्ते प्रयोज्यस्य कर्तृत्वोपपत्तये आह । णिचश्चेति । वाचकत्वमेवेति । न तु द्योतकत्वमिति शेषः । तथात्वे द्योत्यार्थस्य विशेषणत्वात्प्रयोज्यव्यापारस्य प्राधान्यापत्तौ गुरुः शिष्येण पाचयतीति यत्र प्रयोग इष्यते तत्र शिष्यो गुरुणा पाचयतीत्यादिप्रयोगापत्तेः । पच्यते तण्डुलः स्वयमेवेति यत्र प्रयोगस्तत्र यद्यपि फलमेव धात्वर्थस्तथापि तत्र व्यापारत्वारोपः । अन्तर्भावितण्यर्थतायाम्प्रयोज्यस्य कर्मत्वमकथितत्वेतिसूत्रव्याख्यानावसरे उपपादितमेव । कारक इतिसूत्रभाष्यादिति । तत्र ह्येवमुक्तम्आधानसमवाये स्वाली परतन्त्र । व्यवाये स्वतन्त्रा । किम्पुनः प्रधानम् । कर्त्ता । कथं ज्ञायते कर्त्ता प्रधानमिति । यत्सर्वेषु कारकेषु सन्निहितेषु कर्त्ता प्रवर्त्तयिताभवतीति । ततः प्रयोज्यस्यास्वतन्त्रत्वात्कर्तृसंज्ञा न प्राप्नोतीति पूर्वपक्षे तस्यापि स्वेच्छाधीनप्रवृत्तिकत्वात्स्वातन्त्र्यं साधितम् । प्रकृतसूत्रेऽपि तन्त्रशब्दस्य प्रधानवाचकत्वमस्ति प्राधान्ये वर्त्तते तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते स्वप्रधान इति गम्यते तद्यः प्राधान्ये वर्त्तते तन्त्रशब्दस्तस्येदङ्ग्रहणमित्युक्तम् । स्वशब्द आत्मवाची । स आत्मा तन्त्रम्प्रधानं यस्य स स्वतन्त्रः । साधकतममितिसूत्रस्थतमपा प्रकर्षः सूचितः स च कारकान्तरापेक्षया । कारकपर्यायसाधकशब्दादुत्पन्नेन तमपा प्रकृत्यर्थापेक्षस्यैव प्रकर्षस्य लाभात् । तत्र करणात्करणान्तरे प्रकर्षस्याभावेन कारकान्तरापेक्षयैव प्रकर्षो वाच्यः । स च यादृशस्तमाह । यद्व्यापाराव्यवधानेनेति । करणान्तरात् प्रकर्षश्चेद्विज्ञायते तदाऽश्वेन दीपिकया पथा व्रजतीत्यत्र सर्वेषां न स्यात् । अधिकशब्दोपादाननिमित्तम्प्रकर्षन्दूषयति । अधिकरणेति । तिलेषु तैलमित्यादावेवेति । आदिना दध्नि सर्पिरित्यस्य सङ्ग्रहः ।

न च आश्रियन्तेऽस्मिन्निति व्युत्पत्त्या कर्तृकर्मणोर्धारणक्रियाश्रिति य आधारस्सोऽधिकरणसंज्ञ इत्यर्थो भविष्यतीति वाच्यम्। एवमपि यो मुख्यस्तद्वाराधारस्यस्यैव स्यान्न गङ्गायाङ्घोष इत्यादौ। गङ्गाशब्दबोध्यो न मुख्याधार इत्यभिप्रायेण भूतले घटः स्रोख्याम्पचतीति परित्यज्य गङ्गायां घोष इत्युपात्तन्तस्य मुख्याधारपरमेवाधारपदम्भविष्यतीति कल्पनेन सामञ्जस्यमित्याशयात्। यथा च ग्रन्थकृते गौणत्वन्तदुपपादयति। तीरधर्मस्येति। प्रवाहे आरोप इति। एवञ्च गौणत्वं स्पष्टमेव। तीरे लक्षणेति। गङ्गापदशक्यतावच्छेदकस्य गङ्गात्वस्य तीरे आरोपः। शक्यतावच्छेदकारोप एव लक्षणा तदा गङ्गापदबोध्यस्य गौणत्वं स्पष्टमेव। प्रकर्षो नाश्रीयत इति। एवञ्च यथाकथञ्चिद्य आधारस्सोऽधिकरणसंज्ञः। एवञ्च मुख्याधारत्वाभावेऽपि यथाकथञ्चिद्यस्मिन्नाधारत्वन्तन्मुख्यङ्गौणं वा सर्वमप्यधिकरणसंज्ञम्। गौणाधारस्याप्यधिकरणसंज्ञायाम्भाष्यमपि साधकमित्याशयेनाह। एवं गङ्गायां गाव इति। इदं तत्त्यक्तपे गर्गकुलमित्यस्याप्युपलक्षणम्। प्रकृतसूत्रभाष्य इति। तच्च हि तमग्रहणङ्किमर्थम्। सर्वेषां कारकाणां करणसंज्ञा प्रसज्येतेतिविचारे पूर्वसंज्ञानामपवादत्वात्परसंज्ञानाञ्च तथैव बाधकत्वम्भविष्यतीत्यभिधाय धनुषा विध्यतीत्यत्रापाययुक्तत्वादपादानसंज्ञासाधकत्वाच्च करणसंज्ञा प्राप्नोति। एवन्तर्हि लोकेऽभिरूपाय कन्या देयेति। न चानभिरूपे प्रवृत्तिरस्ति तत्राभिरूपतमायेति गम्यते एवमिहापि साधकं करणमित्युच्यते सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरिति साधकतममिति विज्ञास्यते। एवन्तर्हि सिद्धे सति यत्तमग्रहणङ्करोति तज्ज्ञापयत्याचार्यः कारकसंज्ञायान्तरतमयोगो न भवतीति। आधारमाचार्यः किन्त्याश्रयम्मन्यते यत्र कृत्स्न आधारात्मा व्याप्नोति तेनेहैव स्यात्तिलेषु तैलन्द्धि सर्पिः। गङ्गायाङ्गावः कूपे गर्गकुलमित्यत्र न स्यात्। कारकसंज्ञायान्तरतमयोगो न भवतीत्यत्रापि सिद्धम्भवति इति। पक्षान्तरमाह। यदि वेति। चरितार्थमिति। अन्यथा संज्ञिलाभो न स्यात्। युक्त्यन्तरमाह। साधकशब्दस्येति। संसिद्ध्यर्थकधातुनिष्पन्नत्वात्। उक्तप्रयोगादीति। गङ्गायाङ्गावः कूपे गर्गकुलमितिप्रयोगसाधनायेत्यर्थः। प्रकृते। उद्देश्यवाचके साधकपदे। तदभावः। स्वरितत्वाभावः। तमपा तु प्रकर्षो बोध्यत इत्यव्यवधानलाभः। एवञ्च। उक्त-

व्यवस्थासिद्धौ च। ननु व्यवधानेन फलोत्पादकेऽपि करणत्वं दृश्यते । यथा राजा चतुर्भिरुपायैः शत्रून्वशीकरोति। अत्रामात्यभटादिद्वारैव वशीकरणन्न साक्षात्। न चाव्यवधानविवक्षया तथा प्रयोग इति वाच्यम्। तथा सति व्यवधानेन यत्र फलोत्पादस्तत्र संज्ञान्तरस्य प्राप्तौ तृतीयाया अप्राप्त्या तात्पर्यग्रहसङ्गतेरिति चेन्न। नटस्य शृणोतीत्यत्र नटे गीतद्वारा क्रियाजनकत्वेन कारकत्वस्वीकाराल्लकरणत्वप्राप्त्या तद्व्यावृत्त्यर्थन्तमग्रहणमित्याशयात्। करणत्वोपचारेणेत्यस्य करणत्वप्राप्त्येत्यर्थः। तत्र नटस्य कारकत्वे आख्यातोपयोग इतिसूत्रस्थमुपयोगग्रहणङ्गिमर्थम्। नटस्य शृणोतीतिभाष्यमेव साधकत्वबोध्यमिति दिक्। दिगितिदिगर्थस्तु पूर्वोक्तगौणाधारस्याधिकरणसंज्ञाया अप्राप्त्युपपादनाय मुख्यन्यायोपन्यसनम्प्राचान्तदसङ्गतमेव। तस्य न्यायस्य पदकार्यविषयत्वाद्विशिष्टरूपोपादानविषयत्वाच्चेति। तच्छक्तिमत्त्वम्। करणत्वशक्तिमत्त्वम्। व्यापारवत्त्वेवेति। अत एव करणत्वं व्यापारनियतमिति वक्ष्यमाणं सङ्गच्छते। प्रकृत्यादिभ्य इत्यत्रादिशब्दः प्रकारे। समुदायघटकेभ्यस्तृतीयेत्यर्थः। नाम्ना सुतीक्ष्णश्चरितेन दान्तः। अत्र नामपदार्थस्याभेदः सुतीक्ष्णशब्दे भासते। चरितेन दान्त इत्यत्र चरितशब्दार्थस्य प्रकृतिस्वरूपस्य दान्तत्वेऽन्वयः। घटत्वेनाभावः। अत्र तृतीयार्थोऽवच्छिन्नप्रतियोगिताकत्वम्। पट इतिज्ञाने पटत्वेन पटस्य विषयत्वन्तु द्रव्यत्वेनेत्यत्रावच्छिन्नत्वन्तृतीयार्थो बोध्यः। प्रकृत्या चारुः। प्रकृतिः स्वभावः। प्रकृतिसम्बन्धिचारुत्ववान्। न च कृत इत्यध्याहारेण करण एव तृतीयाऽस्तु। घटत्वेनेत्यादिष्वपि घटत्वादिपदानां घटत्वावच्छिन्नप्रतियोगिताकत्वलाक्षणिकतया ज्ञात इत्यस्याध्याहारेण करणतृतीयया सिद्धिरिति वाच्यम्। यदा न तस्याध्याहारस्तदा शेषलक्षणा षष्ठी प्राप्नोति तद्बाधनार्थमस्यावश्यकत्वात्। प्रायेण याज्ञिकः। प्रायःपदमाचारातिशयपरम्। ज्ञात इत्यस्य चाध्याहारः। आचारातिशयेन याज्ञिक इत्यर्थो ज्ञात इत्यर्थो विवक्षितः। गोत्रेण गार्ग्यः। गोत्रसम्बन्धिगार्ग्यत्ववान्। सामान्यविशेषभावेनान्वयः। समेन विषमेणेतीत्यादौ द्वितीयार्थे तृतीया। द्विद्रोणेन धान्यं क्रीणाति। पात्रादित्वात्स्त्रीत्वाभावः। परिच्छेद्यत्वन्तृतीयार्थः। तस्य धान्येऽन्वयः। सुखेन दुःखेन यातीत्यत्र सुखदुःखपदन्तत्साधनपरम् तच्च याधात्वर्थफलेऽभेदेनान्वेतीति द्वितीय-

यायाम्प्रासायामनेन तृतीया । शक्तिद्वययोग इति । करणत्वकर्मत्वात्मकशक्तिद्वयोग इत्यर्थः । तेन संज्ञाद्वयसमावेशेन । परस्मैपदाभाव इति । अणावकर्मकादितिसूत्रेण प्राप्त इत्यादिः । ननु करणरूपेऽर्थे तृतीयाया विधानेन कथं तृतीयया कर्मत्वबोधनमत आह । अत्रेति । अत्र कार्यकालपक्षे कर्मत्वसामानाधिकरण्यविशिष्टमपि करणत्वं प्रकृतसूत्रप्रदेशोपस्थितकर्तृकरणयोरितिसूत्रघटककरणपदेन गृह्यत इति तृतीयैवोभयबोधिकेति भावः । ननु तर्हि त्वान्दीव्यतीति नैव स्यादत आह । यदा त्वामिति । अत्रेष्टपरिवर्त्तनाद्यनुकूलव्यापारो दीव्यतेरर्थः । फलञ्चेष्टपरिवर्त्तनन्तदाश्रयत्वसमानाधिकरणकर्मत्वस्य कर्तुरितिसूत्रबोधितस्य विवक्षेत्यर्थः । यदोभयशक्तिमत्त्वन्तदैवोक्तः प्रकार इति भावः । ननु पूर्ववत्षष्ठीप्राप्त्या कथम्मनसादेव इति हरदत्तोक्तः प्रयोग इत्यत आह । मनसादेव इत्यादाविति । अस्य संज्ञात्वे मनसः संज्ञायामित्यलुक् । असंज्ञात्वे तु तत्पुरुषे कृतीतिसूत्रघटकबहुलग्रहणेनालुक् । ननु मनसो दिवधात्वर्थसाधकतमत्वसमानाधिकरणकर्मत्वशक्तिमत्त्वात्कथन्तृतीयेत्यत आह । हेतुतृतीयान्तेनेति । अत्र कर्मणि । दिवः कर्म चेतिसूत्रबोधितकर्मत्वशक्तिमति । तृतीयापत्तिरिति । दीव्यन्तेऽक्षा इत्यादावित्यादिः । इदमुपलक्षणम् । देवना अक्षा इत्यत्र ल्युटा करणत्वस्याभिधानेऽपि कर्मत्वस्यानभिहितत्वात्षष्ठ्यापत्तिरिति । तद्दप्रकारेण । अभिहितशक्तिव्यक्ताशेनास्मिन्नर्थेऽपादानमुत्तराणि कारकाणि बाधन्त इति भाष्यमेव मानम् । तथाहि । संज्ञयोः स्वतो न विरोधः । कृत्कृत्यसंज्ञयोरिव समावेशसम्भवात् । किन्तु फलद्वारक एव वाच्यः सोपि चेन्नाश्रीयते तदा परत्वाद्दित्यसङ्गतमेव स्यादिति तदा कल्पनमावश्यकमिति । प्राचामुक्तिङ्खण्डयति । एकैव शक्तिरिति । तत्पूर्वकस्त्यागः । फलप्राप्तिपूर्वकस्त्यागः । एवञ्चाक्षा क्रोशेन वा अनुवाकोऽधीत इत्यत्र त्यागस्तृतीयार्थः अव्याप्यकत्यागप्रतियोग्यतीताध्ययनकर्मानुवाक इति शाब्दबोधः । न चात्र भूते विहितनिष्ठया त्यागस्य लाभे तृतीयायास्तत्र शक्तिकल्पनं व्यर्थमिति वाच्यम् । तयाऽतीतत्वलाभेऽपि निवृत्तिरूपस्य त्यागस्याप्रतीतेः । अतीतत्वं हि वर्तमानध्वंसप्रतियोगिसमयकत्वम् । निवृत्तिश्च पुनरनुत्पादनमिति भावः । क्रियाद्विसमानकालेति । अत्रादिना गुणद्रव्याभावसंग्रहः । यदा गुणप्रधानभावे-

नैतेषु द्वयोः सम्बन्धस्तदा साहित्यवाचिसहशब्दस्य प्रयोगो भवति । यथा पुत्रेण सहागतः । पुत्रेण सह क्रूलः । देवदत्तेन सह चैत्रस्य धनम् । देवदत्तेन सह चैत्रस्य नाशः । यदि च नाशोपि क्रियैव तदा चैत्रेण सह मैत्रास्याभाव इत्युदाहरणम् । अभावपदे नञो विरोध्यर्थकत्वाद्भावविरोधी पदार्थविशेष एवाभावः । सप्तम्यै दशमञ्जूषायाम् । समानदेशक्रियावत्त्वम् । समानो देशोऽधिकरणरूपो यस्यास्तादृशी या क्रिया तद्वत्त्वमित्यर्थः । अत एव । द्वितीयस्य प्रकारस्याश्रयणादेव । एतत्सूत्रोदाहरणविषयेऽप्राधान्यञ्च शाब्दगुणान्वयित्वाभावरूपम् । यद्यपि पुत्रेण सहागतः पितेत्यादौ पुत्रशब्दार्थस्य निरूक्तसाहित्येऽन्वयेऽर्थात्तदन्वयित्वन्तथापि न शाब्दबोधविषयभूततदन्वयित्वम्, तत्साहित्यवान् पिता आगमनकर्त्तेत्येव हि बोध इत्थं तत्तच्छाब्दत्वरूपविशेषणाभावस्तत्तो विशेषणाभावस्तत्रास्ति । एकेनैव सुपुत्रेण सिंही स्वपिति निर्भया । सर्वैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ विद्यमानतावाचिसहशब्दयोगेऽप्यर्थेन तृतीया । पुत्रशब्दार्थे क्रियान्वयित्वमेव नेति विशेषाभावाद्विशिष्टाभावेऽत्येव । न च विद्यमानतावि शिष्ट एव सहशब्दार्थोस्तु । पुत्रशब्दोत्तरतृतीयाया उपपदविभक्तित्वेन षष्ठ्यपवादतया सहशब्दार्थेऽनन्वयापत्तेः । यदि विद्यमानैः पुत्रैर्दुःखं गर्दभीत्यर्थस्तत्राश्रीयते तदा कर्तृकरणयोरित्येव तृतीया भविष्यति । सह युक्त इति सूत्रे द्विविधोपि सहार्थो गृह्यत इति दिक् । सन्निधानलब्धमिति । अङ्गशब्दस्याङ्गिपरतया तत्सन्निधानेन यच्छब्दोऽङ्गिपर इति भावः । व्याख्यानादिति । अङ्गशब्दोऽयं समुदायशब्द इति भाष्यमूलकादित्यर्थः । अक्ष्येव काणमिति । अस्माच्चि काणमिति व्यवहारस्य सुप्रसिद्धत्वात् तथा च पुरुषे काणत्वरूपधर्माभावेनाक्ष्णा काण इति व्यवहारो नोपपद्यत इति भावः । अवयवधर्मस्य । काणत्वस्य । समुदाये । काणावयवघटितसमुदायसमवेतेऽवयविनि । तदवच्छिन्ने तादृशावयवव्यवच्छेदे चैवादौ अक्षिगतविकारवाचक एवेति । तथा च काणोऽयमित्येतावता सर्वसामञ्जस्येऽक्ष्णेति प्रयोगो न प्राप्नोतीति भावः । द्वौ विप्रावितिवदिति । एवञ्च सभेदेनान्यतरवैयर्थ्यमिति न्यायेन तादृशोऽत्र प्रयोगः । यद्यपि चक्षुर्नाशवान् सचक्षुष्कः काणपदार्थत्वेन लोके प्रसिद्धः । तथापि कण निमीलन इत्यभियुक्तवचनस्वर-

सादतिशयनिरूपकरणस्थभाष्यस्वरसाच्चाह । लेशतोऽपीति । प्रकारमात्रपर इति । इदमस्थमुरितिथमुप्रत्ययान्तो यद्यप्ययमिदंशब्दार्थसन्निकृष्टाभिन्नप्रकारप्रतिपादक इति प्राप्तमेवञ्च प्रकारसामान्यस्य लाभो न स्यात्तथापि प्रत्ययार्थमात्रेऽस्य लक्षणेति भावः । एवञ्च क्वचिद्धर्मभागी येन लक्ष्यते तद्वाचकप्रातिपदिकात्तृतीयेति सूत्रार्थः । सूत्रवैयर्थ्यमाशङ्कते । यद्यपीति । प्रकृतसूत्रविषये प्राचीनोक्तविशेषमाह । इत्थम्भूतस्येत्यादिना । लक्षणवाचकात् पृथगुपस्थितिः । अत्रत्या लक्षणवाचकशब्दजन्योपस्थित्यविषयत्वम् । किन्त्वन्यशब्दजन्योपस्थितिविषयत्वमेव । न तृतीयेति । अस्य लक्षणवाचको यः कमण्डलुपाणिशब्दस्तज्जन्योपस्थितिविषयत्वादिति भावः । अनवयवत्वादिति । प्रातिपदिकसंज्ञाप्रवृत्तिकाले संज्ञित्वेनाभिप्रेतसमुदायघटकत्वं यस्य तस्य तदवयवत्वमिति भावः । अत्र प्रमाणन्तु प्रकृतसूत्रस्थभाष्यमेव । तत्र हि इत्थम्भूतस्य लक्षणे तत्स्थे प्रतिषेध इति वार्त्तिकम् । तत्स्थे । लक्ष्यवाचिशब्दस्थे । अपि भवान् कमण्डलुपाणिरुच्छात्रमद्राक्षीदिति । न वेत्थम्भूतस्य लक्षणेनापृथग्भावात् । यत्रेत्थम्भूतस्य पृथग्भूतं लक्षणन्तत्र भवितव्यमितियुक्तम् । कैयट इत्यनेन सूचितामरुचिमकटयति । परे त्वित्यादिना । अनुर्लक्षण इति सूत्रभाष्य इति । तत्र हि नह्यवयवात्तदेव लक्षणम्भवति येन पुनः पुनर्लक्ष्यते । किन्तर्हि यत्सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणम्भवतीत्युपक्रम्योक्तम् । कैयटोक्तमभ्युपेत्यापि दूषणमाह । किञ्चेति । अत एव । पश्चादुत्पन्नस्यापि तन्मध्यपतितन्यायेन तदवयवत्वादेव । यदुक्तज्ञानातीरिति तन्निमित्तमाह । जनेर्नेति । लौकिकहेतुरपि करणमिति । व्यापारवदसाधारणङ्कारणङ्करणमिति लौकप्रसिद्धेः । करणन्त्विति । कर्तृकरणयोरितिसूत्रघटककरणशब्दार्थस्त्वित्यर्थः । साधकतममितिसूत्रेण क्रियाजनकस्यैव करणसंज्ञाविधानात् । वैषम्यान्तरेति । लौकिककरणत्वस्य हेतुत्वापेक्षयेत्यादिः । भिन्नवेति । हेतुत्वशङ्किः । हेतुत्वरूपो धर्मः । स चाखण्डोपाधिर्हेतुर्हेतुरिति पुष्पादिसङ्घे व्यापाररहितेऽपि व्यवहारादिति भावः । तथा च नेदं सूत्रङ्कर्तृकरणयोरितिसूत्रेण गतार्थम् । एवं व्याख्यानेन हेतुत्वकरणत्वयोर्भेदोज्ञात एवेति करणन्त्वित्यग्रिमोपन्यासवैयर्थ्यमत आह । स्फुटप्रतिपत्तय इति । फलस्य हेतुत्वविवक्षायां बीजमाह । त-

स्यापीति । जनकत्वात् । क्रियासाध्यकप्रवृत्तिजनकत्वात् । इत्थं हि लौकिकः क्रमः । फलज्ञानम् । ततः फलेच्छा । तत उपायज्ञानम् । अथोपायधर्मिकफलसाधनताज्ञानम् । तत उपायेच्छा । ततः क्रियां साधयितुमप्रवृत्तिरिति । गम्यमानापीत्यस्यानुसन्धीयमानाऽप्याक्षिप्तेत्येवं व्यवक्रियमाणेति नार्थः । क्रियारूपार्थस्याध्याहारे तादृशानुसन्धानस्य पदाजन्यतया शाब्दबोधनियामकत्वासम्भवेन तस्यार्थस्य शाब्दबोधविषयत्वासम्भवात् । नापि शब्दानुसन्धानम् । उच्चारितस्यैव शब्दस्योच्चारितः शब्दः प्रत्यायको नानुच्चारित इतिभाष्योक्तेरनुसन्धीयमानस्य शाब्दबोधजनकत्वासम्भवात्पिण्डीमित्यं तन्मात्रात्पिण्डीभक्षयेतिशाब्दबोधानुपपत्तेः किन्तु पिण्डीभक्षयेतिवाक्यस्यार्थे पिण्डीकर्मकभक्षणे पिण्डीमित्यस्यैकदेशस्य शक्तिरेव कल्प्यतेऽतस्तावन्मात्रादर्थबोधस्तथा प्रक्रान्तेऽपीत्याशयेनाह । अमेणेत्यादिपदजेत्यादिना । नामार्थत्वेन । सुबन्तार्थत्वेन । स्ववाच्येति । स्ववाच्यविशिष्टाया वाक्यैकदेशसाध्यमित्यर्थसाधनक्रियायाम्मति शब्दस्य अमेणेत्येकदेशार्थस्य करणत्वकरणत्वव्यवहार इत्यर्थः । वस्तु तस्तु अमेणानमितिवाक्यैकदेशस्य अमकरणकसाधनकर्मकर्तृकसत्ताऽभावरूपेऽर्थे शक्तिरेव । एवमेव प्रविश्य पिण्डीमित्यादिवाक्यैकदेशप्रयोगस्थले ज्ञातव्यम् । अशिष्टव्यवहारेत्यत्र कर्मधारयभ्रमनिवारणायाह । अशिष्टानामिति । अशिष्टपदमत्र न शिष्टभिन्नपरम् । श्रुतिस्मृत्यादिप्रामाण्याभ्युपगन्तृणामपि रागोत्कट्यात्तादृशव्यवहारस्थले दास्यो संयच्छत इतिप्रयोगदर्शनादत आह । सङ्कीर्णाचाराणामिति । कालभेदेन धर्माधर्मफलकाचारकर्तृणामित्यर्थः । प्रक्रान्ते च दासीशब्दार्थस्य रतिफलके दाने सम्प्रदानत्वेनान्वयात्तादृशव्यवहारस्य सङ्कीर्णाचारकर्तृकर्तृकत्वमिति भावः । दास्या संयच्छत इत्यत्र दाशस्य सा चेच्चतुर्थ्यर्थ इतिसूत्रेणात्मनेपदम् । या तु भार्या शास्त्रोक्तरीत्या विवाहिता तस्यै दानानन्तरं यत्र तत्रत्यनन्तरन्तस्या उपभोगस्तत्र न चतुर्थ्यर्थे तृतीया अशिष्टव्यवहाराभावादिति न तत्रात्मनेपदमित्याशयेनाह । मूले धर्मेत्विति ॥

इति तृतीयाविवरणम् ।

दानस्य कर्मणेति वाक्यं घटकद्दानेतिप्रातिपदिकार्थस्य न क्रियात्वमिति दानस्य कर्मणेत्यनुपपन्नमत आह । दाधात्वर्थस्येति । इदमिति । दाधात्वर्थस्येत्येतत् । अत एव भाष्ये क्रियाग्रहणङ्कर्त्तव्यम् । इहापि यथा स्यात् । आधाय निगर्हते । युद्धाय सन्नह्यते । पत्ये शेते इति । तत्तर्हि वक्तव्यन्न वक्तव्यम् । कथम् । क्रियां हि नाम लोके कर्मेत्युपचरन्ति । काङ्क्रियाङ्करिष्यसि । किङ्कर्म करिष्यसीति भाष्ये उक्तम् । आद्यायेति । आद्यन्निन्दति । नास्तिकत्वात् । युद्धायेति । युद्धविषयकं सन्नहनपूर्वकन्निश्चयङ्करोतीत्यर्थः । पत्ये शेत इति । पतिमुपस्थत्य शेत इत्यर्थः । कर्मणेत्यत्र कर्मपदन्न यत्किञ्चित्क्रियाकर्मपरम् । किन्तूच्चारितवाक्यघटकधात्वर्थक्रियाकर्मपरम् । एवञ्च कर्मसम्बन्धत्वेनेच्छाविषयो यस्य सम्प्रदानम् स्यादिति सिद्धम् । अत एवाजाङ्ग्रामन्नयतीत्यत्र न ग्रामस्य सम्प्रदानत्वन्तत्र ह्यजाग्रामसम्बन्धो जायतामित्येवेच्छा न तु ग्रामोऽजासम्बन्धो जायतामित्याकारेच्छा । यदा तु संयोगानुकूलव्यापारमात्रन्धात्वर्थः ग्रामसंस्कारार्थञ्चाजानयनन्तदा ग्रामायाजान्नयतीति भवत्येव । कर्मणेतिहतीयोपपत्तये आह । सम्बन्धमिति शेष इति । स्वत्वादीति । आदिना स्वामित्वपरिग्रहः । स एव । सम्प्रदानत्वशक्तिमानेव । ननु कर्मणेति न कर्तव्यम् । यमभिप्रैतीत्युक्त्यापि उद्देश्यस्य लाभात् । क्रियाग्रहणञ्च न कार्यमित्यपरमनुकूलमभिधत्तीत्याशयेनाह । कर्मणेति किमिति । उद्देश्यतया धात्वर्थफलाश्रयत्वेनेच्छाविषयत्वादस्योद्देश्यत्वम् । अत एवान्तरङ्गत्वमप्यतोऽस्य धात्वर्थफलाश्रयत्वप्रकारकेच्छा ततो विप्रादेस्तत्सम्बन्धित्वप्रकारकेच्छेति । कर्मणा योऽभिप्रैतीति । कर्मणाऽभिप्रैतीत्युक्ते आख्यातार्थकर्तुरुपस्थितत्वाद्योऽभिप्रैतीत्यस्य लाभो भविष्यतीत्यभिप्रायः । न च यं स इत्यस्याध्याहारो भविष्यतीति वाच्यम् श्रुतपदार्थसम्बन्धेनैवाकाङ्क्षाशान्तेरध्याहारे मानाभावात् । ननु कर्तुरीप्सितं हि कर्म भवति । न हि तदा कर्त्तास्तीति कथं कर्मसंज्ञेत्याह । न च कर्तुरिति । स्वतन्त्रोपलक्षणत्वादिति । स्वातन्त्र्याच्च धात्वर्थप्रधानीभूतव्यापाराश्रयत्वन्तच्च प्रकृते कर्तृसंज्ञाभावेऽप्यक्षतमेवेति भावः । कर्तुः सम्प्रदानत्वे इष्टाप्रत्तिरिति तु न भ्रमितव्यम् । उपाध्यायायगिश्येष गौर्दीयत इति प्रयोगो यत्र तत्र गिश्यायोपाध्यायस्य गौर्दीयत इति प्रयोगापत्तेः । अत एव । कर्तृग्रहणस्य स्वत-

न्योपलक्षणत्वादेव । कर्तुरपादानत्वे पीति । सार्थं एनन्त्यजति अयञ्च सार्थाद्वीयत इति ह्यत्र सम्प्रत्ययः । सार्थश्च मनुष्यसमुदायः समुदायश्च समुदाय्यवयवाभिन्नेऽयमपि तत्समुदायावयव इति सार्थस्यापादानत्वेऽपि निरुक्तस्यातन्त्रान्त्स्यात्तीति भावः । अकर्मकक्रियोद्देश्यस्य । पत्ये शेत इत्यादौ पत्यादेः । नन्वकर्मकक्रियास्थलेऽतिप्रसङ्गनिवारणाय ज्ञातस्य क्रियया यमभिप्रैतीतिवचनस्य कर्मण्यतिप्रसङ्ग इत्यत आह । कर्मरहितेति । इदञ्च व्याख्यानन्नापूर्वमित्याशयेनाह । सकर्मकेष्विति । तदर्थत्वात् । सम्प्रदानत्वेनाभिप्रेतो यो विप्रादिस्तत्पुष्ट्यादिप्रयोजकतया विप्रार्थत्वात् । दाश्गोघ्नावित्येतदर्थमिति । सम्प्रदानि कारकेऽनेन सूत्रेण दाश्गोघ्नशब्दयोर्निपातनात् । अत एव मूले दाश्नन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिरिति तयोरर्थं वक्ष्यति । ननु सम्प्रदानशब्दस्य सम्प्रदीयते यस्मै यत्पुष्ट्यादिकामनया इत्यर्थः कल्प्यतेऽतो न तत्र चानुपपत्तिरत आह । तत्सम्प्रदानकमिति । सम्प्रदानसंज्ञायास्त्वे विप्राय गान्ददाति दानीयो विप्र इतिवाक्याद्विप्रसम्प्रदानकन्दानमिति दानसम्प्रदानाभिन्नो विप्र इत्यादिरीत्या बोधो भवति । तादर्थ्ये एव चेच्चतुर्थीविधानन्तदा यूपाय दार्वित्यशब्दाद्यथा यूपार्थन्दार्वेति बोधो भवति तथा विप्राय गान्ददातीत्यादित्यशब्दाद्विप्रार्थङ्गोकर्मकन्दानमित्याद्येव बोधः स्यादिति भावः । किं च सम्प्रदानत्वेन तेभ्यः शब्देभ्यो बोधस्त्वीक्रियते तदा कर्मणा यैतिसूत्रस्य क्रियार्थोपपदस्य चेतिसूत्रेण गतार्थता न भवत्यन्यथा विप्रम्पोषयितुमित्याद्यर्थकल्पनयाऽस्य सूत्रस्य तेन सूत्रेण गतार्थता स्यात् । अत एव । सम्प्रदानसंज्ञासत्त्वादेव । यत्तु चतुर्थीसमासे कारकपूर्वपदकत्वान्नतिकारकोपपदादिति सूत्रन्तद्विषये प्रवर्त्तते इति । तन्न । तादर्थ्ये चतुर्थ्यैव सिद्धे चतुर्थी सम्प्रदान इति सूत्रं रुच्यर्थानामित्यादिविषये चतुर्थ्यर्थमिति भाषात्तद्विषये कारकपूर्वपदकत्वराभावस्यापि कल्पनसम्भवात् । (किञ्च चतुर्थी तदर्थार्थेतिसूत्रेण प्रकृतिविकृतिभाव एव समास इति वक्ष्यते यदि तादर्थ्य एव सर्वत्र चतुर्थी तदा प्रकृतिविकृतिभावस्य सर्वत्रैव सत्त्वेन वक्ष्यमाणव्यवस्थाप्यनुपपन्ना स्यादिति) । पूजार्थत्वेत्यिति । एतेन शाब्दबोधेऽपि वैलक्षण्यं सूचितम् । हरिर्भक्तिमभिलषतीत्यत्र रुच्यर्थानामितिसूत्रेण चतुर्थ्यर्थमर्थभेदन्दर्शयति । अभिलषतीत्यादिना ।

प्रीतिर्व्यधिकरणमिति । एतेन कर्मसंज्ञापवादभूतेयं सम्प्रदानसंज्ञा । न च प्रीधातोरप्येवं सति सम्प्रदानसंज्ञाप्रयोजकत्वं स्यादिति हरिम्रीणयतीत्यनुपपन्नमिति वाच्यम् । प्रीयमाण इतिनिर्देशेन प्रीधातुयोगे सम्प्रदानत्वाभावस्य कल्पनात् । कारकाधिकारादाह । क्रियाजनकत्वमत्रेति । षष्ठीविधये । इच्छस्याप्राप्तेरिति । अत्र कर्मसंज्ञाधिकरणसंज्ञावद्बाधिका स्यादिति भावः । ज्ञीप्सामान इत्यत्र ज्ञाधात्वर्थकर्मणि चेत्प्रत्ययस्तदा ज्ञानविषयस्त्वेन सम्प्रदानसंज्ञा णिजन्तार्थकर्मणि चेत् क्रियते तदा ज्ञानाश्रयस्य लाभ इति व्याख्याभेदेनार्थभेदं दर्शयति । ज्ञाधादेरिति । आत्मानुरागमिति । ण्यर्थकर्मणि प्रत्ययपक्षे इदम् । ज्ञाधात्वर्थकर्मणि प्रत्ययपक्षे आह । यद्वेति । सन्नन्तार्थकर्मत्वमुभयोरपि सम्भाव्यत इति विनिगमनाविरहादन्यतरत्रैवेति न नियम इति भावः । उभयथापि कर्मसंज्ञापवादेयम् । ज्ञाप्यमान इत्येव नोक्तं किन्तु ज्ञीप्सामान इत्यर्थभेद इति तत्त्वम् । एतेन ज्ञाधातोः प्रथमोपस्थितत्वमेव विनिगमकमित्यपास्तम् । यत्तु, ण्यन्तार्थकर्मण्येव प्राधान्यादत्र प्रत्यय इति । तन्न । सनुपादानस्वारस्यविरोधात् । धारेरितिसूत्रे भृञो णिजन्तस्य ग्रहणमितिभ्रमवारणायाह । भृङवस्थान इतीति । व्याख्यानादिति । यदि भृञो हेतुमण्यन्तस्यायन्निर्देश इत्युच्यते तदा मोक्षस्य भृञ्धात्वर्थकर्तृत्वासम्भवः किञ्च भृञः सकर्मकतया मोक्षस्य कर्मत्वन्न स्यात् भृङस्त्वकर्मकतयाऽण्यन्तताया अकर्तृत्वम्मोक्षस्यास्तीति हेतुमति ततो णिचि मोक्षस्य गतिबुद्धीतिसूत्रेण कर्तृत्वं सम्भवतीति भक्ताय धारयति मोक्षं हरिरिति प्रयोग उपपद्यते इत्येतदर्थनमूलकादित्यर्थः । भक्तस्य कारकत्वमुपपादयति । प्रेरणाया इति । नन्वत्र मोक्षस्यऋणत्वञ्चेत्तदा भक्तस्य उत्तमर्णत्वन्तत्स्वामित्वादुपपद्यते तदेव न । ऋणं हि नाम यत्र सजातीयदानमङ्गीकृत्य परदत्तद्रव्यादनन्तरकालिकगृहीतद्रव्यसजातीयद्रव्यदाननाम्नोऽदृष्टविशेषः । प्रकृते मोक्षस्यैवंविधऋणत्वाभावेनैतत्स्वामिनो भक्तस्य उत्तमर्णत्वासम्भवादत आह । अवश्यदेयत्वेनेति ॥ स्पृहेरीप्सित इति सूत्रे यदीप्सितपदन्तदिच्छाविषयपरम् । पुष्पेभ्यः स्पृहयतीत्युदाहरणे स्पृहिरिच्छामात्रवाची । पुष्पपदार्थस्य च विषयितायां चतुर्थ्यर्थेऽन्वयः । क्रियाजनकत्वञ्च विषयत्वेनैवेति । यदा तुप्रकर्षस्य प्रकृतधातूपात्तव्यापारज-

न्यफलाश्रयत्वस्य विवक्षा तदा कर्मसंज्ञेति मूलग्रन्थात्प्रतीयते । अत एव स्पृहणीयगुणैः स्पृहणीया शोभेत्यत्र कर्मण्यनीयर् । कुमार्य इव कान्तस्य वस्त्वन्ति स्पृहयन्तीत्यत्र तु इच्छासम्बन्धित्वमात्रस्य विवक्षा न तु क्रियाजनकत्वरूपकारकत्वस्यापीत्यतः षष्ठीत्याशयेनाह । फलाश्रयत्वेनेति । प्रकृतसूत्रचारितार्थ्यमाह । इदं सूत्रमिति । क्रियाजनकत्वमात्रेत्यत्वत्वमात्रपदेन तादृशफलाश्रयत्वव्यवच्छेदः । स्वीयसिद्धान्तरीत्या शाब्दबोधमाह । पुष्पसम्भेति । यत्र तु षष्ठी तत्र विशेषमाह । कुमार्य इवेति । क्रियासम्बन्धित्वमात्रेति । मात्रपदेन क्रियाजनकत्वव्यवच्छेदः । ये तु प्रकृतसूत्रेण सम्प्रदानसंज्ञा क्रियासम्बन्धित्वविवक्षायामेव अत एव षष्ठ्यपवादत्वमस्या इति व्यवहारः । एवं सति कुमार्य इवेत्यत्र कथं षष्ठीत्याकाङ्क्षायामध्याक्रियमाणपदार्थान्वयविवक्षयेत्याशङ्क्याह । अन्ये त्विति । भोगायेत्यध्याहृत्येति । अत्र शब्दाध्याहारः । यदि तु स्पृहयतियोगविवक्षैव तदाप्याह । का स्तायेति । आहुरित्यस्वरसबीजन्तु अस्य सूत्रस्य कारकाधिकारीयत्वात्क्रियासम्बन्धित्वमात्रविवक्षायामित्यसङ्गतम् । वदतो व्याघातात् । किञ्च कुमार्य इवेत्यत्र शब्दाध्याहारे विभक्तिविपरिणामे वा गौरवम् । सूत्रस्यैतस्य कर्तुरीप्सिततमत्वस्य च विषयविभागश्चोक्त एव । स्पष्टप्रतिपत्तये अत्र सिद्धान्तमाह । स्पृहधातुरिति । फलावच्छिन्न इति । तमिच्छाया एव । तच्चान्ततो विलक्षणविषयतारूपमेवाश्रीयते अत एवोक्तमत्कर्षविवक्षायामिति । एवञ्च कर्मसंज्ञायाः शेषषष्ठ्याश्चापवाद इयमित्युक्तिः प्रत्युक्ता । त्रयाणांसूत्राणाम्परस्परपरिहारेणैव प्रवृत्तेः ॥ क्रुधद्रुह । एषामर्थ इवार्थौ येषामित्यर्थः । क्रोधश्चामर्षरूपो मनसो वृत्तिविशेषः । उत्कर्षविरोधिधर्मारोपानुकूलव्यापारात्मकः । द्रोहश्चापकाररूपः । स च तदीयगुणे दोषत्वारोपानुकूलव्यापाररूप इति तयोर्भेदः । ईर्ष्या चात्तमा सा परकीयपाण्डित्यादिगुणानामसहनन्तच्च गुणादिज्ञानजन्यद्वेषात्मकम् । असूया च गुणेषु दोषतादात्म्यारोप इति द्रोहादस्या भेदः । द्रोहविषये नैते देवदत्तस्य गुणाः किन्तुदोषा एवेति ज्ञानम् । असूयाविषये तु देवदत्तो दुष्ट इत्याकारकं ज्ञानम् । कोपश्च देवदत्तीयविपरीताचरणज्ञानजन्यो वृत्तिविशेष इत्येतेषाङ्कोपप्रभवत्वोपपत्तिः । वस्तुतस्तु वाक्च-

क्षुरादिविकारानुमेयः प्ररूढकोप एव क्रोधः । द्रोहश्चापचिकीर्षारूपः मूलोक्तमपकारपदमप्यपचिकीर्षापरम् । तान्न क्षमते इति । अत्र क्षमा च परपुरुषदर्शनप्रयोजकदेशविशेषस्थितिरूपफलानुकूलव्यापारानुकूलव्यापार एव । अत एव तामिति कर्मत्वम् । ईर्ष्या च तद्भावः । ननु क्रियया मित्यनेनैव सिद्धेऽस्य सूत्रस्य वैयर्थ्यमत आह । हरेरिति । कुपधातुयोगे कर्मसंज्ञां वारयति । न ह्यकुपित इति । क्रोध इतीति । बोधनेनेति शेषः । तदर्थत्वाभावेन । क्रोधार्थत्वाभावेन । न तद्योग इदम् । कुपधातुयोगे सम्प्रदानत्वञ्च । किन्तु तद्योगे कर्मसंज्ञेति शेषः । अत एव भाष्यकैयटोक्तं व्याकुप्ये तेतिकर्मप्रयोगो मनोरमोक्त उपपन्नो भवति । यदि च शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् । यस्मै प्रसीदसि पुनः सभार्त्युदारोऽनुदारश्चेति काव्यप्रकाशस्थप्रयोगानुपपत्तिरिति विभाव्यते तदा महाकविप्रयोगदर्शनेन प्ररूढकोपार्थकत्वङ्कुपधातोरपि कल्पनीयम् । कोपसामान्यार्थकक्रुप्धातुयोगे तु नेति समर्थनीयम् । न च चित्तदोषार्थानामित्येव सूत्रमस्विति वाच्यम् । द्विषधातुयोगेऽतिप्रसङ्गात् । अत एवौषधन्द्वेष्टीतिप्रयोग उपपन्नो भवति । क्रोधादयश्चेतनविषया एव । द्वेषस्तु चेतनाचेतनविषय इति ॥ ननूपसृष्टपदस्य सोपसर्गयोरिति व्याख्यानङ्कथमत आह । वैयाकरणेति । निकाये । गृहे शास्त्ररूपे । अत एव । पूर्वोक्तरीत्या राधधातोरकर्मकत्वस्वीकारादेव । धात्वर्थैकदेशे क्षणपदार्थान्वयः । प्रश्नविषयशुभाशुभाश्रयत्वेन कर्मत्वङ्क्षणस्येति सकर्मकोऽयन्धातुरिति तु न शङ्क्यम् । तस्य फलस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात् । व्याख्यानादिति । द्विवचननिर्देशदर्शनमूलकव्याख्यानादित्यर्थः । अनयोः । तत्तदुपसर्गपूर्वकयोः । अत्र विप्रपदाच्चतुर्थ्या आश्रयत्वमर्थः । तस्य प्रवर्त्तनायामन्वयः । वस्तुतस्तु सम्प्रदानत्वशक्तिमत्त्वेनैवान्वय इति । अनुप्रतीतिसूत्रेऽनुप्रतिभ्यामिति समासः । यद्वा प्रकृतिवदित्यतिदेशेन लुक् तदाह । लुप्तपञ्चम्यन्तमिति । प्रत्येकमिति शेषः । अत एव प्रत्येकन्निमित्तत्वम् । तस्मादाह । अनयोरिति । शंसनस्येत्यर्थ इति । उपस्थितत्वात् । करणत्वस्य व्यापारनियतत्वसंरक्षणायाह । व्यापारस्येति । तादर्थ्ये । तस्मै इदन्तदर्थम् । तस्य भावस्तादर्थ्यम् । अस्याश्चतुर्थ्या उपपदविभक्तित्वेनेयं विशेषणादेव । उपकारक-

त्वमत्र न साक्षादेव। किन्तु परम्परयापि। अत एव। मुक्तये हरिमजतीत्यत्रैव ब्राह्मणाय पायसमितिवदधीत्यत्रापि चतुर्थी सिध्यति। ब्राह्मणाय वेद इत्यत्रापि तादर्थ्य एव। क्लृपीत्यत्र इका निर्देश इति भ्रमवारणायाह। सप्तमीति। अर्थग्रहणमिति। जायत इत्यादियोगे चतुर्थीदर्शनमूलकाद्याख्यानात्। न्यूनतां वारयति। सुखयोगेपीति। यथा तस्मै हितमितिनिर्देशाद्धितशब्दयोगे चतुर्थी तथा चतुर्थी तदर्थार्थबेति सूत्रेण चतुर्थ्यन्तस्य सुखशब्देन सह समासविधानाज् ज्ञापकात्सुखयोगेऽपि भवतीति भावः। क्रियार्थमिति। नपुंसकत्वमत्रोपपदापेक्षया। अत एव लक्षणा तथा च यल्लिङन्तदाह। क्रियाफलकार्थेति। फलेभ्यो यातीत्यादेः फलान्याहर्त्तुमित्याद्याकारकबोधश्चोच्चारितः शब्द इति नियमान्न सम्भवतीति शङ्कानिवारणायाह। यथा वाक्यार्थ इति। यत्तु, प्रकृतसूत्रबलादेतत्सूत्रोदाहरणघटितवाक्यात्पदानुपस्थितस्याप्याहरणस्य शाब्दबोधविषयत्वङ्कल्प्यते। पदजन्यपदार्थोपस्थितिरेव शाब्दबोधहेतुरित्यस्यौत्सर्गिकत्वादत्र त्याग एवेति। तन्न। उक्तरीत्या भाष्याविरोधेन सत्याङ्गतामेवङ्कथनस्यानुपयोगात्। नमस्कुर्म इत्यत्र नमःशब्दयोगार्थे नृसिंहशब्दार्थान्वये नमःस्वस्तीतिसूत्रेणैव चतुर्थी सिद्धावस्य सूत्रस्य प्रवृत्तिवैयर्थ्यमत आह। नमःस्वस्तीत्यनेनेति। कर्मणि स्थानिन इत्येतावन्मात्रस्यैवोपादानमस्वित आह। पिण्डीमित्यादाविति। तुमशब्दस्तुतुमुन्प्रत्ययपरस्य च न कस्यापि भाववचनस्यार्थ इत्यत आह। तुम शब्देनेति। भाववचनग्रहणसामर्थ्यात्सूत्रविशेषस्य लाभे सिद्धे स्पष्टप्रतिपत्तये तस्य सूत्रस्यार्थमाह। भावे य इति। यागाय यातीत्यादौ फलप्रयोजकत्वरूपसम्बन्धो विभक्त्यर्थः। तादर्थ्ये चतुर्थीत्यनेन तु नैतत्सूत्रोदाहरणविषये चतुर्थीसिद्धिः। घञादिना तादर्थ्यस्योक्तत्वेनोक्तार्थानामप्रयोग इतिन्यायेन चतुर्थ्या अप्राप्तेः। एवञ्च प्रातिपदिकार्थेतिसूत्रप्राप्तप्रथमाबाधनार्थमिदं सूत्रम्। द्विषां विघाताय विधातुमिच्छत इत्यादिस्थले तु तादर्थ्य एव चतुर्थी। अन्यथा तुमुनन्तस्य प्रयोगात्स्थानिन इत्युक्तत्वाच्च चतुर्थी न स्यात्। नचोक्तार्थानामिति न्यायात्तादर्थ्ये चतुर्थ्यपि कथमिति शङ्क्यम। विधानक्रियातादर्थ्यस्येच्छानिष्ठस्योक्तत्वेऽपि विधानक्रियानिष्ठद्विषद्विघाततादर्थ्यस्यानुक्तत्वात्। वाचनिकमेवेदमिति। अत एव तत्र च दीयत

इत्यत्र यस्य च भावेनेतिसूत्रविहितसप्तम्यपेक्षयाऽधिकरणसप्तम्या बलवत्त्वङ्कैय-टोक्तं सङ्गच्छते। के चित्। भाष्यतत्त्वविदः। अन्तरान्तरेणेतिसूत्रस्थकैयटोक्त-न्दूषयितुमन्तरतमाह। क्रियाकारकयोरिति। अन्तरङ्ग इति। तयोः परस्परा-काङ्क्षाया उत्थितत्वात्। यथा प्रकृते क्षधात्वर्थः स्वनिष्ठापकृष्टत्वबोधानुकूलो व्यापारस्तस्यैव नमःशब्दो द्योतकतयोपकारकः। तद्घटकबोधश्च किञ्चिद इत्या-काङ्क्षा। देवाश्च किम्फलाश्रया इत्याकाङ्क्षाचद्रष्टव्या। यदि च प्रकृते नमः-शब्दो वाचकः स्यात्तदा नमःशब्दार्थोऽपि तादृशबोधमात्रम्। व्यापारश्च क्षधा-त्वर्थस्तयोः शीघ्रं परस्पराकाङ्क्ष्याऽन्वयोत्तरन्देवानाम्प्रधानीभूतव्यापारप्रयो-ज्यक्षधात्वर्थफलाश्रयत्वविरहात्कर्मत्वन्न स्यात्। नमःपदस्य द्योतकत्वे तु धात्व-र्थव्यापारप्रयोज्यफलाश्रयत्वात्तन्निर्वाहः। एवञ्च क्रियाकारकयोः साक्षात्सम्ब-न्धो जन्यजनकभावरूपो नियताकाङ्क्षाप्रयोजकः। नमःपदेन सम्बन्धश्च स्वद्यो-त्यव्यापारप्रयोज्यबोधाश्रयत्वरूप इति बहिरङ्ग इत्येवङ्कल्पनीयम्। जन्यस्य जनकाकाङ्क्षाया उत्थितत्वादन्तरङ्गः। एवमेव सर्वत्रोपपदार्थेन सहान्वयस्य ब-हिरङ्गत्वमुपपादनीयमिति तेषामाशयः। तदेतद्दूषयति। अत्राहुरित्यादिना। क्रियाकारकभावेनैवेति। नमस्यतीत्यत्र करणरूपेऽर्थे नमोवरिवश्चित्रङः क्यजि-तिसूत्रेण क्यचो विधानात्तत्र क्यजन्तार्थान्वयेनैव नमःशब्दार्थान्वयो वाच्यः। एवं सत्युभयविभक्त्योः समत्वादन्तरङ्गन्यायस्येह सम्भवाभावः। एतेन। प्रकृते उभयोरपि समत्वेन॥ सहयुक्तेऽप्रधाने इतिसूत्रेऽप्रधानग्रहणं शक्यमकर्तुम्। न च पुत्रेण सहागतः पितेत्यत्रपितृशब्दादपि तृतीयापत्तिः। उपपदविभक्ते-रितिन्यायेन प्रथमा भविष्यतीत्युक्तन्तत्र प्रथमाया येनाभिप्रायेण कारकविभ-क्तित्वमुक्तन्तदाविष्कर्त्तुमाह। कारकविभक्तित्वमिति। कर्त्रादिषट्कान्यत-मेत्यत्र कर्त्रादिपदं कर्तृत्वादिशक्तिपरम् अतस्तत्सामानाधिकरण्योपपत्तिः अ-भिहितकर्तृत्वादौ प्रथमास्वीकारेपि कर्तृत्वादेर्वारद्वयं शाब्दबोधे भानापत्तिं वारयति। द्वावित्यादाविति। न च स्वनिष्ठापकृष्टत्वबोधानुकूलव्यापारस्य नमःशब्दार्थत्वे देवोद्देशेन यत्र नमस्कारः कृतस्तत्र तादृशफलबोधस्य शू-द्रादावपि सत्त्वाच्छूद्रन्नमस्करोतीत्यपि प्रयोगः स्यादिति वाच्यम्। फल-तावच्छेदकसम्बन्धेन फलाश्रयत्वस्यैव द्वितीयाप्रयोजकत्वात्। प्रकृते च स्व

विषयापकर्षावधित्वसामानाधिकरण्यविशिष्टसमवायस्य फलतावच्छेदकसम्बन्धत्वमनेन सम्बन्धेन फलाश्रयत्वमिष्टमतिरिक्त इति। अयमर्थो नमस्करोतीत्यत्र धातोरेव। नमःशब्दस्तु द्योतकस्तदभिप्रायेणोक्तनमस्कारफलस्येति। विष्णवे नम इत्यादौ तु नमःशब्दो निपातः। स चोक्तार्थे निरुक्तसमवायविशिष्टताद्यबोधानुकूलव्यापारे शक्त इत्यतस्तत्रापि न शूद्राय नम इत्याकारको द्विजस्य कर्तृत्वे प्रयोगः। नमस्करोतीत्यत्र गतित्वं साक्षात्प्रभृतिषु पाठेनेति न युक्तम्। साक्षात्प्रभृतिषु च्व्यर्थवचनङ्कर्त्तव्यमिति वार्त्तिकविरोधादत आह। जर्यादिषु वेति। प्राचीनोक्तङ्खण्डयति। एकस्य एवेति। यथा मासेदीयत इत्यत्राधिकरणसप्तमी यस्य च भावेनेतिसप्तम्यपेक्षया बलवत्त्वात्प्रवर्त्तते इति कैयटेनोक्तम्। पर्याप्त्यर्थानामिति। अत्र पर्याप्तिः सामर्थ्यम्। तदभिप्रायेण मूले दैत्येभ्यो हरिरलम्प्रभुः समर्थ इत्युक्तम्। व्याख्यानादिति। भूषणवारणार्थकालंशब्दस्य कन्यामालङ्करोति हरिर्दिने भोजनमलङ्करोतीत्यादौ [क्रियावाचकधातुसमभिव्याहारे प्रयोगात्तत्रोपपदविभक्तेरितिन्यायेन द्वितीयैवेति प्राचीनोक्तव्याख्यानादित्यर्थः। अत्र तस्मै प्रभवति सन्तापादिभ्य इतिनिर्देशादर्थविवक्षा अलंशब्दविषयेऽवश्यङ्कार्यैव सेर्थो भूषणाद्यर्थकालंशब्दप्रयोगे न प्रतीयत इति न तत्र चतुर्थी किन्तु तदभिन्नेतिव्याख्यानात् कल्पते। अलमितिपर्याप्त्यर्थग्रहणङ्कर्त्तव्यमिहापि यथा स्यात् अलम्मल्लो मल्लाय। प्रभुर्मल्लो मल्लायेतिभाष्यमप्यत्र मानम्। अत एवालं श्रमेणेत्यत्र न भवति। यथा पर्याप्त्यर्थकशब्दयोगे तस्मै प्रभवतीतिनिर्देशाच्चतुर्थी तथा तादृशे विषये स एषामितिनिर्देशात् षष्ठ्यपि भवतीति मूले उक्तम्। आशीर्विषयत्वेति। स्वस्त्यर्थस्याशीर्विषयत्वविवक्षायामित्यर्थः। यदुक्तम्मूले परामर्शेति तत्र परस्परविषयपरिहारेण सम्भवतीत्याशयेन तथा दर्शयति। स्वस्तियोग इत्यादिना। स्वस्तिशब्दार्थश्च मङ्गलम्। यथा स्वस्ति गोभ्यो भूयादित्यादौ। स्वस्त्यर्थस्याशीर्विषयत्वमेवेति तु न नियमः। अत एव स्वस्ति हृषलायेत्यत्र तत्त्वकथनेऽपि चतुर्थी भवति। सूत्रे पूर्वोत्तरसाहचर्यात्स्वस्तिशब्दोऽव्ययसंज्ञक एव गृह्यते तदेतदाह। स्वस्तिशब्द इति। मन्यकर्मण्यनादरेतिसूत्रव्याख्यानवेलायां यदुक्तम्मूले तिरस्कार इति तत्राभिप्रायमाह। अनादर इति। व्याख्यानादिति। तिरस्कारग्रहणङ्क-

र्त्तव्यमतिवार्त्तिकमूलकात्। तिरस्कारस्यापकृष्टनिरूपितोपमेयत्वाभावो यत्र प्रतिपाद्यते तत्र स्पष्टमप्रतीयते। अपकृष्टसादृश्यप्रतिपादने यत्र तात्पर्यन्तत्र न्यूनगुणेषु सादृश्यप्रतिपादनस्य लोकप्रसिद्धत्वाद्यद्यपि तिरस्कारस्तथापि सूत्रे कुत्सित इत्येव वक्तव्येऽनादर इत्युपादानादतिशयविशिष्टानादरस्य यत्र प्रतीतिस्तत्रैव सूत्रप्रवृत्तिरित्यभिप्रायः। तादृशानादरप्रतीतिश्च न त्वान्तृणमित्यादौ स्फुटैव। न त्वान्तृणमन्ये तृणाय वेत्यत्रोभयोरपि विभक्त्योः कर्मत्वशक्तिविशिष्ट एव शक्तिः। न तु यका व्याख्यानादितीति। अनभिहिताधिकारस्यारम्भमूलकाद्व्याख्यानादित्यर्थः। मूलकारस्य न्यूनतामपरिहरति। श्यन्तूपलक्षणमिति। दैवादिकस्य धातोर्ग्रहणमित्यर्थोपलक्षणमित्यर्थः। लिङादावपीति। यथा कामाधिक्यादशक्तमिति न त्वान्तृणाय मेने त्यादाविति स्त्रीणां वाक्ये तासाङ्कामाधिक्यञ्चाहारो द्विगुणः स्त्रीणाम्बुद्धिस्तासाञ्चतुर्गुणा। षड्गुणो व्यवहारश्च कामश्चाष्टगुणः स्मृत इत्यत्र प्रसिद्धम्। नौकाकान्नशुकशृगालवर्जेष्वितिमूलकारोक्त्या परिगणनमिदमिति प्रतीयते। तच्च न युक्तम्। भाष्येऽनावादिष्विति वक्ष्यामि। न त्वान्नावमन्ये। न त्वामन्नमन्ये इत्युक्ता येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्ति इतिकथनात्। यदि भाष्योयमुदाहरणमत्र मूलन्तदा शृगालशब्दोपादानमधिकमिति तु न शङ्क्यम्। भाष्योदाहरणेषु शृगालशब्दानुपादानेऽपि तत्सदृशबहुवचनाहत्यादिप्रामाण्यात्तथैवमुपादानात्। तदेतदाह। नौकाकेति। गतेरिति न वाच्यम् गतेः कारकस्येत्येव सिद्धमित्याशयेनाह। कर्मणीति किमितीति। शारीरेति। परस्मैपदादिधात्वर्थभूता इत्यर्थः। अर्थपर इति। कर्मणीत्यनेन सामानाधिकरण्यात्। कर्मसंज्ञा हि शास्त्रेणार्थस्यैव विधीयते। व्याख्यानादिति। अध्वन्यर्थग्रहणमितिवार्त्तिकमूलकात्। समकालिकेति। एतच्च फलेऽन्वेति। आस्थितप्रतिषेधो वक्तव्य इतिवार्त्तिकसत्त्वमस्मिन्व्याख्याने मूलम्। ननु जनैर्यदा यत्र गम्यते स एवाध्वा लोकप्रसिद्ध इति स्वयङ्गच्छतीत्यत्रानध्वनीति प्रतिषेधो न प्राप्नोतीत्यत आह। अध्वपदेनेति। स्पष्टञ्चेति। आस्थितप्रतिषेध इत्यादिनेत्यादिः। उत्पथादिति त्यब्लोपे पञ्चमीत्याशयेनाह। उत्पथं पन्थञ्च इति। इष्यत इत्येतन्मूले कथितं तत्रत्यमर्थं स्पष्टप्रतिपत्तये आह। न त्वेति। उत्पथेनेति करणे तृतीया गच्छतीत्येतन्निरूपिता चेत्कर्म

करणयोरैक्ये पथः कर्मत्वानुपपत्तिः। यदि पथः शब्दार्थं उत्पथातिरिक्तस्तदोत्पथस्य करणत्वानुपपत्तिरित्यं तच्छङ्कानुत्थानायाह। गन्तुमशक्त इति शेष इति। अत्रेदमवधेयम्। गत्यर्थकर्मणि चतुर्थी वेतिमन्यकर्मणनादर इत्यस्यानन्त्यङ्गत्यर्थानाच्चेष्टायामनध्वनीति वा क्रुतो न क्रुतमिति। यत्तु द्वितीयाग्रहणङ्कर्मणि प्राप्ता या षष्ठी ग्रामङ्गन्तेत्यत्र तद्बाधनार्थमिति। तन्न। सन्दर्शनादिक्रियाया गत्यर्थक्रियायाः क्रुत्रिमकर्मत्वात्कर्मणा यमभिप्रैतीति ग्रामस्य सम्प्रदानत्वेन चतुर्थ्या गत्यर्थकर्मत्वेन द्वितीयायाश्च सिद्धिमाश्रित्यैतस्य प्रत्याख्यानपरभाष्यग्रामाख्येन भाष्यमते षष्ठीस्वीकारवत्लूचकारमतेऽपि क्रुदन्तेन योगे षष्ठ्युत्पत्तावित्यापत्तेः स्वीकारात्। न च सूत्रारम्भे उभाभ्यामपि विभक्तिभ्याङ्कर्मत्वशक्तिमत्त्वेनैवार्थस्य शाब्दबोधे भानमत्याख्यानपक्षे तु कर्मत्वसम्प्रदानत्वाभ्यान्तत्तच्छाब्दबोधे भानं स्वीकार्यमिति वाच्यार्थभेदात्क्रथमेतत्प्रत्याख्यानमिति वाच्यम्। अर्थभेदेपीष्टापत्तिमाश्रित्यैव भगवता प्रत्याख्यानात्। यथोत्तरमुनीनाग्रामाख्यात्। न च ग्रामाय गच्छतीत्यत्र गम्धातोरुत्तरदेशसंयोगानुकूलव्यापारमात्रमर्थस्त्वेन तादृशक्रियायाः कर्मत्वमिति तादृशव्यापारविषयकसन्दर्शने गम्धातोर्धातोरनेकार्थत्वाद्वृत्तिः स्वीकार्या। एवञ्चोत्तरदेशसंयोगरूपफलस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वाभावेन कथङ्ग्रामस्य कर्मत्वप्राप्तिरिति वाच्यम्। अर्थभेदेपि प्रत्याख्याने इष्टापत्तिवदेकस्मिन्नेवार्थे धातोर्यदा वृत्तिस्तदा ग्रामं ग्रामाय वा गच्छतीत्यस्यानभिधान एवेष्टापत्तेः स्वीकारात्। न चैवमर्थभेदेऽपि चेदत्र द्वितीयाचतुर्थ्योः स्वीकारस्तदा घटङ्करोतीत्यत्र क्रधातोरप्यर्थभेदमाश्रित्य घटङ्घटाय वा करोतीतिप्रयोगापत्तिरिति वाच्यम्। लक्ष्यानुरोधेनैतादृशे विषये तादृशार्थभेदेन विवक्षाया अस्वीकार इति स्वीकारात्। तदुक्तं हरिणा। भेदाभेदविवक्षा च स्वभावेन व्यवस्थितेति॥

इति चतुर्थीविवरणम।

ध्रुवमपाये। ध्रुधातोः स्थैर्यार्थकात्कुटादेः पचाद्यचि निष्पन्नो ध्रुवशब्दः स्थैर्यार्थक इत्यभिप्रायेणाह। ध्रुवं स्थिरमिति। अपायो विभाग इत्यादि। न च नाशस्यापायपदार्थत्वं लोके प्रसिद्धमिति कथमेतद्व्याख्यानमिति वाच्यम्।

विभागजनकव्यापारस्य स्वजनकविभागजनकत्वसम्बन्धे नोत्तरदेशसंयोगनाश-सम्बन्धितयाऽपायपदस्य तस्मिन्व्यापारे लक्षणास्वीकारात् । पतनमाचष्टे न-यायः । वृक्षमजहत्यपि भूमिं स्पृशति पर्णे भूमिम्पततीति प्रयोगात् । तत्र वि-शेषमाह । विभागश्चेति । स्वसिद्धान्तमाह । भाष्यानुसारिणस्त्विति । त्वदुक्ता ध्रु-वत्वस्य । तद्व्यापारानाश्रयत्वस्वरूपस्य । एवं हि तत्र भाष्ये उक्तम् । गति-युक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात् । रथात्प्रवीतात्पतितः । अश्वात्तस्मात्प-तितः । सार्थाद्गच्छतो हीन इति । अत्र चासौ मनसो धर्मः । न हि तेनाश्वस्य ध्रुवत्वहानिरितिशङ्कामपनेतुमाह कैयटः । त्रासपूर्वके परिस्पन्देऽनेकार्थत्वाद्धा-तूनान्तस्विर्वर्त्तते तस्मात्त्रासः पातस्य निमित्तमिति पूर्वमश्वस्य त्रस्तत्वेन सम्ब-न्धः । पश्चात्पतित इत्यनेनेति ध्रुवत्वमश्वस्य नास्ति । तत्समाधानभाष्ये न वाऽ-ध्रौव्यस्याविवक्षितत्वात् । न वा एष दोषः । किङ्कारणमध्रौव्यस्याविवक्षितत्वात् । नाचाध्रौव्यं विवक्षितम् । किन्तर्हि ध्रौव्यम् । अत्र कैयटः । ध्रुवमेकरूपम् । तच्च ध्रौव्यमपायविषयमाश्रीयते न त्वनवच्छिन्नम् । अपाय इति । प्रत्यासत्त्येति भावः । अपायेति । विभागसंयोगानुकूलो गतिविशेषो ह्यपायः । स च प्रधान एव गृह्यते स चात्र पतत्युपात्तः । न च तदाश्रयोऽश्वस्तथात्वे कर्तृत्वापत्तेः । न त्वनवच्छिन्नमिति । अनिरूपितमित्यर्थः । ततो भाष्ये शङ्का कथं सतो नामा-विवक्षा स्यात् । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिका एडका । अनुद-रा कन्येति । असतश्च विवक्षा भवति । समुद्रः कुण्डिका । विन्ध्यो वर्द्धतकम् इति । एतद्भाष्ये असतश्च विवक्षेतिनिदर्शनार्थमुपात्तम् । यथाऽसतो विवक्षा भवति । एवं सतोऽप्यविवक्षा भवतीति । यदि प्रकृतभाष्यङ्कैयटरीत्या व्याख्यायते तदा सिद्धान्तभाष्याच्चराणामचरस्वारस्यन्नोपपद्यते । प्रधानव्यापाराश्रयत्वरूप-स्य त्वदभिमतस्याध्रौव्यस्याच कदाप्यसत्त्वात् । तस्मान्मूलोक्तरीत्या व्याख्यानमे-वोचितम् । लोकसिद्धातिरिक्तेति । लोकसिद्धः लोकप्रसिद्धो यो ध्रुवपदार्थो निश्चलत्वरूपस्तदतिरिक्त इत्यर्थः । शक्तिरिति । न चोक्तरीत्या लक्षणैव कल्पत इति वाच्यम् । प्रसिद्धशक्यार्थमादाय शाब्दबोधसम्भवे लक्षणाया अनुचितत्वात् सूत्रार्थमाह । तस्मादित्यादि । स्वरीत्या शङ्कासमानभाष्यं योजयति । त्रासादे-रिति । आदिना धावनपरिग्रहः । ननु यदि कैयटोक्तरीत्या ध्रुवमपाय इत्य-

स्योऽर्थो वर्ण्यते तदा कर्तृवारणाय ध्रुवमपाय इति चरितार्थम्। तन्मतेऽपायि गतिविशेषे यद्ध्रुवं तदनाश्रय इत्यर्थाद् ध्रुवग्रहणाभावेऽपायात्मकक्रियाजनकमित्यर्थे कर्त्तरि सूत्रप्राप्तेरेव वाच्यतया कर्तृसंज्ञाया इयमपवादः स्यात्। परन्त्वेवन्ध्रुवग्रहणाभावे सूत्रार्थो वक्तुमशक्यः। ध्रुवग्रहणङ्किमर्थम्। ग्रामादागच्छति शकटेनेतिकरणेऽतिप्रसङ्गापादनपरभाष्यविरोधात्। न हि करणं विभागजन्यसंयोगजनकक्रियात्मकापायजनकम्। किन्तु तादृशापायघटकविभागजनकत्वेन करणस्य कारकत्वादपादानसंज्ञायाः प्राप्तिरिति भाष्यस्याभिप्रायो वर्णनीयः। एवञ्चोत्तरभाष्येण करणसंज्ञाऽत्र बाधिका भविष्यतीत्यनेन यथा परत्वात्करणसंज्ञाया बाधकत्वन्दर्शितन्तथा ग्रामादायातीत्यत्र ग्रामे चरितार्थमपादानसंज्ञाङ्कर्तृसंज्ञा बाधिका भविष्यतीति न कर्तृवारणन्ध्रुवग्रहणप्रयोजनमित्याशयेनाह। ध्रुवमपाय इति त्विति। इदं च प्रयोजनमपायपदस्य। एतदभावे ध्रुवङ्कारकमित्येवोक्तौ वृक्षस्य पर्णम्पततीत्यत्र वृक्षस्य यथाऽपादानत्वप्राप्तिस्तथाह। वस्तुत इत्यादि। अत्र वृक्षस्य क्रियायामेवान्वयो न तु पर्णे। तथा सति तस्य कारकत्वाभावसम्भवः स्यात्। ध्रुवग्रहणप्रयोजनमाह। ध्रुवग्रहणन्त्विति। तथा च तदभावे पूर्वोक्तस्थले करणेतिप्रसङ्ग इति भावः। अतिरिक्तव्यापाराभावेति। स च वृक्षस्य पर्णमित्यत्र वृक्षेऽपि नास्तीति भावः। वृक्षात्पततीत्यादाविति। अत्र विभागजन्यः संयोगोऽर्थः पतेः। वृक्षाद् भूमिम्पततीत्यादाविति। अत्र विभागजन्यसंयोगानुकूलव्यापारः पतधात्वर्थः। ननु परस्परश्लेषावपसरत इत्यत्र मेषपदोपात्तयोरेव परस्परशब्दार्थतया तयोरवधिभावोपगमातिरिक्तव्यापारानाश्रयत्वाभावेन कथमपादानत्वमत आह। परस्परेति। वाचकशब्दरूपोपाधिगतभेदस्य वाच्यार्थे आरोपेण तयोरप्यर्थयोर्भेदात्कर्तृत्वापादानत्वयोरुपपत्तिरिति भावः। अन्यत्र। उद्योते। कैयटादिमतन्दूषयति। यत्त्विति। अत एव। निवृत्तभेदस्यैवोपादानादेव। ननु व्यधधात्वर्थेपि विभागस्य प्रवेशात्तद्योगे धनुषा विध्यतीत्यत्राप्यपादानसंज्ञा प्राप्नोतीत्यत आह। धनुषेति। ननु त्यजधातोर्विभागानुकूलव्यापारार्थकत्वात्तद्योगेप्यपादानत्वं स्यादत आह। वृक्षमिति। स्यन्देर्विभागानुकूलव्यापारार्थत्वे तद्योगे प्राप्तामपादानसंज्ञां वारयति। स्यन्दे स्त्विति। कर्मप्रत्ययान्ते ति। अत

एव देवदत्तः समर्थञ्जहातीत्यत्र नापादानत्वम् सार्थस्य ज्ञापकेनापादानत्वेपि कर्मसंज्ञामुपपादयति । कर्मसंज्ञायामिति । धावत इत्यत्रोभयमतेष्यपादानत्वमुपपादयति । क्रियाविष्टस्येति । भीत्रार्थेति सूत्रे भयहेतुरित्यस्योपादानादाह । हेतुश्चतीयेति । असोढो ग्लानिविषय इति । अत्रासोढपदार्थविशेषणीभूता ग्लानिरसहनम् । किञ्चिद्विषयकदुःखत्वज्ञानमिति यावत् । असोढ इत्यत्र कर्मणि क्तः । कर्म चात्र ग्लानिविषय एव सचोध्ययनादिः । परापूर्वको जीधातुश्च क्वचिदभिभवे वर्त्तते । यथा शत्रून्पराजयते इति । इह त्वसोढग्रहणाच्यूनीभावार्थकः । न्यूनीभावश्च शक्तिवैकल्यादिरूपः । अध्ययनाच्च षष्ठ्याम्नाय इदं वचनम् ग्लायतीत्यस्य शक्तिविकलो भवतीत्यर्थः । धातोरकर्मकत्वे एवैतत्सूत्रोदाहरणम् । यदा त्वयं सकर्मकस्तदा प्रत्युदाहरणम् । उदाहरणे पराजयत इत्यत्र कालो न विवक्षितः । तेनाध्ययनात्पराजेष्यते इत्यपि सिद्धम् । यवेभ्यो गां वारयति कूपादन्धं वारयति दुराचारादनुकम्पां वारयतीत्यादिसकलसाधारणेन वारयतेरर्थमाह । भक्षणेत्यादिना । आदिनाऽनुष्ठानानुकूलव्यापाराभावानुकूलव्यापारसङ्ग्रहः । धात्वर्थफलाश्रय इति । प्रधानीभूतव्यापारप्रयोज्याभावप्रतियोगिव्यापारजन्यभक्षणसंयोगाश्रय इत्यर्थः । अप्रधानेति । अभावप्रतियोगिभूतः । एवञ्च तद्व्यापारजन्यफलाश्रयत्वादीप्सितपदाभिधेयत्वं यवादेः । ईप्सित इत्यत्र कर्मणि क्तः । आश्रयमात्रस्य । कर्त्तुः । ननु कर्मसंज्ञापत्तिरत आह । कर्मलक्षण इति । कर्त्तुरीप्सितमित्यत्रेत्यर्थः ॥ तदुघटकमिति । प्रत्यासत्त्याऽयमेव येनेत्यत्र यच्छब्दार्थः । स चान्तर्भूतोऽपि इच्छतिशब्दघटकाख्यातार्थकर्त्तृनिष्ठा तथापि वृक्षे शाखेतिवदन्तर्भावितिसप्तमी । उपपदविभक्तेरिति न्यायात् । न तु सति सप्तमी । ननु मातुर्निलीयते इत्याद्युदाहरणे व्यवहितदेशस्थितेर्धातुना प्रतिपादनेपि इच्छायाः कथं लाभ इत्यत आह । आक्षेपलभ्येति । इच्छायाः प्रयत्नप्रयोजकत्वादाक्षेपः । ननु दिदृक्षत इत्यत्र सन्नन्तादर्शनेच्छालाभेऽपि येनादर्शनमित्यर्थालाभात्कथमपादानत्वप्राप्तिरत आह । इच्छामात्रस्येति । विशिष्टस्येति । चोरकर्तृकस्वकर्मकदर्शनाभावरूपविशिष्टस्येत्यर्थः । य इच्छतीत्यर्थ इति । इच्छतिशब्देन कर्त्तुरुपस्थितत्वात्कर्तृलाभ इति भावः । उपयोगग-

ल्य प्रयोजनादिपरत्वभ्रमनिरासायाह । उपयोगशब्दस्येति । नटजन्यमिति । न चित्तु गायामिति पाठः स चायुक्तः । षष्ठ्यन्तार्थस्य स्वान्वययोग्यनामसमभिव्याहारे तत्रैवान्वयस्य लृप्ततया कारकत्वानुपादनात् । प्रकृतिरुपादानकारणमिति । अस्मिंश्चार्थे प्रकृतिशब्दस्य लोकप्रसिद्धेः । मूलासंगतिपरिहारायाह । हन्ताविति । मैवेति । वेदान्तसिद्धान्तात् । ननु ब्रह्मशब्दार्थस्य गुणत्वाभावात्कथं विभाषेत्यस्य प्राप्तिरत आह । तत्र हीति । भुवः प्रभव इति सूत्रघटकभवशब्देऽधिकरणेऽविवक्षयेनाह । तदधिकरणमिति । जन्महेतौ । जन्मभूमौ । अतिप्रसङ्गं वारयति । प्रकाशत इति । सूत्रे प्रशब्दोपादानात्प्रथमप्रकाशार्थकधातुयोग एवेदमिति भावः । ननु स्यङ्लोपविधायकशास्त्रस्यानुपलम्भात्स्यङ्लोप इत्युपपन्नमत आह । स्यन्तशब्दाज्ज्ञानमिति । बोधप्रक्रियेति । वाक्यैकदेशन्यायेनेत्यर्थः । नन्वाजन्न इत्यत्र यथाश्रुतान्वयेऽकर्मकत्वात्कर्मकत्वयोरभावेन कथमात्मनेपदमाह । आजन्न इति । कर्मणः । विषमविलोचनशब्दार्थस्य । वक्ष इत्यस्यानन्वितत्वं वारयति । प्राप्येति शेष इति । एवञ्चात्र प्राप्येतिशब्दाध्याहारेण स्यन्तशब्दज्ञानसत्त्वान्न स्यङ्लोप इति पञ्चम्यापत्तिरितिभावः । इत्यत्रेव । ति । वाक्यैकदेशन्यायेनेत्यादिः । अत एव । अन्यशब्दस्य भेदविशिष्टार्थकत्वादेव । मूलोक्तरीत्याऽन्यशब्दस्यार्थपरत्वेन व्याख्यानस्य प्रयोजनमुक्त्वा स्वमतमाह । परे त्विति । भेदस्यापीति । अपिना पूर्वोक्तार्थसङ्ग्रहः । ननु तस्य न धात्वर्थत्वमत आह । भिदिरिति । अत एव । तस्यापि तस्मिन्सूत्रेऽपादशब्देन ग्रहणादेव । तस्य । नञर्थभेदवतः । ननु मूलोक्तरीत्या घटादिक इति भवति । अन्यशब्दस्यार्थपरत्वाभावे तन्न सिध्येदत आह । घटादेरिति । अत एव । अर्थपरत्वाभावादेव । अत एव । घटाङ्गिन इत्यादौ भुवमपाय इति सूत्रेणैव पञ्चम्युपपत्तेरेव । ननु चैवात्पूर्व इत्यत्र पूर्वशब्दः कालवाचको न दिक्शब्द इति कथमञ्चमीत्याशयेनावतारयति । नन्वयमिति । नन्वेवमैन्द्रादिशब्दयोगेऽपि प्राग्नोतीत्यत आह । ते चेति । व्याख्यानादिति । तेषां यत्र योगस्तत्र पञ्चम्यदर्शनमूलकाद्व्याख्यानादित्यर्थः । तद्दाचीति । अवयववाचीत्यर्थः । अत एव । अवयविवाचकादेव ज्ञापकेन पञ्चम्यभावस्वीकारादेव । अस्मादिति । भागविशेषादित्यर्थः । अत्र पूर्वशब्दः पूर्वका-

वच्छिन्नपरः । तस्य । अव्ययस्तरपदस्य । प्रत्ययग्रहणादिति । प्रत्ययशब्दस्य प्रत्यायकपरतया श्रूयमाणत्वलाभः । श्रूयमाण एव हि प्रत्यायको भवति । भाष्ये स्पष्टमिति । तत्र ह्येवमुक्तम् । अथ प्रत्ययग्रहणस्किमर्थम् । इह मा भूत् । प्राग् ग्रामात् । प्रत्यग् ग्रामात् । अव्ययस्तरपदस्येति प्रयोजनमुक्त्वा तत्रान्यतरस्यां ग्रहणवदिति । कार्त्तिक्याः प्रभृतीति भाष्यप्रयोगात्प्रभृतिशब्दयोगे पञ्चमीति भ्रमनिवारणायाह । प्रभृत्यर्थेति । अन्यथा । प्रभृतिशब्दयोग एव पञ्चम्यनुशासनीयः । एवं सति यत्फलितन्तदाह । एवञ्चेति । प्रभृत्यर्थयोगे पञ्चमीत्यर्थस्वीकारे च ॥ नन्वेवमग्नीचीमारभ्येत्यत्रापि पञ्चमी कुतो नेत्याह । अग्नीचीमारभ्येति । प्रभृतीत्यारभ्येत्यर्थकमव्ययम् । एतदर्थकतापि । अवधिमादायेत्यर्थकतापि । अपिना गृहीतेत्यर्थकतायाः सङ्ग्रहः । मेरुपृष्ठादारभ्येतिवाक्यस्योपपत्तिमाह । नन्वग्नीचिमारभ्येत्यत्र कथमुपपत्तिरित्यत आह । आरभ्येत्यर्थेति । अग्नीचिर्नरकविशेषः । इत्यादाविति । अत्रादिना प्रातःकालमारभ्य पठतीत्यादिसङ्ग्रहः । ज्ञापनं विनापि कार्त्तिक्याः प्रभृतीतिप्रयोगोपपत्तिमाह । वस्तुत इति । समभिव्याहृतपदार्थौ मासादिः । गम्यमानक्रियापेक्षमिति । गम्यमाना या क्रिया गमनादिरूपा तदपेक्षमित्यर्थः । तदेवोपपादयति । कार्त्तिक्यादीति । नन्वपपरिबहिरञ्चव इतिसूत्रस्थपञ्चम्या इत्यत्रापादियोगे चरितार्थात्यञ्चत्यन्तेन समासविधानाज्ज्ञापकादित्यस्यानुपपत्तिरत आह । अयमाशय इति । सिद्धः समास इति । एवञ्च पञ्चम्या इत्यस्याभावेऽपि तृतीयास्थस्य सुपेत्यस्यानुवृत्त्यैवेष्टसिद्धिरित्यर्थः । अव्ययस्तरपदस्य पञ्चम्यन्तेन सामानाधिकरण्यार्थमपि न पञ्चम्या इतीत्याह । तत्राहचर्यादिति । पञ्चम्या अपि ज्ञापनीयमिति । एतेन पञ्चम्येत्यस्यापादियोगे चरितार्थत्वेनामर्थेनासुबन्तेन षष्ठ्यन्तेन वा समासोऽस्त्विति परास्तम् । ननु ज्ञापकेन बहिःशब्देन योगे पञ्चमी चेत्स्वीक्रियते तदा पञ्चमीप्रकरणे अन्यारादितरर्त्तदिति सूत्र एव बहिःशब्दपाठः कर्त्तुमुचित इत्यत आह । सापीति । अपिना षष्ठीसमुच्चयः । सम्बन्धः । प्रतियोगित्वादिरूपः । अञ्चादेवेति । यञ्चादितिनिपातनादित्यर्थः । मूले एतत्सूत्रवृत्तौ बहुवचनमयोगमेदात् । दत्तमुक्त्वेति । दत्तस्यैव प्रत्यर्पणं सर्वत्र न सम्भवतीत्येवमुक्तिः । कर्त्रा वर्जितमित्यत्र कर्त्रा वाच्छिन्नप्र-

तियोगिताकभेदवदित्यर्थः प्रतीयते स चासङ्गतः। शतंवदार्थस्यापि स्वस्वरूपधारणात्मकव्यापाराश्रयत्वेन कर्तृत्वादत आह। कर्तृसंज्ञेति। एवञ्च कर्तृसंज्ञायाः क्रियायोग एव प्रवृत्त्या शताद्ड इत्यत्र या बन्धनक्रिया तद्योगनिमित्तककर्तृसंज्ञाभावस्य तत्र सत्त्वाददोषः। हेतुतृतीयापवादभूतेयम्पञ्चमी। न तु तृतीयावाच्यकोटिनिविष्टमिति। अत एव करणत्वेन शाब्दबोधविषयत्वञ्च। प्रकृतसूत्रोदाहरणे शताद्ड इत्यत्र शतस्य हेतुत्वविवक्षैव न तु कर्तृसंज्ञा। प्रत्युदाहरणे शतेन बन्धित इत्यत्र तद्योजको हेतुश्चेतिसूत्रेण शतस्य हेतुसंज्ञा कर्तृसंज्ञा च। विभाषा गुणेऽस्त्रियामितिसूत्रे योगविभागस्य पदमञ्जर्युक्तस्यापि भाष्येऽदर्शनादाह। बाहुलकमिति। इत्युक्तेति। अस्य उणादय इति सूत्रभाष्य इत्यादिः। प्रकृतसूत्रोदाहरणे जाड्यादित्यत्र जाड्यस्यान्तःकरणविशेषावच्छिन्नशरीरनिष्ठधर्मस्य बन्धनक्रियाकारणत्वं सम्भवति। गुणत्वञ्च तस्य संज्ञाक्रियाजातिभिन्नत्वात् सम्भवति। धूमादग्निमानित्यत्र धूमपदस्य जात्याश्रयवाचकतया कथं गुणत्वम्। कथञ्चाग्निमन्निरूपितं हेतुत्वं धूमपदार्थस्य तत्कारणत्वाभावादत आह। धूमपदं स्वज्ञान इति। एवञ्च धूमज्ञानस्याग्निज्ञानेऽनुमितिरूपे कारणतायाः प्रसिद्धत्वान्न सूत्रोदाहरणत्वानुपपत्तिरिति भावः। स्पष्टञ्चेदमिति। न चान्यतरस्याङ्ग्रहणस्य विकल्पार्थत्वेपि तृतीयाया अभावे प्रकृतसूत्रे पञ्चमीद्वितीयाया अनुवर्त्तनादेव तयोः पर्यायेण प्रवृत्तिर्भविष्यतीति किं समुच्चयार्थत्ववर्णनेनेति वाच्यम्। पृथगादिषु पञ्चमीविधानम्। पृथगादिषु पञ्चमीविधेया। पृथग्देवदत्तात्। किङ्कारणम्। न प्रकृतम्पञ्चमीग्रहणमनुवर्त्तते ङ्क प्रकृतम्। अपादाने पञ्चमीति। अनधिकारात्। अनधिकारः सः। अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधो वक्तव्यः। दक्षिणेन ग्रामन्दक्षिणतो ग्रामस्य। एवन्तर्हि अन्यतरस्यांग्रहणसामर्थ्यात्पञ्चमी भविष्यतीति भाष्यदर्शनेन समुच्चयार्थत्ववर्णनात्। निपातानामनेकार्थत्वात्समुच्चयार्थत्वञ्च नानुपपन्नम्। न चैवम्पञ्चमीद्वितीये अनुवर्त्तते इति मूले यदभिहितन्तदसङ्गतिरिति वाच्यम्। अनुवृत्त्यभिधानस्य तङ्ग्राह्योत्तरभाष्यग्रन्थे नानुवृत्तिरप्यभिहितेत्यभिप्रायादिति न सन्दर्भविरोधः। एतेन। उक्तभाष्यविरोधेन। अन्यतरस्यामित्यस्य ग्रहणस्यैवार्थकत्वे ङ्कारोन्यतरस्यामित्यत्राप्ययमेवार्थो वाच्यश्च चासङ्गतः। अभा-

वस्य विधेयप्रतियोगिकस्य तत्रानुपस्थितत्वेन तत्रान्यतरशब्देन भावस्याभावस्य च ग्रहणासम्भवात्तन्मते भाष्यान्तरविरोधोपीत्याह। विकल्पविषय इति। प्राचीनमतन्दूषयन्स्वसिद्धान्तमाह। परे त्विति। विना वर्षमिति। केनेमौ पातितौ द्रुमाविति शेषः। द्वितीयासमुच्चयो नोक्त इति। अन्यतरस्याङ्ग्रहणसामर्थ्यात्यञ्चमी भविष्यतीत्येवं हि भाष्ये उक्तम्। अनेन द्वितीयायाः समुच्चयकथनन्दूषयित्वाऽनुवृत्तिकथनमप्यसङ्गतमित्याह। पञ्चम्या अधिकार इति। प्रागिति चेति। एवञ्च षष्ठ्यतसर्थेतिसूत्रे द्वितीयाया असम्बन्धवद्यक्तसूत्रेऽपि सम्बन्धो न भविष्यतीति ध्वनितम्। अत एव। प्रकृतसूत्रे तदसम्बन्धादेव। यद्यत्र द्वितीयासमुच्चयः स्यात्तदा करणे चेतिसूत्रेऽपि पञ्चमीसमुच्चयार्थमप्रकृतान्यतरस्याङ्ग्रहणस्य सम्बन्धावश्यकत्वेन तत्रापि द्वितीयासमुच्चयः स्यादिति भावः। करणे च स्तोकेतिसूत्रे कतिपयस्येति षष्ठ्यनुपपत्तिः। प्रत्ययविधौ पञ्चम्या युक्तत्वादत आह। षष्ठी गापोष्टगितिवदिति। अद्रव्यवचनेभ्य इत्यस्य द्रव्यवचनभिन्नेभ्य इति नार्थः स्तोकादिशब्दानां शुक्लादिशब्दवद् गुणे गुणिनि शक्तितया द्रव्यवचनभिन्नत्वाभावादत आह। द्रव्यभिन्नवचनेभ्य इति। एवञ्च यदा धर्ममात्रपराणां स्तोकादिशब्दानाम्प्रयोगस्तदोदाहरणम्। धर्मिपरत्वे प्रत्युदाहरणम्। ननु धर्मवचनत्वे करणत्वमनुपपन्नमत आह। करणत्वञ्चेति। ननु स्तोकम्यचतीत्यत्र धर्मिपरत्वात्कथमद्रव्यवचनत्वमत आह। असत्त्वभूतेति। ननु पञ्चधात्वर्थफलं विक्लित्तिस्सासा विक्लित्तिरित्येवं रीत्या सर्वनाम्ना परामृश्यत एवेति कथमसत्त्वमिति चेन्न। विक्लित्तिशब्देन यदा सोऽर्थ उच्यते तदा तस्य सर्वनाम्ना परामर्षेपि धातुप्रतिपाद्यत्वावस्थायान्तस्य सर्वनाम्ना परामर्षाभावात्। विकल्पशब्दार्थविकल्पस्य वाशब्देन प्रतिपाद्यत्वावस्थायामसत्त्ववत्। ननु व्यवहितसमुच्चयः प्रागेव निरस्त इति कथमत्र तृतीयार्थत्वकथनमत आह। व्याख्यानादिति। व्यवहितसमुच्चयार्थकचकारोपादानमूलकव्याख्यानादित्यर्थः। ननु दूरान्तिकार्थेभ्यो विहितानां द्वितीयातृतीयापञ्चमीनाम्प्रातिपदिकार्थमात्रे प्रवृत्तौ किम्प्रमाणमत आह। व्याख्यानादिति। दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामितिसूत्रानन्तरन्तेभ्यो द्वितीया चेत्येव सिद्धे दूरान्तिकार्थेभ्य इत्युपादानन्तरसूत्रविहितविभक्तीनां पूर्वविहिताभ्यो वैलक्षण्यसूचनाय। एवञ्च विशिष्टार्थानु-

क्तेरनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीत्यनेन न्यायेन ताः प्रातिपदिकार्थमात्रे भवन्तीति लभ्यते इति व्याख्यानादित्यर्थः ॥

इति पञ्चमीविवरणम् ।

षष्ठी शेष इति सूत्रे यच्छेषपदस्तत्र शेष इत्युच्यते कः शेषः कर्मादिभ्यो योऽन्यः स्वार्थः स शेष इति भाष्ये उक्तन्यूनक व्याख्यानादाह । उक्तादन्य इति । तत्तद्रूपेण स्वत्वादिरूपेण । सम्बन्धत्वेन रूपेण चेति । वाच्य इति शेषः । राज्ञः पुरुषोऽस्तीतिवाक्यजन्यशाब्दबोधानन्तरम्पुरुषो राजस्वत्ववान्न वेति सन्देहो न भवतीति यथा विशेषरूपेण वाच्यता कथ्यते । तथा राजसम्बन्धीन वेति च सन्देहानुत्पत्तेः सामान्येन सम्बन्धत्वेन रूपेण च वाच्यता कथ्यते । तन्मूलक इति । कर्तृत्वनिरूपकक्रियात्वमथ वा क्रियानिरूपितकर्तृत्वमूलं यस्य तस्मिन्निवक्षित इत्यर्थः । स्वस्वामिभावादित्यस्य स्वस्वामिनोर्भावः स्वत्वं स्वामित्वं वा सम्बन्धः षष्ठ्यर्थ इति प्रतीयते परन्तु तस्य तत्तद्रूपेण षष्ठीवाच्यता न युक्ता । राज्ञः पुरुष इत्यत्र षष्ठ्यर्थः स्वामित्वं वृत्तिस्वाधेयतासम्बन्धेन राजसम्बन्धिन्येऽपि पुरुषावृत्तित्वात् । स्वनिरूपितस्वत्वाश्रयत्वसम्बन्धेन स्वामित्वं पुरुषेऽस्तीति तु न तस्य वृत्त्यनियामकतया पुरुषे वृत्तितानियामकत्वस्य वक्तुमशक्यत्वात् यदि तु स्वत्वं सम्बन्धस्तदा तस्य राजवृत्तित्वाभावेन सम्बन्धत्वं वक्तुमशक्यम् । स्वनिरूपितस्वामित्वसम्बन्धेन राजवृत्तित्वन्तु वक्तुमशक्यम् । तस्य वृत्त्यनियामकत्वादत आह । स्वत्वस्वामित्वसमूह इति । अन्यत्र । मञ्चपादौ । तत्र सम्बन्धो हि सम्बन्धिभ्यामिन्न उभयसम्बन्धीत्युक्तम् । एवं सर्वत्र । अवयवावयविभावजन्यजनकभावादौ । संसर्गविधयैवेति । अत्रैवकारेण षष्ठ्यर्थस्य प्रकारत्वं व्यवच्छिद्यते । अत एव प्रकृतसूत्रभाष्ये राज्ञः पुरुष इत्यत्र राजा विशेषणम्पुरुषो विशेष्य इत्युक्तमन्यथा सम्बन्धे विशेष्यतया विशेषणतया वा ब्रूयात् एतदेकवाक्यतया क्रियाकारकभावसम्बन्धस्य वाचिका द्वितीयेति भाष्याच्च । कारकविभक्तिभ्य इति । प्राचीनमतेनाह । सम्बन्धत्वेन भान इति । सम्बन्धः कारकेभ्योन्यः क्रियाकारकपूर्वकः । श्रुतायामश्रुतायां वा क्रियायाम-

भिधीयते इतिहर्यक्तं राह । यद्देति । कारिकायां कारकपदं कर्मत्वादिशक्तिपरम् । तन्मूलकसम्बन्धश्च विशेषणविशेष्यभाव एव । इयञ्च षष्ठी विशेषणत्वेन विवक्षितादेव । न च सम्बन्धे षष्ठी सम्बन्धश्च द्विष्ठ इति सा विशेषणत्वेन विवक्षितादेव भवति न विशेष्यत्वेन विवक्षितादित्यत्र किं विनिगमकमिति वाच्यम् । विशेषणवाचकस्य राज्ञ इत्यादेः पदस्य केवलस्य प्रयोगेऽपि विशेषणत्वं स्वसामान्यनिरूपितमतीयते तच्च विशेषणत्वं सम्बन्धमाकाङ्क्षमिति विशेषणादेव सा । तदुक्तभाष्ये । षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः । षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधो वक्तव्य इति । तत्र प्रथमाविधिः । तत्र षष्ठीप्रतिषेध प्रथमा विधेया । राज्ञः पुरुष इति । उक्तमूर्वेण । किमुक्तन्न वा वाक्यार्थत्वादिति । यदत्राधिक्यं वाक्यार्थः सः । अत्र कैयटः । राज्ञ इत्येतत्पदसन्निधाने पुरुषस्य सम्बन्धित्वमतीयते नान्यथा । पुरुषेतिप्रातिपदिकन्तु स्वार्थमात्रे वर्त्तत इति प्रथमा सिध्यतीत्यर्थः । ततोऽग्रे भाष्ये शङ्कते । कुतो नु खल्वेतत्पुरुषे यदाधिक्यं वाक्यार्थ इति न पुना राजनि यदाधिक्यं स वाक्यार्थः स्यात् । पुरुषपदसन्निधाने एव राज्ञः सम्बन्धित्वावगमो नान्यथेति ततोऽपि प्रथमाप्रसङ्गः । वाक्यार्थत्वञ्च पदान्तरसन्निधाने प्रतीयमानत्वन्तूभयत्राविशिष्टमिति पुरुषनिष्ठविशेष्यत्ववद्राजनिष्ठविशेषणत्वमपि वाक्यार्थ एव भविष्यतीति पुरुषपदादिव राजन्शब्दादपि प्रथमाप्रसङ्ग इति भावः । ततः समाधानभाष्ये अन्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि सोऽर्थो गम्यते । अन्तरेणेति । राज्ञ इति केवलेऽपि पदे उच्चार्यमाणे सम्बन्धित्वमनियतप्रतियोगि गम्यते तस्माद्राजा परोपकारित्वेन विवक्षितो न स्वनिष्ठत्वेन । अत्र सम्बन्धित्वं विशेषणत्वरूपम् । अनियतप्रतियोगीत्यस्यानियतविशेष्यनिरूपितमित्यर्थः । अत एवोक्तं राजा परोपकारित्वेन विवक्षित इति । न स्वनिष्ठत्वेन । न स्वार्थनिरूपितविशेष्यतया इति । हरिणाप्युक्तम् । द्विष्ठोऽप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते । तत्राभिधीयमानश्च प्राधान्येऽप्युपयुज्यत इति । असौ सम्बन्धः । परार्थत्वात् । परं विशेषणत्वमर्थः प्रयोजनं यस्य तत्त्वाद्विशेषणतानियामकत्वादित्यर्थः । भेदे सति विशेषणतया विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवेन तदाकाङ्क्षितत्वात्तत्र सम्बन्धो व्यतिरिच्यते उद्भूततया प्रतीयते इति तत्रैव षष्ठीत्यर्थः । विशेष्यस्य स्वनिष्ठत्वादेव न विशेष्यतानियामकसम्बन्धाकाङ्क्षेति भावः ।

प्रधानेऽप्युपयुज्यते। तस्य इष्टत्वस्वभावत्वाद्राजादिनिरूपितविशेष्यतायां राजादिपदसन्निधाने प्रतीयमानायां उपकारको भवतीत्यर्थः। ननु कर्मादीनामपीतिशब्देन यथा तेषां सम्बन्धत्वेन विवक्षा प्रतिपादिता तथा कर्त्तुर्न प्रदर्शितेति कर्त्तुस्तथा विवक्षा न भवतीति कश्चिद् भ्राम्येदतः कर्त्तुरपि तथा विवक्षामाह। कर्त्तुरपीति। कर्मादीनामित्यनेन संयोगसम्बन्धावच्छिन्नाधारत्वापि तथा विवक्षेति भ्रमनिवारणायाह। संयोगसम्बन्धेति। तेन भूतलस्य घट इति नप्रयोगः। तच्च भाष्यमपि साधकमाह। अत एवेति। ननु तर्हि लोहितोष्णीषा इत्यादौ षष्ठ्यर्थे बहुव्रीहिर्न स्यादत आह। लोहित इति। यदुक्तमेधः कर्त्रर्थकर्त्ता वा तदुपपत्तये आह। एधश्शब्द इति। उदकस्येत्यर्थ इति। भुवनमृतच्छीवनीयन्दकच्चेतिहलायुधकोशोऽत्र मानम्। यदुक्तम्मूले हेतौ द्योत्य इति तत्फलमाह। हेतुहेतुमद्भावेनेति। हेतुपदार्थस्य स्वनिष्ठहेतुत्वनिरूपितहेतुमत्त्वसम्बन्धेनेतरान्वय इत्यर्थः। हेतुवाचकादिति। हेतुवाचकत्वञ्च विशेषणविशेष्ययोरुभयोरपि वाचकयोरिति हेतुशब्दादन्नशब्दाच्च षष्ठीत्यर्थः। षष्ठी हेतोरिति वक्तव्ये प्रयोगग्रहणाद्यत्र हेतुबोधनाय हेतुशब्दस्य प्रयोगस्तत्र हेतुवाचकसामान्यात्तस्मिन्वाक्ये षष्ठी यथा स्यादिति। अत एवान्नस्य शोभनस्य हेतोर्वसतीति भवतीति दिक्। सर्वनाम्नस्तृतीया च। अत्र सर्वनाम्न इति प्रयोगापेक्षया षष्ठी। पञ्चम्यान्तु हेतुशब्दात्पञ्चमीतृतीये न स्याताम्। निमित्तादिप्रयोगे तेभ्य इति। अत्राप्यर्थे प्रयोगशब्दोपादानमेव मानम्। सूत्रे व्यर्थ इति। अनेनैव सूत्रद्वयसाध्यप्रयोगस्य सिद्धेः। मूलादिदूषणायाह। भाष्य इति। नन्वप्रतिषिद्धमनुमतम्भवतीतिन्यायेनोक्तभाष्यकारसम्मतमेवैत्यत आह। विपरीतमिति। स्वाधिकारात्परेणेत्यादौ यथायथं शास्त्रेणेत्यादिविशेषानुरोधात् तृतीया। प्रत्यासत्तिन्यायेनाह। यदपेक्षमिति। तस्या एवेति। पञ्चम्या एवेत्यर्थः। शिष्टकृतं व्याख्यानमत्र शरणम्। व्याख्यामादिति। जानातेर्विदर्थकत्वस्य नियततया विशेषणस्यैव वैयर्थ्यापत्तिरतो विशेषणसामर्थ्यमूलकाद्व्याख्यानादित्यर्थः। जाना तेरविदर्थत्वं स्पष्टयति। जानातेरिति। मातुर्गुणस्मरणमिति। गुणेन स्मरणमित्यर्थः। इह गुणरूपस्य करणस्य शेषत्वविवक्षायामपि अनेन सूत्रेण षष्ठ्यभावे षष्ठी शेष इति सूत्रेणषष्ठ्यां समासो भवत्येव। एतत्सूचवि-

षयेऽपि तेन सूत्रेण षष्ठ्यां सिद्धायामेतत्सूत्रं नियमार्थमिति हि प्रसिद्धो मार्गः। अत एव। नियमार्थत्वस्येष्टत्वादेव। एतेषान्नियमार्थत्वे वार्तिकमपि साधकमित्याशयेनाह। प्रतिपदविधानेति। तद्वार्तिकमपि नापूर्वविधिन्तु नियमविधिमेवेति भावः। रुजार्थानामिति सूत्रे उपात्तत्वेन रुजाशब्दो यद्यपि व्याधौ रूढस्तथापि प्रकृते रोगमात्रं विवक्षितमित्याशयेनाह। रोगार्थानान्धातूनामिति। अत्र रोगशब्दे प्रकृत्यर्थमात्रं विवक्षितम्। व्याख्यानादिति। भावकर्तृकाणामित्यस्य नदी कूलानि रुजतीति प्रत्युदाहरणभाष्ये उक्तन्यूलकादित्यर्थः। ल्युट्प्रकृत्यर्थोऽविवक्षित इति। भावकर्तृकादितिभाष्यीयव्याख्यानात्। भाष्ये भावकर्तृकादिति ल्यब्लोपे पञ्चमी। भावकर्तृकमाश्रित्येत्यर्थः। न ग्रहणमिति। किन्तु जसु हिंसायामिति चौरादिकस्येति शेषः। ननु हेतुमण्णिचा जासीतिनिर्देशोपपत्तिर्भविष्यतीत्यत आह। हिंसायामित्युक्तेरिति। अनुकरणत्वाच्चत्वाप्राप्तेराह। सौचत्वादिति। मूलादिकन्दूषयति। परे त्विति। अयम्। क्राथधातुः। नन्वयञ्चुरादौ न दृश्यत इत्यत आह। तस्येति। निपातनस्येति। अस्यान्यथेत्यादिः। सामान्येन। शेषषष्ठीसन्नियोगशिष्टत्वानङ्गीकारेण। प्रकारान्तरमप्याह। उदाहरण इति। व्याख्यानादिति। उत्तरसूत्रद्वयस्य पाणिनिपठितानुपूर्वीकस्योपादानसामर्थ्यमूलकव्याख्यानादित्यर्थः। अयमाशयः। यदयं शेष इत्यस्य सम्बन्धस्तदा विभाषोपसर्ग इत्यत्र शेषपदसम्बन्धोऽस्ति न वा। आद्ये दिव इति सूत्रेण समासाभावस्य सिद्धौ विभाषोपसर्ग इतिसूत्रवैयर्थ्यम्। न च यदा नानेन षष्ठी तदा षष्ठी शेष इतिसूत्रेण षष्ठी तदा समासप्रवृत्तिरेव फलमस्विति वाच्यम्। नोपसर्ग इति न्यासेन दिवसूत्रस्य निषेधे शेषषष्ठ्या समासविकल्पेन रूपद्वयसिद्धौ विभाषाग्रहणस्य तथापि वैयर्थ्यानुद्धारात्। द्वितीये विभाषेतिसूत्रस्य कर्मण्येव विकल्पेन षष्ठीविधायकतया छन्दस्यापाद्यमानरूपाभावाद्ब्राह्मणे विभाषेतिसूत्रविहितषष्ठ्यभावे कर्मणि द्वितीयेति सूत्रेण द्वितीयायाः सिद्धौ द्वितीया ब्राह्मण इति सूत्रवैयर्थ्यन्दुर्वारमेव। न च तन्निरुपसर्गे द्वितीयार्थमस्विति वाच्यम्। कर्मण्यावश्यायान्दिवसूत्रस्याप्राप्तेस्तत्र कर्मणि द्वितीयेति सूत्रेण द्वितीयायाः सिद्धौ तस्य सूत्रस्य वैयर्थ्यानुद्धारात्। द्वितीया ब्राह्मणे इति सूत्रे शेषपदसम्बन्धेन शे-

षत्वविवक्षायां द्वितीयार्थेन्तदिति तु वक्तुमशक्यम्। विभाषोपसर्ग इति सूत्रेण विच्छिन्नस्य शेषपदस्य पुनस्तत्र सम्बन्धासम्भवात्। न च कृदन्तेन योगे द्वितीया ब्राह्मण इति सूत्रे विभाषोपदसम्बन्धेन पक्षे दिव इति सूत्रसिद्धषष्ठ्याः पुनर्विधानेन समासाभावार्थेन्तदस्त्विति वाच्यम्। द्वितीयो ब्राह्मण इतिसूत्रभाष्ये किमुदाहरणमतिदीव्यन्ति। पूर्वेणाप्येतत्सिद्धम्। इदन्तर्हि गामस्य तदहः सभायान्दीव्येयुरित्युदाहरणेन कृदन्तेन योगे तस्य प्रहृत्यस्वीकारादिति। अत एव। दिवस्तदर्थस्येति सूत्रे शेषपदासम्बन्धादेव। नित्यषष्ठीप्राप्ताविति। दिवस्तदर्थस्येत्यनेन नित्यषष्ठीप्राप्तावित्यर्थः। तिङन्तमिति। यदि शेषपदसम्बन्धेनेदं सूत्रमपि समासनिवृत्तिफलकभवेत्तदा यत्र समासस्य प्राप्तिसम्भावना तादृशकृदन्तमेवोदाहृतं स्यादिति भावः। पूर्वोक्तमेवार्थं शङ्कासमाधानाभ्यां द्रढयति। यद्यपीत्यादिना। अत एव। अत्रापि शेषपदासम्बन्धादेव। क्त्वोर्थेति सूत्रे शेष इति मण्डूकानुवृत्त्या सम्बन्ध्यत इत्यत्र बीजन्दर्शयति। अधीगर्थेति सूत्र इति। बहुवचनेति। अधिकरणस्य सङ्ग्रहे हि बहुवचनं युक्तभवतीति भावः। स्वसिद्धान्तमाह। वस्तुतस्त्विति। सूत्रोपात्तेति। यद्यप्येवमातुपूर्वी भाष्ये वार्त्तिकस्य नास्ति। तथापि कैयटीयव्याख्यानवशात्फलतीति प्रक्रियायां एवमुक्तम्। तथाहि। अधीगर्थेति सूत्रे कर्मादिष्वकर्मकवद्वचनम्। कर्मादिष्वकर्मकवद्भावो वक्तव्यः। किम्प्रयोजनम्। अकर्मकाणाम्भावे लो भवतीति भावे लो यथा स्यात्। मातुः स्मर्यते। पितुः स्मर्यते। एतद्वार्त्तिके कर्मादिष्वित्यत्रादिशब्दः कर्मव्यतिरिक्तस्याभावादनुपपन्न इत्याशङ्कानिवारणायाह कैयटः। आदिशब्दोऽत्राश्रयवाचीति। यथा विष्णुरादिः पृथासूनोर्भीष्मादिश्च सुयोधनः। ते जयन्ति रणे शत्रून्येषां विष्णुः समाश्रय इति। तेन कर्माश्रयाः द्वितीयाविधिनिमित्तभावेनोपात्ताः सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मादिशब्देनोच्यन्ते। द्वितीयाविधिनिमित्तभावेनेति। अत्र द्वितीयाशब्दो लक्षणया द्वितीयापवादषष्ठीपरः। तेन षष्ठीनिमित्तभावेनेति फलितम्। दिवुधातुविषये विभाषोपसर्गे द्वितीया ब्राह्मणे इतिसूत्रद्वयारम्भाच्छेषपदासम्बन्ध इत्यतो वार्त्तिकारम्भः। तत्तर्हि वक्तव्यत्र वक्तव्यम्। अविवक्षिते कर्मणि षष्ठो भवतीति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। शेष इति वर्त्तते। शेषस्य कः।

कर्मादीनामविवक्षा शेषः। यदा च कर्म विवक्षितम्भवति तदा षष्ठी न भवति। स्मराम्यहम्मातरम्। स्मराम्यहम्पितरमिति भाष्ये उक्तम्। अत्राविवक्षिते कर्मणीत्यनेनाकर्मकत्वाद्भावे लादयः सिद्धा भवन्तीति दर्शितम्। ततोऽविवक्षितकर्मकत्वेनाकर्मकत्वप्रदर्शनाय शेषपदानुवृत्तिः प्रदर्शिता। शेष इति वर्त्तत इति। नन्वेवं षष्ठी शेष इति सूत्रेणैव षष्ठ्यां सिद्धायामेतत्प्रकरणं व्यर्थमत आह कैयटः। प्रकरणञ्चेदं समासप्रतिषेधार्थमिति। अत्र प्रकरणपदोपादानेन मण्डूकानुवृत्तेरयुक्तत्वात्सर्वत्र शेषपदसम्बन्ध इति दर्शितम्। स्मारितम्। यथा षष्ठी शेष इति सूत्रे कर्मादीनां क्रियाकारकभावेन सम्बन्धमविवक्षितङ्कृत्वा सम्बन्धित्वमात्रविवक्षया षष्ठी भवतीत्युक्तन्तथेहापि कर्मादीनामविवक्षया भावे लादयो भविष्यन्तीति दर्शितमित्यर्थः। कर्माश्रयषष्ठीविषय इत्यनेनाधीगर्थेत्यादिदिवस्तदर्थस्येतिसूत्रसमुदायो गृह्यते। नैतावतेति। षष्ठी शेष इतिसूत्रवदत्रापि सूत्रे आदिशब्द उपात्त इति भावः। प्राचीनव्याख्यायान्दोषमप्याह। किञ्चेति। एतद्भाष्यबलादिति। अव्यवहितोक्तभाष्यबलादित्यर्थः। अन्यथेति। दिव इति सूत्रे शेषपदासम्बन्ध इत्यर्थः। वार्त्तिकरीत्येति। तत्र हि यतः कर्मादिष्वकर्मकवद्वचनमित्युपात्तम्। अत्र कैयटेन प्रेष्यब्रूपर्यन्ता इत्येवोक्तन्न तु क्त्वोर्थप्रयोग इत्येतत्पर्यन्तमिति तेन क्त्वोर्थ इतिसूत्रे शेषपदासम्बन्धो लभ्यते। दिव इति सूत्रे शेष इत्यस्य सम्बन्ध इदमेव भाष्यं मानम्। दिव इति सूत्रस्यापि तन्मध्यपाठात्। अत्र प्रेष्यब्रूपर्यन्त इत्युपादानेन कटिपर्यन्तं वास इत्यत्रेवाग्रे शेषपदासम्बन्ध इति स्पष्टमेव लभ्यते। एतत्सूत्रद्वयेति। विभाषोपसर्गे। द्वितीया ब्राह्मण इतिसूत्रद्वयेत्यर्थः। नन्वेवं द्वितीया ब्राह्मण इति सूत्रभाष्ये गामस्य तदहः सभायान्दीव्येयुरित्यत्र शेषपदासम्बन्धेन दिव इति सूत्रेण प्राप्तषष्ठीबाधनार्थमेतत्सूत्रमित्युक्तन्तस्य का गतिरित्यत आह। द्वितीया ब्राह्मण इतीति। वार्त्तिकरीत्येति। वार्त्तिककारेण हि शेषपदानुवृत्तिर्नोक्ता किन्त्वकर्मकवद्भाव एवोक्त इति भावः। सिंहावलोकनन्यायेनाह। किञ्चेति। एवञ्च। पूर्वोक्तव्यवस्थासिद्धौ च। तदसम्बन्धः। क्त्वोऽविदर्थस्येति सूत्रे शेषपदासम्बन्धः। तथा सति यत्फलितन्तदाह। एवञ्चेति। तद्योगे। अज्ञानार्थकजानातियोगे। अतन्दीव्यतीत्यादि चेति। दिवस्तदर्थेति सूत्रे पूर्वोक्तरीत्या शेषपदस-

सम्बन्धे सति तदा सम्बन्धित्वेन विवक्षा तदा षष्ठी यदा तु कर्मत्वशक्तिमत्त्वेन विवक्षा तदा द्वितीयेति रूपद्वयसिद्धिरिति भावः। ननु क्तोविदर्थेति सूत्रे शेषपदसम्बन्धेऽधीगर्थेति सूत्रे कथं शेषपदसम्बन्धो भाष्य उक्त इत्यत आह। अधीगर्थेत्यादाविति। कर्तृकर्मणोः कृति अत्र सूत्रे शेषपदासंबन्धे साधकमाह। सूत्रत्रयेऽर्थापत्तेरिति। षष्ठी शेष इति सूत्रेणैव तस्याः सिद्धेः। नन्विदं सूत्रमपि क्तोऽविदर्थस्येति सूत्रवत्समासनिष्ठत्तिफलकत्वविषयतीत्यत आह। क्तयोगा षष्ठीति। कर्तृसाहचर्यादिति। कर्तृपदार्थौ यथा नाभेदेन क्रियान्वयी तथा भेदेनेतरसम्बन्धावच्छिन्नविशेषणविशेष्यभावेन क्रियान्वयि यत्कर्म तद्बोधकमेव कर्मपदमिति भावः। स्तोकम्पाक इति। फलस्य व्यपदेशिवद्भावेन फलाश्रयतया कर्मत्वेन तत्राभेदेनान्वितो यः स्तोकपदार्थः सोऽपि कर्मैवेति भावः। अत्र विशेषमाह किञ्चेति। असामर्थ्यादिति। सुबन्तार्थविशेषान्वये समासंज्ञाविधायकतयाऽनयोश्चारितार्थ्यादिति भावः। ननु स्तोकम्पाक इत्यत्रैव समासाभावे प्रदर्शनीये स्तोकम्पाचक इति प्रयोगान्तराभिधानं किमर्थमिति चेन्न। ओदनस्य पाचक इत्यत्र लृजकाभ्यामितिसूत्रोदाहरणविषये यथा षष्ठीक्रियाविशेषणवाचकाद्भवति तथा स्तोकम्पाचक इत्यत्रापि स्यादिति शङ्कावारणाय प्रयोगान्तराभिधानस्य कृतत्वात्। षष्ठी तु स्तोकम्पाक इत्यत्रैव स्तोकम्पाचक इत्यत्रापि धात्वर्थेऽभेदेनान्वयान्न भवतीति पूर्ववत् यद्यपि सम्भवति तथापि वार्त्तिकविरोधादपि न भवति। अत एव वक्ष्यति एतदेव भाष्यमित्यादि। ननु कष्टं श्रितः कष्टश्रित इत्यत्रापि सुबन्तार्थविशेषेण श्रयणकर्त्रा कष्टमित्यस्यानन्वयात्कथं समास इत्याशङ्कायामाह। द्वितीया श्रितेत्यादेरिति। सामर्थ्यात्सूचारम्भसामर्थ्यात्। उक्तरीत्या। यथा प्राप्तोदकेत्यत्र हस्तिविग्रहवाक्ययोः समानार्थत्वोपपत्तये प्राप्तिकर्तृदककर्मेति बोधः स्वीक्रियते तथा श्रयणकर्तरि कष्टेतिकर्मणो द्वितीयार्थस्यान्वयेन कष्टकर्मकाभिन्नश्रयणकर्तृ इत्यर्थकल्पने सुबन्तार्थविशेषेणाप्यन्वयो वक्तुं शक्य इति भावः। उक्तेऽर्थे भाष्यसम्मतिमप्याह। अत एवेति। तेनान्वयाभावेन समासाभावादेव। आह च इति। पूजनात्पूजितमित्येतावदेव सूत्रमित्याशयेन वार्त्तिककारेणोक्तम्य जितस्यानुदात्तत्वे काष्ठादिग्रहणम्। पूजितस्यानुदात्तत्वे काष्ठादिग्रहणङ्-

र्त्तव्यम्। काष्ठादिभ्यः पूजनादिति वक्तव्यम्। इह मा भूत्। शोभनोऽध्यापकः। मलोपवचनञ्च। दारुणाध्यापकः। दारुणाभिरूपकः। तत्र कैयटः। क्रियाविशेषणदारुणशब्दो द्वितीयान्तो यथा ग्रामं गत इत्यादौ गुणभूताया अपि क्रियायाः साधनेन योगस्तथा विशेषणेनापि तत्र वैयधिकरण्यात्समासाभावान्मलोपो विधीयते। दारुणाभिरूपक इति। आभिरूप्यन्दारुणशब्देन विशेष्यत इति दारुणशब्दस्य नपुंसकत्वम्पूर्ववत्समासाभाव इति। अन्यथा। एतादृग्विशेषणवाचकादपि षष्ठीस्वीकारे। उक्तसामर्थ्येपि। अवयवद्वारकसामर्थ्येपि। षष्ठीसमासस्य वैकल्पिकत्वात्तदभावे दारुणाध्यापक इत्यस्य सिद्ध्यर्थम्मलोपवचनमस्त्विति शङ्कते। न चेति। स्पष्टप्रतिपत्त्यर्थं वाक्यग्रहणे कर्त्तव्ये तदकरणात्समासार्थमेतत्स्यात् तथा च वचनं व्यर्थमेव स्यादित्याशयेन समासाप्राप्तिविषयकमेव तद्वचनमित्याशयेन समाधानमाह। तथा सतीति। अत एव। वैयधिकरण्येन समासाप्राप्तिविषयकत्वादेव। ननु वयधिकरण्ये व्यवयवद्वारकसम्बन्धमादाय सुप्सुपेति वा मयूरव्यंसकेति वा समासोऽस्त्वित्यत आह। सुप्सुपेत्यादीति। तदाशयः। तङ्गाथाशयः। परमतखण्डनपूर्वकमस्मद्बीजन्दर्शयति। कर्त्तृकर्मभ्यामिति। धातुरेवेति। अत्रैवकारेण प्रातिपदिकव्यवच्छेदः। ननु शल्य आभ्रिक इत्यादिशब्दानाङ्क्रयणखननादिरूपक्रियोपस्थापकत्वमस्त्येवेत्यत आह। शल्योऽस्य इति। तेन रूपेण। साध्यत्वेन। अत एव देवदत्तेन शल्योऽस्यः। चैत्रो भूमिमाभ्रिक इति न प्रयोगः। एतद्गाथेति। कृतपूर्वी कटम्भुक्तपूर्वी ओदनमिति विलक्षणस्थल एव कृतीत्यस्य प्रयोजनप्रदर्शनपरभाष्यप्रामाण्यादित्यर्थः। अत एव। धातुत एव कारकान्वयितावच्छेदकसाध्यत्वेनोपस्थितिसत्त्वादेव। एतेन। उक्तप्रकारेण। नन्वध्यारूढमित्यर्थेऽधिकमिति सूत्रेणाधिकशब्दस्य व्युत्पादनादस्मन्मतेऽधिका खारी द्रोणेनेति प्रयोगोपपत्तिर्भवति। यदि धातुत एव तेन रूपेणोपस्थितिरिति नियमो भवन्मते तदा कथन्तादृग्प्रयोग इत्यत आह। अधिकेति। ननु कृतो ये कर्त्तृकर्मणी तत्र षष्ठीत्येवं व्यवस्थार्थङ्कृद्ग्रहणमस्त्वित्यत आह। धातोश्च इय इति। तदुक्तभाष्ये। तस्य कर्मकर्त्र्यर्थन्तर्हि कृद्ग्रहणङ्कर्त्तव्यम्। कृतो ये कर्त्तृकर्मणी तत्र यथा स्यात्। अन्यस्य ये कर्त्तृकर्मणी तत्र मा भूत्। नैतदस्ति प्रयोजनम्। धातोर्हि इये प्र-

त्यया विधीयन्ते तिङः कृतश्च तत्र कृत्प्रयोग इष्यते । तिङ्प्रयोगे प्रतिषिध्यते इति । अत्र इये प्रत्यया इति भाष्यप्रयोगादेव इय इत्यस्य साधुत्वम् । ननु कृतीत्यत्र तदुत्तरसूत्रेऽनुवर्त्य कृति अव्ययेनेतिवचनव्यर्थाऽकृदव्ययनिरासार्थन्तदस्खित्यत आह । न लोकेतीति । ननूभयप्राप्ताविति सूत्रेऽन्यपदार्थलाभार्थङ्कृतीत्यस्खित्यत आह । उभयेति । व्याख्यानादिति । ओदनस्य पाको ब्राह्मणानाम्मादुर्भाव इत्यादौ भिन्नक्रियाकर्तृकर्मवाचकशब्दप्रयोगे उभयत्र षष्ठीदर्शनमूलकव्याख्यानादित्यर्थः । अयञ्च प्रयोगोऽत्रैव भाष्ये दृश्यते । भाष्ये एकदेशिनोक्तं कृतीत्यस्य प्रयोजनङ् खण्डयितुमाह । न च भेदिकेत्यादि । भेदिकेत्यत्र भिदेर्ण्यन्तात्पर्यायादिषु ण्वुच् । अत्र णिजर्थव्यापारस्य प्राधान्यात्प्रयोजककर्त्ता प्रधानम् । प्रकृत्यर्थस्य त्वप्राधान्यात्प्रयोज्यकर्ताऽप्रधानमिति प्रधानाप्रधानसन्निधौ प्रधाने एव कार्यमितिन्यायेनोप्रधानान्न स्यादित्याशयः । कर्तृपरमिति । एवञ्च वाक्यभेदेन कृति कर्त्तरि यत्तस्मादित्यर्थो भविष्यतीति भावः । अत्राप्रधानस्य गतिबुद्धीति सूत्रस्य नियमार्थत्वान्न कर्मत्वम् । कृतीयावदिति । यथा देवदत्तेन यज्ञदत्तेन पाच्यते तण्डुल इत्यत्रानुक्तयोर्भिन्नपदवाच्ययोः कर्त्रोस्तृतीया विरोधाभावाद्भवति तथा प्रकृतेऽपि भविष्यतीति भावः । कृतीत्यस्य प्रयोजनमाह । तद्धित इतीत्यादिना । तद्धिते मा भूदित्यस्य कृदन्तात्तद्धिते सति मा भूदित्यर्थः प्रतीयते स त्वयुक्तस्तण्ड्लानाम्याचकतर इत्यत्र षष्ठीदर्शनादत आह । तद्धितान्तशक्तिग्रहमात्रेति । कृदन्तशक्तिग्रहत्वावच्छिन्नकारणतानिरूपितो योपस्थितिवृत्तिकार्यता तदवच्छेदिका या विषयता तद्वृत्तिक्रियाकर्तृकर्मणोः षष्ठीति पर्यवसितोऽर्थः । तादृशी च विषयता प्रत्ययार्थनिष्ठविशेष्यतानिरूपितप्रकारतारूपा बोध्या एतच्च कृतो ये कर्तृकर्मणी तत्र यथा स्यात्तद्धितस्य ये कर्तृकर्मणी तत्र मा भूदिति कृतपूर्वी कटम् । भुक्तपूर्वी ओदनमितीति भाष्यान्नभ्यते । कृतपूर्वीत्यत्र यथा तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितङ्कर्मत्वन्तदुपपादयति । उदाहरण इति । अत्र सकर्मकेत्यभिधानेन प्रसिद्धरीत्या भावे क्तप्रत्ययस्य भवने भाष्यीयप्रयोगातिरिक्तहेत्वभावः सूचितः । तस्य । भावक्तान्तस्य । क्रियाप्रयोगेण । अस्योपदर्शितवृत्त्यतिरिक्तवाक्य इत्यादिः । कृदन्तशक्तिग्रहप्रयोज्येति । कृदन्तशक्तिग्रहमात्रप्रयोज्ये-

स्यर्थः । न चात्र तथा । न चात्र क्तादन्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रिया-निरूपितङ्कर्मत्वम् । यथा तण्डुलानाम्पाचक इति वाक्यघटकस्य पाचक इत्यस्य तृच्यघटकस्य पाककर्त्तरि शक्तिग्रहे सति तादृशशक्तिग्रहप्रयोज्या या पाककर्त्तृउपस्थितिस्तस्याम्प्रकारतया भासमाना या पचिक्रिया तन्निरूपितकर्मत्वस्य तण्डुलपदार्थे सत्त्वाङ्गवति तत्र षष्ठी । अत एव । यथाश्रुतात्तद्धित इति वाक्यात्प्रतीयमानस्यार्थस्यानभिप्रेतत्वादेव । नन्वस्य केवलस्य क्तादन्तस्य कथन्न प्रयोग इत्यत्राह । अत्र कर्मविशेषस्येति । भावे क्त इति । अविवक्षितकर्मणोऽप्यकर्मकपदेन ग्रहणस्येष्टत्वाद्भावे क्त इत्यर्थः । ननु प्रागन्वयाविवक्षायामपि कृतेत्यस्य कर्माकाङ्क्षायाः सत्त्वेन सापेक्षत्वेनासामर्थ्यात्कथं वृत्तिरित्यत आह । वृत्तेः पूर्वमिति । इत्यादावपीति । अन्यथा तत्रापि कर्मण्येव क्त प्रत्ययः स्यात्तथा च कर्मणोऽनभिहितत्वाभावेन क्तस्येत्विषयस्येति सप्तमी न स्यादिति भावः । योऽर्थ इति । करणादिरूप इत्यर्थः । स्पष्टमेवोक्तम् । भाष्यकृतेति शेषः । तद्भाव इति । भाष्यकृद्भाव इत्यर्थः । न चात्र निष्ठान्तार्थभूता या क्रिया तन्निरूपितकर्मत्वसत्त्वान्न लोकेति निषेधस्य प्राप्तिरिति कथं षष्ठ्यापादनमिति वाच्यम् । तस्यापि पूर्वोत्तरसाहचर्येण प्रत्यासत्त्या च निष्ठान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वविशिष्टे षष्ठी नेत्यर्थकल्पनात् । अत्रापि निष्ठान्तशक्तिग्रहजन्यतावच्छेदकतादृशप्रकारतामादाय परिष्करणीयम् । तेन दैत्यान्हतवत्तरामितिविशिष्टजन्योपस्थितिमादाय नाव्याप्तिः ! तस्याप्यकर्मकेभ्य इति । नपुंसके भावे क्त इतिसूत्रविहितक्तस्येत्यर्थः । अत्र । एतादृशेष्टौ । इदमेव भाष्यम् । यदा वाक्यमित्यादि भाष्यम् । भट्टिपद्ये ददैर्दुःखस्येत्यनेन सूत्रेण चेदृदुःखपदादनभिहितकर्मवाचकत्वेन षष्ठी तदा धार्यैरामोदमित्यत्रापि कुतो नेतिशङ्कानुत्थानायाह । ददैर्दुःखस्येति । गृहीत्वेति । एवञ्चामोदमिति न धार्यैरित्यस्य कर्मेति न षष्ठीप्राप्तिरिति भावः । एवञ्च दुःखस्येत्यस्य देहलीदीपकन्यायेनोभाभ्यामन्वयान्नोभयत्र कर्माकाङ्क्षेति भावः । ज्वलेर्णः । कर्त्तरीति शेषः अत एव क इत्यत्र प्रथमा । अत्र ज्वलेर्ण इत्यभिधानन्न ज्वल इतिणप्रत्ययेन साधनीयमित्यभिप्रायेण । किन्त्वस्य वैकल्पिकतया एतदभावे पचाद्यजित्यभिप्रायेण । एतदभिधानन्तु तस्यानेन स्मरणार्थमेव अत्र नपुंसके

भावे क्त इति सूत्रविहितस्य क्तस्याप्यकर्मकेभ्य एव प्रवृत्तिरितीष्टिबलादेवेति न भ्रमितव्यम्। किन्तु तयोरेवेति सूत्रे भावे चाकर्मकेभ्य इत्यनुवर्त्तते। तच्च वाक्यभेदेन सम्बन्ध्यते। चशब्दस्त्वर्थे। एवञ्च क्त्यादयस्त्रयोरेव। भावे तु अकर्मकेभ्य एवेति द्रष्टव्यम्। तेन। उभयोः प्राप्तिर्यस्मिन्निति बहुव्रीहिसमासाश्रयणेन। प्रादुर्भाव इति। अस्याश्चर्यमेतदिति शेषः। प्रयोग एवेति। प्रयुज्यमाना देव प्राप्तिर्भवतीति भावः। स्पष्टप्रतिपत्तये आह। स्त्रियामिति। भ्रमनिवारणायाह। नियमस्येति। के चिदितीति। तथा च शेषे विभाषेत्यस्यायमेव मुख्यार्थ इति ध्वनितम्। करणे ल्युडिति। तेनाचार्यपदार्थस्यानुक्तत्वमस्तीति शेषः। ननूभयप्राप्तावित्ति नियमात्कथमोदनपदादत्र षष्ठीत्यत आह। उभयेति। लादेश इत्यस्य लस्यादेश इति भ्रमनिवारणायाह। लकारसम्बन्धिन इति। एवाच्चादेशशब्दस्य सम्बन्धिनि लक्षणेति भावः। ददिर्गा इतीति। अचाटगमेतिसूत्रेण किकिनौ प्रत्ययौ। तयोश्च लिङ्वद्भावविधानेन लिट्प्रयोज्यद्वित्वप्रयोजकत्वरूपसम्बन्धवत्तयाऽस्ति लकारसम्बन्धित्वमिति भावः। न च लास्त्यैत्येवास्तु लस्य स्थाने आदेशे कृतेपि स्थानिवद्भावेन लत्वव्यवहारादिति वाच्यम्। अस्विधित्वेन तदसम्भवात्। नन्वादेशपदमूलेऽधिकमत आह। केवलस्येति। सृष्टिङ्वंक्कुर्वाणेत्यत्र लृन्ग्रहणेन निषेधासिद्धेरेतस्यलादेशोदाहरणत्वकथनमधिकमत आह। लृन्प्रत्याहारेति। तस्य। लग्रहणस्य। अस्मिन्सूत्रे उकारोप्यत्र निर्दिश्यत इतिभाष्यादुकशब्दात्पूर्वमुकारो बोध्यः। स च प्रत्ययसाहचर्यात्प्रत्ययरूपस्य शब्दस्वरूपस्य विशेषणम्। उकारोप्यत्र निर्दिश्यत इत्यत्र कारप्रत्ययस्य प्रयोगेण तस्य वर्णरूपत्वबोधनात्। वर्णग्रहणे च सर्वत्रेति तदन्तविधिः। तथा चोकारान्तोयः प्रत्ययस्तदन्तेन योगे षष्ठी नेति फलितम्। तेन कन्यामलङ्करिष्णुरित्यादावपि निषेधसिद्धिः। उश्च उकश्च ऊकौ लश्च ऊकौ चेत्यादिद्विग्रहः। व्याख्यानादिति। कन्यामलङ्करिष्णुरित्यादिप्रयोगदर्शनमूलकाद्व्याख्यानादित्यर्थः। उकान्तस्येतीति। उकप्रतिषेधे कर्मभाषायामप्रतिषेध इतिवार्त्तिकस्वारस्यात्। तेन लक्ष्मीङ्कामयमा इत्यत्र प्रतिषेधो भवत्येव। एतदपवादतया। निष्ठेत्येतदपवादतया। अत एव। तत्सूत्रविहितक्तान्तस्य ग्रहणादेव। नात्र। भ्रान्तन्देशमित्यादौ। एवेष्टैरिति। त-

हीजन्तूक्तम् । भ्रमधातुश्च सकर्मकस्तस्मान्नपुंसके भाव इत्यनेन क्तस्यासम्भवान्नत्यर्थेत्यनेन भावे क्तप्रत्ययो यदा क्रियते तदा भ्रमणक्रियाकर्तृवाचकात्कर्तृकर्मणोरिति प्राप्तषष्ठ्या निष्ठेति निषेधो भवत्येवेति तृतीयैव भवतीति भावः । एवञ्च । पूर्वोक्तव्यवस्थासिद्धौ च । अकर्मकधातुविषये विशेषमाह । अहेः सृप्तमिति । अत्र सृप्धातोश्चलनमात्रमर्थः । परत्वेन । वार्त्तिकात्परत्वेन । शेषत्वविवक्षयैव । कर्तुः शेषत्वविवक्षयैव । कर्तृकर्मणोरिति तु निष्ठेति प्रतिषिद्धम् । भाष्ये प्रत्याख्यातमिति । तत्र हि क्तस्य च वर्त्तमाने नपुंसके भावे उपसंख्यानम् । क्तस्य च वर्त्तमाने नपुंसके भाव उपसङ्ख्यानङ्कर्त्तव्यम् । नटस्यभुक्तम् । छात्रस्य हसितम् । मयूरस्य नृत्तम् । कोकिलस्य व्याहृतमिति । अत्र क्तस्य च वर्त्तमान इत्यस्योपादानसत्त्वेवार्त्तिके क्तस्येत्यस्यानुवृत्तिसूचनाय । नपुंसके भाव इति विहितः क्तस्तु कालोदासीन एव । एवञ्च कालोदासीनभावविहितक्तान्तेन योग एव निष्ठेतिनिषेधस्याधित्वा नपुंसके भाव इति षष्ठी । यद्यप्यत्र कर्तुः शेषत्वविवक्षया सिध्यति । तथापि कर्तृत्वप्रकारकबोधे षष्ठ्यर्थमिदमिति वार्त्तिककाराशयः । ततो भाष्ये पूर्ववार्त्तिकमत्याख्यातम् । शेषविज्ञानात्सिद्धम् । शेषलक्षणात्र षष्ठी भवति । शेष इत्युच्यते । शेषश्च कः । कर्मादीनामविवक्षा शेषः । सा चाविवक्षा मतोऽप्यविवक्षा भवतीत्यनेन प्रकारेणोपपादिता । इदम् । नपुंसकेभावे इत्येतत् । विशेषं वक्तुमनुवदति । वार्त्तिकेनेति । एतदिति । वार्त्तिकमित्यर्थः । क्तातिरिक्तेति । एतेन पदसंस्कारपक्षे भ्रान्तं देशमित्यादौ चाविवक्षितकर्मकत्वेनाकर्मकत्वाद्भावे भूते क्ते निष्ठान्तेन योगे षष्ठी नेति निषेधान्न षष्ठी किन्तु पुनः कर्मयोगेऽपि द्वितीयैवेति परास्तम् । एवंरीत्यास्य साधने पदसंस्कारपक्षमादाय कटङ्कृतमिति प्रयोगस्यापत्तेः । ननु वार्त्तिकारम्भप्रत्याख्यानयोः फलभेदाभिप्रायेण पुनर्भाष्ये शङ्कितम् यद्येवमुत्तरत्र चातुः शब्दमाप्नोति । इदमहेः सृप्तम् । अत्राधिकरणे क्तः षष्ठी कर्त्तरि । इहाहिना सृप्तम् । अत्र भावे क्तः । इहाहिः सृप्तः अत्र कर्त्तरि । अहेः सृप्तमिति । अत्र भावे अत्र शेषे षष्ठ्यपि प्राप्नोति । वार्त्तिकारम्भे तु क्तोऽधिकरणे चेतिक्तविषये नपुंसके भावे क्त इत्यस्याप्रवृत्त्यावार्त्तिकेन कर्त्तरि षष्ठी न शेषत्वविवक्षायाश्च तन्मतेऽभाव एवेति

वेशब्दग्रमिति चेन्न । इहाहेः सप्तङ्ग्रामस्य पार्श्वे ग्रामस्य मध्य इति । इथत ए-व चात्रःग्रब्दग्रमिति । अत्र ग्रामस्य पार्श्वं इति सप्तम्युक्तेखेनाधिकरणस्यानभि-हितत्वोपपत्त्यर्थभाव एव प्रत्ययो विधेयस्तदा वार्त्तिकेन कर्त्तरि षष्ठी स्यादेव इहेत्यस्य विवरणङ्ग्रामस्य पार्श्वं इतीति फलभेदाभावात् । क्तातिरिक्त विषय इत्यनेनान्यत्र लादेग्रादिनिषेधविषये ग्रेषत्वविवक्षाभावो बोधितः । तत्र साध-कमाह । पूरणेति । असामर्थ्यात् । ब्राह्मणस्येत्यस्य स्वान्वययोग्यनामार्थेऽन्वये-नासामर्थ्यात् । इदञ्चिन्त्यमिति । यदि ब्राह्मणस्येत्यस्य क्रियायामन्वयः स्यात्त-देदं सूत्रोदाहरणं युक्तन्नामार्थान्वये तु क्रियायामनन्वयेन ग्रेषे षष्ठीति वक्तुम-ग्रक्यमिति भावः । नेष्यत इति । अकस्य भविष्यतीति वक्तव्यम् । यवान् ला-धको व्रजति । ओदनभोजको व्रजति । सक्तूपायको व्रजतीति । इन आध-मर्ण्ये चेति वक्तव्यम्। शतन्दायी सहस्रन्दायी । ग्रामङ्गमीति । अचैतादृग्रयोग-विभागेन व्याख्यानान्नेष्यत इति सिद्धम् । नन्वेवमुभयोरुभयत्र सम्भवोऽस्वि-त्यत्र आह । अकस्येत्यादि । कर्त्तृमात्रार्थक इति । अत्र मात्रपदेन भविष्यत्त्व-व्यवच्छेदः । सूत्र इति । अकेनोरितिसूत्र इत्यर्थः । तत्सूत्र इति । आवश्यकाधम-र्ण्ययोरिति सूत्रेत्यर्थः । अत एव । उपलक्षणादेव । भूतवर्त्तमानयोरिति । भू-तस्य ज्ञातत्वेन तत्र तथा कथनं व्यर्थमेव । वर्त्तमाने च प्रमाणान्तरेणैव तथा निश्चयसम्भवादेतत्कथनानुपयोग इति भावः । तर्त्वेन । भविष्यत्त्वेन । अत एव । णिनेर्भविष्यदर्थकत्वाभावादेव । नव्या इति । अनेन सुप्यजातावितिसूत्रेण णि-निप्रत्यये प्युक्तरीत्या भविष्यत्त्वप्रतीतावपि न दोष इति सूचितम् । निषेधोऽ-यमिति । क्त्वानामिति निषेध इत्यर्थः । कर्त्तरि कर्मणि चेति । विशि-ष्यानुपादानादुभयत्र निषेधोऽयमिति भावः । प्राचीनोक्तङ् खण्डयति । व्रजमिति । न चानभिहिताधिकारावैयर्थ्योपपादनावसरे कर्त्तव्यः कट इ-त्यत्र परत्वात्क्त्यर्थयोगलक्षणषष्ठीप्रसङ्गादितिमनोरमायामभिहितन्तस्य कथ-मुपपत्तिरिति वाच्यम् । यत्रोभयोः प्रयोगस्तत्रैवोभयोः प्राप्तिरिति कर्त्तव्यः कट इत्यत्रैनास्य निषेधस्य व्यापार इत्याशयात् । न चोभयप्रयोग एव चेदा-क्रष्ट्या ग्रामं ग्रास्येति क्त्वानामिति विभक्तसूत्रोदाहरणभाष्ये उक्तन्तस्य का गतिरिति वाच्यम् । कर्त्तृपदाश्रयपदाध्याहारेण तस्य भाष्यस्योपपत्तेः । यथा-

श्रुते तुल्यशब्दस्य धर्मिवचनतया साम्यं कृष्णस्य कृष्णेन वा प्रदानं इत्यादौ प्राप्तासङ्गतेः परिहारायाह। तुल्यत्वार्थैरिति। अत एव। भावप्रधाननिर्देशादेव। अन्यथा तुलोपमाशब्दयोस्तुल्यार्थकत्वासम्भवेन तयोरुपादानं व्यर्थमेव स्यादिति भावः। अत एव। अस्मादेव। चतुर्थीसम्प्रदान इतिवच्चतुर्थी चाशिषीत्युक्तत्वे नाशीश्चतुर्थ्यर्थ इतिभ्रमवारणायाह। आशीर्विषयेति। तद्द्वारकेति। क्रियाद्वारकेत्यर्थः। अत एव। क्रियाद्वारकसम्बन्धस्वीकारादेव। उभयोरपीति। देवदत्ताय सुखम् भूयादित्यादौ देवदत्तायेत्यस्य सुखमित्यादेश्च। क्रियान्वयेन। सुखमित्यस्य कर्तृतया देवदत्तायेत्यस्य सम्बन्धित्वेन भूयादित्येतच्छब्दबोध्यक्रियायामन्वयेन। अत एव। एतद्विहितचतुर्थ्यन्तस्य तेन समासाभावादेव। अनेन सूत्रेण यच्च चतुर्थी तच्च चतुर्थ्यन्तार्थस्योद्देश्यत्वमाशीर्विषयक्रियान्वयित्वञ्च विधेयत्वमिति वाक्यस्योद्देश्यविधेयभावावगाहिबोधजनकत्वं वृत्तौ च न तथेति वृत्तिविग्रहयोः समानार्थत्वाभावान्नैतद्विहितचतुर्थ्यन्तेन समास इति प्राचोक्तं खण्डयति। यस्मिति। तथान्वयात्। उद्देश्यविधेयभावेनान्वयात्॥ न समासः। उद्देश्यविधेयभावेनान्वयबोधे पृथगुपस्थितेस्तन्त्वादिति भावः। वृत्तावपि प्राप्ताप्राप्तविवेकेन यत्प्राप्तन्तदुद्देश्यं यच्चाप्राप्तन्तद्विधेयमितिकल्पनयोद्देश्यविधेयभावेनान्वयेन वृत्तौ सर्वत्र तथाऽन्वय इति नियमे मानाभाव इत्यभिप्रायेण दूषयति। तन्नेति। लोहितोष्णीषा इत्यादाविति। सोष्णीषा ऋत्विजः प्रचरन्तीतिवाक्ये नोष्णीषस्य प्राप्तत्वात्तदनुवादेन लोहित्यमात्रस्य विधानादिति भावः। वृत्तेस्तथा स्वभावे प्रमाणाभावमाह। भाष्य इति। मूले व्याख्यानादिति। प्राचां व्याख्यानादित्यर्थः। ननु सुखशब्दान्तद्वन्द्वङ्कृत्वाऽर्थशब्देन बहुव्रीहिसमासे कृते द्वन्द्वान्त इतिन्यायेनैवार्थलाभे व्याख्यानादित्ययुक्तमत आह। सूत्रेऽर्थशब्द इति। तथा चार्थशब्दान्तो द्वन्द्व एवायन्न त्वर्थशब्देन बहुव्रीहिरिति भावः। प्राचोक्तन्दूषयति। भाष्ये त्विति॥

इति षष्ठीविवरणम्।

तदाश्रयस्य। क्रियाश्रयस्य। व्याख्यानादिति। कर्तृकर्मव्यवहितामसाक्षाद्द्वारयत् क्रियाम्। उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमितिहर्यादुक्तिमू-

लकव्याख्यानादित्यर्थः । हरिकारिकायां यदुक्तमसाक्षाद्धारयत्क्रियामिति तद्व्यभिचारोऽपि क्व चिदस्तीत्याह । यद्यपीति । ननु सम्भवति साक्षात्तदाधारत्वे कथम्परम्परया तदाधारस्य ग्रहणमत आह । आधारपद इति । साक्षात्तदाधारस्य तु चैत्रादितुल्यत्वमेवेत्याशयेनाह । किञ्चेति । तत्र दृष्टान्तमाह । काल इति । एवञ्च । परम्परयाधारस्य ग्रहणसिद्धौ च । अस्य । आधारस्य । अत एव । पूर्वोक्तनियमस्वीकारादेव । कारकाणाङ्क्रियान्वयित्वमिति नियमोप्यधिकरणविषये परम्परयैव । अत्रशौण्ड इत्यादाविति । यथा कटे शेते चैत्र इतिवाक्यात्कटाधिकरणकचैत्रकर्तृकं शयनमितिबोधस्तथात्रेषु शौण्ड इति वाक्यादपि अत्राधिकरणकशौण्डकतृका भवनक्रियेत्येवंरीत्या बोधात्साक्षादेव सप्तम्यन्तस्य शौण्डादिभिः सामर्थ्यमिति समासस्संङ्गासिद्धिः । अत्र । अत्रशौण्ड इत्यादौ । न युक्तमिति ।भाष्यकृता तस्यार्थस्यानुक्तेरिति शेषः । यत्र तु क्रियावाचकम्पदन्न श्रूयते तत्रापि तदन्वययोग्यक्रियावाचकम्पदमध्याहृत्य क्रियाधारत्वमुपपादनीयम् । तदाह मूले वृक्ष इति । फलतीति । एवमभिधानेन कपिसंयोगादौ मूलाद्यवच्छेद्यत्वावगाहिनी मानसी प्रतीतिरित्युक्तम् । तत्र कटे शेते स्थास्नाम्यत्वतीत्यादावाधारत्वे नाभिप्रेते कर्तृकर्मणोः संयोगोऽस्तीति तद्व्याधारत्वम् । क्व चित्त्ववच्छेदकतासम्बन्धेन । शिरसि वेदना पादे मे सुखमित्यादौ यथा । क्व चित्तु प्रतियोगितानिरूपितानुयोगितया । यथाऽभावे प्रतियोगितया घटः प्रकारोऽस्तीत्यादौ । एवमन्यत्राप्यूह्यम् । चकारेण विहिता या सप्तमी सा स्वार्थे न तु तस्मिन्वाक्येऽधिकरण इत्यस्य सम्बन्धः । वाक्यभेदसामर्थ्यात्तदभिप्रायेणाह । प्रातिपदिकार्थ इति । अत्र । तेषु मध्ये । सकलेति । सकलावयवावच्छेदेन व्याप्तिरित्यर्थः । व्याप्ताविति । अत्र व्यापनं व्याप्तिपदार्थः स च व्यापकत्वाभिन्न इत्यभिप्रायेणाह । व्यापकाधारत्वमिति । व्यापकत्वञ्च व्याप्यतानिरूपितम् व्याप्यता च किञ्चिष्ठेत्याकाङ्क्षायामन्यस्यानुपस्थितत्वात्प्रकृत्यर्थनिष्ठैव ग्राह्या प्रकृत्यर्थस्य व्याप्यता च समवायसम्बन्धेन । व्यापकत्वन्तु संयोगसम्बन्धावच्छिन्नमाधेयनिष्ठं विवक्षितमिति संयोगसम्बन्धावच्छिन्नाधेयनिष्ठव्यापकतानिरूपिता यो समवायसम्बन्धावच्छिन्ना व्याप्यता तद्विशिष्टाधारोऽभिव्यापकाधारः । तिलेषु तैलमित्यत्र स्वावयवेषु समवायेन तिलस्य सत्त्वात्तेषु सर्वत्र तै-

लस्य संयोगेन सत्त्वादुक्तव्याप्यव्यापकभावो द्रष्टव्यः। एवमेव दध्नि सर्पिरित्यादावपि ज्ञेयम्। मुख्यमिति। आधारमाचार्यः किञ्चाप्यन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति तेनेहैव स्यात्तिलेषु तैलमित्यपि सर्पिरिति हि साधकतममितिसूत्रभाष्येऽभिहितम्। अत एव। औपश्लेषिकपदस्योक्तार्थस्वीकारादेव। एवञ्चैको यणचीत्यादौ निमित्तत्वेनाभिप्रेतेऽच्पदार्थे इक्पदार्थसामीप्यादेवैगाधारत्वव्यवहारः। एतादृशाधारस्य गौणत्वव्यवहारः। अत एव साधकतममितिसूत्रभाष्ये गङ्गायाङ्गावः। कूपे गर्गकुलमित्यत्र न स्यात्। कारकसंज्ञायान्तरतमयोगो न भवतीत्यत्रापि सिद्धभवतीत्युक्तम्। औपश्लेषिकाधारस्याप्यधिकरणसंज्ञेत्यत्र भाष्यान्तरमपि साधकमाह। यन्मांस इति। अत्र दानक्रियाया उपश्लेषः सम्बन्धः स च स्वाधिकरणकालपूर्वत्वरूपः। औपश्लेषिकमप्यधिकरणं सप्तमीशक्यमित्यत्र मानान्तरमाह। तदस्मिन्निति। तत्र ह्येकादशाधिकां अस्मिन् शत इत्यत्र शतस्याधिकरणत्वाभावात्कथं सप्तमीत्याशङ्क्यौपश्लेषिकमिदमधिकरणमित्युक्तम्। शतसमीपे हि ते भवन्ति न तु तदन्तर्भूता इति। नौपश्लेषिकमिति। औपश्लेषिकपदस्यावयवमर्यादया योऽर्थः प्रतीयते सोऽत्र नास्तीति भावः। तदेतदाह। उक्तभाष्येति। सूत्रचयस्यभाष्येत्यर्थः। नन्वेवङ्कटे आस्ते स्थण्डिले शेते इत्यौपश्लेषिकाधारे सप्तमीति ग्रन्थानाङ्का गतिरिति चेत्तेषामपि यथाकथञ्चित्तत्तदभिप्रायेणाह। यद्वेति। एतत्सर्वमिति। औपश्लेषिकं सर्वाधिकरणमित्यर्थः। गङ्गायाङ्गाव इत्यादिकञ्चेति। आदिना कूपे गर्गकुलमित्यस्य सङ्ग्रहः। अत्र यद्यपि गङ्गापदस्य सामीप्यात्तीरे गङ्गात्वारोपाल्लक्षणास्तथापि न सर्वावयवावच्छेदेन गोसम्बन्ध इति भावः। शक्य एवेति। आधारोऽधिकरणमितिसूत्रस्थाधारपदे स्वरितत्वप्रतिज्ञानात्। अधिकः कारोऽधिकार इत्यर्थाश्रयणात्। एतदतिरिक्तमिति। उभाभ्यामभिन्नमित्यर्थः। यथा मोक्षे इच्छास्ति। खे शकुनय इत्यादौ। उक्तद्वयातिरिक्तत्वेन सर्वसङ्ग्रहो न तु विषयतासम्बन्धावच्छिन्नाधिकरणमेवेत्याग्रहः एवञ्च वैषयिकपदमुभयातिरिक्ते रूढमिति भावः। शक्तिमांश्चेति चकारेण क्रियाधिकरणभावसम्बन्धपरिग्रहः। तेन। इन्द्रियस्येत्यस्योक्तार्थकरणेन। इत्यत्र नेति। यदि तस्येन्नन्तवटत्वमात्वर्थस्येत्यर्थः स्यात्तदा कृतपूर्वी कटमित्यादावपि स्यादिति भावः। अभि-

हितत्वेनेति। सप्तम्यधिकरणे चेतिसूत्रेऽस्य वार्त्तिकस्य पाठादनभिहित इत्यस्य सम्बन्धः। यन्मूले कर्त्तरीत्युपात्तन्लाभोपायमाह। तत्र हीति। ननु प्राक्तनमेवेदङ्कर्मेति रीत्या कालस्यापि कर्मत्वात्तस्मिन्नपि सप्तमी स्यादिति मासमधीतीत्यादिव्याकरण इत्यत्र मासपदादपि सप्तमी स्यादत आह। अत्र कर्मशब्देनेति। व्याख्यानादिति। अधीत इत्येतावन्मात्रोपादाने वेदादिरूपपदसन्दर्भाकाङ्क्षानियमोऽस्तीत्येतादृशङ्कर्मान्तरङ्गमित्येतन्मूलकव्याख्यानादित्यर्थः। कैयट इति। अत्रारुचिबीजन्तु कालादिकर्मणां सकर्मकाकर्मकसाधारण्येन धातुसामान्यकर्मतया तत्त्यागे मानाभावः। पदसन्दर्भस्यापि शब्दत्वात्मकसामान्यरूपेण प्रकृतधात्वर्थकर्मतया कस्मिन्निति विशेषाकाङ्क्षापि सामान्यज्ञानपूर्विका भवतीति तस्यापि ग्रहणमिति। एतद्वार्तिकव्याख्यानोत्तरमूले निमित्तात्कर्मयोग इति यस्य चेति च सूत्रं व्याख्याय साध्वसाधुप्रयोग इति वार्त्तिकं व्याख्यातम् तन्न युक्तम्। भाष्ये क्तस्येन्विषयस्येत्येतद्व्याख्यानानन्तरं साध्वसाधुप्रयोगे चेत्यस्य व्याख्यानादिति तेनैव क्रमेण व्याचष्टे। साध्वसाधिति। तत्त्वकथनेऽपीति। अर्चा हि यत्राविद्यमानस्यापि धर्मस्य पूजनीयत्वद्योतनाय बोधनन्तत्र भवतीति भावः। निपुणार्थमिति। अत एव मूले अचार्याङ्किम्। निपुणो राज्ञो भृत्य इत्येवोपात्तम्। इतोऽग्रे अर्हाणामित्येतद्व्याख्यानानन्तरभाष्यीयक्रमानुरोधेन व्याख्यानमुचितम्। मूलकारानुरोधेन तु व्याचष्टे। निमित्तादितीति। फलं सप्तम्यर्थ इति। अनिर्दिष्टार्थ इतिन्यायादिति भावः। तल्लाभेच्छाधीनत्वादिति। एवञ्च फलेच्छाया उपायेच्छाप्रयोजकत्वस्य प्रसिद्धत्वाद्धननरूपोपायेच्छाप्रयोजकेच्छाविषयचर्मलाभस्यैव मुख्यफलत्वम्। चर्मणस्तु लाभकर्मत्वात्फलत्वमुपचरितम्बोध्यम्। चर्मणि हीपिनं हन्तीत्यादिभाष्योदाहरणादिति भावः। स्वरूपसन्नेव निमित्तमिति। न तु तस्य शाब्दबोधविषयत्वपर्यन्तमाग्रह इति शेषः। कर्मयोग इत्यत्र योगपदं सम्बन्धवाचि स च सम्बन्धः संयोगसमवायान्यतरात्मकस्तदभिप्रायेणाह। हीपिचर्मणोरित्यादि। अण्डकोशमृगयोरिति। यद्यपि मृगशब्दस्याल्पात्तरत्वेन्तथापि सीम्नि पुष्कलको हत इति भाष्ये येन क्रमेणोपादानङ्कृतन्तेनैव क्रमेण व्याख्यानमुचितमित्यभिप्रायेण पूर्वनिपातप्रकरणं समुद्राभ्राद्र इति सौत्रनिर्देशेनानित्यमतो वैपरीत्येन व्याख्यातम्। मुक्ताफलाये-

त्यत्र चतुर्थ्या असाधुत्वभ्रमनिवारणायाह। मुक्ताफलायेति। यस्य च भावेनेत्यत्र भावपदार्थविशेषणतया यस्येत्यस्योपादानाल्लक्षकक्रियासम्बन्धिवाचकगवादिशब्दादेव सप्तमी प्रकृतसूत्रेण विधीयत इतिभ्रमनिरासायाह। ज्ञापकक्रियाश्रयवाचकादिति। क्रियापदस्य धात्वर्थप्रतिपादकतया फलव्यापारयोश्च धात्वर्थत्वादाह। कर्त्ता कर्म चेति। अत्र कर्म कर्त्ता चेतिवक्तव्ये कर्तृशब्दस्य प्रथममुपादानं कर्मसंज्ञाविधायकसूत्रे कर्तृशब्दस्य प्रथमोपादानाभिप्रायेण। क्रियायाः परस्परं ज्ञाप्यज्ञापकभावः प्रकृतसूत्रस्य प्रवृत्तौ नियामकः। तत्र निर्ज्ञातकाला क्रियाऽनिर्ज्ञातकालक्रियाया ज्ञापिका अत्र कालो न वर्त्तमान एव विवक्षितः किन्तु भूतभविष्यतोरपि सम्भवति घटकत्वमित्याशयेन तत्तत्कालस्थले सूत्रप्रवृत्तिन्दर्शयति। तत्र का चित्क्रियेति। तत्र ज्ञापकक्रियासु। ज्ञापकत्वमिति। न च सप्तम्यर्थज्ञापकत्वे क्तदन्तार्थविशेषणतापन्नक्रियाया एकविशेषणत्वे नोपस्थितस्यान्यत्र विशेषणतयाऽन्वययोग इतिव्युत्पत्तिविरोधाद्विशेषणतयाऽन्वयो न सम्भवतीति वाच्यम्। प्रकृत्यर्थस्य क्रियाविशिष्टक्तदन्तार्थस्याधेयतयाऽन्वयस्वीकारात्। विशेष्ये ज्ञापकत्वबाधेऽपि विशेषणे पर्यवसानम्। स्वर्गी ध्वस्त इति यथा। तस्य च ज्ञापकत्वस्य स्वनिरूपितज्ञाप्यत्वसम्बन्धेन गतशब्दार्थघटकगमनक्रियायामन्वयः। वस्तुतस्तु क्रिययोर्ज्ञाप्यज्ञापकभावः सूत्रप्रवृत्त्या पदस्य साधुतायामुपयुज्यते। सप्तम्यास्तु ज्ञापकत्वेनाभिप्रेता क्रियैवार्थः। तस्याश्च समानकालिकत्वं ज्ञाप्यक्रियायां सम्बन्धो गोषु दुह्यमानासु गत इत्यादौ वर्त्तमानार्थकक्तत्वसमभिव्याहारे। एवञ्च दुह्यमानगोवृत्तिदोहनसमानकालिकगमनकर्त्तेति शाब्दबोधः। यत्र भविष्यदर्थकक्तत्वसमभिव्याहारस्तत्र गोषु धोक्ष्यमाणास्वित्यादौ सप्तम्यर्थदोहनक्रियायाः प्राक्कालिकत्वसम्बन्धेन ज्ञाप्यगमनक्रियायामन्वयः। यत्र तु भूतार्थकः क्तस्तत्र गोषु दुग्धास्वित्यादौ सप्तम्यर्थदोहनक्रियाया उत्तरकालिकत्वसम्बन्धेन गमनक्रियायामन्वय इत्यूह्यम्। अस्मिन् पक्षे च ज्ञाप्यज्ञापकभावस्य शाब्दबोधाविषयत्वे लक्ष्यलक्षणभावः शब्दबोध्य एवैतच्छास्त्रप्रवृत्तौ निमित्तमित्युत्तरग्रन्थासङ्गतिरिति तु न वाच्यम्। तस्य पूर्वोक्तपक्षाभिप्रायकत्वात्। द्वितीयपक्षे तु वस्तुतः क्रियाद्वयनिष्ठ इत्यर्थः कार्यः। ननु लक्ष्यलक्षणभावो यत्र भूयः सहचार-

दर्शनन्तत्र युक्तः । यथा वह्निधूमयोः । प्रकृते तु गमनक्रिया सकृदेव जातेति कथङ्कार्यकारणसम्बन्धघटितो ज्ञाप्यज्ञापकभाव इत्यत आह । लक्ष्यलक्षणभाव इति । मानान्तरम् । ज्ञानान्तरम् । अन्यथा । भूयः सहचारदर्शनसहकारेण यत्र ज्ञाप्यज्ञापकभावप्रतीतिस्तत्रैवैतत्सूत्रप्रवृत्तिस्वीकारे । मानान्तरेण । प्रमाणान्तरेण । ज्ञातस्वरूपस्यार्थस्य । ज्ञातं स्वरूपं यस्य तादृस्यार्थस्य क्रियाद्वयस्य । यथा गोदोहनसमनोजन्यस्मृतिविषयः । पुरुषविशेषे गमनन्तु तद्देशाधिकरणस्थितिकर्तृत्वाभावेनानुमितम् । भाष्यस्वरसादिति । नावश्यन्तदेव लक्षणभवति येन पुनःपुनर्लक्ष्यते । सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणभवतीतिभाष्यस्वरसादित्यर्थः । निमित्तत्वाय परिच्छेद्यपरिच्छेदकभावनिमित्तत्वायेत्यर्थः । स च परिच्छेद्यपरिच्छेदकभावः क्रियाद्वारा कालयोः फलति । क्वचित्तु निर्ज्ञातदेशक्रिया अनिर्ज्ञातदेशविशेषक्रियाया लक्षणभवति । यथा द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इत्यादौ च । अत्र सतीत्यस्याध्याहारः । सत्त्वादित्यत्र तु सतीत्यनन्तरं सत इत्यस्याध्याहारो विवक्षितः । नन्वेवं राङ्परागी स्नायादित्यत्र ज्ञापकक्रियावाचकपदाभावात्कथमेतत्सूत्रप्रवृत्तिरत आह । राङ्परागत इत्यादि । अधिकरणसप्तम्यै वेति । यद्यत्र राङ्परागी सति स्नायादित्येवं क्रियावाचकपदाध्याहारेण यस्य च भावेनेतिसप्तमीत्युच्यते तदा राङ्परागसत्त्वस्नानयोर्लक्ष्यलक्षणभावस्य समानकालिकत्वस्य वा लाभेऽपि राङ्परागसत्त्वस्य स्माननिमित्तत्वालाभः । इष्टापत्तिस्तु न । स्माननिमित्तत्वाभावे सति आलस्यादिना शक्तेन स्नानाद्यकरणे प्रायश्चित्तविधेरनुपपत्तेः । अधिकरणसप्तम्यान्तु राङ्परागकालत्वावच्छेदेन स्नानस्य विधानेन राङ्परागस्य निमित्तत्वम्फलति । यणादेशेऽच इवेति भावः । तथैवाह । विवाह इति । लक्षणाया उदाहरणान्तरमप्याह । गवामिति । मानान्तरसिद्धस्य कालदेशविशेषज्ञापनाय यत्र प्रयोगस्तत्रैव यस्य चेतिसप्तमीस्वीकारेणैतेषु स्नानादीनामेतैरेव विधानेन तत्सूत्राप्राप्तेः । राङ्परागादीनान्निर्ज्ञातदेशकालत्वाभावाच्चेति तदाह । अन्यत्र विस्तर इति । अर्हाणाम् । भाष्ये यद्यप्यत्र कारकार्हाणाञ्च कारकत्वे । कारकार्हाणाञ्च कारकत्वे सप्तमी वक्तव्या । अकारकार्हाणा-

स्वाकारके सप्तमीवक्तव्या । ऋद्धेषु भुज्यानेषु दरिद्रा आसते । ब्राह्मणेषु तरत्सु वृषला आसते इति । तद्विपर्यासे च सप्तमी वक्तव्या ऋद्धेषु आसीनेषु भूर्खा भुञ्जते । ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति इत्युक्तम् । कारकशब्दोऽत्र भावप्रधानः । कारकत्वमर्हन्ति ते कारकार्हा इत्यर्थः । तथापि प्रत्यासत्त्या अर्हता कारकत्वस्यैव लभ्यत इत्याशयेन कारकशब्दः परित्यक्तः । अत्रार्हत्वमनर्हत्वं वा नभिन्नक्रियामादाय किन्त्वेकक्रियामादायैव । अन्यथा सर्वेषामेव यत्किञ्चित्क्रियाकर्तृत्वार्हतयाऽनर्हाणामप्रसिद्धिः स्यात् । अर्हाणामिति वचनस्य फलान्तरमप्याह । यद्यपीत्यादि । षष्ठी चानादर इति सूत्रे यस्य च भावेनेत्याद्यनुवृत्तौ यादृशो वाक्यार्थस्तमाह । अनादरे गम्यमान इति । षष्ठी तात्पर्येति । इदमुपलक्षणम् । सप्तम्यपि तत्त्वे तात्पर्यग्राहिका । वैशिष्ट्यञ्च समानकर्तृकत्वस्योत्तरकालिकत्वोभयसम्बन्धेन । पर्यायान्तरेति । प्रभृतेरित्यर्थः । समुदायविशेषणत्वे र्थासङ्गतिपरिहारायाह । गवादिकस्येति । गवां गोषु वा दायाद इत्यत्रेत्यादिः । स्वामिपर्याय इति । अस्यात्रेत्यादिः । एतेन पृथिव्या दायादो राजेति प्रयोगापत्तिनिरासः । नन्वासेवापदादत्तरमर्यादया तात्पर्यस्य न लाभ इत्यत आह । आसेवापदस्येति । तदेकपरता । तत्रात्रसाध्यकप्रवृत्तिमत्त्वम् । अधिकरणत्वविवक्षयेति । वैषयिकाधारत्वविवक्षयेत्यर्थः । अत्र । आयुक्तशब्दयोगे । वचनमिति । षष्ठ्यर्थं सप्तम्यर्थञ्च वचनमित्यर्थः । यतश्च निर्द्धारणमितिसूत्राद्यथाश्रुताद्यस्मात्समुदायान्निर्द्धारणम् पृथक्करणन्ताद्दृश्यसमुदायघटकावृत्तिधर्मवत्त्वबोधनं यत्र तत्र तादृशसमुदायवाचकप्रातिपदिकात् षष्ठीसप्तम्यावित्यर्थः प्रतीयते परन्त्वयत्र युक्तः । नराणां क्षत्रियः शूर इत्यत्र नृशब्दस्य समुदायवाचकत्वाभावादनुपपत्तिरतः सूत्रार्थ उक्तो मूले जातिगुणक्रियासंज्ञादिभिरिति । एवमपि जात्यादिभिरेव पृथक्करणमिति भ्रान्तिर्भवतीत्यत आह । विशिष्टस्येत्यध्याहार इति । एवमपि जात्यादिविशिष्टस्य यतो निर्द्धारणमिति भ्रमः स्यादतः पूरणेन व्याचष्टे । एकदेशस्येति । एतेन तादृशसमुदायवृत्तिधर्माश्रयस्य लाभः । यथा नराणां क्षत्रियः शूर इत्यत्र नृसमुदायवृत्तिनरत्वाश्रयस्य क्षत्रियस्य जातिविशिष्टस्य लाभः । समुदायवृत्तित्वञ्च समुदायत्वाश्रयवृत्तित्वमेव न तु समुदायत्वपर्याप्त्यधिक

रणपर्याप्तत्वम्। क्षत्रियत्वस्य तथात्वासम्भवात्। न हि नृत्वं समुदायत्वपर्याप्त धिकरणे समुदाये पर्याप्तम्। तस्य प्रत्येकपर्याप्तत्वात्। एवञ्च प्रकृते नृशब्दो नृसमुदायबोधकतया तादृशसमुदाये वर्त्तमानं यत्समुदायत्वं स्वरूपसम्बन्धेन तादृशसमुदायत्वाश्रयक्षत्रियस्य तादृशसमुदायत्वाश्रयवृत्तिनृत्वावच्छिन्नस्य लाभः। क्षत्रियपदार्थश्चैकदेशः। स्वघटितसमुदायात्। नृसमुदायात्। स्वेतरसमुदायघटकेति। स च ब्राह्मणादिः। स्वमेकदेशो जात्यादिविशिष्टः। स्वेतरेत्यस्य समुदायघटकेत्यन्वयः। तस्य च व्याहृत्तौ तादृशसमुदायघटकावृत्तिर्धर्मः शूरत्वन्तत्करणकम्पृथक्करणञ्च क्षत्रियस्य शूरत्वाश्रयत्वबोधनमेवेति नृशब्दादत्र षष्ठ्यनुपपत्तिः। यद्यपि तद्धर्माश्रयत्वबोधनस्य तद्धर्मप्रकारकबोधानुकूलव्यापाररूपतया तस्य धर्मस्य कर्मत्वं सम्भवति। तथापि तद्धर्मवत्त्वबोधने तस्य धर्मस्य करणत्वविवक्षयैवं लेखः। एवञ्च जात्यादिविशिष्टस्य यद्धर्मावच्छिन्नस्य तादृशजात्यादिशून्यतद्धर्मावच्छिन्नावृत्तिविधेयवत्त्वबोधनं यत्र तत्र तद्धर्मावच्छिन्नवाचकप्रातिपदिकात् षष्ठीसप्तम्यौ भवत इति सूत्रार्थः पर्यवसन्नः। यथा क्षत्रियत्वविशिष्टस्य नरत्वावच्छिन्नस्य क्षत्रियत्वशून्यनरत्वावच्छिन्नब्राह्मणावृत्तिशूरत्ववत्त्वबोधनन्नराणां क्षत्रियः शूर इत्यत्रास्तीति भवति नृशब्दाद्विभक्तिः। यत इत्यस्याभावे यस्य जातिविशिष्टस्येत्यस्य लाभः स्यात्तदा क्षत्रियपदादेव षष्ठी स्यादित्याशयेनाह। यतः किमित्यादि। ननु क्षत्रियपदात्प्रथमा परत्वात्स्यादत आह। षष्ठ्यपवादत्ववदिति। अत एव। निरुक्तस्य विभक्त्यर्थत्वादेव। नृणामिति बहुवचनोपपत्तये आह। उद्भूतावयवेति। यद्धर्मावच्छिन्नस्येत्युपादानान्नराणां व्याघ्रः शूर इति न किन्तु नरेभ्यो व्याघ्रः शूर इत्येव। तादृशजात्यादिशून्येत्युपादानाद्विधेयतया विवक्षितस्य शूरत्वस्य नरत्वावच्छिन्नावृत्तित्ववाधेऽपि न क्षतिः। तद्धर्मावच्छिन्नावृत्तित्वमपरित्यज्य तादृशजात्यादिशून्यत्वकिञ्चिदवृत्तित्वनिवेशे नराणां क्षत्रियो गौर इत्यपि स्यात्। गौरत्वस्य क्षत्रियत्वशून्यशूद्रावृत्तित्वात्। तादृशजात्यादिशून्यसामान्यावृत्तित्वनिवेशेऽस्य प्रयोगस्यापत्तिनिरासेऽपि नराणां क्षत्रियः शूर इत्यत्रैवानुपपत्तिः। शूरत्वस्य विधेयस्य क्षत्रियत्वशून्यसामान्यान्तर्गतराजसादिवृत्तित्वेन क्षत्रियत्वशून्यसामान्यावृत्तित्वबाधादतस्तद्धर्मावच्छिन्नावृत्तित्वनिवेशः। ननु निर्द्धारणस्य यत्रेदि

नैकवचनन्तदा गीतावाक्यस्य का गतिरत आह । द्वन्द्व इत्यादि । पञ्चमी वि । अस्मिन्सूत्रे अनुवर्त्तमानन्निर्द्धारणपदमवृत्तिधर्मप्रकारकज्ञानविषयत्वपरमेव । एतद्घटकाभावप्रतियोगिवृत्तित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नस्य निरूपितत्वसम्बन्धेनान्वयो निर्द्धारणस्य च स्वरूपसम्बन्धेन भेदाश्रये विशेषणत्वम् । भेदश्च प्रकृत्यर्थतावच्छेदकानाश्रयत्वमेवात्र पारिभाषिको विभक्तग्रहणसामर्थ्यान्न त्वन्योन्याभावः एवञ्च यस्मिन्निति तदाह । तत्र निर्द्धारण इति । पाटलिपुत्रकावधिकेति । अवधित्वमत्र निरूपकत्वमेव संसर्गघटकतया भासते । एवं सति यादृशो वाक्यार्थबोधस्तमाह । पाटलिपुत्रकावधिकेति । चितयोपादान इति । निरुक्तनिर्द्धारणनिरूपकवाचकस्य तदाश्रयवाचकस्य निरुक्तनिर्द्धारणप्रयोजकधर्मवाचकस्य च यच्चोपादानं शब्देनोच्चारितेन प्रतीतिस्तच्चैतत्सूचनिष्पन्नपञ्चम्यन्तस्य साधुत्वमिति फलितम् । यत्र तु सांकाश्यकानाम्पाटलिपुत्रकाणाञ्च पाटलिपुत्रका अभिरूपतमा इति प्रयुज्यते तत्र निर्द्धार्यमाणेषु पाटलिपुत्रकेषु न भेद एव चशब्दार्थैकबुद्धिविषयत्वरूपसाहित्याश्रयत्वेनाभेदस्यापि सत्त्वात् सा बुद्धिश्च पूर्वकालिकी सांकाश्यकाश्च पाटलिपुत्रकाश्चाभिरूपा इत्याकारा ग्राह्येति न तत्र पञ्चमी । ननु पुरुषोत्तम इत्यत्र पुरुषाणामुत्तम इत्यर्थः प्रतीयते एवञ्चात्र पूर्वसूत्रेण षष्ठी वाच्या तथा च न निर्द्धारण इति सूत्रेण समासनिषेधापत्तिरत आह । सम्बन्धसामान्य इति । तथा च न ननिर्द्धारण इति सूत्रप्राप्तिरिति भावः । कैयट इति । अत्रारुचिर्बीजन्तु पुरुषोत्तम इत्यत्र षष्ठीसमाससत्त्वे हि तदुक्तरीत्या पुरुषोत्तमपदस्य साधुत्वङ् कल्पनीयम् । स एव तु न । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति वाक्यात्कर्मधारयस्यैव प्रतीतेः । न चोत्तमपदस्य पूर्वनिपातापत्तिः । राजदन्तादित्वात्पूर्वनिपातप्रकरणस्यानित्यत्वाद्वा । अर्चतेश्चेति । अर्चतेस्त्वित्यर्थः । गणपाठे प्रत्यादिगणपाठाभावादाह । लक्षण इति । न च साधुशब्दोपादानमत्र विफलम् साध्वसाधुप्रयोगे चेत्येव सिद्धत्वादिति वाच्यम् । अर्चायाम्यत्यादियोगे निषेधार्थमस्योपादानात् । प्रसितोत्सुकाभ्याम् । प्रसितशब्दोऽत्रासक्तपरो न तु प्रकर्षेण सित इत्यर्थकः । तत्परे प्रसितासक्त इतिकोशात् । लुप्शब्दस्याभावबोधकतया नञ्चवाचकस्य तस्मिन्नर्थे न वृत्तिरत आह । लुप्शब्देनेति । अधिकरण इति किमिति । म-

ण्डूकप्लुत्याऽधिकरणशब्दानुवृत्तिः किमर्थेत्यर्थः । अनुवृत्त्यभावे सर्वविभक्त्यपवादत्वमस्य स्यात् । अनिर्दिष्टा इतिन्यायात् । अन्तरङ्गत्वात् । इतरानपेक्षत्वेनान्तरङ्गत्वादित्यर्थः । द्विवचनान्तेन समास इति । अन्यथा सूत्रस्यैवैतस्यानुपपत्तिः स्यादिति भावः । अभेदैकत्वसङ्ख्याया वृत्तौ भानानुरोधेनाह । बोधस्त्विति । कारकस्य द्रव्यरूपतया तन्मध्यत्वमनुपपन्नमित्यभिप्रायेणाह । ननु कर्तृरूपस्येति । शक्तिरेव कारकमिति । अत्र कारकपदेन विवक्षितेत्यर्थः धर्मधर्मिणोरभेदादिति भावः । क्रियाभेदेन । भिन्नभिन्नकालोत्पन्नक्रियाभेदेन । तदाधारकालग्रहणादिति । लक्षणया शक्त्याधारकालग्रहणादित्यर्थः । अत्र कालाध्वनोर्विभक्त्योश्च न यथासङ्ख्यमस्वरितत्वात् । कर्त्तरि क्तप्रत्ययान्तेति । अधिकमिति सूत्रेण कर्त्तरि क्तप्रत्यये कनि उत्तरपदलोपे च सिद्धो यस्तेन योग इत्यर्थः । षष्ठ्यामिति । निरूपितत्वार्थकषष्ठ्यामित्यर्थः । ज्ञापकादिति । उक्तसूत्रद्वयनिर्दिष्टरूपज्ञापकादित्यर्थः । ननु सप्तम्यधिकरणे चेतिसूत्रेण सप्तमी क्रियायोगाभानादिति भावः । इदमनध्याहारपक्षेऽध्याहारे त्वधिकरणसप्तम्येव तदाह । तदस्मिन्नेति । यस्य कर्मार्थकाध्यारूढशब्दात्कनि कृते उत्तरपदलोपे च सिद्धोऽधिकशब्दस्तद्योगी त्वाह । कर्मणीति । अधिकमितिसूत्रेण तन्त्रेणोभयोरप्यधिकशब्दयोर्निपातवादिति भावः । अधिकमितिसूत्रे भाष्ये स्पष्टमेतत् । उपशब्दस्य कर्मप्रवचनीयत्वमुपपादयति । उपोऽधिक इति । परार्द्धादधिकेत्यत्र पूर्वोक्तज्ञापकादेव पञ्चमी । मूले पर्य्यायेणेति । यदि यस्य चेश्वरवचनमित्यत्र यच्छब्दः स्ववाचीश्वरशब्दस्तु धर्मिपर एव तदा यस्य स्वस्येश्वर उच्यते तद्वाचकात्सप्तमीत्यर्थो यदा तु यच्छब्दः स्वामिपर ईश्वरशब्दश्च भावप्रधानत्वेनेश्वरत्वपरस्तदा यस्य स्वामिन ईश्वरत्वमुच्यते तद्वाचकात्सप्तमीत्यर्थे स्वामिवाचकात्सप्तमीत्यर्थः । उभयत्राप्यधिरीश्वर इति कर्मप्रवचनीयसंज्ञा । इयञ्च सप्तमी विशेषणवाचकादेव । षष्ठ्यपवादत्वात् । विशेष्यवाचकात्तु प्रातिपदिकार्थे प्रथमैव । अधिभुवोरित्यस्माद् भूमि निरूपितस्वामित्ववानिति बोधः । अधिराम इत्येतस्मात्तु, रामनिरूपितस्वत्ववती भूरितिबोध इति भावः । अधिकशब्दस्य शौण्डादिगणे पाठफलमाह । सप्तमी शौण्डैरितीति । यदा तु विभक्त्यर्थेऽव्ययीभावस्तदा त्वधिरामभूरिति प्रयोगः । ईश्वरेऽर्थ इति । ग-

म्यमान इत्यर्थः । तदुपपादयति । विनियोक्तुरिति । ननु मामित्यत्र कर्मणि द्वितीयेतिसूत्रेणैव द्वितीया भविष्यति किङ्कर्मप्रवचनीयसंज्ञयेत्याशयेन शङ्कते । नन्विति । अत्रेति । यदत्र मामधिकरिष्यतीत्यत्रेत्यर्थः । उदात्तत्वस्वमिति । विकरणेभ्यो नियमस्य बलत्त्वेन करिष्यतीत्यत्र तिङि कृते विकरणे च कृते उदात्तत्वस्वमिति । सर्वेष्टसिद्धिरिति । सर्वेषामिष्टानान्निघातवारणकर्मप्रवचनीयसंज्ञासाफल्योदात्तश्रवणरूपाणामित्यर्थः । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानीति भाष्यकारोक्तेर्मङ्गलस्यावश्यकत्वाभिप्रायेणाच सिद्धिशब्दोपादानम् । मूलेऽप्यधिरीश्वर इतिसूत्रादीश्वरइति विभाषा कृञीति सूत्रेऽनुवर्त्ततेऽतस्तज्ज्ञानेनेश्वरस्मरणरूपमङ्गलं सर्वेषाञ्चवलित्यभिप्रायेण प्रकरणान्तेऽस्य सूत्रस्योपन्यास इति शिवम् ॥

॥ इति सप्तमीविवरणम् ॥

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलप्रसारिविमलतरानवद्यसद्यशःपार्वणपीयूषभान्वगस्त्यकुलवंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायाञ्चन्द्रकलायाङ्गारकान्तशब्देन्दुशेखरव्याख्यानं समाप्तम् ॥

अङ्कर्षिसिद्धीन्दु१८७७मिते वत्सरे विजयाह्वये ।
माघे मास्यसिते पक्षे नवम्याम्भानुवासरे ॥
शब्देन्दुशेखरस्येयङ्गारकान्तस्य या कृता ।
सार्पिता तु शिवे तेन सर्वज्ञः सर्वदावऽतु ॥
॥ श्रीमत्सीतारामचन्द्राभ्यान्नमः ॥

॥ शुभमस्तु ॥

॥ श्रीः ॥


चन्द्रकलायाः

अर्थात्

अगाधमेधश्रीभैरवमिश्रसंकलितायाः शब्देन्दुशेखर व्याख्यायाः

द्वितीयः खण्डः ।

ग्रन्थकर्तुः प्रपौत्रेण श्रीपण्डितगणेशदत्त-
शर्ममिश्रेण ग्रन्थकर्तृहस्तलिखितपु-
स्तकमवेक्ष्य संशोध्य संस्कृत्य र-
सिकजनसौलभ्याय द्विवेदपं-
डितरामनाथशर्मद्वारा



काशिककाशिकायन्त्रालये मुद्रयित्वा प्रकाशितः ।

सं० १९४४ भा० शु० १४

॥ श्रीगणेशाय नमः ॥

श्रीमत्सीतारामचन्द्राभ्यान्नमः ।

अथाव्ययीभावः

सीतया सहितं रामं वन्देहं रघुनन्दनम् ॥
महर्षिभिर्वसिष्ठाद्यैर्वीरैर्हनुमदादिभिः ॥ १ ॥
युतं सिंहासने रत्नमये संस्थितमव्ययम् ॥
यद्ध्यानादखिलां सिद्धिं लभन्ते परमाभुवि ॥ २ ॥
प्रणम्य पितरम्मिश्रभवदेवाभिधं गुरुम् ॥
सीताञ्च जननीं कुर्वे समासादौ यथा मति ॥ ३ ॥
व्याख्यां मिश्रहितामेतामभ्यस्यन्तु कवयो मयि ॥
कृपया परया तेषु विज्ञप्तोऽयम्मयाञ्जलिः ॥ ४ ॥
आसीद्दृषिवरः श्रीमानगस्त्यः कुम्भसम्भवः ॥
येनैकचुलुकेनैव पीतो जलनिधिर्महान् ॥ ५ ॥
अशरण्या दुराधर्षा आताप्यादिभिरन्विता ॥
दक्षिणा दिक् कृता येन शरण्या पुण्यकर्मणा ॥ ६ ॥
स्फीते तस्य कुले जातो जगदीशस्तदात्मजः ॥
वन्दिमिश्र इतिख्यातो यस्येयं कुलसन्ततिः ॥ ७ ॥
श्रीभवानीवरेणाखिलोके विख्यातिमागता ॥
तदात्मजो लक्ष्मणो भूद्द्वितीयस्तदात्मजः ॥ ८ ॥
भवदेवाभिधः श्रीमान् विद्वद्वर उदारधीः ॥
यत्कीर्त्तिचन्द्रज्योत्स्नाभिर्व्याप्तम्भूमण्डलमाहत् ॥ ९ ॥
तत्सूनुर्भैरवः काश्याञ्जातो मिश्रोपनामकः ॥
नत्वा सरस्वतीन्देवीं क्रियते तेन सङ्ग्रहः ॥ १० ॥

कारकान्तेन सुप्संज्ञोद्देश्यसम्बन्धिनीं संज्ञान्तप्रयुक्तकार्यञ्च निरूप्य तत्प्रसङ्गात्समासनिरूपणमारभते । समर्थः पद इति । कर्मसाधन इति । भावसाधनत्वे पदानामिति कर्मषष्ठ्यन्तेन वक्ष्यमाणविधानस्य पदकर्मकत्वाभावेन समासानुपपत्तिः समर्थपदसामानाधिकरण्यञ्च नोपपद्यत इति भावः । शेषषष्ठ्या समास इति । योग्यत्वात् । कर्मणि षष्ठी तु न विधीयमानस्य वक्ष्यमाणस्य पदकर्मकत्वविरहात् । ननु पदोद्देश्यकत्वम्पदसंज्ञायोग्यसमुदायस्य तादृशसमुदायाद्वा यत्क्रियते तस्य सम्भवति न तु सन्नन्तविषय इत्यत आह । पदविधिसहचरित इति । अत एव । पदविधिसहचरितस्य पदविधिसब्देन ग्रहणादेवा सन्नन्तादावेकेति । एतस्य पदविधिसहचरितत्वन्तु पदोद्देश्येन विधीयमानक्यच्प्रत्ययविधायकशास्त्रे सन्विधायकसूत्रस्थस्येच्छायामित्यस्यानुवृत्त्या पदोद्देश्यकविधिविधायकशास्त्रसम्बन्धशब्दबोधप्रयोजकपदघटितवाक्यविधेयत्वेन बोध्यम् । ननु सन्नन्तादावेकार्थीभावे किम्प्रमाणमिति चेत् । सन्सूत्रस्थभाष्यस्यैव मानत्वात् । तथाहि । धातोरिति किमर्थम् । प्राकर्त्तुमैच्छत् । प्राचिकीर्षत् । सोपसर्गान्मा भूत् । संघातेन विशिष्टा क्रिया प्रतिपाद्यते इति ततः सन् प्राप्नोति ततश्च संघातादेर्द्विर्वचनादिप्रसङ्गः । यद्यपि लङन्तेऽपि दोषस्तथाप्युपसर्गात्पूर्वमडागमशक्तिमदर्शयितुमत्र लङन्तप्रयोगः । ततो वार्त्तिककार आह । कर्मग्रहणात्सन्विधौ धातुग्रहणानर्थक्यम् । कर्मणः समानकर्तृकादिच्छायां वा सन्भवतीत्येव धातोरुत्पत्तिर्भविष्यति अचोपसर्गसमभिव्याहारादिशिष्टा क्रिया प्रतीयते कर्मत्वन्तु विशेष्यमाश्रयेति भावः । ततो भाष्यकार आह। सोपसर्गं वै कर्म तत उत्पत्तिः प्राप्नोति । सोपसर्गङ्कर्मेति चेत् कर्मविशेषकत्वादुपसर्गस्यानुपसर्गङ्कर्मेति । सोपसर्गस्य कर्मत्वे धात्वधिकारेऽपि सनो विधानमकर्मत्वात् । यदि संघातस्य कर्मत्वमर्थद्वारा स्वीक्रियते तदावयवस्याऽकर्मत्वात्तद्वाचकात्सन्प्रत्ययो न स्यात् । अतः केवलधात्वर्थस्य कर्मत्वं वाच्यमिति नेदन्धातुग्रहणस्य प्रयोजनम् । इदन्तर्हि प्रयोजनम् । सुबन्तादुत्पत्तिर्मा भूत् । अत्र कैयटः । विकल्पितत्वात्सनः पक्षे सावकाशाः क्यजादय इति भावः । ततो भाष्यकार आह । सुबन्ताच्चाप्रसङ्गः क्यजादीनामपवादत्वात् । सुबन्ताच्च सनोऽप्रसङ्गः किङ्कारणम् । क्यजादीनामपवादत्वात् । सुबन्तात्क्यजादयो वि-

धीयमाने तेऽपवादत्वाद्बाधका भविष्यन्ति। ततोऽग्रे धातुग्रहणस्य प्रयोजनमुच्यताम्। अङ्गपरिमाणार्थन्धातुग्रहणङ्कर्त्तव्यम्। अन्यथा सोपसर्गात्स्यात्। अपि च धातोर्विहितः प्रत्ययः शेष आर्द्धधातुकसंज्ञो भवतीति सन आर्द्धधातुकसंज्ञापि सिद्धा भवति। यच्चोक्तं सोपसर्गस्य कर्मत्वे धात्वधिकारेऽपि सनो विधानमकर्मत्वादिति। नैष दोषः। कर्मण इति नैषा धातुसमानाधिकरणा षष्ठी किन्तर्हि अवयवयोगे एषा षष्ठी कर्मणो यो धातुरवयव इति। ततः केवलादुत्पत्तिर्विकीर्षतीत्यत्र न प्राप्नोतीत्याशङ्क्य व्यपदेशिवद्भावेन साधयित्वा कामन्तर्ह्यनेनैव हेतुना क्यजपि कर्त्तव्यः। महान्तमुच्चमिच्छतीति कर्मणो यत्सुबन्तमवयव इति। न कर्त्तव्यः असामर्थ्यान्न भविष्यति। कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। अत्र कैयटः सुबन्तात्क्याच्विधानात्पदविधित्वात्समर्थपरिभाषोपस्थानादिति भावः। अत्रैव यद्यप्येतद्भाष्यव्याख्यानावसरे कैयटेनोक्तम् सन्विधौ तु तदनुपस्थानात्सापेक्षादपि सन उत्पत्तिरिति। तथापि वावचनानर्थक्यञ्चेत्युत्तरभाष्यपर्यालोचनया सन्विधावपि समर्थपरिभाषोपस्थितिरित्यभिप्रायेण स एवाह। अथ वा धातुरेव विशिष्टाङ् क्रियामाह उपसर्गस्तु द्योतक इति सापेक्षत्वाभाव इति। तथाहि। वावचनानर्थक्यन्तत्र नित्यत्वात्सनः। वावचनञ्चानर्थकम्। किङ्कारणम्। तत्र नित्यत्वात्सनः। इह हौ पचौ इत्तिपक्षश्चाइत्तिपक्षश्च। स्वभावतश्चैतद्भवति वाक्यञ्च प्रत्ययश्च। तत्र स्वाभाविके इत्तिविषये नित्ये प्रत्ययेप्राप्ते वावचनेन किमन्यच्छक्यमभिसम्बन्धुम्। अन्यदतः संज्ञायाः। न च संज्ञाया भावाभावाविष्येते। तस्मान्नार्थो वावचनेनेति। अत्र कैयटः इत्तेरेकार्थीभावविषयत्वाद्यापेक्षाविषयत्वाच्च वाक्यस्य भिन्नार्थत्वाद्बाध्यबाधकभावाप्रसङ्गादिति भावः। न च संज्ञाया इति। अनर्थः प्रत्युत वाग्रहणाद्भवति। प्रत्ययसंज्ञाया विकल्पे सति तन्निबन्धनकार्यविकल्पप्रसङ्गादिति। अत्र यद्यपि सनः पदविधित्वाभावात्समर्थपरिभाषानुपस्थितौ कथमस्यैकार्थीभावविषयत्वमिति शङ्का भवति। तथापि एतद्भाष्यप्रामाण्यादस्याप्येकार्थीभावविषयत्वम्। अधिकमन्यत्र स्पष्टम्। ननु विधीयमानसमासंज्ञाया न समर्थत्वमत आह। पदविधित्वेत्यादि। सूत्रे समर्थशब्दो लाक्षणिक इति भावः। व्याख्यानादिति। अत्रैव सूत्रे भाष्ये उ-

क्तमेकार्थीभावः सामर्थ्यम्परिभाषा चेतितन्मूलकादित्यर्थः । तस्याः। व्यपेक्षायाः । अभावादिति । अस्याः स्वीकारे तु विशेषणान्वयादिदोषः स्यादिति भावः । अत्रेदमवधेयम् । सनाद्यन्ते यद्यप्येकार्थीभावाद्विशेषणसापेक्षत्वे सनादयो न भवन्ति । अत एव महान्तम्पुत्रमिच्छतीत्यत्र क्यचमाश्रित्य सापेक्षमसमर्थम्भवतीति सन्सूत्रे उक्तम् । तत्तु ल्यन्न्यायेन समानाधिकरणविशेषणसापेक्षत्वे स्रोकम्यक्रुमिच्छतीत्यत्र वाक्यमेव न तु सन् । यत्र तु व्यधिकरणं विशेषणन्तत्र भवत्येव ओदनम्यक्रुमिच्छति । ओदनम्पिपक्षति । गमकत्वस्य सापेक्षस्थले वृत्तिप्रयोजकतया तस्यापि सत्त्वात् । अत एव ललितविग्रहे तीरे सेतुमिषा चिकीर्षतीति प्रयोगो दृश्यते । प्रधानस्य सापेक्षत्वे तु सामानाधिकरण्येपि वृत्तिर्भवत्येव । उपमितमितिसूत्रे सामान्याप्रयोगग्रहणात् । गमकत्वस्य तत्र सत्त्वाच्चेति । तत्रैकार्थीभावपदार्थन्निर्वक्ति । स च विशेष्येति । यद्यपि वाक्यस्याप्यर्थो विशेष्यविशेषणभावोऽस्ति । अत एव क्षुत्तृड्भितेतिसूत्रे समासग्रहणस्य वाक्यस्यार्थवतः प्रातिपदिकसंज्ञावारकनियमपरतया वर्णनं सङ्गच्छते । तथापि तत्र वाक्यार्थानाम् पृथग्भूतत्वम् । वृत्तौ त्वपृथग्भूतत्वमिति विशेषः । एवञ्च विशेष्येत्यस्यापृथग्भूतानामर्थानामित्यादिर्बोध्यः । यथा पङ्के पांसूदकयोः सङ्गावेऽपि तयोरन्यतरविषयकप्रतीतेर्नान्यतराविषयकत्वन्तथेहापि । पांसूदकमेलने पिण्डाख्यमतिरिक्तं वस्तु प्रतीयते तथेहापि संसृष्टमेव प्रतीयते । न चैवं वृत्तिविग्रहयोः समानार्थकत्वव्यवहारस्य कथमुपपत्तिरिति वाच्यम् । रेखागवयन्यायमाश्रित्य शास्त्रनिष्पन्नेन वाक्येन यथा तस्मिन्मृत्पिण्डे पांसूदक इति व्यवहारस्तद्वदत्रापि पूर्वपदार्थत्वोत्तरपदार्थत्वव्यवहारेण समानार्थकत्वव्यवहारस्योपपत्तेः । अत एव । एकार्थीभावस्वीकारादेव । एकार्थीभावस्वीकारस्य प्रयोजनान्तरमाह । एवमिति । विशेषणपद इति तदर्थत्वेन कल्पितेऽर्थे इत्यर्थः । पृथगुपस्थितेः । इतरपदार्थनिरूपितविषयित्वानवच्छिन्नस्वार्थविषयिताश्रयोपस्थितेः । गमकत्वस्यैव वृत्तिप्रयोजकत्वे साधकान्तरमाह । गमकत्वादेवेति । गमकत्वञ्च वाक्यजन्यशाब्दबोधीयपरस्परनिरूप्यनिरूपकभावापन्नविषयतावैलक्षण्यविषयताकशाब्दबुद्धित्वावच्छिन्नजनकत्वे सतितावदर्थविषयशाब्दबोधजनकत्वम् । तत्र वृत्तिरेवेति । तादृशमसमुदायस्य त-

त्सूत्रभाष्ये पाठात्। तथोपस्थितिरिति। विशिष्टार्थोपस्थितिरित्यर्थः। समुदायेति। इत्योत्लक्षसमुदायेत्यर्थः। समुदायशक्तिग्रहश्च राजपुरुषादिपदं राजसम्बन्धविशिष्टपुरुषादौ शक्तमित्यादिरीत्या भवति सा यदा प्रत्येकपदशक्तिग्रहस्तदैव नान्यदेत्याशयेनाह। एवञ्चेति। प्राचाम्मतङ् खण्डयति। जहदिति। महाबाहुरिति। आत्महतइत्यात्वस्यार्थवन्महच्छब्दसम्बन्धितया जहत्स्वार्थत्वेऽन्वयानुपपत्तेः। ननु समानाधिकरणे उत्तरपदे परे तस्यात्त्वविधायकत्वात्स्वार्थस्य त्यागे पूर्वस्य पदस्य सर्वत्रैवानर्थकतया सूत्रमेव व्यर्थमिति तत्सामर्थ्यादनर्थकत्वेऽपि भविष्यतीत्यत आह। सुपन्था इति। पथिमथ्यृभिवित्यस्य केवलेऽचरितार्थत्वादिति भावः। ननु भूतपूर्वगत्योक्तसूत्रद्वयस्यापि निर्वाह इत्यत आह। भूतेति। तत्रैव। रथन्तरशालिपर्णीगौरखरेन्द्रयवेन्द्रगोपादौ। एतेषु रूढेः प्रतिबन्धकत्वाज्जहत्स्वार्थतैव। रूढेः प्रतिबन्धकत्वञ्च समुदायशक्तिज्ञानेन विलक्षणार्थविषयकशाब्दबोधे जननीयेऽवयवशक्तिज्ञानस्य सहकारित्वाकल्पनमेव। न तु मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वकल्पनौरवात्। एतेषु समुदायावयवेषु आरोपितार्थवत्वमादाय साधुत्वम्। राजपुरुषाद्यवयवेषु त्वारोपो वक्तुमशक्यः। प्रसिद्धार्थबाधाभावात्। किञ्च जहत्स्वार्थत्वादिव्यवहारः पूर्वपदमादायैव। तच्चैकार्थीभावोपपत्तये शास्त्रकृत्कल्पितमेव। अत एव यदि जहत्स्वार्था पुरुषमात्रस्यानयनमाप्नोतीति भाष्येऽभिहितम्। परिभाषेयमिति। लाघवात्। न त्वधिकारः प्रतियोगमुपस्थितिकल्पने गौरवात्। पदविधिशब्दोपादानस्य व्यर्थत्वापत्तेश्च। परिभाषात्वस्वीकारे तु पदविधिरितिलिङ्गमिति यस्तत्रोपतिष्ठत इत्यस्याध्याहारेण यः पदविधिस्तत्र समर्थ इत्युपतिष्ठत इत्यर्थकल्पनसम्भवादिति भावः। तत्र विशेषमाह। सा चेति। एकार्थीभाववविषये विशेषमाह। एकार्थीभावश्चेति। कल्पत इति। अत एव द्वितीयाश्रितेत्यादौ समर्थप्रकृतिकेन सुबन्तेनेत्यर्थकल्पना भवति। तत्र। अलौकिके कल्पिते विग्रहवाक्ये। अत्र। लटोऽप्रथमासामानाधिकरण्यानुमानस्थले। तर्क इति। व्यभिचारादिशङ्कानिवर्त्तकस्तर्क इत्यर्थः। लट्। अप्रथमासमानाधिकरणः। अप्रथमासमानाधिकरणादेशोद्देश्यत्वात्। यद्ययमप्रथमासमानाधिकरणो न स्यात्तदा तादृशानुवादविषयो न स्यादिति। असामर्थ्य-

मिति । यदर्थबोधकविग्रहवाक्यजन्यशाब्दबोधे परस्परमर्थानां सम्बन्धो भासते तत्र कल्पितेऽलौकिकविग्रहवाक्ये एकार्थीभावस्य कल्पनेति भावः । क्वचित्तु सामर्थ्याभावेऽपि समासो भवति । असूर्यंपश्यानि मुखानि किमोदनः शालीनाम् । सक्काढकमापणीयानामित्यादौ शिष्टप्रयोगात् । समाससंज्ञकमिति । प्राक् समाससंज्ञकमित्यर्थः । प्राक्कडारादित्यत्र प्राग्ग्रहणाच्चाक्समास इत्यधिकारस्तेन वक्ष्यमाणसंज्ञाभिः समावेशः । समासशब्दस्य संज्ञात्वन्तु आकडारसूत्रे समाससंज्ञेतिभाष्यकारीयव्यवहाराल्लभ्यते । समासः इत्यत्र कर्मणि घञ् । सम्यूवंकास्यतेः संज्ञेषोऽर्थ इत्यन्वर्थेयं संज्ञा । ननु प्राग्ग्रहणस्यावधिनिर्देशार्थत्वात्समावेशो वक्ष्यमाणसंज्ञाभिर्न भविष्यति किन्तु पर्याय इत्यत आह । प्राक्कडारादित्यत्रेति । अत्र । विभक्तौ सुपा इत्येतत्पदस्यार्थेऽनुवर्त्तमानसुप्पदार्थे च । तत्फलमाह । तेन महिष्या इत्यादि । न चायं षष्ठीत्यस्य सूत्रस्य विषय इति षष्ठीत्वेकत्वविवक्षायाः फलमिति वक्तव्यमतोऽत्रास्योपादानमफलमिति वाच्यम् । अस्योपलक्षणत्वात् । अत एव वार्त्तिककृता गतिमता तिङा गतेः समास उक्तो न तु गतिसमुदायस्य तिङेति। कैयटादय इत्यनेन सूचितामरुचिमप्रकाशयति । परे त्विति । अनुवाद्यत्वादिति । अनेनाविवक्षाया हेतुरुक्तः । अहं सम्पार्ष्टीत्यत्रैव । एवञ्च । जातिविवक्षायाञ्च । प्रत्येकसमाप्तत्वे नेति । अत एव मतुप्सूत्रभाष्ये आकृतौ शास्त्राणि प्रवर्त्तन्ते आकृतिश्च प्रत्येकम्परिसमाप्यते । यावति चैतत्परिसमाप्यते प्रातिपदिकादिति सुप्सुपेति च तावत उपपत्त्या भवितव्यन्द्वयोश्चैतत्समाप्यते न बहुष्वित्युक्तं सङ्गच्छते । सुबन्तत्वस्य जातित्वेपीदमेव भाष्यभानम् । सुबन्तादीत्यादिना प्रातिपदिकत्वपरिग्रहः । तेन मतुप्सूत्रस्थभाष्यस्य सङ्गतिः । तत्र हि अथेह कस्मान्न भवति चित्रा गावो यस्य सन्तीति । कुतः कस्मान्न भवति । किमवयवाद्दाहोस्वित्समुदायात् । अवयवात्कस्मान्न भवति । असामर्थ्यात्क्वयमसामर्थ्यम् । सापेक्षमसमर्थं भवति । समुदायात्तर्हि कस्मान्न भवति । अप्रातिपदिकत्वात् । ननु च भोः आकृतौ शास्त्राणि प्रवर्त्तन्ते । तद्यथा सुप्सुपेति वर्त्तमानेऽन्यस्यान्यस्य च समासो भवति । सत्यमेतत् । आकृतिस्तु प्रत्येकम्परिसमाप्यते प्रातिपदिकादिति तावत उत्पत्त्या भवितव्यम् । अ-

वयवे चैतत्परिसमाप्यते । न समुदाये इति । अस्मिन्नतुप्सूत्रस्थभाष्ये प्रातिपदिकशब्दस्य जातिशब्दत्वमित्यभिप्रायेणाकृतिस्तु प्रत्येकम्परिसमाप्यत इत्युक्तत्वेन त्रयीशब्दानाम्प्रवृत्तिरिति पक्ष एव स्वीकृतः । अत एव । आकृतेः प्रत्येकपरिसमाप्तत्वादेव । विभक्तित्वमपि प्रत्येकसमाप्तमेव भविष्यतीति भावः । यद्यपि वैयाकरणसिद्धान्तेऽनुवाद्यविशेषणन्न सर्वत्राविवक्षितम् । आर्द्धधातुकस्येडितिसूत्रे वलादिरूपस्यानुवाद्यविशेषणस्य विवक्षितत्वात् । तथापि भाष्योक्तरीत्या दोषपरिहारे सिद्धे भाष्यानुक्तसङ्ख्याविवक्षया दोषपरिहारस्यानुक्तत्वमित्यभिप्रायः । युगपत्समास इति । न तु क्रमेणेति शेषः । साधकाभावात् । क्रमास्वीकारेपि व्यचलदित्यनेनानोः समाससंज्ञास्वीकारादुदात्तवतेतिवार्त्तिकस्योपपत्तिरिति भावः । इदमिति । सुपतिसूत्रमित्यर्थः । अन्ये । अधिकारत्वे । देवः करोतीति । अत्र प्रथमान्तार्थस्याख्यातार्थमति विशेषणत्वादस्तिविशेषणसमासप्राप्तिः । अङ्गनिमित्तस्येति । धातुप्रातिपदिकयोर्भेदेनोपादानमकृत्वाऽङ्गस्य सुप इत्येव सूत्रमस्त्विति भावः । अङ्गनिमित्तस्येत्यस्याङ्गसंज्ञानिमित्तस्येत्यर्थः कार्यः । यत्रानेन लुगिष्यते तत्र प्रथमं सुपोऽनेन सूत्रेण लुकि प्रत्ययलक्षणेन सुबन्तत्वप्रयुक्तङ्कार्यमिति भावः । परन्त्विदं व्याख्यानमसङ्गतम् । राजानमित्यादौ सुपो लुकि प्रत्ययलक्षणेन पदत्वान्न लोपादीनामापत्तेः । किञ्चामि पूर्वः टाङसीत्याद्यनेकसूत्रविषयेऽनुपपत्तिः । अत एवोक्तं भ्रमवारणायेति । न चाङ्गस्येति षष्ठी न निमित्तनिमित्तिभावात्मकसम्बन्धे किन्तु अवयवावयविभावात्मकसम्बन्धे । एवञ्चाङ्गावयवस्य सुप इत्यर्थो भविष्यतीति वाच्यम् ! परमदत्तस्यापत्यम्यारमदत्तिरितीष्यते तस्यासिद्धापत्तेः । तथाहि । परम सु दत्त सु इति स्थिते परिनिष्ठितविभक्त्या समासपक्षे परम ङस् दत्त ङस इति वा स्थिते समुदायस्य समाससंज्ञायामपि सुपो लुगर्थं समुदायाद्विभक्त्युत्पत्तौ ततः समुदायस्याङ्गसंज्ञायां सुपो लुक्यपि श्रूयमाणषष्ठ्या अकारान्तप्रकृतिकसुप्तविरहेणञ्प्रत्ययो नोपपद्यत इति । किञ्च बहुपटव इत्यत्र विभाषा सुप इति बहुचि जसोऽङ्गावयवत्वाभावेन जसो लुगभावापत्तौ चित इत्यन्तोदात्तत्वं जस एव स्यात् । ननु प्रत्ययग्रहणपरिभाषया बहुपटु जसित्यस्य प्रत्ययान्तत्वाभावेन तस्य प्रातिपदिकसंज्ञायां

समुदायाञ्जसि तस्मिन्पूर्वस्याङ्गत्वं तदवयवस्य पूर्वजसो लुकि पटुशब्दोकारस्योदात्तत्वमविष्यतीति चेत्। तथापि सुगौरित्यत्र पूर्ववत्सु सु गो सु इतिसमुदायाक्षौ पूर्वकालस्थितयोः सुशब्दयोर्लुकि श्रूयमाणसोगौशब्दाद्विहितत्वाभावेन णिदङ्गावानापत्तेः। विहितविशेषणाश्रयणन्तु हे भानव इत्यत्र णिदङ्गाववारणायावश्यकम्। तस्मिन्सूत्रे गकारस्याविवक्षितत्वात्। न च हे भानव इत्यत्र पञ्चमीसमासेनाचः परस्मिन्नितिसूत्रेण स्थानिवद्भावोऽभावातिदेशस्यापि सत्त्वाङ्गविष्यतीति ओकारात्पर इत्यर्थेपि न दोष इति वाच्यम्। एवं सति हे भानो इत्यादावपि पञ्चमीसमासेन स्थानिवद्भावे सति सम्बुद्धिलोपानापत्तेः। न च तत्र भावातिदेशस्यापि सत्वेन ह्रस्वान्तात्परत्वात्सम्बुद्धिलोप इति वाच्यम्। तथा सति हे हरे इत्यादौ ह्रस्वान्तात्परत्वादेव लोपे सिद्धे एङ्ग्रहणवैयर्थ्यमिति भावातिदेशस्य तत्राप्रवृत्तिस्वीकारात्। यदि त्वेषु सम्बुद्धिलोपार्थं पूर्वस्मादव्यवहितात्परस्येत्यर्थ आश्रीयते तदा भानव इत्यत्र णिदङ्गावोपि वारयितुमशक्य एवेति प्राचीनमते सुगौरित्यत्र णिदङ्गाभावस्याभावापत्तिः सुपोऽङ्गस्येति न्यासे दुर्वारैव। परे खित्यादिना प्रागुक्तो लक्षणप्रतिपदोक्तपरिभाषया हे भानव इत्यत्र णिदङ्गावस्य वारणे पद्यपि विहितविशेषणानाश्रयणात्सु गौरित्यत्र न दोषस्तथापि परमसर्वस्मै इत्यत्र दोष एव। पूर्ववद्विभक्तेः सर्वनाम्नो विधानाभावेन सर्वनाम्नः स्मै इति ग्राख्याप्राप्तेः। न च सुपोऽङ्गस्येति न्यासे वर्णाश्रमेतराणामित्यादौ सर्वनाम्न आमो विधानाभावेन सुडप्राप्तेरिन्द्वे चेतिसूत्रवैयर्थ्यमिति वाच्यम्। समुदायगतकुत्सावविवक्षायामकज्भ्यादित्यर्थन्तस्यावश्यकत्वात्। न च सुड्विधौ विहितविशेषणाश्रयणवैयर्थ्यमिति शङ्क्यम्। इन्द्व इति सप्तम्याः प्रथमार्थत्वसिद्धान्तात्समुदायस्य वर्णाश्रमेतराणामित्यत्र सर्वनामत्वनिषेधेऽप्यवयवस्य सर्वनामत्वात्सु डापत्तेः। न चेतरेतरयोगद्वन्द्वेष्वनूतावयवभेदस्य समूहस्य प्राधान्यमिति सिद्धान्ताद्द्वन्द्वावयवस्य वर्णाश्रमेतराणामित्यत्रेतरशब्दस्योपसर्जनत्वान्न सुट्प्राप्तिरिति विहितविशेषणवैयर्थ्यमिति वाच्यम्। मासपूर्वाणां वर्षपराणामित्यत्र समुदायस्य तृतीयासमास इतिप्रतिषेधेऽप्यवयवस्य सर्वनामत्वात्सु डापत्तेर्दुर्वारत्वात्॥ यदि त्वङ्गस्येत्यनेनैकवाक्यतयाऽवर्णान्तसर्वनामसंज्ञकाङ्गात्परस्याम इत्यर्थेन प्रत्या-

सख्या शाम्निरूपिताङ्गस्याश्रयणान्मासपूर्वाणामित्यादौ न दोष इति विभाव्यते तदा सुड्विधायकसूत्रे विहितविशेषणाभावेन परमसर्वेषामित्यादौ सुपोऽङ्गस्येतिन्यासे दोषाभावेपि सुकुलमित्यादौ दोषः स्यादेव । अत्र हि सुः सु कुल सु सु इति स्थिते प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात्सुपोऽङ्गस्येतिसूत्रमबाधित्वा पूर्वं स्वमोर्नपुंसकादिति द्वितीयस्य सोर्लुकि प्रत्ययलक्षणेनाङ्गत्वाद्विशिष्टावयवयोर्द्वयोरपि सुपोरनेन लुकि स्यानिनोऽभावेनातोऽसित्यस्याप्रवृत्तौ रूपासिद्धिः स्फुटैव ॥ ननु समर्थस्य सुप इति न्यासोऽस्तु सामर्थ्यं चैकार्थीभाव एवाश्रीयते । तादृशसामर्थ्यविशिष्टावयवस्य सुप इत्यर्थो भविष्यतीति सुकुलमित्यत्रापि विभक्त्युत्पत्तेः प्राक् सुपो लुकि ततः सुकुलशब्दात्सावतोमित्यमादेशे रूपसिद्धिर्भविष्यतीति चेन्न । त्वयकेत्योद्यवयवस्य लुगापत्तेः । कुत्सितइतिसूत्रभाष्योक्तरीत्या कुत्सादिभिः सुबन्तस्यैवैकार्थीभावात् । किमोदनः शालीनामसूर्यम्पश्यानि मुखानीत्यादावसमर्थसमासे लुगनापत्तेश्च । न चासूर्यम्पश्यानीत्यत्रालुगेवास्त्विति वाच्यम् । उत्तरपदे खिति सुम्विधानस्य परन्तप इत्यादौ चरितार्थेपि किमोदनः शालीनोम् । सक्त्याढकमापणीयानामश्नाभोजी ब्राह्मण इत्याद्यसिद्ध्यापत्तेः । एतेन सुपो वृत्तेरित्येव न्यासोऽस्त्विति परास्तम् । त्वयकेत्यादेर्मूलकेनोपदंशमित्यादेश्चासिद्ध्यापत्तेरिति दिक् । अन्यथेति ॥ भूतपूर्व इतिनिर्देशस्याश्रयणाभाव इत्यर्थः । अनियमः स्यादिति । न चोभयोः प्रथमानिर्दिष्टत्वाविशेषेऽपि पूर्वशब्दस्य पूर्वकालावच्छिन्नपरतया तस्य भवनकर्तृविशेषणत्वेनोपसर्जनसंज्ञाया अन्वर्थतया पूर्वशब्दस्यैवनियमेन पूर्वनिपातः स्यादिति कथमनियमवर्णनमिति वाच्यम् । उपसर्जनसंज्ञाया अन्वर्थत्वेऽपि वक्ष्यमाणरीत्या पूर्वकायादिसिद्धये समासशास्त्रस्यप्रथमानिर्दिष्टशब्दगतस्याप्राधान्यस्यैवाश्रयणमावश्यकमिति तादृशाप्राधान्यस्यप्रकृतेन सम्भव इत्यभिप्रायेणानियमकथनात् । न च तथापि पर्यायेणोभयोः पूर्वनिपातेऽपि भूतपूर्वे चरडिति निर्देशोपपत्तेः कथन्तेन निर्देशेन नियमसिद्धिरिति वाच्यम् ॥ उपसर्जनम्पूर्वमितिसूत्रस्य प्रतिलक्ष्यम्भेदेन प्रकृतोदाहरणविषयेऽपि तस्य पृथग्भूतस्य कल्पनया तस्मिन् वाक्ये यदुपसर्जनपदन्तस्य लौकिकोपसर्जनत्वबोधकता भविष्यति तथा च पूर्वशब्दस्यैव पूर्वनिपातः स्यादतस्त-

स्य निर्देशस्य नियामकत्वमावश्यकमित्यभिप्रायात्। ननु पूर्वशब्दस्य भूतशब्दार्थैकदेशभवनक्रियाविशेषणतया सुबन्तार्थविशेष्यानन्वयित्वेन कथमत्र समासप्राप्तिरत आह। अत एवेति। अस्मादेवेत्यर्थः। एवमेवान्यत्राप्याह। विस्पष्टेति। इवेनेतिवचनेन मातेवेत्यस्य साधुत्वमिति कस्य चिदुक्तिङ् खण्डयति। हरीतकीमित्यादिना। न चैवञ्चैत्र इव मैत्रो गच्छतीत्यादावपि चैत्र इत्यादेरिवार्थेऽन्वयात्प्रथमा न स्यादिति वाच्यम्। एतादृशे स्थले चैत्रादेर्मैत्रादावभेदान्वय एव। इवशब्दस्तात्पर्यग्राहक इति स्वीकारात्। हरीतकीमित्यत्र त्वेवं वक्तुमशक्यम्। मात्पदाद्द्वितीयापत्तेरिति दिक्। इदञ्च वार्त्तिककृताप्राप्तसमाससंज्ञाविधायकङ्किन्तु सुपेतियोगविभागसिद्धसमासानुवादेन विभक्त्यलोपविधायकम्। सहेतिसूत्रभाष्ये एव इवेन समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्चेत्यस्य पाठात्। अत एवाह कैयटः। सुपेत्यस्य लक्षणत्वात्समासे सिद्धे कार्यान्तरविधानार्थं वचनमिति। वाससी इव। कन्येइवेत्युदाहरणम्। वासःशब्दो वस्तेर्णिदित्वसुग्प्रत्ययान्तत्वादाद्युदात्तः। समासादुत्पन्नस्य सुपः अव्ययादिति लुक्। कन्याशब्दस्तु। कन्याराजन्यमनुष्याणामन्त इतिफिट्सूत्रेणान्तस्वरितः। एतेन वार्त्तिकेन समासविधानन्नापूर्वमिति ध्वनयति। एतद्योगेति। नन्वत्र सुपेतिसूत्रसिद्धसमासस्य वैकल्पिकतया एतदभावे यथार्थत्वप्रयुक्तसमासो दुर्वार इतीवशब्दस्य पूर्वनिपातोऽपि स्यादत आह। अत्र यथार्थत्वादीति। ननु तत्र तस्येवेतिनिर्देशेनेवशब्देन यथार्थत्वप्रयुक्तस्य समासस्याभावकल्पनेऽपि मणीवोष्ट्रस्य लम्बन्त इत्यस्य भारतप्रयोगस्य कथमुपपत्तिः। वशब्दस्यापीवार्थकत्वादिष्टापत्तिस्तु कर्त्तुमशक्या। वशब्दस्य पूर्वनिपातप्रसङ्गादिति चेन्न। तेन निर्देशेन यथार्थत्वप्रयुक्तसमासस्य क्वाचित्कत्वस्वीकारात्। साक्षाच्छास्त्रबाधकल्पनापेक्षया क्वाचित्कत्वरूपधर्मकल्पनाया अगुरुत्वात्। अत्र विभक्त्यलोपश्चेत्यनेन यदिभक्त्यन्तस्य इवेन समासः प्रत्यासत्त्या तस्या एवालुग्विधानमिति बोध्यम्। निर्दिष्टपदञ्च व्यर्थमिति। समासे प्रथमेत्येव वाच्यम्। प्रथमापदस्य प्रथमान्तपरतया समासघटकस्योपसर्जनसंज्ञा भविष्यतीति भावः। समासपदस्य समासत्वावच्छिन्नयावत्समासबोधकत्वाभिप्रायेण शङ्कते। न चेति। तदर्थकतया। अप्रधानार्थकया। अप्रधानत्वसामानाधिकरण्यं

वांचतासंबन्धेन । यम्प्रति । यदर्थम्प्रति । यदप्रधानम् । यदप्रधानीभूतार्थस्य प्रतिपादकम् । तं प्रति तं शब्दम्प्रति । तदुपसर्जनम् । तच्छब्दस्वरूपमुपसर्जनसंज्ञम् । एवञ्चोपसर्जनम्पूर्वमित्यस्य यदर्थोपसर्जनीभूतार्थप्रतिपादकं यत्तत्तदपेक्षया पूर्वम्प्रयोज्यमित्यर्थेन न कुमारीशब्दस्य पूर्वनिपात इति भावः । एवम् । अर्थगताप्राधान्यघटितार्थकरणे । समाधत्ते । समासेत्यादि । यम्प्रतीत्यस्य यं शब्दम्प्रतीत्येवार्थो न तु यदर्थम्प्रतीत्यर्थः कार्यः । इदं शब्दगतमप्राधान्यमपि लौकिकमेव तदुपपादयति । भवतीत्यादिना । एवमन्यत्र । पूर्वापराधरोत्तरमितिसूत्रे । न चैवम्भूतपूर्वे चरडितिनिर्देशादितिपूर्वग्रन्थासङ्गतिरेवेति वाच्यम् । तत्र लक्ष्यानुरोधेन लौकिकस्य द्विविधस्याप्राधान्यस्याश्रयणात् । अत एव । शब्दगतस्यैतादृशप्राधान्यस्याभिप्रेतत्वादेव । ननु बहुव्रीहिसंज्ञाविधायकशास्त्रे तृतीयान्तपदोपादानाभावान्निरुक्तमप्राधान्यन्तत्र नोपपद्यत इत्यत आह । बहुव्रीहौ त्वेकेति । अर्थगतलौकिकाप्राधान्याभिप्रायेण व्यवस्थामुपपादयताग्रतमाह । यत्तु अर्थगताप्राधान्य इति । तत्सामर्थ्येति । प्रथमानिर्दिष्टसामर्थ्येत्यर्थः । नन्वन्यविभक्त्युच्चारणमेव तर्ह्यस्त्वित्यत आह । प्राथम्यादिति । किञ्च पूर्वोक्तरीत्या सकलव्यवस्थासिद्धौ सामर्थ्यपर्यन्तानुसरणक्लेशो वृथा तदाह । अलमिति । समभ्या विपरिणम्यत इति । वृक्षे शाखेतिवदत्र समभी एवञ्च समभ्यर्थौ च घटकत्वम् । प्रथमानिर्दिष्टपदबोध्यत्वेऽपि प्रत्यासत्त्यैवेतादृशदोषोऽपि वारयितुं शक्य इत्याशयेनाह । षष्ठ्यन्तयोरिति । अर्थस्य प्रधानस्य । षष्ठ्यानिष्ठत्वमर्थः । सम्बन्धाभावे चास्यान्वयः । सम्बन्धाभावश्च प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । एवञ्च येन सुबन्तेन षष्ठ्यन्तं संश्लिष्यते तत्सुबन्तार्थानुयोगिकसम्बन्धप्रतियोगिवाचकमेव षष्ठ्यन्तं गृह्यत इतीह कुमार्या इति षष्ठ्यन्तं कुमार्या इत्यनेन सुबन्तेन समासविधौ षष्ठीपदेन न गृह्यते किन्तु राज्ञ इत्येवेति तस्यैव पूर्वनिपात इति भावः । सम्बन्ध्यर्थकम् तदर्थनिरूपितसम्बन्धप्रवृत्तिनिमित्तकम् ॥ न भिद्यते । अप्रधानत्वरूपभेदवान्न भवति । एतदेव स्पष्टयतीत्यर्थं विवृणोति । राजापेक्षया न व्यतिरिच्यत इति ॥ व्यतिरेकोऽत्र भेदमूलकसम्बन्धः । एवञ्च पुरुषः प्रधानभूतो राजपदार्थनिरूपितभेदनिबन्धनसम्बन्धवान्न भवति । विशेष्यवाचकपदाप्रयोगेऽपि राज्ञ

इत्युक्ते राज्ञि विशेषणत्वावगतौ विशेषणतानियामकसम्बन्धाकाङ्क्षा भवति पुरुष इत्युक्ते पुरुषे स्वार्थनिरूपितप्राधान्यस्य भानेपि न संबन्धाकाङ्क्षेति विशेषणताया एव सम्बन्धावच्छिन्नत्वनियम इति विशेषणनिष्ठ एव सम्बन्धः । सम्बन्धस्य विशेषणनिष्ठत्वञ्च प्रतियोगितासम्बन्धेन । पुरुषे तदभावश्च प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताको बोध्यः । इत्युक्तमेवेति । अर्थगतस्याप्रधानत्वरूपोपसर्जनत्वस्याश्रयणे पूर्वकायाद्यसिद्धिरित्यनेनोक्तमित्यर्थः ॥ यत्तु प्रथमानिर्दिष्टं समास उपसर्जनमिति संज्ञासूत्रञ्च कार्यम् । किन्तु प्रथमानिर्दिष्टं समासे पूर्वमिति पूर्वनिपातप्रकरणे पठनीयम् । न चोपसर्जनसंज्ञासूत्राभावे गोस्त्रियोरित्यस्य ह्रस्वविधायकसूत्रस्य कथमुपपत्तिरिति वाच्यम् । लौकिकस्याप्रधानार्थकत्वस्य तत्र ग्रहणात् । न चैवं कुमारीमिच्छन् कुमारीवाचरन् ब्राह्मणः कुमारीत्यत्र ह्रस्वापत्तिरिति वाच्यम् । ह्रस्वविधायकसूत्रे समासस्येत्यस्यापि पाठात् । तेन समास एव ह्रस्वो भविष्यतीति ॥ तन्न । राज्ञः कुमार्या इत्यत्र परिनिष्ठितविभक्त्या समासपक्षे षष्ठीतिपदेन कुमार्या इत्यस्यापि ग्रहणसम्भवेन तस्य पूर्वनिपातापत्तेः । उपसर्जनसंज्ञासूत्रसत्त्वे तूक्तरीत्या प्रत्यासत्तिलाभेन दोषस्य परिहारः सम्भवति । किञ्च ह्रस्वविधायकसूत्रे लौकिकोपसर्जनत्वस्याश्रयणे ब्राह्मणी चासौ धूर्ता च ब्राह्मणधूर्त्ता । गार्गी चासौ बन्धारिका चेत्यर्थे गार्ग्यबन्धारिका इतीष्यते तत्रोत्तरपदस्य ह्रस्वत्वापत्तिः । समासस्य लौकिकोपसर्जनान्तत्वात् । शाङ्गीयस्य तस्य भवत्यतेऽभाव एव । न चास्तु परपदस्यापि ह्रस्वस्तथापि समुदायाद्यापि क्ते रूपसिद्धिर्भविष्यतीति वाच्यम् । गोवध्क्यणी । काठप्रवक्त्री इत्यादावुत्तरपदे ह्रस्वत्वापत्तेर्दुर्वारत्वात् । उपसर्जनसंज्ञासूत्रसत्त्वे तु प्रकृतौ तादृशोपसर्जनत्वाभावेन न दोषः । एतेन प्रथमानिर्दिष्टं समासे पूर्वमिति न्यासेपि येन सुबन्तेन समासविधौ यत्प्रथमानिर्दिष्टत्तत्तत्समासे पूर्वमयोक्तव्यमित्यर्थेन षष्ठीति समासविधौ षष्ठ्यन्तस्य येन सुबन्तेन समासस्तदर्थानुयोगिकसम्बन्धप्रतियोगिवाचकमेव षष्ठीति पदेन गृह्यते तथा च राज्ञः कुमार्या इत्यर्थकसमासे न कुमारीशब्दस्य पूर्वनिपात इत्यपास्तम् ॥ एकग्रहणादिति । अवधारणगर्भसमासानाश्रयणे एकैव विभक्तिरेकस्मात्पा-

तियदिकादित्येकशब्दोपादानं व्यर्थमेव स्यादिति भावः । एकपदस्यैकजातीयपरम् । तेनैकवचनद्विवचनादिभेदेननानाविभक्तिसम्भवेऽपि न क्षतिः । इदमेव । एकविभक्तीतिसूत्रमेव । तुल्यार्थेतिसूत्रे भाष्य इति । तत्र हि परमेण कारकेणेत्यर्थे परमकारकेणेतिसमासे पूर्वपदप्रकृतिस्वरप्राप्तिमाशङ्क्य लक्षणप्रतिपदोक्तपरिभाषया वारणङ्कृतम् । अनेकमितिसूत्रभाष्य इति । तत्र हि शेषपदसम्बन्धेन प्रथमान्तानामेव समास उक्तः ॥ अत्र विग्रहे यन्नियतविभक्तिकमित्युक्त्या विग्रहघटकपदान्तरापेक्षया नियतविभक्तिकमित्यर्थो लभ्यते स न युक्त इत्यभिप्रायेण सिद्धान्तार्थमाह । परे त्विति । प्रत्यासत्त्येति । विग्रहे नियतविभक्तिकमित्युक्तौ समासस्य नियमेनोपस्थितेः । अनेन । एकविभक्तीत्यनेन । नन्वनेकग्रहणाभावे कथम्बहूनाम्बहुव्रीहिसमास इत्यत आह । बहूनामिति । ननूत्तरपदनिमित्तकद्विगुविधानमुत्तरपदेन परिमाणिनेतिवचनविषये चरितार्थमत आह । एवञ्चेति । ननु ज्ञापकेन बहूनां समासश्चेद्राज्ञः कुमार्याश्च धनमित्यर्थे राजकुमारीधनमितिप्रयोगापत्तिरत आह । अतिप्रसङ्ग इति । उपसर्जनार्थमिति । प्रथमानिर्दिष्टमित्युपसर्जनसंज्ञासिद्ध्यर्थमित्यर्थः । न वेति । इदं खण्डनमपि वार्तिककारकृतम् । भाष्यकारस्तु तत्तर्हि वक्तव्यं न वक्तव्यमितिशब्देन प्रत्याचष्टे ॥ एकविभक्तित्वादिति । चित्रा यस्य गावः सन्ति स चित्रगुः सतिष्ठतितम्प्रच्छतेन कृतमितिरीत्या प्रथमान्तेन विग्रहप्रदर्शं एकविभक्तीतिसूत्रेणोपसर्जनसंज्ञा भविष्यतीति प्रथमसूत्रेण संज्ञासिद्ध्यर्थमनेकग्रहणं न कार्यमित्यर्थः ॥ अन्वर्थत्वानुक्तेरिति । धं शब्दम्मतीत्यादिरीत्योक्तान्वर्थत्वानुक्तेरित्यर्थः । तत्खण्डनम् । प्रथमवार्तिकखण्डनम् । भाष्यरीत्येति । कुतश्चिदेव किञ्चित्पदमध्याहृत्य समासस्यानेकविभक्तिकत्वेपि प्रथमान्तेन विग्रहे राज्ञः कुमारी राजकुमारीत्यादावपि तथात्वापत्तिरितिसमासापेक्षया नियतविभक्तिकत्वमिति सिद्धान्तितन्तद्रीत्येत्यर्थः ॥ एतदिति । एकविभक्तीतिसूत्रस्य । अत्र बहुव्रीहिसंज्ञाविषये । अन्यथा समासापेक्षया नियतविभक्तिकत्वानाश्रयणे । तत्त्वम् । नियतविभक्तिकत्वम् । असुत्यक्तेरिति । न तु जातस्य निवृत्तिः । शब्दानित्यत्वप्रसङ्गात् ॥ स्मर्यत इति । अत एव गोटाङ्ग्रहण-

मिति वार्त्तिकमत्याख्यातम् ॥ अत एव स्त्रीशब्दस्य चातुर्थिकप्रत्ययमात्रपरत्वन्न तु स्त्रीशब्दपरत्वन्न वा स्त्रियां विहितेकारप्रत्ययपरत्वन्तदाह । तेनेति । तेनातिलक्ष्मीरित्यादौ न ह्रस्वः । स्त्रीशब्दस्य तादृशप्रत्ययमात्रपरत्वादेवाह । प्रत्ययग्रहणेति । ताभ्याम् । गोशब्दप्रत्ययान्तपरस्त्रीशब्दाभ्याम् । अन्यथोपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वेनातिखट्वा इत्यादौ समुदायस्य स्त्रीप्रत्ययान्तत्वविरहेऽपि स्त्रीप्रत्ययान्तान्तत्वाद्ह्रस्वसिद्धिः ॥ व्यपदेशिवद्भावेन गोकुलं राजकुमारीपुत्र इत्यत्रातिप्रसङ्गशङ्कायामाह । गोकुलमित्यादि । उक्तमेव दार्ढ्याय पुनः स्मारयति । महासंज्ञाकरणेनेति । ससम्बन्धिकत्वाच्चेति शेषः । तदन्तेत्यादि । तदन्तश्च तत्तत्समासरूपप्रातिपदिकञ्च तस्य योन्त्यस्तस्येत्यर्थः । तदन्तेत्यत्र तत्पदङ्गौस्त्रीप्रत्ययान्तपरम् ॥ एवञ्च यत्समासशास्त्रे गौस्त्रीप्रत्ययान्तयोः प्रथमानिर्दिष्टत्वं यत्समासापेक्षया एकविभक्तित्वं वा प्रत्यासत्त्या गौन्तादेस्तस्यैव समासस्य ह्रस्वत्वमित्यर्थसिद्धा गोकुलमित्यादौ न दोषस्तदाह । भाष्ये स्पष्टमिति । पूर्वोक्तार्थे समासापेक्षयेति यदुपात्तन्तत एव शङ्कते । यद्यपीति । चार्थसूत्रे भाष्य इति । तत्र ह्येवमुक्तम् । इतरेतरयोगे । प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यते एतत् प्लक्षोपि न्यग्रोधसहायो न्यग्रोधोऽपि प्लक्षसहाय इति । समाहारेपि क्रियते प्लक्षन्यग्रोधमिति तत्रायमप्यर्थः द्वन्द्वैकवद्भावो न पठितव्यो भवति समाहारैकत्वादेव सिद्धमिति । अत्र भाष्यकारेण सहायस्योभयत्राभिधानप्रदर्शनात्सहायस्य विशेषता दर्शिता समाहारेपि क्रियते प्लक्षन्यग्रोधमितीत्यनेन च द्वन्द्वैकवद्भावस्यापठितव्यत्वाभिधानेन तिरोहितावयवभेदता च प्रदर्शिता । अत एव । शास्त्रीयस्य निरुक्तोभयरूपस्योपसर्जनत्वस्य प्रकृतसूत्रार्थघटकत्वादेव । अत एव । शास्त्रीयस्यैव ग्रहणादेव । इङ्गोख्याइतिसूत्रे भाष्य इति । तत्र हीङ्चनस्य गोणीमात्रमिदङ् गोणिरित्यत्र प्रयोजनमुक्तम् अत्र प्रमाणे अर्थे मात्रचो लुकि गोणीशब्दस्य गोणीपरिच्छेद्ये वृत्तावपि न शास्त्रीयन्निरुक्तमुपसर्जनत्वमिति भावः । अतिराजकुमारीरित्यादाविति । अत्र हि निरुक्तं शास्त्रीयमुपसर्जनत्वं राजकुमारीशब्दस्य तस्य कथं स्त्रीप्रत्ययान्तत्वमितिशङ्कानिवारणायेदमभिहितम् । यथाकथञ्चिदुपसर्जनत्वे सति परिभाषाघटकानुपसर्जने नेतिनिषेधस्य विषय इत्यभिमानेन शङ्कते । न चेति ।

प्रत्यासत्तिमाश्रित्य समाधत्ते । यस्येति । तुना व्यवच्छेदादिति । वाक्यभेदस्य सूचनादित्यर्थः । इदम् । अपदिशमितिशब्दस्वरूपम् । तदुपन्यास इति । तस्य गोस्त्रियोरितिसूत्रस्योपन्यास इत्यर्थः । न टजिति । एतेन टचि कृते यस्येति चेतिसूत्रेणाकारस्य लोपे ह्रस्वत्वस्य प्रकृते विषय एव नास्तीति गोस्त्रियोरित्यस्य प्रकृते उपन्यासश्चिन्त्य इत्यपास्तम् । अभाव इति । हलन्तदिशशब्दस्य शरदादौ पाठात् । इदं व्याख्यानमूलोक्तदिशयोर्मध्यमितिविग्रहाभिप्रायेणेति सूचयन्नाह । अमरेति । क्लीबाव्ययन्त्वपदिशन्दिशोर्मध्यं विदिक् स्त्रियामित्यमरः । इत्यादिसङ्ग्रह इति । अस्याङ्गत्वनायाम्प्रमाणन्तु नाव्ययीभावादितिसूत्रस्थं सप्तम्या ऋद्धिनदीसमाससङ्ख्यावयवेभ्यो नित्यमिति वार्त्तिकमेव । अत्र ऋद्धिरितिपदं लुप्तसप्तम्यन्तम् । ऋद्धिरूपार्थे योऽव्ययीभावस्तस्मात् नद्यवयवः समासो नदीसमासस्तस्मात् सङ्ख्यावयवा: सङ्ख्याविशेषास्तेभ्यः परं यदुत्तरपदन्तदन्तादव्ययीभावात्सप्तम्या नित्यमभाव इत्यर्थः । विभक्तीत्यनेनेति । विभक्तिसंज्ञा यस्य प्रत्ययस्य तस्याव्ययार्थत्वन्नास्तीत्यर्थासङ्गतिपरिहाराय विभक्तिशब्दोऽत्र लाक्षणिक इति भावः । अत्र सुबन्तेनेत्यस्येति । एवञ्चाधिहरि भक्तिरितिशब्दाद्यर्थाधिकरणिका भक्तिरिति बोधो भवति । अत्राधिहरिशब्दात्पुनर्न सप्तमी किन्तु प्रथमेति स्वीकारेऽपि तादृशः शाब्दबोधो भवति सप्तम्यर्थस्यान्तर्भावात् । तदुत्तरेति । हर्यादिशब्दोत्तरेत्यर्थः । अत एव । समर्थप्रकृतिकेतिव्याख्यानादेव । अत एव । विभक्त्यर्थानन्तर्भावादेव । द्वितीयार्थस्य त्वन्तर्भावो भवत्येवेत्याह । द्वितीयान्तमिति । ननु समाससंज्ञोत्तरप्रातिकलुगपेक्षयाऽन्तरङ्गत्वादित्संज्ञायाः पूर्वम्प्राप्त्या हरि ङि अधीत्यलौकिकविग्रहप्रदर्शनमनुचितमत आह । फलाविशेष इति । केचित्तु समासेऽधिशब्दस्य पूर्वनिपातदर्शनेन तदर्थप्रदर्शकविग्रहेप्यधिशब्दस्य पूर्वम्प्रयोग एवोचित इत्यधिहरिङीतिप्रदर्शनमनुचितमित्याहुस्तन्न युक्तमिति ध्वननायाह । व्यधीरिति । वचनसामर्थ्यमुपपादयति । प्रत्यासत्त्येति । तद्विभक्त्यैव सुबन्तस्य ग्रहणे यदि प्रकृतेऽधिशब्दाभिहितत्वात्सप्तमी न स्यात्तदा समासविधानमेवानुपपन्नमिति भावः । इदं सामर्थ्याभिधानम्प्रायेणेतिप्रागुक्तरीत्या वस्तुतस्तथा नास्तीत्याह । तिङ्क्तत्तद्धितेति । अत एव । प्रागुक्तप्रत्यासत्त्यङ्गीकारादेव । अधि-

करणशक्तिप्रधानत्वेऽपीति । अनेन विभक्त्यर्थद्वत्तित्वमुपरीत्यस्याव्ययस्यास्तीति सूचितम् । गृहस्योपरीत्यत्र तु षष्ठ्यन्तेन समासप्रसङ्गस्तद्विभक्त्यर्थद्वत्तित्वमुपरीत्यस्य नास्तीति भावः । अधिहरीत्यत्र तत्पुरुषसंज्ञयाऽव्ययीभावसंज्ञाया बाधमाशङ्कते । न चेति । अस्य । अव्ययीभावस्या आधेयप्रधानस्येति । एवञ्च सप्तम्यर्थद्वत्त्यधिशब्दयोगे तस्याप्राप्तिरेवेति भावः । एतच्चेति । विधानसामर्थ्योपपादनञ्च । यद्यत्राव्ययीभावः स्यात्तदा समयानिकषाशब्दयोगे द्वितीयाया आराच्छब्दयोगे पञ्चम्या विधानाभावेऽपि तत्तद्योगे षष्ठीङ् ङ्ल्वाऽव्ययी भावसंज्ञा कार्या तावतापि रूपसिद्धिर्भविष्यतीति भावः । मध्यार्थकसमयाशब्दयोगे सामीप्यत्र प्रतीयत इति तत्र द्वितीयाविधानचरितार्थमित्यन्वयः । यदि द्वितीयापञ्चमीविधानचरितार्थन्तदा समया ग्राममित्यादौ कुतो नाव्ययीभाव इत्याशङ्कायामाह । समयेत्यादि । अधिकरणशक्तिप्रधाना इतीति । समया ग्राममित्यादेर्ग्रामस्य समीपे इत्यादिरीत्या बोधः । उपकृष्णमितिशब्दात्तु कृष्णसामीप्यवानित्याकारक एव बोधः । अब्भचेति । एवम्प्रयोगो योऽप एव भक्षयति तस्मिन्नेव जायत इति तत्र यथाऽवधारणगर्भः समासो भवति तथाऽत्रापि विभक्त्यर्थादिमात्रद्वत्त्यव्ययस्यैवानेन सूत्रेणाव्ययीभावस्य विधानमिति भावः । अत्र विभक्त्यर्थमात्रेत्युपादानाद् गृहस्योच्चैरित्यत्र नाव्ययीभावः । समृद्ध्यादिवाचकत्व इति । अत एव सुमद्रमित्यस्य मद्राणां समृद्धिरित्येवं विवरणङ्कृतमव्ययार्थस्य प्राधान्यप्रदर्शनार्थम् । द्योतक इति । द्योत्यार्थस्य विशेषणत्वम्प्रसिद्धमत एवाह । समृद्धा मद्रा इतीति । समस्यमानपदार्थाभावस्य । समस्यमानोत्तरपदार्थप्रतियोगिताकस्याभावस्य । तदेव दर्शयति । अर्थाभावेति । एवञ्च दुर्यवनमित्यादौ यवनपदार्थाभावो न प्रतीयते किन्तु तदीयत्वद्व्यभाव इति नाचार्थाभावग्रहणात्समाससिद्धिरतो व्यृद्धिग्रहणमावश्यकम् । अत एवार्थाभाव इत्यस्योदाहरणमक्षिकाणामित्यादि नोपात्तम् । व्याख्यानात् । व्यृद्धिशब्दोपादानमूलकव्याख्यानादित्यर्थः । ननु घटो न पट इत्यत्र नञा पटपदस्य समासापत्तिः पटप्रतियोगिताकाभावस्यैव प्रतीतेरत आह । नञा त्विति । नायम् । अव्ययीभावः । सूत्रगृहीतेति । अस्य तत्तदर्थबोधकपदघटकतयेत्यादिः । सूत्रगृहीतेत्यस्य सूत्रोपात्तेत्यर्थः । अभावस्य स-

प्रतियोगिकत्वनियमाभिप्रायेण शङ्कते । न चेति । प्रतियोगिभूतेति । प्रतियोगिभूतो यो बहिर्विद्यमानोऽर्थस्तत्समानाधिकरणो योऽभावस्तद्वाचकेनेत्यर्थः । प्रतियोगिसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकसम्बन्धेन यः प्रतियोगिसम्बन्धी तन्निरूपिताभावीयविशेषणतासम्बन्धावच्छिन्नवृत्तित्वरूपम् । एवञ्च पटभेदस्य प्रतियोगितावच्छेदकसम्बन्धस्तादात्म्यन्तेन सम्बन्धेन प्रतियोगिसम्बन्धिनि पटे न पटभेदस्तेन सम्बन्धेन वर्त्तत इति न निष्पट इत्यत्र समासः । मच्चिकाणामभाव इत्यत्र तु संयोगसम्बन्धावच्छिन्नाभावः प्रतीयते स चाव्याप्यवृत्तिरतस्तस्य तादृशसम्प्रतियोगिसामानाधिकरण्यमस्त्येव । तेन । प्रतियोगिनि बहिर्विद्यमानत्वनिवेशेन । अयम् । अव्ययीभावः । एवञ्च निर्घटो निष्पट इत्यादौ घटादेरत्यन्ताभावस्य तात्पर्यविषयत्वे भवत्येव । भेदस्य तथात्वे तु न भवतीति सिद्धम् । शशशृङ्गशब्दार्थस्तु न बहिर्विद्यमानः । प्रागभावार्थेन तेन । निरा । न च पटप्रागभावस्य प्रतियोगी पटस्तदधिकरणेषु तन्तुषु पटप्रागभावो वर्त्तत एव पटोत्पत्तिप्राक्क्षणावच्छेदेनेति समासापत्तिर्दुर्वारेवेति वाच्यम् । एकक्षणावच्छेद्यैकाधिकरणवृत्तित्वस्यैवात्र सामानाधिकरण्यपदार्थत्वात् । अत एव । ध्वंसस्यापि तादृशप्रतियोगिसमानाधिकरणत्वविरहादेव ॥ मूलोक्तमत्ययोदाहरणन्दूषयति । तदुदाहरणमिति । तदतिशयस्य । हिमाधिक्यस्य । युक्त्यन्तरमप्याह । अत्ययशब्दोऽतीरिति । अतिनिद्रमित्यत्र तु नास्य निषेधस्य विषयता । युजिक्रियान्तर्भावेण समासभ्युपगमेन निद्राया अत्ययो ध्वंसो न प्रतीयते किन्तु युजिक्रियायामप्राशस्त्यम् । एवं सत्यतिनिद्रमितिशब्दान्निद्राकर्तृकवर्त्तमानकालिकयुजिक्रियाऽप्रशस्तेति बोधः । वर्त्तमानकालिकत्वस्याप्राशस्त्येऽन्वयः । नन्वेवं वर्त्तमानत्वभूतत्वयोर्विरोधादतिनिद्रमासीदित्यत्राव्ययीभावसमासानुपपत्तिरत आह । अतिनिद्रमित्यादाविति । लक्षणेतीति । एवञ्चैतादृशव्यवहारविषयकर्तृकसत्त्वक्रियायाश्भूतत्वम्प्रतीयते तस्य च तादृशाभावनिष्ठवर्त्तमानत्वेन न विरोध इति भावः । सूचघटकशब्दप्रादुर्भावशब्दार्थमाह । शब्दप्रादुर्भाव इति । इतिहरीत्युदाहरणे हरिशब्दः स्वस्वरूपपरस्तेन षष्ठ्यन्तेन शब्दप्रकाशार्थकेतिशब्दस्य समासः । भाष्यप्रयोगादिति यन्मूले उद्धृतन्तस्याप्रसिद्धत्वशङ्कां वारयति । अचः परस्मिन्नितीति । इदमुपलक्षणम् । अ-

नैकमन्यपदार्थ इतिसूत्रभाष्ये सर्वपश्चादितिप्रयोगाच्चेत्यपि बोध्यम् । सति च समासे पश्चाच्छब्दस्य पूर्वनिपातः स्यात् । तत्तदर्थबोधकेति । यस्मिन्यस्मिन्नर्थे विद्यमानस्याव्ययस्य समास इष्यते तत्तदर्थबोधाभिप्रायेण सूत्रे उपात्तो यः शब्दस्तद्घटकतया गृहीतेन तत्तदर्थकेनाव्ययेन नायं समासः । अत्र तत्तदर्थकेनेत्युपादानादसम्यत्यर्थबोधाभिप्रायेण कृतस्य वृत्तिकाराद्यभिप्रेतस्यातिहिममित्यादिप्रयोगस्योपपत्तिः । एवमत्ययरूप एवार्थे वैशाखे विहिममित्यस्याप्युपपत्तिः । तत्तदर्थबोधकपदघटकत्वञ्च स्वाविषयकप्रतीत्यविषयतत्तदर्थबोधकपदकत्वम् । इदञ्च यथार्थाभावपदघटके नञि वर्त्तते तथा स्वस्मिन्नपीति पश्चाच्छब्दस्य पश्चादर्थघटकत्वम् । अत एव । तत्तदर्थबोधकपदघटकतया गृहीतेनेत्यादिकल्पनादेव । भाष्यप्रयोगादेव पश्चाच्छब्दस्य न समास इति तु न युक्तम् । उक्तसूत्रद्वयभाष्यप्रयोगस्थले तदभावकल्पना यथासादृश्य इतिसूत्रव्याख्यानस्थले स्वशोकवनिकान्यायेन यथार्थ इत्यनुक्त्वा सादृश्यसम्पत्तीत्युक्तमित्यस्य च कल्पनापेक्षया एककल्पनायामेव लाघवमिति भावः यथाशब्दस्य तु समासस्यापपत्तिमाह । यथाशब्देन लिति । इदम् । कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यकथनम् । तस्याः । वीप्सायाः । एवञ्च न वीप्सायोतनाय द्विर्वचनम् । बोद्धव्यम् । यथाऽतिक्रम्य पर्वतन्नदीत्यत्र पर्वतनद्या योगो गम्यते तथा यथाशक्त्युत्तरत्र गच्छतीत्यत्र शक्तिसद्भावकालोत्तरदेशगमनकालयोरपि योगोबुद्धिकृतो द्रष्टव्यः । वैचित्र्यार्थ इति । तदाह । यथासूत्रेष्विति । करणत्वेनान्वयात् । क्रमस्य करणत्वेनान्वयात् । युगपच्छब्देनेति । अत एव तत्र सचक्रमित्युक्तम् । एतेन युगपच्चरेत्यत्राव्ययीभाव इति कस्य चिदुक्तिः प्रत्युक्ता । व्याख्यानात् । सादृश्यशब्दोपादानमूलकात् । गुणभूते सादृश्ये इत्यस्य सादृश्य इत्यनेन कथं लाभ इत्यत आह । स्वार्थ इति । अन्यथा पूर्वपदार्थप्रधानोऽव्ययीभाव इति भाष्यादत्र सादृश्यस्य गुणत्वान्न स्यात् । चात्रम् । युक्त्यूतकर्तृत्वम् तद्योगश्चेति । अदनक्रियाया अपरित्यागेन सह योग इत्यर्थः । पर्यन्तशब्दोऽत्यर्थः । अग्निग्रन्थः पर्यन्तो यस्येत्यर्थस्तदाह । बहुव्रीहाविति । तस्मिन् कालेऽध्येयत्वेन परिगृहीतो यावान् ग्रन्थस्तस्याग्निग्रन्थेऽत्यः । न तु ततः परेणाध्ययनन्नास्तीति । अत एव सादृश्यात्पृथगुक्तिः । विग्रहसमयेऽधीत इत्यस्य कथ-

नादध्ययनक्रियायाः समासार्थेऽन्तर्भावाल्लाग्नधीत इति वाक्यानुपपत्तिरिति शङ्कावारणायाह। अधीत इत्यर्थेति। नन्वध्ययनक्रियाया अनन्तर्भावे तदधीत इत्यणप्रसङ्ग इत्यभिप्रायेण शङ्कते। न चेति। तथाशब्दस्यापि सादृश्ये वृत्त्या तेन सह समासापत्तिं वारयति। तथाशब्दस्येति। प्रतियोगिवाचकेनेति। प्रतियोगितासम्बन्धेन सादृश्यान्वयिवाचकेनेत्यर्थः। तथाशब्दार्थसादृश्यस्य तु तथा हर इत्यत्रानुयोगितासम्बन्धेन हरेऽन्वयः। एतादृशकल्पनायां हेतुमाह। सादृश्य इत्युक्त इति। मूले द्योतयतीत्युपात्तत्व तु शक्त्या प्रतिपादयतीत्युक्तं तद्बीजमाह। सामान्यस्येति। यद्यपि भाष्ये यथाशब्दः सादृश्ये वर्त्तत इत्युक्तन्तथापि तत्र द्योतनयेति शेषो बोध्यः। सामान्यस्येत्यस्यैकबुद्धिविषयत्वेन गृहीतस्येत्यर्थः। भेदकः। सादृश्यस्य प्रायेण भेदनियतत्वाद्भेदबुद्धिसम्पादक इत्यर्थः। तदभिन्न इति। उपमानोपमेययोरभेदान्वयबोधो व्युत्पत्तिसिद्ध एव। अत एव मृगचपलेत्यत्र पुंवद्भावसिद्धिः। ननूभयत्रैकस्य विशेषधर्मस्याधिकरणत्वप्रतीतावपि नोपमानोपमेयभावप्रतीतिरत आह। यत्तच्छब्दाभ्यामिति। ननु असादृश्य इतिपदस्य सादृश्येनेत्यर्थः कुतः। एवञ्च यथा हरिस्तथा हर इत्यत्र हरेः सादृश्यन्द्योतयतीति वाच्ये उपमानत्वन्द्योतयतीत्यनुपपन्नमत आह। सूत्रेऽपीति। यत्सूत्रे सामान्यस्य भेदको यो धर्मस्तद्रूप इत्युक्तन्तु यद्यर्थः सादृश्यं प्रकृतबोधे प्रकार इत्युक्तमत्र किम्बीजमित्यत्र नियामकमाह। यत्सूत्र इत्यादि। सिद्धान्तमाह। भाष्यानुसारिणस्त्विति। यथाशक्ति यथाबलमित्यस्य शक्तिमनतिक्रम्य इत्यादयर्थः। अत एव। उक्तार्थस्याभिप्रेतत्वादेव। पदार्थानतिवृत्तौ समासार्थं यथाशब्दस्यावश्यकत्वेन सम्पूर्णसूत्रस्य कैमर्थ्यशङ्का न भवतीत्यभिप्रायः। ननु पूर्वसूत्रेणैव समासे सिद्धेऽस्य सूत्रस्य वैयर्थ्यमत आह। यथार्थत्वेनेति। सूत्रगृहीतत्वात्। यथार्थशब्दघटकत्वात्। इदमपि। एतत्सूत्रकरणमपि। उक्तार्थानभिज्ञः शङ्कते। न चेति। उक्ताशयमुद्घटयति। अत्र सूत्र इत्यादि। तदर्थक एव स इति। पदार्थानतिवृत्तिबोधको यथाशब्दः परिशेषादित्यर्थः। असादृश्यग्रहणस्य वैयर्थ्यशङ्कापरिहारायाह। यद्यपीत्यादि। द्योतयतीत्यस्य द्योतनया प्रतिपादयतीत्यर्थः। द्योतना च व्यञ्जनैव तयोपस्थापितार्थस्य शाब्दबोधविषयत्वं भवत्येव तदाह। उपमानदेवद-

त्तामिव इति । लक्षणामूलव्यञ्जनाश्रय इवेति । यथा । साधयन्ती सखि सु-
भगं क्षणेक्षणे दूनासि मम कृते । सङ्गावस्त्वेहकरणीयसदृशस्तावदिरचितत्वया ।
अत्रोपनायकसमीपे प्रेषिता या दूती सा तन्नायकसुपभोगेन निर्वृत्तेच्छाङ्कत्वा
पुनर्नायिकाया निकटे समागत्य स नायातीत्युक्त्वा विरता तत उपभोगचि-
ह्नेन तं वृत्तान्तं ज्ञात्वा तां दूतीम्प्रति नायिकाया उक्तिरियम् मम प्रियं र-
मयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यते । तेन कामुकविषयं सापराधत्वप्र-
काशनं व्यङ्ग्यम् । उभयोः शक्यार्थव्यङ्ग्यार्थयोः । तत्र यथा व्यञ्जना न लक्षणया
गतार्था तथात्रापि व्यञ्जना न गतार्थेत्याशयः । अत एव । उपमानोपमेययोरभे-
दान्वयादेव । पूर्वपदार्थप्राधान्याभाव इति । पूर्वपदार्थत्वे नाभिप्रेतो यो य-
थाशब्दार्थस्तत्प्राधान्याभाव इत्यर्थः । प्रसिद्धत्वात् । सादृश्ये प्रसिद्धत्वात् ।
तत्सामर्थ्यात् । समासविधानसामर्थ्यात् । तदभावेपि । पूर्वपदार्थप्राधान्याभावेऽ-
पि । अत्र प्रकारवचने थालन्तस्य साधुत्वान्वाख्यानेऽपि कुशलशब्दस्य प्रवीण इव
पदार्थानतिवृत्त्यादिष्वपि प्रयोगो भविष्यतीत्यभिप्रायेणाशङ्कते न चेति । सादृ-
श्यसम्पत्तीत्यनेन चेति । तस्य सादृश्येपि वृत्तेर्दर्शनादिति भावः । तत्र । सादृश्ये ।
तदप्रयोगात् । पदार्थानतिवृत्तिबोधकस्याप्रयोगात् । तत्रार्थे । प्रकाररूपेऽर्थे । सा-
धोरिति यथाशब्दस्य । एवञ्चाव्युत्पन्नयथाशब्दस्यैव समासबोधकमिदं सूत्रमिति भावः
अत्र मानमाह । इदमेवेति । अतदर्थकस्य । असादृश्यार्थकस्य । इत्यर्थकोक्त्ये-
ति । एवं हि तत्र भाष्यमसादृश्य इति किमर्थम् । यथा देवदत्तस्तथा यज्ञद-
त्तः । असादृश्य इत्युच्यते तत्रेदन्न सिध्यति । यथाशक्ति यथाबलमिति । कि-
ङ्कारणम् । यथेत्ययमकारवचने थाल्स च सादृश्ये वर्त्तते । नैष दोषः । अयं य-
थाशब्दोऽस्त्येवाव्युत्पन्नं प्रातिपदिकं वीप्सावाची अस्ति प्रकारवचने थाल् ।
तत्र यदव्युत्पन्नं वीप्सावाचि तस्येदङ् ग्रहणम् । अत्र वीप्साग्रहणमुपलक्षणम् ।
तेन योग्यतापदार्थानतिवृत्तौ अपि यथार्थौ इति कैयटः । अथ यः प्रकारवचने
थाल् तस्य ग्रहणङ्कस्मान्न भवति पूर्वेण प्राप्नोति । प्रतिषेधवचनसामर्थ्यान्न भवि-
ष्यतीति । एतज्ज्ञाप्येऽसादृश्ये वर्त्तत इत्यस्योपमानोपमेयत्वद्योतक इत्यर्थः ।
इदङ् ग्रहणमित्यस्यैतत्सूत्रीयमित्यर्थः । तद्विस्मरणेन । असादृश्य इत्यस्य वि-
स्मरणेन । असङ्गतिरिति । तद्विस्मरणे पूर्वेण प्राप्तिशङ्काया एवाभावः स्या-

दिति भावः । तद्भाष्ययोजनायाह। तस्मादिति । कैयट इति । सूत्रगृहीतेत्यादेस्तेनानङ्गीकारात् । परन्तु पूर्वोक्तरीत्या तथा कल्पनमावश्यकमित्याशयेनाह । सूत्रगृहीतेति । अन्यकृतं व्याख्यानं यथाकथंचित्तत्सम्भवदुक्तिकमप्यसङ्गतमित्याशयेनाह । नियमत्वापेक्षयेति । विधिनियमसम्भवे विधिरेव ज्यायान् ॥ विशेषमाह । तत्र सूत्र इति । अत एव । सादृश्याग्रहणादेव । अत एव । पूर्वोक्तोर्थः । इत्युक्तमिति । न तु यथार्थमिति शेषः । मूलोक्तमनूद्य दूषयति । न चेति । अन्याव्ययग्रहणार्थमिति । तेन रूपस्य योग्यमनुरूपमित्यस्य सिद्धिः । वीप्सादावपीति । अत्रादिना योग्यतापरिग्रहः । वीप्सायामुदाहरणं यथास्वमिति प्रसिद्धमेव । योग्यतायामुदाहरणन्तु यथास्वरूपन्दक्षिणादानमित्यत्र ज्ञेयम् । नन्वस्मिन्नपि सूत्रे यथार्थे विद्यमानं यदव्ययमितिव्याख्यानङ् कुतो नेत्याशङ्क्याह । अत्र सूत्र इति । अव्ययमिति । अनव्ययत्वावच्छब्दव्याहृत्तये अव्ययग्रहणानुवृत्तेः । अव्ययस्य समासः । यावन्तः श्लोका इति वतुवन्तेनाव्ययेनास्वपदविग्रहः । अन्यत्राप्ययमव्ययसंज्ञको दृष्टः । यावदमत्रं ब्राह्मणानामन्वयस्वेत्यत्र यथा । अव्ययनिवृत्त्यर्थमिति । पूर्वसूत्रे तु तदनुवृत्तिरस्त्येव । तादृशाव्ययेनेति । तद्गतात्यत्वतात्पर्येण यत्र प्रयोगस्तत्रेति शेषः ॥ ननु वृत्तम्प्रतीत्यत्र समासे कर्मप्रवचनीयसंज्ञाविधानं व्यर्थमत आह । कर्मप्रेति ॥ तदर्थ इति । विपरीतवर्त्तनमर्थः । मूलोक्तोदाहरण इति शेषः । लौकिकविग्रहे वृत्तमितिक्रियावाचकशब्दसत्त्वात्तृतीयान्तमुक्तम् । समासे तदभावादाह । अत्र ङसिति । एवास्य साधुत्वमिति । अत्रादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् । कितवव्यवहारे च एकत्वेऽत्रगलाकयोरितिवार्त्तिकसंवादात् । पूर्वोक्तस्य पूर्ववृत्तस्य । धातूनामनेकार्थत्वादिहचिरिह वर्त्तने । यथा न तत् । तद्वर्त्तनं यथा पूर्वं वृत्तन्न तथा चेदित्यर्थः । स्पष्टप्रतिपत्त्यर्थमेतस्यैव विवरणभाष्ये कृतमयथाद्योतन इति । अयथाशब्दो वैपरीत्ये विपरीतत्वद्योतने । पराजयद्योतन इति यावत् । वृत्तो नास्त्येवेति । अस्य द्योतकाभाव इति शेषः । तेन कुमार्यगारम् । वध्वगारम् । यौष्माकीनस्तावकीन इत्यादौ संख्यावगमसत्त्वेऽपि न क्षतिः । नेष्यत इति । न च संज्ञाया भावाभावाविष्येते इ-

तिभाष्यविरोधात् । न ह्येकार्थीभावे संज्ञाया अभाव इत्यर्थः । ध्वनितश्चेदमिति । इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च । तत्र स्वभावतश्चैतद्भवति वाक्यञ्च वृत्तिश्चेत्यनेनोक्तसूत्रस्थभाष्येण ध्वनितमित्यर्थः । तत्प्रत्याख्यानम् । विभाषाऽधिकारस्य प्रत्याख्यानम् ॥ अत एव । एकार्थीभावविकल्पबोधकत्वादेव । एतत्कारणात् । विभाषेतिसूत्रकरणात् । सुप्सुपेत्यस्य नित्यत्वाङ्गीकारे दोषमाह । एवञ्चेति । तस्य नित्यताङ्गीकारे चेत्यर्थः । ननु अव्ययमित्यादिसूत्रैः समाससंज्ञाविधानन्नैवास्तीत्यत आह । उपपदेति । उद्देश्याप्रसिद्धेरिति । क्वचिल्लुवुत्पत्तेः प्राक् समासस्येष्टत्वात् । क्व चिल्लुबन्तत्वासम्भवादिति भावः । बहुव्रीहिसंज्ञाविषयेऽपि क्व चिदप्रसिद्धिमाह । अनेकेति । नन्वव्ययमित्यादिसूत्रैः समाससंज्ञाविधानाभावे कथमुपसर्जनसंज्ञेत्यत आह । प्रथमानिर्दिष्टमितीति । उक्तभाष्यादपीति । विस्पष्टं पटुरितिभाष्यादपीत्यर्थः । मानसबोधविषयस्य न शाब्दबोधविषयत्वमित्यभिप्रायेणाह । अग्निज्ञाप्यमित्यादि ॥ द्योत्यस्याप्यर्थस्य शाब्दबोधविषयत्वं बहुषु दृष्टमिति तदुचाप्युचितमित्याशयेनाह । अग्निज्ञाप्यमिति । कर्मप्रवचनीयद्योत्यसम्बन्धेन । लक्ष्यलक्षणभावेन । द्योतनाभाव इति । लक्ष्यलक्षणभावस्तु तत्रापीष्यत एव । नन्वेवङ्कर्मप्रवचनीयसंज्ञाविधानवैयर्थ्यमत आह । अस्य समासस्येति । अग्निदेश इति । अग्निगमनदेश इत्यर्थः । तेन सम्बन्धेन । लक्ष्यलक्षणभावसम्बन्धेन । एवञ्चानुगङ्गं वाराणसीत्यत्रानुशब्दद्योत्योर्थो दैर्घ्यसदृशदैर्घ्यन्तदेकदेशे प्रथमतो भासमाने दैर्घ्ये गङ्गापदार्थस्याधेयतासम्बन्धेनान्वयो न त्वनेन गङ्गापदार्थस्य वाराणस्यामन्वयस्तदभिप्रायेणाह । तद्द्योत्यसम्बन्धेनान्वयाभावादिति । एवञ्च गङ्गापदार्थस्य कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगित्वाभावान्न द्वितीयेत्यर्थः । यस्य चायाम इतिसूत्रविषये आह । तथा बोध इति । पूर्वसूत्रविषये आह । वनस्य समीपङ्गत इतीति । तेन सम्बन्धेनान्वये त्विति ॥ अनुद्योत्यसम्बन्धेनान्वये त्वित्यर्थः । तत्र प्रमाणमाह । निर्वेश्येति । ननु ज्ञाप्यत्वं ज्ञापकत्वाभिमतविषयकज्ञानजन्यज्ञानविषयत्वमेव तच्चाज्ञातस्य सम्भवति प्रकृते च वाराणस्यास्तत्त्वन्तदा भवेद्यदि वाराणपूर्वमज्ञातास

स्यात्तत्तु नेत्याशयेनाह । वाराणस्या इति । वृत्त्यन्तरे प्रवेशो नेति । समुच्चेतव्यस्याभावादेतदर्थमेव चकारः । तदुक्तभाष्ये । किमर्थश्चकारः । एवकारार्थः । तिष्ठद्गुप्रभृतीत्येव । क्व मा भूत् । परमन्तिषद्गु । अत्रैवकारार्थ इत्यनेनैतत्सूचितन्तिष्ठद्गुप्रभृतीन्येवैकार्थीभावविषयाणि न त्वेतेषां शब्दान्तरेणैकार्थीभावः । नन्वातिष्ठद्गु इत्यादौ समासान्तरे प्रवेशदर्शनादिदमयुक्तमत आह । आतिष्ठद्गु जपेदिति । अन्यपदार्थेऽव्ययीभाव इति । तिष्ठद्गु कालविशेषे । तिष्ठद्गु कालविशेष इति वक्तव्यम् । तिष्ठन्ति गावो यस्मिन् काल इतिभाष्यात् । इदम् । निपातनरूपम् । अन्ये । आयतीगवमित्यत्र । अव्ययीभावविषये अव्ययीभावाभावे तत्पुरुषप्रवृत्त्युपायमाह । अयश्भाव इति । एकस्वभावः । समानस्वभावः । स्वभावशब्दोऽत्र धर्मवाची । नन्वेवमिति । स्वपदार्थप्राधान्यस्वीकारे इत्यर्थः । मूले विद्यातद्हतामिति । तद्हत्वञ्चात्र तत्प्रणेतृत्वसम्बन्धेन । एवञ्च विद्यावत्त्वात्मकधर्मसम्बन्धात्त्रिमुनिशब्दस्य यत्प्रवृत्तिनिमित्तन्तदारोपेण व्याकरणे त्रिमुनिशब्दस्य प्रवृत्तिरिति भावः । इमं क्लेशम्परिहर्तुमुपायान्तरमाह । अन्ये त्विति । नन्वेवम्बहुव्रीहौ पूर्वपदप्रकृतिस्वरोऽव्ययीभावे त्वन्तोदात्तत्वमिति स्वरभेदापत्तिरत आह । स्वरभेदश्चेति । इष्ट एवेति । समासभेदेन स्वरभेदे इष्टापत्तेः सर्वसम्मतत्वादिति भावः । लोकप्रसिद्धानुसारेणाह । परे त्विति । नन्वेवं त्रिमुनि व्याकरणस्येत्यस्य कथमुपपत्तिरत आह । यदीष्यत इति ॥ ननु गर्गस्य गोत्रापत्यानाङ्कुलमित्यर्थे गर्गकुलमित्यत्र यञञोश्चेतिसूत्रेण यञो लुग्भवति तथा एकविंशतिभारद्हाजमित्यत्राञो लुक् स्यादित्येतादृशप्रयोगानुपपत्तिरत आह । वृत्ताविति । अनयोरिति । अनयोः । एकविंशतिभारद्हाजम् । त्रिपञ्चाशद्गौतममित्यनयोः ॥ ननु नदीभिश्चेतिसूत्रं समानाधिकरणसमासमात्रबाधकमथ वा पुरस्तादपवादन्यायेन पूर्वकालैकेत्यस्य बाधकमुभयथा एकनदीतरेतिप्रयोगानुपपत्तिरव्ययीभावे नपुंसकङ्गस्वत्वापत्तेरत आह । तत्रैवेत्यर्थ इति । तदविवक्षायाम् । समाहाराविवक्षायाम् । एतेनैकापूपीवत्समाहारविवक्षायामेकनदितर इति भवत्येव । समासान्तापत्तिं वारयति । अत्रप्रत्ययेति । वाक्याभावेन । लौकिकविग्रहवाक्यसम्बन्धित्वाभावेन । एवञ्च नित्यसमासस्थले विशेष्याभावादिशिष्टाभावः प्रकृते

तु लौकिकविग्रहवाक्यसत्त्वेऽपि तस्य संज्ञाबोधककतया विशेषणाभावाद्विशिष्टाभावोऽत्र एवेति भावः। न चैतावता लौकिकतुल्यसमानार्थकत्वाभ्यां विशिष्टस्य वाक्यस्याभावेनेति सिद्धम् ॥ एवं सति प्रतियोग्यप्रसिद्धेरभावाप्रसिद्धिरिति वाच्यम् । लौकिकतुल्यसमानार्थकत्वोभयाभाववद्वाक्यकत्वे नेत्यर्थात् तदेतदाह। समासघटकेति ॥ अत एव । विग्रहसत्त्वादेव । अथ वा । अत एव । एतस्य नित्यसमाससदृशत्वन्न तु नित्यसमासत्वमेवेति स्वीकारादेव ॥ अत एव । समासपदस्य समाससम्बन्धिलौकिकविग्रहवाक्ये लक्षणास्वीकारादेव। अन्यथा समाससामान्यापेक्षत्वरूपान्तरङ्गत्वस्य ह्रस्वत्वे सत्त्वेन तत्प्रवृत्त्यापत्तिः स्यात् । समासार्थलौकिकविग्रहे लक्षणायान्तरङ्गतरकवितिन दोषः। गोस्त्रियोरित्यत्र भाष्य इति । तत्र हि कपि ह्रस्वत्वस्य प्रतिषेधो वक्तव्यः । बहुकुमारीकः । न वक्तव्यः । कपि कृतेऽनन्यत्वाद्ह्रस्वत्वन्न भविष्यति । इदमिह सम्प्रधार्यम् । कप् क्रियताम् । ह्रस्वत्वमिति । परत्वात्कप् । समाससामान्यापेक्षत्वादन्तरङ्गं ह्रस्वत्वम् । अन्तरङ्गतरः कप् । ननु चायं कप्समासान्त इत्युच्यते । तादर्थ्यान्ताच्छब्दभ्भविष्यतीत्युक्तम् । न कपीतिनिषेधस्वनन्तरस्येतिन्यायेन केऽण इत्यस्यैव बाधक इति भावः । अन्त इतिसूत्रे भाष्ये चेति । तत्र हि किं समासस्यान्त उदात्त आहो स्विदुत्तरपदस्य । आद्ये इदम्प्रथमका इत्यादौ कपि पूर्वस्योपसंख्यानङ्कर्तव्यम् । अन्त्येऽन्टच इत्यादौ नञ्सुभ्यामित्यनेनान्त्याकारस्योदात्तत्वानापत्तिरित्युक्तम् । यदि समासे कृते समासान्तः प्रवर्त्तेत तदा इदम्प्रथमका इत्यत्र समासे कृते समासान्तापेक्षया परत्वादिदमेतत्तद्भ्रः प्रथमपूरणयोः क्रियागणन इत्यनेन स्वरे कृते ततः कपि दोषाभावसिद्धौ भाष्यासङ्गतिः स्फुटैव । पूर्वोक्तव्याख्यानेन यस्मिन्नन्तादाह ॥ एवञ्चेति । समाससंज्ञासमकालमेवेत्यत्र समासपदमव्ययीभावादीनामप्युपलक्षणम् ॥ समासार्थलौकिकविग्रहवाक्यस्थान्ताः समासान्ता इति सिद्धान्ते शङ्कते । न च पूर्वं समासान्त इति ॥ अत्र पूर्वमित्यस्य समाससंज्ञाप्रयोज्यकार्यान्तरप्रवृत्तेः पूर्वमित्यर्थः एतेन पूर्वोक्तसमकालत्वोक्तिविरोध इत्यपास्तम् चित्वं व्यर्थमितीति । प्रत्ययादुदात्तत्वे नैवान्तोदात्तत्वसिद्धेः । न च यस्य मते समास-

संज्ञोत्तरं समासान्तस्तन्मतेऽपि सति शिष्टत्वेन प्रत्ययस्वरस्य बलवत्त्वादन्तोदात्तत्वं सिद्धमेवेति डचश्चित्त्वंव्यर्थमेव । बहुव्रीहौ प्रकृत्येति सूत्रेण पूर्वपदप्रकृतिस्वरविधानसामर्थ्यात्प्रत्ययस्वरो न भविष्यतीति वक्तुमशक्यम् कण्विषये चारितार्थ्यादिति वाच्यम् । अनुदात्तम्पदमितिसूत्रे पदग्रहणस्य परिमाणार्थतया समासान्तस्य समासावयवत्वबोधनेन च पूर्वपदस्यबहुव्रीहौ प्रकृत्या तच्च वर्जयित्वा यावान्बहुव्रीह्यवयवः सन्निहितो भावी वा सोऽनुदात्त इत्यर्थेन डप्रत्ययस्यानुदात्तत्वं स्यादतश्चित्त्वं सफलमित्याशयात् । तत्सामर्थ्येनेति । डचश्चित्त्वसामर्थ्येनेत्यर्थः । तेन । आद्युदात्तत्वेत्यस्यासंबन्धेन । पूर्वपदप्रकृतिस्वरसिद्धिरिति । यदि समासान्तविधावाद्युदात्तश्चेत्यस्य सम्बन्धः स्यात्तदा तदेकवाक्यतापन्नशेषनिघातेन पूर्वपदस्यानुदात्ततयोदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वरो न स्यादिति भावः । तेन समृद्धशब्दस्वरस्यैव श्रवणं परिनिष्ठिते भवति । ननु समाससंज्ञासमकालमेव समासान्तप्रवृत्तिस्वीकारे द्विचिभ्यामितिसूत्रस्थभाष्यविरोधः प्राप्नोति । तत्र हि कृतसमासान्तपाठात्साहचर्यात्कृतसमासान्ते मूर्धन्शब्देऽस्य प्रवृत्तिस्तदा समासान्ते कृते एव द्विमूर्धानमित्यादौ प्रवृत्तौ नान्तत्वं वक्तव्यम् । यदि तु मूर्धस्थितिनिर्देशात्साहचर्यमनादृत्याकृतसमासान्ते प्रवृत्तिस्तदा कृते समासान्ते द्विमूर्ध इत्यत्र स्वरो न प्राप्नोति । एवं वितर्क्याकृतसमासान्तस्यैव मूर्धस्थितिनिर्देशाद् ग्रहणम् । समासान्तविषये तु समासान्तापेक्षया परत्वात्स्वरे कृते ततः समासान्ते टिलोपे च कृते उदात्तनिवृत्तिस्वरेण सिद्धिरित्युक्तम् । यदि समाससंज्ञासमकालमेव समासान्तप्रवृत्तिस्तदा समासान्तात्परत्वात्स्वरप्रवृत्तिः स्यादित्यं तदसङ्गतं स्यादत आह । द्विचिभ्यामिति सूत्रेति । उक्तभाष्यद्वयेति । गोस्त्रियोरितिसूत्रान्तइतिसूत्रस्थभाष्येत्यर्थः । समाससंज्ञासमकालं समासान्तानाम्प्रवृत्तिपक्षे तु द्विचिभ्यामित्यत्र मूर्धस्थिति निर्देशदर्शनादकृतसमासान्तेऽस्य प्रवृत्तिः । समासान्तविधिस्थानित्यः । यत्र तु समासान्तस्तत्रापि समासस्य कार्यित्वेनाश्रयणात्समासान्तसङ्घातस्यापि ग्रहणेनानेनैव स्वरस्य सिद्धिरिति कल्पनया निर्वाहो बोध्यस्तदाह । अन्यत्रेति । अत एव । समुदायावयवत्वादेव । टिलोपाभाव इति । अव्ययग्रहणेन समासान्तस्य ग्रहणात् ।

कैयटोक्तोत्तरपदावयवत्वपक्षस्वसंगत इत्याह। यत्विति। फलाभावादिति। समासपदस्य समासार्थालौकिकविग्रहवाक्यात्मकसमुदायपरत्वभाष्यकारोक्तं यत्तादर्थ्यात्तच्छब्दमिति तदनुगृहीतभवति। उत्तरपदावयवत्वे तु न तादृग्भाष्योपलम्भ इत्यपि बोध्यम्। ननु यदि समासान्तो नोत्तरपदावयवस्तदा द्विधुरीत्यत्राकारान्तोत्तरपदो द्विगुस्त्रियामिष्ट इत्यस्य कथमप्रवृत्तिरत आह। द्विधुरीत्यादाविति। अत एव। लिङ्गस्य लोकाश्रयत्वादेव। नपुंसकत्वसिद्धिरिति। उत्तरपदावयवत्ववादिमतेऽपि प्राप्तस्त्रीत्वस्य लोकाश्रयत्वेन वारणं कार्यमिति भावः। उत्तरपदावयवत्वस्वीकारे भाष्यविरोधमपि दर्शयति। अन्त इत्यादिसूत्रेति। अन्तोदात्तत्वासिद्धिरिति। यद्ययमुत्तरपदावयवः स्यात्तदा नञ्सुभ्यामितिसूत्रेणान्तोदात्तत्वमत्र चकारस्य स्यादेवेति भावः। विग्रहवाक्ये समुदायावयवत्वे सरूपसूत्रस्थभाष्यविरोधं वारयति। सरूपेति। तस्यानर्थकत्वेन। समासान्तरहितस्य ऋच् इत्यस्यार्थवत्त्वाभावेन। मानाभावादिति। न च द्वन्द्वापवादत्वव्यवहार एव मानम् द्वन्द्वसमासस्यार्थवत्वात्प्रातिपदिकसंज्ञायामप्येकं सुबुत्पत्तावेव प्राप्तेः। कृतद्वन्द्वानामितिपक्षे तु सुतरान्तथेत्यत आह। विशिष्टरूप इति। अर्थबोधकतावच्छेदकानुपूर्वी विशिष्टरूपेत्यर्थः। तदु विशिष्टमेव। सुप्विशिष्टमेव। तन्मूलभूतेति। सुबन्तात्तद्धित इतिसिद्धान्तमूलभूतेत्यर्थः। अत एव। परिपूर्णमिति युक्तेः सार्थकविषयत्वादेव। तस्यामवस्थायाम्। वाक्यावस्थायाम्। सामान्यत उक्तमेवार्थं स्पष्टप्रतिपत्तये विशेषत आह। तत्रेति। तद्ग्रहणेन। समासग्रहणेन। न च समासान्तस्य भवदुक्तरीत्या वाक्यावयवत्वेन वाक्यग्रहणेन ग्रहणभवतु न तु समासग्रहणेन ग्रहणभविष्यतीति वाच्यम्। वाक्यस्यैव समाससंज्ञाविधानेन समासशब्दाभिन्नतया समासशब्देन विशिष्टस्य ग्रहणभविष्यतीत्याशयात्। अन्यथा। मदुक्तरीत्या तावदित्यस्य व्याख्यानाभावे। तदनपेक्षत्वेन। कबनपेक्षत्वेन। अत एव। सुपः परस्मादित्यस्याश्रयणादेव। दिगिति। दिगर्थस्तु यदन्यत्रोक्तमलौकिकविग्रहवाक्ये समासान्ते कृते तद्धितान्तत्वात्प्रातिपदिकत्वे सुब्लुकि प्रत्ययलक्षणेन प्रत्येकं सुबन्तत्वेन समाससंज्ञेति तन्न युक्तमुक्तभाष्यस्वारस्येन समासान्तस्य समाससंज्ञायाश्चैककालप्रवृत्तिकत्वस्यैव लाभ इत्यादिः। सूत्रा-

र्थमाह। अव्ययीभाव इति। नन्वेवमनञ्त्वस्यापि अन्नन्तं यत्प्रातिपदिकन्तत्प्रकृतिकसुबन्तोत्तरपदकाव्ययीभावार्थवाक्यादित्येवार्थ उचित इत्यन्नन्तादित्यनुपपन्नमत आह। अन्नन्तेति। के चिदिति। भय इति सूत्रस्य वैकल्पिकत्ववादिन इत्यर्थः। वस्तुतस्तु वक्ष्यमाणरीत्या भय इति नित्यमेव। लक्षणेनेति। अक्ष्णः सम्मुखमिति विग्रहः। अव्ययीभावाप्राप्तिः। परमित्यर्थे विधायकाभावादव्ययाघटितत्वाच्चेति भावः। वस्तुतस्त्वस्मिन् गणसूत्रे परशब्दपाठ आकरविरुद्ध इत्याह। अत्रेति। ननु पूजार्थमितिमूलग्रन्थाद्विरेखेति सूत्रेऽन्यतरस्यामित्यस्य सम्बन्ध इति प्रतीयते तन्न युक्तम्। वक्ष्यमाणयुक्तेरित्याशयेनाह। वेति वक्तव्य इति। अत एव। अन्यतरस्यामित्यस्य स्वरितत्वाभावादेव। भाष्य इति। तत्र हि क्वचिमाक्वचिमन्यायं व्युत्पाद्योक्तम्। यदि तर्हि क्वचिमाक्वचिमयोः क्वचिमे कार्यसम्प्रत्ययो भवति नदीपौर्णमास्याग्रहायणीभ्य इत्यत्रापि प्रसज्येत। पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यतीति तद्विशेषेभ्यस्तर्हि प्राप्नोति। गङ्गायमुने इति। एवन्तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न तद्विशेषेभ्यो भवतीति। यदयं विपाशग्रहं शरत्प्रभृतिषु पठतीति। अत्र पौर्णमास्याग्रहायणीग्रहणसामर्थ्यादिति। यदि नदीसंज्ञकस्य ग्रहणन्तदाऽनयोरुपादानं व्यर्थं स्यात्। नन्वनयोरुपादानं नियमार्थं भविष्यति ईकारान्तस्य चेदनयोरेवेति चेत्। एवन्तर्ह्यपौर्णमास्याग्रहायणीभ्य इत्येव वदेदिति नदीशब्दोपादानं ज्ञापकमेव। साहचर्याच्च ऊपदेन नदीसंज्ञकोकारान्तस्य ग्रहणं भविष्यतीत्यभिप्रायः। ये तु नदीपौर्णमासीतिसूत्रेऽन्यतरस्यामित्यस्य सम्बन्धं वदन्ति अस्य च सूत्रस्य व्यवस्थितविभाषात्वं स्वीकुर्वन्ति तेषां देवत्रात इत्याद्युक्तव्यवस्थितविभाषात्वपरिगणनविरोधः स्पष्ट एव। तस्याश्चेति। अशब्दसंज्ञेतिनिषेधस्येत्यर्थः। अत एव। लक्ष्यानुसरणस्य सूत्रसत्वेऽप्यावश्यकत्वादेव। तत्सूत्रम्। स्वंरूपमितिसूत्रम्।

इत्यव्ययीभावविवरणम्॥

द्विगुश्चेतिपाठेऽपि द्वयोः संज्ञयोः पर्यायेण प्रवृत्तिस्वीकारेऽपि चकारस्यरिलार्थ इत्यत आह। संख्यापूर्व इति। इत्यर्थलाभ इति। तत्प्रकृतिके लक्षणया

तन्नाम इत्यर्थः । भाष्यप्रामाण्येनेति । समासप्रत्ययविधावित्यस्योदाहरणसमये कष्टं श्रितः कष्टश्रित इत्यत्र यथा स्यात्कष्टम्परमश्रित इत्यत्र मा भूदित्युक्तन्तग्रामाण्येनेत्यर्थः । अत एव निर्देशात् । पतित इति निर्देशात् । यद्वा सेऽसिचीतिवेट्कत्वात्क्तान्ततेरिडभावे सिद्धेऽस्य ईदित्वमिडभावार्थं यत्नेन यस्य विभाषेत्यस्यानित्यत्वज्ञापनादिटः सिद्धिः । कर्तृशक्तिप्रधानम् । कर्तृत्वविशेषकबोधजनकम् । समाससंज्ञायाः प्रवृत्तेः फलस्य स्पष्टप्रतिपत्तये आह । असमास इति । जाल्म इतीति । असमीक्ष्यकारीत्यर्थः । तेन । जाल्मइतिकथनेन । केवलरूढत्वादेव न हि वाक्येन निन्दा गम्यत इत्यस्योपपत्तिरित्याह । एतेनेति । खट्वामारोहतु मा वा योयोऽसमीक्ष्य कारी स एवमभिधीयते । वाक्येन तु योगार्थस्यैव प्रतीतिः । काला इत्यनेन स्वरूपस्य ग्रहणन्निरस्यति । कालवाचिन इति । अत्र मानमाह बहुवचनादिति । उत्तरसूत्रेण सिद्ध इति । कालवाचकन्द्वितीयान्तं समर्थप्रकृतिकमुबन्तेन सहितं समाससंज्ञकमिति तदर्थात् । तुमुनिति । भाव इति शेषः । आरब्धवानित्याङः प्रयोगाद्यमितेत्यत्र माङ्धातोरादिकर्मणि कर्त्तरि क्त इति सूचयति । तुमुनन्तस्याव्ययत्वात्ततो जातायाः शेषषष्ठ्या लुक् । मासपरिच्छेदारम्भकर्त्तेति बोधः । प्रतिपच्चन्द्रेण हि मासपरिच्छेदः क्रियते । प्रतिपन्नाम विज्ञेया चन्द्रस्य प्रथमा कलेत्यभियुक्तोक्तेः । कृतद्वारकसामर्थ्य इति । तदुक्तभाष्ये । तत्कृतार्थेनेति किम् । दध्ना पटुः । घृतेन पटुः । नैतदस्ति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थम्भवति । न हि दध्नः पटुना सामर्थ्यम् । केन तर्हि भुजिना । दध्ना भुङ्क्ते पटुरिति इहापि तर्हि न प्राप्नोति । शङ्कुलाखण्डः किरिकाण इति अत्रापि न शङ्कुलायाः खण्डेन सामर्थ्यङ्केन तर्हि करोतिना । शङ्कुलया कृतः खण्ड इति । खण्डशब्दस्य गुणोपसर्जनद्रव्यवचनत्वात्तात्सम्बन्धाभावादवश्यङ्क्रियापेक्षिता व्यापारान्तरा कारकत्वायोगात् । वचनाद्भविष्यति । करोतिद्वारकसम्बन्धाश्रयेणेति भावः । इहापि तर्हि वचनाद्प्राप्नोति । दध्ना पटुः घृतेन पटुरिति । तस्मात्तत्कृतार्थग्रहणङ्कर्त्तव्यम् इति । निपुणश्लक्ष्णाभ्यां समासविधानादिति । न च सदृशशब्दस्यापि ज्ञापकत्वसम्भवादुभयोरेवोपादानमफलमिति वाच्यम् ।

परतः सदृशग्रहणस्यानावश्यकत्वस्य वक्ष्यमाणत्वात् । गुणवचनेत्यत्र समासानुपपत्तिं वारयति । गुणेत्यस्येति । ननु गुणेनेत्येव सिद्धे वचनग्रहणङ्किमर्थमत आह । वचनग्रहणन्त्विति । घृतेन पाटवमित्यादाविति । एतेषां केवलगुणवाचकत्वन्न तु गुणोपसर्जनद्रव्यवचनत्वमिति भावः । व्याख्यानादिति । गुणेनेतीयता सिद्धं सोयमेवं सिद्धे सति यद्वचनग्रहणङ्करोति तस्यैतत्प्रयोजनमेवं यथा विज्ञायेत गुणमुक्तवता गुणवचनेनेति भाष्याच्छङ्कुलाखण्ड इत्युदाहरणदर्शनमूलकादित्यर्थः । अन्यथा खडि भेदने इतिधातोर्घञि निष्पन्नखण्डशब्देन न स्यात्तदन्तत्वादिति भावः । पूर्वसदृश । नन्वनेन सदृशशब्देन समासे तृतीयान्तम्पूर्वपदमक्रतिस्वरमिति पूर्वपदप्रक्रतिस्वरस्य सिद्धौ सदृशशब्दो नोपादेय इत्यत आह । तत्र हीति । षष्ठ्या अलुकि । षष्ठ्या आक्रोश इत्यनेन । ननु मनसा सदृश इत्यर्थमिदमप्यावश्यकमित्यत आह । मनसा सदृश इति । पूर्वपदप्रक्रतिस्वरासिद्धिरिति । विधायकाभावादिति शेषः । उपमानबोधकपूर्वपदक एवेति । अत एव तत्सूत्रस्थसादृश्यग्रहणस्य तत्सूत्रभाष्ये परमसदृश इति प्रत्युदाहरणमुक्तम् । कैयटेन ध्वनितमिति । सम्बन्धमात्रविवक्षायां षष्ठीसमासेन पूर्वसूत्रेण वा तत्कृतत्वात्सिद्धत्वादिति ग्रन्थेन । एकदेश्युक्तिरिति । तत्र हि सदृशवचनमनर्थकन्तृतीयासमासवचनात् । सदृशशब्देन तृतीयासमास उच्यते तत्र तृतीयापूर्वपदमक्रतिस्वरम्भवतीत्येव सिद्धम् । षष्ठ्यर्थन्तर्हीदं वक्तव्यम् पितुः सदृशः पितृसदृश इति । षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम् । इहास्माभिस्तृशब्दं साध्यम् । पित्रा सदृशः । पितुः सदृशः । पितृसदृश इति । तत्र पितुः सदृश इतिविग्रहे पितृसदृश इति भविष्यति । पित्रा सदृश इतिविग्रहे वाक्यमेव । अविरविकन्यायेन । अवश्यन्तृतीयासमासो वक्तव्यः । यत्र षष्ठ्यर्थो नास्ति । भोजनसदृश इति । यदि तस्य निबन्धनमस्ति तदेव वक्तव्यम् इदन्नवक्तव्यम् । इदमप्यवश्यं वक्तव्यम् । यत्र षष्ठी श्रूयते तदर्थम् । दास्याः सदृशः । वृषल्याः सदृश इति । एतेन प्रघट्टकेन पूर्वसदृशेतिसूत्रस्थसदृशग्रहणस्य सदृशप्रतिरूपयोरितिसूत्रस्थसदृशग्रहणस्य चावश्यकर्त्तव्यता लभ्यते सा चोक्तरीत्या न सम्भवतीति । ऐकार्थ्यमिति । एकः समानोऽर्थो यस्य तस्य भाव इत्यर्थः । अर्थशब्दः सम्पादनीयवाची ।

ऊनार्थोऽपीति । तथा च पूर्वसदृशेत्येव सिद्धे इदन्न कर्त्तव्यमिति भावः । व्यवस्थाविषयेति । सर्वनामसंज्ञकार्थमित्यर्थः । प्रत्याख्यानादिति । तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् । अन्तरेणापि वचनमर्थगतिर्भविष्यति । तत्कृतस्यार्थत्वाव्यभिचारादित्यर्थः । नायमर्थनिर्देशः । किन्तर्हि योगाङ्गमिदन्निर्दिश्यते । सति च योगाङ्गे योगविभागः करिष्यते । तृतीया तत्कृतेन गुणवचनेन समस्यते । ततः अर्थेन । अर्थशब्देन च तृतीया समस्यते । धान्यार्थः । वसनार्थः । हिरण्यार्थः । पूर्वसदृशसमोनार्थ इत्यर्थग्रहणन्न कर्त्तव्यम् । अत्र भाष्ये योगविभागशब्दो योगविभागसमानफलकवाक्यभेदपरः । अर्थशब्दोत्र धनपर्यायः । इत्युदाहरणाच्चेति । तत्र हि पूर्वसदृशेतिसूत्रमनुपन्यस्य तृतीया तत्कृतेतिसूत्रोपन्यासेन ध्वनितमित्यर्थः । अस्य । अवरशब्दस्य । परिभाषार्थमाह । यत्र गतिकारकेति । केवलस्यापीति । एतेन नखभिन्न इत्युदाहरणमपि युक्तमेव । कर्त्तृत्वकर्मत्वयोः क्रियानिरूपितत्वेन तद्वाचकं सुबन्तन्तद्धितान्तघटितमपीत्यभिप्रायेण मूलेऽतिप्रसङ्ग उक्त इत्याह । काष्ठैरितीति । मतान्तरमाह । अन्ये त्विति । इत्यर्थन्तदिति । एतेनैतत्सूत्रे सुपेति न सम्बध्यत इत्यत्र तात्पर्यग्राहकं कृदग्रहणम् । ननु काष्ठैः पचतितरामित्यत्र तद्वारकतया कृदग्रहणस्य चारितार्थ्यात्कथङ्कृदन्तेनैवेत्यस्य लाभ इत्यत आह । उक्त इति । ज्ञानजन्तादिभिरिति । आदिना शतृक्तवतुप्रभृतिपरिग्रहः । हस्तेन भुञ्जानः हस्तेन कुर्वन् । दात्रेण लूनवान् । परशुना छिन्नवान् । बहुलग्रहणेनेति । इदमुपलक्षणम् । बहुलग्रहणेन क्वचित्तृतीयातिरिक्तकारकविभक्त्यन्तस्यापि समासः । पादाभ्यां क्रियते पादहारकः । गले चोप्यते गलेचोपक इति । उभयत्रापि बाहुलकात्कर्मणि खुल् । उत्तरत्रामूर्द्धमस्तकादित्यलुक् । ज्ञानजन्तादिभिः समासाभावे किम्प्रमाणमिति चेत् । कर्त्तृकरणे कृता कृन कर्त्तृकरणे कृता कृनेति वक्तव्यम् । अहिहतः । नखनिर्भिन्नः । दात्रलूनः । परशुच्छिन्नः । कृता कृनेति किमर्थम् । इह मा भूत् । दात्रेण लूनवान् । परशुना च्छिन्नवान् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । बहुलवचनात्सिद्धमिति भाष्यमेव । पादहारकादिषु तु साधनङ्कृतेति वा पादहारकाद्यर्थमितिभाष्यमेव समासप्रवृत्तौ मानम् ॥ अधिकार्थवचन इत्यस्याधिकस्य स्वाभाविकापेक्षया अधिकस्य वचनमतिपाद-

नमित्यर्थः । तच्च स्तुत्यर्थनिन्दार्थं वा तदाह । स्तुतिनिन्दाफलकमित्यादि । पूर्णाभस्त्वेनेत्यादौ यथायोगमन्वयः उत्तरसूत्रेपि बहुलग्रहणमनुवर्त्तते । तेन यत्खलत्यया न्तयोगे समासो भवति काकैः पातव्यइत्यादौ न । क्वचित्तु साधनवैकल्यप्रतिपादनाय यत्र वाक्यप्रयोगस्तत्रापि भवति । यथा वुसोपेन्ध्यम् । लवणोपेन्ध्यम् । घनघात्यमिति । अग्नेरल्पत्वात्कष्टमेतद्घृतेन वा लवणेन वा प्रज्वालनीयम् । यत्र वा शर्करानिर्मितमोदके दन्तैर्हस्ताभ्यां वा चोदस्यासम्भवप्रतिपादनाय घनेनायःप्रभृतिनेदं घात्यमित्युच्यते तत्रापि भवति । अत एव भाष्यकृतोक्तं साधनङ्कृतेति वा पादहारकाद्यर्थमिति । तदर्थान्तर्भाव इति । उपसेकाद्यर्थान्तर्भाव इत्यर्थः । तृतीयान्तस्य क्रियावाचकेनैव सामर्थ्यन्न त्वन्येनेति सामर्थ्याभावात्समासाप्राप्तिपरिहारायेदं वाक्यमप्रयुज्यते तत्रोपसेकादिक्रियाया एवान्तर्भावो न तु युक्तक्रियाया इत्यत्र मानमाह । सर्वलोकप्रसिद्धेति । प्रविश्य पिण्डोमित्यत्रेवाचापि वाक्यैकदेशप्रयोगेण दग्धेत्यादेरोदनादिना सामर्थ्यम् । योगाद्रूढिर्बलीयसीति । योगमर्यादया यत्रार्थप्रतीतिस्तत्रावयवशक्तिज्ञानस्याप्यपेक्षा यत्र तु रूढ्या तत्र न तस्यापेक्षा अत एव रूढेर्बलीयस्त्वम् ॥ तदर्थेन प्रकृतिविकृतिभाव एव समासे इत्यत्र बलिरक्षितग्रहणस्य ज्ञापकत्वमुक्तन्तदुपपादयति । तद्योगे हीति । एतत्सर्वमिति । चतुर्थी तदर्थार्थ इतिसूत्रविषयता यत्र प्रकृतिविकृतिभावस्तत्रैवेत्यत्र बलिरक्षितग्रहणस्य ज्ञापकत्वमश्वघासादौ षष्ठीसमास इत्यादि चेत्यर्थः । ननु बलिरक्षितग्रहणस्यैव ज्ञापकत्वमुक्तन्न तु हितसुखग्रहणस्येत्यत्र किम्बीजमत आह । हितसुखयोग इति । हितसुखयोगे तादर्थ्यं चतुर्थ्यसम्भव उपपादितः हितसुखाभ्यामित्यादिना ॥ ननु रन्धनाय स्थालीत्यत्रापि षष्ठीङ्कृत्वाऽश्वघासादिवत्समासः कुतो नेत्याकाङ्क्षायामाह । रन्धनायेत्यादि । अभिधानस्वाभाव्यात् । शब्दशक्तिस्वभावात् । न तत्र षष्ठीसमास इति । तदुक्तङ्कैयटेन । रन्धनस्थाल्यादयस्त्वनभिधानात्षष्ठीसमासा न भवन्तीति । किमत्र प्रमाणमिति चेदुपक्रमस्थभाष्यमेवेति गृहाण । तथाहि । चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात् । सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह प्रसङ्गो भवति । अनेनापि प्राप्नोति । रन्धनाय स्थाली । अवहननायोलूखलमिति । अत्रानेनापि प्राप्नोतीत्युक्ता समासः कथमप्येषु न भवति ॥ एतेन । पूर्वी-

क्रियाख्यानेन । ननु यदि प्रकृतिविकृतिभाव एवेति नियमाभावस्तदा चतुर्थी-समासे चतुर्थी तदर्थ इतिसूत्रेण पूर्वपदप्रकृतिस्वरापत्तिरत आह ॥ चतुर्थी समासेऽपीति । अनेन । चतुर्थी तदर्थ इत्यनेन । अत एव । क्ङौ चेतिसूत्रेऽपि तदर्थं इत्यनुवृत्तेरेव । उक्तार्थेति । चतुर्थी तदर्थ इतिसूत्रस्य प्रकृतिविकृतिभाव एव प्रवृत्तिरित्यनेनाभिहितो योऽर्थस्तज्ज्ञापकतेत्यर्थः । पञ्चमी भयेनेतिसूत्रे भयशब्दस्यैवोपादानाद्भीतिभीशब्दाभ्यां समासस्संज्ञासिद्ध्यर्थमेकेन वार्त्तिककृतोक्तभय भीतिभीभिरिति । अपर आह । भयनिर्गतजुगुप्साभिरिति तदनुसारेणाह । निर्गतेति । नन्वेवमपि उपरतादिशब्दैः समासो न प्राप्नोतीत्यत आह । भीगोपरतेत्यादि । न च भयार्थैरित्येव सिद्धे भीत्यादीनाम्ग्रथगुपादानं व्यर्थमिति वाच्यम् । हकात्त्रास इत्यत्रापि समासापत्तेः । कानि चिदेवेति । एवञ्चाभिधानस्वाभाव्यात्समासस्संज्ञाप्रवृत्तिरिति प्रासादात्पतित इत्यत्र न भवतीत्युक्तम् तेन स्वर्गपतितः प्रासादात्पतित इत्येव भवति न तु स्वर्गात्पतितः प्रासादपतित इति कुत इति नाशङ्कनीयम् । मंगलसम्बन्धाभाव इति । अमङ्गलसम्बन्धाभावस्याप्युपलक्षणम् । बहुल्यार्थान्मङ्गलामङ्गलवचनमिति हि वार्त्तिककृता ग्रन्थविधायकसूत्र उक्तम् । लेशादय इति । अत्रादिशब्देन लवादयो गृह्यन्ते । व्याख्यानादिति । व्याख्यानमेव स्पष्टयति । स्तोकाल्पाभ्यामित्यादिना । गुणान्तरेणेतिवचनस्याप्रसिद्धत्वशङ्कां वारयति । इदञ्चेति । यद्यपीदं वचनं सर्वङ्गुणकात्स्न्र्ये इतिसूत्रे भाष्ये पठितन्तथापि समासस्संज्ञासम्बन्धादत्रोक्तम्मूलकृता तत्र हि कात्स्न्र्यग्रहणङ्किमर्थम् । सर्वङ्गुण इतीयत्यर्चमाने इहापि प्रसज्येत । सर्वेषा खेतः । सर्वखेतः । कथञ्चात्र समासः । षष्ठी सुबन्तेन समस्यत इति । गुणेन नेति प्रतिषेधः प्राप्नोति । एवन्तर्हि गुणान्तरेण समासस्तरलोपश्चसर्वेषां खेततरः सर्वखेत इति । अत्र भाष्ये गुणेन नेति प्रतिषेधः प्राप्नोतीत्युक्त्या-षष्ठीसमास एवानेन न कर्मधारयादिः । तरलोपोऽपि समाससन्नियोगात्षष्ठी समास एव न तु कर्मधारयादौ । स च षष्ठीसमासः सर्वशब्दस्य । अस्मिन्वचने सर्वं गुणेतिसूत्रात्सर्वमित्यनुवृत्तेः । एतदर्थमेव सर्वङ्गुणेतिसूत्रे पठितत्र तु समासप्रकरणे । एवं सति यादृशो वाक्यार्थः सम्पन्नस्तमाह । गुणबोधकादिति । एवञ्चानेन षष्ठीसमासे तरप्रत्ययस्य लोपे सर्वखेत इत्यत्र समासान्तोदात्तत्वं

बाधित्वा पूर्वपदस्य सर्वशब्दस्यान्तोदात्तत्वमभवति । सर्वेषामटानामर्थं खेतो गुणो धिक इत्यर्थः । न निद्धारणे इत्यस्यापवाद इत्युक्तत्वात्तत्रासङ्गतनिर्द्धारणषष्ठ्या एवाप्राप्तेरित्याशङ्कते । नन्विति । चितयसन्निधाने निर्द्धारणस्य अष्टम्यतीतेः । तमबापत्तिश्चेति । बहूनामध्ये प्रकर्षसत्त्वात् । एवञ्च तरबप्युपपन्न इति द्रव्यान्तराधेयापेक्षया पटेषु खेताधिक्यप्रतिपादनेऽस्य वाक्यस्य तात्पर्यान्न तमपः प्राप्तिः ॥ इत्यस्यापवाद इति । एतेन शेषलक्षणषष्ठीभिन्ना सर्वाऽपि प्रतिपदाविधानेति सूचितम् ॥ द्विजादिशब्दैरिति ॥ नृणामित्यस्य द्विजशब्देन समभिव्याहारे एव निर्द्धारणषष्ठीत्वमिति भावः । अत एव । चितयसन्निधान इतिनियमस्वीकारादेव । भाष्ये उक्तमिति । तत्र चितयसन्निधानाभावान्न निर्धारणे षष्ठी । एतेन चितयसन्निधान इत्यस्याङ्गत्वनायाभाष्यमपि प्रमाणम् । ननु पूरणगुणेतिसूत्रेण निषेधात्कथं षष्ठीसमास इत्युक्तन्तत्राह । गुणवचनेनेति ॥ अनित्य इति । संज्ञाप्रमाणत्वादितिनिर्देशादिति मूले एवोक्तम् ॥ वस्तुतः पुरुषोत्तम इत्यत्र कर्मधारय इत्याह । उत्तम इति॥ प्रतिपदविधानेत्यस्य धातुकारकविशेषोपादानेन विहिता षष्ठीत्यर्थस्तदाह । त्रोऽविदर्थस्येति । प्रतिपदविधानेत्यस्य युक्तिसिद्धत्वादिमतन्निरस्यति । यत्त्विति । शेषत्वविवक्षाभाव इति एवञ्चौषधं शरीरे तैलेनोपायेन प्रवर्त्तत इत्यर्थे तैलस्य प्रतिजानीते शरीरे औषधमित्यादौ शरीरौषधशब्दाच्छेषत्वविवक्षया षष्ठी न । तवेति । कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवद्वचनमितिवार्त्तिकप्रत्याख्यानाय शेष इति वर्त्तते इति भाष्यकृतोक्ते परेण शेषश्च क इति पृष्टे षष्ठी शेष इतिसूत्रोक्तं कर्मादीनामविवक्षा शेष इति सिद्धान्तिना स्मारितन्नैतावता क्त्वोर्थ इत्यत्र तत्सम्बन्ध इति भाष्यव्याख्यायाः प्रामाण्यस्वीकर्तुस्तवेत्यर्थः।ननु न मम क्त्वोर्थ इत्यत्र शेषपदासम्बन्धोऽनुमतः । किन्तु शेष इत्यस्यापि सम्बन्धः । अत एव हिरण्यध्ययनमिति प्राक् प्रत्युदाहृतम् । अत एव च कर्मादीनामविवक्षा शेष इत्यत्रादिपदोपादानमित्यत आह । क्त्वोऽर्थ इति । भाष्यानुग्रहाभावादिति ॥ दृढतरभाष्यानुग्रहाभावादित्यर्थः । बहुवचनदर्शनमात्रेण तत्र तत्सम्बन्धकल्पनं तस्य तु षष्ठी शेष इतिसूत्रोक्तानुवादकतयापि चारितार्थ्यमिति भावः । नात्यन्तमिति । यदा कर्मणि विवक्षितभवति तदा षष्ठी न भवति स्मराम्यहन्मातरमि-

तिभाष्यीयव्याख्यानवाक्ये आदिपदानुच्चारणात् कर्मपदोच्चारणाच्च । अन्यथा कर्मपदघटिताधीगर्थेतिसूत्रापेक्षया ज्ञोविदर्थस्येत्यस्य पुरस्फूर्त्तिकतया करणादीनामविवक्षेत्येवोक्तं स्यादिति भावः । नन्वेवं ज्ञोऽविदर्थस्येत्यनेन विच्छेदादधीगर्थेतिसूत्रे कथं शेषपदसम्बन्ध इत्यत आह । अधीगर्थेत्यादाविति । दिव इतिसूत्र इति । दिवस्तदर्थस्येतिसूत्रेऽपि शेष इति वर्त्तते अन्यथा कर्माश्रयषष्ठीविषय इतिवार्त्तिकबलाच्छतस्य दीव्यत इति भाव इष्टस्यासिद्धिरित्युक्ता क्त्वोर्थे इतिसूत्रव्याख्यानसमये विस्तरेणोपपादितमित्यर्थः । दिवस्तदर्थस्येतिसूत्रेऽपि शेषपदसम्बन्धादेवाह । शतस्य देवितेत्यादाविति । अनेनैव । दिव इति सूत्रेणैव । अत एव । ज्ञोऽविदर्थस्य करणे क्त्वोर्थप्रयोग इतिसूत्रविहितषष्ठी यत्र तत्र समासनिषेधस्येष्टत्वादेव । इदम् । प्रतिपदविधानमितिवचनम् । अत एव । अस्यापूर्वत्वादेव । सर्वा प्रतिपदविधानेति । पदस्यपदस्यप्रतिपदस्यप्रतिपदं विधानं यस्याः सा प्रतिपदविधानेत्यर्थः । एवञ्च कारकविशेषोपादानेन विहिता इति फलितम् तदाह शेषलक्षणां वर्जयित्वेति । एवं सति कर्त्तृकर्मणोरिति सूत्रविहितषष्ठ्यन्तस्य समासाभावः स्यादत आह । क्त्वायोगेतीति । तथा च क्त्वायोगेतिवचनन्तस्य बाधकमिति भावः । तत्र । शेषलक्षणां वर्जयित्वेति वाक्ये । शेषमात्रेति । अत्र मात्रपदेन कर्मपदोपादानेऽपि शेषपदानुवृत्त्या या विहिता तद्व्यावृत्तिः । तेन । कारकविशेषोपादानेनेतिव्याख्यानेनैव । न तत्त्वम् । न प्रतिपदविधानत्वम् ॥ अन्तस्यापीति । तस्यापि पूरणार्थत्वात् । न तु पूरणार्थकप्रत्यान्तत्वादित्यर्थः । व्याख्यानादिति । इन्द्वान्ते श्रूयमाणस्यार्थशब्दस्य चिषु सम्बन्धमूलकव्याख्यानादित्यर्थः । व्याख्यानात् । गुणार्थैरित्यस्य गुणनिष्ठा या विषयता तच्छालिशाब्दबोधजनकैरित्यर्थमूलकव्याख्यानादित्यर्थः । शुक्लपदेनासामर्थ्यादिति । ब्राह्मणपदार्थस्य दन्तपदार्थेनैवान्वयादिति भावः । स्वसिद्धान्तमाह । परे त्विति । सामर्थ्यम् । शुक्लपदेन सामर्थ्यम् । अदोषादिति । समासप्राप्तिरूपदोषाभावादित्यर्थः । तदेवोपपादयति । अत्र हीति । सुबन्तस्येति । किन्तु समर्थत्वमेवेति शेषः । समर्थप्रकृतिकेतिव्याख्यानञ्चाश्यकमन्यथा राजपुरुषस्य धनमित्यत्र परिनिष्ठितविभक्त्या समासापत्तौ षष्ठीश्रवणमुक्तार्थत्वान्न स्यात् । अत एव । समर्थप्रकृतिकसुबन्तत्वा-

भावादेव । भाष्यकैयटयोरिति । तत्र हि कर्मणि या षष्ठी सा न समस्यते इति वा कर्मणि यः क्त इति वा सूत्रार्थ इति सन्दिह्य कर्मणि या षष्ठीतिव्याख्याने इध्मप्रव्रश्चनः पलाशशातन इत्यत्र समासनिषेधप्राप्तिमभिधायकर्मणि यः क्त इतिव्याख्याने किमुदाहरणम् । ब्राह्मणस्य भुक्तः । हपलस्य पीतः । क्तनिर्देशेऽसमर्थत्वादप्रतिषेधः । समासः कस्मान्न भवति । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थमित्यत्र भवतीति । द्रव्यमत्रापेक्षते इत्युक्तम् । तत्र कैयटः । ब्राह्मणस्येति षष्ठी न भुक्तापेक्षया । न लोकेतिनिषेधात् । किन्तु ब्राह्मणस्य यौदनादिस्सोऽन्येन भुक्त इति प्रतीयते इत्युक्तन्तेन न्यायेन ब्राह्मणस्य गत इत इत्यत्रापि समासाप्राप्तिरुक्तैवेत्यर्थः । काणर्यादय एवात्रेति । केवलगुणवाचका एवेत्यर्थः । ननु शुक्लादीनाङ्केवलगुणपरतायान्तेषामप्युदाहरणत्वसम्भव इत्यत आह । गुणिपरतापीति । एवञ्च विशेष्यबोधकशब्दविशेषोपादाने प्रकरणादिना तत्रोक्तरीत्याऽसामर्थ्यम् । नान्यत्र । विशेष्याज्ञाने । एवञ्च यदा शुक्ला इत्यादीनामप्रयोगस्तदापि विशेष्ये दन्ते हस्तिरस्त्येव । गुणे शुक्लादयः पुंसीतिकोशस्य गुणात्मकविशेष्ये हस्तावित्यर्थः । शुक्लो वर्ण इति यथा । एवञ्च ब्राह्मणस्य शुक्लो वर्ण इति यत्र प्रयोगस्तत्राप्युक्तरीत्या शुक्ला इत्यनेनासामर्थ्यमस्त्येव । अत एवोक्तङ्काणर्यादय एवात्रोदाहरणमिति । तदुक्तमकृतसूत्रे भाष्ये षष्ठीतिसूत्रे । किम्पुनः कारणं गुणेन नेत्युच्यते न पुनर्गुणवचनेन नेत्युच्येत । नैवं शक्यमिह न स्यात् । काकस्य काणर्यम् । बलाकायाः शौक्ल्यमिति । एतदेव खल्वपि तस्मिन्योगे उदाहरणम् । दृष्टोदम्ब्राह्मणशुक्ला हपलस्य क्षणा इति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम्सापेक्षमसमर्थमित्यत्र भवतीति । द्रव्यमत्रापेक्ष्यते दन्ता इति । तस्माद् गुणेन नेति वक्तव्यमिति । एतेन ब्राह्मणस्य शुक्ला इत्यत्र शुक्ला इत्यस्य वाक्यैकदेशन्यायेन शुक्ला दन्ता इत्यर्थे प्रयोगात्समर्थप्रकृतिकत्वाभावः स्फुट एव । पूरणार्थेन चेतीति । अनित्य इति शेषः । तत्र प्रमाणप्रदर्शनायाह । लोपे चेत्यादपूरणमित्यादीति । मध्यमलोपी समासः । कर्मधारयः । नन्वेवं काककाणर्यमित्याद्यपि स्यादत आह । अन्यत्रेति । अत एव । अस्य निषेधस्यानित्यत्वाभावादेव । नन्वस्यानित्यत्वाभावे गोविंशतिरित्यादिसिद्धिः कथमत आह । सङ्ख्याशब्दा इति । भावशब्दा इतीति । भावप्रत्ययान्ता इत्यर्थः । तेषां शुक्लादीनाम् । उदाहरणत्वसम्भव इति । तत्र हेतुः । गुणिपरतापीति । एवञ्च विशेष्यबोधकशब्दविशेषोपादाने प्रकरणादिना तत्रोक्तरीत्याऽसामर्थ्यम् । नान्यत्र । विशेष्याज्ञाने । एवञ्च यदा शुक्ला इत्यादीनामप्रयोगस्तदापि विशेष्ये दन्ते हस्तिरस्त्येव । गुणे शुक्लादयः पुंसीतिकोशस्य गुणात्मकविशेष्ये हस्तावित्यर्थः । शुक्लो वर्ण इति यथा । एवञ्च ब्राह्मणस्य शुक्लो वर्ण इति यत्र प्रयोगस्तत्राप्युक्तरीत्या शुक्ला इत्यनेनासामर्थ्यमस्त्येव । अत एवोक्तङ्काणर्यादय एवात्रोदाहरणमिति । तदुक्तमकृतसूत्रे भाष्ये षष्ठीतिसूत्रे । किम्पुनः कारणं गुणेन नेत्युच्यते न पुनर्गुणवचनेन नेत्युच्येत । नैवं शक्यमिह न स्यात् । काकस्य काणर्यम् । बलाकायाः शौक्ल्यमिति । एतदेव खल्वपि तस्मिन्योगे उदाहरणम् । दृष्टोदम्ब्राह्मणशुक्ला हपलस्य क्षणा इति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम्सापेक्षमसमर्थमित्यत्र भवतीति । द्रव्यमत्रापेक्ष्यते दन्ता इति । तस्माद् गुणेन नेति वक्तव्यमिति । एतेन ब्राह्मणस्य शुक्ला इत्यत्र शुक्ला इत्यस्य वाक्यैकदेशन्यायेन शुक्ला दन्ता इत्यर्थे प्रयोगात्समर्थप्रकृतिकत्वाभावः स्फुट एव । पूरणार्थेन चेतीति । अनित्य इति शेषः । तत्र प्रमाणप्रदर्शनायाह । लोपे चेत्यादपूरणमित्यादीति । मध्यमलोपी समासः । कर्मधारयः । नन्वेवं काककाणर्यमित्याद्यपि स्यादत आह । अन्यत्रेति । अत एव । अस्य निषेधस्यानित्यत्वाभावादेव । नन्वस्यानित्यत्वाभावे गोविंशतिरित्यादिसिद्धिः कथमत आह । सङ्ख्याशब्दा इति । भावशब्दा इतीति । भावप्रत्ययान्ता इत्यर्थः । तेषां शुक्लादीनाम् । उदाहरणत्वसम्भव इति । तत्र हेतुः ।

त्तिनिमित्तका इत्यर्थः । अत्र भावशब्दो धर्ममात्रपरस्तस्य भाव इत्यत्र यथा। पङ्क्तिविंशतीतिसूत्रे भाष्यमिति । तत्र कैयटोऽपि । भाव इव भावः । यथा शुक्लादिभावः पराश्रय एवमन्योऽपि धर्म इति । तत्रैषामिति । विंशत्यादीनामित्यर्थः । तत्सादृश्यात् । गुणसादृश्यात् । अन्यथा । गुणबोधकत्वस्यैव स्वीकारे । न चैवं रीत्या काणर्यस्यापि भावत्वात्तद्वाचकेन कथन्निषेध इति वाच्यम् । यन्धर्मम्बुद्धिस्थीकृत्य यादृशानुपूर्व्यवच्छिन्नस्य शब्दस्य गुणे प्रवृत्तिस्तस्य धर्मस्य गुणिसमानाधिकरणतादृशपूर्व्यवच्छिन्नशब्दप्रवृत्तिनिमित्तत्वे भावशब्दत्वेन प्रकृते व्यवहारः । विंशत्यादयः सदैकत्वे सर्वाः सङ्ख्ये यसङ्ख्ययोरिति कोशेन विंशतिरित्यानुपूर्व्यवच्छिन्नस्यैवोभयत्र प्रवृत्तिबोधनेन गवां विंशितिरित्यादौ विंशतिशब्दस्य यन्धर्मम्बुद्धिस्थीकृत्य प्रवृत्तिस्तस्य धर्मस्य विंशतिर्गाव इत्यत्र यो विंशतिशब्दस्तत्प्रवृत्तिनिमित्तत्वमस्त्येव । काणर्यशब्दस्य तु यद्धर्मे प्रवृत्तिस्तस्य काणर्यत्वस्य न कदापि गुणिसमानाधिकरणशब्दप्रवृत्तिनिमित्तत्वमिति भावः । इत्यादि न स्यादिति । अत्र हि यथा गुणत्वं पराश्रितत्वन्नति सम्बन्ध्यंशे नित्यसाकाङ्क्षत्वरूपन्तथा धनापत्यशब्दयोरप्यस्त्येवेति समासनिषेधादिति शेषः । गुणवचनानामितिवार्त्तिके तु गुणवचनशब्देन गुणिसामानाधिकरण्येन गुणप्रतिपादकानामेव ग्रहणम् । ननु सुहितेत्यत्र कर्त्तरि क्तस्य सत्त्वेन फलानान्तर्भूतिरित्यत्र कथन्निषेध इत्यत आह । भावे क्त इति । फलानामिति करणस्य शेषत्वविवक्षया षष्ठी । तत्र । फलसुहित इत्यत्र । सम्बन्धत्वेनेति । अवयवशक्तिज्ञानसहकारेण समुदायस्य बोधकतया वाक्यार्थबोधकत्वस्य सत्त्वात् । कर्मणि क्त इति । यत्तु भावे क्त इत्युक्तम्पूर्वत्र तत्तु, सुहितार्थेत्यत्र सूत्रे द्रष्टव्यम् । सकर्मकत्वादेव पितृनतार्षीदितिभट्टिप्रयोगः सङ्गच्छते । तत्र भावे क्तस्तु क्तोऽधिकरणे चेति सूत्रेण बोध्यः । अत एव । क्तदव्ययस्यैव ग्रहणादेव । असामर्थ्यमिति । सुबन्तार्थविशेषानन्वयित्वात् । प्राचीनोक्तं कटाद्यर्थन्नाह । परे त्विति । तादर्थ्यस्येति । तेनाध्याय घास इत्येव तथा च ब्राह्मणस्य क्षेत्रमिति मूलोक्तमसङ्गतमिति भावः । पक्षिनिष्ठितविभक्त्या समास इति । प्राप्त इति शेषः । न च षष्ठ्यन्तयोः समासेऽर्थभेदात्प्रधानस्यापूर्वनिपात इत्ये तन्निरूपणावसरे

येन सुबन्तेन समासस्तन्निरूपितसम्बन्धार्थकमेव षष्ठ्यन्तं गृह्यत इत्युक्तमित्यत्र ताट्स्थ्यषष्ठ्याभावात्कथं समासप्राप्तिरितिनिषेधो व्यर्थ इति वाच्यम्। यत्र व्यधिकरणषष्ठ्यन्तयोः समासस्तत्र ताट्स्थ्येव षष्ठी गृह्यते पूर्वोक्तभाष्यप्रामाण्यात् यत्र तु सामानाधिकरण्यन्तत्र नायन्नियमः। अत्र प्रकृतसूत्रस्थसमानाधिकरणग्रहणमेव मानमिति सूत्रकाराभिप्रायः। तत्पत्रेऽपीति। पार्ष्टिकसामानाधिकरण्येन तत्पत्रेऽपि समासनिषेध इति प्राचीनाः। वस्तुतस्त्वनेन सूत्रेण निषेधकरणसामर्थ्यात्तत्पत्रेऽपि परस्परान्वय एव। तदेवोपपादयति। क्रियान्वेति। अस्यावश्यकत्वात्। समानाधिकरणग्रहणस्येत्यर्थः। ननु समानाधिकरणग्रसमर्थवदित्यस्य तक्षकस्य सर्पस्येत्यत्र चारितार्थ्यात्प्रकरणान्तरस्थे इसुसोः सामर्थ्य इति सूत्रे कथग्रहणमित्यत आह। समर्थसूत्रेति। तक्षकस्य सर्पस्येत्यत्र विशेषणतावच्छेदकस्य तक्षकत्वस्य सर्पत्वात्मकविशेष्यतावच्छेदकव्यभिचारित्वाभावेन न विशेषणसमासप्राप्तिरितिवादिमतन्निरस्यति। विशेषणमित्यादिना। विशेषाभावादिति। उभयथाऽप्यन्तोदात्तत्वात्। नन्वेवमपि प्रथमान्तयोः समासं कृत्वा ततः षष्ठ्यन्तक्षकसर्पस्येति स्यादेवेत्यत आह। एवमिति॥ अन्यत्राप्यनभिधानशङ्कानिरासायाह। एतच्चेति। एवं च। भाष्यकृत्याद्युदाहृतेति स्वीकारे च। ननु प्रकृतसूत्रे समानाधिकरणग्रहणसामर्थ्यादित्येव वक्तव्ये बहुलग्रहणपर्यन्तानुधावनमफलमत आह। निषेधसामर्थ्येति। तत्सार्थक्यादिति। समानाधिकरणग्रहणसार्थक्यादित्यर्थः। तथा चान्तोदात्तस्य गमनश्येत इत्यस्य वारणाय समानाधिकरणग्रहणमिति भावः। गुणप्रवृत्तिनिमित्तकत्वेनेति। एतेन प्राचीनसम्मतमुपसर्जनसंज्ञाबोध्यमुपसर्जनत्वमप्यस्त्येवेति सूचितम्। गोरितीति। पोटायुवतीतिसूत्रेण समासविधानादिति भावः। कस्य चिन्मतं स्वरूपव्याक्रियैव पराक्रियेति रीत्याऽसङ्गतमिति सूचयन्नाह। ये त्विति। षष्ठ्यन्तयोरितिप्रागुक्तभाष्याभिप्रायेणाह। परे त्विति। इदम्। समानाधिकरणग्रहणाकरणम्। उक्त आशयः। येन सुबन्तेन समासस्तदर्थनिरूपितषष्ठ्यन्तेनासामर्थ्यसद्भावरूपः। कथमिति। परस्परान्वयात्कर्मधारयस्थल इवास्त्येव सामर्थ्यमिति भावः। व्याख्यानात्। कर्मणि चेतिसूत्रभाष्ये कर्मणि यः क्त इत्यर्थे पूजायामतिशेषोऽनर्थकः राज्ञाम्पूजितः। राज्ञामर्चितः। कर्मणी-

त्येव सिद्धमिति प्रतिपादितन्तद्दर्शनमूलकात् । यदि सूत्रोपलक्षणम्पूजाग्रहणं स्यात्तदा प्रकृतोदाहरणस्य क्तेन च पूजायामित्येतदुदाहरणत्वसम्भव इति भावः । न च पूजारूपेऽर्थे क्तस्य विधानाभावेन पूजायां यो धातुरित्यर्थकल्पनयाप्येतद्ग्राह्यं योजयितुं शक्यमिति वाच्यम् । तथा सति पूजार्थेभ्य इत्येव सिद्धे पूजायामित्युपादानानर्थक्यापत्तेः । तद्वनयन्निति । भूते यः क्तस्तदन्तेन योगे कारकषष्ठ्या असम्भवेन शेषषष्ठ्येव स्यात् यद्ययं शेषषष्ठ्यन्तस्य समासनिषेधो न स्यात्तदा षष्ठ्यन्तेनैव समासे सिद्धे तृतीयान्तेन समासकथनमफलं स्यादित्येवं कथयता ध्वनितमित्यर्थः ॥ एतेन कारकषष्ठ्या एव समासनिषेधोऽयन्तेन कलहंसमाममहितः कृतवानितिभट्टिप्रयोगोपपत्तिरिति वदन्तः प्रत्युक्ताः । भट्टिप्रयोगस्य तु राजपूजितवदुपपत्तिः सम्भवति तक्रकौण्डिन्यन्यायादितीति । मतिबुद्धिपूजार्थेभ्यश्चेति विशिष्य विधानादस्य शङ्कासम्भवः । असम्भवादिति । एवञ्च विषयभेदान्न बाध्यबाधकभावसम्भव इति भावः । एतेन वर्त्तमानकाले प्रत्ययविधानेन वर्त्तमानकालो भूतकालतास्बाधेतेत्याशङ्क्य तेनैकदिगित्यतस्तेनेत्यनुवर्त्तमाने उपज्ञात इत्यर्थेप्रत्ययविधानेनाबाधः कल्प्यत इति मनोरमायामुक्तम् । दण्डिनापि तथैवानुगदितन्तन्निष्फलमिति ध्वनितम् ॥ कर्मणीति येति । कर्मणीत्यानुपूर्वीकशब्दघटितसूत्रेणेत्यर्थः । एवञ्च । उक्तव्याख्याने च । नियमशास्त्राणां विधिरूपेण प्रवृत्तिरितिसिद्धान्तानुरोधेन तादृशसूत्रेणेति व्याख्यातम् । ल्युजका । न च ल्युट्सान्निध्यात्कर्त्रर्थकस्यैवाकस्य ग्रहणम्भविष्यति किङ्कर्तृग्रहणेनेति वाच्यम् । उत्तरसूत्रे भावार्थकस्यैवाकः सम्भवेनार्थाधिकारानुरोधात्प्रकृतसूत्रेपि भावार्थकस्य ग्रहणमितिशङ्कावारणाय तत् ॥ ननु वज्रस्य भर्त्तेतिमूलोक्तोदाहरणासङ्गतिः । भर्तृशब्दस्य याजकादिगणे पाठेन समासस्येष्टत्वादत आह । मूले पत्यर्थभर्तृशब्दस्येति । तच्च । याजकादिगणे । त्रिभुवनविधातुरित्यत्रङ्कृतन्तृजकाभ्यामित्यस्याजागरूकत्वादित्याशङ्कानिवारणाय शेषषष्ठ्येत्युक्तम्मूले तच्चापि ल्युजकाभ्यामित्यस्य कुतो न प्राप्तिरिति चेत्तत्राह । प्रत्यासत्त्येति । सूत्रे कर्तरीत्यस्योपादानेन कर्तृकर्मणोरित्यस्योपस्थित्या कारकषष्ठ्या उपस्थितत्वात् । तन्निषेधः । समासनिषेधः । कैयटोक्तेरप्रसिद्धत्वशङ्कावारणायाह । गुणविशेषक इतीति । वस्तुतस्तु जनिकर्त्तुः प्रकृतिस्तत्प्रयोजकइ-

तिनिर्देशात्तृजकाभ्यामित्यस्यानित्यत्वकल्पनेन सर्वेष्टसिद्धिः । स.मर्थादिति । कर्त्तरीति न पूर्वोपस्थितयोस्तृजकयोर्विशेषणन्तृजकाभ्यामित्येव सिद्धेरत-स्तदुपादानसामर्थ्यादित्यर्थः । निषेधस्य सिद्धेरिति । यदीदन्निषेधसूत्रं स्यात्तदा जीविकायान्दन्तानां लेखक इत्येवोदाहरणं स्यात्तत्र तु तृजकाभ्या-मित्येव सिद्धमिति भावः । नित्यग्रहणाच्चेति । यदीदन्निषेधसूत्रं स्यात्त-दा विकल्पेन निषेधाप्राप्तेर्नित्यग्रहणंव्यर्थं स्यादिति भावः । तृचोनभि-धानादिति । अकान्तान्तशब्दे एव वाक्यरूपेउच्चारिते जीविकाप्रतीतेरन-भिधानादित्युक्तम् । क्रीडायान्तृचोऽसम्भवादिति । संज्ञासब्दानान्नियता-नुपूर्वीकत्वात् । ण्वुल्तृचाविति सामान्यसूत्रस्य तत्रापि प्राप्तिसम्भावनाया-माह । विच्छिन्नत्वादिति । कर्त्तरि चेतिसूत्रस्य कर्तृषष्ठ्यन्तशेष एव प्र-वृत्तेः सा च तृजन्तेन योगे न सम्भवति । कर्त्तुरभिहितत्वादिति भावः ॥ नन्वेवम्पूर्वपदाद्युदात्तत्वविधायकेऽके जीविकार्थ इति सूत्रेऽकशब्दोपादानवै-यर्थ्यम्पूर्वोक्तरीत्या तस्यैव सम्भवादत आह ॥ अके जीविकार्थ इतीति । अ-धिकरणार्थमिति । अधिकरणस्य प्राधान्यविवक्षायान्भावस्यार्थस्य विशेषणत्वाद्भा-वार्थनिर्देश इत्यस्याप्राप्तेरिति भावः । उद्दालकः श्लेष्मातकः ॥ अवयविवाच-केनेतीति । अत्र सूत्र एकदेशिनेत्यत्र कर्मधारयादपि मत्वर्थीयः । बहुव्रीहिस-मासस्य रूढ्यर्थानभिधायकत्वात् । कृष्णसर्पवान्वल्मीक इति यथा । न चैक-गोपूर्वादिति ठञ्प्रत्यय एवोचित इति वाच्यम् । अवयविने निर्देशस्यैवेन्प्रत्यय-प्रवृत्तौ मानत्वात् ॥ लिङ्गाविशिष्टत्वेति । तेन तस्येदमितिसूत्रस्येदमर्थस्य पुंस्त्वा-दिविशिष्टत्वेपि प्रवृत्तिः । नित्यनपुंसकत्वाभावादिति । एवञ्च भित्तं शकलख-ण्डे वा पुंस्यर्द्धोर्द्धं समेऽशके इत्यस्य प्रायेणेति शेषो बोध्यः । एवं सति प्रकृतसूत्रे नपुंसकशब्दो नपुंसके यो वर्त्तते तस्य ग्रहणार्थन्तु पुंवाचक एव यस्तस्य ग्रह णार्थमित्याशयेनाह । अवयववाची त्विति । तदुक्तभाष्ये । इह कस्मान्न भवति। ग्रामार्द्धो नगरार्द्ध इति । अर्द्धशब्दस्येदन्नपुंसकस्य ग्रहणं पुल्लिङ्गस्यार्द्धशब्दः । क्व पुनरयन्नपुंसकलिङ्गः क्व पुंल्लिङ्गः । समप्रविभागे नपुंसकलिङ्गः । अवयववाची पुंल्लिङ्ग इति ॥ ननु ग्रामार्द्धन्नगरार्द्धमित्यत्रावयववाचिनो नपुंसकत्वन्दृश्यत ए-वेत्यत आह । अपूपार्द्धमित्यादि । भाष्यतत्त्वमत्रैव । यत्रत्र कैयटः अवयववाची

पुंल्लिङ्ग इति। नियमेन नपुंसकलिङ्गो न भवतीत्येवम्परमेतत् ॥ अवयववाचीत्यभिधेयवशात्सर्वलिङ्गः। तथा च प्रयोगो दृश्यते। अपूपार्द्धमया भक्षितन्दन्तार्द्धमास्यात्पतितमिति। तत्र। एओङेच इगितिसूत्रस्थभाष्यप्रामाण्येन समग्रविभागेऽपि पुंस्त्वदर्शनात्। समग्रविभागे नपुंसकलिङ्ग इति भाष्ये नपुंसकलिङ्गोऽपीति शेषो बोध्यः। तदुक्तं समग्रविभाग एवेति। अत्राप्यवयवमात्रविवक्षायान्तु ग्रामार्द्धः पिप्पल्यर्द्ध इत्येव ॥ आहुरिति। भाष्यतत्त्वविदः। अर्द्धाहारः। अर्द्धजरतीयमित्यादिप्रयोगे तु कर्मधारय एव। पिप्पल्या एकविभक्तित्वादिति। नियमेन षष्ठ्यन्तत्वादित्यर्थः। एकविभक्तावषष्ठ्यन्तत्ववचनमित्यस्यैकविभक्तीतिपदघटितसूत्रे यदेकविभक्तिपदन्तदषष्ठ्यन्तस्य बोधकमित्यर्थः। तथा च पञ्चानाङ् खट्वानामित्यत्र खट्वाशब्दात्षष्ठीदर्शनेनोपसर्जनत्वस्य प्रतिषेधः प्राप्नोतीत्याशयेन शङ्कते। नन्वेवमिति। अस्य निषेधस्यैकदेशिसमासविषयकत्वे मानमाह। इदञ्चेति। ननु पूरणगुणेतिनिषेधस्याधिक्ये तिमूलोक्तन्तन्नोपपद्यते द्वितीयशब्दस्य भागार्थकाण्प्रत्ययान्ततया पूरणार्थकप्रत्ययान्तभिन्नत्वादत आह। भागार्थकेति। भाष्ये स्पष्टमिति। तत्र ह्यन्यतरस्याङ्ग्रहणस्य पक्षे षष्ठीसमासफलकत्वमभिधाय क्रियमाणेऽपि वै अन्यतरस्याङ्ग्रहणे षष्ठीसमासो न प्राप्नोति। किङ् कारणम् पूरणेनेति प्रतिषेधात्। नैतत्पूरणान्तम्। अना एतत्पर्यवपन्नम्। व्यवहितम् खरमेदग्राम इति यावत्। एतदपि पूरणान्तमेव। पूरणन्नामार्थस्तमाह तीयशब्दः। अतः पूरणं योऽसौ पूरणान्तात्स्वार्थे भागे अन् सोऽपि पूरणमेवेति। पूरणन्नामार्थ इत्यस्य पूरणाभिन्नो योऽर्थस्तस्य प्रतिपादनमनः स्वार्थिकत्वात्तदन्तेनाप्यस्येवेत्यर्थः। पूरणशब्दे बाहुलकात्कर्त्तरि ल्युट्। पूरयति स्वघटितसमुदायविशेषे विवक्षितसङ्ख्याप्रकारकप्रतीतिञ्जनयतीति व्युत्पत्तेः। भाष्योक्तैकदेशिसमासप्रत्याख्यानप्रकारमाह। पूर्वेत्यादीति ॥ समानाधिकरणसमासः। अर्द्धा चासौ पिप्पली चेत्यादिविग्रहः। भाष्यस्वरस इति। तत्र हि किमर्थश्चकारः अनुकर्षणार्थः। अन्यतरस्यामित्येतदनुकृष्यते। किम्प्रयोजनमन्यतरस्यां समासो यथा स्यात्समासेन सुप्ते वाक्यमपि यथा स्यात्। जीविकाम्राम इति। नैतदस्ति प्रयोजनम्। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति। इदन्तर्हि प्रयोजनन्द्वितीयासमासोऽपि

यथा स्यात् । अयमप्युच्यते द्वितीयासमासोऽपि तदुभयं वचनाद्भविष्यति । एवन्तर्हि नायमनुकर्षणार्थश्चकारः । किन्तर्ह्यनेन विधीयते । प्राप्तापन्न द्वितीयान्तेन सह समस्येते । अत्वञ्च भवति प्राप्तापन्नयोरिति । प्राप्ता जीविकाम्प्राप्तजीविका । आपन्ना जीविकामापन्नजीविका इत्युक्तम् । अत्र कैयटः । चकारेण समुच्चयार्थेनाकारप्रश्लेषोऽनुमीयते सौत्रत्वाच्च निर्देशस्य प्रकृतिभावः प्रगृह्याश्रयो न भवति ॥ एवञ्चाष्यकाराभिधानेन प्राप्तापन्नयोरुद्देश्यत्वात्सन्निधानेन च प्राप्तापन्न इत्यत्रैवाकारप्रश्लेषोऽनुमीयते ॥ अनिष्टव्यावृत्तय इति । यदा जातशब्दात् षष्ठीङ् कृत्वा समाससंज्ञा क्रियते तदा अनिष्टम्प्राप्नोति । इदं सिद्धमिति । मासजात इति रूपमित्यर्थः । जातवच्छब्देन । क्तवतुप्रत्ययान्तेन । एतेन तत्र पूर्वोक्तस्वरविधायकस्याप्राप्तिर्लभ्यते । केचिदित्यनेन सूचितामरुचिम्प्रकटयति । परे त्विति । यदुक्तमुपक्रमे षष्ठीसमासेन सिद्ध इति तदसङ्गतमित्याशयेनाह । परिच्छेद्येत्यादि । अत एव । एतादृशनियमस्वीकारादेव । अन्यथा । परिच्छेदकादपि षष्ठीस्वीकारे । तत्राधान्यम् । जातशब्दार्थप्राधान्यम् । तवैव ममापीति । त्वयापि जातशब्दाद्यदा षष्ठी तदैव वैपरीत्यापत्तिः स्वीकृता यद्यपीत्यादिनोक्तमप्यसङ्गतमित्याशयेनाह । किञ्चेति । गमनादिकर्तृरपीति । भवदुक्तविग्रहवाक्याज्जननकर्तृत्वमासस्यैव प्रतीयते । मासस्यान्यपदार्थे सम्बन्धश्च बहुव्रीहिणा चित्रगुरित्यत्र स्वस्वामिभाव इव प्रकृतेऽपि कश्चन कल्पनीयः । स च स्वपरिच्छेद्यजननाश्रयत्ववत्स्वपरिच्छेद्यगमनशयनकर्तृत्वमपि सम्भवतीति भावः ॥ वृत्तिविग्रहयोः समानार्थत्वनियमाभिप्रायेणाह । अत्रेति । पूर्वजातसंस्कारेति । पूर्वोक्तनियमेन परिच्छेद्यवाचकात्षष्ठी जातापि वृत्त्यर्थबोधकतायास्तदन्तघटिते विवक्षायां न निवर्तत इत्यर्थः । अन्यथा । वृत्त्यर्थबोधकविग्रहवाक्ये मासशब्दात्षष्ठीस्वीकारे । प्रत्ययानाम्प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य प्रकृते त्यागे बीजमाह । शब्दस्वभाव एवेति । अस्यैव हेतुत्वमाह कैयटोऽपि । वृत्तिवाक्ययोः परिमाणिनः प्राधान्याप्राधान्ये शब्दशक्तिस्वभावाद्भवत इति । अन्यमतं खण्डयति । यत्त्विति । समानार्थत्वे ति । समानविशेष्यकप्रतीतिजनकत्वं हि समानार्थत्वमिति भावः ॥ ननु किम्प्रधानोऽयमित्यादिभाष्येण समासस्यैव प्राधान्यन्दर्शितन्न तु विग्रहस्येति कथमेतदित्यत आह । किम्प्र-

धानोऽयमित्यादि । अन्यथा । उभयपरत्वाभावे ॥ एतद्विषये विशेषमाह । अत्रेति । अनभिधानादिति । गमकाभावेन द्वित्वाद्यप्रतीतेरिति भावः । एतद्विषयमेव । तत्रत्यतत्पुरुष पदस्यैतद्विहिततत्पुरुषपरत्वादेव ॥ सप्तम्यन्तस्य शौण्डादिभिः सामर्थ्यमुपपादयति । अधिकरणेति ॥ मनोरमोक्तन्दण्डाजुक्तञ्च दूषयति । आसक्त्यादीति ॥ तदप्रतीतेः । आसक्त्यादिक्रियाया अप्रतीतेः । अत एव भाष्यकृता एवन्नाभिहितम् ॥ तपसा सिद्ध इति । प्रधानस्य सापेक्षत्वेऽपि समासः । ज्ञात इत्यर्थ इति ॥ अस्मिन्नर्थे न सापेक्षत्वमपीति भावः । व्याख्यानादिति । ध्वाङ्क्षेण चेपेऽर्थग्रहणम् । इहापि यथा स्यात् । तीर्थकाक इतीतिभाष्यमूलकादित्यर्थः । एवं हि निर्देशः । तदुक्तभाष्ये । यथा तीर्थे काकाश्चिरं स्थातारो न भवन्ति । एवं यो गुरुकुलानि गत्वा न चिरन्तिष्ठति स उच्यते तीर्थकाक इति ॥ उपलक्षणमिति । तदुक्तभाष्ये । क्त्वो र्नियोगे यत्यर्थयेनेति वक्तव्यम् । पूर्वाह्णेगेयं साम । प्रातरध्येयोऽनुवाक इति । तक्तर्हि वक्तव्यन्न वक्तव्यम् । क्तेन इत्येव सिद्धम् । इह यद्यस्य नियोगतः कार्यं क्तेनान्तस्य तद्भवति । तच्च क्तेन इत्येव सिद्धम् । यद्यस्येति । अवश्यकर्त्तव्यतासामान्यादुपचारादन्यत्रापि क्तेनशब्दस्य प्रयोगदर्शनाद्गौणस्याप्यर्थस्य शास्त्रे लक्ष्यवशेन क्वचिद्ग्रहणमित्यर्थ इति कैयटः ॥ अभिधानस्वाभाव्यादिति । तदुक्तभाष्ये । यङ्ग्रहणङ्कर्त्तव्यम् । इह मा भूत् । पूर्वाह्णेदातव्या भिक्षेति ॥ नन्वभिहितत्वात्तत्रेतिशब्दात्सप्तमी दुर्लभेत्यत आह । अधिकारेति । तेन । सप्तमीग्रहणानुवर्त्तनेन । तृतीयापदेन परमेण कारकेण परमकारकेणेत्यत्र पूर्वपदप्रकृतिस्वरवारणाय प्रतिपदोक्तस्य तृतीयासमासस्य ग्रहणात्तत्साहचर्यात्सप्तमीपदेन प्रतिपदोक्तस्य समासस्य ग्रहणादिति भावः । ननु पूर्वपदप्रकृतिस्वरोऽव्ययत्वेन सिद्ध इत्यत आह । अव्ययत्वेनेति ॥ नकुलस्थितशब्दस्य क्तान्तत्वमुपपादयति । क्तङ्क्तेनेति ॥ चकारबलाद्वृत्त्यन्तर इति नोक्तन्तत्र बीजमाह । समासेति । तदुक्तभाष्ये । किमर्थश्चकारः । एवकारार्थः । पाचे समितादय एव । परमं पाचे समिता इति ॥ अत्र कैयटः । वैयधिकरण्येऽपि विस्पष्टपटुवत्समासः प्रयोक्तव्यः । परममिति क्रियाविशेषणमिति । परमाः पाचे समिता इति पाठो ज्यायान् ॥ पूर्वकालेतिशब्दस्य समासादर्शनादाह । अत्र पूर्वकालशब्द इति । स्नातानुलिप्तादिलक्ष्यदर्शनमत्र व्याख्याने शरणम् ॥ अनैयत्ये पीति ।

गुणक्रियाशब्दत्वात् ॥ अप्रसिद्धत्वादिति । तेन शीघ्रोपस्थितिकत्वात्संख्यावाचकत्वस्यैव ग्रहणम् । विशेषणमित्यस्यैवेति । तस्य स्वविषयताव्यापकविषयताकत्वात् । तत्फलमाह । तेनेति ॥ कालवाचकत्वादिति । दिग्ग्रहणेन दिग्वाचकस्य ग्रहणमिति भावः । अत एव पूर्वपदार्थप्रधान इत्यादिप्रयोगोपपत्तिः । देशवाचकेनापीति । समासो भवतीति शेषः ॥ तद्धितार्थे वाच्ये इति । यस्मिन्नर्थे तद्धितो विधीयते तस्मिन्वाच्य इत्यर्थः । अत एव । पूर्वोक्तकल्पनया तद्धितोत्पत्तिस्वीकारादेव । अनभिधानादिति । अत्र प्रसाधनन्तु मत्वर्थे प्रतिषेध इति वार्त्तिकमेव । युक्त्यन्तरमाह । तदर्थे इति । तेन पञ्चस्वट्वा दशस्वट्वा । अत्रद्विगुसमासो न भवति । सति च तस्मिन् द्विगोरिति ङीप् स्यात् तथा च बहुव्रीहेष्टाप् तथा पञ्चगुर्दशगुः । अत्र द्विगौ गोरतद्धितलुकीति टच् मा भूदिति । अत एव । भावघञन्तत्वादेव । यदि समाहारपदे कर्मणि घञ् स्यात्तदा पञ्चस्वट्वाः समाहृता इत्येवार्थः स्यात्तदा नियतविभक्तिकत्वन्न स्यात् । एवञ्च समाहरणमेकस्याङ् क्रियायां गुणे वा समीपीकरणमिहार्थो विवक्षितः । बुद्धिपरिकल्पितभेदवान् । अत एव पञ्चानामिति षष्ठी ॥ समूहसमाहारशब्दयोः पर्यायत्वाभिप्रायेण शङ्कते । समूहस्येति । तत्सामर्थ्यात् । समाहारग्रहणसामर्थ्यात् एवञ्च समाहारे यच्च समासस्तत्रोक्तार्थत्वात्तद्धितस्योत्पत्तिरेव नेति न तद्धितलुग्विषयनिषेधस्य प्रवृत्तिः । सति शिष्टत्वात् । तत्पुरुषसंज्ञाया उत्तरकालिकत्वात् ॥ षाण्मातुरेऽनपत्य इत्यत्र लुक् न लुक् । ततश्च । विकल्पे सति च । एतेन कर्मधारयपूर्वपदकबहुव्रीह्याश्रयणेन पूर्वशालाप्रियशब्दे पूर्वशालाशब्दान्त्यस्योदात्तत्वे सिद्धे प्रकृतसूत्रे उत्तरपदग्रहणं व्यर्थमित्यपास्तम् । कर्मधारयसंज्ञाया वैकल्पिकत्वात्पञ्चे पञ्चगोधनस्यायत्तेः । स्वष्टञ्चेदमिति । तत्पुरुषसंज्ञाया अवयवसम्बन्धिन्या नित्यत्वं स्वष्टमित्यर्थः । अत एव । वार्त्तिकस्य नित्यत्वमाचफलकत्वादेव । तत्र विशेषमाह । तत्र तत्पुरुष इति । अत एव । तत्पुरुषसंज्ञाया उभयत्र प्रवृत्तेरिष्टत्वादेव । द्वन्द्वविषये विशेषमाह । द्वन्द्वस्त्विति । ननु पदार्थभेदे द्वन्द्वस्य प्रवृत्तिदर्शनाद्बहुव्रीह्यवयवस्य चैकार्थत्वात्कथम्बहुव्रीह्यवयवानां द्वन्द्वः वार्त्तिकबलादभेदेपि द्वन्द्व इति चेदुभयत्रापि नित्यत्वमाचबोधकं वार्त्तिकमिति पूर्वग्रन्थविरोध इत्यत आह । वाग्दृषदग्नि इत्यादाविति । यदु-

म्बहुव्रीह्यवयवोत्तरपद एवैति तत्फलमाह । न द्वन्द्वावयव इति । भाष्यप्रयोगेणेति । एतेन चतुर्णान्द्वन्द्वे एकार्थीभावबलाद्दाग्दृषच्छ्वोपानद्दमित्यत्रापि द्वन्द्वसंज्ञाऽवयवोः स्यादित्यपास्तम् । ननु बहुनामेकार्थीभावेऽपि पृथग् द्वयोरेकार्थीभावाभावात्कथं संज्ञान्तरमत आह । पदयोरिति । निष्कृष्यैकार्थीभावाभावेऽपि वृत्तिः परमगार्ग्यायण इति भाष्यप्रामाण्यादस्तु निष्कृष्य सामानाधिकरण्याभावेऽपि बहुव्रीहिरित्यत्र तु न मानमत आह । एवन्तयोरिति । अत एव । निष्कृष्य सामानाधिकरण्याभावेऽपि बहुव्रीहिस्वीकारादेव । अत्र चयाण्म्बहुव्रीहिसंज्ञायामपि द्वयोस्तद्धितार्थेतिसूत्रेण द्विगुसंज्ञायां पश्चिमशालाशब्दान्त्यस्योदात्तत्वम्पश्चिमाशब्दस्य पुंवद्भावश्च सिध्यति । न विनिगमकमिति समुदायवृत्तावयवानाम्मा कदा चिदप्यवृत्तिर्भूदितिवार्तिकाशयवर्णनपरभाष्यप्रामाण्येन निष्कृष्य सामानाधिकरण्याभावेऽपि बहुव्रीहिसंज्ञा भवति । वाग्दृषदप्रियः छत्रोपानद्दप्रिय इति भाष्यप्रामाण्यादिति भावः । अस्य प्रत्याख्यानपक्ष इति । वार्त्तिकप्रत्याख्यानपक्ष इत्यर्थः । एवं हि भाष्ये वार्त्तिकाशयवर्णनोत्तरमुक्तम् । तत्तर्हि वक्तव्यञ्च वक्तव्यम् । इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च यदा वृत्तिपक्षस्तदा सर्वेषामिव वृत्तिः । यदा अवृत्तिपक्षस्तदा सर्वेषामवृत्तिरिति । समुदायस्यैकार्थीभावे तदभावोऽवयवयोर्न युक्तो विरोधात् । तेन नित्यत्वमपि सिद्धमिति भावः । इत्यादिबहुव्रीहावित्यत्रादिना द्वौ मुनी वंश्यौ प्रियौ यस्येति बहुव्रीहेर्द्विस्त्रिशब्दियो अस्येति बहुव्रीहेश्च सङ्ग्रहः । आद्ये स्वरे दोषः । अन्त्ये बहुव्रीहौ संख्येय इति समासान्तापत्तिश्च । अव्ययीभावादित्यादिना तत्पुरुषसंग्रहः । अत एव चिराजरद्गुरिति प्रयोगसङ्गतिरन्यथा पूर्वकालैकेत्यवयवयोस्तत्पुरुषे जरतीशब्दस्य पूर्वनिपातापत्तिः । तेन । अतद्धितलुकीत्युपादानेन । ननु समाहारो बहूनां सम्भवति न त्वेकस्येति कथमेकापूपीति प्रयोगोऽत आह । एकापूपीति । अनभिधानादिति । अस्येतिकेयङ इति शेषः । तथाहि । संख्यापूर्व इतिसूत्रे किमनन्तरे योगे यः संख्यापूर्वः स द्विगुसंज्ञ आहो स्वित्पूर्वमात्रे । किञ्चातः । यद्यनन्तरयोगे एकशाटी द्विगोरितीकारो न प्राप्नोति । अस्तु पूर्वमात्रे एकभिक्षा अत्रापि प्राप्नोति । अस्त्वनन्तरे । कथमेकशाटीति । ईकारान्तेन समासो भविष्यति । एका शाटी एकशाटी ।

इह तर्ह्येकापूपी । द्विगोरितीकारो न प्राप्नोति । अस्तु तर्हि पूर्वमाचे । कथमेकभिक्षा । टाबन्तेन सह समासो भविष्यति । एतेन यदा भिक्षशब्देन गुरोश्चहल इत्यकारान्तेन समासस्तदा एकभिक्षीतीष्यत एवेत्यस्मिन् प्रकरणे नोक्तमित्यनभिधानाद्भिक्षशब्देन समासोनभिधानान्न भवतीति सूचितम् । इदन्तर्हि सप्तषेयः इगन्ते द्विगावित्येष स्वरः प्राप्नोति । अस्तु तर्हि पूर्वमाचे । कथमेकापूपी । समाहार इत्येव सिद्धमिति । भाष्ये उक्तम् । अस्मिन् प्रकरणे एकभिक्षी इति भाष्ये नाभिहितमित्यनभिधानङ्कैयटेनोक्तम् । परन्तु प्रयोगाप्रदर्शनमात्रेणानभिधानन्न युक्तमित्यनभिधाने मानान्तरमन्वेषणीयम् । लाघवादिति । अन्यद्विगावपि प्रवृत्तिस्वीकारे विधायकत्वापत्त्या गौरवापत्तेः । अत एव । अनुवादकत्वादेव । एकशेषे नेति । तत्रैकस्य पञ्चपूलीशब्दस्य बह्वर्थाभिधायकतया बहुवचनमेव भवति । न केवलमनुवादत्वे एकशेषाप्रवृत्तिरेव फलं किन्तु फलान्तरमप्यस्तीत्याह । अनुवादफलन्त्विति । तथा विवक्षायाः । उद्भूतावयवभेदत्वविवक्षायाः । अनुवादत्वकल्पनायामुक्तसूत्रस्थं समाहारग्रहणञ्च तद्विधार्थप्रतिषेधार्थमिति वार्त्तिकमपि साधकमिति बोध्यम् । स नपुंसकमितिसूत्रघटकस्य तच्छब्दस्य द्विगुरेकवचनमित्यारभ्य यस्तिरोहितावयवभेदः समूहः प्रतिपादितस्तत्प्रतिपादकतया यत्रबध्नन्तदाह । स नपुंसकमित्यत्रेत्यादिना । व्याख्यानादिति । प्रकृतसूत्रभाष्ये किमुदाहरणम् । वैयाकरणखसूचिः । किं व्याकरणङ्कुत्सितमाहो स्विद्वैयाकरणः । वैयाकरणः कुत्सितस्तस्मिन् कुत्सिते तत्स्थमपि कुत्सितम्भवतीति भाष्ये उक्तम् । एतेन प्रवृत्तिनिमित्तस्याश्रयकुत्सया यत्र कुत्सा गम्यते तत्रैवैतत्सूत्रप्रवृत्तिरिति लभ्यते । आश्रयकुत्सा च शब्दप्रयोगसमानकालिकी तत्र प्रयोजिकेतिव्याख्यानमूलकादित्यर्थः । अत एव । पूर्वपदस्य लाक्षणिकत्वादेव । उपमानानीत्युपादानात्तत्प्रतिसम्बन्धिवाचकोऽत्र सामान्यवचनशब्द इत्याशयेन सामान्यवचनशब्दार्थनिर्वक्तृ । सामान्येति । स्वसिद्धान्तमाह । परे त्विति । उभयत्र । उपमानोपमेययोः । अत एव । उपमानोपमेययोरभेदान्वयादेव । अन्यथा । उपमानत्वेनोपमानबोधकेत्यर्थास्वीकारे । तेन समासलाभ इति । उपमानेन समासलाभ इत्यर्थः । न चैतदनुपादाने पूर्वनिपातव्यवस्था कथमिति वाच्यम् । प्रथमान्तसुबग्रहणानुवृत्त्या तस्या लाभात् ।

भाथस्वरस इति । तत्र हि यत्र किञ्चित्समानङ्किञ्चि विशेषस्तत्रोपमानोपमेये भवत इत्युक्ता उपमानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानमेवमुक्ता श्लक्ष्णीश्यामेति सूत्रोदाहरणमित्युक्तम् । समानाधिकरणेनेति वर्त्तत इति चोक्तम् । तेनोपमानोयमेययोरभेदान्वय इति स्पष्टमेव लभ्यते । यद्यपि वैयधिकरण्येप्युपमानोयमेयभावो गौरिव गवय इत्यत्र दृश्यते । प्रस्थादिमानं यथा धान्यपरिच्छेदङ्करोति यद्यपि धान्यं स्वरूपतो निर्ज्ञातमेव तथापि विशेषधर्मवत्त्वेन न निर्ज्ञातमप्रस्थादिसम्बन्धेन तु विशिष्य ज्ञायते एतावतैव तस्य परिच्छेदकता गवयस्यापि गवयशब्दवाच्यत्वेन रूपेण ज्ञानेऽपि ईदृशाकारो गवय इति ज्ञानङ् ग्रामीणस्य पूर्वन्नास्ति गौरिव गवय इत्यारण्यकवाक्यात्तु तादृशशाब्दबोधो भवतीति तस्यापि परिच्छेदकत्वम् । परिच्छेदकत्वसाधर्म्यादुपमाने मानसामीप्यव्यवहारः । न चैवं व्याख्यानेऽव्ययीभावसमासे उपमानानीति न स्यादिति वाच्यम् । उपमानानीत्यनेन निर्देशेन तत्पुरुषस्य निपातनात् । किञ्च प्रस्थादिमानस्थलेऽन्येनापरिच्छिन्नधान्यनिर्ज्ञातस्य प्रस्थस्य परिच्छेदकमिह तु कदाचिद्गवय इव गौरित्यपि भवतीति मानसामीप्यव्यवहारः । तथापि प्रकृते सामान्यवचनैरित्यस्योपादानात्समानाधिकरणाधिकाराच्चैतादृशे विषये समासाभावः । उपमानस्य विशेषणतैवेति । विशेषणस्य विशेष्यपरिच्छेदकताया लोकप्रसिद्धत्वात् । उपमितमित्यत्तत्स्यादिति । उपमेयत्वेनोपमेयबोधकमित्यत्तदर्थबोधकत्वात्तस्येति भावः । अत एव । समानलिङ्गकस्थल एवैतस्य प्रवृत्तिस्वीकारादेव । अन्यथा । असमानलिङ्गकस्थलेऽप्यस्य सूत्रस्य प्रवृत्तिस्वीकारे । भाथाश्विरित्यादि सिद्धमपायमाह । भाथाश्विरिति । लिङ्गभेदेऽपीति । एतेन यत्र सामान्याप्रयोगस्तत्राप्युपमितिसूत्रात्प्रवृत्तिरिति ध्वनितम् । मयूरव्यंसकादिसमासस्य पूर्वपदार्थप्राधान्यन्दर्शयति । स चेति । भाथाश्विरित्यादाविति । प्रसङ्गेन दृगब्जेनित्यादीनामादिपदेन सङ्ग्रहः । रूपकमेव । अभेदरूपकमेव । भाथाश्विरित्यत्र पूर्वपदार्थप्रधानसमासनिर्देशः पूर्वपदार्थेतिगम्भीरत्वादिविशेषणान्वयाय स्वीक्रियते । दृगब्जेनेत्यत्र वीक्षणान्वयाय यथा । प्राचीनोक्तन्निरस्यति । यत्त्विति । क्वचिदनुपात्तधर्मेण सादृश्याभावविवक्षायाः स्थलमाह । सकलकल इति । दिगिति । रूपकस्य

स्वीकारेणैवोपपत्तौ परिणामस्य पृथगलङ्कारता न स्वीकार्या। एवं सामान्यधर्मप्रयोगे मयूरव्यंसकादिसमासे रूपकमेव। विभिन्नलिङ्गकस्थलेऽप्येवमेवेत्यादि द्रष्टव्यम्। स्वमतसिद्धप्रक्रियया शाब्दबोधाकारमाह। उपमानशूरेत्यादि। तत्त्वमिति। उपमानत्वमित्यर्थः। ननु विशेषणस्योपमानस्य नित्यसापेक्षत्ववदुपमेयस्यापि नित्यसापेक्षत्वे नैव समाससंज्ञा सिद्धावत्र चेदमेव ज्ञापकमिति वर्णनमयुक्तमत आह। यद्यप्युपमेयत्वमिति। तद्धर्मत्वेन। साधारणधर्मवत्त्वेन। तत्त्वम्। साधारणधर्मवत्त्वम्। व्याख्यानात्। वक्ष्यमाणयुक्तिमूलकात्। तामेवाह। व्यावर्त्तकत्वरूपमिति। विशेषणविशेष्ययोः ससम्बन्धिकत्वादन्यतरोपादानेनैव सिद्धे उभयोपादानेन यत्सिद्धान्तदाह। अत्रेति। जातिशब्दस्य गुणक्रियासमभिव्याहारे विशेष्यबोधकता नीलोत्पलम्। विकसितमालतीत्यादौ। संज्ञाशब्दस्य तत्त्वमण्डितचैत्रः पाचकचैत्र इत्यादौ। अनियम एव! कुञ्जखञ्जः। खञ्जकुञ्जः। पाचकपाठकः। पाठकपाचकः। इत्यादौ यथा। व्याप्यव्यापकेति। परस्परव्याप्यव्यापकभावानापन्नयोरित्यर्थः। अत्र च तयोः साङ्कर्येऽपि साङ्कर्यस्य दूषकताबीजानिरुक्तोस्तादृशधर्मयोर्जातित्वेन किञ्चिद्बाधकमिति बोध्यम्। भूतमूर्तयोरिति। भूतत्वञ्चन्यविशेषगुणत्वावच्छिन्नसमवायिकारणतावच्छेदकतया मूर्तत्वञ्च क्रियासमवायिकारणतावच्छेदकतया सिद्धम्। तज्ज्ञापनयोः। व्याप्यव्यापकभावापन्नयोः। अवयवशब्द इति। व्याप्यधर्मविशिष्टवाचकः शब्द इत्यर्थः। न त्वत्र मुख्योऽवयवावयविभावः। अत एव। अवयवशब्दस्य विशेषणत्वादेव। अन्यथा। पूर्वोक्तनियमास्वीकारे। कर्मधारये। वर्णो वर्णेनेतिसूत्रसाध्य इत्यादिः। तादृशनियमस्वीकारे तु प्रकृते कृष्णशब्दस्य कृष्णयत्किञ्चिदवयवकपरतया सारङ्गशब्दस्य च नानाजातीयरूपवद्भिरवयवैरारब्धपरतया च कृष्णशब्दस्यावयवशब्दत्वेन कर्मधारयेऽपि पूर्वनिपातानियमः स्पष्ट इति तद्ग्राथसङ्गतिरिति भावः। द्वयोरवयवशब्दत्व इति। कृष्णपीतः पीतकृष्ण इति यथा। न च विषयतासम्बन्धेन द्रव्यचाक्षुषत्वावच्छिन्नमति समवायसम्बन्धेन रूपस्य कारणत्वमिति कार्यकारणभावानुरोधेन चिचाख्यरूपान्तरस्वीकारात्कथङ्कृष्णसारङ्ग इत्यादावयवशब्दत्वमिति वाच्यम्। समवायानङ्गीकारेणावयवावयविनोर्गुणगुणिनोस्तादात्म्याङ्गीकारादवयवरूपेणैव प्रत्यक्षस्वीकारादिति सङ्क्षे-

पः । एवञ्च । पूर्वोक्तनियमसिद्धौ च । असाध्वेवेति । ङित्यशब्दस्य संज्ञाशब्दत्वादिति भावः । शाब्दबोधे भानादिति । वाक्यार्थत्वादित्यादिः । एतेन विशेषणविशेष्यभावव्यवहारस्योपपत्तिः सूचिता । समर्थसूत्रे भाष्य इति । तत्र हि सर्पिः कालकम् । यजुः पीतकमित्यादाविसुसोः सामर्थ्य इतिसूत्रप्राप्तषत्वनिवारणाय समानाधिकरणमसमर्थवदितिवचनारम्भे सर्पिष्पीयते यजुष्क्रियत इति प्रयोगे षत्वाभावशङ्काया अधात्वभिहितमिति समानाधिकरणांशे विशेषणदानेन वारणे कृतेऽपि वीरः पुरुषो वीरपुरुष इत्यत्र सामर्थ्यात्समासाभावशङ्कायामुक्तं समानाधिकरणेषूपसङ्ग्रानमिति । ततो न वा वचनप्रामाण्यात् । न वा कर्त्तव्यं किञ्चारणं वचनप्रामाण्यात् । वचनप्रामाण्यादत्र समासो भविष्यति समानमध्यमध्यमवीराश्चेति । अत्र वचनारम्भसामर्थ्यादत्र समासो भविष्यति इति भाष्यकृतोक्तम् । अत्र कैयटः वचनप्रामाण्याद्वाचनिकसामर्थ्यं बाध्यते । वीरः पचन्नित्यादौ तु धात्वभिहिते अनभिधानाद्बहुलग्रहणाद्वा समासाभावमन्यते इति । यदि क्रियाशब्दैः पाचकादिभिः समासः स्यात्तदा वचनप्रामाण्याभिधानमसङ्गतमेव स्यादित्याशयः । यत्तु भृत्यभरणीय इत्यादौ विशेषणमिति समासोऽनुपपन्नः समानार्थत्वाद्यत्र किञ्चित्समानङ्किञ्चिच्च विशेषस्तत्रैव विशेषणसमास इति कश्चिदाह तन्नेत्याशयेनाह । भृत्यभरणीयादाविति । तत्रैवेति । समर्थसूत्र इत्यर्थः । भृत्यभरणीय इत्यत्र नैतौ समानार्थौ । अत्र ह्येकत्र शक्यार्थे अपरत्रार्हार्थे कृत्यः । तेन । श्रेण्यादिषु च्व्यर्थवचनमित्यस्य कथनेन । अत्र वार्तिके च्व्यर्थेत्युपादानाद्यत्र च्विप्रत्ययो वैकल्पिकत्वान्नोत्पन्नस्तदर्थस्याभूततद्भावस्य च विवक्षा तत्रानेन सूत्रेण समासः यत्र तु च्विप्रत्यय एव तत्र तु परत्वादुत्तरसूत्रप्रवृत्तिरित्याशयेनाह । च्व्यन्तानान्विति । कृतादिराकृतिगण इति । एतेन श्रेण्यादिपदेन तु पठितानामेव ग्रहणम् । श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगण इति भाष्यात् । एकप्रकृतिकत्व एवेति । प्रत्यासत्तेर्बलीयस्त्वात् । तेन सिद्धञ्च तदभुक्तञ्च कर्तव्यञ्च तदकृतञ्चेत्यत्र न समासः । नञ्वैशिष्ट्यञ्च स्वाव्यवहितोत्तरत्वसम्बन्धेन । एवञ्च विशिष्टपदोपादानमत्र स्पष्टार्थम् सनञा इत्येव सिद्धेः । एकप्रकृतिकत्व इत्यत्र प्रमाणन्तु प्रकृतसूत्रस्थनञ्विशिष्टे समानप्रकृतिग्रहणङ्कर्तव्यमितिवार्त्तिकमेव । यत्तु सनञेत्येव सिद्धे

विशिष्टपदोपादानेन विशिष्टपदस्य विलक्षणार्थकत्वकल्पनयाऽवधारणार्थस्यान्तर्भावश्च क्त्वा नञ्मात्रकृतवैलक्षण्यविशिष्टेनेत्यर्थकत्वन्नञ्विशिष्टपदस्य कल्पनीयमिति समानप्रकृतिकत्वलाभ इति । तन्न । तथार्थकल्पने लुडिडधिकेनाग्नितानग्नितेन जीवति क्लिष्टाक्लिग्नितेन जीवतीत्यस्यासिद्धापत्तेः । अपादिग्रहसंग्रहायाह । नञ्ग्रहणञ्चेति । कृतापकृतादीत्यादिना भुक्तविभुक्तं पीतविपीतमित्यनयोः संग्रहः । अत्र प्रमाणन्तु कृतापकृतादीनाञ्चोपसङ्ख्यानमिति वार्तिकमेव । वार्त्तिकारम्भफलं वक्तुमाह । यद्यपीति । ननु महापापभवति ब्राह्मणहननादित्यत्र पूजाभावाक्कथं समाससिद्धिरत आह । महापापमित्यादाविति । स्वगुणांशे । अधिकदुःखजनकत्वरूपे । ननु डतमच्प्रत्ययस्य जातिपरिप्रश्न एव विधानेन सिद्धे कतरकतमाविति सूत्रे जातिपरिप्रश्नग्रहणं व्यर्थमत आह । द्वयोरेकस्येति । व्याख्यानादिति । कतरकतमौ कर्मधारय इति सूत्रे विकल्पेन पूर्वपदप्रकृतिस्वरविधायके कर्मधारयग्रहणकरणसामर्थ्यसूचकादित्यर्थः । तद्धि तत्सूत्रे यद्यपि प्रतिपदोक्तपरिभाषया निष्फलन्तथाप्यार्यां ब्राह्मणकुमार्योरित्युत्तरसूत्रस्थ कुमारस्य ब्राह्मणः कुमारब्राह्मण इत्यत्र षष्ठीतत्पुरुषे अप्रवृत्त्यर्थं क्रियते । यदि प्रकृतसूत्रे समानाधिकरणपदावयवक इत्यर्थो न स्यात्तदा षष्ठीतत्पुरुषस्यापि शोभनादिपदसमानाधिकरणत्वात्तस्य तत्रानुवृत्तिर्व्यर्था स्यादिति भावः । एवं सति प्रकृते समानाधिकरणपदमर्थाद्यजञन्तदृष्टव्यम् । पुंवत्कर्मधारयेति सूत्रे स्त्रियाः पुंवदितिसूत्रघटकपदेषु केषाञ्चिदनुवृत्तिर्भवति केषाञ्चिन्नेत्यत्र निमित्तमाह । व्याख्यानादिति । पृथक्सर्वनिषेधप्रकरणं समाप्येदं सूत्रं कृतम् यद्यपूरणीप्रियादिष्वित्यस्याप्यनुवृत्तिः स्यात्तदा कर्मधारयांशे स्त्रिया इतिसूत्रस्थ प्रकृतसूत्रस्थ च समानविषयत्वमेव स्यात्तथा सति प्रकृतसूत्रं निषेधप्रकरणस्थ न कोपधाया इत्यारभ्य क्त्वस्य बाधकमेवेति मध्येऽपवादन्यायाविषयतया स्त्रियाः पुंवदितिसूत्रानन्तरमेवेदं सूत्रं पठितं स्यात् पुंवदिति च न कृतं स्यादिति पुनः पुंवद्ग्रहणकरणमूलकव्याख्यानादित्यर्थः । एतेन । पूरणीप्रियादिष्वप्यस्य प्रवृत्तिस्वीकारेण । एतेनेति । कोपधादिविषयेऽपि पुंवद्भावस्येष्टत्वेनेत्यर्थः । कोपधादेरित्यत्रादिपदमुपात्तन्तद्ग्राह्याणि सूत्राणि स्पष्टप्रतिपत्तये प्रदर्शयति । न कोपधाया इत्यादि । एतेन पुंवत्व-

दघटितस्य प्रकृतसूत्रस्य निषेधप्रकरणानन्तरम्पाठेन सर्वनिषेधबाध इति सूचितम्। यत्तु प्रकृतसूत्रव्याख्यानोपक्रमे स्त्रियाः पुंवद्भाषितपुंस्कादनूङित्यनुवर्त्तत इत्यत्र पुंवद्ग्रहणन्तदनुवर्त्तमानपदद्वयसन्दंशपतितमिति सह पाठादुक्तं तु सम्मति तस्य प्रयोजनमस्तीति बोध्यम्। ननु निषेधाश्च बलीयांस इतिन्यायेन निषेधप्रकरणस्यैतद्बाधकतोचितेत्यत आह। विध्वङ्मूलकत्वेति। विधेरचारितार्थ्यादिति। पुंवत्पदघटितविधेरचारितार्थ्यादित्यर्थः। पुरस्तादपवादन्यायस्य लक्ष्यानुरोधेन प्रकृतेऽनाश्रयणादाह। बाध्यसामान्यचिन्तेति। इभपोटेत्यत्र भग्रहणस्य जातिवाचकत्वप्रदर्शनादाह। जातेः पूर्वनिपातार्थमिति। प्रशस्त इत्यर्थ इति। एतेन मूले एवमेव पाठ इति सूचयति। प्रशस्तशब्दस्य विशेष्यनिघ्नत्वात्सर्वत्र लिङ्गविपरिणामेनान्वयः। जरतीग्रहणेति। इदं हि जरतीशब्दस्य परप्रयोगार्थमत्र सूत्रे पठितम्। यदि जरत्यां युवतीधर्मारोपेणारोपितप्रवृत्तिनिमित्तकोत्र युवतीशब्दः स्यात्तदा युवतीशब्दस्यैव विशेषणबोधकतया विशेषणसमासेनैव सिद्धमिति भावः। तुल्यमहानित्यत्र सन्महदितिसूत्रेण समासे महच्छब्दस्य पूर्वनिपातः स्यादत आह। तुल्येति। ननु परत्वेन सन्महदितिसूत्रस्य यदीदम्बाधकन्तदा सत्कृत्यमित्यादिप्रयोगाणाङ्का गतिरत आह। सत्कृत्यमित्यादि। ननु भोज्य ओदन इत्यादावस्य सूत्रस्याजात्येत्येतदुपादानादप्रवृत्तावपि विशेषणसमासः स्यादेवेत्यत आह। सामर्थ्यादितीति। पूर्वनीति। अस्य जातिवाचके न समास इत्यादिः। उभयत्रापीति। सूत्रद्वयप्रवृत्तावपीत्यर्थः। सामर्थ्यादिशेषणसमासाप्रवृत्तिकल्पनमुपपादयति। जातीति। पूर्वनिपातानियम इति। गुणक्रियाशब्दयोर्विशेषणविशेष्यभावस्यानियतत्वादिति भावः। इदम्। प्रकृतसूत्रम्। अचाजात्येत्येतदभावेपि जातिवाचकेनानेन सूत्रेण समासे फलतो न विशेष इति जातिभिन्नवाचकेन शब्देन सह समासविधायकमिदं सूत्रमविषयतीति प्राचीनोक्तन्न युक्तमित्याह। परे त्विति। उक्तार्थस्य। क्त्यतुल्याख्याः जातिभिन्नवाचकेनैव प्रायेण समस्यन्ते क्व चित्तु क्त्येतिसूत्रस्य बहुलग्रहणानुवृत्त्याऽप्रवृत्तिरित्यस्य स्पष्टप्रतिपत्तेर्लाभायेत्यर्थः। तादृशेनेति। समानाधिकरणेनेत्यर्थः। इत्येव सिद्ध इति। यच्चैकोऽवयवशब्द इत्यादिना तस्य विशेषणतायाः बोधनादिति भावः। इतिस्वरविधायक इति। एतभिन्नवर्णवा-

चके उत्तरपदे पूर्वपदप्रकृतिस्वरविधायक इत्यर्थः। अत एव । प्रतिपदोक्तस्यै-तत्सूत्रविहितसमासस्य ग्रहणादेव। कर्मधारयप्रकरण इति। इदं स्वरविधायकं सूत्रं अज्यावमिति सूत्रानन्तरम्पठनीयमिति भावः। वार्त्तिकलभ्यमिति। पो-टायुवतीतिसूत्रस्थं जातिग्रहणन्तु क्लत्यतुल्याख्या इति सूत्रेण विच्छिन्नम्मण्डूक-प्लुतौ च न मानमिति भावः। पूर्वपदप्रकृतिस्वरेति। अस्य तत्पुरुषे तुल्यार्थेति सूत्रविहित इत्यादिः। एतदन्तर्गण इति। मयूरव्यंसकाद्यन्तर्गण इत्यर्थः। क्रियाप्रधानमिति। अत्र तिङन्तमिति पाठः। कर्त्तारमित्यत्र कर्त्तृग्रहणस्य नित्यसाकाङ्क्षत्वादाकाङ्क्षापूरणायाह। उक्तेरित्यादिरिति। तदेतदुपपादयति। अहीत्यादि। प्रत्यये भाषायामित्यस्याप्राप्तेराह। अत्रेति। अयम्मयूरव्यंसकादिराकृतिगणः। तेन कां दिशं गच्छामीत्यर्थे कान्दिशीकस्य अहो पुरुषोऽहमिति यो मन्यते सः अहोपुरुषस्तस्याहं शक्तोहंशक्त इति यस्यामित्यर्थेऽहमहमिकेत्यस्य या इच्छा इत्यर्थे यट्टच्छा इत्यस्य साधुत्वं बोध्यम्। अकृतेत्यस्य स्थान इति। अत एवेषद्गार्य इत्यत्र नातिप्रसङ्गः। पूर्वपदप्रकृतिस्वरो नेति। इदं चात्र सुप्सुपेति समासो भवति। अकारानुच्चारणे त्वनेन समासे पूर्वपदप्र-कृतिस्वरप्राप्तिरव्यये नञ्कुनिपातानामिति परिगणनसूचकवाक्ये अकाररहि-तनकुनिपातानामिति पाठाभिप्रायेण। अव्यये परिगणने च अकारसहितपाठे तु न राजेत्यादौ टजभावः फलबोध्यम्। अत्रैव। नैकधैत्यादावेव। अत ए-व। अकाररहितस्याभावादेव। अस्य इतिभाष्योक्तमित्यनेनान्वयः। इत्याशय इति। पूर्वपक्षिण इति शेषः। अव्ययेषु पठितस्यैवेहानुकरणादिति भावः। पामनपुत्र इति। अत्र अकारोच्चारणेऽनति नलोपापत्तिः। भाष्योक्तं सङ्गच्छत इति। यद्यव्ययेषु अकाररहितमप्यव्ययं स्यात्तदा नैकधेत्यादावेव नलोपं व्या-वर्त्तयितुं अकारोच्चारणस्यावश्यकत्वेन पामनपुत्र इत्येतत्पर्यन्तानुधावनं व्य-र्थं स्यादिति भावः। उभयत्र। नञ इति सूत्रे नलोपो नञ इति सूत्रे चेत्यर्थः। न च पामनपुत्रे दोषाभावाय अकारस्यावश्यकत्वेन स्पष्टार्थ इत्यसङ्गतमिति वाच्यम्। नलोपविधायकसूत्रस्योत्तरपदाधिकारस्थत्वेन तेन पूर्वपदाच्चेपेण पूर्वपदभूतस्य नस्य नलोप इत्यर्थेनादोष इत्याशयात्। नन्वेवन्नैकधेत्यत्र नलो-पापत्तिरत आह। नैकधेत्यादीति। सार्धमिति। नलोपाभावकल्पनयेत्यादिः।

रूढेरिति । अत्र मानन्तु तदधिकारीयकार्याणाम्मुख्यसमासावयव एव प्रदर्शनम् । पञ्चम्याः स्तोकादिभ्य इतिसूत्रे तादृशस्य ह्रस्वमर्वेनार्थाधिकारात्प्रकृतेपि तादृशस्यैव ग्रहणाच्चेत्यपि बोध्यम् । नुड़भावायेति । नलोपविधानन्तु हलादौ चरितार्थम् । व्याख्यानादिति । अनचीत्यादिनिर्देशमूलकव्याख्यानादित्यर्थः । नुक् तु न क्षत इति । तस्य नुगिति न्यासेनेत्यादिः । डमुट्प्रसङ्गादिति । न च सम्बुद्वाविति सूत्रेऽनार्ष इत्यत्र डमुटोऽकरणेन लुप्तनकारान्नञः परस्य डमुण्नेति कल्पनान्नायन्दोष इति वाच्यम् । अचीतिसप्तम्याः षष्ठ्यर्थकत्वकल्पनभिया न्यासभेदेन नुक्करणे डमुट्व्यावृत्तये ज्ञापकस्याश्रयणे गौरवात् । न च न मया तादृशनिर्देशानां डमुड़भावे ज्ञापकत्वमाश्रीयते । किन्तु नुगागमस्याजादिपदसन्निपातनिमित्तकत्वे न तद्विघातकडमुड़ागमस्यत्वनिमित्तत्वमिति सन्निपातपरिभाषया डमुड्वार्यत इति वाच्यम् । न अः अनः अनश्चासावजश्चानाज इत्यत्र पदस्य विभज्यान्वाख्यानपक्षेऽन् अजइत्यवस्थायां वर्णमात्रापेक्षत्वे नान्तरङ्गत्वइयोरकारयोरेकादेशे नुगागमनिमित्तसन्निपातस्य सवर्णदीर्घेण विनाशात्परादिवद्भावेनाजादिपदत्वान् डमुड़ापत्तेर्दुर्वारत्वात् । नञोऽकचि क्षते चिच्चादन्तोदात्तत्वे च क्षते नकश्चर्मशब्दयोस्तत्पुरुषे नकारलोपेऽकनर्मभित्य च नुड़ागमपक्षे जायमानस्यार्मे चावर्णं इत्यच्चञजितिपूर्वपदादुदात्तत्वस्य नुगागमपक्षेऽवर्णान्तत्वाभावेनाभावापत्तेश्चेति दिक् । नञ्समासस्थले बोधप्रक्रियान्दर्शयति । आरोपित इत्यादिना । तादात्म्यारोपस्य । तादात्म्येनारोपस्य । एवं संसर्गारोपस्थेत्यत्रापि बोध्यम् । लोष्टादिप्रतीतिरिति । एतेषां विजातीयतया सादृश्याप्रतीतेरिति भावः । भेदेन तदारोपबोध इति । भेदसम्बन्धे नोत्तरपदार्थारोपबोध इत्यर्थः । इदम्यस्यायामिति । रथोहागमेतिवाक्यस्थमित्यर्थः । असंहितमिति । अस्याद्भुतायामित्यादिः । वार्त्तिकार्थमाह । द्रुतभिन्नायामित्यादिना । स्वसिद्धान्तमाह । परे त्विति । तत्रादौ जवन्यभ्यक्तमाह । अन्यपदार्थप्रधान इति । तस्य । उत्तरपदस्य । अत एव । धर्मिपरत्वे बहुव्रीहिसमासाश्रयणादेव । नन्वस्यान्यपदार्थप्रधानत्वेऽस इत्यादौ सर्वनामकार्यानुपपत्तिरत आह । अस इत्यादाविति । ज्ञापकादिति । यद्यत्र सर्वनामकार्यं न स्यात्तदा अस इत्यत्र हल्ङ्यादिलोपेन सुलोपस्य दुर्वारतयाऽनञ्समासग्रहणं व्यर्थमिति भा-

वः । अत्र पक्षे । अन्यपदार्थप्रधानत्वपक्षे । प्राग्वदेव । अनञ्समासग्रहणस्य ज्ञापकत्वादेव । सत्त्वभूतार्थाभिधायित्वेन ।पूर्वपदस्य सत्त्वभूतार्थाभिधायित्वेनेत्यर्थः । स्खलान्तरदृष्टप्रकारेण समाधानमाह । यद्वेति । गुणवचनानामितिवचनप्रवृत्तिप्रकारमुद्दर्शयति । अभावेनेति । अन्यथा । प्रतियोगिन आश्रयत्वाकल्पने । गुणवचनानामित्यत्र गुणपदमन्याश्रितपरमिति भावः । तद्दोषेति । अवर्षा हेमन्त इत्यादौ लिङ्गवचनासिद्धिरूपदोषेत्यर्थः । एतत्समकक्षतया । निर्दोषत्वेन समकक्षतया । तत्प्रधानत्वात् । उत्तरपदार्थप्रधानत्वात् । अन्यथा । नञाऽव्ययीभावस्वीकारे । अव्ययीभावासिद्धिरिति । पूर्वपदार्थप्रधानत्वपक्षे इत्यादिः । क्रियादिप्रतियोगिकेति । अत्रादिना गुणस्य सङ्ग्रहः । नञाऽव्ययीभावाभावे पूर्वोक्तां युक्तिं स्मारयति । किञ्चेति । इदमाथमिति । पूर्वपदार्थप्रधानत्वपक्षेऽव्ययीभावासिद्धिरूपदूषणानभिधानपरमाथमित्यर्थः । न तदसङ्गतिः । नासंहितमितिशब्दानुपपत्तिः । अत एव । संहितापरपर्यायसंहितशब्दस्वीकारादेव । पद्यादींस्तु दुग्दात्तानामसंहितवदुत्तरानिति प्रातिशाख्ये तद्भाष्ये च जात्यवद्वा तथा वान्तौ तनूश्चीतिपूर्वयोरित्यस्य व्याख्यावसरे तथा वा संहितवद्वा असंहितवद्वेत्युक्तमित्यर्थः । परः सन्निकर्ष इतिसूत्रस्थभाष्यीयव्याख्यानेनार्थाभावेऽव्ययीभाव इति भ्रमः स्यादतस्तद्भाष्यविरोधमपि परिहरति । अत एवेति । नञाऽव्ययीभावाभावादेव । प्रसङ्गादिति । नलोपप्रसङ्गादित्यर्थः । अप्राशस्त्येऽत्र नञ् । अत एव । नञो नलोप इतिवचनारम्भादेव । मूलोक्तरीत्याह । नञा समास इति । एवमेव । नञ्शब्देन सह समासादेव । येतु मतरीत्या त्वेतेषु पृषोदरादित्वमेव कल्प्यम् । पादित्यस्य शत्रन्तत्वेन व्याख्याने प्रमाणमाह । पातेः क्विपीति । वैचित्र्यार्थमिति । सूत्रे उपात्तस्यापि वचनस्याविवक्षारूपवैचित्र्यस्य बोधनायेत्यर्थः । न विद्यते सत्यं येषान्तेऽसत्याः । न असत्याः नासत्या इत्यर्थः । अयञ्च रूढ इत्याह । अश्विनोरेवायमिति । हरदत्त इति । परेण नमुचिशब्देन रूढेन साहचर्याद्रूढस्यैवेदन्निपातनमिति तद्भावः ॥ तेन । अव्ययसंज्ञकस्यैव कृञ्शब्दस्य ग्रहणेन । तदनुवर्त्तत इति । क्रियायोगग्रहणमनुवर्त्तत इत्यर्थः । अत एव । एतदनुवर्त्तनादेव चिण्डाच्प्रत्ययमात्रस्य क्रियायोगाभावादिति भावः प्राङ्निपाता इत्यधिकारादाह । ऊर्यादय इति ॥

निपाताः सन्त इति । एवं व्याख्यानेन गतिनिपातसंज्ञयोः समावेससिद्धि-र्यत्तु व्यवधानेन प्रयोगस्तत्र ते प्राग्धातोरिति सूत्रस्य संज्ञानियमत्वपक्षे ग-तिसंज्ञाऽभावेऽपि निपातसंज्ञा भवत्येव तेनाव्ययसंज्ञायां सुपो लुक्सिद्धिः ॥ क्रियाशब्दार्थं व्याचष्टे । मर्यादेति ॥ खलिति । भाव इति शेषः । यस्तु कर्तृ ख्युड़न्तो दासीवाची यश्च कर्मण्युडन्तः श्लोकवाचकस्तं व्युदस्यति । दासीत्या-दि । व्याख्यानादिति । गतिश्चेतिसूत्रभाष्ये कारिकाशब्दस्योपसंख्यानमितिवा-र्त्तिकव्याख्यानावसरे कारिकाकृत्येत्युदाहृतन्तत्र कैयटेनोक्तं क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणात् क्रियाहत्तेर्ग्रहणादिति तन्मूलकादित्यर्थः । अयमभ-वः क्रियायोगश्च नान्वयरूप एव विवक्षितः । किन्तु वाच्यवाचकभावोऽपि गृह्य-ते विनिगमनाविरहात् । एवञ्च प्रकृते तु द्वितीये एव प्रयोगदर्शनादवसीयत इति ॥संज्ञानियमार्थत्व इति । धातोः प्राक्प्रयुज्यमानानामेव गत्युपसर्गसंज्ञा इत्येवंरूप इत्यर्थः । प्रयोगनियमार्थ इति । अयमेव पक्षः सूत्रकारसम्मतः । अ-त एव छन्दसि परेऽपि व्यवहिताश्चेतिसूत्रे प्रणीतवान् ॥ इदमिति । अनि-तिपरग्रहणमित्यर्थः । अत एव । संज्ञानियमस्याभिप्रेतत्वादेव । ननु संज्ञानि-यमपक्षेऽपि कटं सुकराणीति प्राप्नोत्यत आह । कटं सुकराणीति ॥ अनभिधाने मानन्तु सूत्रद्वयारम्भपक्षे सु कटं कराणि वीराणीत्यत्र गतेः प्राक् प्रयोगः प्राप्नोतीत्युक्तम् । तत इष्टापत्तिनिवारणार्थमभुमर्थं कृतस्य कर्त्रर्थकर्मणो-श्च भूकृञोरितिसूत्रविहितखल खित्वस्य ज्ञापकत्वोपपादनसमये यदि चात्र गतेः प्रयोगः स्यात्खित्करणमनर्थकं स्याद्गतेरव्ययत्वादित्युक्तम् । अत्र प्राप्नोति स्यादितिशब्दोच्चारणेनाभिधानमेव । अत्र पक्षे । खलः खित्त्वेन ज्ञापकेन संज्ञा-नियमार्थत्वसमर्थनपक्षे । एतद्विशेषणाभाव इति । अनितिपरमितिविशेष-णाभाव इत्यर्थः ॥ एतद्बलादेव । परग्रहणबलादेवेत्यर्थः । तस्य । परग्रहण-स्य ॥ अनादरपदे तत्पुरुषभ्रममिरस्यति । अनादर इतीति ॥ अस्मिन्सू-त्रेऽसङ्ग्रहणन्तु भाष्ये प्रत्याख्यातम् । गोष्पदं सेवितासेवितेतिसूत्रेऽसेवितपदे न जुपादानादगोष्पदस्येवासत्कल्पत्वस्यापि प्रकृतेऽनादरग्रहणेन सिद्धेः ॥ नपुंस-कत्वोपपत्तये आह । शब्दस्वरूपे इतीति ॥ ननु पयःपानक्रियाया एव पूर्वका-लिकत्वेन हन्धातोः क्त्वाप्रत्ययोऽनुपपन्न इत्यत आह । परावरयोगे चेतीति ॥

तथा चाप्राप्य नदीम्पर्वत इत्यत्र यथा पर्वतप्राप्तिक्रियायानदीकर्मकप्राप्तिक्रियाप्रागभावसमानकालिकत्वलाभेऽपि क्त्वा भवति तथाऽत्रापि पयःपानक्रियायाः अङ्गातिशयहननप्रागभावसमानकालिकत्वे विवक्षितेपि क्त्वा भवतीति भावः । मूले पुरोऽव्ययमितिसूत्रे पुरस्कृत्येत्येवोपात्तन्तदर्शनेनानास्यापि कृञयोग एव प्रवृत्तिरिति भ्रमस्यात्तन्निवारणायाह । पुरोभूयेत्यादि । अत एव पुरोहितमित्यत्र गतिरनन्तर इतिसूत्रेण पूर्वपदप्रकृतिस्वरः सिद्धः । न चैवमसुम्भुरः पश्यसि देवदारुमित्यत्र नमस्पुरसोरिति सत्त्वापत्तिरिति वाच्यम् । खित्वेत्यस्याध्याहारेण हविष्प्रत्यगतित्वात् । अव्ययपदमनुवर्तत इति । उत्तरसूत्र इव तस्यावश्यकतया प्रकृतेरपि सम्बन्धो भवति । क्रियायोगइत्यनुवृत्तेरिति । तथा च गत्यर्थवदधात्वर्थक्रियायोगेऽच्छेत्यव्यं गतिसंज्ञमिति सूत्रार्थः । अनुस्वारव्यवधानादिति । अच्छेतिशब्दस्येत्यादिः । इदमाद्यायकमिति । च्व्यर्थवृत्तित्वमाद्यायकमित्यर्थः । ऊर्यादिषु स्वरादिषु चेति । पठनीय इति शेषः । फलसिद्धमिति ॥ ऊर्यादिपठितस्य गतित्वं स्वरादिपठितस्य तदभाव इति विकल्पफलसिद्धिमित्यर्थः ॥ ननु मध्यादीनां सप्तम्यन्तानां गतिसंज्ञासन्नियोगेन सप्तम्यलुङ्निपातनेन सिद्धे एदन्तत्वनिपातनं व्यर्थमत आह । सप्तमी त्विति । मध्यम् । पिदमिति । व्यधिकरणे एते पदे । प्रत्ययेन । ज्ञानेन । व्यवस्थार्थानीति । एतैनैतेषां यत्र विषयता तत्र समासः कुगतीतिसूत्रे णैव । वार्त्तिकानान्त्वर्थव्यवस्थार्थकत्वमिति सूचितम् । ननु द्वितीयायाः श्रवणसिद्धिफलककर्मप्रवचनीयसंज्ञाविधानसामर्थ्यादेव समासाभावे सिद्धे कर्मप्रवचनीयानामिति व्यर्थमता अह । सा संज्ञात्विति । अयञ्च निषेधोऽनित्यः । सुराजाऽतिखट्वः अतिराज इत्यादिभाष्यप्रयोगात् । कर्मप्रवचनीयानामितिवचनस्यानावश्यकत्वमाह । भाष्ये त्विति । एतदेवेति । क्काङ्खितिवचनमित्यर्थः । एषामावश्यकत्वे नेति । अर्थव्यवस्थार्थमावश्यकत्वे नेत्यर्थः । अत एव । अधिकारत्वादेव । इत्यादि सङ्गच्छते । इत्यादि प्राचांव्यवहारः सङ्गच्छते इत्यर्थः । येन । सूत्रेणेति शेषः । नन्वेकस्यसूत्रस्योभयविधायकत्वं कथमत आह । कर्मणीत्यादाविति । तत्स्थम् । स्वनिष्ठवाच्यतानिरूपितवाचकतासम्बन्धेन तस्मिन्पदे विद्यमानम् । एवं सति यत्फलितमत्तदाह ।। तद्वाच्यमिति । महासंज्ञयेति । सा चान्वर्थत्वाय कृता समीपो-

चारितम्पदमिति । एतेन तद्वाचकपदलाभः । तत्प्रकृतिके । स्तम्बकर्णप्रकृतिके । अन्यथा । लक्षणाया अनाश्रयणे । स्तम्बकर्णयोरिति सप्तम्याः प्रथमार्थत्वेन रमिजपोरनन्तरमच्प्रत्ययो भवति स्तम्बकर्णौ चोपपदसंज्ञकौ भवत इत्यर्थापत्त्या यच्च सुबन्तन्नसप्तम्यन्तपदस्थं यच्च सप्तम्यन्तपदस्थं तन्न सुबन्तमिति सूत्रार्थानुपपत्तिः । ननु स्तम्बकर्णयोरित्युपादानसामर्थ्यात्तयोः सुबन्तत्वाभावेप्युपपदसंज्ञा भविष्यतीति चेदेवमपि समाससंज्ञाविधायके उपपदमिति सूत्रे प्रथमान्तसुब्ग्रहणानुवृत्त्योपपदसंज्ञकसुबन्तस्य तेन समासविधानादनुपपत्तिरेव तदाह । समासानापत्तिरिति । सुबन्तमेवोपपदमिति सुपीतिसप्तम्याः प्रथमार्थत्वादिति भावः । समाससंज्ञाविधायकसूत्रस्याबृत्त्याऽर्थद्वयपरत्वं भविष्यतीति चेत्तत्राह । आवृत्त्येति । महासंज्ञाविरोधश्चेति । स्तम्बकर्णेतिप्रातिपदिकयोरुपपदसंज्ञास्वीकारे महासंज्ञाविरोधस्तयोः पदत्वाभावात् । एतेन प्रवृद्धकेन पदस्यैवोपपदसंज्ञेत्युक्तम्भवति । स्तम्बकर्णयोरित्यत्र लक्षणेत्युक्तमेव । सुप्यजातावित्यादावाह सुप्यजातावित्यादीति । अत्रादिना सुपि स्थ इत्यादिसङ्ग्रहः । तेषाम् । अग्रशब्दादीनाम् । अत एव । महासंज्ञाकरणेन विभक्त्यन्तस्यैवोपपदसंज्ञास्वीकारादेव । यद्युपपदमिति सूत्रे सुप्युपेत्यस्य सम्बन्धः स्यात्तदा सुप्यजातावित्यादिना सुबन्तस्यैवोपपदसंज्ञाविधानेनोपपदप्रकृतिकसुबन्ताभावात्तत्रानुपपत्तिः स्यात् । नन्वानुपूर्व्यव्यवधानानाश्रयणे गुरुन्नमस्करोतीत्यादावण् स्यादत आह । गुरुमित्यादि । नन्वेवमिति । अस्याधिकारत्व इत्यर्थः । सन्नियोगशिष्टत्वमिति । यस्य प्रत्ययविधायकसूत्रस्य सप्तम्यन्तपदघटितत्वमनुषङ्गेण सप्तम्यन्तपदैकवाक्यता वा भवति तेन सूत्रेण प्रत्ययविशेषस्य सप्तम्यन्तपदस्थस्योपपदसंज्ञायाश्च विधानं युगपद्भवति यस्य तु प्रत्ययविधायकस्य न तथात्वन्तस्य केवलप्रत्ययविधायकत्वम् । यथा तव्यत्तव्यानीयर इत्यादीनाम् । अन्यथा । उपपदसंज्ञासन्नियोगशिष्टत्वानङ्गीकारे । अन्वाचयशिष्टत्वं सम्भाव्येतेति । तथाहि । कर्मण्यणित्यादौ कर्मणो यस्मिन् प्रयोगे विधीयमानाण्प्रत्ययप्रकृत्यर्थान्वयित्वन्तच तस्योपपदसंज्ञापि भवति । धातोरण्प्रत्ययस्तु तदभावेऽपि भवतीति सम्भाव्येत कर्मणीतिसप्तम्यन्तपदोच्चारणन्तु यच्च तादृशस्य पमीपोच्चारितत्वन्तदोपपदसं-

ज्ञाविधायकत्वेन चरितार्थम् । न प्रवृत्तिरिति । तत्र हि भाव इति सप्तम्यधिकरण एव भावेऽर्थे क्यच् भवतीति तदर्थात् तस्मिन् सूत्रेऽनुवर्त्तमानं यत्सुपीति तत्र या सुपीति सप्तमी सा प्रथमार्थे सौत्री । एवन्तद्विशेषणबोधकेऽनुपसर्ग इतिपदेऽपि प्रथमार्थ एव । तद्भावस्थेति । का चित्सप्तमी प्रथमार्थे का चित् स्वार्थेऽधिकरण एवेति व्यवस्थेत्यर्थः । अनुनासिकत्वादिवदिति । उपदेशेऽजनुनासिक इदितिसूत्रप्रवृत्त्युपयोग्यनुनासिकत्वादिवदित्यर्थः । लक्ष्यानुरोधात् । ब्रह्मभूयमितिशब्दजन्यशाब्दबोधे धात्वर्थस्य भवनस्यैव विशेषतया भानमनुभवसिद्धमिति भाव इति सप्तम्याः प्रथमार्थत्वञ्च । भव्यमभव्यमित्यादौ क्यपोऽदर्शनेनानुपसर्गे सुपीत्यनयोस्तु प्रथमार्थत्वमेवेति कल्पनमेवं लक्ष्यानुरोधात्कल्पनीयमिति भावः । अत एव । सुबन्तस्योपपदसंज्ञास्वीकारादेव । नलोप इति । राजनि युधि कृञ इति सूत्रे राजनोति सप्तम्याः प्रथमार्थत्वकल्पनया सुबन्तस्यैव क्विप्प्रत्ययविधानसमकालिकोपपदसंज्ञास्वीकारादिति भावः । प्रकृतसूत्रघटकस्यातिङितिपदस्य प्रयोजनमाह । एधानाहारक इति । अत्र हि ण्वुल्विधायकसूत्रस्थायाः क्रियायाङ् क्रियार्थायामिति सप्तम्याः प्रथमार्थत्वेन व्रजतीत्यस्य विभक्त्यन्तस्योपपदत्वेऽपि समाससंज्ञाविधायकसूत्रेऽतिङित्यस्योपादानान्न समासः । उपपदसंज्ञाफलं तु तदुच्चारण एव प्रत्ययस्य भवनमिति । तिङन्ताघटित इति । समासस्य तिङन्तत्वम्प्रत्ययग्रहणपरिभाषया न सम्भवतीत्यतिङ्पदं तत्र तिङन्ताघटिते लाक्षणिकमिति भावः । इदमत्र बोध्यम् । उपपदमतिङितिसूत्रेणोपपदेन नित्यैकार्थीभावो बोध्यते समर्थपरिभाषाया उपस्थापनात् । अत एव महान्तङ् कुम्भङ्करोतीति वाक्यमिव न तत्राण्प्रत्ययः । एधानाहारको व्रजतीत्यत्र ण्वुल् तु भवत्येव । क्रियापदस्य कारकपदेन नित्यसाकाङ्क्षत्वात् । इदमिति । कुम्भ असित्यत्र ङकारानुच्चारणमित्यर्थः । अप्रवृत्तेरिति । शास्त्रप्रवृत्तेः सफलकत्वस्वभावादिति शेषः । अस्य । उपपदसमासस्य । सिद्धान्तरीत्याह । कारकषष्ठीत्वेनेति । अत्र भाष्य इति । तत्र ह्यन्तरङ्गत्वाभिप्रायेण वार्तिककारोक्तषष्ठीसमासादुपपदसमासो विप्रतिषेधेनेत्यनेन विप्रतिषेधस्य खण्डनङ्कृत्वा षष्ठीसमासस्यापि कारकषष्ठीविषये सुबुत्पत्तेः प्राक् प्रवृत्त्यधिप्रायेणाथ वा विभाषा षष्ठीसमासः यदा न षष्ठीसमासस्तदोपपदस-

मास इत्यनेन तत्र नित्यै कार्थीभावस्यैव बोधनादिति । एवञ्च । गतिकारकेति-परिभाषायाङ्कारकशब्दमात्रस्योपादानेन कारकविभक्त्यन्तस्य कृद्भिः समास-विधायकं यद्यच्छास्त्रन्तेषाङ्कृदन्तात्, वुत्पत्तेः प्राक् प्रवृत्तिरित्यस्य सिद्धौ चेत्य-र्थः । अत एव । कारकसामान्यविषयकत्वादेव । तदंशे । कारकांशे । प्रमाण-न्नोपन्यस्तमिति । एवं चायमंशो वार्त्तिक इति लब्धम् । ननु भाष्योक्तपरिभा-षाप्रत्याख्यानविरोध इत्यत आह । परिभाषा नेत्यादि । विशिष्टायाः । गति-कारकोपपदेतिवांशविशिष्टायाः । अकर्त्तव्यत्वपरमिति । अंशत्रयोपेताऽपूर्वा न कर्त्तव्या किं तु कारकेत्यंशविशिष्टा अपूर्वा कर्त्तव्या इति भावः । तादृशक-ल्पनायामौन्मानमाह । अत एवेति । तदंशेऽपूर्वत्वादेव । दिगिति । अयमाशयः । अत्र भाष्येऽतिङिति किमर्थम् । कारको व्रजति । हारको व्रजति । अतिङिति शक्य-मवक्तुम् । इह कस्मान्न भवति कारको व्रजति । सुप्सुपेति वर्तते । अत उत्तरं पठति अतिङिति तदर्थस्यायमतिषेधः । कस्य । तिङर्थस्य । कः पुनस्तिङर्थः क्रिया । अत्र क्रियायास्तिङर्थत्वकथनन्तस्याः प्राधान्याभिप्रायेण । यदि क्रिया-वाचकस्य प्रतिषेधस्तर्हि लाघवादक्रियेत्येवास्त्वित्याशयेन तदुक्तङ्क्रियाप्रति-षेधो वा । अथ वा व्यक्तमेवेदम्पठितव्यमुपपदमक्रियेति । अथाक्रियेति किम्प्र-त्युदाक्रियते कारको गतः । अत्र कैयटः । गतशब्दः क्रियावाच्युपपदन्तत्र तुमु-ण्खुलाविति ण्वुल् । कर्तुङ्कृत इत्यर्थः । अत्र प्रकृतिवाच्यक्रियाश्रयो यदि ण्वुल् तदा तदाश्रयः समासनिषेधोऽपि स्यात् । ततो भाष्यकृतोक्तन्नैतत्क्रियावाचीति । प्रत्ययार्थस्य कर्तुः प्राधान्यान्न प्राधान्येन क्रियावाचीत्यर्थः । अत एव भा-ष्ये किं तर्हि द्रव्यवाचीति । नन्वेवमत्र समासः स्यादिति चेन्न । तस्यानुपपद-त्वात् । यद्यपि धातोः क्रियावाचकत्वन्तदाश्रयो ण्वुल् स्वीक्रियते तथापि त-स्योपपदसंज्ञाऽन्वर्थाभावान्न प्राप्नोतीति भावः । वस्तुतो नैतत्क्रियावाचीति भाष्यस्वारस्यादत्र ण्वुलपि न । प्राधान्येन क्रियावाचकस्यैव प्रत्ययोत्पत्तिनिमि-त्तत्वादिति भावः इदं तर्हि कारकस्य गतिः । कारकस्य व्रज्येति । भावेऽत्र प्रत्ययसङ्गावेन क्रियावाचित्वमस्तीति पूर्वपक्षाशयः । एतदपि द्रव्यवाचि । क-थम् । कृदभिहितो भावो द्रव्यवद्भवतीति । लिङ्गसङ्ख्यासम्बन्धाद् द्रव्यवाचित्व-मिति भावः । अत्र कैयटः । धातुरत्र साध्यभूतां क्रियामभिधातुमुपादीयते प्रत्ययस्तु

तस्या एव क्रियाया उपसंहृतक्रमभूतां सत्त्वरूपतामाह प्रत्ययार्थश्च प्रधानमिति यत्सुबन्तन्न तत्क्रियावाचि यत् क्रियावाचि तन्न सुबन्तम्। एतेनाचापि गतुल् न सम्भवति। तुमुण्ण्वुलाविति सूत्रे क्रियार्थायामिति स्त्रीलिङ्गनिर्देशेन क्रियार्थायाः क्रियाया एव लाभे पुनः क्रियाग्रहणेन साध्यमाचावस्थक्रियाप्रतिपादकस्यैव ग्रहणात्। न च कारको व्रजतितरामित्यत्र समासाभावार्थं तदर्थप्रतिषेध आवश्यक इति वाच्यम्। तादृशप्रयोगाणामभिधानाभाव इत्याशयात्॥ कैयटोक्तोपसंहृतक्रमभूतामित्यस्योपसंहृतक्रमत्वसमानाधिकरणवैजात्यरूपामित्यर्थः। ततः सिद्धान्तिना एवन्तर्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः अनयोर्यौगयोर्निवृत्तं सुप्सुपेति। किमेतस्य ज्ञापने प्रयोजनम्। गतिकारकोपपदानां कृद्भिः सह समासो भवति प्राक् सुबुत्पत्तेरिति परिभाषा न कर्त्तव्या भवति। अचानयोर्यौगयोरित्युपादानेनातिङ्ग्रहणस्यैव पूर्वयोगनियामकत्वमपि कल्प्यते। अतिङन्तः समास इतिसूत्रहृदयविहितः समासो विशेषत इति भावः। एतदर्थस्तूक्त एव। न च प्रपचतितरामभ्रजल्पतितरामितिप्रयोगस्तिङि चोदात्तवतीतिसूत्रभाष्ये दृश्यते। तत्र हि तिङ्ग्रहणस्यामन्द्रैरिन्द्र हरिभिर्याहीत्यत्र प्रयोजनमभिधाय यत्क्रियायुक्ता इतिन्यायेन मन्द्रशब्दस्य गतित्वात्तन्निवर्त्यं यदि यन्निरूपितङतित्वन्तस्यैवोदात्तवतो ग्रहणं तदा यत्प्रकरोतीत्यत्र प्रत्ययोदात्तत्वे नोदात्तवति गतिनिघातो न स्यात्तस्य गतित्वादिति तिङ्ग्रहणङ्कर्त्तव्यमिति रीत्या तत्प्रयोजनमभिधाय यदि तिङ्ग्रहणङ्क्रियते आमन्ते न प्राप्नोति। प्रपचतितरां प्रजल्पतितरामित्युक्तं तत्र नित्यसमासवारणायातिङ्ग्रहणमस्त्विति वाच्यम्। तिङि चोदात्तवतीतिसूत्रस्थभाष्यप्रामाण्येन तत्र नित्यसमासस्येष्टत्वादिति के चित्। वस्तुतोऽत्रातिङ्ग्रहणेन गतिसमासनिषेधात्सुप्सुपेत्यस्य वैकल्पिकत्वात्समासाभावेऽपि तिङि चोदात्तवतीतिसूत्रस्थभाष्यं सुयोजमिति प्रकृतसूत्रस्थमतिङ्ग्रहणस्य सुप्सुपेत्येतन्निवृत्तिज्ञापकतापरभाष्ये सम्यगेव। माङ उपपदत्वमङ्गीकृत्य मूले मा भवान्भूदिति प्रत्युदाहृतम् वस्तुतस्तु तस्योपपदत्वमेव नेत्याशयेनाह। किञ्चेत्यादि। समीपोच्चारितत्वं यस्य तस्यैवोपपदत्वमिति भावः। ननु पूर्वोक्तमत्र सम्यक्तदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थान्वयित्वरूपमारिभाषिकमुपपदत्वमुद्भावयन्

इत्यर्थे वाक्ये वेत्यत आह। किञ्च माङो नोपपदत्वमिति। मानाभावादिति। नन्वस्योपपदसंज्ञासिद्ध्यर्थमेव प्रथमार्थत्वमस्त्वित्यत आह। तस्योपपदसंज्ञेति। उपपदसंज्ञां स्वीकृत्य प्रकृतसूत्रेण समासं वारयितुमतिङ्ग्रहणं कर्त्तव्यमिति तदपेक्षया माङीति सप्तम्याः प्रथमार्थत्वाभावकल्पनमेव वरमिति भावः। ननु तुमुन्ण्वुलौ क्रियायामिति सूत्रे क्रियायामित्यस्याः सप्तम्या अधिकरणार्थत्वाभावकल्पने किमानमत आह। तुमुन्विधाविति। तिङन्तार्थेति। तिङन्तशब्दजन्यशाब्दबोधविषयेत्यर्थः। अस्ति च कारको गत इत्यत्र गतशब्दस्य तथात्वङ्क्ष्छतीतिशब्दजन्यशाब्दबोधविषयभूता या गमनानुकूलव्यापाररूपा क्रिया सा गतशब्दजन्यशाब्दबोधेऽपि प्रकारतयाभासते इति भावः। तिङन्तार्थत्वाभावेनेति। तिङन्तशब्दजन्यबोधे या प्राधान्येन भासमाना क्रिया साऽत्र नास्ति कर्तुः प्राधान्यादिति भावः। गत इत्यस्योपपदत्वमेव नास्तीत्याशयेनाह। किञ्चेति। यदि गतशब्दे सति ण्वुल् स्यात्तदा गतशब्दस्योपपदत्वं स्यात्तदेव तु नात्र। ण्वुलस्त्वत्राप्राप्तेरिति भावः। भाष्ये ध्वनितत्वादिति। नैतत् क्रियावाचीति भाष्येण ध्वनितत्वादित्यर्थः। पदत्वपर्यन्तमिति। क्रियाफलकक्रियावाचकप्रकृतिके पदे सति तुमुन्ण्वुलोर्विधानादिति। मूले सुपेत्येवोक्तत्वेन प्रथमान्तसुबग्रहणस्यावश्यकत्वमिति प्रतीयते तत्सम्बन्धाद्राजदर्शीत्यत्र पूर्वपदस्य पदत्वान्नलोपसिद्धिरिति फलमप्युपलभ्यते परन्त्वेतन्न युक्तमनयोर्योगयोर्निवृत्तं सुप्सुपेति भाष्यविरोधादित्याशयेनाह। सुबित्यस्येति। राजदर्शीत्यस्य सिद्धिस्तु महासंज्ञायास्तत्र सुबन्तसम्बन्धितया सुबन्तस्यैव तत्रोपपदत्वमिति नलोपसिद्धा भविष्यति। यद्यन्यतरानुवृत्तिखण्डनपरन्तद्ग्राथमितिकल्पनया तृतीयान्तनिवृत्तिरेवोक्तेति सुपेत्यत्रापाभिधानस्य भावकल्पना तदा तथाभावकल्पनाप्ययुक्तेत्याशयेनाह। किञ्चेति। स्वमते उभयनिवृत्युपपादनभावमाह। परिभाषेति। तृतीयान्तस्यापि निवृत्त्या सुबुत्पत्तेः प्राक् समासप्रवृत्तिलाभादिति भावः। फलाभावेनेति। गतेस्तिङन्तभिन्नत्वस्य स्वत एव सत्त्वादिति भावः। अत एव। समासविशेषणत्वादेव। न गतिसमास इति। न गतेर्नित्यसमास इत्यर्थः। तदाह। किन्त्विति। इदमप्यचतितरामित्यस्य समस्तत्वमभ्युपेत्य। वस्तुतोऽत्र समाससंज्ञाया अभावेऽपि चत्वभाव इति प्रागुक्तम्। तत्रेति। पूर्वसू-

चे तादृशव्यवस्थासिद्धौ । अत्रापि । प्रकृतसूत्रेऽपि । सङ्गच्छत इति । समासस्य तिङ्घटितत्वं शास्त्रेण निषिद्धमित्यकिंवृत्तस्योपपदत्वे फलाभाव इति भावः । स्यादेवेति । सूत्रेऽकिंवृत्तस्येत्यस्याभावेऽकिंवृत्तस्योपपदत्वलाभो न स्यादित्यन्यथानुपपत्त्याऽकिंवृत्तग्रहणस्यावश्यकत्वादिति भावः । अतिङितिसौत्रत्वाल्लुप्ततृतीयान्तमित्याशयेन यत्केन चिद्व्याख्यातन्तद्दूषयति । उपपदमतिङन्तेनेति नार्थ इति । भाष्यमङ्गतेरिति । शब्देनोत्तरपदस्यानुपादानाभिप्रायेण केनेदानीमिति तच्च प्रश्नः । समर्थपरिभाषोपस्थित्यभिप्रायेण च समर्थेनेत्युत्तरन्तच्चातिङन्तेनेति व्याख्याने विरुध्यतेऽतिङन्तरूपोत्तरपदस्य तेन बोधनादसङ्गतं स्यादिति भावः । तच्च । पूर्वसूत्रे । प्रपचतितरामित्यत्र नित्यसमासव्यावृत्तेस्तत्फलत्वसम्भवादिति भावः । अनेन । अतिङ्ग्रहणेन । यदि सुप्सुपेत्यस्य सम्बन्धः प्रकृतसूत्रे स्यात्तदा कारकोव्रजति हारको व्रजतीत्यत्र समासव्यावृत्तिः सिद्धेवेति तिङन्तव्यावर्त्तकमतिङ्ग्रहणं व्यर्थमेव स्यात् । भाष्याच्चेति । परिभाषास्वरूपप्रदर्शनपरगतिकारकोपपदानामिति भाष्याच्चेत्यर्थः । ननु कारकस्यापि सुबुत्पत्तेः प्राक् समासस्वीकारे धनक्रीतेत्यादौ क्रीतशब्दादुत्तरपदात्सुबुत्पत्तेः प्राक्समासे क्रीताल्करणपूर्वादितिसूत्रेणादन्ताद्विधीयमानो ङीप् स्यादत आह । कर्त्रे करणेति । अत्रेदमवधेयम् । प्रकृतसूत्रभाष्येऽनयोर्योगयोर्निवृत्तं सुप्सुपेत्युक्तन्न त्वत्रनिवृत्तमित्युक्तन्चोपाध्यायैरतिङित्यस्योभययोगशेषत्वं योगविभागेन प्रदर्शितमतिङन्तश्च समास इति च व्याख्यातन्तत्र समासस्य तिङन्तत्वङ्कथमपि न सम्भवतीतितिङन्तशब्दस्य तिङन्तघटिते लक्षणोपाध्यायाभिप्रेतैव । कारकांशे चोपायाप्रदर्शनपरभाष्याच्च तदंशे प्राचीनपठितपरिभाषाघटकत्वमाश्रितन्न तु बहुलग्रहणस्य तदंशसाधकत्वमभिप्रेतम् । यदि तु बहुलग्रहणमेव तदंशसाधकं बहुलग्रहणमेव तदंशस्याप्रवृत्तिसाधकञ्चेति व्याख्यायते तदैकस्य भावाभावसाधकत्वं विरुद्धमिवाभातीत्येवमेवोक्तम् । तत्र योगविभागेनोभयशेषत्वं स्वरितत्वं विना न सम्भवति शेषत्वस्य तदेकवाक्यतारूपत्वादित्यत्रोपपदमतिसूत्रसम्बन्धेनैवानेनेत्युक्तम् । न तु योगविभागः स्वरितञ्चोक्तम् । गौरवप्रसङ्गात् । तत्र गतिकारकोपपदानां समासस्तु सिद्ध एवेति तदंशस्यान्यत्र कृसरीत्या सुबुत्पत्तिरुत्तरपदाद्यदा स्यात्तदैव स्यादिति तत्सङ्कोचकवैलक्षण्यसूचकं

प्राक्सुबुत्पत्तेरितीति गतिकारकोपपदानां कृद्भिर्यः समासः स प्राक्सुबुत्पत्तेरेवेत्येव वचनव्यक्तिरभिप्रेता। यत्तु गत्यादीनां यः समासः स कृद्भिरेव भवति स च सुबुत्पत्तेः प्रागेवेति नार्थः। तथा सति प्रपचतितरामित्यादावामन्तेन समासः कुगतीत्यनेन न प्राप्नोति तत्राव्ययपूर्वपदप्रकृतिस्वरबाधेनोत्तरपदप्रकृतिस्वर इष्यमाणो गतिकारकोपपदात् कृदिति सूत्रे कृद्ग्रहणादप्रसक्तस्तत्प्रत्याख्यानेन भाष्यकैयटयोः सङ्गृहीतो विरुध्येत। यच्च तिङि चोदात्तवतीति सूत्रे यदि तिङ्ग्रहणं क्रियते तदा प्रपचतितरामित्यामन्तेन समासे निघातो न प्राप्नोत्यतिङ्ग्रहणस्याव्याप्तिमुपन्यस्य तत्प्रत्याख्यानाद्गतिनिघातेनाव्ययपूर्वपदप्रकृतिस्वरबाधनादिष्टसिद्धिरिति भाष्यकृतोक्तन्तच्च यदोत्तरपदप्रकृतिस्वरविधायके कृद्ग्रहणन्न प्रत्याख्यातन्तदेति वेदितव्यम्। असति त्विह कृद्ग्रहणे तावतैव शेषनिघातेनेष्टसिद्धेस्तिङ्ग्रहणे सत्यपि नास्ति दोष इति तिङि चोदात्तवतीति सूत्रे कैयटोपाध्यायैरुक्तत्वादिति। तत्र। सुप्सुपेत्यस्यानुवृत्तौ प्रकृतसूत्रस्थातिङ्ग्रहणवैयर्थ्यप्रदर्शनपरभाष्येण सुप्सुपेत्यस्य निवृत्तौ बोधितायाङ्गतिकारकोपपदानां यः समासः प्राप्तः स सुबुत्पत्तेः प्रागिति विज्ञाते सति कारको व्रजतीत्यत्र पुनः समासे प्राप्ते सत्यतिङ्ग्रहणेन समासमंज्ञायास्तिङन्ताविषयकत्वे लब्धे सति गत्यादीनां कृद्भिर्यः समास इत्येवमुद्देश्यपर्यवसाने तत्रैव सुबुत्पत्तिप्राक्कालिकत्वं विधातुमुचितमिति गत्यादीनां यः कृद्भिः सह समासः स प्राक् सुबुत्पत्तेरेवेत्येव वचनव्यक्तिर्भवितुमर्हतीति गत्यादीनां यः समासः स कृद्भिरेवेति नियमसम्भावनाकरणस्यानौचित्यात्। किञ्च प्रपचतितरामित्यत्र चेल्लमास इष्टः स्यात्तदोपपदस्य गतेश्च यः समासः स तिङन्ताघटित इत्यर्थेऽतिङ्ग्रहणस्योभयशेषत्वलाभे सति स सुप्सुपेत्यनेनोपपाद्यो न तु तत्र गतिसमासः स्वीकार्यः। यच्च प्रपचतितरामित्यत्र गतिसमासमभ्युपेत्य गतिकारकोपपदादितिसूत्रस्थभाष्यकैयटविरोधोद्भावनन्तत्र युक्तम्। वैकल्पिकसुप्सुपेतिसमासस्वेऽपि तस्य भाष्यस्य सुयोजत्वात्। तस्मिन्प्रयोगे गतिसमासे कृद्ग्रहणसत्त्वे उत्तरपदप्रकृतिस्वरो न प्राप्नोतीत्येवन्तु नोक्तम्। यच्च तिङि चोदात्तवतीति सूत्रस्थभाष्यविरोधोद्भावनन्तस्य त्ववसर एव नास्ति। न हि तत्र प्रपचतितरामित्यामन्तेन समासे निघातो न प्राप्नोतीत्येवम्पाठो भाष्येऽस्ति किं तु

यदि तिङ्ग्रहणङ्क्रियते आमन्ये न प्राप्नोति प्रपचतितराम्प्रजल्पतितरामित्येव पाठस्तस्य तु वैकल्पिकसमासस्य प्रवृत्तावप्रवृत्तौ चोपपत्तिर्भवति । वैकल्पिकसमासप्रवृत्तिपक्षेप्येवं क्रमः । भिन्नपदसापेक्षत्वात्समासो बहिरङ्गः । आम् तु स्वार्थिकत्वेनान्तरङ्गः समासात्प्राक् प्रवर्त्तते । आम्रहितस्य तरबन्तस्य च क्ताप्रत्ययेन तन्मात्रेणैकार्थीभावासम्भवादामन्तेनैव समास इति । यच्च वैकल्पिकसमासस्य नित्येन गतिसमासेन बाध इति । तदपि न । नित्यसमासविधायकस्य तिङन्ताघटित इत्यर्थः कैयटादिसम्मत इत्यतो नित्यसमासप्राप्तेरेवाभावात् । यद्यप्यतिङिति न बहुव्रीहिः । किन्तु तत्पुरुषो लाघवादिति । तन्न । अनवक्लृप्त्यमर्षयोरिति सूत्रेऽतिङिति प्रतिषेध इति प्रतीकमुपादाय न विद्यते तिङस्मिन्समासे सोऽतिङिति बहुव्रीहिसमासाश्रयणादिति व्याख्यानान्तरकैयटग्रन्थविरोधात् । यदपि मा भूत्तरामित्यत्रोपपदमितिसूत्रेण समासवारणायातिङ्ग्रहणस्य चारितार्थ्यसम्भवेनातिङ्ग्रहणस्य ज्ञापकत्वासम्भव इतिदूषणाभिधानं तत्तु माङ उपपदत्वाभावेनैवालब्धावसरम् । व्याङीतिसप्तम्याः प्रथमार्थकत्वङ्कल्पयित्वा माङ उपपदत्वं स्वीकृत्य प्रकृतसूत्रस्थपरिभाषाज्ञापकपरभाष्यासङ्गतिकल्पनापेक्षया सप्तम्याः प्रथमार्थत्वाभावकल्पनमेव वरमिति दिक् । ननु सुबुत्पत्तेः प्राक्समासस्वीकारेऽपि लिङ्गापेक्षस्य प्रत्ययस्य समासात्प्राक् प्रवृत्तौ व्याघ्री इत्यादिप्रयोगाणामगतिरेवेत्यत आह । स्त्रीप्रत्यय इति । ननूपपदसंज्ञाया अमा तुल्यविधानत्वेऽपि संज्ञिनः कथन्तुल्यविधानत्वमत आह । संज्ञाया इति । अत एव । समर्थपरिभाषाया उपस्थितिरेव । अपवादत्वादिति । महासंज्ञाबोध्यार्थाभावेन नोपपदशब्देन समुदायग्रहणमिति भावः । वाग्रहणादिति । वार्थस्य शब्दस्य ग्रहणादित्यर्थः । एकार्थीभाव एव संज्ञाभावकल्पने भाष्यविरोधशङ्कां वारयति । न चेति । आहुः । सिद्धान्तानुसारिणः । उभयत्र विभाषेयम् । अमैव तुल्यविधानस्य प्राप्ते यथा मूलकेनोपदंशमित्यपि भवति । अन्येनापि तुल्यविधानस्याप्राप्ते यथा उच्चैः कारमाचष्ट इति । अत्राव्ययेऽयथाभिप्रेताख्यान इतिसूत्रेण क्ताप्रत्ययौ भवतः । समासपक्षे क्तादुत्तरपदप्रकृतिस्वरेणोत्तरपदादुदात्तत्वं भवति । लितीतिसूत्रविषयतायास्तत्र सत्त्वात् । एवञ्चोच्चैरित्यनुदात्तम् । असमासे तु प्रातिपदिकस्वरेणान्तोदात्त-

मुच्चैरिति भवतीति विशेषः । अमग्रहणन्तु पूर्वसूत्रमनुवृत्त्या भवति । तेन पर्याप्तो भोक्तुमित्यत्र न । ननु मूलकेनोपदंशमित्यत्र मूलकेनेति तृतीयान्तस्य भुजिक्रियाम्प्रति करणत्वेनान्वयादुपदंशमित्यनेनानन्वयादसामर्थ्येन कथं समासप्राप्तिरत आह । उपदंश इति । प्रधानक्रियानुरोधित्वादिति । प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रयो तत्र प्रधानमनुरुध्यत इत्युक्तेः । क्त्वा चेत्यत्र क्त्वेत्यस्य प्रथमान्तत्वेऽर्थासङ्गतिरत आह । तृतीयान्तमिति । तृतीयाप्रभृतीनीत्यनेनान्यथासिद्धिम्परिहरति । अलंखल्वोरिति । तद्धितार्थेति समास इति । द्वे अङ्गुली प्रमाणमस्येत्यर्थः । इन्द्वार्थमितीति । अत एव हेमन्तशिशिरावहोरात्रे च छन्दसीतिनिर्देशसङ्गतिः । अनभिधानमिति । इन्द्वार्थत्ववर्णनपरभाष्यप्रामाण्यात् । इति वेति । इष्टेः प्राबल्यात् । समासान्तस्य समुदायावयवत्वं सिद्धान्ते तस्य फलमाह । उत्तरपदेत्यादि । ननु द्व्यहीन इत्यत्र तद्धितार्थे द्विगौ टचि सति टग्रहणादेव टिलोपे सिद्धे खग्रहणवैयर्थ्यमत आह । समासान्तविधेरिति । अत एवेति । समासान्तास्वीकारादेव । न च खे टिलोपवचनसामर्थ्यादेव समासान्ताभावे सिद्धेऽनित्यत्वपर्यन्तानुधावनमफलमिति वाच्यम् । अहीन इत्यत्र तस्य सावकाशत्वात् । अत एव । लिङ्गविशिष्टपरिभाषाया अनित्यत्वादेव । सुष्ठार्थमिति । वर्णग्रहणञ्च सर्वत्रेति तदन्तविधिरत्र प्रकरणे नेत्यर्थस्य प्रतिपत्त्यर्थः । अत एव रषाभ्यामित्यत्र न तदन्तविधिः । वस्तुतोऽत्र तदन्तविध्यभावः सरूपाणामितिनिर्देशेनैव सिद्ध इति बोध्यम् । वादिनाम्मत इति । यथाश्रुतकोशार्थग्राहिणाम् । तदेतत्सुष्ठर्यति । वस्तुत इति । प्रत्यासत्त्याश्रयणेन शङ्कते । न चेति । तथैव समाधत्ते । सूचोपस्थितेति । अन्यथेति । व्याकरणैकवाक्यतायां अनङ्गीकार इत्यर्थः । तत्पुरुषातिरिक्त इति । अत एव पूर्वोक्तस्य परास्तस्योपपत्तिः । ननु दीर्घाक्षीशब्दे क्षुभ्नादित्वाषत्वाभावकल्पने क्षुभ्नादिषु पाठमनुक्त्वा युवादिषु पाठः करिष्यत इत्युक्तभाष्ये तद्विरोध इत्यत आह । युवादिरपीति । तत्पक्षे । अदन्तानुकरणपक्षे । अन्यस्य । संख्यादिभिन्नस्य । उपानसमिति । उपगतमनः उपानसम् । रूढानां शब्दानां यथाकथञ्चिद्व्युत्पादनं कर्त्तव्यमित्ययमेवमेवार्थकः स्वीकार्यः । ततः । शुनः । ननु फलकमिव सक्थि इति विग्रहेप्युपमानसमासो न प्राप्नोति । सक्थिशब्दस्यो-

पमानोपमेयसाधारणधर्मविशिष्टोपमेयवचनत्वाभावादत आह । मयूरेति । द्विगोरर्हाच्च खार्या इत्यर्थे द्विगोः परो यः खारीशब्द इति भ्रमः स्यात्तन्निवारणायाह । खारीशब्दान्तादिति । प्राग्वत् । लोकात् । परिमाणत्वाट्ठञ इति । अगोद्युच्छसंख्यापरिमाणादिति पर्युदासाट्ठकोऽप्राप्तेरिति भावः । एतदिति । समासेनेत्येतदित्यर्थः । मूलोक्तविग्रहे सुराब्रह्मा इत्यत्र समासानुपपत्तिपरिहारायाह । अधिकरणस्येति । नन्वेकादशेत्यत्र संख्यावाचके उत्तरपदे आत्वमनुपपन्नं विधायकाभावादित्याशङ्कते । नन्विति । अन्वाचय इति । महच्छब्दस्य घासादिष्वात्वम् । यत्र तु स्त्रीत्वन्तत्र पुंवद्भावोऽपीत्यर्थात् । मतान्तरमिति । पूर्वमते तु भाष्योक्तमुदाहरणमुपलक्षणम् । नन्वच्प्रत्ययस्तत्पुरुष एवेत्यत्र नियामकाभावाद्बहुव्रीहावपीत्यनुपपन्नमत आह । तत्पुरुष एवेति । ध्वनितानभिधानादिति । तत्र हि एकादश द्वादशेति कोऽयं समासः । एकादीनां दशादिभिर्बह्वसमासः । एकादीनान्दशादिभिर्बह्व इति चेद्विंशत्यादिषु वचनमाप्नोति । वचनम् । द्विवचनम् । बहुवचनञ्चेत्यर्थः । एकविंशतिर्द्वाविंशतिः । एवम्पूर्वपक्षिणोक्ते सिद्धान्तिनोक्तम् । सिद्धं तु अधिकान्ता सङ्ख्या सङ्ख्यया समानाधिकरणाधिकारेऽधिकलोपश्चेति वक्तव्यत् । एकाधिका विंशतिः । एकविंशतिः । द्व्यधिका विंशतिरिति । यदि समानाधिकरणः खरो न सिध्यति । यद्वि तत्संख्यापूर्वएदम्प्रकृतिस्वरश्चवतीति बह्व इत्येवं तत् । किं पुनः कारणं बह्व इत्येवं तत् । इह मा भूत् । शतमकस्मिमिति । षष्ठीतत्पुरुषोऽयम् । अस्तु तर्हि बह्वः । ननु विंशत्यादिषु वचनं न सिध्यति । नैष दोषः । सर्वो बह्वो विभाषैकवद्भवति इत्युक्तम् । अत्रैकादशद्वादशविषय एव शङ्कासमाधानयोः करणादेकादिनवान्तानान्बह्वतत्पुरुषयोरनभिधानमिति सूचितम् । सर्वो बह्वो विभाषैकवदित्यनेन समाहारबह्वाभिधानेनैकवचनस्योपपत्तिकरणेनैकवचनमेवेष्यत इति कल्प्यते । यदीतरेतरयोगोऽपि भवेत्तर्हि तत्र चेऽन्यवचनापत्तेर्दुर्वारतया न्यायसिद्धेन वचनेन समाधानस्य निर्दूषणतापत्तिस्तदेतद्दूष्यति । इतरेतरयोगस्त्विति । समाहारबह्वपक्षे लिङ्गदोषं परिहरति । स्त्रीत्वं लोकादिति । वृत्तिविषय इति । द्वेकयोर्द्व्येकयोरित्यादौ यथा । विंशत्यादीनाञ्च सर्वत्र । वृत्तिविषये वाक्ये च । विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येय-

संख्ययोरिति कोशात्। भाष्यविरोधशङ्कां वारयति। भाष्य इत्यादि। एकदेशिन इति। एकदेशित्वं स्पष्टयति। सा चेति। इदमपीति। अस्तु तर्हि इत्येतत्कथनमपि। व्याख्यानादिति। सन्धिवेलादिगणे त्रयोदशीशब्दस्य पाठदर्शनमूलकाद्व्याख्यानादित्यर्थः। सुजर्थ इति। त्रिरावृत्ता दश त्रिदशाः। एकादिश्चैकस्य चादुक्। अत्रादुगागमेऽकारोच्चारणसामर्थ्यान्न पररूपम्। प्रसिद्धत्वादिति। प्रकृतसूत्रे द्वयष्टन इति सूत्रात्सङ्ख्यायामित्यस्यानुवृत्त्या संख्यायामेवास्य प्रवृत्त्या तदघटितसमासघटकतया शीघ्रोपस्थितिकत्वादित्यपि बोध्यम्। योगविभागस्यादर्शनादाह। मयूरेति। व्याख्यानादिति। धे चेत्येव वक्तव्ये धास्विति बहुवचनोपादानेन नानाधिकरणवाचिनः संख्याशब्दाद्बहुत्ववदर्थे वर्त्तमानाद्यो धाप्रत्ययो विधीयते तस्येदं ग्रहणमत एवोत्तरपदाधिकारबाधस्तदंशे कल्प्यते इत्येवम्प्राचां व्याख्यानादित्यर्थः। धास्विति सप्तमीनिर्देशात्तन्निमित्तककार्यस्यैव विकल्पस्तदाह। उक्तस्यैवेति। उत्तरपदादेरित्यत्रोत्तरपदशब्दः प्रत्यासत्त्या प्रकृतशाक्यघटकनिमित्त परः। तेन धाप्रत्ययस्योत्तरपदत्वाभावेऽपि न क्षतिः। वाक्यभेदेन च ष्टुत्वविधानम्। विधेयभेदस्य न्याय्यत्वात्। विभिन्नवाक्ये च वाशब्दो न सम्बध्यते। तेन तस्योक्त्वाभावेऽपि प्रवृत्तिस्तदाह। नित्यमेवेति। अत एव भाष्ये षष उत्वन्दत्वदशधासूत्तरपदादेः ष्टुत्वं च वक्तव्यम्। धासु वेति वक्तव्यम्। उत्तरपदादेः ष्टुत्वं वक्तव्यमिति पृथग्वचनानि पठितानि। हरदत्तमतमाह। उक्तपक्षे नित्यमिति। तेनोक्त्वाभावे ष्टुत्वस्याप्यभाव इति। अत्र। मतद्वयमध्ये। परवल्लिङ्गमितिसूत्रे द्वन्द्वपदमितरेतरयोगपरमित्याशयेनाह। समाहार इति। तत्र। इतरेतरयोगद्वन्द्वे। तेन। अर्थपरत्वेन। प्रकृतसूत्रे द्वन्द्वतत्पुरुषयोरिति षष्ठी न तु सप्तमी। तेन द्वन्द्वे तत्पुरुषे च परपदस्येव लिङ्गं पूर्वपदस्येति नार्थः। न चेष्टापत्तिः। मयूरीकुक्कुटावितिवाक्ये पूर्वपदे स्त्रीप्रत्ययनिवृत्त्यापत्तेः। परवदित्यत्र षष्ठ्यन्ताद्धतिः। द्विगुप्राप्तेति समुदितं वार्त्तिकमितिभ्रमनिवारणायाह। द्विगुग्रहणमिति। कैयटानुरोधेनेति। द्विगुरेकवचनमितिसूत्रे समाहाराविवक्षायां पञ्चकपालो पञ्चकपाला इतिभाष्यप्रयोगादेकविभक्तीतिसूत्रभाष्यव्याख्यावसरे तेन परवल्लिङ्गत्वबाधप्रदर्शनाच्चेति भावः। द्विगुग्रहणाभावेपि न क्षतिरित्याशयेनाह। वस्तुत इति। द्विगुपदसत्त्वे

द्विगुपदं समाहारद्विगुपरञ्च भवति किं तु तद्धितार्थे यो द्विगुस्तत्परं वाच्यम्। तच्च तद्धितार्थस्य प्राधान्यात्परवल्लिङ्गमितिसूत्रे परपदोपादानेन यत्र पूर्वपदप्रयुक्तलिङ्गप्राप्तिस्तत्रैव तस्य सूत्रस्य प्राप्या तद्धितार्थद्विगौ तस्याप्राप्तेरिति भावः। अत एव। द्विगुग्रहणस्य व्यर्थत्वादेव। अत एव। अलुगग्रहणेन नित्यसमासाभावादेव। इदञ्च प्रतिप्रसववचनमनावश्यकमित्याशयेनाह। इन्द्वैकेति। इतिन्यासेनेति। यदा तादृशन्यासेन परवल्लिङ्गमितिसूत्रस्थन्तत्पुरुषग्रहणमेकदेशिसमासप्रत्याख्यानेन प्रत्याख्यातन्तदास्य प्रतिषेधवचनस्य प्रयोजनन्नास्तीति भावः। अत एव। अतन्त्रत्वादेव। ननु समुदायस्य पूर्ववल्लिङ्गत्वे पि वडवाशब्दे टापः सत्त्वात्स्त्रीप्रत्यये तदादिनियमाभावादश्ववडवे इति स्यात्। सूत्रे टापो निवृत्तावपि लौकिकेऽप्रयोगे टापः सत्त्वादत आह। अश्ववडवाविति। समुदायस्याबन्तत्वाभावादिति। उङ्भूतावयवभेदसमाहारस्य विशेषत्वेनोपसर्जनत्वात्। वस्तुतस्तु गोबडवे इतिप्रयोगसिद्धये आबन्तान्तं यदङ्गमितिरीत्या तदन्तविधिद्वयमवश्यं स्वीकार्यन्तथा चाश्वकडवाविति स्यादिति दुर्वारेति पूर्ववदश्ववडवेतिसूत्रनिर्देश एव टाप्निवृत्तिसाधक इति बोध्यम्। नन्वेवमतिदेशवैयर्थ्यमत आह। अतिदेशेति। शोभनावश्ववडवाविति यथा। ननु पूर्ववदश्ववडवावित्यानुपूर्वीकसूत्रेण कथमनुप्रयोगे पूर्ववल्लिङ्गत्वप्रतिपादनमत आह। अश्ववडवशब्दार्थ इति। अत एव। राजाहःसखिसूत्रस्थ द्विगुप्राप्तेत्यादिनिषेधविषयेऽपि प्रवृत्तिस्वीकारादेव। प्रत्याख्यातमिति। यदि राजाहःसखिति सूत्रस्थ द्विग्वादिविषयेऽप्रवृत्तिः स्यात्तदा परवदिति सूत्रे तत्पुरुषपदसत्त्वे तन्निषेधार्थमारब्धेन प्राप्तेत्यादिवार्त्तिकेन राजेत्यादिसूत्रस्यापि बाधः स्यात् यदि तु तस्मिन्सूत्रे तत्पुरुषग्रहणन्न क्रियते एकदेशिग्रहणङ्कृत्वा वार्त्तिकम्प्रत्याख्यायते तदा राजाहःसखिसूत्रस्य वार्त्तिकविषये प्रवृत्तिरितिफलभेदस्य स्पष्टतया वार्त्तिकप्रत्याख्यानविरोधः स्पष्ट एव। ननु परवदितिसूत्रस्थतत्पुरुषग्रहणप्रत्याख्याने प्रकृतसूत्रे तत्पुरुष इत्यस्य कथं लाभ इत्यत आह। अत्रैवेति। तत्पुरुषे चेतिप्रकृतसूत्रे पठनीयमिति भावः। अत एव। वार्त्तिकविषयेपि राजेतिसूत्रस्थ तत्पुरुषग्रहणकरणेन प्रवृत्तेरेव। प्राह्णः परार्ह्णः सर्वाह्ण इति च प्रादिसमासः। चरितार्थमिति॥

पुण्याहं सुदिनाहमित्यत्र राजेत्यनेन पुंस्त्वे प्राप्ते पुण्येत्यनेन नपुंसकत्वं विधेयम्। यदि तु अस्य वचनस्याप्येकदेशिसमासविषयकत्वमेकदेशिग्रहणानुङ्क्ष्या सम्पाद्यते तदाऽस्य सूत्रस्य पूर्वाह्णः पूर्वराज इत्यादिरेवोदाहरणम् भविष्यतीति प्राह्णः सर्वाह्ण इत्याद्यसिद्धिः पुण्येति च व्यर्थम्। पुण्याहमित्यादावुत्तरपदार्थस्य प्राधान्यात्तल्लिङ्गत्वमनायासेनैव सिद्धमिति भावः। अभावादिति। टचः समुदायावयवत्वात्। प्रतिप्रसवेति। तत्पुरुषसमासे प्राप्तस्य राज्ञाङ्काहा इत्यस्य संख्यापूर्वमितिवचनेन नपुंसकत्वस्वीकारे प्राप्तस्यैव परवल्लिङ्गत्वस्यार्थाद्विधानं सम्भवतीति लाघवम्भवतीति भावः। ननु संख्यापूर्वमितिवचनस्वीकारे त्रिंशद्राजः पञ्चदशराज इतिप्रयोगविरोध इत्यत आह। भविष्यतीति। यदि त्वेतयोर्बहुव्रीहिलमच्प्रत्यन्वेत्यत्राजितियोगविभागेनाच्प्रत्ययश्च स्वीक्रियते तदा पुंस्त्वमनायासेन सिध्यत्येव परन्त्वर्थभेदः स्पष्टः। तादृशेति। अपथमित्यर्थतदित्यर्थः। ननु समासनिरूपणप्रस्तावे जात्याख्यायामित्यादिसूत्रविवरणमप्रस्तुतमत आह। नन्विति। एवं चानावश्यकत्वसाजात्यात्तल्लिङ्गानुशासनप्रस्तावे जात्याख्यायामित्यादिनिरूपणं सङ्गतमेवेति भावः। यवादिशब्दानामिति। सम्यञ्चौ यव इत्यादौ। बहुवचनविधानस्य फलमाह। तत्रेति। एकत्वमिति। जातिगतमेकत्वमित्यर्थः। एतच्चेति। जात्याख्यायामितिसूत्रमित्यर्थः। सूत्रोक्तार्थ इति। सूत्रारम्भे जातावेव बहुवचनार्थैकत्वस्यान्वयस्वीकारः सम्प्रति तु बहुवचनार्थस्य बहुत्वस्य व्यक्तावन्वय इति मतभेदः स्पष्ट एवेति भावः। एतेन। पूर्वोक्तव्याख्यानेन। मुख्यार्थ इति। स्वतन्त्रोच्चारणीयत्वमात्रबोधकत्वं यदाऽस्मच्छब्दस्य तदेत्यर्थः। उपासितेति। उपासितात् गुरोर्या प्रज्ञा तस्या योऽभिमानस्तेनोन्नता इत्यर्थः। ननु गार्ग्योऽहमित्यादौ गार्ग्यशब्दस्य प्राथम्ये नोद्देश्यबोधकत्वमहमित्यंतदर्थस्य तु विधेयत्वमिति नाद्यदर्थस्य सविशेषणत्वमत आह। गार्ग्योऽहमित्यादि। द्वयोरित्यनुकर्ष इति। तत्र द्विपदभावप्रधाननिर्देशेन द्वित्वपरम्। अत एव। प्रकृतसूत्रे बहुवचनग्रहणादेव। तद्वैकल्पिकत्वस्य। जातिरप्राणिनामितिसूत्रवैकल्पिकत्वस्य। स्पष्टत्वेदमिति। तत्र हि बहुवचनस्येति किमर्थम्। उदितन्तित्यपुनर्वसु। कथञ्चात्रैकवचनम्। जातिरिन्द्र एकवद्भवतीति। अप्राणिनामिति प्रतिषेधः प्राप्नोति। एवन्तर्हि सिद्धे सति यद्बहुवचनग्रह-

णङ्करोति तज्ज्ञापयत्याचार्यः सर्वो द्वन्द्वो विभाषैकवद्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । वाभ्रवशालङ्कायनम् । वाभ्रवशालङ्कायना इत्येतस्मिन्नभवति। अथ वा नात्र भवन्तः प्राणिनः प्राणा एवात्र भवन्तः इत्युक्तम् । कथं चात्रैकवचनमितिपूर्वपक्षिणो द्वन्द्वश्चेत्यादिप्रकरणस्य प्राण्यङ्गादीनामेव समाहार इत्यर्थकत्वमनुमतम् । जातिद्वन्द्वेत्युत्तरवादिनस्तु प्राण्यङ्गादीनां समाहार एवेत्यर्थोऽत्रेति निश्चयः । नत्रत्रवाचकानाञ्जातिवाचकत्वन्तु प्रतिमन्वन्तरेऽन्यानि नत्रत्राणि भवन्तीतिदर्शनेन कैयटेनोपपादितम् । एवञ्च प्राण्यङ्गादीनां समाहार एवेतिनियमे कृते तद्व्यतिरिक्तद्वन्द्वस्योभयरूपत्वबोध्यत इति फलितम् । नत्रत्रवाचकानाञ्जातिवाचकत्वेऽपि प्राणित्वमेषामितिन्यायप्राप्तस्योभयरूपद्वन्द्वस्य नत्रत्रवाचकशब्दावयवकस्यैव ः भव इति तिष्यपुनर्वस्वोरितिसूत्रे बहुवचनग्रहणं सार्थकमिति भावः । सर्वो द्वन्द्व इत्यस्य द्वन्द्वश्चेत्यादिप्रकरणाविषयः सर्व इत्यर्थः । स च न्यायसिद्ध एव । अथ वेति । न ह्येतेषु प्राणित्वेन व्यवहारो लोके किं तु प्राणिनान्तदधीनस्थितिकत्वात्प्राणिनामेते प्राणा एव । अङ्गिर्विना येषाम्प्राणा ग्लायमाना भवन्ति ते प्राणिन इत्युच्यन्ते । नत्रत्रत्वेन ये प्रसिद्धास्तेषाम्प्राणा अङ्गिर्विना न ग्लायमाना इत्येते न प्राणिनः । इदमेव पुष्यत्वभाष्ये भवच्छब्देनोच्यते । एवं सति यदि जातीतिसूत्रस्य नित्यैकवद्भावविधायकत्वमेव स्यात्तदा नत्रत्रवाचकानान्द्वन्द्वस्य नित्यैकवचनान्ततया बहुवचनाभावात्तिष्यपुनर्वस्वोरितिसूत्रमसङ्गतार्थकं स्यादतस्तद्वैकल्पिकत्वमप्यनेन बोध्यते इतिभाष्यकृता ध्वनितम् । नन्वेवं सर्वो द्वन्द्व इत्यनेनैतत्प्रकरणाविषयस्यैव ग्रहणे जातिद्वन्द्वस्यैतत्प्रकरणस्थत्वात्तस्यापि नित्यत्वमेवायातमिति कथम्बहुवचनग्रहणचारितार्थ्यमिति वाच्यम् । यावता विनाऽनुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वादितिन्यायेन सर्वो द्वन्द्व इत्यस्यैकवद्भावविषयो जातिद्वन्द्वः सर्व इत्यर्थात् । अत एव विभाषा वृक्षेतिसूत्रेऽपि समाहारस्यैकत्वादेकत्वे सिद्धे एकवद्भावविधानमनर्थकमित्याशङ्क्य पूर्वत्र नित्यार्थमुत्तरत्र व्यभिचारार्थमिति भाष्यकृतोक्तम्। तत्र कैयटः। पूर्वत्रेति । प्राण्यङ्गादीनां समाहार एवेत्येवमर्थमित्यर्थः । उत्तरत्र क्व चिज्जातिरप्राणिनामितिनित्ये प्राप्ते विभाषा इत्याह । क्व चिदित्यनेन भाष्योक्तव्यभिचारो दर्शितः । व्यभिचारार्थमित्यस्य व्यभिचारार्थमि-

त्यर्थः । स च क्व चिदेकवद्भावात्क्वचिन्नित्यत्वाभावाद्बोध्यः । न केवलमुक्तसूत्रस्य बहुवचनस्य स्थाने द्विवचनादेशविधायकत्वोपपत्तिरेवैताट्टगकल्पनायाः प्रयोजनम् । किं तु मृदङ्गशङ्खतूणवाः पृथङ्नदन्ति संसदीति भाष्योक्तप्रयोगस्याप्युपपत्तिरिति । प्रकृतसूत्रे समासग्रहणमकृत्वा द्वन्द्वग्रहणमेव कृतन्तत्प्रयोजनमाह । नक्षत्रेति । विपर्यासबुद्धिविषया इत्यस्य विशेष्याद्वृत्तिधर्मप्रकारकबुद्धिविषया इत्यर्थः । सा च तिष्यविशेष्यिका पुनर्वसुत्वप्रकारिका पुनर्वसुविशेष्यिका तिष्यत्वप्रकारिका ज्ञेया । पूर्वं यद्यपि जात्याख्यायामिति सूत्रसमूहवदित्यनेनास्मदो द्वयोश्चेत्यस्यानावश्यकत्वं सूचितमेव तथापि तत्र युक्त्यनभिधानात्तां वक्तुमनुवाद । अस्मद इत्यादीति । तथेति । अनावश्यकत्वमित्यर्थः । इति भाव इति । लिङ्गविशेषबोधकसूत्रव्याख्यानानन्तरञ्जात्याख्यायामित्यादिसूत्रव्याख्यानकर्तुर्भाव इत्यर्थः । उच्छङ्कलास्विति । एवमभिधानभाष्यकृता तुल्यपदानुवृत्त्याऽनावश्यकत्वन्नाभिहितमिति सूचनाय । अत एव भाष्यकृता जात्याख्यायामितिसूत्रव्याख्यावसरे आदौ सूत्रस्य प्रयोजनमुक्त्वा अग्निश्च वा बहुवत्पृथक्त्वाभिधानादितिवार्त्तिकं व्याख्यातम् । अग्निश्चो वा बहुत्वाव इत्यादिना । अस्मदो द्वयोश्चेतिसूत्रे फल्गुनीतिसूत्रे च अयमपि योगः शक्योऽवक्तुमित्यभिहितम् । तेन तुल्यपदे स्वरितत्वन्नास्तीति गम्यत इति । व्याख्यानादिति । द्विगुरेकवचनमितिसूत्रस्य समाहारस्यैकत्वेनैव द्विगोरेकवचनम्भविष्यतीत्यभिप्रायेण न वा समाहारैकत्वात्समाहारस्यैकत्वादेकवचनम्भविष्यतीत्यनेन प्रत्याख्यानङ्कृतमिति तत्सूत्रस्थद्विगुपदं समाहारद्विगुपरमेव । तथा विभाषासमीपा इतिसूत्रे उपदशम्प्राणिपादमितिसमाहारद्वन्द्वस्य नपुंसकस्याभिधानङ्कृतमित्यत्वत्यनच्छब्दस्य पूर्वोत्तोभयपरत्वमित्यभिप्रायकव्याख्यानादित्यर्थः । यदि द्वन्द्वग्रहणमाचानुवृत्तिरभिप्रेता स्यात्तदा द्वन्द्वग्रहणानुवृत्त्यैव सिद्धे तच्छब्दोपादानं व्यर्थं स्यादिति भावः । सूत्रशब्दस्य पाचाद्यन्ते पाठाभावेऽपि बहुसूत्रमितिभाष्यीयप्रयोगस्योपपत्तिमाह । बह्वसूत्रमितीति । प्रथमान्तमिति । एतेन षष्ठ्यन्तत्वशङ्कां वारयति । रात्राह्नाहा इतिसूत्रे अर्द्धर्चा इतिसूत्रे च प्रथमान्तयोरेव सत्त्वेन प्रकृतेऽपि तथैव कल्पनादिति भावः । ननु पथः सङ्ख्ये तिसूत्रे सङ्ख्याशब्दोपादानेन सङ्ख्याशब्दोच्चारणेन यः समासस्तद्वितार्थेत्यनेन विधीयते

तस्यैव प्रतिपदोक्तत्वादुग्रहणं स्यादत आह। प्रतिपदोक्तेति। व्याख्यानादिति। अव्ययसाहचर्यमूलकव्याख्यानादित्यर्थः। ननु विपथेत्यत्रापि कृतसमासान्तपथशब्दसत्त्वान्नपुंसकत्वापत्तिरत आह। विपथेति। अनेनैव। पथ इतिसूत्रेणैव। अनियतलिङ्गेति। सामान्ये इत्युपादानाच्च नियतलिङ्गत्वन्तत्र तु तच्छब्दस्वभावात्तल्लिङ्गत्वमेव। लिङ्गसर्वनामेति। सर्वनामशब्दोऽत्र सर्वनामसदृशपरः। लिङ्गानां सर्वनामेति समासः। यथा सर्वनाम्नः सर्वद्रव्यपरामर्षकत्वं तथा नपुंसकत्वमनियतलिङ्गेषु सर्वत्र प्रवर्त्तत इति भावः। अनेनैव। सामान्ये नपुंसकमित्यनेनैव। फलांशस्येति। व्यपदेशिवद्भावेनेति शेषः। फलस्य कारकत्वमुपपादयति। तस्येति। न च फलस्य कर्मत्वास्वीकारे का क्षतिरिति वाच्यम्। एवं सति तद्विशेषणशोभनादेर्द्वितीयान्तत्वन्न स्यात्। इष्टापत्तिरिति चेत्। निपुणस्त्वम्पचसि मृदु त्वा राजा द्रविणेन योजयतीत्यत्र सपूर्वायाः प्रथमाया विभाषेतिविकल्पापत्तेः। करणत्वेनान्वय इति। तत्र फलांशस्य करणत्वविवक्षास्वीकारात्। विक्लित्तिकरण इति। अत्र करणत्वनिष्ठा विषयता संसर्गरूपा। न तु प्रकारतारूपा। अपदार्थत्वात्। तस्याः। विक्लित्तेः। केषाञ्चिदिति। एतेन तादृशव्यवहारो न युक्तः फलानाश्रयत्वादिति सूचयति। ज्योतिष्टोमेन भक्तिपूर्वं यजेतेत्यत्रापि ज्योतिष्टोमेनेतितृतीयोपपत्तये फलांशस्य करणत्वेनान्वयाङ्गक्तिपूर्वमिति द्वितीया कथमिति न शङ्क्यम्। तत्र भक्तिपूर्वमित्यस्य भावनाविशेषणत्वेन प्रथमान्तत्वान्नपुंसकत्वाच्च। स्वर्गकाम इत्यादिपदसमभिव्याहारे तु स्वर्गकामतावत्कर्तृकत्वमाख्यातार्थभावनायाभासते। एवञ्च तादृशपुरुषवृत्तीच्छायामर्थात्तद्वत्वर्थप्रयोज्यत्वलाभ इति दिक्। अधिकारोऽयमिति। तेन वक्ष्यमाणसूत्राणान्नञ्समासकर्मधारयभिन्नसमासे प्रवृत्तिः। आरोपितस्य नञर्थत्वेन नञ्समासस्यापि कर्मधारयत्वान्नञ्ग्रहणवैयर्थ्यशङ्कायामाह। अनञिति। नास्तीतीति। तदुक्तभाष्ये। न हि संज्ञायां कन्यान्त उशीनरेष्वतत्पुरुषो नञ्समासः कर्मधारयो वास्तीति। त्वदुपक्रमं सौजन्यमित्यादिष्वादित्वाभावात्कथमुपन्न इतिसूत्रप्रवृत्तिरत आह। इह स नेति। नाद्या। प्रायोक्ती। इह षष्ठीतत्पुरुषं विनेति। तदुक्तं भाष्ये। न हि तदाद्याचिख्यासायामुपन्नोपक्रमान्तोऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ती-

ति। तद्बाहुल्य इति। आवरकबाहुल्य इत्यर्थ। नाचाप्यधिकारेति। न हि छायान्तो बाहुल्येऽतत्पुरुषो नञ्समासः कर्मधारयो वाऽस्तीतिभाष्यकारोक्तेः। पर्यायस्येतीति। जित्पर्यायवचनस्यैव राजाद्यर्थम्। जित्रिर्देशः कर्त्तव्यः। ततो वक्तव्यम्पर्यायवचस्यैव ग्रहणञ्चवति। किम्प्रयोजनम्। राजाद्यर्थम्। सभा राजामनुष्यपूर्वा। इनसभमीश्वरसभम्। तस्यैव न भवति। राजसभा। तद्विशेषाणाञ्च न भवति। पुष्यमित्रसभा चन्द्रगुप्तसभेतिभाष्यकारोक्तिरिह प्रमाणम्। नाधिकारोपयोग इति। एतदपि भाष्ये स्पष्टम्। विभाषा सेनेतिसूत्र एवाधिकारस्य प्रयोजनभाष्ये दर्शितमन्यत्र तु स्पष्टार्थमेव तत्सम्बन्धः॥

इति तत्पुरुषविवरणम्॥

व्याख्यानादिति। शेषो बहुव्रीहिरितिसूत्रघटकशेषपदस्योपयुक्तादन्यपरतया यस्य पदस्यार्थस्य वा पूर्वत्रोपयोगस्तस्यादावप्रसिद्धिमुत्का चिकतः शेष इतिभाष्यकृता सिद्धान्तितन्मूलकव्याख्यानादित्यर्थः। अयं भावः। पदतः शेषस्य ग्रहणे यस्य पदस्य सामान्यतो विशेषतो वा उपयोगस्तदन्याप्रसिद्धिः सामान्यतः सुप्सुपेत्यत्रोपयोगः विशेषतो द्वितीयाश्रितेत्यादौ सः। अर्थोपि पूर्वपदार्थप्रधानत्वेऽन्यपदार्थप्रधानत्वेऽव्ययीभावः। उत्तरपदार्थप्रधानत्वे तत्पुरुषः प्रसिद्ध एवातो यस्य चिकस्य विशिष्य समासोनोक्तः स शेष इति विवक्षितम्। युक्त्यन्तरमाह। प्रथमान्तत्वादिति। शेष इत्यस्य प्रथमान्तत्वादित्यर्थः। अन्यपदार्थ इत्यत्रान्यपदस्य भेदविशिष्टार्थकतया भेदस्य प्रतियोग्याकाङ्क्षायां शेषपदोपस्थितस्य प्रतियोगित्वे नान्वयाद्वितीयान्तार्थ इत्यस्य लाभः। व्याख्यानादिति। प्रकृतसूत्रभाष्ये पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहित त्वात्। चित्रगुर्देवदत्त इति। चित्रगुशब्देनाभिहितः सोर्थ इतिकृत्वाऽनुप्रयोगानुपपत्तिरित्येवं शङ्कित्वा सामान्याभिधाने विशेषानभिधानम्। सामान्ये ह्यभिधीयमाने विशेषोऽनभिहितोभवति। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः।

चिचगुः कः देवदत्त इति । एवं रीत्या प्रथमान्तपदार्थेन सामानाधिकरण्यप्रदर्शनपरतया समाधानङ्कृतमन्यत्मूलकादित्यर्थः । तत्रान्यसंबन्धिकल्पनापेक्षया यद्विभक्त्यर्थे समासविधानं तद्विभक्तिप्रकृत्यर्थ एव संबन्धित्वेन कल्प्यते । तच्च । अप्रथमाविभक्त्यर्थे समासाश्रयमध्ये । कर्तृकर्मवचनेति । कर्तृवचनस्य यथा । प्राप्तोदको ग्राम इति । यथा चात्र वृत्तिविग्रहवाक्यार्थयोः कल्पना तथान्यत्र प्रपञ्चितम् । कर्मवचनस्य यथा । उद्धृतौदना स्थालीत्यादौ । ननु तः परो यस्मादित्यादौ मत्वर्थाभावेऽपि बहुव्रीहिदर्शनान्मत्वर्थे बहुव्रीहिरित्याद्यनुपपन्नमत आह । तः पर इति । अन्यार्थ इत्येव सिद्धे पदग्रहणङ्किमर्थमित्याकाङ्क्षायामाह । ग्राहवती नदीति । बहुव्रीहिव्याहृत्यर्थम् । बहुव्रीहिसंज्ञाव्याहृत्यर्थमित्यर्थः । बहुपदो बहुव्रीहिरिति । तथा च जरती चित्रा गौरित्यर्थेऽपि बहुव्रीहेः साधुत्वापत्तिः । अत्र बहुपद इत्यभिधानेन राजपुरुष इत्यादौ यद्यप्येकसंज्ञाधिकारात्तत्पुरुषो बहुव्रीहिंव्याधते तथापि तस्य नावसर इति सूचयति । तदेवोपपादयति । द्वयोरिति । अनेकं किमिति । सुसुपेत्यस्य संबन्धादेकस्य पदस्य सर्पिषोऽपि स्यात् गोमूत्रस्यापि स्यादित्यत्राप्रयुज्यमानविन्दर्थे विद्यमानस्यापि बहुव्रीहिसंज्ञा न भविष्यतीति प्रश्नः । बहूनामपीति । अन्यथा तत्पुरुषवद्द्वयोरेव सा स्यादिति भावः । पुंवत्त्वन्नेति । उत्तरपदपरत्वाभावात् । कपिञ्जलाधिकरणेति । तत्र यथा कपिञ्जलानालभेतेत्यत्र प्रथमोपस्थितत्वात्त्रयाणामेव ग्रहणन्तथा प्रकृते न निजास्त्रयाणामिति सूत्रे त्रयाणां ग्रहणात्सूच्यजटकेशेन सुनताजिनवाससा इति बहूनामपि बहुव्रीहिप्रदर्शनपरभाष्यप्रामाण्याच्च । तदाह । चतुरादीति । उत्तरपदे परतः समासविधानाज्ज्ञापकादिति । यद्यपि तद्धितार्थेतिसूत्रेण विधीयमानद्विगोर्द्व्यङ्गजातादौ चारितार्थ्यन्तथापि दिग्वाचकस्योत्तरपदे समासविधानं ज्ञापकमिति भावः । उपसर्जनसंज्ञासिद्धिरपि न प्रयोजनमित्याह । चिचगुरित्यादाविति । स्पष्टार्थमिति । चार्थे द्वन्द्वइत्युत्तरसूत्रेऽनुवृत्त्यर्थत्वमपि न । पूर्वोक्तज्ञापकस्य वृत्तिघटकपदान्यपदार्थे विद्यमानानां बहूनामपि समास इत्यर्थे सामान्यापेक्षज्ञापकाश्रयणेन द्वन्द्वस्य बहुपदसंबन्धिनः संभवात् । एवं ज्ञापकेन बहूनां समासकल्पनापेक्षया स्पष्टप्रतिपत्त्यर्थमत्रानेकग्रहणमिति भावः ।

तृतीयान्तन्विति । यदाऽनेकग्रहणं स्पष्टार्थङ् कृतन्तदाऽनेकं सुबन्तं सुपा समस्यत इत्युक्ते त्रिप्रभृतीनामेव स्यादिति भावः । अत एव । सर्वपदशक्त्वादेव । वा लोप इति । अस्यैवापूर्वविधेयत्वम् । समासस्तु अनेकमितिसूत्रेणापि सिद्धः । अधिकरणशक्तिप्रधानत्वेऽपीति । ऊर्ध्वदेशनिष्ठाऽधिकरणतेत्यर्थात् । आधेयप्रधानत्वादिति । शब्दशक्तिस्वभावादूर्ध्वदेशवृत्तिबोधकत्वात् । आधारत्वविवक्षयेति । भाषितः पुमान्पुंस्त्वविशिष्टोऽर्थो यस्येति वक्तव्ये आधेयस्य प्रवृत्तिनिमित्तस्याधारत्वविवक्षया सप्तम्यर्थे बहुव्रीहिप्रदर्शनं स्वार्थकृतवैलक्षण्याभिन्नवैलक्षण्याभाववतः समानानुपूर्वीकस्य यदा स्त्रियामप्रवृत्तिस्तदापि तदेव प्रवृत्तिनिमित्तं वाच्यमिति बोधयितुम् । येनेति । शब्देनेत्यर्थः । नोक्तमिति । पुंवद्भावयोग्येन स्त्रियां वर्त्तमानेन शब्देन कदापि पुंसः प्रतिपादनस्याभावादिति शेषः । ननु भाषितः पुमान्येनेत्यत्रान्यपदार्थःप्रवृत्तिनिमित्तमेव विवक्षितः । ततोऽर्थंआश्रया सङ्ग्रहङ्कृत्वा स्वार्थकृतवैलक्षण्याभिन्नवैलक्षण्याभाववतस्तादृशस्य स्त्रियां वर्त्तमानस्य पुंवद्भाव इत्यर्थोऽस्वित आह । कुटीजीविक इति । आदिना पात्रीभार्यो द्रोणीभार्य इत्यस्य सङ्ग्रहः । कुटशब्दस्य येन प्रवृत्तिनिमित्तेन पुमान्भाषितो भवति तत्प्रवृत्तिनिमित्तकत्वमस्तीति सूचयति । कुटशब्द इति । एवं परिमाणवाची पात्रशब्दोऽर्द्धर्चादिः । भाजने तु स्त्रीलिङ्गः । द्रोणशब्दोऽपि परिमाणेऽर्द्धर्चादिः । सदृशपरत्वे तु भार्यासामानाधिकरण्यम् । प्रवृत्तिनिमित्तैक्ये विवक्षितेऽव्याप्तिशङ्कां वारयति । प्रसूतभार्य इति । कैयटादय इत्यनेन सूचितामरुचिमकटयति । अन्ये त्विति । तयेति प्रवृत्तिनिमित्तमित्यर्थः । अभाव एवेति । नन्वेवम्पुंवद्भावः प्रसूतभार्य इत्यत्र स्यादत आह । पुंवद्भावार्थन्विति । आदौ । भाषितपुंस्कादित्यस्यादौ । अत एव । योगविभागस्येष्टत्वादेव । ननु कर्त्तव्य इत्यनेन प्रसूतशब्दे समानप्रवृत्तिनिमित्तकत्वसाधनाय यत्नः कार्य इत्येव बोध्यते इत्यत आह । न हीति । एवञ्च । गर्भिणीशब्दस्यानवयवगर्भसम्बन्धप्रवृत्तिनिमित्तकत्वसिद्धौ च । ननु दारशब्दस्य पुल्लिङ्गतया तत्समानाधिकरणगुणवाचकस्यापि पुंस्त्वमेव युक्तमितिगर्भिण्यो दारा इत्यनुपपन्नमत आह । स्त्रीदारायैरिति । अस्यार्थः । स्त्रीदारायैर्यादृशैर्यल्लिङ्गसंख्याप्रतिपादकैः पदैर्यद्विशेष्यमप्रसूतमाक्रान्तन्तद्गुणद्र-

व्यक्रियाशब्दास्तथा स्युः तल्लिङ्गसङ्ख्यास्स्युः । तस्य भेदका विशेषणभूतार्थप्रतिपादका इत्यर्थः । गुणशब्दाः । गुणप्रवृत्तिनिमित्तकाः । एवन्द्रव्यशब्दा इत्यस्य द्रव्यप्रवृत्तिनिमित्तकाः द्रव्यप्रकारप्रतीतिजनका इति यावत् । तेनेति । प्रसज्यप्रतिषेधाश्रयणेनेत्यर्थः । ऐडविड्भार्य इति । इडविड् भार्या यस्येत्यर्थः । अत्र डविड्शब्दाज्जनपदशब्दात् क्षत्रियादञितिसूत्रेणाञि कृते तस्यातश्चेति लुकि इडविड्शब्दादूङोऽभावसत्त्वात्पुंवत्त्वभवतीति भावः । ननु पुंवद्भावस्य सूत्रेण विधाने वरटा भार्यायस्येत्यर्थविवक्षायां हंसभार्य इति स्यादत आह । प्रत्या सत्येति । ह्रस्वगुरिति नेति । ननु ह्रस्वगुरितिरूपे इष्टापत्तिः । ह्रस्वा गुरितिविग्रहे तस्येष्टत्वात्समानार्थत्वाच्चेत्यत आह । वरटेति । अस्य नित्यस्त्रीलिङ्गस्य पुमांसमित्यंशाभावेन न पुंवत्त्वम् । एवमेव लक्ष्मणाभार्य इत्यत्रापि बोध्यम् । अत्र च । एतत्सूत्रोदाहरणे । अर्थातिदेशे दोषमाह । न त्विति । अर्थातिदेशे तद्वाची शब्दः प्रवर्त्तत इत्यर्थे दोषः स्यादिति भावः । रूपातिदेशे प्रसक्तान्दोषं वारयितुमाह । यद्यपीति । अर्थस्यापि निवृत्तिरिति । एवञ्च न वतण्डाच्चेत्यस्य प्राप्तिः । ध्वनितत्वे दमिति । अर्थातिदेशे एवंविधे प्रदेशे फलतो रूपातिदेशे यर्यवमानम्भवतीत्येतद् ध्वनितमित्यर्थः । तत्र हि तृतीयादिषु पुंवदित्यनेन भवतीति वाक्यशेषेण पुंसि यथा नुम्न भवति तथा भाषितपुंस्केऽन्तस्यापि तृतीयादिषु न भवतीत्यर्थे ग्रामणीशब्दस्य नपुंसकङ्कस्वत्वे कृते गुणनाभावनुडौत्वानाम्प्रतिषेधो ग्रामण्ये ब्राह्मणकुलायेत्यादौ वक्तव्य इत्युक्त्वा अर्थातिदेशात्सिद्धम् । भाषितः पुमानस्मिन्नर्थे प्रवृत्तिनिमित्तरूपे तद्युक्तस्यार्थस्य पुमर्थो भवतीत्युक्त्वा पीलुने इत्यत्र फलत्वव्याप्यपीलुत्वरूपे पुमर्थातिदेशमाशङ्क्य समानायामाकृतौ यद्भाषितपुंस्कन्तस्य पुमर्थो भवतीति समाहितम् । अत्र च यथा स्त्रियोः पुंवदितिसूत्रे भाष्ये न ह्यर्थेन पौर्वापर्यमस्तीत्यभिहितन्तथा नाभिहितन्त्वेतद् ध्वनितमर्थातिदेशेऽर्थविशिष्टशब्दरूपस्यातिदेश इति । तेन क्लीबत्वविशिष्टार्थवाचकस्य शब्दस्य पुंस्त्वविशिष्टार्थवाचकत्वरूपातिदेशात्क्लीबत्वस्य निवृत्त्या तत्प्रयुक्तकार्याणामप्रवृत्तिरिति । अत एव । भिन्नप्रवृत्तिनिमित्तकत्वस्यानिवेशादेव । इत्युत्तरितमिति । वृत्तौ यद्यपि युगपदधिकरणवचनत्वे नैकविशेष्यकप्रतीतिजनकत्वं तथापि वृत्तेः प्राक्तथा ने-

ति भावः । ननु हस्तौ सङ्ख्याविशेषानवगमेन चित्रा गावोऽस्येतिविग्रहे संख्याविशेषभानेन हस्तिसमानार्थकत्वं नैतादृशविग्रहस्येत्यत आह । हस्ताविति । अत एव । पूर्वपदाच्चेषाभावादेव । अत एव । समुदायस्य भाषितपुंस्कत्वाभावादेव । परमतङ्कटाच्चयन्नाह । परे त्विति । पूर्वपदस्य विशेषणमिति । अत्र कैवल्यं स्वाव्यवहितोत्तरत्वसम्बन्धाच्छिन्नस्वघटितसमासघटकनिष्ठप्रतियोगिताकाभाववत्त्वम् । तच्च विशेषणं यदि पूर्वपदशब्दस्य समासप्रथमावयवे रूढिः स्यात्तदाऽव्यावर्त्तकत्वेन व्यर्थं स्यादिति भावः । ननु चित्राजरद्गुरितिभाष्यमितिमूलोक्तमसङ्गतम् । संप्रत्युपलभ्यमानभाष्यग्रन्थे तादृशप्रयोगानुपलम्भादतो व्याचष्टे । चित्राजरद्गुरितीत्यस्येति । पट्वीमृदुभार्य इति । द्वन्द्वपूर्वपदकोऽत्र बहुव्रीहिः । यदुक्तं राचिः पूरणीवाच्या चेति तदुपपादयति । उङ्गुतावयवेति । निघ्नतयेति । अत्र हनधातुर्गत्यर्थः । वार्त्तिकादिति । अप्पूरणीतिसूत्रे एवं हि वार्त्तिकङ्कृतोक्तम् । अपि प्रधानपूरणीग्रहणम् । अपि प्रधानपूरणीग्रहणङ्कर्त्तव्यमिति । कल्याणी पञ्चमी यस्य पञ्चस्य स कल्याणपञ्चमीकः पञ्च इत्यत्र मा भूदिति भाष्यकृतोक्तम् । स्त्रियाः पुंवदितिसूत्रे च पूरण्याप्रधानपूरणीग्रहणम् पूरण्यां प्रधानपूरणीग्रहणङ्कर्त्तव्यमिति । प्रधानं या पूरणी तत्रेति वक्तव्यम् । इह मा भूत् । कल्याणी पञ्चमी यस्य स कल्याणपञ्चमीकः पञ्च इति । अचाप्प्रत्ययस्य पुंवद्भावनिषेधस्य चाकरणाच्च पूरण्याः प्रधान्यं तत्रोभयोः प्रवृत्तिः । पञ्चस्य प्राधान्ये च पूरण्या न प्राधान्यं तिरोहितावयवभेदसमुदायस्य पञ्चत्वादिति भावः । नद्यन्तादिति तु नोक्तमिति । नद्यन्तो यो बहुव्रीहिर्लोके प्रयुज्यते तदीयालौकिकविग्रहवाक्य इति तु नोक्तमित्यर्थः । ध्वनितमिति । तत्र हि कुण्डोघ्नीत्यत्र कबापादनपरभाष्येणेदन्ध्वनितमित्यर्थः । तत्राप्येतादृशार्थ एव कबापत्तिः कृता । नद्यन्तानां यो बहुव्रीहिरितिसूत्रार्थमाश्रित्य परिहारः कृत इति त्वन्यत् । व्याख्यानात् । केतिस्वरूपग्रहणे श्रुतम्याक इति निर्देशासङ्गतिः । प्रत्ययमात्रग्रहणे तु राका धाकेत्यत्रातिव्याप्तिरितिलक्ष्यदर्शनमूलकव्याख्यानादित्यर्थः । सामान्यविवक्षामुपपादयति । अदार्ढ्येति । ननु पुंवत्कर्मधारयेत्यस्य निषेधापवादत्वेन परत्वादित्यसङ्गतमित्यत आह । कर्मधारयेति । दर्शनीयजातो-

या दर्शनीयदेशीयेत्यत्र चारितार्थ्यादिति भावः । अस्यामिति । निषेधाश्चेतिपरिभाषायामित्यर्थः । अत्र । तसिलादिषु । तसिलादिषु कप्रत्ययपाठे प्रमाणमुपन्यस्यति । पुंवत्त्वाद्ङ्ङ्त्वमिति । दारदिकेति । दरदोऽपत्यं स्त्री दरत् ङाज्लक्षणस्याणोऽतश्चेति लुकि ततः कप्रत्यये पुंवद्भावे सति दारदिकेत्यस्य सिद्धिस्तसिलादिषु कप्रत्ययपाठे भवतीति भावः । ननु दारदिकेत्यत्र जातेश्चेतिनिषेधः कुतो नेत्यत आह । दारद इति । अगोत्रत्वेनेति । अनन्तरापत्ये प्रत्यये सतीत्यर्थः । जातिवाचकं यत्स्त्रीप्रत्ययान्तमित्यर्थेऽत्र निषेधप्राप्तिः । गोत्रापत्ये प्रत्ययसत्त्वे त्वाह । किञ्चेति । व्याख्यानेनेति । जातेरितिपञ्चमीमिहैंशमूलकव्याख्यानादित्यर्थः । परिगणने सत्यव्याप्तिशङ्कायामाह । तस्यामिति । सर्वनाम्न इत्यस्य समास एव प्रवृत्तिभ्रमं निराकरोति । अतसुच इति । त्वतलोरितिसूत्रे गुणवचनेतिसंज्ञास्वरूपोच्चारणादाह । अत्रेति । अत एव । गुणवचनसंज्ञकस्य ग्रहणादेव । हास्तिकमित्यस्य प्रकारान्तरेण सिद्धिमाशङ्क्याह । यस्येतीति । तस्य । यस्येतिलोपस्य । सिद्धत्वेति । दरदि भवो दारदीय इत्यादि सिद्ध्यर्थमुक्तया इत्यादिः । व्याख्यानमिति । आग्नेय इत्यत्र पुंवद्भावस्य भाष्ये करणदर्शनमूलव्याख्यानमित्यर्थः । तत्सम्बन्धस्य । भाषितपुंस्कादित्यत्र तत्सम्बन्धस्य । एतत्फलन्तु लक्ष्मी च युवतिश्च लक्ष्मीयुवती तयोः साधुर्लक्ष्मीयुवत्य इत्यत्र पुंवत्त्वाभाव इति । समाधत्ते । आरोपितेति । एवञ्च प्रवृत्तिनिमित्तैक्यमस्त्येवेति भावः । तटमपीति । आरोपितगङ्गात्वेन प्रतीतिकाल इत्यादिः । गङ्गाभार्य इत्यत्र भार्यशब्दोऽत्र भर्त्तृपरः । भाषितपुंस्क इति । शत्रुत्वस्योभयत्र समानत्वादिति भावः । अयमिति । विवाहनिबन्धनपतिशब्दमाश्रित्य साधित इत्यर्थः । स्वमतमाह । परे त्विति । अयम् । द्वितीयः । सापत्ने पुंवत्त्वमाप्नोतीति । इयं शङ्का तृतीयादौ तादृशरूपप्राप्तिरित्यभिप्रायेण । प्रकृत्यन्तरत्वादिति । एतेन शत्रुपर्यायसपत्नीशब्दात्तस्य सिद्धिः सूचिता । द्वितीयस्य सिद्धिमाह । किञ्चेत्यादिना । तच्च भाष्यमिति । सापत्नः प्रकृत्यन्तरत्वादितिभाष्यमित्यर्थः । सपत्नीशब्दाभावमन्यमानस्य । प्रथमत उक्तस्य सपत्नीशब्दस्याभावमन्यमानस्येत्यर्थः । उत्तराशयस्तु सोऽपि वर्त्तत एवेति । कैयटोक्तङ् कटाशयन्नाह । परे त्विति । दुर्वार इति । यदि प्रथमस्याभाव एव पूर्वपक्षिणोऽ-

भिप्रेतस्तदार्थात्तृतीयसप्तमी तन्मनसि वर्त्तते इति कल्पनीयमेव । तथा सति तृतीयादपि सापतो दुर्वार इत्यर्थः । कैयटाशय इति । सापत इतीष्यते तच्च न सिध्यति शिवादिगणे प्रथमस्यैव पाठेन सापन्न इति स्यादित्याशयकल्पनेनोपपादनीयः सः । अज्ञानेति । तच्च शिवादौ तृतीयस्यापि पाठ इति यदि न कल्प्यते किं तु प्रथमस्यैव पाठ इति कल्प्यते तदोपपन्नमभवतीति भावः । इत्यस्यापीति । उभयोरपि शिवादौ पाठः । एवं सति सापन्न इति यथा भवति तथा सापत इत्यपि प्राप्नोतीति तदाशयकल्पनयोपपाद्यः । तस्याः । इष्टापत्तेः । प्रकृत्यन्तरत्वमेवेति । सापन्ने पुंवत्त्वं प्राप्नोतीत्युक्त्याऽग्निरूपितमप्रकृत्यन्तरत्वं स्पष्टमेव लभ्यत इत्यर्थः । उपसंहरति । तस्मादिति । एवञ्च । सपत्नशब्दस्यैव तच्च पाठ इति व्यवस्थासिद्धौ च । ततः । तृतीयात् । ठकोऽप्यपवाद इति । यथा शैव इत्यत्रात इञिति सूत्रेण प्राप्तस्येञोपवादत्वाद्बाधकस्तथा ठकोऽपीति भावः । तदु ध्वनयन् । सपत्नशब्दस्य पाठध्वनयन् । नन्वेवन्तृतीयस्य पाठाभावेनाद्ययोरित्यसङ्गतमत आह । सपत्नशब्देत्यादि । ननु तृतीयाल्लिङ्गविशिष्टपरिभाषया ण्य एवेत्यसङ्गतम् । परत्वाड्ठकः प्राप्तिरत आह । एवञ्च ण्यादय इति । दैतेयादितेययोः सिद्ध्य इति । क्लिजन्तदित्यदितिशब्दाभ्यां ङ्यादिकारादिति ङीषि निष्पन्नदित्यदितीतिशब्दप्रकृतिकठगन्तयोरित्यर्थः । आकरे । कैयटे । तदा सापन्ने य इति । सपत्नीशब्दस्य शिवादौ पाठाभावेन ततष्ठगेवेति भावः । अन्यथेति । भाष्यकृत्कृताऽनित्यत्वपरिगणनेष्वेतयोरगणनादप्रवृत्त्यनङ्गीकारे । रूढयोरित्येतत्स्वोक्तरीत्या व्याचष्टे । सपत्नशब्देति । उक्तत्वादिति । एवञ्च रूढयोरित्युक्त्यसङ्गतिरिति भावः । रूढिः समुदायशक्तिः सा यद्यप्येकार्थीभावस्वीकर्तृमते सर्वत्राऽस्ति । तथापि यत्रावयवार्थाभिन्नसमुदायार्थोपस्थितौ समुदायशक्तिग्रहस्यावयवशक्तिग्रहसहकारिणैव जनकत्वन्तत्र रूढिरिति व्यवहारस्तथात्वञ्च यत्रातिप्रसङ्गसम्भवस्तत्र स्वीकर्तुमुचितमिति भावः । ठक्कसोरित्यत्र ठग्ग्रहणस्य प्रयोजनमाह । ठावस्थायामिति । ननु ठस्येकादेशे भवेन भस्याढ़ इति पुंवत्त्वं सिद्धमेवेत्यत आह । इकादेशे त्विति । सन्निपातपरिभाषयेति । अजादिप्रत्ययसन्निपातेन पुंवत्त्वे सति प्रकृते तान्तत्वं तदनन्तरं यदि तान्तात्परत्वमाश्रित्य कादेशः स्यात्तदोपजीव्यविरोधः स्पष्ट एव । नन्वत्र सन्निपातल-

क्षणविधेः पुंवद्भावस्य न हि तत्सन्निपातविघातकादेशस्मृति साक्षान्निमित्तत्वम्। पुंवद्भावे सति कादेशो भवतीत्येवं रीत्या शास्त्रेणाबोधनात् किन्तु तान्तत्वसम्पादनद्वारैवेति सोक्षात्सन्निपातविघातकत्वन्न पुंवद्भावस्येति यदि ब्रूयात्तदाप्याह। ठादिति। उच्चारणार्थत्वेनेति। अत एव माथितिकस्य सिद्धिः। भाष्यकारेष्वेतत्साधयति। अन्यवार्त्तिकानामिवेत्यर्थः। इदञ्च। भाष्यकारीयत्वञ्च। अत्यन्तस्वार्थिको वेति। मयडित्यर्थः। अत एव। मात्रग्रहणकल्पस्य तादृशार्थस्य स्वीकारादेव। अतिप्रसङ्गन्निराचष्टे। तृतीयेत्यादि। तदितरेति। तस्या इतरा इत्यर्थः। अत्र यथा पूर्वपदे भवतितथोत्तरपदेनोपलभ्यत इति भावः। प्रत्याख्यानप्रकारमाह। जातिमात्रेति। नोदनायामिति। कुक्कुटाण्डम्पश्येत्यादौ। इदमुपलक्षणम्। कुक्कुटाण्डमस्तीत्यत्रापि तथाभावात्। कुक्कुटस्याण्डमित्येव विग्रहः। पूर्वः। क्वङ्पेक्षया पूर्वः। सः। क्वङ्। तादृशसमुदाय एवेति भावः। वैलेपिकमिति। अण्महिष्यादिभ्य इत्यण्। उत्तरनिषेधाः। संज्ञापूरण्योश्चेत्यादयः। तादृशार्थे मानमाह। तदुक्तमिति। एवमाद्येति। संज्ञापूरण्योश्चेत्येवमादीत्यर्थः। एतद्भाष्येति। तत्र हि किमिदमेवमाद्यनुक्रमाद्यस्य योगस्य विषये आहोस्वित्पुंवद्भावमात्रस्य। किञ्चातः। यद्याद्यस्य योगस्य विषये माध्यमिकयीः शाल्किकीयः अत्र न प्राप्नोति। माध्यमिकायां भवः वेणुकादिभ्यश्छण् वक्तव्य इति छण्। शाल्किकायाम्भव इत्यर्थे वृद्धादकेकान्तेति छः। उभयत्र नगरीवाचका ङ्यर्थे तद्धिते भस्याढ़ इति वार्त्तिकेन पुंवद्भावे न कोपधाया इति निषेध इष्यते स न प्राप्नोतीत्यर्थः। वार्तिकेनापि भाषितपुंस्कस्यैव पुंवद्भावो विधीयते नगरीवाचकस्य तु न भाषितपुंस्कत्वमित्यभिप्रायेण तदनन्तरम्। विधिरप्यत्र न सिध्यति। किं कारणम्भाषितपुंस्कादनूङित्युच्यते न ह्यत्र भाषितपुंस्कादनूङ्। इह तर्हि विलेपिकाया धर्म्यं वैलेपिकम्। अत्र विलेपिकाशब्दो खुलन्तस्तस्मादणमहिष्यादिभ्य इत्यण्। विधिश्च सिद्धो भवति। प्रतिषेधश्च न प्राप्नोति। अथ पुंवद्भावमात्रस्य विषये। हस्तिनीनां समूहो हास्तिकम्। जातिलक्षणः पुंवद्भावप्रतिषेधः प्राप्नोति। एवन्तर्हि न कोपधाया इत्ययं योगः पुंवद्भावमात्रस्य विषये। तत उत्तरमेव माद्यनुक्रमणमाद्यस्य योगस्य विषये इत्युक्तम्। सूत्रसम्मतत्वं सूत्रकारम-

म्मतत्वम्। न च सूत्रकारसम्मतत्वे स्त्रियाः पुंवदितिसूत्रस्थसमानाधिकरणपदस्य ढभिन्नतद्धितबोधकतापि लक्षणया स्वीकार्या एवं सति विलेपिकायां भव इत्यर्थे यो वैलेपिकशब्दस्तत्र स्त्रियाः पुंवदितिसूत्रस्यैव प्राप्तिरिति आद्यस्य योगस्य विषये इतिपक्षे प्रतिषेधो न प्राप्नोतीति भाष्यासङ्गतिरिति वाच्यम्। सूत्रकारसम्मतत्वमित्यनेन सूत्रघटकपदस्य लक्षणया वार्त्तिकोक्तार्थसङ्ग्राहकत्वमिति नोच्यते किं तु सूत्रप्रणयनान्तरं वार्त्तिकोक्तार्थस्य स्फूर्त्तावपि तदंशस्य वार्त्तिकारेण पूरयिष्यमाणत्वज्ञानेऽप्युपेक्षया तदकरणेन सूत्रशेषत्वं वार्त्तिकस्येति बोधनेन सूत्रकाराभिप्रायविषयत्वमित्येवोच्यत इति। न विरोध इत्याशयात्। एवं तृतीया च होरितिसूत्रस्थभाष्यविरोधे प्राप्ते तम्परिहरति। यच्चिति। पाचिकाभार्य इत्यत्र ककारो खुलन्सम्बन्धीत्येतद्दर्शयति। खुलकादेशेति। ठनिति। रसशब्दादिति शेषः। पाका बालेति। अत्र हि इण्भीकापाशल्यतिमर्चिभ्यः कनिति सूत्रेण पाधातोः कन्। आवर्त्तत इति। अत्र वृद्धिरादैच्सूत्रस्थं भाष्यमेव मानम्। तत्र हि आदैज्मात्रस्य वृद्धिसंज्ञेतिसिद्धान्ते तावद्भार्यो यावद्भार्य इत्यत्र पुंवद्भावः स्वीकृत इति। व्याख्यानादिति। प्रवाहणस्य ढे इतिसूत्रस्थभाष्यदर्शनमूलकव्याख्यानादित्यर्थः। तदेवाहात एवेति। अत एव। वृद्धिशब्दावृत्तिसत्त्वादेव। इति भाष्ये उक्तमिति। यद्यत्र वृद्धिशब्दावृत्तिर्न स्यात्तदोत्तरपदस्यादेर्वृद्धिनिषेधे पूर्वपदस्य वैकल्पिकत्वाद्वृद्ध्यभावेपि तद्धितस्य स्वरूपयोग्यतालक्षणं वृद्धिनिमित्तत्वमस्त्येवेति पुंवत्वनिषेधस्य प्राप्तिरस्त्येवेतिनिषेधो न प्राप्नोतीति ग्रन्थासङ्गतिः स्यादिति वृद्धिनिमित्तस्येति सूत्रे वृद्धिशब्दावृत्तिर्ध्रुवेतेति भावः। तत्फलमाह। अर्धप्रस्थिकभार्य इति। प्रस्थस्यार्द्धमर्द्धप्रस्थ'। सोऽस्मिन्नस्तीत्यर्द्धप्रस्थी। अर्द्धप्रस्थपरिमितधान्यघटितः समुदायस्तं कायत्यभिधत्ते इत्यर्द्धप्रस्थिकस्तद्वाचकोऽत्रार्द्धप्रस्थिकशब्दस्तमधीतेऽर्द्धप्रस्थिकी सा भार्या यस्येत्यर्थः। अत्रार्द्धप्रस्थिकशब्दादध्येतर्यर्थेऽणि अर्द्धात्परिमाणस्येतिप्राप्तवृद्धेर्नात इतिनिषेधे पूर्वपदस्य वैकल्पिकत्वात्तदभावो बोध्यः। एतेन न कोपधाया इतिनिषेधोऽत्र दुर्वार इत्यपास्तम्। फलोपधानेपि विशेषमाह। फलोपधानञ्चेति। सिद्धान्तार्थमाह। परे त्विति। भाष्य इति। वृद्धिर्निमित्तङ्गणा यस्मिन्नित्यर्थः। नन्वेवमपि चतुष्पात् सर्वनाम्न इत्यनेन वृद्धिवि-

धानात्तस्य ङ्याङ्निमित्तत्वेन व्यपदेशिवद्भावेन तस्य तस्मिन् स्त्रियां दोषस्तदवस्थ एवेत्यत आह। निमित्तग्रहणेति। यदि ङ्याङ्र्निमित्तमिति व्याख्यायते तदा व्याकरणशब्दाङ्ङिहितेऽपि णकारसङ्गावात्तस्मिन्नपि निषेधप्राप्त्या वैयाकरणीभार्य इति प्राप्नोतीति चेदिष्टापत्तिरित्याशयेनाह। ऐचौ प्रति चेति। निमित्तत्वमस्त्येवेति। अत्र निमित्तशब्दोऽर्थ आद्यचा निमित्तवत्परः। निमित्तवत्त्वमस्त्येवेत्यर्थः। ङ्याङ्शब्देन विहिता या ङ्याङ्रिति व्याख्यानेऽपि वैयाकरणीभार्य इत्येव प्राप्नोतीत्याह। किं चैजिति। ङ्याङ्भिन्न ऐजितिसूत्रार्थाश्रवणादिति भावः। अत एव। तत्रापि ङ्याङ्पदसम्बन्धादेव। अत एव। ङ्याङ्शब्दाभेदे न ङ्याभ्यामितिसूत्रेणैचो विधानस्येष्टत्वादेव। न ङ्याभ्यामितिसूत्रस्य निषेधविधायकत्वपक्षे शङ्कते। यद्यप्यपवाद इति। एवमुक्तमिति। दाध्यश्विरित्यादौ विषयार्थमित्युक्तमित्यर्थः। सिंहावलोकनन्यायेनाह। किञ्चाचेति। वैयाकरणभार्य इत्यचेत्यर्थः। एतेन। उक्तव्याख्यानेन। अर्थस्य तदन्तत्वासम्भवादाह। तदन्तस्येति। एवमेव। तदन्तस्येतिव्याख्यानमेव। ननु मानिन्शब्दे यो निषेधः स मानिनीशब्दे न स्यादत आह। लिङ्गविशिष्टपरिभाषयेति। एवञ्च स्त्रीप्रत्ययरहिते दृष्टस्योत्तरपदत्वस्य मानिनीशब्दे पर्याप्तिसम्बन्धेनातिदेशान्मानिनीशब्दस्योत्तरपदत्वम्। यद्यप्ययं स्त्रीप्रत्ययो दीर्घमुखमानिन्शब्दाङ्ङिहितस्तथाप्यनुपसर्जनत्वान्मानिनीशब्दस्य स्त्रीप्रत्ययान्तत्वम्। ननु स्त्रीप्रत्ययस्तो न विहित इत्यत आह। यत इति। ननु सूत्रे जातेरित्युपादानात्प्रतिपदोक्तपरिभाषया जातेरस्त्रीतिसूत्रविहितस्त्रीप्रत्ययान्तस्यैव ग्रहणं युक्तमिति शूद्राभार्य इति मूलोक्तोदाहरणासङ्गतिरत आह। स्वाङ्गादित्येतदिति। व्याख्यानादिति। न कोपधाया इतिसूत्रभाष्ये ह्यास्तिकमित्युदाहरणेऽनेन सूत्रेण निषेधमाशङ्ख्यौपसङ्ख्यानिकस्य नायन्निषेध इति प्रतिपादितन्तन्मूलकव्याख्यानादित्यर्थः। तत्फलमाह। अत एवेति। अत एव। जातेः पर इतिव्याख्यानादेव। दारदिकेति। दरकोऽपत्यं स्त्री दरत्। इञ्मगधेत्यण्। अतश्चेति लुक्। तत अञ्ञाताद्यर्थे प्रागिवात्कः। तस्मिलादिषु कप्रत्ययस्यापि पाठानुमानात्पुंवद्भावः। स च स्त्रीत्र इति जातेः स्त्रिया इति व्याख्याने निषेधः स्यादिति भावः। यदि तु पूर्वोक्तभाष्यसम्मतं यदेवमाद्यनुक्रमणमाद्यस्य विषय इति तदाद्रियते तदा दारदभार्य

इत्यस्योपलक्षणमिदम्। इदं यथाश्रुतभाष्यरीत्या। यदि तु आद्यस्येत्यस्य पाणिनीयस्येत्यर्थः क्रियते तदा तसिलादिष्वित्येतस्यापि विषये जातेश्चेत्यस्य प्रवृत्तिः स्यादेवेति दारदिकेत्यप्युदाहरणम्। ननु स्त्रियाः पुंवदितिसूत्रेऽनूङित्यस्य पर्युदासत्वपक्षे ऐड्विड्भार्य इत्यत्र पुंवत्त्वन्न प्राप्नोतीति नोक्तन्तेनाच जातेरिति निषेध इष्ट इत्यनुमीयते स च भवदुक्तार्थे न प्राप्नोतीत्यत आह। स्त्रियाः पुंवदिति सूत्रे इति। एतच्चानन्तरापत्यप्रत्ययान्तस्यापि जातित्वमतेन। वस्तुतस्तु तन्न युक्तमित्याह। यत्त्वित्यादिना। सर्वोऽपि निषेध इति। न च न कोपधाया इत्ययन्निषेधः पुंवद्भावमात्रस्य विषये तत उत्तरमेवमाद्यनुक्रमणमाद्यस्य योगस्य विषय इति प्रागभिहितमिह तु सर्वोऽपि निषेधः सौचस्येत्यनेनाद्यसूत्रातिरिक्तस्य तसिलादिष्वितिसूत्रस्यापि निषेध इति लभ्यते तेनैतद्विरुध्यत इति वाच्यम्। आद्यस्येत्यस्य पाणिनीयस्येत्यर्थप्रदर्शनेन सर्वस्य सूत्रीयपुंवद्भावनिषेधस्य प्रागप्यभिधानात्। न च केशानामप्याकृतिग्रहणेति जातित्वसम्भव इत्यनेन सूत्रेणैव सुकेशीभार्यस्य सिद्धौ स्वाङ्गादितिव्यर्थमिति वाच्यम्। जातिवाचकान्वितं यत्स्त्रीत्वन्तदर्थको यः स्त्रीप्रत्ययस्तदन्तस्य प्रकृतसूत्रे ग्रहणात्। अत एव बह्वो ब्राह्मणा यस्याः सा बहुब्राह्मणा। बहुब्राह्मणा भार्या यस्य स बहुब्राह्मणभार्य इत्यत्र निषेधो न। अभिधानस्वाभाव्यात्। अभिधानं शब्दस्तत्स्वाभाव्यात् तच्छक्तिस्वभावादित्यर्थः। अत एव। उत्तरपदभूतसङ्ख्येयवृत्तिसङ्ख्यानिरूपितसामीप्यवती या सङ्ख्या तत्प्रकारकोपस्थितिसत्त्वादेव। पदभिन्नस्यान्त इति। न च शकन्धुः कर्कन्धुरित्यत्रापि पदभिन्नकशब्दान्त्यावयवाकारात्परत्वे नानेनैव तत्रापि पररूपे सिद्धे शकन्ध्वादिषु तादृशानाम्पाठो व्यर्थ इति वाच्यम्। पदस्यार्थवत्तया पदभिन्नस्याप्यर्थवत एवान्त्याकारो ग्राह्य इत्यर्थेन तादृशपाठस्य तत्रावश्यकत्वादत एव ब्राह्मणाच्छागच्छेत्यत्र न पररूपम्। परस्परप्रतिक्षेपकः। परस्परविरुद्धः। तत्र। संशयविषये। बलवत्तरप्रमाणेनेति। यथा इणप्रत्याहारः पूर्वेण णकारेण परेण वेतिसन्देहे अचिश्निति सूत्रे गुरुनिर्देशेनेणप्रत्याहारः परेणैवेतिनिश्चयः। यत्र तु न तथा बाधकमिति। यथाऽचि विभाषेति सूत्रे विभाषापदोपादानेन लत्वतदभावयोरुपस्थितौ व्यवस्थितविभाषाश्रयणेन व्यवस्था। ऐच्छिकन्तु यथा विभाषा दिक्समा-

स इतिसूत्रेण विकल्पेन संज्ञाविधानात्सर्वनामसंज्ञाकार्यघटितस्य तदभावघटितस्य वा प्रयोगेपि नासाधुत्वम् व्यवस्थितं यथा। एवञ्च। संशयविषयप्रतिक्षेपकत्वे च। अस्मात्। द्वित्रा इतिशब्दात्। तदुक्तभाष्ये । द्वौ वेत्युक्ते त्रयो वेति गम्यते। त्रयो वेत्युक्ते द्वौ वेति गम्यते सैषा पञ्चाधिष्ठाना वागिति। तत्र कैयटः। विरुद्धानेकविषयत्वाद्विमर्शस्य पर्यायस्थितद्वित्वत्रित्वाधारवस्तुसङ्कलनया पञ्चाधिष्ठानत्वमुच्यत इति। घटे पटे वा चैचस्य स्वत्वमित्यर्थे घटपटयोरन्यतरस्मिन्नस्य चैचस्य स्वत्वमिति प्रयोगो यथा भवति तथा प्रकृतेप्यन्यतररूपवार्थे बहुव्रीहिः स्वीक्रियते तदा पूर्वसूत्रेणैव प्रकृते समासेइत्याशयेनाह। वस्तुत इति।अत एवाद्वितीयरीत्या बोधस्वीकारादेवाद्वित्वसंख्योत्पत्तिका दशेति।द्वित्वसंख्याया उत्पत्तिर्येषु तादृशा दशेत्यर्थः। अत्र दशशब्द उद्भूतावयवभेदसमुदायपरः। अधिकदशा इत्यर्थमिति। अधिका दश यासान्ता अधिकदशा गाव इत्यर्थे यदासङ्केतेबहुव्रीहिः क्रियते तदा यद्यपि पूर्वसूत्रेण सिद्धिर्भवति तथापि यदा दशभ्योऽधिका इत्यर्थे समासः क्रियते तदा संख्येयस्य दशशब्दार्थत्वादन्यपदार्थाभावात्पूर्वेणाप्राप्तः समास इत्येतदर्थमिदं सूत्रमित्याशयः।फलान्तरमप्याह। कबभावार्थमिति। नन्वत्रापि बहुव्रीहौ संख्येये डजबह्वचिति डचो विधानान्नानृक्समासान्तत्वमिति कबभावः। सिद्ध एवेत्यत आह। शेषादितीति। भाष्ये स्पष्टमिति । इदमग्रे स्फुटीभविष्यति । संख्येयस्यान्यपदार्थत्वमाश्रित्य यदि पूर्वसूत्रेण समासः क्रियते तदा कब् न वक्तव्येवेति भावस्तदाह। एवं चेति। विंशतेर्गवां सङ्ख्येति। अत्र विंशतिशब्दः सङ्ख्याने वर्त्तते । विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरितिकोशात्। अत एव । दिग्रूपस्यान्तरालस्य ग्रहणादेव। तत्र । युद्धे। अत एव। युद्धस्य विशेषत्वादेव। न तदुपादानमिति। युद्धमित्यादेरनुपादानमित्यर्थः। इदम्। युद्धमित्येतत्। अत एव। उपलक्षणत्वादेव। कर्णाकर्णीति। कर्णेषु कर्णेष्वित्यर्थः। हस्ताहस्तीति । हस्ते हस्त इत्यर्थः। इतिशब्दादिषयविशेषस्य यथा लाभस्तत्प्रकारमाह। इतिशब्दश्चार्थे इति। तत्त्वञ्च। प्रकाशत्वञ्च। तत्रास्येति । कर्मव्यतिहारेऽस्य समासस्येत्यर्थः। इति कर्मव्यतिहार इतिमूलोक्तस्यास्मिन्कर्मव्यतिहारेऽनेन वचनेन दीर्घ इत्यर्थः। अन्यार्थमपीदं वचनमित्याह। तुराषाडीति। एवञ्च कर्मव्यतिहारबहु-

व्रीह्यादित्यपि प्रस्तुताभिप्रायमेव । न त्वन्येषामपीतिवचनार्थे प्रवेशः । अत्र च क्त्वादीति । इच्प्रत्ययस्य तिष्ठद्गुप्रभृतिपाठ इत्यर्थः । पराङ्गवत्त्वाच्चाव्ययत्वमिति । तत्र हि षष्ठ्यामन्वितकारकवचनमित्युक्तत्वादस्य कारकविभक्त्यन्तत्वे सति पराङ्गवद्भावः स्यादेवञ्च दङ् कुर्वन्नित्येतदपेक्षया द्वितीयान्तान्द्वितीयायाश्चाव्ययत्वान्नुगिति भावः । अव्ययीभावेऽभोवादिति । लुङ्सुखखरोपचोरा इतिपरिगणनादिति भावः । क्त्वादीत्यनेन सूचितामरुचिमभिप्रायति । के चित्त्विति । तत्प्रयोग इति । केशाकेशि कुर्वन्नितिप्रयोग इत्यर्थः । इच्प्रत्ययस्य यदि स्वरादौ पाठस्तदाऽव्ययत्वादव्ययानान्नेतिनिषेधात्पराङ्गवद्भावो न स्यादितिग्रङ्गानुत्थानायेत्यमभिहितम् । स्थित्वादिक्रियेति । केशेषुकेशेषु गृहीत्वा स्थितयोरित्यर्थ इत्यनेन ग्रहणस्थितिक्रिययोः समानकर्तृकत्वन्दर्शितन्न तु युद्धकर्तृकग्रहत्तिक्रियामादाय क्त्वाप्रत्ययस्योपपत्तिरसमानकर्तृकत्वात् । पुरुषाणामिति । एवञ्च स्थितयोरितिद्विवचनमविवक्षितमिति भावः । अनेकमितिसूत्रेणास्य समासस्यागतार्थतामाह।इदं सूत्रमिति ।प्रक्रियाल्लाघवार्थमप्याह। औरविति। ननु संज्ञापूर्वकेतिपरिभाषासावे द्वन्द्विसंज्ञापूर्वत्वेन न याभ्यामितिनिषेधस्यानित्यत्वादप्रवृत्तौ द्वन्द्विप्रवृत्तौ द्वारादित्वादैचि शौवादंष्ट्रो मणिरित्यस्य सिद्धिर्भवति परिभाषाया अभावे तु न स्यादत आह।शौवेतिा।यद्वा संज्ञापूर्वको विधिरनित्य इति परिभाषासत्त्वे शौवादंष्ट्रस्य सिद्धिर्भवति परिभाषाया अभावे तु शुनो दन्तदंष्ट्रेत्यनेन दीर्घे श्वादंष्ट्राशब्दाद्वाच्छेऽस्य सिद्धिर्न स्यादत आह। शौवेति । भाष्यप्रयोगादिति । एतेनाचान्येषामपीत्येव दीर्घविधायकं शुनो दन्तेति त्वस्यैव दृष्टिग्रहणस्य प्रपञ्च इति ध्वनितम् । स च दीर्घः प्रयोगदर्शनेन कल्प्यः प्रकृतौ च तद्विधोत्पत्तेः प्रागप्रवृत्तिः कल्पनीया । एवं सति द्वन्द्वत्वाभावाच्छस्याप्राप्तेरण् । ततो द्वारादित्वादैच् । अन्येषामपीति दीर्घः । दृष्टिग्रहणादेवाप्रवृत्तिकल्पनायान्दृष्टान्तः श्वपुच्छवदिति । एवमेव । यथा संज्ञापूर्वक इतिवचनमप्रामाणिकन्तद्वत् । तत्तद्वचनबलात्साधयितुमिष्टाः प्रयोगाश्छान्दसातिरिक्ता अप्रामाणिका एवेति बोध्यम् । तद्द्योतकमिति । तुल्ययोग इति सप्तम्या द्योतनासम्बन्धावच्छिन्नाधारत्वमर्थ इति भावः । समासविशेषणत्वमुपसर्जनसद्यस्य न तु सहशब्दविशेषणत्वमव्यभिचारात्समासविशेषणत्वे ऽप्युपसर्जनशब्दस्यात्यन्तत्वम-

च साधकमाह । लक्ष्यानुसारिव्याख्यानादिति । तत्फलमाह । सहस्रत्वेति । सहशब्दविशेषणत्वेऽपि स्यात् । साक्षात्समासविशेषणत्वे फलमाह । सहस्रत्वप्रिय इति । व्याख्यानादेव । लक्ष्यानुसारिव्याख्यानादेव । सपुत्रादेरिति । एतेषु सहशब्दस्य लौकिकोपसर्जनत्वाभावेऽपि शास्त्रीयमुपसर्जनत्वमस्त्येव । तेन सहेतिसूत्रारम्भस्य प्रयोजनमाह । व्यधिकरणत्वादिति । तत्रैव तत्प्रवृत्तेरिति । सपूर्वायाः प्रथमाया इति निर्देशात् । इतिशब्दादिति । अस्योपादानादस्य सूत्रस्य प्रयोगदर्शनात्प्रवृत्तिरिति भावः । ननु कबभावार्थमितिपूर्वमुक्तत्वात्सकर्मक इत्यत्र कप्रत्ययानुपपत्तिरत आह । स्वार्थे क इति । अत एव । स्वार्थेकप्रत्ययस्वीकारादेव । असम्भवादिति । व्यधिकरणत्वादेरभावादिति भावः । नन्वेवं सहैव दशभिः पुत्रैरित्यत्र तृतीया कथमत आह । सहैवेत्यादि । विद्यमानतावाचीति । एतेन व्यधिकरणत्वं स्पष्टमेव । एवञ्च । सहशब्दस्य विद्यमानवचनत्वे च । प्रकृत्याऽऽशिषि । अत्र नेति वक्तव्ये प्रकृत्या इत्युपादानमदृष्टार्थम् । नन्वेवमाशीर्वचने सपुत्रस्येत्यस्य प्रयुज्यमानस्य का गतिरत आह । सपुत्रस्येतिरूपे विशेषाभावादिति । एवञ्चाबहुगणादिति प्रतिषेधवैयर्थ्यमिति शेषः । प्रत्याख्याने त्विति । प्रत्याख्यानपूर्वपक्ष इत्यर्थः । सूचितमिदमिति । प्रत्याख्यानं सूचितम् । अत्र पक्षे । प्रत्याख्यानपक्षे । कबपीति । सङ्ख्येयेऽन्यपदार्थे यदाऽनेकमितिसूत्रेण समासः क्रियते तदा कब्भवत्येव । यदा तु विंशत्यादीनां सङ्ख्यासङ्ख्येयोभयपरतयाऽधिकविंशा इत्यादौ अधिका विंशतिर्यासामित्यर्थकल्पने किञ्चिदधिका विंशतिः सङ्ख्या यासामित्यर्थसम्भवेऽपि दशादीनां सङ्ख्येयमात्रपरतयाऽधिकदशा इत्यादिसिद्ध्यर्थं सूत्रमारभ्यते तदा पूर्वोक्त एवार्थः । एतच्चारुचिबोधकेन तुना सूचितम् । तथा चोक्तं भाष्ये इदन्तु न सिध्यति । अधिकदशा इति । वार्त्तिककारश्चाह । मत्वर्थे पूर्वो योगः । अमत्वर्थोऽयमारम्भः । अनेन सूत्रस्यावश्यकत्वं वार्त्तिककारसम्मतमिति स्पष्टमेव । द्विना इत्याद्यर्थमत्वर्थग्रहणकर्त्तव्येऽपि स एवाह । कबभावार्थं वेति । एतत्सूत्रविहितसमासस्य शेषाधिकारस्थत्वाभावेन कपोऽप्राप्तेरिति भावः । न च द्वेरुक्तयोरित्यादिसिद्ध्यर्थमेकादिनवान्तानां सङ्ख्यापरत्वस्यापि स्वीकारादिदन्त्वित्याद्युक्तमसङ्गतमिति वाच्यम् । सौत्रप्रयोगविषय एव तथा स्वीकारेऽप्यन्यत्र ने-

त्याशयात् । भाष्येऽनन्तरबहुव्रीह्यपेक्षयेति । शेषाद्विभाषेतिसूत्रे भाष्ये उक्तम् । कः शेषः याभ्यः प्रकृतिभ्यः समासान्तो न विधीयते स शेष इति । सामान्येनोक्ते ये प्रतिपदं विधीयन्ते ते बाधका भविष्यन्तीति पूर्वपक्षिणोक्ते कपो वैकल्पिकत्वात्तदभावे सावकाशत्वेनाषवादत्वाभावात्परत्वात्प्रतिपदविहितसमासान्तविषये कप् प्राप्नोति तस्माच्छेषग्रहणङ्कर्तव्यम् । ततः किमपेक्षं शेषत्वमिति प्रश्ने यस्माद्विशिष्य समासान्तो न विहितस्तदपेक्षं शेषत्वमित्यर्थे कथितेऽनूक्तमिति न सिध्यतीति परेणोक्ते अनन्तरो यो बहुव्रीह्यधिकारस्तदपेक्षं शेषत्वमित्युक्तम् । स चाधिकारो बहुव्रीहौ सक्थ्यक्ष्णोरिति । स च बहुव्रीहिः प्राथमकल्पिकः । एवञ्चैतदधिकारीयसमासान्तस्याचाविधानेन कबपि भवतीति भावः इदञ्च कृतमिति । बहुव्रीहौ सङ्ख्ये ये डजबहुगणादिदं सूत्रञ्च कृतमित्यर्थः । सङ्ख्याया इतीति । सङ्ख्यान्तस्य तत्पुरुषस्य समासान्तो डजित्यर्थः । अव्ययादेरितीति । अव्ययादेरिति च वक्तव्यमिति पूर्ववार्त्तिकशेषात् । ननु यद्यव्ययादेरित्युच्यते तदान्यत्राधिकलोपादित्यपि वार्त्तिककृतोक्तम् । द्व्यधिका विंशतिर्द्वाविंशतिकारेधिका विंशतिरेकविंशतिरिति च फलमुक्तत्वन्नोपपद्यतेऽव्ययादित्वाभावादत आह । अन्यत्रेत्यादि । स्वरीत्येति । तेनाव्ययादेरित्यस्यानुपादानाच्छेषपूरणस्य भाष्यकृता कृतत्वादिति भावः । किं चैकविंशतिरित्यादौ भाष्यरीत्या तत्पुरुषाभावान्न डचः प्राप्तिरित्याह । भाष्यकृता त्विति । इन्द्र एवेति । एवञ्च संख्येतिसूत्रेण पूर्वपदप्रकृतिस्वरो भवति । एवमेव । व्यत्ययेन । ऊर्ध्वमानविवक्षायामाह । द्व्यसचो वेति । तदन्तग्रहणन्नास्तीति । एवञ्च रषाभ्यामित्यनेनान्वयाय पूर्वपदग्रहणञ्चात्रानुवर्त्तते इति भावः । अनभिधानमिति । संज्ञात्वाक्रान्तानामित्यादिः । रघुनाथादिशब्देऽतिप्रसङ्गं वारयति । रघुनाथेति । पक्षेऽजेति । णसादेशस्य वैकल्पिकत्वेनैतदभावे पूर्वसूत्रमवर्त्तत इति भावः । भाष्य इति । एतद्वार्त्तिके वाग्रहणमित्यर्थः । खुरखराभ्यान्नस् वक्तव्य इत्येव पाठात् । एवञ्च खुरणस इत्याद्यसाध्वेव । उपसर्गसंज्ञायाः क्रियायोग एव प्रवृत्तेर्नासिकाशब्दार्थेन योगे उपसर्गत्वासम्भवादुपसर्गग्रहणमादुपलक्षणमित्याशयेन मूले व्याख्यातम् प्रादिति । अन्यथा । अनोत्पर इत्यस्यैवोपादाने । प्राग्वदेवेति । प्रादुपलक्षणमेव । नसादेश इति । एवञ्च नैतत्प्रथमान्तम् । किन्तु

तृतीयान्तम्सुप्रात इत्यादाविति। अत्राधिकरणशक्तिप्रधानस्यापि प्रातःशब्दस्य स्वसम्बन्धिकर्मविशेषलक्षणया शोभनपदेन सामानाधिकरण्यम्। यद्यपि प्रातःकल्यमित्यादाविव वृत्तिविषये शक्तिमत्परत्वेनापि निर्वाहो भवति। तथापि कालस्य स्वतः शोभनत्वमदृष्टत्वं वा न सम्भवतीत्युपाधिसंसर्गेणैव तद्वाच्यतदपेक्षया लक्षणया कर्मविशेषपरत्वमुचितमेव। निपातनादिति। पाच्छब्दस्य क्तान्तसमासान्तत्वाभावेनाक्षोपस्य स्थानिवद्भावेन च पादः पदित्यस्याप्राप्तिरिति भावः। अस्य। नञ्दुःसुभ्य इत्यस्य। न च प्रहृतवृत्ते हलिग्रहणं व्यर्थम्। हलशब्देन समासेऽहल इत्यस्य सिद्धिर्भविष्यति महत्त्वप्रतीतिरपि प्रकरणादिना भविष्यतीति वाच्यम्। असिच्प्रत्यये सति दुर्हल इत्यत्र चित्त्वादन्तोदात्तत्वसम्भवति। प्रकृतसूत्रे हलिग्रहणाभावे हलशब्देन समासे तु पूर्वपदप्रकृतिस्वरेणादुदात्तत्वापत्तिः। हलिग्रहणसत्त्वे तु प्रकृतसूत्रेण समासान्ते कृते कबन्त्र भवतीत्याशयात्। ननु प्रजामेधाशब्दान्तबहुव्रीहेः सिच्प्रत्यय एव विधातव्यो यस्येतिलोपाभावेऽपि अप्रजा इत्यादि भविष्यतीत्यत आह। अकारोच्चारणस्त्विति। अस्वरितत्वेनान्यतरस्याङ्ग्रहणस्यासम्बन्धेन नित्यत्वे लब्धे नित्यग्रहणङ्गमर्थमत आह। नित्यग्रहणमिति। भाष्यस्वरस इति। भाष्यहृता प्रकृतसूत्रस्थनित्यग्रहणस्य प्रयोजनान्तरन्नोक्तम्। एतेन यत्प्रकृतसूत्रस्थनित्यग्रहणमन्यतोप्यर्थवन्नाल्पमेधस इति सिध्यतीति वृत्तिकृदादुक्तन्तन्निरस्तम्। रूढौ न मानमिति। रूढावेव न मानमित्यर्थः। तेन पादस्य पदाज्योतिसूत्रे बहुव्रीहौ प्रकृत्येतिसूत्रे च रूढिसत्त्वेऽपि न क्षतिः। सजातीयेति। अत्र साजात्यं स्वघटितसमासघटकत्वेन। अभावस्याव्यवहितोत्तरत्वसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः। अदृष्टार्थ इति। अत्रानुकरणभूतेनाकारेणादृष्टशब्दस्य समासः। अः अदृष्टो यस्य सः। अदृष्टाः अदृष्टाः प्रयोजनं यस्य सोऽदृष्टार्थः। तादृशश्च णिजन्तो धर्मशब्द इति भावः। साहचर्यादिति। पूर्वोत्तरसूत्रसाहचर्यादप्रत्ययचकारसाहचर्याद्वेत्यर्थः। परमतङ् खण्डयति। वलादाविति। युवजानिरित्यत्रोच्स्थानिकत्वेन दोषाभावेऽप्याह। गौधेर इति। ससुरभिभ्य इति पञ्चमीनिर्देशात्तस्मादितिपरिभाषाप्रवृत्तावप्याह। समामाम्ना इति। गन्धशब्दो द्रव्यवाची गुणवाची च। बहु-

ति जलमियम्पिनष्टि गन्धानित्यादौ द्रव्यवाची। गुणवाची तु चन्दनस्य गन्ध इत्यादौ दृष्टः। प्रकृतसूत्रे तु द्रव्यवाचिनो न ग्रहणमिति बोधनाय वार्त्तिकक्रतोक्तङ्गन्धस्येत्वे तदेकान्तग्रहणमिति तच्चैकान्तशब्दस्यावयववाचकतया गुणस्यावयवत्वाभावादाह। मूले एवान्त इवेति। पातञ्जलमतेनाह। गुणसमुदाय इति। अन्ये। मुख्याः। यद्यपि गन्धशब्दो नानार्थः तथाप्यख्याख्यायामित्युपादानाल्लेशवाचकस्यात्र ग्रहणमित्याह। तथा चेति। ननु मूलोक्तं स्त्रियामित्यप्रकृतमत आह। स्त्रीलिङ्गानामेवेति। क्रुञ्चपदीषु चेतिसूचारम्भप्रयोजनमाह। यदिहोपेति। शिशुत्वावस्थेति। पशुविषये तादृशी प्रसिद्धिर्लोकेऽस्ति। उपचयादय इत्यादिनाऽपचयग्रहणम्। एकवचनान्तपाठे न यथाऽर्थविशेषलाभस्तन्प्रकारमाह। सर्वत्र गण इति। समासान्तसामान्यस्य तदभिप्रायविषयत्वमित्यत्र तदुक्तिरेव प्रमाणमित्याह। तद्दृच्यतीति। समासान्तापेक्षया शेषग्रहणे शेषग्रहणं व्यर्थं स्यादिति कस्य चिदुक्तिङ् खण्डयति। समासान्तास्वेति। समासान्तसामान्यापेक्षया शेषाग्रहणे सति यल्लिङन्तदाह। एवं चेति। प्रियपथिक इति। अत्र परत्वात्कप्। ऋक्पूरित्यकारस्तु यदा न कप् तदा भवति। प्रियपथ इति। तदाह अपीति। अत एव। यदा संख्येयेऽन्यपदार्थेऽनेकमिति-सूत्रेण समासः क्रियते तदा डज्विषयेऽपि कप इष्टत्वादेव। अन्यत्र पाठः। अनन्तरो यो बहुव्रीहौ सक्थ्यक्ष्णोरितिबहुव्रीह्यधिकारस्ततोऽन्यत्र पाठः। अन्यत्र विस्तर इति। अनन्तरो यो बहुव्रीह्यधिकारस्तदपेक्षस्य शेषपदार्थस्य ग्रहणमुक्त्वा कथमनृचो वक्ष्यच इति। वक्तव्यमेवैतत्। अनृचो माणवे। बव्हृचश्चरणाख्यायामिति भाष्ये उक्तम्। कथमिति। बहुव्रीह्यधिकारविधानाच्छेषत्वात्कपप्रसङ्गः। वक्तव्यमेव। एतदित्यनेन विशेषवचनेन कपो बाध एव। विनिगमनाविरहेणानृचो माणवे एव। माणवेऽन्यच एवेत्युभयविधनियमाश्रयणात्। यत्त्वत्र कैयटेनोक्तम्। समासान्तापेक्षेऽपि शेषत्वेऽन्यचबव्हृचयोर्विशेषवचनादन्यचानृक्कयोः पक्षे कपः सिद्धत्वात्कस्य चिद्दोषस्याप्रसङ्गात्किमर्थमनन्तरबहुव्रीह्यधिकारापेक्षः शेष आश्रीयते। किञ्चोपदशादिभ्यः पक्षे कपप्राप्नोति अनन्तरे बहुव्रीह्यधिकारे डचोऽविधानात्प्रियपथः प्रियधुर इत्यत्र च प्राप्नोति तस्मात्समासान्तापेक्षमेकशेषत्वमाश्रयणीयमिति। एतदेवानुक्तसमासान्तादिति वदता मूलक्र-

तापि समासाश्रितमिति । अत्रेदञ्चित्यम्-नैव कबपेक्षं शेषग्रहणन्नापि समासापेक्षमित्यनेन नञ्घटितवाक्यद्वयेन पूर्वोक्तपक्षद्वयोपमर्दं कृत्वा भाष्यकृता अनन्तरो यो बहुव्रीह्यधिकारः सोऽपेक्ष्यत इत्यनेन तृतीयपक्ष एव स्वीकृतोऽतः स एवादरणीयः । कपो वैकल्पिकत्वेन पक्षे प्रियपथिक इतीष्टमेव । भाष्यकृता एतादृशदोषानुद्भावनात् । अप्रतिषिद्धमनुमतं भवतीतिन्यायात् । समासान्तइति सूत्रस्थ उच्चधुरइतिप्रयोगस्तु कबभावपक्षे बोध्यः । न च विशेषापेक्षात्सामान्यापेक्षमन्तरङ्गमितिन्यायेन समाससामान्यापेक्षत्वेन ऋक्पूरित्यन्तरङ्गमिति वाच्यम् । प्रकृतिविशेषापेक्षत्वेन तस्यापि समत्वात् । सामान्यापेक्षत्वेनान्तरङ्गत्वस्य भाष्यकृताऽनाश्रयणाच्च । ननु यद्यनन्तरो यो बहुव्रीह्यधिकारस्तदपेक्षया शेष आश्रीयते तदा बहुव्रीहावुरः प्रभृतिभ्यः कप् । इनः स्त्रियाम् । नष्टातश्च । विभाषा । इत्येवं कप्प्रकरणं समाप्य सक्थ्यक्ष्णोः स्वाङ्गात् षच् । अङ्गुलेर्दारुणि । इत्यादिसूत्रं कर्त्तव्यम् । प्रकृतसूत्रस्थं शेषग्रहणन्न कार्यं विशेषविहिताः षजादयो बाधका भविष्यन्तीति चेन्न । विभाषा श्यावारोकाभ्याम् पूर्णाद्विभाषा इत्यनयोर्वैकल्पिकत्वेनैतयोरभावे कबापत्तेः । मम तु अनन्तरो यो बहुव्रीह्यधिकारः सोऽपेक्ष्यते । अनन्तरे बहुव्रीह्यधिकारे यस्माद्बहुव्रीहेः समासान्तो न विहित इत्यभिधानात्तद्विषये कपोऽप्राप्तेर्न दोषः ! किं च शेषपदाभावे शेषाधिकारस्थबहुव्रीहेरित्यर्थलाभोऽपि न स्यादिति बोध्यम् । शेषादित्यस्यैव निषेध इति । तेनोरः प्रभृतीति कप् संज्ञायाश्चवत्येव । विश्वे देवा अस्येति लौकिकविग्रहार्थं व्याचष्टे । विश्वाख्येति । अत्र विग्रहे बहुवचनोच्चारणस्य बीजमाह । उद्भूतेति । विश्वाख्येत्युपादानेन तस्य गणविशेषस्य विश्व इत्यपि संज्ञा । गणश्चोद्भूतावयवभेद एव प्रतीयते शब्दशक्तिस्वभावात् । इदमत्र बोध्यम् । न संज्ञायामितिनिषेधो नावयवस्य संज्ञात्वमादाय किं तु समुदायस्यापि संज्ञात्वादेव । कत्रहिता चेत्संज्ञा विवक्षिता तदा कप् न भवतीतिसूत्रार्थात् । सा च संज्ञा लोके विभक्त्यन्तविश्वशब्दघटितैवोच्चार्य्यते । न च संज्ञाशब्दा नियतापूर्वोका एवान्यत्र दृश्यन्ते इह तु विश्वान्देवान्विश्वेभ्यो देवेभ्यो विश्वेषान्देवानामित्यनियमो दृश्यत इति कथमिति वाच्यम् । देवशब्दप्रकृतिकविभक्तिसजातीयविभक्तिप्रकृतिभूतदेवशब्दाद्यवयविकाऽत्र संज्ञेत्यर्थात् ।

साजात्यञ्च समानार्थकत्वविशिष्टसङ्घेनेति । विश्वेदेव इति त्वप्पाठ इति । परिनिष्ठिते प्रयोगे विभक्त्यलुग्विधायकसूत्राभावादिति भावः । अत एव तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते। ईयसश्चेति सूत्रविषयेऽनन्तरस्येतिन्यायाप्रवृत्तौ बीजमाह । न संज्ञेयसो हि सैवेति। ईयसः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तत्तदन्तपरमतो लिङ्गविशिष्टपरिभाषाया इह प्राप्तिः । ईयसो बहुव्रीहेर्नेति निषेधवचनं यद्यपि नोपलभ्यते तथापि तादृशानुपूर्वीकस्य यथा लाभस्तथाकारमाह । ईयसो बहुव्रीहाविति । गोस्त्रियोरितिसूत्रात्स्त्रीग्रहणमत्र सम्बध्यत इत्याशयेनाह । स्त्रीप्रत्ययस्येति । अत्र सूत्र इति । ईयसश्चेतिसूत्र इत्यर्थः । विषयत्वं सप्तम्यन्तार्थः । ननु यदि पुंवद्भावो विधीयते तदा कुलस्यान्यपदार्थत्वे श्रिशीनुमादीनामपि प्रतिनिवृत्तिः प्राप्नोतीत्यत आह । दीर्घत्वमिति । एतद्वचनैकवाक्यतया पूर्ववचनेन पुंवद्भावविधानेऽपि ह्रस्वत्वस्यैव प्रकरणप्राप्तस्य तेन निवृत्तिर्बोध्यते इति कल्पनीयम् । अनेन । पुंवद्वचनेन । आवश्यकेनेति । अन्यथा दीर्घत्वविधानस्य पुंसि जातेऽपि गोस्त्रियोरितिह्रस्वत्वे पुनरनेन दीर्घत्वविधायकतया चारितार्थान्नपुंसकह्रस्वत्वनिवृत्तिर्न स्यादिति भावः । निषेध इति । कप इत्यादिः । एतेन । पूजित इतिकयनेन । कर्त्राद्यन्वयद्वारैवेति । अत एव समासप्रयोजकं सामर्थ्यमत्र वैयधिकरण्येपीति । अन्यथा सामर्थ्यसङ्गावेऽपि सप्तम्यन्तैकविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्याभावात्समासो न स्यादिति भावः । सप्तमीविशेषण इतिसूत्रे विशेषणपदेन सप्तमीपदसाहचर्यादुत्तरपदार्थविशेषणीभूतार्थप्रतिपादकस्य ग्रहणमित्याह । उभयोरपीत्यादि । सर्वनामसंख्ययोरितिवचनारब्धस्य प्रयोजनमाह । श्वेतेति । अन्यथा विशेषणत्वाच्छ्वेतशुक्लयोरेव पूर्वनिपातः स्यादिति भावः । वन्येतरा इति । वन्या इतरे येभ्यः हस्तो दक्षिणो यस्येत्यर्थः बहुव्रीहावन्यपदार्थप्राधान्येऽपि सर्वनामत्वमुपपादयति । वचनेति । अत एव । शब्दपरविप्रतिषेधस्याभिमतत्वादेव । साधारणमिति । संख्याऽव्ययेतिसूत्रभाष्ये द्विचाः । चिचतुरा इत्युदाहरणादिति भावः । मूले द्वन्द्वेऽपीत्यपिशब्दस्तत्पुरुषस्यापि समुच्चायक इत्याशयेनाह । सहस्राणामिति । इदम् । वाप्रियस्येति वचनम् । प्रियगुड इत्यस्येत्यर्थः । बहुव्रीहावेवेति । तेन

तत्पुरुषे न। सहप्रिय इत्यस्य बहुव्रीहित्वेऽपि तत्र नेदं वचनमवर्त्तते। यत्र पदार्थस्य विशेषणत्वेन प्रियपदस्य पूर्वनिपातप्रसङ्गस्तत्रास्य वचनस्य प्रवृत्तिस्वीकारात्सहशब्देन समासे तूत्तरपदे सादेशविधानेन सहशब्दस्यैव पूर्वनिपातप्रसङ्ग इति तत्र वा प्रियस्येत्यस्याप्रवृत्तिरिति भावः। वृत्तौ 'स्पष्टमिति। भाष्यानुक्तत्वेन सिद्धान्ते व्यवस्थितविभाषात्वे मानाभाव इति भावः। क्रियाशब्दत्वादिति। एतेन तत्र विशेषणविशेष्यभावे कामचारः सूचितः। चारुस्मितेत्यादीति। अत्रादिना चारुदती चारुनेत्र इत्यनयोः सङ्ग्रहः। ज्ञापितमिति। इदं वचनमिति शेषः। वाग्रहणानुवृत्तेरिति। निष्ठातिसूत्रभाष्ये पठितं यज्जातीतिवचनं तत्र वा प्रियस्येति पूर्वसूत्रपठितवार्त्तिकाद्वाग्रहणानुवृत्तेरित्यर्थः। वस्तुतस्तु भाष्ये जातिकालेत्यन्तोदात्तत्वविधायकवचनेऽकृतमितप्रतिपन्ना इतिप्रतिषेधवचनस्यैतादृशविषये निष्ठान्तस्य परनिपाते ज्ञापकत्वमुक्त्वा अकृतेत्यादिप्रतिषेधविषये राजदन्तादित्वकल्पना निरस्ता तेन जातिकालसुखादिभ्यः परो निष्ठेतिवचनस्य ज्ञापकसिद्धस्यासार्वत्रिकत्वसूचनेन सर्वेष्टसिद्धिर्भवतीति बोध्यम्। यदि तु प्रतिषेधविषय एव निष्ठान्तस्यापरनिपातः स्यात्तदा पीतशब्दस्य तत्र पाठाभावात्पीतोदकमितिप्रयोगासिद्धिः स्यादित्यतदुदाहरणोपन्यासेन मूलकृताप्ययमर्थो ध्वनितः। क्व चिन्नेति। वाग्रहणानुवृत्त्याऽहिताग्न्यादित्वकल्पनया वा इदमपि सिद्धम्।

॥ इति बहुव्रीहिविवरणम् ॥

तत्फलमिति। अनेकग्रहणानुवृत्तेः फलमित्यर्थः। तस्य वाक्यस्येति। चैचेण मैचेण कृतमितिवाक्यस्येत्यर्थः। तस्य चैचेणमैचेणेत्यस्य तद्वाक्यत्वाभावाच्चैचमैचाभ्यामितिसमुदायसाधुत्वप्रयोजकवाक्यत्वाभावात्। अत एव। इतिविग्रहवाक्ययोः समानार्थकत्वनियमादेव। न तदुदाहरणमिति। न द्वन्द्वोदाहरणमित्यर्थः। प्रत्येकान्वयविवक्षायामिदम्। समुदायस्यान्यत्रान्वयविवक्षायान्तु भवत्येव। धवखदिरौ छिन्धीति यथा। एतेन। उक्तप्रकारेण। तमेवाह। राजन्द्वन्द्वारकेति। वार्त्तिकविरोधशङ्कां वारयति। तिङिति। अत एव। समुदायस्य कर्तृत्वादेव। आद्यक्रिया। क्रियावाचकपदाद्यक्रिया। तदन्वया-

दिति । तदर्थेऽन्वयादित्यर्थः । तेन । अनेकस्येत्युपादानेन । सापेक्षत्वे पीति । ईश्वरङ्गुरुञ्च भजस्वेतिवाक्याच्चशब्दस्य द्योतकतया ईश्वरसमुच्चितङ्गुरुमिति-बोधेन गुरुपदार्थस्येश्वरसापेक्षत्वे पीश्वरपदार्थस्य गुरुपदार्थानपेक्षत्वेनासा-मर्थ्यान्न तत्र समासः । समभिव्याहारस्याच्च स्वोच्चारणकालाव्यवहितपूर्वकालो-च्चरितत्वम् । अत एव । एतादृशे विषये एकस्यैवेतरसापेक्षत्वादेव । ईश्वरक-र्मकभजनक्रियाया गुरुकर्मकभजनक्रियाभिन्नत्वादेकस्मिन्नित्यसङ्गतमत आह । एकधर्मावच्छिन्न इति । अपिनाऽवच्छेदधर्मस्याचैकत्वं विवक्षितमिति भावः । अन्वयपदस्य सम्बन्धप्रतिपादकतयाऽन्वयः समुच्चय इत्यसङ्गतमत आह। यत्रैवमिति । अन्यः । विशेषणता । वक्ष्यमाणोदाहरणे । ईश्वरङ्गुरुञ्चेत्यादौ । अत्र प्रातिपदिकार्थसमुच्चयसत्त्वादेतेषां च यद्धर्मावच्छिन्नक्रियानिष्ठविशेष्यता-निरूपितविशेषणतापन्नविभक्त्यर्थविशेषणत्वमपरस्यापि तादृशधर्मावच्छिन्न ए-व परम्परयाऽन्वयादिति भावः । आद्यः । विशेष्यतया । क्रियासमुच्चय इति । अत्र चशब्देन क्रियागते समुच्चितत्वन्द्योत्यते । क्रियायाश्च विशेष्यतयाभावस्या-नुभवसिद्धत्वादिति भावः । साधारणानुषङ्गिकपदार्थतावच्छेदकमाह । आनु-षङ्गिकत्वमिति । एकस्य प्राधान्ये तदितरस्यानुषङ्गिकत्वव्यवहार इत्यानुषङ्गि-कपदप्रतिसम्बन्धितया प्राधान्यपदव्यवहर्त्तव्यतावच्छेदकमाह । अन्यस्येति । अन्वाचयस्थले चशब्दे तद्द्योत्यमर्थद्वयमाह । अन्वाचय इति । एवं च भिक्षा-मट गाञ्चानयेत्येवंविधेऽन्वाचयाभिप्रायेण वाक्ये उच्चारिते सति चशब्दसमभि-व्याहृतपदप्रतिपाद्या या क्रिया तस्याच्चशब्दद्योत्यार्थस्य विशेषणतयाभानञ्जा-यते । अनुद्दश्यभिक्षाटनव्याप्यङ्गवानयनमिति बोधः । अत्र परस्परमनन्वया-त्सामर्थ्याभावः स्पष्ट एव । परस्परापेक्षाणमिति । इतरेतरयोगनिरूपणावसरे प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यते एतत्प्लक्षोऽपि न्यग्रोधसहायो न्यग्रोधोऽपि प्लक्ष-सहाय इति भाष्यकृतोक्तम् । अत एव परस्परापेक्षासूचनायेदृशे विषयेऽनेकच-कारप्रयोगः । यद्यपि मिलितानामन्वय इत्येवम्मूलकृताभिहितन्तेन साहित्य-रूपम्मेलनं वर्त्तिपदार्थे विशेषणमिति प्रतीयते । तथापि द्वन्द्वे साहित्यस्य वि-शेष्यतया भानन्याय्यमत एव गोस्त्रियोरुपसर्जनस्येतिसूत्रे कुक्कुटमयूर्यावित्यत्र कुक्कुटमयूरीशब्दार्थस्य साहित्यमिति विशेषणतयोपसर्जनत्वाद्ह्रस्वत्वमाशङ्ग्य

द्वन्द्वे नेति वचनमारब्धम् । मिलितानामित्यस्य परस्परापेक्षाणामित्येवार्थः । परस्परापेक्षापदार्थनिर्वक्ति । उद्भूतावयवभेदेति । समूहरूपाणामिति । समूहेन ये रूप्यन्ते तेषामित्यर्थः । उद्भूतः प्रकटः अवयवानामभेदो यस्य तादृशसमूहनिष्ठविशेष्यतानिरूपकतावच्छेदकधर्मावच्छिन्नानामिति यावत् । एकधर्मावच्छिन्नेऽन्वय इत्यस्य फलमाह । तेन नीधातोरिति । अत एव । परस्परापेक्षासत्त्वादेव । मिलितानामन्वय इत्येतदत्र तत्रेत्यध्याहारेण व्याचष्टे । यत्रैवमिति । प्रत्यवयवं समूहेति । एकैकपदार्थे समूहरूपत्वारोपेऽपि धवखदिराविति च न बहुवचनापत्तिः । अतिरिक्तस्य पदार्थस्य तत्र भानाभावादिति । प्रत्येकवृत्तिधर्मद्वयमप्रवृत्तिनिमित्तमित्युक्तमत एवैतादृशविषये द्वन्द्वोत्तरोत्पन्नद्विवचनबहुवचनार्थसंख्यायाः शुद्धपर्याप्तिसम्बन्धेन प्रकृत्यर्थेऽन्वयः । यत्रानेकधर्मस्य प्रवृत्तिनिमित्तत्वन्तत्रोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्ते सम्बन्धत्वस्वीकारात् । इति विशेष इति । अत्र ह्येकवचनमेवोत्पद्यते तदर्थस्य शुद्धपर्याप्तिसम्बन्धेन प्रकृत्यर्थेऽन्वयः । चार्थे वृत्त्यभावेनेति । समुच्चयस्थले च ससभिव्याहृतस्यैकस्य चार्थे वृत्तावप्यपरस्य चार्थे वृत्त्यभावेनानेकस्य चार्थे वृत्त्यभावोऽन्वाचये तूभयोरपि तत्त्वाभाव इत्यर्थः । एतच्चोपपादितमाक् । प्रकारान्तरेण समुच्चयस्थले समासाभावन्दर्शयति । किञ्चेति । तत्र । समुच्चयस्थले । स्पष्टञ्चेदमिति । चार्थस्य प्राधान्ये समासप्रवृत्तिरित्ये तत्स्पष्टमित्यर्थः । असत्त्वभूतत्वादिति । चादयोऽसत्त्व इत्युक्तेः । यद्द्रव्याश्रितः । यद्द्रव्याभिन्न इत्यर्थः । एतेनैवंविधलेखेन समासार्थस्य साहित्यस्य तत्र विशेषणत्वमितिकल्पना निरस्ता । अतः । लिङ्गपदोपादानेन । नन्वेवमिति । इतरेतरयोगेऽपि समूहस्य प्राधान्यस्वीकार इत्यर्थः । तदतिरिक्तः । अवयवातिरिक्तः । अत एव । समूहस्य विशेष्यत्वादेव । पक्षान्तरादिति । न च प्रथमद्वितीयपक्षयोरैक्येन पक्षान्तरादित्यनुपपन्नमिति वाच्यम् । यद्वेतिद्वितीयपक्षे उद्भूतावयवभेदस्य प्रथमोक्तः प्रकारः प्रथमपक्षे तूद्भूतावयवभेदस्य द्वितीयरीत्योक्तः प्रकारो दर्शित इत्यभिप्रायेणान्तरपदोपादानात् । गम्यमानसाहित्यमादाय समासापत्तिर्निरस्यति । अहरहरिति । उक्तोऽर्थः । समूहरूपः । इदम् । राजदन्तादिषितिसूत्रम् । द्वन्द्व एवेदमिति । अल्पाच्तरमितिसूत्रभाष्ये पाठादिति शेषः । अल्पाच्तरमित्यत्र तरपः सत्तामुपपादयति ।

यथाकथञ्चिदिति । अत एव । तरप्यूचितविशेषाभावादेव । अत एव । अदृष्टार्थस्यापि शब्दविशेषस्य सत्त्वादेव । अनुदात्तानामितिबहुवचनार्थस्य विवक्षितत्वे यत्र बह्वनामनुदात्तानां सत्ताऽस्ति तत्रैवैतत्सूत्रप्रवृत्तिः स्याद्द्वयोर्यत्र स्थितिस्तत्र न स्यादितिहेतोर्यथा तत्र बहुवचनमुपात्तमप्यविवक्षितन्तथेहापि तरप्न विवक्षित इति भावः । ननु यदि तरबिर्हेशोऽविवक्षितः स्यात्तदा द्वयोर्मध्ये एकस्य प्रकर्षे तरप उत्पत्तेर्बहुषु सन्निहितेषुद्विवचनोपपदे विधीयमानतरबन्तशब्दघटितस्यैतस्य सूत्रस्याप्रवृत्तेर्मृदङ्गशङ्कतूणवा इत्यादि न सिध्येन्न त्वविवक्षितत्वपक्षेऽत आह । मृदङ्गेत्यादि । इत्यादावित्यादिना पृथङ्नदन्ति संसदि । प्रासादे धनपतिरामकेशवानामित्यस्य सङ्ग्रहः । द्वन्द्वोत्तरपदो द्वन्द्व इति । शङ्कश्च तूणवश्च शङ्कतूणवौ । शङ्कतूणवौ च मृदङ्गश्चेत्येवं सह विवक्षया द्वन्द्वः कार्य इत्यर्थः । भाष्योक्तपक्षान्तर इति । तत्र हि किमयन्तत्वन्तरनिर्देशः आहो स्विदतन्त्वम् । किं चातः । यदि तन्त्वन्द्वयोर्नियमः । बहुष्वनियमः । तत्र को दोषः । शङ्कदुन्दुभिवीणानामिति न सिध्यति । दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति । अथातन्त्वम् । मृदङ्गशङ्कतूणवाः पृथङ्नदन्ति संसदि । प्रासादे धनपतिरामकेशवानामित्येतन्न सिध्यति । एवमप्यन्द्वयेऽपि दोषमभिधाय यद्येच्छसि तथास्त्वित्युक्तम् । तदुत्तरन्तरन्निर्देशस्य तन्त्वत्वपक्षे पूर्वोक्तदोषानुवादङ्कृत्वा यदेतदल्पाच्तरमिति तदल्पाजिति वक्ष्यामि । तुनरतन्त्वं स्वीकृत्य मृदङ्गेत्यादिदोषमुपन्यस्य द्वन्द्वघटितद्वन्द्वेन समाहितन्तेन प्रकृते तरन्निर्देशस्य सत्त्वेऽपि यथा फलैक्यं भवति तथैव यत्नः कार्य इति सूचितमिति भावः । यद्यप्युभयपक्षोदितरीत्या फलाविशेषः पक्षयोर्भवति तथाप्यनयोः कः पक्षो युक्त इत्याकाङ्क्षायामाह। तन्त्वपक्षेऽपीति । दण्डाजिनान्निरस्यति । अस्येति । सर्वथार्थाभाव इति । स्वार्थिकत्वेऽर्थाभाव एव स्यादिति भावः । अत्रापि बहुष्वनियम इति यथा धर्मादिष्वनियमस्तथाऽल्पान्तरमित्यत्रापीत्यर्थः । इदमप्रकरणम् । पूर्वनिपातप्रकरणम् । अन्यत्रापि विप्रतिषेधन्दर्शयति । अजाद्यदन्ताच्चेति । अत्रेति । इन्द्वश्च प्राणितूर्येतिसूत्र इत्यर्थः । तूर्यशब्दो नृत्यपरस्तदङ्गत्वञ्च वाद्यवादकयोर्वक्तीत्युभयोरपि ग्रहणशङ्कावारणायाह । वादका एवेति । भाष्ये ध्वनितमिति । मृदङ्गशङ्कतूणवा इतिबहुवचनान्तपदोच्चारणाद् ध्वनितमित्यर्थः । सूत्रेऽपि मा-

र्ह्रस्विकप्राणविकमित्युपात्तस्तेन वादकस्याच्च ग्रहणमित्येव लभ्यते । वादकस्य च नाङ्गत्वमाख्यवयव इत्येव सम्भवतीत्याशयेनाह । मध्ये तूपकारकेति । सेनाशब्दान्तर्ह्यङ्गत्वाऽङ्गशब्देन षष्ठीतत्पुरुषोऽत्र कार्यस्तदभिप्रायेणाह । अङ्गशब्दस्येति । तेन प्रत्यासत्तिस्वीकारेण । एवमेव । यथाद्वन्द्वश्चेतिसूत्रे प्रत्यासत्त्याश्रयणेन दोषो वार्यते एवमेवाध्वर्युक्रतुवाचिनोऽध्वर्युक्रतुवाचिना सहैव यो द्वन्द्वस्तस्यैव ग्रहणमित्यमेव । तेनार्कवज्रावित्यत्र न । एकवचनशब्दादेकवदित्यस्य यथा लाभस्तथाऽह । एकवचनेति।एकार्थबोधकपदवदिति । एकत्वविशिष्टबोधकं यदेकपदं तद्यथा नित्यैकवचनान्तन्तथा एषां द्वन्द्वोऽपि भवतीत्यर्थः । भाष्यकैयटयोरिति । तत्र हि पूर्वत्र नित्यार्थमिति भाष्यकृतोक्तम् । तत्र च कैयटेनोक्तम् । पूर्वत्रेति । प्राण्यङ्गादीनां समाहार एवेत्येवमर्थमिति । अत्रत्र नियमः समाहारद्वन्द्वपक्ष एव भाष्यकृता तत्रोपपादित इति मूलकृतापि तथैवोपपादितम् । द्वन्द्वश्चेत्यादीनां विध्यर्थत्ववादिमतन्निरसितुं शङ्कते । न चेति । व्याख्यानेन । विभाषाद्वन्द्वेतिसूत्रीयभाष्यकृत्कृतनियमप्रदर्शनमूलकव्याख्यानेनेत्यर्थः । तत्र । समाहारद्वन्द्वे । तदनुवादेन । समाहारद्वन्द्वानुवादेन । फलाभावात् । समाहारद्वन्द्वस्य तिरोहितावयवभेदसमूहाभिधायकतया फलाभावात् । ध्वनितत्त्वेदमिति । मूलकृतेति शेषः । तत्रैवोक्तमिति । एतद्वाच्यसमाहारस्य कदाप्यनुद्भूतावयवभेदविवक्षा नेति तेन द्वन्द्वे उभयविवक्षा भवतीति । नन्वेषामेव समाहार इत्येव नियमः किन्न स्यादत आह । विपरीतेति । प्रतिपत्तेति । अस्य प्रतिपाद्यत इत्यन्वयः । सिद्धस्योपन्यासमुपपादयति । प्रकृत इति । यदा तु न सिद्धानुवादस्तदाह । असिद्धेति । षष्ठ्यर्थ इति । अत एव द्वन्द्वपदेनान्वयः।पदक्रमकयोरध्ययनेन या प्रत्यासत्तिस्तामुपपादयति । अध्ययनगतेति । पदान्यधीते पदकः । क्रमादिभ्यो वुन् । एवङ्क्रमकोऽपि । ननु पदक्रमयोरपि प्रत्यासत्तिरध्ययनेन सम्भवति । पदाध्ययनानन्तरं क्रमाध्ययनादतस्तदेवैतत्सूत्रोदाहरणत्वेन प्राप्तम्याद्दक्रमुचितमित्याशयेनाह । पदक्रमशब्दयोरिति । जातित्वादिति । शब्दत्वव्याप्यजातिविशिष्टवाचकत्वादित्यर्थः । अस्मिन्सूत्रे लाघवादध्ययनतः सन्निकृष्टाख्यायामिति वक्तव्येऽविप्रकृष्टाख्यायामित्युपादानम्परम्परया सन्निकर्षग्रहणार्थम् । अध्ययनत इत्यस्यानुपादाने पितापुत्रावित्यत्रा-

तिप्रसङ्गः स्यादस्ति चैतयोर्जन्यजनकभावद्वारकः सन्निकर्षः । अविप्रकृष्टेति किम् । वैदिकयाज्ञिकौ । अप्राणिपदस्य प्राणसम्बन्धवच्छिन्नपरत्वे विभाषा हृक्षेतिसूत्रस्थभाष्यविरोध इत्यतो विशेषपरत्वमित्येतदुत्थापयति । यद्यपीत्यादि । भाष्यस्वरस इति । तत्र हि बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानामिति वक्तव्यमितिवार्त्तिकोक्तनियमविषये शङ्कितङ्कित्प्रत्ययेन या प्राप्तिः सा नियम्यते आहो स्विदविशेषेण । किञ्चातः यद्यनेन या प्राप्तिः सा नियम्यते प्लक्षन्यग्रोधौ । जातिरप्राणिनामिति नित्या द्वन्द्वैकवद्भावः प्राप्नोति अथाविशेषेण न दोषो भवति यथा न दोषस्तथास्वित्युक्तम् । यदि प्राणिपदम्प्राणसम्बन्धवन्मात्रपरं स्यात्तदा प्लक्षन्यग्रोधयोरपि प्राणसम्बन्धवत्त्वात्प्राणित्वाभावेन जातिरप्राणिनामिति नित्यो द्वन्द्वैकवद्भावः प्राप्नोतीति भाष्यमसङ्गतं स्यादिति तन्नाथाल्लोकप्रसिद्धानामिह ग्रहणमित्यर्थः । पर्युदासादिति । प्राणिनाम्मनुष्यादीनान्द्रव्यत्वान्नञिवयुक्तन्यायेन द्रव्यत्वव्याप्यजातिविशिष्टवाचकानामिह ग्रहणमिति भावः । जातिप्राधान्येतीति । जातिग्रहणोपादानादयं विषयविशेषो लभ्यते । अन्यथाऽप्राणिनामिति पर्युदासादेव जात्युपसर्जनद्रव्यवाचिनाङ्ग्रहणोपपत्तौ तदर्थं स्यादिति भावः । धानाशष्कुलिशब्दस्यापि जातिविशिष्टद्रव्यवाचित्वाज्जातेः प्राधान्याभावेन सूत्रोदाहरणासम्भव इतिशङ्कापरिहाराय प्राधान्यपदार्थन्निर्वक्ति । प्राधान्यञ्चेति । पक्षान्तरमाह । यद्वेति । द्रव्यं विशेषणमिति । धानात्वशष्कुलीत्वजातेर्विशेष्यत्वे धानाशष्कुलि भक्षयतीत्यत्र जातौ भक्षणकर्मत्वान्वयानुपपत्तिरत आह । वाहाद्यन्वय इति । जातिप्राधान्य इत्यत्र साधकान्तरमाह । क्षीरोदक इत्यादि । जातिवचनावेतावितिति । जातिविशिष्टद्रव्यवचनावेतावित्यर्थः । पर्युदास इति । एतेन नञ्प्रश्लेषाभावशङ्का व्युदासः । व्याख्यानादिति । अनगराणामितिवक्तव्यमितिवार्त्तिकमूलाद्व्याख्यानादित्यर्थः । तेन । पर्युदासप्रतियोगित्वेन नगरस्याग्रहणेन । तत्फलमाह । मथुरापाटलिपुत्रमिति । अनयोर्नगरवाचकत्वेऽपि सूत्रमवर्त्तत इति भावः । ह्रे वाक्य इति । नदीवाचिनान्द्रेग्रवाचिनाङ्चेत्यर्थः । उक्तरीत्येति । प्रत्यासत्त्याश्रयणरूपयुक्त्या । अग्रामा इति बहुवचनोपादानङ्ग्रामविशेषाणाङ्ग्रहणाभिप्रायेण । अत एव देशपदेन मनुष्यनिवासयोग्यानाङ् ग्रहणम् । न तु पर्वतानाम्।

तेन कैलासगन्धमादने इत्यत्र न। देशपदेनैतादृशस्य ग्रहणादेव नदीग्रहणस्व-रितार्थम्। अन्यथा तासामपि मत्स्यादिनिवासयोग्यत्वाद्देशपदेनैव ग्रहणे सिद्धे नदीपदं व्यर्थमेव स्यात्। न चाग्रामा इति पर्युदासेन देशग्रहणमविष्यतीति देश-पदं व्यर्थमिति वाच्यम्। गृहादिविशेषसन्निविष्टप्रदेशस्यैव सादृश्यादृग्रहणमि-तिशङ्कावारणायैतदुपादानम्। तेन कुरुकुरुचेचादीनां ग्रहणसिद्धिः। विशिष्ट-लिङ्गपदस्य विशिष्टं विलक्षणं लिङ्गं येषान्तेषामित्यर्थः। इदञ्च न द्वन्द्वविशेष-णम्। सर्वस्यापि द्वन्द्वस्य किञ्चिद्पेक्षया विलक्षणलिङ्गतयैतदुपादानं व्यर्थमेव स्यादतो द्वन्द्वावयवविशेषणम्। नदीपदांशे क्रत्रिमाक्रत्रिमन्यायस्य तु न प्रवृ-त्तिः। देशपदसाहचर्यात्। अत एवेति। नदस्यापि ग्रहणादेव। शाश्वतिकशब्दस्य साधुत्वं दर्शयति। शश्वच्छब्द इति। निपातनादिति। अत एवाव्ययत्वेपि व्युत्पत्तौ न। शाश्वतिकशब्दस्योक्तरीत्या नित्यवचनत्वेन विरोधस्य चाश्रय-नाशेन कालविशेषेण वा नाशदर्शनेन विरोधः शाश्वतिक इत्यत्र सामानाधि-करण्यानुपपत्तिरत आह। स्वाभाविक इति। अहिनकुलादिरिति। एषाम्यशु-त्वेन लोकप्रसिद्धभावात्। न तु सहानवस्थितिः। एकदेशकालावच्छेदेनैक-त्रावर्त्तमानत्वन्न शक्यते। न च देवासुरैरमृतमस्मन्निधिर्ममन्थ इति प्रयोगानु-पपत्तिरेतेषामपि विरोधसत्त्वादिति वाच्यम्। शाश्वतिकपदेन वारणात्। एते-षां हि कार्यविशेषसाधने विरोधो न तु स्वाभाविक इति भावः। मृत्युग्रह-कारेण। भस्मना शुध्यते कांस्यन्ताम्रमम्लेन शुध्यति। रजसा शुध्यते नारी न-दी वेगेन शुध्यति इत्युक्तप्रकारेण। गणपाठे रूपमिति। यादृशं रूपङ्गणपाठे दृश्यते तस्य ग्रहणम्। तेन कृतावडादेशस्य ग्रहणसिद्धिः। गवाश्वप्रभृतिषु मूत्र-पुरीष शक्रन्मेदमांसशोणितादीनाङ्ग्रहणमबहुप्रकृत्यर्थमन्येषां सामान्यतः प्रा-प्ते नियमार्थम्। भाष्ये तथोक्तेरिति। सित्तद्विषेषाणां द्वचाद्यर्थमिति तत्रोक्तम्। मृगादिषट्कमिति। एतेषामपि विशेषाणाङ्ग्रहणम्। प्रागुक्तरीत्या। प्रत्यास-त्त्याश्रयणेन। नित्यमेवेति। एतेषां क्षेत्रस्थितिकाले प्राणित्वेऽपि मनुष्यादिभि-न्नतया जातिरप्राणिनामित्यस्य प्राप्तिः। ननु वनस्पत्युदाहरणं प्लक्षन्यग्रोधमिति भाष्ये उक्तन्तेषाञ्च वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिरितिकोशोक्तवन-स्पतित्वासम्भव इत्यत आह। अत्र वनस्पतीति। इदम्। फलसेनेतिपरिगणनम्।

एतेन । प्रकरणशेषभूतत्वकथनेन । जातिरितीति । अत्र जातिरप्राणिनामिति-सूत्रोपन्यासेन प्रकरणशेषत्वं सूचितमित्यर्थः । न च यत्र बहुवचनान्ता प्रकृतिस्तत्रैवेतिनियमस्वीकारे तत्र जातिप्राधान्याभावेन जातिप्राधान्य एवायमेकवद्भाव इत्यनेन विरोध इति तु न वाच्यम् । जात्याश्रयसकलव्यक्तिप्रतीतेर्जातेः प्राधान्यसद्भावात् । ननु विभाषा द्वन्द्वेतिसूत्रस्योदाहरणनिरूपणावसरे मूले गोमहिषमित्युपात्तत्वात्र सेनाङ्गत्वाभावान्नित्यैकवद्भावस्य प्राप्त्यभावादिशेषेण कथनमयुक्तमत आह । गोमहिषमिति । प्राप्तिमात्रेति । पशुत्वाप्राप्तिरिति भावः । इदं च स्वस्वगतह्रस्वयोर्गोमहिषयोः प्रकृतगोमहिषपदार्थत्वे बोध्यम् । यदा तु भारवाहकवाचकयोस्तयोरुपादानन्तदा तु सेनाङ्गत्वमपि सम्भवति । अत एव । बहुप्रकृतिकद्वन्द्वस्य वैकल्पिकैकवद्भावविधानादेव । वदरेति । अत्र फलत्वव्याप्यजातिप्रवृत्तिनिमित्तकयोरेतयोर्जातिरप्राणिनामिति नित्यैकवद्भावे प्राप्ते विकल्पः । अत्र पठितमिति । विभाषा द्वन्द्वेति सूत्रे पठितमित्यर्थः । नप्रन्वेवमिति । यदि वार्त्तिकोक्तानां ग्रहणं विशेषार्थन्तदेत्यर्थः । अन्यस्विति । मृगाणां मृगभिन्नैरित्यर्थः । मृगवानरावित्यादि यथा । ननु विप्रतिषिद्धमितिसूत्रोदाहरणनिरूपणावसरे शीतोष्णम् । शीतोष्णे इत्युपात्तमेतयोस्वप्राणित्वाद्वैरासम्भवेन कथं विप्रतिषिद्धत्वमत आह । विरोधोऽचेति । सहानवस्थानम् । एकावच्छेदकावच्छेदेन सहानवस्थानमित्यर्थः । एतेन महत्सु सरस्सु मध्याह्ने तरणिकिरणसंयोगादुपरितनभागावच्छेदेनोष्णत्वस्याधस्तनभागावच्छेदेन शैत्योपलम्भादेकस्मिंस्तादृशोदके उभयोः स्थितिसम्भवादुदाहरणासङ्गतिरिति परास्तम् । व्याख्यानादिति । विप्रतिषिद्धग्रहणस्य प्राथम्यात्तस्येह्यत्वव्याप्यमित्येतद्दर्शनमूलकादधिपयआदिगणे ऋक्सामवाङ्मसयोः पाठदर्शनमूलकाच्चेत्यर्थः । वचनव्यक्तेरिति । नियामकशास्त्रबशादेवंविधनियमकल्पनयेति भावः । मूले शीतोष्णे उदके इत्युपादानं शीतोष्णशब्दयोर्गुणोपसर्जनद्रव्यपरत्वमिति ध्वनयितुम् । सामान्यत इति । सामान्यधर्मावच्छिन्नस्य । शीतोष्णम् । शीतोष्णे इति । अत्र शीतोष्णशब्दौ स्पर्शात्मकगुणपरौ । न दधीत्यस्य सर्वनिषेधकत्वे यादृशी वचनव्यक्तिस्तामाह । यद्यदिति । तेन । नियामकस्यापि निषेधेन । पूर्वसूत्रवदिति । अयं वैपरीत्यांशे

दृष्टान्तः।प्राचीनरीत्याह।किञ्चेति।तेषामितरेतरयोगे साहित्यविशेषणतया द्रव्यस्य प्राधान्येन भानात्सापेक्षत्वेपि द्वन्द्वेः प्राप्तिरिति भावः।स्वमतमाह।परे त्विति।दन्तोष्ठद्वारकसम्बन्धेन। स्वाश्रयघटितत्वसम्बन्धेनाद्वन्द्वेत्यस्याप्यप्राप्तिरिति। समाहारद्वन्द्वस्यैव तेन नियमादिति भाव।तत्राप्तिविषयेसमाहारद्वन्द्वप्राप्तिविषये। अत एव। उभयनिषेधादेव। ननु सूत्रारम्भसामर्थ्यात्समाहारांशे विशेषणीभूतो यस्तदुघटकपदार्थस्तत्रैवान्वयः कुतो न कल्पत इत्यत आह। सामर्थ्येनेति। मूलकाराविरोधं स्वमतं साधयति। मूलेऽपीति। परस्परासम्बन्धेन यत्रान्वयविवक्षा तत्र व्यवस्थामुक्त्वा साक्षात्सम्बन्धेनान्वयविवक्षायामाह। समाहार इति। अनुवृत्तस्य च। अधिकरणैतावत्त्व इत्यस्य। नन्वेकवदेवेतिनियमनिषेधे दन्तोष्ठपदे नित्यैकवचनान्तत्वाप्राप्त्या दन्तोष्ठं दन्तोष्ठा इति भवतु उपदशमुपदशा इति तु कथमत आह। तत्र समाहारद्वन्द्व इति। अत एव। अव्ययीभावस्यानुप्रयोगादेव। दन्तोष्ठेति समुदायार्थस्य संख्येयरूपतया तत्रोपदशशब्दार्थस्य दशसंख्येयसमीपसंख्येयस्य नवत्वैकादशत्वान्यतरधर्मवतोऽभेदोऽबाधित इति भावः। यदा त्वनुप्रयुज्यमानार्थे दन्तोष्ठशब्दार्थभेदविवक्षा तदा त्वाह। उपदशन्दन्तोष्ठस्येतीति। उपदशं दन्तोष्ठमिति यदा प्रयुज्यते तदा तस्माद्दन्तोष्ठसमाहारो दशसंख्येयसमीपसङ्ख्येयनवैकादशान्यतराभिन्नबोधः। भेदविवक्षायां तु दन्तोष्ठसमाहारसम्बन्धिदशसमीपनवैकादशान्यतरदिति बोधः। नन्वव्ययीभावस्य पूर्वपदार्थप्राधानतयोपदशशब्दस्य दशसमीपबोधकत्वेन समीपस्य कालस्य देशस्य वा प्रतीतिः स्यात्तस्य चाभेदो दन्तोष्ठसमाहारे नास्तीति कथमव्ययीभावेन सामानाधिकरण्यमत आह। तत्र सामानाधिकरण्यमिति। तस्या बहुव्रीहेः। समीपप्रधानतयेति। दशसमीपे ये सन्तीत्यर्थावगमादित्यर्थः। नन्वानङादेशसम्बन्धिनकारस्य चेल्लोपेन निवृत्तिस्तदा तदनुच्चारणमिवास्त्वित्यत आह। नकारोच्चारणमिति। अत्र। पूर्वसूत्रे। अन्त्यादेशार्थ इति। अन्यथाऽनेकालत्वात्सर्वादेशः स्यात्। विद्यायोनिसम्बन्धपदमर्थआद्यचा विद्यायोनिकृतसम्बन्धवत्परन्तत्र विद्याकृतसम्बन्धमुपपादयति। एषामिति। विद्याद्वारकः। विद्याघटितः। एकयत्नर्त्विक्त्वमित्यस्य होचादिकर्तृकयत्नोपयोगिविद्यावत्त्वविशिष्टतद्यत्नकर्तृत्वरूपः सम्बन्ध इत्यर्थः। केवलयौगिक

इति । पूर्वश्च तत्पदश्चेत्यर्थः । योनिकृत इति । ज्यानिर्हानौ स्रवन्त्याश्च योनिः स्यादाकरे भगे इतिकोशोक्तिदर्शनेन योनिशब्दस्य भगपरत्वे मातापुत्राविति यद्यपि सिध्यति तथापि पितापुत्राविति न सिध्यति । अत्रापि संयुक्तजन्यत्वमस्तीति चेत्पितानप्तराविति न सिध्यतीत्यतः साक्षात्परम्परया वा योनिकृतो यः सम्बन्धः स ग्राह्य इति भावः । मूले पुत्र इत्यनुवृत्तेरिति । एतच्च क्वाचित्कम् । भ्रातृपुत्राविति दर्शनात् । पितापुत्राविति । ऋदन्तसर्वावयवकत्वाभावात्पुत्र इत्यनुवृत्त्यभावेऽत्र न स्यादिति भावः । अत एव । मण्डूकप्लुतिस्त्रीकारादेव । वाक्यभेदेनेति । अत एव मातापितरावित्यस्य सिद्धिः । तेन । ऋत इत्यस्यानुवृत्तत्वेन । वित्यादीति । अत्रादिना स्कन्दवरुणावित्यस्य सङ्ग्रहः । इद्वृद्धाविति सूत्रव्याख्यानावसरे वृद्धिमदुत्तरपद इति यद्व्याख्यातंतल्लौभप्रकारमाह । देवताद्वन्द्व इति । अन्तरङ्गत्वादिति । वृद्धेस्तद्धितनिमित्तकत्वेन बहिरङ्गत्वादिति भावः । अलौकिकइत्यनेन द्वन्द्वालौकिकस्य भ्रमः स्यादत आह । तद्धितालौकिक इति । ननु तदानीमुत्तरपदस्य वृद्धिमत्त्वमत आह । वृद्धिमत्त्वमिति । भाव्येव निमित्तमिति । तेन अग्निश्च मारुतश्च अग्नामारुतावित्यस्य सङ्ग्रहः । इत्वाभावादिति । इत्वस्यानङपवादतयाऽपवादाभावे उत्सर्गप्रवृत्तिर्न्याय्यैवेति भावः । पृथिवी इत्यस्य द्विवचनान्तत्वोपपत्तये आह । इतरेति । अत एव । द्विवचनान्तत्वादेव । द्यावा चिदस्मै इत्यत्रोत्तरपदपरत्वाभावेन द्यावा देवस्याप्राप्तिशङ्कां छन्दसि दृष्टानुविधानेन समाधाय प्रकारान्तरेण तदुपपत्तिमाह । अन्ये त्विति । उत्तरत्र तु सिद्धमिति । यत्तरपदे गुणस्य प्रवृत्त्योत्तरपदस्य रेफान्तत्वं सिद्धमित्यर्थः । मातरपितराविति चैकशेषस्य वैकल्पिकत्वात्तदभावे द्वन्द्वः । पदद्वयेऽपि । पूर्वोत्तरपदयोः । अन्ये । मुख्याः । भाष्यकारीयव्याख्यानेनैतादृशकल्पनाया एवौचित्यम् । तथाहि । अत्र हि भाष्ये मातरपितरावुदीचाम् । पितरामातरा चेतिसूत्रद्वयस्योपादानं कृत्वा छन्दसि किन्निपात्यते पूर्वोत्तरपदयोर्ऋकारस्याराशै । मातरपितरौ भोजय । मातरपितरावानय । आ मा गन्ताम्पितरामातराचेत्युक्तम् । अत्र पूर्वोत्तरयोरित्युक्त्वेनोत्तरपदेऽप्यरादेशस्य निपातनमुभयोरपि सूचयोञ्छान्दसत्वं छन्दसि किन्निपात्यत इतिकथनेन लभ्यते । न चोभयत्र निपातनमुत्तरसूत्रविषयमेवेति

ग्रङ्गाम् । चकारोपादानेन व्यत्यस्तानुपूर्वीमात्रबोधने भाष्यतात्पर्यात् । द्विवचनातिरिक्तेऽपि अरादेशो दृश्यते । मातरापितरानूचिदिष्टाविति । एवं च भ्यामादावप्यरादेशघटितप्रयोगसिद्धिः । न च पूर्वोत्तरपदयोरित्यस्य पूर्वोत्तरसूत्रघटकपदयोरित्यर्थः भ्यामादौ च यत्र मातरा इति दृश्यते तत्र सुपां सुलुगित्याकारादेश एवास्त्विति वाच्यम् । पूर्वोत्तरपदयोरित्यस्य पूर्वोत्तरसूत्रघटकपदपरत्वे शाकपार्थिवादित्वङ्कल्पनीयम् । पूर्वोत्तरशब्दस्यपूर्वोत्तरसूत्रघटके लक्षणा वा आश्रयणीयेतिगौरवस्य स्पष्टत्वात् । अरारावित्यत्रैकशेषस्तु न । उत्तरपदे अरा इत्यादेशस्य पूर्वपदेऽरइत्यादेशस्य चाभिमतत्वेन वैरूप्यसङ्गावादिति सर्वेष्टसिद्धिः ॥

॥ इति द्वन्द्वविवरणम् ॥

अपवादेति । द्वन्द्वापवादसङ्गत्येत्यर्थः । न चापदस्यापि सङ्गतित्वे सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्यत्वे षोढा सङ्गतिरित्थत इत्यनेन षोढात्वकथनविरोध इति वाच्यम् । अपवादेत्यनेनापवाद्यापवादकभावरूपस्य प्रसङ्गनिर्वाहकसंबन्धस्य सूचनात् । द्वन्द्वो यूनेतिसूत्रे द्वन्द्वपदमपत्यमन्तर्हितं द्वन्द्वमित्यभियुक्तोक्तेर्गोत्रपरमित्यभिप्रायेण मूले गोत्रमितिव्याख्यातम् । गोत्रयुवप्रत्ययेत्यत्र प्रत्ययपदमप्रतीतिपरमित्यभिप्रायेण व्याख्यातम्प्रतीतिमात्र इति । स्पष्टार्थमिति । एवकारेण प्रत्ययार्थकुत्सायाः प्रकृत्यर्थस्य च व्यवच्छेद इत्यर्थस्य स्पष्टप्रतीतेर्लाभायेत्यर्थः। सूत्रारम्भफलमाह । स्त्रीत्वस्येति । फलमाहेति । लुगात्मकम्फलमाहेत्यर्थः। बहुत्ववदर्थे वर्त्तमानं यञोत्रप्रत्ययान्तमित्यर्थे यः शिष्यत इतिन्यायेन शिष्यमाणगोत्रप्रत्ययान्तस्य बहुत्ववत्यर्थे वृत्तिरस्त्वेवेति लुक्सिद्धिः। अस्त्रियामित्यत्र प्रसज्यप्रतिषेधपरत्वेन व्याख्यानपक्ष इदं प्रयोजनम् । यदि तु पर्युदास एव लाघवादाश्रीयते तदोक्तन्यायेन शिष्यमाणस्य स्त्रीभिन्नार्थे वृत्तेरव्याहतत्वात्पुंस्त्वातिदेशाभावेऽपि लुक् स्यादेवेति कल्प्यते तदा गर्गान्पश्येत्यत्र नत्वसिद्धिः प्रयोजनम् बोध्यम् । अत एव । सक्थ्नामित्यस्य विभक्तावित्यस्य चानुवृत्तेरेव । जननीवाचिमाढशब्दे न षडिति स्त्रीनिषेधः । परिच्छेदवाची त्वत्र पुल्लिङ्गः । इंसर्वेनेति । शिष्यमा-

णशब्दस्य यत्रवृत्तिर्निमित्तन्तेन रूपेणैकशेषस्थले सर्वप्रतीतेरनुभवसिद्धत्वादेवमभिहितम् । अत एव भाष्ये इह कस्मान्न भवति । हंसश्च वरटा च । कच्छपश्च डुलिश्च । ऋषश्च रोहिश्चेति । तल्लक्षणस्येदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः । तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेद इत्यत्र समानायामाकृतावित्युक्तम् । ननु नपुंसकमनपुंसकेनैकवच्चान्यतरस्यामित्युच्यमानेऽपि प्रत्यासत्त्या यत्रानेनैकशेषस्तत्रैवैकवद्भावो भविष्यतीति प्रकृतसूत्रेऽस्य ग्रहणङ्किमर्थमत आह । अस्य ग्रहणमिति । ननु सरूपाणामित्यस्य सूत्रस्य तर्हि समाहारविवक्षायामप्राप्त्याऽपवादाभावेन घटघटमितिसमाहारविवक्षायान्द्वन्द्वः प्राप्नोतीत्यत आह । घटघटमित्यादीति । एकस्यानेकार्थे त्वमिति । तदुक्तं सरूपसूत्रभाष्ये । अर्थावर्थौ प्रति यत्तदपि प्रत्यर्थमेवेत्यादि । अन्यथा । एकस्यानेकार्थत्वाभावे । न ह्येकशेषमात्रेणान्यस्मिन्नसती शक्तिः प्रतिपाद्यते किन्तु स्वभावतस्तेष्वस्थितशक्त्या शिष्यमाणशब्देन सर्वस्य तत्तत्स्थलीयस्य तावदर्थविषयकबोधस्य प्रामाण्यं प्रतिपाद्यत इति भावः । नपुंसकेतिसूत्रोदाहरणविषये आह । गुण इति । एवञ्च । गुणे पुंस्त्वस्य व्यवस्थितौ च । द्रव्यविशेषणतापन्ना इति । द्रव्यमिह द्रव्यत्वजातिमद्विवक्षितन्न तु लिङ्गसंख्यान्वितमिति । अन्यथा रूपशब्दस्याप्येतादृशद्रव्यत्वान्नीलो रूपमिति प्रयोगानुपपत्तिः स्यात् । मातुरभ्यर्हितत्वादिति । अस्य पुत्रदृष्ट्येतिशेषः । तेन मातृशब्दवाच्या या स्त्री तद्दृष्ट्या तद्भर्तुः पूज्यत्वेऽपि न क्षतिः । ङिण्यन्तानामितिनियमत्यागे बीजमाह । अहञ्चेति । त्यदादितः शेष इत्यत्र षष्ठ्या व्याश्रय इति तसिः । आद्यादित्वाद्वा । पुन्नपुंसकत इत्यत्र त्वाद्यादित्वादेव । स्त्रीशेषेऽपीति । यत्र पुंसः शेषो नपुंसकता वा तत्र तत्र तत्तल्लिङ्गं सिद्धमेवेत्यत आह । स्त्रीशेषेऽपीति । अत एव भाष्ये सा च देवदत्तश्च तौ । सा च कुण्डे च तानीत्युक्तम् । अत्र स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयत इत्युक्तं कैयटेन । इदमिति । शब्दपरविप्रतिषेधेन नपुंसकस्यैव शेष इत्येतत् । पुंनपुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकत्वमभवतीति कैयटेनोक्तम् । अत एव पुन्नपुंसकयोः सहोक्तौ परत्वान्नपुंसकस्य शेषादेव । तदिदं शुक्लमिति । अत्रापि स च तच्चतदित्येव संहविवक्षायान्नपुंसकस्यैव शेषो भाष्यकृता दर्शितः । अति-

प्रसङ्गमाशङ्क्याह।त्यदाद्यन्तर्गतयोरिति।संख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चेत्यनेन भाष्यकृता ध्वनितमित्यर्थः।सङ्ख्याया अर्थस्य असम्प्रत्ययात्।संख्यारूपस्यार्थस्यैव सम्प्रत्ययाभावात्।एकावित्युक्तेऽसहायादिरर्थो गम्यते न तु द्वाविति। अन्यपदार्थत्वाच्चेत्यस्यान्यस्य पदस्याप्ययमर्थो भवति।योऽर्थ एकावित्यनेनाभिधास्यते तस्मिन्नर्थेऽसन्देहे न द्वाविति पदान्तरन्द्वौ च द्वौ चेत्यर्थे चत्वार इति प्रवर्त्तत इत्यर्थः। नन्वपवादस्यैकशेषस्याभावे द्वन्द्वस्तर्हि स्यादत आह।द्वन्द्वोप्ये तयोर्नेति। चार्थ इतिसूचशेष इति। तच्च हि एकादशद्वादशेतिकोऽयं समास इत्याशङ्क्य द्वन्द्व इत्युत्तरे विंशत्यादिषु वचनमित्यनेनैकविंशतिर्द्वाविंशतिरित्यादौ वचनम्प्राप्नोतीत्युक्ता सिद्धन्त्वित्यादिना शाकपार्थिवादित्वकल्पनया समासकथनेन सा शङ्का परिहृता न त्वेकादिनवान्तविषये शङ्कासमाधाने कृते तेनैतादृशे विषयेऽनभिधानं सूचितमिति। एवञ्च। एकादिनवान्तानान्द्वन्द्वाभावसिद्धौ च। एकद्विकरण इति। लोभस्येदं वर्णनम्। महापातकानि ब्राह्मणहननसुवर्णचौर्यगुर्वङ्गनागमनसुरापानानि एतेषां ये कर्त्तारस्तैः सह संवासश्चेति एतेषामध्ये एकस्यद्वयोर्वा करणे उत्पादने हेतुभूतौ यौ कामकोपौ तौ पञ्च कारयन्यो लोभस्तृणवन्मन्यते स धन्य इत्यर्थः। इत्यसाध्वेवेति। एकद्विकरण इतीकारान्तद्विशब्दघटितमसाध्वेवेत्यर्थः। यदि तु एको वा द्वौ वेति बहुव्रीहौ डचि एकद्वकरण इति पठ्यते तदा तु साधुरेवायमिति बोध्यम्। षष्ठीतत्पुरुष इति। षष्ठ्यन्तत्वस्य सुबन्तत्वस्य प्रत्येकपर्याप्तत्वादसाधुत्वमित्यर्थः। अस्य। त्यदादितः शेष इत्यस्य। अद्वन्द्वे इत्यस्य द्वन्द्वतत्पुरुषविशेषणभूतार्थप्रतिपादकानां त्यदादीनां शिष्यमाणानान्न पुन्नपुंसकतो लिङ्गवचनानि भवन्ति किंतु विशेष्यनिघ्नत्वमेव तेषामित्यर्थः। एतादृशे विषये विशेष्यानुरोध्येव वचनमित्यस्य दार्ढ्यसम्पादनाय बहुवचनान्तोदाहरणमप्याह। तत्पुरुष इति। तच्चितोर्योग इत्यादाविति। जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षड़स्माकमनादय इत्यत्रत्यमयम्। अव्ययमिति। विभक्तिप्रतिरूपकमव्ययमित्यर्थः। त्यदादीनीतिसूत्रे परस्परसाहचर्येणानव्ययस्य ग्रहणमिति भावः। एतौ गावावित्यत्र शङ्कशब्दोपादाने कृते यथा ग्राम्येतिसूत्रस्याप्रवृत्तिस्तथोपपादयति। सङ्कशब्दश्चेति। शङ्क इति। अत्र तु द्वयोरेव समुदाय इति शेषः। ननु

वत्सा इम इतिप्रत्युदाहरणमसङ्गतम्। पुत्रादौ तर्णके वत्स इतिचिकाणङशेषात्। तर्णकम्। सद्योजातापत्यम्। बालो युवा हृद्यो वत्सो दम्यो बलीवर्द इतिहृद्भिसंज्ञासूत्रस्थभाष्ये युवा इत्येतदपेक्षया वत्स इत्यस्य पृथगुपादानाच्च वत्सशब्दस्य युववाचकत्वाभावादत आह। अपत्यमात्रेति। अतएवान्तर्वत्यतिवतोरितिसूत्रे तरुणवत्सेतिवत्सस्तरुणत्वेन विशेषितः। इदम्। प्रत्युदाहरणम्। प्रायेणापत्येन प्रसिद्ध इत्याशयेनाह। वस्तुत इति। अन्तरङ्गत्वादिति। अत्रान्तरङ्गत्वं हेतुसङ्गावनिमित्तकप्राप्तिकत्वरूपम्। ननु यदि विभक्त्युत्पत्तेः प्रागेवैकशेषस्तदा एकशेषस्य तेनैत्यनेनोक्तं यत्रयोजनन्तन्निमित्तत्वं वाच्यन्तच्च न सम्भवति। शास्त्रेण तथाऽप्रतिपादनादत आह। इन्द्वत्वेत्यादि। ननु यदि समासान्तः पूर्वं स्यात्तदा भस्य टेर्लोप इति टिलोपे सर्वनामस्थाने परे पथ्याद्यवयवेकारस्याकारविधानमनुपपन्नमत आह। इतोऽदितिसूत्रमिति। ननु पन्था इत्यस्य टेरात्वविधाने सिद्धिर्भविष्यति। पथिमथीतिसूत्रप्रभृत्येवम्पठनीयम्पथिमथ्यृभुक्षान्योन्यः सर्वनामस्थाने भस्य लोप इति। टेरित्यस्यानुवृत्तिश्च भविष्यतीत्यत आह। मथिनादाविति। अत्र हि समासान्तविधायकाभावेन तन्निमित्तकटिलोपस्याप्यभावादिकारस्यात्वे दीर्घे च कृते नकारस्य श्रवणम्भवति टेरात्वविधाने तु नकारस्य श्रवणन्न स्यादिति भावः। अत्र मूले समासान्तो नेत्युक्तन्तु समासान्ते कृते यस्य दोषस्य प्रसक्तिस्स उद्भावित इत्यतः स्वयं दोषमुपपादयति। कृतद्वन्द्वानामिति। तत्प्राप्तिः। समासान्तप्राप्तिः। उत्तरम्। पथेत्यकारान्तम्। अनर्थकमिति। समासान्तस्य समुदायावयवत्वादनर्थकमित्यर्थः। एतद्भाष्य इति। ऋच् क ऋक् च ऋचौ समासान्ते कृते असारूप्यादेकशेषो न प्राप्नोतीतिभाष्ये त्यर्थः। योजनार्थमिति। समासे कृते एकशेष इतिपक्षे भाष्यकृता समासान्ते कृतेऽसारूप्यादेकशेषाभाव उक्तस्तद्योजनार्थङ्कैयटेनोक्तमन्तर्वर्तिन्या विभक्तेर्लुका लुप्तत्वाल्लयलक्षणप्रतिषेधान्नास्त्येवविभक्तिपरतेत्येकशेषनिमित्तं समुदायाद्विभक्तिरुत्पाद्या तस्याश्च नास्ति सारूप्यम्। एको हि ऋक्शब्दोऽपर ऋचशब्दः। समासान्तः समासस्यैवावयवो नोत्तरपदस्येति चेत्तर्हि तेनैव व्यवधानात्समासविभक्तेरेकशेषो न स्यात् समासार्थस्योत्तरपदस्यान्ताः समासान्ता इत्यपि भाष्यकारस्य मतमिति ऋग्ऋचशब्दयोर्वैरूप्यमाश्रित्य भाष्यकृता दोष उद्भा-

सास्तस्योत्तरपदावयवत्वमभ्युपेत्यापि दूषणमाह । किं चैवमिति । एवम् । उत्तरपदावयवत्वस्वीकारे । इति भाव इति । इदं सर्वमेकविभक्तावेकशेष इतिमते। वस्तुतः पन्थानावित्यादिरूपासिद्धिरेव दोष इति बोध्यम् ॥

इत्येकशेषनिरूपणम् ।

प्रसङ्गादिति । वृत्तिनिरूपणप्रसङ्गादित्यर्थः । तदर्थपरः । परार्थपरः । मध्यमपदलोपिसमासोऽर्थशब्देन । तेन परार्थेन युक्तो योऽर्थस्तस्याभिधानमिति फलितम् । तदाह । एवञ्चेति । तत्करणमिति । तत्करणं शब्दस्वरूपं यस्यावयवः समुदाय इत्यर्थः । कप्प्रत्ययो वैकल्पिकत्वान्न कृतः व्यधिकरणपदो बहुव्रीहिः । तत्करणशब्दादर्शं आद्यज्ञा । समासघटकसर्वपदानामितरार्थाभिधायकत्वपक्षे इदम् । एकस्यैव तदभिधायकत्वपक्षे आह । यद्वा परेणेति । एतत्पक्षे प्रधानपदे स्वार्थाभिधायकत्वस्यापि सत्त्वान्न जहत्स्वार्था वृत्तिरिति भावः । राजपुरुष इत्यत्र हि प्रधानं यत्पुरुषपदन्तेन राजार्थसंवलितः स्वार्थ उपस्थाप्यते एतावतैवैकार्थीभावव्यवहारः । पूर्वपक्षे द्वयोरपि पदयोरन्यार्थसम्बलितस्वार्थाभिधायकत्वेऽन्यार्थसंवलितार्थस्य वारद्वयभानापत्तिः । द्वितीयपक्षे तु नेति भेदः । न च यदुत्तरपदमेव राजसम्बलितपुरुषस्मृतिपादयति तदा राजपदस्य निरर्थकत्वमेव सम्पन्नमिति पूर्वपदार्थाभावेन पूर्वपदार्थप्रकारकोत्तरपदार्थविशेष्यकबोधजनकत्वव्यवहारानापत्तिरिति वाच्यम् । आमोदाम्बयमादाय लोके यथा चम्पकपुटः मालतीपुट इति व्यवहारस्तथा पूर्वपदस्य सत्त्वात्तथा व्यवहारः । न च बहुव्रीहौ वृत्तिघटकयोर्द्वयोरपि प्राधान्याभावेन प्रधानपदेन परार्थाभिधानं यत्र तत्र वृत्तित्यव्यवहार इति पक्षे कथन्ताद्दृशव्यवहार इति वाच्यम् । तत्र समासात्मकसमुदाये प्रधानपदत्वव्यवहारो घटकयोस्त्वप्रधानत्वव्यवहार इत्यप्रधानसम्बलनमस्त्येव समुदायार्थेऽन्यपदार्थे इत्यदोषात् । विनिगमनाविरहेण पक्षान्तरमाह । यद्वा परेणाप्रधानशब्देनेति । विशेष्यत्वेन ग्रहणमिति । स्वार्थप्रकारकपरार्थविशेष्यकबोधजननमित्यर्थः । सा चेति । इतरार्थसम्बलितस्वार्थोपस्थितिरित्यर्थः । अन्त्या । शास्त्रकृत्कल्पितो । एषाम् । कृदादीनाम् । सा च । समुदायशक्तिश्च । मानान्तरसिद्धेति । लाघवरूपमानेनेत्यर्थः । तदुक्तमन्यत्र बहूनां वृ-

त्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवन्तस्मादेकार्थीभाव आश्रित इति। तस्माच्चर्यादिति। पदविधिसञ्चरितोऽपि विधिः पदविधिः। प्रातिपदिकप्रकृतिकक्विपोऽपि कर्तुः क्यङिति सूत्रे उपसङ्ख्यानात्तत्वम्। एवं णिचोऽपि धातुप्रकृतिकस्य मुण्डमिश्रेत्यतोऽनुवृत्त्या। अत एव। पूर्वभागसम्बलितोत्तरभागाभिधायकत्वसत्त्वादेव। येन सम्बन्धेन पूर्वभागार्थसम्बलनमुत्तरपदार्थे स सम्बन्धः प्रवृत्तिनिमित्तमत एव कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानभावप्रत्ययेनान्यत्वं रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्य इति सङ्गच्छते। अन्यत्वेनेन जहत्स्वार्था वृत्तिः सूचिता। ननु क्तः प्रत्ययत्वात्प्रत्ययग्रहणपरिभाषया तदन्तपरत्ववत्तद्धितपदस्यापि तदन्तपरत्वे बहुजाद्यसङ्ग्रह इत्यत आह। तद्घटितेति। तद्धितशब्दान्मत्वर्थीयोऽर्श आद्यच् कर्त्तव्य इति भावः। एकार्थीभाव आवश्यक इति। अत्र श्रूयमाणस्यानेकार्थकत्वं यः श्रिषत इतिन्यायेन सुप्रसिद्धमेव। एकपदार्थस्यान्यपदार्थसम्बन्धश्च चार्थमादाय द्वन्द्वस्थल इवैकपदार्थनिष्ठविषयतानिरूपितस्वार्थविषयतानिरूपितान्यपदार्थनिष्ठविषयताशालिबोधजनकत्वादुपपादनीयः। इत्यभिमान इति। पञ्च वृत्तय इति वदत इति शेषः। अभिमानोक्तिर्बीजन्दर्शयति। वस्तुत इति। भाष्ये स्पष्टमुक्तत्वादिति। इह हि शब्दस्य स्वाभाविकी वा अनेकार्थता स्याद्वाचनिकी वा। तत्र यदि तावत् स्वाभाविकी अश्रिष एकशेष इतिग्रन्थेनोक्तत्वादित्यर्थः। अत एव। एकशेषस्य वृत्तित्वाभावादेव। क्यजादेरिति। सुबन्तादेषां विधानेन पदविधित्वं स्पष्टम्। सन्ये कार्थीभावमुपपादयति। सनि स्वभावत इति। सः। एकार्थीभावः। क्रियात्वादिति। नित्यसाकाङ्क्षत्वे हेतुकथनमेतत्। मुण्डशब्दात्करणेऽर्थे प्रत्ययो विधीयते न हि मुण्डपदार्थस्य माणवकस्य करणसम्भव इति विधानसामर्थ्याद्धर्मवचनात्प्रत्ययः। एवञ्च मुण्डि इति णिजन्तस्य मुण्डनरूपक्रियानुकूलव्यापारवचनतया माणवकस्य मुण्डनरूपफलाश्रयत्वाद्भवति कर्मत्वमिति मुण्डयति माणवकमितिप्रयोगोपपत्तिः। यद्यप्यच मुण्डनात्मिका क्रिया कर्मभूता णिजन्तार्थेऽन्तर्भूता तथापि माणवकादिकर्मणोऽनन्तर्भावात्सकर्मकत्वम्। एवमेव। माणवकमुण्डयतीतिवदेव। अत्र हि व्याकरणमष्टाध्यायीरूपं वस्तु तच्च सूत्रेण क्रियाश्रयः। सूत्रणं हि विजातीयरचनारूपम्पौर्वापर्येणोच्चारणात्मकमिति यावत्तदा-

अयत्नमस्तीह व्याकरणस्येति भावः। ननु यदि व्याकरणं सूत्रशब्दार्थाद्विद्यते तदा व्याकरणशब्दाच्च षष्ठी स्यादिति कस्य चिच्छङ्कानिराकरोति । षष्ठी तु नेति। अयं भावः । अत्र कारकषष्ठ्यापाद्यते उत शेषलक्षणा । नाद्या इत्याह। सूत्रेणेति। शेषे षष्ठीत्यपि न । कारकत्वस्य कर्मत्वस्य च व्याकरणे सत्त्वेन शेषत्वाभावादिति। एषामिति। मुण्डादीनामित्यर्थः। वृत्तिविषयमेवेति। णिजन्तघटकतायामेवेत्यर्थः। यथा क्रियावचनान्मुण्डशब्दात्सिच् भवति तथा सुबन्तात्तस्मात्क्यजपि स्यादित्याशङ्कायामाह। मौण्ड्यार्थकादिति। अनभिधानादिति। सुप आत्मन इतिसूत्रभाष्ये क्यजन्तस्य कानि साधनानीति प्रश्ने भावः कर्त्ता च। अथ कर्म। नास्ति कर्म । ननु चायमिधिः सकर्मकः। यस्यार्थे क्यञ्विधीयते। अभिहितन्तत्कर्मान्तर्भूतं धात्वर्थः सम्पन्नः न चेदानीमन्यत्कर्मास्ति येन सकर्मकः स्यात्। कथन्तर्ह्ययं सकर्मको भवति अपुत्रम्पुत्रमिवाचरति पुत्रीयति माणवकम्। अस्त्यत्र विशेषः द्वे ह्यत्र कर्मणी उपमानकर्मोपमेयकर्म च। उपमानकर्मान्तर्भूतमुपमेयेन कर्मणा सकर्मको भवति। अयन्तर्हि कथं सकर्मको भवति। मुण्डयति माणवकमिति । अत्रापि द्वे कर्मणी सामान्यकर्म विशेषकञ्च सामान्यं कर्मान्तर्भूतं विशेषकर्मणा सकर्मको भवति इत्युक्तम् ततः सापेक्षत्वेनासामर्थ्यात्सिच् स्यादित्याशङ्क्य नाचोभौ करोतियुक्तौ मुण्डो माणवकञ्च न हि माणवकत्वं क्रियते। एवञ्चैकस्यान्तर्भावेऽप्यपरस्य माणवकस्यान्तर्भावाङ्गवति तेन कर्मणा सकर्मकत्वम्। ततः शङ्कितं भाष्यकृता कामन्तर्ह्यनेनैव हेतुना क्यजपि कर्त्तव्यः। माणवकं मुण्डमिच्छतीति । न कर्त्तव्यः उभावचेष्टि युक्तौ मुण्डो माणवकञ्च। कथं तर्ह्यसौ मौण्ड्यमाचष्टे संतोषङ्करोति। माणवकस्यमौण्ड्यमिच्छति। माणवकस्य मौण्ड्यकरणेन संस्कार्यत्वादेकस्मात्प्रत्ययोत्पत्तेः सापेक्षत्वान्न भवतीति कैयटः। एवमेव सापेक्षत्वात्सिजपि न स्यादित्याशङ्क्य तत्करोतीति सिद्धे णिचि पुनर्मुण्डमिश्रेतिसूत्रेण णिच्विधानं सापेक्षेभ्योऽपि णिजर्थमिति समाहितम्। ततः पक्षान्तरेण भाष्ये उक्तमथ वोक्तमेतत्। नात्र व्यापारोऽनुगन्तव्यः गमकत्वादिह वृत्तिर्भविष्यति मुण्डयति माणवकमिति अत्र कैयटः व्यापारो नाश्रयणीयः प्रयत्नमन्तरेणापीष्टस्य सिद्धत्वादित्यर्थः क्यच्तु गमकत्वान्न भवति। एतेन प्रवृत्तेन ण्यन्तवृत्तौ मु-

षष्ठ्यर्थो भावप्रधान इति गमकत्वात्तत्र वृत्तिर्भवति क्यजन्तवृत्तौ तु धर्मिपर एवातस्तत्र नेच्छाक्यच् सामर्थ्यादित्युक्तभवति। यदि क्यङ्विषयेऽपि धर्मपरः स्यात्तदा तत्रापि गमकत्वमस्तीति क्यच् स्यादितिधर्मवचनात् क्यचोऽनभिधानं ध्वनितम्। वृत्त्यर्थबोधकमिति। वृत्तिवाक्यं यादृग्विशेष्यविशेषणभावापन्नार्थबोधकं तादृग्विशेष्यविशेषणभावापन्न एव वाक्यार्थबोधो भवतीत्यर्थः। तदुपपादयति। आख्यातमिति। स्पष्टश्चायमिति। तुल्यो यत्र वृत्तिवाक्यजन्यशाब्दबोधयोर्विशेषणविशेष्यभावस्तत्र वृत्तिर्भवतीति स्पष्टमित्यर्थः। तत्र प्रथमे रथं वहति रथ इत्यत्रैव रथस्य वोढा इत्यर्थे तस्येदमिति प्रत्ययो भविष्यतीति वार्त्तिककृतोक्तम्। ततः शब्दभेदादविधानम् शब्दभेदादविधिः संभवति। अन्यो हि शब्दो रथं वहति अन्यो हि शब्दो रथस्य वोढेति। तस्येदमिति षष्ठ्यन्तादिधीयमानो द्वितीयान्तादेतत्सूत्राभावे न स्यादिति भावः। षष्ठीवाच्यकर्मत्वापेक्षया द्वितीयावाच्यकर्मत्वं विलक्षणमित्यभिमानः। एतेन समानार्थत्वं यत्र तत्र वृत्त्या भवितव्यमिति सूचितम्। शब्दभेदादविधानमिति चेदर्थाश्रयत्वाच्चत्ययविधानस्यार्थसामान्यात्सिद्धम्। शब्दभेदादभिधानमिति चेदर्थाश्रयः प्रत्ययविधिः स एवार्थो रथं वहति। स एवार्थो रथस्य वोढेति। तत्रार्थसामान्यात्सिद्धमित्युक्तम्। अर्थसामान्यादर्थैक्यात्। वहतीत्यस्य क्रियाप्रधानत्वेऽपि विशेष्यविशेषणभावव्यत्यासेन कर्तृरूपार्थस्यैव तद्धितार्थत्वेन विवक्षितत्वादिति भावः। कर्मत्वयोर्भेदे मानाभावः। अत एवोक्तं स एवार्थ इति। तद्धितार्थोपदर्शकवाक्यस्थतिङन्तस्य यः क्रदन्तेऽर्थः प्रधानीभूतः स एवेत्यर्थः। एकत्वमेव दर्शयति। आख्यातमिति। अत्र तद्धितार्थस्येत्युपलक्षणम्। क्रदर्थोपदर्शकविग्रहवाक्यस्थतिङन्तस्यैवमेव तुल्यन्यायात्। अत एव तत्रापि न वृत्तिर्विग्रहवाक्ययोः समानार्थत्वभङ्गः। एवञ्च बहुव्रीह्यर्थप्रदर्शकविग्रहवाक्यादपि चित्रगो सम्बन्धीत्येव बोधः। यदुक्तं वार्त्तिककृता एकतिङ् वाक्यमिति तत्कृते न विवक्षितमित्याशयेन वाक्यस्वरूपमाह। तत्तत्समासेति। संज्ञायामिति यत्र समासः तद्विषये विशेषमाह। संज्ञाविषयेति। एतावान् विशेषः। विग्रहवाक्यार्थघटकेन पदार्थैकदेशत्वव्यवहारो वृत्तौ तु समर्थपरिभाषाबलादेकार्थीभावसत्त्वात्पदार्थैकदेशत्वव्यवहार इति। एवञ्च। पूर्वोक्तव्यवस्थासिद्धौ च। प्रा-

चीनरीत्या आह । अत एवेति । उभयपदार्थप्रधानत्वादेव । तदभावः । सर्वनामत्वाभावः । के चित् । प्राचीनानुयायिनः । अन्ये । मुख्याः । अनेकपदस्यैकभिन्नार्थकत्वे द्वन्द्वबहुव्रीह्योरेवेतिनियमानुपपत्तिः समाससामान्यस्य तथात्वादत आह । चयादीत्यर्थ इति । आवश्यकी चेदिति । अबुधबोधनायेत्यादिः । सर्वत्र । वाक्यचतुष्टये । सुप् तिङ्घटितत्वमिति । अत्र सुप्तिङ्पदं तदन्तपरम् । तद्घटितत्वम् । तदविषयकप्रतीत्यविषयत्वम् । यद्देति । यथोभयोपादानस्य सार्थकत्वञ्चैवंतथा कल्पनोचिता इत्येतदभिसंधायेत्यमभिहितम् । अभिधानलक्षणाः । अभिधानं लक्षणन्नियामकं येषामित्यर्थः । अभिधानपदार्थन्निर्वक्ति । अभिधानञ्चेति । ततः । तेभ्यः । सूत्रे भाष्य इति । तत्र हि स्यादुग्रहणङ्किमर्थम् । इहमाभूत । प्रासादो देवदत्तस्य । प्राकारो नगरस्येति । अक्रियमाणे स्यादुग्रहणे निश्चितस्वस्वामिभावात्मकसम्बन्धप्रतिपादनाय यत्र प्रयोगस्तत्रापि स्यादिति भावः । अथ क्रियमाणेऽपि स्यादुग्रहणे इह कस्मान्न भवति । प्रासादो देवदत्तस्य स्यात्प्राकारो नगरस्य स्यादिति । यदा देवदत्तनामकः कश्चिदाढ्यः प्रासादमहान्तन्दृष्ट्वा प्रासादस्वामित्वेन संभाव्यते तत्रापि स्यादिति भावः । एवम्प्राकारस्य महत्त्वे नगरसम्बन्धित्वसंभावनेति द्रष्टव्यम् । इतिकरणः क्रियते । ततश्च द्विवचना भवति । विवक्षा च द्वयी अस्त्येव । प्रायोक्ती लौकिकी च प्रायोक्ती विवक्षा । प्रयोक्ता हि मृदया स्निग्धया श्लक्ष्णया जिह्वया मृदून् स्निग्धान् । श्लक्ष्णान् शब्दान् प्रयुङ्क्ते । मृदूनिति । अपभ्रंशानित्यर्थः । एवमुत्तरोऽपि प्रकारो गानेप्रसिद्धः । एवञ्च प्रायोक्ती विवक्षाऽव्यावर्त्तकत्वान्न शब्दसंस्कारप्रयोजिकेति भावः । लौकिकी विवक्षा । यत्र प्रायस्य सम्प्रत्ययः । प्रायस्य । समग्रकल्पस्य । समग्रः कल्पोनिश्चयो यस्येत्यर्थः । समग्रत्वं याथार्थ्यम् । शास्त्राधीनत्वमिति फलितम् । एवञ्च पृषोदरादीति सूत्रे ये शिष्टा उक्ताः ऋषयस्ते ग्राह्याः । तदाह भाष्ये प्राय इति लोको व्यपदिश्यते । न च प्रासादो देवदत्तस्य स्यात्प्राकारो नगरस्य स्यादित्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य सम्प्रत्ययः स्यात् । यद्येवन्नार्थः स्यादुग्रहणेन । न हि प्रासादो देवदत्तस्य प्राकारो नगरस्येत्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य सम्प्रत्ययः स्यादित्युक्तम् । एतेन शिष्टानां येभ्यः कृत्तद्धितसमासेभ्योऽर्थबोधो भवति तेषामेव साधुत्वन्नान्येषामिति सूचितम् ॥

॥ इति सर्वसमासस्य शेषः ॥

लुप्तविभक्तिकः । लुप्तप्रथमान्तः । अनधीयानेऽपि तदर्थे व्यवहारोपपत्तये आह । अध्येतृत्वयोग्यतेति । क्रियायोगाभावादाह । उपसर्गग्रहणञ्चेति । एवं च । प्रादिघटकस्यैव ग्रहणसिद्धौ च । इत्याहुरिति । तत्सूत्रविषय एवास्योदाहरणात् । प्राचीनोक्तरीत्या व्याख्याय सिद्धान्तमाह । भाष्य इति । क्वचित् । भाष्यतत्त्ववित् । इतरेतरयोगद्वन्द्व एवोदाहरणदानबीजमाह । समाहार इति । अव्ययीभाव इति । न चायं बहुव्रीहिसमास एवास्तु । आद्यास्त्रयो बहुव्रीहयः । ततः परे एकादश द्वन्द्वाः । ततोऽव्ययीभाव इति भाष्य विरोधात् । तत्पुरुष एवेतीति । ततस्तत्पुरुषः । निश्चितं श्रेयो निःश्रेयसमितिभाष्यात् । षष्ठीसमास एवेदमिति । ततः षष्ठीसमास इतिभाष्यात् । अव्ययीभाव एवेदमिति । अव्ययीभाव इत्युक्त्वा शुनः समीपमुपशुनमितिभाष्योक्तेः । एतच्चेति । प्रशंसाया आशीर्विषयत्वद्योतकत्वञ्च । वृत्तिरिति । वृत्तिप्रामाण्यादेवास्य लुङन्तस्य यत्र प्रयोगस्तत्र साधुत्वमाष्यन्त्वचोदासीनम् । सप्तमीशब्दः प्रत्ययपरो न हि तत्र प्रतिपदोक्तस्य वृत्तिरत आह । सप्तम्यर्थवृत्तेरिति । ननु यद्यावृत्तिक्रियाजन्यगणने सुबन्नद द्विगुणेति व्याख्यानं विरुद्धमत आह । द्विगुणेति त्विति । किमः क्षेप इतिसूत्रोदाहरणविषये कर्मधारयः । नञस्तत्पुरुषादितिसूत्रे नञ्पदनञ्पूर्वपदके लाक्षणिकमित्याशयेनाह । नञ्पूर्वपदकादिति । पथः संख्येति । एवञ्चापथन्नपुंसकमिति न कार्यमिति भावः । स्वीकुर्वतामिति । वस्तुतस्तत्तदर्थबोधकपदघटकतया गृहीतेन तत्तदर्थकाव्ययेन नाव्ययीभाव इति प्रागुक्तत्वादिदमसङ्गतमतस्तत्पुरुष एव ॥

॥ इति साधारणाः समासान्ताः ॥

रूढ्यै मानमाह । पद इत्येवेति । अनभिधानादिति । करणे चेतिसूत्रेणासत्त्ववचनेभ्यः पञ्चम्या विधानेन प्रतिपदोक्तपरिभाषया तत्सूत्रविहितैकवचनान्त एव समासप्राप्तेर्द्विवचनस्य तेभ्योऽविधानादित्यर्थः । पुंसा हेतुनेति । अनुज इति व्यवहारेऽग्रजस्य पुंसो हेतुत्वेनानुजत्वे पुंसो हेतुत्वन्द्रष्टव्यम् । स्वरितत्वबलादिति । पूरणशब्दे स्वरितत्वबलादित्यर्थः । तदधिकारेति । पूरणाधिकारेत्यर्थः । प्रत्ययासम्भवेनेति । सङ्ख्याशब्दादेव तस्य विधानादिति भावः । इह । मूले । आत्मनश्च । आत्मनश्च तृतीयाया अलुक्स्मात् । पूरण इति वक्त-

यम्। एवं व्याख्याय वैयाकरणाख्यायामिति सूत्रे आत्मन इत्येवेति व्याख्यातत्तेनात्मन इतिसूत्रमेवेत्याशयः प्रतीयते स न युक्त इत्याशयेनाह। यथाश्रुतेति। आत्मनश्च पूरण इतिवार्त्तिकम्। वारद्वयमस्योपादानात्। पूरण इत्येतावन्मात्रस्य वार्त्तिकत्वे आत्मनश्चेत्यस्य पुनरुपादानं व्यर्थमेव स्यात्। नन्वेवमात्मन इत्यस्य वैयाकरणाख्यायामित्यत्र सम्बन्धो न स्यादत आह। वैयाकरणेत्यादि। वार्त्तिकस्यस्यैवेति। वार्त्तिकस्य सूत्रशेषत्वादिति भावः। वार्त्तिकस्यपदस्यानुवृत्तिमभिप्रेत्याह। यद्वेति। एकं सूत्रमिति। वैयाकरणाख्यायाञ्चतुर्थ्याः परस्य चेत्येकं सूत्रङ्कर्त्तव्यमित्यर्थः। तत्र चकारेण प्रकृतिसमुच्चायकेनात्मन इत्यस्य सम्बन्धो भविष्यति। परप्रतिद्वन्द्वितया। वैयाकरणाख्यायां यः परशब्दस्तत्प्रतिद्वन्द्वितया। यथापरशब्दस्य वैयाकरणीया आख्या परस्मैपदमिति तत्सम्पादकत्वन्तथा तादृशी या आख्या आत्मनेपदमिति तत्सम्पादकत्वमात्मनश्शब्दस्येत्येककार्यसम्पादकत्वेन प्रतिद्वन्द्वित्वम्पण्डितयोरिवेति भावः। आत्मनश्चेतिसूत्रे तृतीयापदमनुवर्त्तते। सा च तृतीया प्रथमार्थे द्रष्टव्या अन्यार्थे च। अन्यार्थे चैषा तृतीया द्रष्टव्या आत्मा पञ्चमोऽस्य आत्मना पञ्चम इतिभाष्यात्। यद्यप्यनुदात्तङित आत्मनेपदम्। शेषात्कर्त्तरि परस्मैपदमितिनिपातनादेवानयोः सिद्धिस्तथापि व्याकरणान्तरीया या आख्या आत्मनेभाषपरस्मैभाष इति तत्सङ्ग्रहार्थमिदं सूत्रं भाष्ये तथैवोदाहरणात्। उचितमिति। चतुर्थीतियोगविभागस्य भाष्येऽदर्शनात्। उणादिप्रत्ययान्तानां व्युत्पन्नत्वाभिप्रायेणाह। स्थिरशब्द इति। अवादितः। अवादेश्चात्राक्। अलुग्विधेरिति। हृदुदुग्भ्याञ्चेतिसूत्रमपि संज्ञायाम्प्रवर्त्तते। न चैवं हलदन्तादित्येव सिद्धेऽस्य वैयर्थ्यमिति शङ्क्यम्। हृदयं स्पृशतीत्यर्थे द्वितीयाया एव प्राप्त्या सप्तम्यर्थे सप्तम्यनुवादस्यावश्यकत्वात्। तथा चालुगर्थसप्तम्या उद्देश्यत्वं वक्तव्यमित्यनुवादसामर्थ्यात्सप्तमीति भावः। वस्तुतस्तु हृदुदुग्भ्यामितिसूत्रे संज्ञायामितिन सम्बध्यते सूत्रस्यालुक्प्रकरणे पाठसामर्थ्यादित्याशयेनाह। अमूर्द्धेति। संज्ञायामित्यनुवृत्तेरिति। मण्डूकप्लुत्याऽत्र संज्ञायामित्यनुवर्त्तत इति भावः। कारनाम्नि। अत्र सूत्रे नियमत्रयम् वृत्त्यनुसारेणोक्तन्तदाह। कारनाम्न्येवेतीति। कर एव कारः स्वार्थिकोऽण्। तृतीयनियमाभावेऽप्यतिप्रसङ्गं वारयति। अभ्यर्हितपक्षादेरिति।

तदादिविधिनैव सिद्धे हलादावित्यत्रादिग्रहणमदृष्टार्थमित्याह। हलादावित्यादीति। कैयटानुसारेणेति। तेन हि प्राचामेवेति नियमादुदीचां कारेऽलुङ्विर्त्यत इत्युक्तम्। भाष्ये त्विति। स्थितमित्यत्रान्वयः। तदेव भाष्यमाह। कामनान्नीति। वावचनार्थमिति। इदं प्राचामित्युपादानेनोदीचान्नेत्यर्थकल्पनया फलितार्थकथनम्। अन्यत्र। चक्रवन्ध इत्यत्र। चक्रे बन्धोऽस्येतिव्यधिकरणपदोऽत्र बहुव्रीहिः। अनुवृत्तिरिति। तत्पुरुषेतिसूत्र इत्यादिः। अत एव। हलदन्तादित्यस्यानानुवर्त्तनादेव। स्वरूपग्रहणमिति। तनशब्दसाहचर्यात्। प्रकृत्यर्थे प्रकर्षेति। सप्तमीप्रकृत्यर्थस्य प्रकर्षविवक्षयेत्यर्थः। सूत्रे इति। घकालेतिसूत्र इत्यर्थः। अननुवृत्तिरित्यत्रान्वयः। अतिप्रसङ्ग इति। परिनिष्ठितविभक्त्या समासे घटीकाले स्थितिरस्येत्यत्रातिप्रसङ्ग इत्यर्थः। युक्तः पाठ इति। आधुनिकभाष्यपुस्तके क्व चिन्मतिष्विति पाठस्याप्युमतिरित्युदाहरणस्य च दर्शनात्। प्राचीने तु नैवंविधः पाठः। वस्तुतस्त्वपो योनीति नापूर्वं वचनङ्किन्तर्हि बहुलग्रहणं तत्पुरुषे कृतीतिसूत्रे कृतन्तहलादयमर्थो लभ्यते। क्व चित्प्रवृत्तिः क्व चिदप्रवृत्तिः क्व चिद्विभाषा क्व चिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधम्बाहुलकं वदन्ति इत्यभियुक्तोक्तेः। न केवलमभियुक्तोक्तिरेवात्र प्रमाणङ्किन्तु भाष्यकारोक्तिरप्यत्र मानम्। तथाहि। तत्पुरुषे कृतीतिसूत्रभाष्ये बहुलमकर्मधारये। बहुलमकर्मधारय इति वक्तव्यम्। इह मा भूत्। परमे कारके परमकारके इति। तत्तर्हि वक्तव्यन्न वक्तव्यम्। बहुलवचनान्न भविष्यति। अथ किमर्थं लुगलुगनुक्रमणं क्रियते न तत्पुरुषे कृति बहुलमित्येव सिद्धम्। लुगलुगनुक्रमणम्बहुलवचनस्याकृत्स्नत्वात्। लुगलुगनुक्रमणं क्रियते अकृत्स्नम्बहुलवचनमिति। अकृत्स्नम्। अकृत्स्नकारि। न हि बहुलग्रहणमात्रात्लुगलुकोः क्व चित्प्रवृत्तिरिति विषयविभागः परिज्ञातुं शक्यः। एवञ्च मन्दबुद्धीनामनुग्रहाय लुगलुगनुक्रमणमिति भावः। तत इतरेणापूर्णत्वमकृत्स्नत्वमित्यभिप्रायेण शङ्कितम्। यद्यकृत्स्नं बहुलवचनं यदनेन कृतमकृतन्तत्। एवं शङ्कायामेवं तर्हि न ब्रूमोऽकृत्स्नमिति कृत्स्नञ्च कारकं च साधकञ्च निवर्त्तकञ्च यदनेन कृतं सुकृतन्तत्। कृत्स्नम्। परिपूर्णम् व्यापकमित्यर्थः। कृत्स्नशब्दस्यावयवकार्त्स्न्येऽपि दृष्टत्वात्तदशक्यत्वशङ्कानिवारणायाह। कारकमिति। कृत्स्नकार्यकारि इ-

त्यर्थः । ननु कारकमपि प्रारब्धस्यान्तागमनात्प्रतिबन्धकसङ्गावादकृत्स्नं स्यादत आह । साधकं चेति । साधकमपि कदा चिदसामर्थ्यादकृत्स्नं स्यादत उक्तनिर्वर्तकञ्चेति । सर्वदा सर्वं कार्यनिष्पादयतीत्यर्थः । एतेन क्व चित्प्रवृत्तिः क्व चिदप्रवृत्तिः क्व चिद्विभाषेत्येतावदुक्तम् । तत उक्तमुदाहरणभूयस्त्वादिति । भूयांस्युदाहरणानि प्रपञ्चेन ज्ञाप्यन्त इत्यर्थः । ते वै खल्वपि विधयः सुपरिगृहीता भवन्ति येषां लक्षणमप्रपञ्चश्च । केवलं लक्षणकेवलः प्रपञ्चो वा न तथा कारकं भवति । अवश्यं खल्वप्यस्माभिरिदं वक्तव्यं बहुलमन्यतरस्यामुभयथा एकेषामिति । सर्ववेदपारिषदं ह्येदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुमित्युक्तम् । सर्ववेदपारिषदं सर्ववेदसाधारणम्न प्रातिशाख्यवत्तत्तच्छाखामात्रसम्बन्धि । लौकिकानाञ्च शब्दानामनेन व्युत्पादनादिदं ततोऽप्यधिकम् । अत्र सर्ववेदशब्दस्य पारिषदशब्देनावयवव्यवहारकसम्बन्धे षष्ठ्यन्तस्य समासः । पारिषच्छब्दश्च वेदाध्येतृसङ्घभवपरः । नैकः पन्था इत्यनेन क्व चिदन्यदेवेत्यपि सूचितमिति । अतिप्रसङ्गव्याजेनेति । पञ्चम्याः स्तोकादिभ्य इतिसूत्रस्थातिप्रसङ्गनिवारणायालुगुत्तरपद इतिसूत्रे वार्त्तिककृतोक्तमेकवच्च । एकवच्चालुग्भवतीति वक्तव्यम् । किं प्रयोजनम् । स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति विगृह्य स्तोकान्मुक्त इति यथा स्यात् । एकवद्भावश्चानर्थकः । द्विबहोरलुक्त्वान्न भवति । द्विबहुष्वसमासः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । उक्तं वा । किमुक्तमनभिधानादिति । तच्चावश्यमनधानमाश्रयितव्यम् । एकवद्वचने हि गोषु चरेऽतिप्रसङ्गः । एकवद्वचने हि गोषु चरेऽतिप्रसङ्गः स्यात् । गोषुचरः । वर्षाभ्यश्च जे । वर्षाभ्यश्च जेऽतिप्रसङ्गो भवति । वर्षासुजः । अपो योनियन्मतुषु च । अपो यो नियन्मतुषु चोपसङ्ख्यानं कर्तव्यम् । अप्सुजः । अप्सुयोनिः । अप्सव्यः । अप्सुमतिः । अप्सुचरः । एवतिप्रसङ्गव्याजेनास्यापो योनीत्यस्योपन्यासात् । स्तोकाभ्यां मुक्त इत्यत्रातिप्रसङ्गस्तु द्विवचनबहुवचनयोरुत्पत्तिमभ्युपेत्य । यदि तु पूर्वोक्तरीत्या तदनुत्पत्तिरेव कल्प्यते तदा नायमतिप्रसङ्गः । अत्र व्याजेनेति यत्तत्सूचयति । न ह्यप्सुमन्ताविति । तस्य । एकवद्भावस्य । तस्य । अप्सुमच्छब्दस्य । लुकोऽप्राप्तेरिति । अनुकरणत्वेन सुपो धातुप्रातिपदिकयोरित्यस्याप्राप्तेरित्यर्थः । अत एव । अनन्तरस्येतिन्यायसञ्चारादेव ।

देवानामितीति । यद्यपि भाष्ये मूर्खपदन्न दृश्यते तथापि तत्रैव बहुशः प्रयोगस्य दर्शनादेवमुक्तम् । इदञ्च वचनं मनोरमायां मूर्खा हि देवानाम्प्रीतिञ्चनयन्ति देवपशुत्वादिति यद्यपि आख्यातम् । तथाप्यन्याद्दशमप्यस्य आख्यानं सम्भवतीति तदभिप्रायेणाह । मूर्खाणामिति । स्पष्टञ्चेदमिति । आनङ् ऋतो द्वन्द्व इतिसूत्रघटको ऋत इतिशब्दो-द्वन्द्व इत्यस्य विशेषणमिति पक्षे ननु चोक्तम्। ऋकारान्तानान्द्वन्द्वे पुच उपसङ्ख्यानमिति। नैषदोषः। पुचग्रहणमपि प्रकृतमनुवर्त्तते । क्व प्रकृतम् । पुचेऽन्यतरस्यामिति । यदि तदनुवर्त्तते विभाषा स्वसृपत्योः पुचे चेति पुचेऽपि विभाषा प्राप्नोति । नैष दोषः । सम्बन्धमनुवर्त्तिष्यते । षष्ठ्या आक्रोशे । पुचेऽन्यतरस्याम् । षष्ठ्या आक्रोशे । आनङ ऋतो द्वन्द्वे पुचग्रहणमनुवर्त्तते । षष्ठ्या आक्रोश इतिनिवृत्तमिति । ननु पितुः पुच इत्यपुष्टार्थम् । यो हि पुत्रः स पितुरेव भवतीत्यत आह । प्रख्यातात्पितुरिति । विशेषणसामर्थ्यात्पितृशब्दोऽत्र प्रख्यातपितरि लाक्षणिक इति भावः । विद्यायोनीति । विद्यासम्बन्धयोनिसम्बन्धवाचकयोरन्यतरस्य यत्र पूर्वपदत्वमुत्तरपदत्वञ्च तत्रैवास्य प्रवृत्तिरित्यर्थः । रेफान्तानुकरणम् । यदि सान्तस्यानुकरणङ् क्रियते तदा मातुःपदेत्यत्र विसर्गपक्षे न स्यात् । विसर्गान्तस्यापि नानुकरणम् । तथा सति वा शरीतिसूत्रनिष्पन्नविसर्गस्यैव ग्रहणमिति संभावना स्यात् । पितुर्भ्यामितिरूपासिद्धिश्चेति भावः। ननु रेफान्तानुकरणे विसर्गपक्षे कथमत आह । विसर्गादाविति ।

इत्यलुक्समासः ।

घादीनाम्प्रत्ययत्वात्तदन्तविधिशङ्कावारणायाह।लेखग्रहण इति।हृदयस्य हृल्लेखेत्यत्र यल्लेखग्रहणन्तेनेत्यर्थ।यदि प्रत्ययग्रहणे तदन्तग्रहणं स्यात्तदाऽण्ग्रहणेनैव सिद्धे,लेखग्रहणं न कुर्यात्।न च घञन्तलेखेत्यस्य प्रयोगघटकत्वं यत्र तत्राप्यादेशार्थं लेखग्रहणमस्त्विति वाच्यम्। लेखग्रहणस्योक्तार्थज्ञापकत्ववर्णनपरभाष्यप्रामाण्येन घञन्तलेखशब्दोत्तरपदकहृदादेशकपूर्वपदस्य प्रयोगस्यानभिधानात् । ज्ञापनादिति। भाष्यकृतेति शेषः । नपदान्तसूत्रस्थभाष्यादिति । तत्र हि लुकि किमुदाहरणम्। बिम्बम्। बदरम्। नैतदस्ति पुंवद्भावेन सिद्धम्।

इदं तर्हि आमलकम् । अत्र हि वृडसंज्ञासत्त्वाद्ध्रस्वं मयटि नास्तीति पुंवत्त्व-स्याप्राप्तिरिति कैयटेनोक्तम् । अत्र पुंवद्भावेन सिद्धमित्युपादानाद्भाषितपुं-स्कत्वं स्पष्टतयैव लभ्यत इति । तेनाविहितेतिव्याख्यानेन । नित्यं ह्रस्व इति । घरूपेति नित्यं ह्रस्व इत्यर्थः । अबन्तात्स्त्रीप्रत्ययविधानेन नद्या उगितोऽवि-धानादिति भावः । असिद्धत्वेन । बहिरङ्गपरिभाषयाऽसिद्धत्वेन । निर्मूलत्वे हेतुमाह । न ह्रीति । ननु यदि नपुंवत्त्वबाधस्तदा शमिनीतरेतिभाष्यप्रयोग-स्य कथमुपपत्तिरत आह । शमिनीतरेतीति । एवञ्च । तदंशे तदन्तविध्यभाव-सिद्धौ च । ह्रच्छब्दस्य स्वतन्त्रस्य सत्त्वेप्यादेशविधानस्य प्रयोजनमाह । ह्रच्छ-ब्देनेति । प्रपञ्चं स्पष्टयति । प्रयोगद्वयेति । अयम् । पूर्वसूत्रविहितः पदित्यादे-शः । निपातनादिति । एवञ्चाजिशब्दस्येषन्तत्वेनान्तोदात्तेन पदाजिरित्यत्र व्युत्पत्तिपक्षे कृदुत्तरपदप्रकृतिस्वरेऽपि सति शिष्टस्य पदशब्दसम्बन्धिन उदात्त-त्वस्य बलवत्त्वात्स्वरितो वेति पाक्षिकं स्वरितत्वं स्पष्टम् । व्याख्यानादिति । पूर्वस्मिन् पादस्य पदाज्यातीतिसूत्रे आज्यादिषु प्राण्यङ्गस्यैव सुप्रसिद्धत्वेना-र्थाधिकारानुरोधात्प्रकृते पद्यत्यतदर्थ इत्यत्रापि प्राण्यवयवस्यैक ग्रहणमित्ये-तन्मूलकव्याख्यानादित्यर्थः । तेन द्राभ्यामादाभ्यां क्रीतमित्यर्थे पणपादमाषे-ति यति पदादेशो नेति भावः । अनार्षमिति । प्रकृतवार्त्तिकेन सिद्धेः । चतु-र्थांशवाचीति । प्राण्यवयवस्यासम्भवात् । ननु यदि संज्ञायामेवोदादेशस्तर्हि यौगिकस्य प्रसन्नोदं सर इत्यस्य का गतिरत आह । प्रसन्न इति । पूर्वविप्रतिषे-धेनेति । यदा पूरयितव्यस्य उदपानमितिसंज्ञा तदा पूर्वविप्रतिषेधेनोदकस्योद इत्येव प्रवर्त्तते । न वेतिविभाषेतिसूत्रभाष्ये एकहलादाविति सूत्रस्याप्राप्तवि-भाषात्वस्वीकारादिति भावः । प्राचीनरीत्या सूत्रं व्याचष्टे । एकशब्द इति । व्यवच्छिद्यत इति । एकशब्दार्थघटकजेति शेषः । भाष्यानुसारेणाह । प्रसिद्ध-त्वादिति । निषेध इति । वार्त्तिकेनेत्यादिः । एकतद्धित । अत्रैक इति लुप्तष-ष्ठ्यन्तम् । सूत्रारम्भस्य प्रयोजनमाह । एकशब्दान्त्यस्येति । संज्ञाछन्दसोरित्य-स्यानुवृत्तावपि त्वन्ता संज्ञा न प्रसिद्धेत्यत आह । संज्ञाया इति । अनुबन्धेनेति। अनुबन्धानुच्चारणे यस्य ङकारानुच्चारणे षष्ठ्याः षकारानुच्चारणे ङीग्रहणं स्यादिति बोध्यम् । ह्रस्व इतिसूत्रेणान्यथा सिद्धिम्परिहरति । ह्रस्व इत्यनेनेति ।

अत एव । प्रत्यासत्त्याश्रयणादेव । ग्राङ्घोरितिसूत्रभाष्यपरिगणितव्यवस्थितविभाषास्वरस्यापाठात्स्वयं समाधानमाह । परे त्विति । ग्रामणि कुलमिति । ग्रामण्यः कुलमित्यर्थः । दीर्घत्वमेवेति । सकृद्गतिन्यायादिति शेषः । कबभावपक्ष एवेति । चयाणान्निमित्तत्वे नाश्रयणादेवेति शेषः । ननु मातुर्मातजितिवचननिष्पन्नसख्युद्विपरकमातजादेशानुवादेनैव सिद्धे निपातनाश्रयणमफलमत आह । अयमिति । तत्रैव । बहुव्रीहावेव । ननु ङ्याप्योरित्येव सिद्धे इष्टकेषीकामालानामिति व्यर्थमत आह । असंज्ञेति । सत्यङ्कार इतीति । शपथेऽत्र सत्यस्य वृत्तिः । तदेतदभिसन्धायाह । सत्यस्याशपथ इति । तद्वदेव । चिप्रत्ययवदेव। ततः पूर्वम् । अणः पूर्वम् । यत्र तु कारशब्दो नाशन्तः किं तु घञन्तः अथ च सत्यशब्दोऽशपथे वर्त्तते तत्राप्याह । घञन्तेऽपीति । सत्यङ्कार इत्यस्य शपथकरणम्। शपथकर्त्ता चार्थः । एवमगदङ्कार इत्यस्यापि विषादिप्रतिद्वन्द्विद्रव्यादुपायकरणं वैद्यो वाऽर्थः । अस्तुकार इत्यस्याभ्युपगमकरणम् । तत्कर्त्ता वाऽर्थः । धेनुभव्या भविष्यन्तो धेनुरित्यर्थः । भव्येत्यत्र भव्यगेयेतिसूत्रेण भविष्यति काले कर्त्तरि यत् । अतः । मयूरव्यंसकादित्वादेव । क्रतोऽसम्भवात् क्रदन्तत्वर्थ इत्यस्य सूत्रारम्भसामर्थ्यात्तेन स्वग्रहणेन ज्ञापितं वचनमनित्यमिति कल्प्यते । आचारक्विबन्तरात्रिशब्दात्क्रतः सम्भवेऽपि अभिव्यक्तपदार्था य इतिन्यायेन तत्राप्यप्रवृत्तिरितिभावः।अत्र भाष्य इतिरात्रेरप्राप्तविभाषा । प्राप्ते नित्यो विधिरिति । पूर्वविप्रतिषेधकल्पनयेत्यर्थः । उदात्त इति भोथमिति । तत्र सहशब्दस्य यः सादेशस्तस्योदात्तानुदात्तवत्सहशब्दस्य स्थाने जायमानत्वेनान्तरतम्यात्स्वरितत्वमाप्नोतीत्याशङ्क्य सपुत्रः सभार्य इत्यत्र यः सादेशस्तस्य उदात्तनिपातनङ्करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति । एवमप्युदेशिवद्भावो वक्तव्यः । स यथैव प्रकृतिस्वरम्बाधते एवं समासस्वरमपि बाधेतेत्युक्तम् । अचोपदेशिवद्भावकथनेन समासस्वरप्रकृतिस्वरविषये एवं व्यवस्था । सपुत्रः सभार्य इत्यादिबहुव्रीहौ समासस्वरबाधकस्य बहुव्रीहौ प्रकृत्येतिपूर्वपदप्रकृतिस्वरस्य प्रवृत्त्या आद्युदात्तत्वं सिध्यति । साग्नि सेष्टि । सपशुबन्धमित्यादावव्ययीभावे आद्युदात्तत्वस्य प्रवृत्तावपि ततः समासस्वरेऽन्तोदात्तत्वमवतीति बोध्यम् । उपपदसमास इति । कृदुत्तरपदप्रकृतिस्वरप्रवृत्त्या मध्योदात्तोऽ-

यम्। ननु समुङ्क्तमितिग्रन्थान्ते उदाहरणमुक्तमेव तच्चाव्ययीभावे चाकाल इत्यनेन गतार्थम्। मुङ्क्त शब्दस्य ग्रन्थविशेषपरतयाऽकालत्वादत आह। मुङ्क्तादिशब्दानामिति। अकाल इति निषेधादिति। कालवृत्तिधर्महेतुकप्रवृत्तिके शब्दे नेत्यर्थादिति भावः। अत्र प्रमाणं तु सकाशम् समुङ्क्तमितिभाष्यप्रयोग एव। योगविभागस्य ग्रन्थकारतात्पर्यकत्वमपीत्याह। छान्दसमपीदमिति। इत्याहुरिति। काशिकाकारानुयायिनः। भाष्यसम्मतमकारमाह। भाष्येति। अयमिति। सदृशवचनः सहशब्दः। मूलोक्तन्तेनायमसपदविग्रह इत्यं तद्व्याचष्टे। तेनेति। अत एव। योगविभागाभावादेव। तत्र। सोदर इत्यत्र। दुर्लभ इति। सादृश्याप्रतीतेरिति शेषः। अत्र पक्षे। योगविभागाभावपक्षे। तस्य। ब्रह्मचारिणः। तस्य। वेदस्य व्रतस्य वा। तत्त्वम्। समानत्वम्। व्रतभेदं वेति। अत्र वाकारो व्रतस्य समानत्वात्कर्तृभेदेप्यभेदसम्भावनायाम्। वस्तुतस्तु वेदस्य समानत्वं विवक्षितन्तदध्ययनार्थं यद्व्रतन्तस्य समानलोपपादनस्य प्रकृते नोपयोग इत्याशयेनाह। समानमिति। भाष्यादिति। तत्र हि अत्र किन्निपात्यते। ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरेर्णिनिर्व्रतलोपश्च। ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरेर्णिनिः प्रत्ययो व्रतलोपश्च निपात्यते। समाने ब्रह्मणि व्रतचारी सब्रह्मचारी इति। समाने ब्रह्मणि वेदे यो व्रतञ्चरति स सब्रह्मचारीत्यर्थ इति कैयटः। सूत्रे चरणशब्दः शाखावाची। चरणे समानत्वेन गम्ये इति विवक्षितम्। लोपश्चेतिचकारेण समानशब्दस्य सभावोऽपि निपात्यत इति सूचितम्। विवक्षित इति। अत एव न तदादिविधिः। ननु समानतीर्थे वासीतिसूत्रेण समानतीर्थशब्दात्तस्मिन्नण्यन्तादिधीयमानो यत्रप्रत्ययः सतीर्थशब्दान्न प्राप्नोतीत्यतआह। सादेश इति एकदेशविकृतन्यायेन। स्थानिवद्भावेन। तेन परिच्छिन्नपरिमाणत्वेऽपि न दोषः। एतदर्थमेव। सति शिष्टस्य यस्यस्य प्रवृत्त्यर्थमेव। अन्यथा। विषयसप्तमीत्वाभावे। ननु यदि यादिप्रत्ययविवक्षायामेव सादेशस्तदा यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्। अपत्यानन्तुगच्छन्तं सोदरोऽपि विमुञ्चतीति प्रयोगानुपपत्तिरत आह। सोदरोऽपीतीति। उक्तरीत्या। अचाप्यसपदविग्रहेण वृत्तौ समानार्थकसहशब्दस्य प्रयोग इति भावः। सवर्णदीर्घ इति। अस्य मुखस्याभिमुखत्वादित्यादिः। अङ्गुलेः सङ्ग इत्यादि।

याद्दशपूर्वोत्तरपदकसमुदाये प्रवृत्तिस्तेषामत्रोपादानम्। न च समासाभावे विभक्त्या व्यवधानादिणः परत्वाभावादेव षत्वाप्राप्तेः प्रत्युदाहरणासङ्गतिरिति वाच्यम्। ज्योतिषः स्तोम इति न प्रत्युदाहरणं किन्तु ज्योतिषो ज्योतिःशब्दात्परो यः स्तोमः स्तोमशब्दस्तस्य व्यपेक्षाभावेऽपि पश्य ज्योतिः स्तोमस्तिष्ठतीतिसमुदायघटकज्योतिःस्तोमशब्दावयवस्य सकारस्य शर्व्यवधानेऽपि स्यादित्यत्र तात्पर्यात्। एवमेवाङ्गुलेः सङ्ग इत्यत्रापि बोध्यम्। अङ्गुलिशब्दत्वं त्वेकदेशविकृतन्यायेन। अग्ने तु अग्नेः स्तुत्स्तोमौ। सोमः। ज्योतिरायुषः। इत्येव सूत्रत्रयमस्तु स्तोम इति सूत्रे अग्नेरित्यनुवर्त्तते। ज्योतिरिति सूत्रे च च सोमग्रहणमनुवर्त्तते। एतेन सर्वेष्टसिद्धौ पुनर्ज्योतिरितिसूत्रे स्तोमग्रहणं यत्र स्तोमशब्दस्य ज्योतिःशब्दात्परत्वमात्रं तत्र यथा स्यात्। निर्दिष्टपरिभाषापरत्वमात्रबोधिकोपतिष्ठते न त्वव्यवधानांशस्याप्युपस्थितिरेवञ्चेणो व्यवधानेन परत्वेऽपि भविष्यति। अत एव ज्योतिष्टोमोऽत्र तव न साङ्ग इत्यर्थे षष्ठ्या आक्रोश इत्यलुकि समासे षत्वसिद्धिः। न च यत्र ज्योतिषां स्तोम इत्यत्रालुक तत्रापि स्यादिति वाच्यम्। ज्योतिरायुष इति सूत्रोपस्थित विभक्त्यतिरिक्तविभक्तिग्रहणे मानाभाव इत्याशयकल्पनात्। एवञ्च व्यपेक्षायामपीदम्प्रत्युदाहरणमित्याहुः। एवं हि। अङ्गुलेः सङ्ग इत्यर्थे प्रत्यासत्त्या तयोः पदयोरिति व्याख्याने हि। एतयोः। एतीत्यस्य नच्चेत्यस्य चेत्यर्थः। ननु लक्षणप्रतिपदोक्तपरिभाषया कुगतीति सूत्रविहितसमासग्रहणेन इष्टस्य सिद्धिर्भविष्यतीति तत्पुरुष ग्रहणं व्यर्थमत आह। इदमेवेति। ननु पुरुषगतसामर्थ्यस्य न्यूनत्वाभिप्रायेणैषदर्थेककुशब्देन समासस्तत्रापि विकल्पापत्तिवारणाय पूर्वविप्रतिषेधाश्रयणमयुक्तम् भाष्यानुक्तत्वादत आह। भाष्यानुक्तमपीति। वृत्तिप्रामाण्यादित्यनेन विकल्पविषये इष्टापत्तिः सूचिता। आदिशब्दो न व्यवस्थावाची तथात्वे पाठादेव निपातनज्ञानसिद्धौ यथोपदिष्टमित्यस्य वैयर्थ्यापत्तिरत आह। आदिशब्द इति। प्रकारे इत्यनेन स्वरूपतोऽस्मिन् गणेऽपठितानामपि साधुत्वसूचनाय यथोपदिष्टं शिष्टैस्तथा तेषां साधुत्वमिति सूचितम्। प्रकृत्यर्थभूतोपदेशस्वरूपमाह। उपदेश इति। भाष्ये स्पष्टमिति विनाऽभिनिवेशं यस्यां कस्यां चिद्विद्यायां ये पारं गतास्तेऽत्र भवन्तः शिष्टा-

स्तादृशाश्च योगिन एवेति भावः । तादृशाश्चार्यावर्तनिवासिनः । कः पुनरार्यावर्तः । प्रागादर्शात् । प्रत्यक्कालकवनात् । दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारं गतास्तच्च भवन्तः शिष्टा इत्युक्तम् । यथोपदिष्टमित्यत्र जातावेकवचनम् । प्रागादर्शादिति । आदर्शः । कुरुक्षेत्रं पर्वतः । कालकवनं प्रयागः । पारियात्रो विन्ध्यः । मनुरप्याह । हिमवद्विन्ध्ययोर्मध्ये यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तित इति । दक्षिणेनेति । दक्षिणास्मिन्देश इत्यर्थे एनबन्यतरस्यामित्येनप् । एनपेति द्वितीया । कुम्भ्यामेव धान्यं येषाम् । ननु दम्भार्थमेव न कुम्भीधान्यत्वमित्याशयेनोक्तमलोलुपा इति लाभेच्छारहिताः । अगृह्यमाणकारणा इत्यस्य दृष्टकारणमन्तरेणैव सदाचारानुवर्त्तिनः । किञ्चिदन्तरेण । गुरूपदेशादिरूपी योऽभियोगस्तं विनापि । कस्याश्चिदित्यस्य सर्वविद्याया इत्यर्थः । अव्ययानामनेकार्थत्वात् । तयोर्बलादेव शब्दतोऽर्थतश्च प्रतिभातसर्वविद्या इत्यर्थः । उत्तरपदाधिकारात्तृषोदरादीतिसूत्रं समासविषयकमितिवादिमत आह । उत्तरेति । स्वमतमाह । परे त्विति । उणादयइतिसूत्रस्यैव प्रपञ्चत्वमिति भावः । मूलउक्तं स्वयमाह । उदूाशादाविति । दुःखेन दाश्यते नाश्यते दभ्यते इत्यर्थे क्विप्रत्ययः खल् दभ्नोर्नकारस्य निपातनादेव लोपः । कप्रत्ययान्तस्येति । आतश्चोपसर्ग इतिकान्तस्य । धीशब्दस्य च ग्रहणम् । तन्त्रेण वार्त्तिके ग्रहणम् । प्रयोगे तु ङसन्तस्य प्रयोगः । तच्च क्रदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य दुर्धीशब्दस्य यणादेशे उदात्तस्वरितयोरितिसूत्रेण ङसोऽकारस्य स्वरितत्वेऽन्तस्वरितत्वं सिध्यति । श्रुतौ कप्रत्ययान्तस्य ग्रहणशङ्कां वारयति । श्रुताविति । षष्ठ्यर्थप्रतीत्यनुरोधेनाह । ङस्स्थानिकेति । एतत्फलम् । संहिताधिकारफलमित्यर्थः । उत्तरपदाधिकारादिति । अस्य उत्तरपदनिमित्तकानामिति शेषः । तेन बले इत्यत्र मतौ बह्वच इत्यत्र अवग्रहे दीर्घव्याहृत्तेः फलस्य वक्तुं शक्यत्वेऽपि न न्यूनता । यदि त्वेतयोर्नावग्रहो वृद्धसम्मतस्तदा यथाश्रुतं साधु । एतच्चाव्यवस्थितविभाषात्वञ्चाव्यवस्थितविभाषात्वमनङ्गीकुर्वतां मतमाहाके चित्त्विति । क्रतदीर्घेभ्य इति । एतेन नियमनिमित्तभूतं सङ्ज्ञात्वं सूचितम् । वनं

पुरगेत्यत्र षष्ठ्याः स्थाने व्यत्ययेन प्रथमा। न च पुरगामिश्रकेतिदीर्घानुवादसामर्थ्यादेव अष्टाभ्य औशित्यत्वे दीर्घे सिद्धे वनगिर्योरित्यत्र कोटरादिग्रहणं व्यर्थमिति वाच्यम्। आनुमानिकवचनकल्पनापेक्षया वचनेन तत्सिद्धौ लाघवात्। टाबन्त्यनिर्देशसम्भावनापत्तेश्च। व्याख्यानादिति। लक्ष्यदर्शनमूलकव्याख्यानादित्यर्थः। अत एव क्षुतदीर्घनिर्देशादेव। विपरीतनियमो नेति। एभ्यः परस्य यदि णत्वं भवति तर्हि वनशब्दस्यैवेति विपरीतनियमो नेत्यर्थः। विपरीतनियमपक्षे सारिकाणामित्यत्र णत्वव्यावृत्तिः फलं स्यात्। विध्यर्थत्वबीजन्दर्शयति। अग्रे वणशब्दस्येति। बल इतिसूत्रे वलशब्दःप्रत्यय एव गृह्यत इत्यत्र मानमाह। यथोपदिष्टमिति। अण इत्येवेति। ढ्रलोप इत्यतोऽणग्रहणमनुवर्त्तत इत्यर्थः। घञोऽसम्भवेन तदन्तविधिरिति। एनेनोत्तरपदाधिकारेऽपि तदन्तविधिप्रवृत्तिनिमित्तन्दर्शितम्। अन्येषामपीतसूत्रस्येति। एतच्च सूत्रं तुराषाड्यादयर्थमावश्यकं तस्येत्यर्थः। तथा साध्वितीति। यत्र दीर्घो न दृश्यते तत्र ह्रस्वघटितमेव साध्विति बोध्यम्। ननु सूत्रे यदसंज्ञायामपीति तदर्थम्। संज्ञायामित्यस्य प्रक्रान्तस्य निवृत्तिकल्पनेनोभयत्र प्रवृत्तिसम्भवादत आह। अस्येत इति। तथा च तन्निवृत्ताविव तात्पर्यग्राहकमिदमिति भावः। वृक्षमात्रमिति। एतेन वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिरित्यवान्तरभेदोऽत्र न विवक्षित इति सूचितवान्। व्याख्यानादिति। लुपि युक्तवदितिसूत्रभाष्यसंमतव्याख्यानादित्यर्थः। तथाहि। तत्र व्यक्तिवचन इति किमर्थम्। शिरीषाणामदूरभवो ग्रामः शिरीषाः। तस्य वनं शिरीषवनम्। अत्रादूरभवस्येत्यणो वरणादित्वाल्लुपि सति प्रकृतिशब्दार्थगतवनस्पतित्वस्याप्यतिदेशः स्यात्तथा च विभाषौषधीतिसूत्रेण णत्वापत्तिरित्युक्तम्। पुष्पैर्विना फलवान्हि वनस्पतिरित्यभिधीयते न च शिरीषस्तादृशः। एवं च तत्रैव वनस्पतित्वन्नास्तीति वनस्पतित्वमतिदिश्येतेत्यसङ्गतं स्यादित्येतेन तत्र वनस्पतिशब्दो वृक्षत्वात्मकव्यापकजात्यवच्छिन्नलाक्षणिक इति बोध्यम्। तदेवाह। ध्वनितमिति। मूले ह्राज्त्राज्भ्यामेवेति। अत्र मानं ह्राक्षरत्राक्षरेभ्य एवेति भाष्यम्। तत्राक्षरशब्दो व्यञ्जनसहिताच्पर इति भावः। अत एव देवदारुवनमित्येतावत्पर्यन्तं प्रत्युदाहृतम्। इरिकादिभ्यः प्रतिषेध इत्यपि अत एव संगच्छते। अन्यथाऽस्य पूर्वोक्तनियमेनैव व्यावृत्तिसिद्धावेतस्य वैयर्थ्यापत्तिः

स्यात्। इरिकावनमित्यत्र त्वौषधिवाचकत्वान्नामित्वाच्च। वाहनमाहितादिति सूत्रे यदाहितपदं तत्र भूतकालो न विवक्षितः। आहितशब्दस्य स्वस्वामिभावनिष्ठत्तिमात्रपरत्वात्। एवञ्च वाहनं लोके यद्यपि स्वामिन एव प्रसिद्धन्तथापि यत्र स्वामित्वमारोप्य तदाहनत्वेन वाहनं विवक्षितत्र तु तत्र वाहने वाह्यस्य स्थापनङ्कृतं तत्रापि भवति वाह्यवाहकभावमात्रविवक्षायाः सन्निधानमात्रेणापि सम्भवात्। तदाह मूले। आरोप्येति। शेखरे अनेनेति। आरोप्येति कथनेनेत्यर्थः। अचेतनत्वमिति। आरोपस्य तत्रैव सम्भवात्। पूर्वोक्तव्याख्याने भाष्यमप्रमाणयति। तदुक्तमिति। आहितोपस्थितयोरित्यनेन वाहने वाह्यस्य स्थापने संनिधाने वेति कथितम्। वाहनं वाह्यादिति। वहनीयवाचिनः परमित्यर्थः। एतेन पूर्वपदस्य वहनीयवाचकत्वविवक्षा यदा तदा भवति स्वामिमात्रवाचकत्वविवक्षा तदा मा भूदित्युक्तम्भवति। गर्गाणां वाहनमिति। अत्र स्वस्वामिभावसम्बन्धे षष्ठी। अपविद्धमिति। वहनशक्तिविकलत्वमनष्टमित्यर्थः। एतत्कथनं च तदा गर्गा वाह्यत्वेनाविवक्षिता इति सूचनाय। ननु क्षीरस्यानं येषामित्यनुपपन्नम्यानशब्दस्य क्रियावचनत्वेन क्षीरशब्देन सामानाधिकरण्यासम्भवादित्यत आह। कर्मणीति। बाहुलकात्। क्त्यलुटो बहुलमितिसूत्रस्थं यद्बहुलमिति पदन्तेन निर्वृत्तमित्यर्थेऽरीहणादित्वाद्डुज्बहुलशब्दो बहुलग्रहणनिर्वृत्तपरः पुनर्भावप्रधाननिर्देशेन बाहुलकशब्दस्तद्वृत्तिधर्मपरः। बहुलग्रहणनिर्वृत्तत्वादिति प्रकृते विवक्षितम्। उशीनरशब्दश्च उशीनरदेशनिवासिपर इत्याशयेनाह। देश इत्यस्येति। करणे वा ल्युडिति। यद्यपि पूर्वसूत्रे पानशब्दः कर्मल्युडन्त इति व्याख्यातम्। तथाप्यस्मिन् सूत्रे तस्य भावकरणयोरित्युपादानाच्छब्दाधिकारात्रयणेनार्थान्तरपरत्वमित्याशयात्। सामर्थ्यादिति। अन्यथा षात्पदादित्येव विशेषणेन तदन्तविधिलाभादन्तग्रहणं व्यर्थं स्यात्। तेन। तोष्टशार्थकरणेन। ननु तथापि गतिकारकोपपदानामितिपरिभाषया सुबुत्पत्तेः प्राक् पानशब्देन समासे न पदपरत्वसम्भव इत्यत आह। सर्पिष्पानमित्यादाविति। धनक्रीत्ता इति यथा। कर्मण्यणिति। व्रीहीन्पपन्ति यानि कुलानि तानीत्यर्थः। बहुव्रीहिर्वेति। व्यधिकरणपदो बहुव्रीहिर्वेत्यर्थः। नन्वेवम्माषान्पतस्तच्छीलौ पुरुषौ माषवापिणावित्यादावुत्तरपदत्वे चेतिनिषेधेनोत्तरपदरूपप्रातिपदिका-

भावात्कथमत्वमत आह। उत्तरपदशब्दस्येति।ननु प्रहिणुवन्नित्यत्र णत्वाभाव एवेष्ट इत्यत आह।पूर्वपदात्संज्ञायामिति।मूलानुरूपमप्याह। भाष्य इति। एवञ्च व्रीहिवापाणीत्यादौ प्रातिपदिकान्तत्वेनैव सिद्धे तत्र नुम्ग्रहणप्रयोजनमिति। णत्वार्थमपीत्यत्रापिशब्दोपादानमनर्थकमत आह। णत्वार्थमेवेत्यर्थ इति। अपरिवार्थः। मन्वेवम्प्रेन्वनमित्यत्र णत्वापत्तिरत आह। प्रेन्वनमिति। ननूत्तरपदं यत्प्रातिपदिकन्तदन्तस्येत्यर्थस्येष्टत्वात्तदा प्रातिपदिकपदं व्यर्थम्। उत्तरपदान्तस्येत्यर्थेन माषवापिणावित्यस्य सिद्धेरिति चेन्न। प्रातिपदिकानामेव यः समासस्तत्र यथा स्यादित्यर्थात्। तेन नियमेन हि तिङन्तयोर्यं आख्यातमाख्यातेनेति समासस्तत्र व्याहृत्तिः स्यात्। चकाराहन्नित्यत्र यथा। इदञ्च पदं सम्बुद्धान्तम्। तेन न नलोपः। ननु प्रेन्वनमित्यत्र नुमो नकारस्य क्षुभ्नादित्वात्णत्वाभावेऽपि प्रकृतवयवस्य स्यादत आह। एवं समुदाया इति। अचत्यवहुबचनेन परेन्वनम् निरिन्वनमित्यस्य सङ्ग्रहः। इति न कार्यमिति। तत्र वार्त्तिकभाष्ये एवम्पठितम्।नुम्व्यवाये णत्वेऽनुस्वाराभावे प्रतिषेध इति।ननु क्षुभ्नादिराकृतिगणो युवादिरपि चेत्तथा तदाऽन्यतरोपादानमनर्थकमत आह। समस्ता इति। अत एव। युवादेरित्यस्य समासविषयकत्वादेव। भाष्ये पठितम्। तत्र हि युवादीनाम्प्रतिषेधो वक्तव्यः। आर्ययूना। क्षत्रिययूना। परिपक्वानि। दीर्घाह्नीश्चरदिति पठितम्। समस्तस्येवोदाहरणत्वेन प्रदर्शनादप्यस्य समासविषयकत्वम्। परिपक्वानीत्यत्र कुमति चेत्यस्य प्राप्तिः। एकाजितिसूत्रस्थ बहुव्रीहाणीत्युदाहरणं क्वचिद्दृश्यते। तच्चासङ्गतम्।हल्ङ्यादिलोपे सुपूर्वस्येतिसूत्रेऽदितितपरकरणादिति।तत्र। हादेशे कुत्वव्यवाये णत्वस्य प्रतिषेधवार्त्तिकेन च तत्रत्यात्पूर्वग्रहणस्य प्रत्याख्यानादित्याशयेनाह। बहुव्रीहाणीत्यप्युदाहरणमिति।अतो लोप इति। ततः समासे हृतीयैकवचनम्। रम्यश्वासौ विश्वेति समासप्रदर्शनेन रम्यशब्दस्य गतिकारकोपपदभिन्नत्वज्ञानेन शङ्कते। नन्वन्तरिति। विशब्दस्य पदत्वादिति। उत्तरपदत्वे चेतिनिषेधस्यापदादिविधावित्युक्तत्वेन पदान्तत्वनिमित्तविधावेव प्रवृत्तिरिति भावः। णत्वाश्रयातिरिक्तत्वद्वितभिन्न इति।णत्वाश्रयातिरिक्तो यस्त्वद्वितभिन्नस्तत्परत्वं यत्रेत्यर्थः। न चैवम्रविनद्वमित्यत्र विशब्दव्यवधानेन प्रतिषेधो न स्यादिशब्दस्य णत्वाश्रयनद्वशब्दपरत्वादिति वाच्यम्। एकाजुत्तरपद-

कसमासीयविभक्तिस्थनकारस्य णत्वविधानैकवाक्यतया णत्वाश्रयो यः प्रत्ययस्तदतिरिक्तत्वस्य निवेशेन नडशब्दस्य णत्वाश्रयप्रत्ययातिरिक्तत्वस्याप्तेः। न चैवमपि-प्रियगोकाम्ये णेत्यादौ गोशब्दस्य णत्वाश्रयप्रत्ययातिरिक्तो यस्तद्धितभिन्नः काम्यच्प्रत्ययस्तत्परत्वान्निषेधः स्यादिति वाच्यम्। तद्धितपदस्य व्यवधायकपदप्रकृतिकप्रत्ययपरत्वात्। अस्ति चात्र काम्यच्प्रत्ययो गोशब्दप्रकृतिकः। एतच्चातद्धित इतिपर्युदासबलात्तद्धितभिन्नस्तत्सदृशो लभ्यत इत्यनेन लब्धम्। न च रम्यविणेत्यत्र निषेधप्रवृत्तिसमयेनेत्यस्य णत्वाश्रयत्वाभावेन णत्वाश्रयातिरिक्तत्वमस्त्येवेति वाच्यम्। णत्वविधौ यदुद्देश्यतावच्छेदकान्तर्भावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वादिति दिक्। तत्प्रत्याख्याने। अतद्धितेत्यस्य प्रत्याख्यान इत्यर्थः। एवं हि भाष्ये उक्तम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नैवं विज्ञायते पदेन व्यवायः पदव्यवायः पदव्यवाय इति। कथं तर्हि पदे व्यवायः पदव्यवाय इति। अत एव। पूर्वोक्तार्थकल्पनादेव। समफलतेति। रम्यविणेत्यत्र प्रत्याख्यानपक्षे निषेधो न प्राप्नोति। आरम्भपक्षे यदुक्तार्थकल्पनन्न स्यात्तदा प्राप्नोतीति फलभेदः स्पष्ट एवेति भावः। क्षादावित्यर्थभियेति। तथा सति रम्यपाकाणान्तङ्ङानाञ्चिचय इत्यादौ न स्यादिति भावः। कुमति चेतिसूत्रे प्रत्यासत्तिमाश्रित्य णत्वाभावं वदताग्रतन्निरस्यति। अत्र कवर्गेति। चित्रगवीति समुदाये लिङ्गविशिष्टपरिभाषया समासत्वातिदेशे सति विभक्तौ कवर्गवदुत्तरपदकसमासप्रकृतिकत्वमस्त्येवेति भावः। पदेन। पदसंज्ञकेन। कार्यित्व एवेति। न पदान्तसूत्रे एतत्प्रयोजनङ्ग्रथितम्। पदान्तविधावेवेति। न च पदान्तविधावित्येव कुतो नोक्तमिति वाच्यम्। वार्त्तिकाक्षरेषु लाघवगौरवचर्चा नादृयत इत्यभिप्रायात्। समसमासेन व्याख्यान इति। अतद्धित इत्यस्य प्रत्याख्यानाय पदे व्यवाय इति कृते व्याख्यान इत्यर्थः। तस्य। गतिकारकेत्यस्य। कुमति चेत्यत्र भाष्य इति। अप्येह कथं भवितव्यं माषकुम्भवापेन किं नित्यं षत्वमाहोस्विद्विभाषा इति हि तत्र भाष्यम्। षष्ठीतत्पुरुषोत्तरपदकषष्ठीतत्पुरुषे। कुम्भस्य वापः कुम्भवापः। माषस्य कुम्भवापो माषकुम्भवाप इत्याकारके। षष्ठीतत्पुरुषपूर्वपदक इति। माषस्य कुम्भो माषकुम्भः माषकुम्भस्य वाप इत्याकारक इत्यर्थः। प्राप्नोति। पदव्यवाये

नेतिनिषेधप्राप्तिपूर्वकालिकविधिशास्त्रप्राप्तीत्यर्थः। एतद्भाष्यदर्शनेन पदव्यवाय इतिनिषेधे उपसर्गादसमासेऽपीत्यस्येति वादिमतन्निरस्यति। यत्त्विति। इत्यादेरिति। एवेति शेषः। प्रावनद्धमित्यादीति। आदिना पर्यवनद्धमित्यस्य सङ्ग्रहः। अनङ्त्वापत्तेरिति। उपसर्गादसमासेऽपीत्यस्य तत्र प्राप्तेः। तद्धितभिन्नपरत्व इति। एतच्च निरूपितम्। एतस्य पदविशेषणत्वे सापेक्षत्वात् समासानुपपत्तेर्न ग्रहणं। भाष्यप्रामाण्येन वृत्तेः स्वीकारात्। बहुत्वञ्चैवमिति। सूत्रे लिङ्गवचनयोरतन्त्रत्वात्सामर्थ्यादिति। सेविते गोष्पदशब्दस्य साधितत्वादसेविते ऽपि तथैव स्वीकारे विरुद्धकल्पना स्यादिति नन्वुपादानसामर्थ्यादसेविते ऽगोष्पदशब्दस्य प्रवृत्तिरिति भावः। असेवित इति बहुव्रीहिरिति। सेवितशब्दे भावे क्तः। न सेवितं सेवनं यस्मिन्निति यौगिकं गोष्पदं क्षेत्रमितीति। यत्क्षेत्रं गोः पदप्रमाणन्तदेवमुच्यते। तेनाल्पप्रमाणत्वमस्फलति तदाह। क्षेत्रस्येति। अल्पप्रमाणत्वेन गोपदपरिच्छेद्यत्वारोपोऽत्रेति भावः। आत्मयापनमित्यस्यात्मनः शरीरस्य यद्यापनं रक्षणं तत्साधनाय यत्स्थानं तस्मिन्नित्यर्थः यत्स्थानलाभेनात्मनः शरीरस्य रक्षणं भवति तत्रेति फलितम्। प्रतिष्ठेत्यत्रातश्चोपसर्ग इत्यङ् प्रत्ययः। लाभविषयमिति। अत्र विषयशब्दो विषयत्वपरस्तस्मादर्श आदिभ्य इत्यच्। लाभश्च स्वत्वोत्पत्त्यनुकूलो यः स्वीकारविशेषस्तदात्मकस्तद्विषयत्वन्तत्राचतमेव। कादाचित्कतयेति। अनेन लक्षणाप्रयोजकसम्बन्धः सूचितः। तन्मत इति। वृत्तिकारमत इत्यर्थः। विकिरो वेति वाच्यमिति। एतेन विकिरेत्यस्य पूरणन्न तु विकिरशब्दस्य पाणिनिकर्तृकसूत्रघटकत्वमिति स्पष्टमेव लभ्यते। अन्यत्र वेति। अत्र वाशब्दश्चार्थे द्रष्टव्यः। अधिकरणविकल्पस्य। अधिकरणविशेषे प्रवृत्तिविशेषस्येत्यर्थः। अन्यत्र। शकुनिभिन्ने। न शकुनिरूपमधिकरणं सम्बध्यत इत्यस्याव्यया शकुनौ वेत्यस्य वैयर्थ्यापत्तेरिति शेषः। विष्किरशब्दं साधयति। क्षधातोरिति। समाधानाभिप्रायमाह। इह चेति। राजर्षिरिति। एतेन ऋषौ निपातितस्य शब्दस्य राज्ञि प्रवृत्तिर्न विरुध्यत इति सूचितम्। मस्करशब्दो -वेणौ निपातनीयस्ततो मत्वर्थीये इनौ परिव्राजके मस्करिशब्दप्रवृत्तिर्यद्यपि सिध्यति तथापि परिव्राजके एवास्य साधुत्वमिति दृष्टिबोधयितुं मस्करिशब्दोपादानम्। इदम्। मकरशब्दादिनिप्रत्ययेन सा-

धनम्। भाष्यानुसारिमतमाह। अयमित्यादिना। इदमेव। एवं रीत्यासाधनमेवेति वैयर्थ्यापत्तिरिति। न च योगरूढिबोधनार्थमेव मस्करिशब्दपरिव्राजकशब्दयोरुपादानमस्त्विति वाच्यम्। यथा सप्तम्याञ्चनेर्ड इतिसूत्रे विशेषोपादानाभावेऽपि पङ्कजशब्दस्य साधनत्वस्य शब्दस्य योगरूढत्वश्रीयते एवमेव शिष्टप्रयोगादेव योगरूढत्वग्रहो भविष्यतीति तयोरुपादानं व्यर्थं स्यादित्यभिप्रायत्। मूले कास्त्रीराजस्तुन्दे नगर इत्यनेन नगरे वाच्ये समुदायनिपातनमिति लभ्यते। नगरभिन्ने तु कातीरमित्यसमर्थं बोधयितुन्नगरमित्युक्तम् नच कुशब्दस्य कादेशं साधयति। ईषदर्थे चेतीति। अच। के चित्त्विति कथनेऽप्रत्यक्षतो दर्शनमिति भाष्येऽनुक्तेति शेषः। कस्कादिषु पाठे विसर्गस्य स्थाने सत्वमिति लभ्यते सम्प्रति तु कथन्तस्य सूचस्य प्रवृत्तिः सुटः परावयवत्वेन विसर्गाभावेन तस्य सूचस्याप्राप्तेरिति भावः नन्वस्य भवदुक्तार्थस्यकथं लाभ इत्यत आह। प्रकरणादिति। एवञ्च पूर्वोक्तरीत्याऽरुचिसाधनेन चाऽतोन रुत्वमिति। पदान्तत्वविरहान्नरुत्वमित्यर्थः। यदि लोपमकृत्वा तद्धितोरेव सकारोऽन्यादेशः क्रियते तदा रुत्वन्दुर्वारमित्याह। तदिति। तत्प्रत्याख्यान इति। कुक्कुट्यादीनामित्यस्य प्रत्याख्यान इत्यर्थं। प्रायस्येति। चित्ति चित्तयोः परयोः प्रायस्य प्रायशब्दस्य सुगागमो भवतीत्यर्थः। के चित्त्वसुडादेशः प्रायशब्दस्य चितिचित्तयोर्भवतीत्यर्थमाहुः। प्रायशब्दार्थमाह। प्रायो नामेति। तद्धितोरिति प्रायस्येति च इयं गणसूचम्। आकृतिगणोयमिति मूले उक्तम्। अत्र प्रमाणन्तु नाञ्झलाविति सूत्रभाष्येऽञ्झलोः प्रतिषेधे शकारप्रतिषेधोऽञ्झल्त्वादितिवार्त्तिकव्याख्यानावसरे परशतानीत्यत्र सुडागमपरं भाष्यमेव। शतात्परे परःशतानीत्यत्र राजदन्तादित्वाच्छतशब्दस्य परप्रयोगे परवल्लिङ्गत्वमाप्तमपि लिङ्गस्य लोकाश्रयत्वान्न भवति किं तु विशेष्यनिघ्नतैव भवति। इति सर्वेष्टसिद्धिरिति। सर्वेषामिष्टानां सुड्घटितानामाकृतिगणत्वात्सिद्धिरित्यर्थः। सिद्धिशब्दो मङ्गलार्थः।

इति समासाश्रयविधीनां विवरणम्।

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलप्र-
सारिविमलतरानवद्यसद्यशःपार्वणपीयूषभानुप्रभवागस्त्यकुल-
वंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायाञ्च-
न्द्रकलाभिधायां शब्देन्दुशेखरव्याख्यायां समा-
सप्रकरणं सम्पूर्णम् ।

॥ श्रीगणेशाय नमः ॥

अथ तद्धितप्रकरणम् ।

नत्वा सरस्वतीन्देवीं श्रीरामं सीतया युतम् ।
तद्धिताख्यप्रकरणं यथामति निरूप्यते ॥ १ ॥
यस्येषुभिर्निकृत्तानि शिरांस्यमरविद्विषः ॥
सोऽस्मानव्याद्भुजैर्यद्वियद्भूर्वविदव्ययः ॥ २ ॥

समर्थः पदविधिरितिसूत्रस्य प्राक् स्मृतत्वात्तद्घटकपदसम्बन्धिविधिपदार्थजिज्ञासायां समासानां साक्षात्पदसम्बन्धिविधित्वमिति तान्निरूप्य घकालतनेष्वितिसूत्रेण तनप्रत्ययेऽनुबन्धविधानाज्ज्ञापकात्तद्धितानां सुबन्तात्प्रायेणोत्पत्तिस्वीकाराच्च तद्धितविधेरपि पदसम्बन्धिविधित्वमिति तद्विधीनान्निरूपणमावश्यकमित्याशयेनाह । अवसरेति । तेन । चयमिति कथनेन । पदानाम् । समर्थानामित्यादितित्रयाणाम्पदानाम् । विशिष्टस्य । पदचयसमुदायस्य । एकार्थीभाव एव प्रवृत्तिरिति । अत एव ऋद्धस्योपगोरपत्यमित्येवं समुदायस्योपक्रमे वाक्यमेव । न त्वण्प्रत्ययोत्पत्तिः । अत्र सूत्रे यत्समर्थपदन्तन्नैकार्थीभावलक्षणसामर्थ्यविशिष्टपरम् । समर्थः पदविधिरितिसूत्रेण गतार्थत्वादत आह । समर्थशब्द इति । परिनिष्ठितस्यैवेत्येतदुपपादयति । न हीति । तदुक्तभाष्ये । किम्पुनः समर्थम् । अभिधाने यच्छक्तम् । किम्पुनस्तत्कृतवर्णानुपूर्वीकमिति । अनेकेति । अचानेकपदोच्चारणेन इयोस्तादृशयोर्यापि सत्ता तत्रापि प्रवृत्तिरिति लभ्यते एकस्य तु यत्रोच्चारणं शेष इत्यादौ कथन्तत्रास्य प्रवृत्तिरित्याकाङ्क्षायामाह । शेष इत्यत्रापि । तत्तद्विभक्तिरिति । सप्तम्यादिविभक्तिरित्यर्थः । तत्तद्विभक्त्यन्तत्वञ्च शब्दस्य तद्विशिष्टस्वार्थस्य प्रतिपाद्यतासम्बन्धेन । यथोलूखले चुक्षा औलूखला यवा इत्यादावुलूखलाधिकरणकत्वोद्देश्यविशिष्टा इत्यर्थे

प्रथमोच्चारितशब्दबोध्यादुलूखलशब्दात्प्रत्ययः। एतस्य सूत्रस्य तत्रोपस्थितिस्वीकाराल्लूलूखले लुप्ता इत्यर्थे कृतसन्धिकार्यात्लूलूखलशब्दात्प्रत्ययो न तु सुउलूखलशब्दात्तेन सावुलूखला इति न भवति किन्तु सौलूखला इत्येव। अनेकसमर्थासम्भवादिति। तेषां स्वार्थिकत्वे पृथगर्थनिरूपणस्य तत्राभावादिति भावः। तेन। दीव्यच्छब्देन। एकदेशविकृतन्यायस्याश्रयणं शक्तावच्छेदकानुपूर्वीज्ञानार्थम्। अर्थस्य। दीव्यतिशब्दार्थस्य देवनस्य। तस्य ज्ञापकः। एकदेशविकृतन्यायस्य ज्ञापकः। एवञ्च। अर्थस्यावधित्वसिद्धौ च। अर्था एवेति। अवध्यवधिमतोः साजात्यनियमात्। अचाण्शब्दमात्रस्यैवाधिकारत्वेन सिद्धौ प्राग्दीव्यत इत्यस्योपादानम्प्राग्दीव्यतो येऽर्थास्तेष्वण्विधानार्थन्तेनाञ्यत्यादिभ्यश्चेत्यादिसूत्रेषु प्राग्दीव्यतीयेष्वर्थेष्वित्यस्य लाभः। तेन। आदेरच इतिव्याख्यानेन। अचामिति निर्द्धारणे षष्ठी। निर्द्धारणञ्च साधारणतद्धर्माक्रान्तस्यैकदेशस्य भवतीति प्रकृते आदेरच इति लब्धम्। निर्दिष्टस्थानिकत्वादिति। अज्रूपस्थानिनो निर्देशात्। प्रामादिकमिति। स्वबाधकस्याणः प्रवृत्तेः। केचित्त्वेवंविधप्रयोगस्य गणपतिर्देवतास्येत्यर्थेऽणि ततस्तत्र साधुरिति यति साधुत्वमिच्छन्ति। प्रातिपदिकमतीति। प्रातिपदिकस्येत्यर्थः। तदन्ताग्रहणेन। समासप्रत्ययविधाविति निषेधात्। अत एवादितिग्रहणञ्चरितार्थम्। ननु प्राग्दीव्यतीयेष्वर्थेषु ष्णप्रत्ययस्य विधानेऽप्यण्प्रत्ययो वाच्यः स च न प्राप्नोति। देवतार्थे सावकाशस्यास्य परत्वादणप्रत्ययबाधको य इतश्चानिञ ढक् स बाधकः स्यादत आह। स्वादीनामिति। पूर्वविप्रतिषेधेनेति। स्वादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषेधेनेतिवार्त्तिकमत्र प्रमाणम्। परोऽणपवादबाधकत्वादिति। परो यः अणपवादस्तद्बाधकत्वादित्यर्थः। वार्त्तिकेऽर्थविशेषलक्षणादित्युक्तत्वेन योऽर्थसामान्यलक्षणोऽणपवादस्य परत्वात्तस्य बाधको भवति। यथोडुपतिर्नाम पत्त्रं तस्येदमित्यर्थे पत्ताध्वर्युपरिषदश्चेति इदमर्थस्य सामान्यस्य निमित्तत्वात्तत्राञ्प्रत्यय एव। ननु यद्यर्थविशेषलक्षणाणपवादस्य ष्णप्रत्ययः पूर्वविप्रतिषेधेन बाधकस्तर्हि दितिशब्दादपत्येऽर्थे वनस्पतिशब्दाच्च समूहरूपेऽचित्तहस्तिधेनोरिति ठकोऽपि बाधः स्यादिति चेदिष्टापत्तिरित्याह। दितिवनस्पतिभ्यामिति। भाषात्। पूर्वविप्रतिषेधनिरूपणपरभाष्यात्।

यदि दित्यदितिशब्दौ क्तिन्नन्तौ तदा न ङीषः प्राप्तिः परन्तु क्तिजन्तान् ङीषः प्राप्तिरस्त्येवेत्यत आह। तयोः क्तिचीति। लिङ्गविशिष्टपरिभाषाया अनित्यत्वेन आदितेयस्य सिद्धिन्दखिडप्रयुक्तां खण्डयति। ड्याप्च इति। अन्तःपूर्वपदादित्यत्र भाष्य इति। स्याम्नो लुगजिनात्तथेत्यनेन। स्याम्नो लुग्वक्तव्यः अश्वत्थामा। अजिनात्तया। अजिनान्ताच्च लुग्वक्तव्यः। कृष्णाजिनः। सिंहाजिन इति। तत्र कैयटः। उभाभ्यामपि तदन्तविधिरिष्यत इति। ननु लोमसंज्ञकात्केवलादपि सम्भवोऽस्तीत्यत आह। अभिव्यक्तेति। अपत्यार्थस्यापीति। लोम्नोऽपत्येषु बहुषु इत्याकारकं वचनं यद्यप्यपत्ये प्रत्ययविधायकन्तथाप्यस्मिन्स्याम्नोऽकार इत्यतोऽकार इत्यनुवर्त्तते स्योम्न इति तु साधारणार्थेषु ये प्रत्ययविधायकास्तेषु पठितमिति लोम्न इत्यस्याप्यत्र पाठ इति भावः। उत्सादिभ्योऽञ्। अस्मिन् गणे वष्कयासे इति पठ्यते। वष्कयेति लुप्तविभक्त्यन्तम्। वष्कयशब्दोऽञं लभते। असे असमासे। वाष्कयः। असे किम्॥ गौवष्कयिः॥ अचोपात्तमसे इत्येतत्क चित्तदन्तविधिं ज्ञापयति। तेन धेनुशब्देन तदन्तस्य ग्रहणं सिध्यति। अधेनूनां समूह आधेनवमिति यथा। धेनुशब्दस्येह पाठात्। क्वचिदित्युपादानान्नञ्पूर्वत्व एवाञ् प्रत्ययः। तेन समूहरूपेर्थे धैनुकम्। गौधेनुकम्। अचित्तहस्तिधेनोष्ठग् भवति। धेनुरनञ्जिकमुत्पादयतीति खण्डिकादिभ्यश्चेति सूत्रे पठितमापिशलिवचनमत्र प्रमाणम्। आपिशलिवचने इकशब्दः स्वस्थानिनि ठकारे लाक्षणिकः। साधारणाः प्रत्यया इति। तस्यापत्यमित्यारभ्य तस्य विकार इत्येतत्पर्यन्तं यावन्तोऽर्था वक्ष्यन्ते तेषु सर्वेष्वर्थेषु जायमानाः प्रत्यया इत्यर्थः।

इति साधारणाः प्रत्ययाः॥

स्त्रीपुंसाभ्यान्नञ्स्नञौ। प्रकृताञ्सन्नियोगेनेति। उत्सादिभ्यश्चेतिसूत्रादञ्ग्रहणमनुवर्त्तते तद्विधिसन्निधानेन नगागमविधानमस्त्वित्यर्थः। टिलोपेनेति। नन्वागमविधानवैयर्थ्यम् टिलोपसम्पादकतयैव चारितार्थ्यात्। लाघवान्तरमपीत्याह। एवञ्चेति। ङीन्प्रसङ्ग इति। तथा च स्त्रैणीतिपदमाद्युदात्तं स्यात्। जातिलक्षणेपीति। गोचञ्चरणेः सहेत्यत्र। यञञोश्चेतिसूत्रे यस्कादि

भ्यो गोत्र इतिसूत्राद् गोत्रग्रहणमनुवर्त्तते । सङ्घाङ्क्येत्यत्र तु गोत्रचरणादित्यतः । तत्रोभयत्र यथा ऋष्यपत्यस्यैवग्रहणन्तथाऽत्रापीति भावः । तदुक्तङ्कैयटेन । ऋषिप्रजनस्य लोके गोत्रमित्युच्यत इति । अत एव । ऋषिवाचकादुत्पन्नस्य ग्रहणादेव । ताट्टग्स्त्रीविवक्षायाम् । स्त्रिया गोत्रापत्यं स्त्रीत्यर्थविवक्षायाम् । एतत्प्रकृतिकेतित । स्त्रीपुम्प्रकृतिकेत्यर्थः । अनभिधानादिति । अत्र मानन्तु अञ् प्रकृतः सोऽनुवर्त्तिष्यत इत्याशङ्कापरभाष्यम् । अकारविशिष्टस्येति । अत्र विवक्षिताद्विशिष्टस्येति नोक्तम् । नीगागमस्य वनीवच्चीतीत्यत्र प्रसिद्धत्वात् । नक्रतः । उभाभ्यान्नञ्प्रत्यय एव न क्रतः । संयोगान्त्यलोपापत्तेरिति । अन्तर्वर्त्ति-विभक्त्या स्वादिष्विति वा पदत्वसत्त्वात् । अनया । पुंसो भस्त्वेत्यनेन विहितभसंज्ञया । न्यायेन । बाध्यबाधकभावप्रयोजकक्लृप्तन्यायेन । भसञ्ज्ञाविधानसामर्थ्याद्राध इति त्वन्यत् । एतावतापि लाघवाभाव इत्याशयेनाहालमिति । इति स्यादिति । तत्र तद्धितस्य द्विगुनिमित्तत्वाभावः स्पष्ट एव । अनभिधानादिति । अत्र मानन्तु प्रकृतसूत्रस्थभाष्यमेव । तथाहि । इहकस्मान्न भवति त्रैविद्यः पाञ्चनदः षाड्कुल इति एवम्पूर्वपदे नैवं विज्ञायते तिस्रो विद्या अधीते त्रैविद्य इति । कथन्तर्हित्रयवयवा विद्या त्रिविद्या । त्रिविद्यामधीते त्रैविद्य इति । इहापि नैवं विज्ञायते पञ्चसु नदीषु भवः पाञ्चनद इति । किन्तर्हि पञ्चानान्नदीनां समाहारः पञ्चनदम् । तत्र भवः पाञ्चनद इति षाड्कुल इत्यस्यापि षष्ठीतत्पुरुषाङ्गवार्थेप्रत्ययेनोपपत्तिरिति । पञ्चनदमिति । नदीभिश्चेति समाहारेऽव्ययीभावः । एवं समाधाय पुनः पञ्चकपालस्येदङ् खण्डम्पाञ्चकपालमित्यत्र पञ्चसु कपालेषु संस्कृत इत्यर्थे जातस्याणो लुकि पुनस्ततो जातस्येदमर्थकस्याणो लुगभावार्थन्दिगोर्लुकि तन्निमित्तग्रहणं कर्त्तव्यमिति वार्त्तिककृतोक्तम् । ततो भाष्यकृता षष्ठीबलात्तमर्थम्प्रसाध्य तन्निमित्तग्रहणमिति वार्त्तिकम्प्रत्याख्यातम् । यच्च तन्निमित्तग्रहणे क्रियमाणे पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पञ्चकपाल्यां संस्कृत इत्यपि विगृह्य पञ्चकपाल इत्येव यथा स्यादित्येवमर्थमर्थविशेषासम्प्रत्ययेऽतन्निमित्तादपीति वार्त्तिककृदुक्तं वचनान्तरन्तदपि भाष्यकृतैवम्प्रत्याख्यातम् एतच्च न वक्तव्यम् । इहास्माभिस्त्वैशब्दंसाध्यम् । पञ्चसु कपालेषु संस्कृतः । पञ्चकपाल्यां संस्कृतः । पञ्चकपाल इति ।

तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भवित्यविरविकन्यायेन। अवेर्मांसमिति विगृह्याविकशब्दादुत्पत्तिर्भवति अवाकिमिति। अत्राविकशब्दः स्वार्थककान्तः एवमप्यृक्कपालेषु संस्कृत इति विगृह्य पृक्कपाल इति भविष्यति। पृक्कपाल्यां संस्कृत इति विगृह्य वाक्यमेवेति। अविरविकन्यायेनेति। अविः अविकन्यायेन तद्द्वारेण यथा प्रत्ययमुत्पादयति तथायमपीत्यर्थः। तत्र यथाऽवेर्मांसमिति विग्रहेऽप्यविकशब्दादेव प्रत्ययो न त्वविशब्दात्तथा पृक्कपाल्यां संस्कृतमित्यर्थे वाक्यमेव न तुप पृक्कपालीशब्दात्प्रत्ययस्तेनानभिधानात्तद्धितानुत्पत्तिरिति भावः। विगृह्य अविकशब्दादुत्पत्तिरित्यत्र परावरयोगे चेति ङाप्रत्ययः। अस्मिन् सूत्रे गोत्रेऽलुगचीत्युत्तरसूत्रादचीत्यस्यापकर्षेणाजादिरित्यर्थलाभः। प्रायेण तु भाष्ये अव्यविकन्यायेनेति पाठो दृश्यते। तस्यायमर्थः। अव्यविकशब्दयोर्यो न्यायः प्रकारस्तेनेत्यर्थः। तत्र यथा अविशब्देन विग्रह एव प्रत्ययस्त्वविकशब्दादेव तथेत्यर्थः। अयमलुगिति। बाधक इति शेषः। तेन। विवक्षित इत्यर्थकरणेन। अत एव। तादृशार्थस्याभिप्रेतत्वादेव। अत्र। गोत्रेऽलुगचीति सूत्रे। परिभाषिकम्। शास्त्रकारीयसङ्केतविषयप्रतिपादकम्। युवशब्दसाहचर्यादिति। तत्र युवशब्दो यथा शास्त्रीयार्थस्य प्रकाशकस्तथा तत्सूत्रपूर्ववृत्तिसूत्रघटको गोत्रशब्दोऽपि तादृशार्थस्य प्रकाशकः। ननु यदि तद्राजस्येति प्रकरणविहितालुक एवायमलुग्बाधकस्तदा द्वितीयाध्याय एव तस्मिन् लुक्प्रकरणे इदं सूत्रं कर्त्तव्यमत आह। प्राग्दीव्यत इतीति। ननु गार्गीया इत्यत्र यस्येति लोपस्याभीयासिद्धत्वेन न तद्धितपरत्वमिति कथं लोपप्राप्तिरत आह। आभीयत्वादिति। आरम्भसामर्थ्यादिति। यद्यत्राभीयासिद्धत्वं स्यात्तदापत्यप्रत्ययकारस्य तद्धितपरत्वासम्भवेन सूत्रारम्भोऽनर्थकः स्यादिति। ग्लौचुकायने ञ्ञो नेति। ग्लुचुकशब्दात्प्राचामवृद्धादिति गोत्रे फिञि ततो यून्यणि ततस्ञ्ञार्थविवक्षायां यूनि जातस्याणो लुकि वृद्धत्वाभावाच्ञ्ञो नेत्यर्थः। ग्लौचुकायनरूप्यमिति। ग्लौचुकायनादागतमित्यर्थः। पैलादिभ्यश्च। एतस्मिन् सूत्रे यूनि लुगित्यस्यानुवृत्तावेतस्य गोत्रप्रत्ययान्तात्परस्य प्रत्ययस्य लुग्विधायकत्वमित्येष निर्णय इत्यभिप्रायेण पैलः पिता पुत्रश्चेत्युक्तम्। यः शिष्यत इतिन्यायेन युवप्रत्ययस्य लुक्-

पि प्रकृतेरेव प्रत्ययार्थाभिधायकत्वम्। वारि पश्येत्यादौ प्रत्ययस्यामो लुकि कृतेऽपि यथा प्रकृतेः कर्माभिधायकत्वन्तद्वत्। न चैवम्पैलशब्दात्कदा चिद् गोचापत्यस्य कदा चिद्यूनो बोध इति नियमो न स्यात्। पैलशब्दस्य शक्योभयबोधकत्वादिति वाच्यम्। वारिशब्दमाचार्यथा कर्तृकर्मान्यतराभिधानमन्यसमभिव्याहारात्तथा प्रकृतेऽपि प्रकरणादिना गोचयूनोरन्यतरस्याभिधानसम्भवात्। मूले तद्राजाच्चाण इति। गणसूत्रमेतत्। अत्र तद्राजादिति अण इति च समानाधिकरणषञ्चम्यन्तम्। अस्यापि यूनि जातस्य प्रत्ययस्य लुगभिधायकतया तद्राजसंज्ञको योऽण् सोऽत्र गोचार्थक एव गृह्यते। इञः प्राचाम्। अत्र गोत्र इति यद्यपि न प्रकृतम्। तथापि सामर्थ्याल्लब्धमित्याह। इञन्तादिति। व्याख्यानादिति। पैलादिगणे शालङ्किसात्यकिप्रभृतिशब्दानामिञन्तानाम्पाठदर्शनमूलकादित्यर्थः। तत्र हि तेषामुपादानमप्रागर्थम्। यदि तावदपि प्राचामेव गोत्राणि तदा इञः प्राचामित्येव सिद्धे तेषामुपादानमनर्थकं स्यादिति प्राचामिति नेञ्प्रत्ययात्परस्य विकल्पेन लुग्विधायकमिति। न च प्राचामह्वादितिवदिञः प्राचामित्यत्रापि प्राचाङ्ग्रहणं विकल्पार्थमस्तु। पैलादिषु शालङ्किप्रभृतिग्रहणन्नित्यार्थमस्त्विति वाच्यम्। एवं सति इञ इत्येव सूत्रमस्तु। नित्यार्थं शालङ्किप्रभृत्युपादानेन ज्ञापकेनेञ इत्यस्य वैकल्पिकत्वसिद्धेः प्राचामित्यस्य वैयर्थ्यापत्तेरिति। फक्फिञोरितिसूत्रविषये आह। अनन्तरस्येति। वेत्यधिकार इति। समर्थानाम्प्रथमाद्वेत्यधिकारेऽस्य पाठात्। द्विगोर्लुगित्यादाविति। तेषामतदधिकारे पाठाद्वाग्रहणसम्बन्धोऽन्यथा स्यादिति भावः। गर्गादियञन्तकतशब्दादिति। कतशब्दप्रकृतिकयञन्तकात्यशब्दादित्यर्थः। सूत्र इति। अस्य प्रथमादित्यत्रान्वयः। प्रथमशब्दश्च प्रथमोच्चारितशब्दबोध्यपरः। अन्यथा सूत्रे प्रथमोच्चारितस्त्रस्येति न ह्यस्मात्प्रत्यय इष्यत इत्यनुपपत्तिः स्यात्। न च यः प्रथमोच्चारितशब्दबोधो नासौ सूत्रे स्थित इति पुनरप्यनुपपत्तिरिति वाच्यम्। प्रथमशब्दस्य सूत्रोच्चारितप्रथमशब्दबोधे लाक्षणिकत्वादिति। सुबन्तात्तद्धितोत्पत्तिरिति यथा लभ्यते तथाकारमाह। घकालतनेष्विति। नन्विदं ज्ञापकं ष्यञ्प्रत्ययविषयएवास्त्वित्यत आह। स्वार्थ इति। स्वार्थे परिसमाप्तस्य। सङ्ख्याकारकादिप्रयुक्तकार्येण संस्कृतस्य।

न ह्युपगुशब्दमात्रस्यापत्यरूपार्थेन योगो भवति किन्तूपगोरित्यस्येति भावः। प्रकारान्तरेण सुबन्तात्तद्धितोत्पत्तिवादिमतन्निरस्यति। यच्चिति। जघन्यवृत्तिः। लक्षणावृत्तिः। आद्यौ शक्यार्थोपस्थितिस्ततोनुपपत्तिग्रहस्ततो लक्षणा ततो लक्ष्यार्थोपस्थितिरिति लक्षणाया विलम्बितोत्पत्तिकफलप्रयोजकतया जघन्यत्वम्। जघनस्याशुद्वत्वात्तत्र स्थितस्य कुत्सितत्वमिति जघनमर्हतीति व्युत्पत्त्या जघन्यशब्देन कुत्सित उच्यते। उपस्थितषष्ठ्यर्थेति। उपस्थितम्परित्यज्यानुपस्थितकल्पने मानाभावादिति भावः। ननु सूत्रे प्रथमोच्चारितस्तस्येतिशब्दस्तद्बोध्यत्वञ्च सर्वस्य शब्दस्य सर्वनाम्नो यावत्परामर्शकत्वादत आह। तस्येतीति। न विरुद्धेति। तस्यापि सूत्रोच्चारितप्रथमशब्दबोध्यत्वसम्भवादिति भावः। ननु प्रवर्त्तमानस्य बाधकत्वव्यवहारो युक्त इति यत्तादिद्वद्विर्निषिध्यते तत्तादिद्वद्व्याख्योपधाद्वद्वेः कथम्बाध इत्यत आह। स्वविषय इति। स्वीयोद्देश्यतावच्छेदकाक्रान्त इत्यर्थः। वैयसवमिति। इगन्ताच्च लघुपूर्वादित्यण्। अत्र प्राप्ताप्यादिद्वद्विर्न्याभ्यामिति निषिध्यते। द्वद्व्यर्थमिति। यद्यादिद्वद्वेर्बाधकता न स्यात्तदाऽत्तादिद्वद्वेरुपधाद्वद्वेश्च प्राप्ता पौष्करसादिरित्यस्य सिद्धौ स पाठो व्यर्थः स्यादिति तेन पाठेनादिद्वद्विविधायकशास्त्रविषये यद्वद्व्यन्तरविधायकं शास्त्रम्प्राप्तन्तद्बाध्यत इति कल्प्यत इति। ननु यस्मिन्तद्धिते नोभयपदवृद्धिप्राप्तिस्तत्रोभयपदवृद्धिविधायकतया तत्पाठश्चरितार्थ इत्यत आह। ढकादिरिति। अनभिधानादिति। पुष्करसच्छब्दस्य ज्ञापकतापरभाष्यप्रामाण्यात्तथा कल्प्यत इति भावः। परत्वाद्बाधवादिमतन्निरस्यति। परत्वादिति। कार्यद्वयासम्भव एवेति। वृद्धेभ्य इत्यत्र यथा। अपवादत्वादपि न बाधकत्वमित्याह। नापीति। चारितार्थ्यादिति। एवञ्चापवादत्वबीजासत्त्वमाविष्कृतम्। सामान्ये। इदम्पदार्थसामान्ये। इयञ्च शङ्का शाब्दबोधवैलक्षण्यानादरेण प्रवृत्ता। समाधानमपि तथैवाएतेन सामान्ये विशेषान्तर्भावेऽपि तस्येदमित्यनेन सिद्धिकल्पने इदन्त्वेनापत्यस्य भानम्भविष्यति तस्यापत्यमितिसूत्रसत्त्वे त्वपत्यत्वेनापत्यस्य शाब्दबोधविषयत्वमिति तस्येदमित्यपत्येऽपीत्यसङ्गतमित्यपास्तम्। ननु तस्यापत्यमिति सूत्राभावेऽत इञिति सूत्रमर्थान्तरेऽपि प्रवर्त्तेतेत्यत आह। तस्यापत्यमत इञित्यर्थेवेति। इञस्येति। प्राप्तस्येति शेषः। अनेन। तस्यापत्यमित्यनेन। अप्राप्तस्ये-

ति । शैषिकेऽर्थे तस्य विधानादिति भावः । शैषिकेणासिद्धेः । शैषिकस्याप्राप्तेः । उत्सर्ग इतीति । असावुत्सर्ग. शैष एवेति योजना । उत्सर्गः । इदन्त्वरूपसामान्यधर्मप्रकारकप्रतीतिविशेष्यः । तदेतदुपपादयति । योगविभागाभाव इति । प्रकृतिविशेष इति । अदन्तात्मकप्रकृतिविशेषेत्यर्थः । योगविभागसत्त्वेन शैषत्वमित्यं तदुपपादयति । इदंशब्दो हीति । एवञ्च यत्पर्यवसितन्तदाह । तच्च शैषेति । दण्ड्युक्तानुसारिमतञ् खण्डयति । ये त्विति । ननु यदीदन्त्वं नापत्यविवक्षायाञ्चाण् तदा आपत्यं वा गोत्रमित्यत्रापत्यस्यापत्यमित्यर्थेऽत इञ् स्यादत आह । आपत्यं वेति । दाशरथायेति प्रयोगस्य त्वनुपपत्तिरेवेत्याह । दाशरथायेत्यादीति । अन्तरङ्गत्वात् । वर्णमात्रापेक्षत्वेनान्तरङ्गत्वात् । इदञ्चान्तरङ्गत्वं स्वनिमित्तसद्भावात्पूर्वप्रवृत्तौ नियामकम् । अत्राकृतव्यूहपरिभाषया यस्य शास्त्रस्याप्रवृत्तिः सम्पादनीया तत्प्रवृत्तेः प्राक् तच्छास्त्रस्य यन्निमित्तन्तस्य शास्त्रान्तरेण यत्र विनाशः सम्भावितस्तत्र परिभाषाप्रवृत्तिरिति मत्वा शङ्कते । यद्यप्यत्रैकेति । निमित्तविनाशसम्भावनेवेति । अत्रैवकारेण स्वप्रवृत्त्युत्तरकाले यत्र स्वनिमित्तस्यान्यशास्त्रेण विनाशस्तत्र प्रवृत्तिरित्यर्थव्यवच्छेदः । समर्थग्रहणस्याकृतव्यूहपरिभाषाज्ञापकत्वञ् खण्डयति । वस्तुत इति । अन्तरङ्गन्यायलब्धार्थानुवादः । स्वनिमित्तस्यैव सद्भावात्तद्धितोत्पत्तेः प्रागीकादेशे कृतसन्धिकार्यादेव भविष्यतीति भावः । अनुवादस्य फलमाह । विष्णुरित्यादावेति । अत एव । समर्थग्रहणस्य न्यायलब्धार्थानुवादत्वादेव । अत्रान्तरङ्गत्वं यद्विभक्त्यन्तादुत्पत्तिस्तद्धितस्य सम्भाविता तद्विभक्तिप्रागभावसमानकालिकप्राप्तिकर्तृत्वरूपम् । अन्तरङ्गानपीतिपरिभाषैकवाक्यत्वात्तेनाश्विमानणिति निर्देशः सङ्गच्छते । तद्धितोत्पत्तिप्राप्तिकालिकत्वविवक्षायान्तु विभक्तिनिमित्तकदीर्घस्य पूर्वमापत्तिः स्यात् । इदम् । वस्त्रमुपगोरपत्यञ्चैत्रस्येत्यत्र प्रत्ययग्रहणशक्तिरूपम् । प्रकृते तद्धितविधेः समर्थत्वञ्च तद्धितप्रकृतित्वाभिमतार्थसम्बद्धार्थाभिधायकतद्धितविधायकत्वरूपम् । तच्चात्र नास्ति सामर्थ्यस्यैकार्थीभावरूपस्य तत्परिभाषाविषयत्वादत्रापि तदाश्रयणफलमतिपादयति । तथापीति । अविवक्षित इति । अत्रैवपुंसकमित्यनेन ज्ञापितत्वात् । तेनौपगवी । गर्गा इति सिद्धम् । लोके गोत्रमिति । तथा चेदं सूत्रमनर्थकमिति भावः । तत्त्वेन । पौत्रत्वे-

न। यदीयम्पौत्रप्रभृत्यपत्यमिति। अत्र यदीयमित्यस्य यत्सम्बन्धीत्यर्थः। पौत्रशब्दस्य जन्यताविशिष्टजन्यपरतया एतद्घटकजन्यतायाश्च निरूपकम्प्रति नित्यसाकाङ्क्षतया यत्पदार्थस्योपस्थितत्वात्तस्यैव निरूपकत्वपर्यवसानम्भवति। एवञ्च स्वनिरूपितजन्यताविशिष्टजन्यत्वस्यैव सम्बन्धस्य यदीयमित्यत्र सम्बन्धत्वेन भानं कल्प्यम्। अपत्यशब्दस्य च जन्यताविशिष्टपरत्वादेतद्घटकजन्यतापि प्रत्यासत्त्या यत्पदार्थनिरूपिता विवक्षिता। एवञ्च यदाऽङ्गिरसः पौत्रस्य विवक्षा तदाऽपत्यत्वमप्यत्राङ्गिरोनिरूपितमेव गोत्राधिकारीयप्रत्ययोत्पत्तिनियामकमित्यङ्गिरसो गोत्रङ्गर्गस्यापत्यमित्यर्थविवक्षायान्नोभयघटकजन्यतानिरूपकस्यैकत्वप्रतीतिरतोऽत्र नाणिति भावः। एवं युवत्वमपि तन्निरूपितमेव विवक्षितम्प्रत्यासत्तेस्तत्फलमाह। पौत्रपरेति।गर्गापत्यस्यापत्यमित्यर्थविवक्षायामपत्यशब्दार्थघटकजन्यतायाङ्गर्गापत्यनिरूपितत्वम्प्रतीयते न तु गर्गनिरूपितत्वमिति न पून्यण् प्रत्यय इति भावः। अत एव। अपत्यत्वेन बोधादेव। अपत्यत्वेन बोधे भाष्यान्तरमपि साधकमित्याशयेनाह। अत एवेति। अपत्यत्वेन बोधस्याभिमतत्वादेव। आपत्यशब्दस्य पौत्रपरत्वमुपपादयति। अपत्यस्यापत्यमिति। नन्वेवमापत्यशब्दस्य पौत्रे यः प्रत्ययस्तत्परत्वं कथमत आह। तेन चेति। आपत्यशब्देन चेत्यर्थः। अनयोरिति। आपत्यादित्वचापत्यशब्दो यदि प्रत्ययपरो न स्यात्तदाऽर्थात्प्रत्ययविधानानुपपत्त्या वार्त्तिकासङ्गतिः स्यादिति तत्र लक्षणाया आवश्यकत्वे तदानुपूर्वीकत्वादापत्यमित्यत्रापि लक्षणेति भावः। अत एव। अपत्यप्रत्ययान्तस्य पुंस्त्वादेव। छप्रत्ययापत्तेरिति। हृद्भगादित्यादिः। अस्या अपि। गोत्रसंज्ञाया अपि। प्रत्ययस्य संज्ञाकरणमावश्यकमित्याह। वार्त्तिकमत इति। इति वदेदिति। तावतापि न्यासलाघवस्य सम्भवात्। संज्ञिविकल्पस्येति। सूत्रकारमतेऽर्थस्य संज्ञा वार्त्तिकमते तु प्रत्ययस्येति संज्ञिविकल्पलाभः। द्वितीयवार्त्तिकं व्याचष्टे। आपत्यादित्यादेरिति। इत्यर्थ इति। एवञ्च गर्गादेर्यदा पौत्रप्रभृतेरपत्ये चतुर्थ्यादौ जीवद्वंश्ये प्रत्ययः क्रियते तदा स्वार्थे द्वितीयो "यञिञोश्चे"त्यादिना फगादिः क्रियते गार्ग्यायण इति। स चास्त्रियामित्यनेन स्त्रियान्द्वितीयप्रत्ययाभावाद्गार्गीत्येव भवतीत्युक्तम्भवति। युवसंज्ञमेवेतीति। जीवति तु वंश्य इत्यत्र

तुशब्दो भिन्नक्रमः युवेत्यनन्तरन्द्रष्टव्यः । स चैवकारार्थस्तेन नियमलाभोऽन्यथाऽस्याकडारीयसंज्ञाभिन्नत्वेन गोत्रसंज्ञाबाधकत्वन्न स्यात् । इष्यते च बाधकत्वन्तदाह । समावेश इति । इञ् न स्यादिति । तस्यापि गोत्रत्वादिति भावः । गार्ग्य इत्यस्याप्यापत्तेरिति । तत्र हि जीवद्वंश्ये गार्ग्यायण इत्येवेष्यते सम्मति तूभयं स्यात् । नियमाभावादि । अस्य सम्मतीत्यादिः । तेन न्यायेन । येन नाप्राप्तन्यायेन । अस्याप्राप्तौ । गोत्रेऽलुगचीत्यस्याप्राप्तौ । अल्तरङ्गत्वात् । अजादिप्रत्ययापेक्षयाऽन्तरङ्गत्वात् । भ्रातुरवंश्यत्वादिति । पितृपितामहादिरूपोत्पादकप्रबन्धो हि वंशः । तत्र भवो वंश्यः दिगादिभ्यो यत् । एवं पितृव्यमातुलादीनामपि बोध्यम् । अत एव । इत्वादेरविवक्षितत्वादेव । पितृकुले सपिण्डा इति । येषाञ्जनने मरणे वा कुलान्न भुञ्जीतेति निषेधादसपिण्डैस्तेषामन्नन्न भुज्यते ते सपिण्डाः । मातृकुल इति । इदं सापिण्ड्यं विवाहादिप्रतिबन्धकम् । आद्यमेव । पितृकुले ये सपिण्डास्तेषामेव ग्रहणमित्येतत् । अन्ये इति । आद्यमेव ग्राह्यमित्यत्र भाष्यानुग्रहाभाव इति तेषामाशयः । ज्येष्ठभ्रातुरन्यस्मिन्निति । अन्यपदस्य प्रतियोगिसाकाङ्क्षार्थबोधकतयाऽनुपस्थितस्य प्रतियोगित्वकल्पनापेक्षया ज्येष्ठभ्रातुः पूर्वसूत्रेणोपस्थितत्वात्तस्यैवान्यपदार्थैकदेशे भेदे प्रतियोगितयाऽन्वयसम्भवादिति भावः । तच्च । अन्यस्मिन्निति पदञ्च । भ्रातृरूपसपिण्ड इति । अस्य ज्येष्ठेत्यादिः । नन्वेवम्पूर्वसूत्रविहितनित्यसंज्ञायाः कोऽवकाश इति चेत् । संज्ञित्वेनाभिप्रेते सति नित्यार्थन्तत्स्यात् । एकमितीति । प्रकृतसूत्रस्थमित्यर्थः । द्वितीयमितीति । अनुवर्त्तमानं द्वितीयमित्यर्थः । स्थानपदं व्याचष्टे । पदमिति । अत्र पदशब्दः पूज्यतावच्छेदकत्वाभिमतधर्मविशेषपरस्तदभिप्रायेणाह । पितृव्यत्वादिकमिति । तत्सत्त्वात् । भ्रातृत्वसत्त्वात् । सिद्धे सतीतिन्यायेन समाधत्ते । तथापीति । स्पष्टार्थत्वादिति । समानार्थकपदद्वयोपादानेनप्रकर्षलाभो लक्षणया भवति । तत्रज्ञिर्द्वेशे तु प्रकर्षलाभो नावच्छत्त्वेति स्पष्टप्रतिपत्त्यर्थन्तत्रज्ञिर्द्वेशइति भावः । इति मत इति । द्वितीयमत इत्यर्थः । भ्रातृपुत्रादिरिति । भ्रातुः पुत्रादिरिति समासः । पूजामुपपादयति । युवसंज्ञकानामिति । ननु गोत्राद्यूनीतिनियमात्कथमत्र यूनि प्रत्यय इत्यत आह । अत्रेति । कुत्सामुपपादयति । जीवद्वंश्य इति ननु गोत्रेऽभिधित्सिते एक एवेति नियमे पि कथन्न चतुर्थे गोत्रे गोत्रप्रत्ययान्ताद्गोत्रप्रत्ययः । तदभिधायकस्य प्रत्ययस्यैकत्वादत आह । अतएवेति

संङ्ख्यावाचकस्याश्रयणादेव । गोत्रेऽभिधित्सित इत्यनेन यन्निरूपितङ्गोत्रत्वन्तत्सम्बन्धिगोत्रप्रतिपादक एक एव प्रत्ययस्तस्य गोत्रस्याभिधायक इतीह विवक्षितोऽर्थः । यदि परमप्रकृतेर्गर्गशब्दात्प्रत्ययङ्कृत्वा प्रत्ययान्तरङ् क्रियते तदा नियमविरोधः स्पष्ट एवेति भावः । ननु तथापि गोत्रे एक एव प्रत्यय इत्येवास्तु गर्गस्य गोत्रापत्यमितिविग्रहे द्वितीयो न भविष्यतीत्यत आह । अपत्यग्रहणानुवृत्तिरिति । अपत्यग्रहणाननुवृत्तौ यन्निरूपितगोत्रत्वविवक्षा तन्निरूपितगोत्रत्वविशिष्टाभिधायकप्रत्ययान्तात्ताद्दशो द्वितीयः प्रत्ययो नियमेन निवार्येत अनन्तरापत्यप्रत्ययान्तात्तन्निरूपितगोत्राभिधायकः प्रत्ययो न निवार्येत । अपत्यग्रहणानुवृत्तौ तु यन्निरूपितगोत्रत्वविवक्षा तन्निरूपितापत्यत्वविशिष्टाभिधायकस्यैकत्वलाभादनन्तरापत्यप्रत्ययान्तादपि गोत्रापत्ये प्रत्ययो न भवतीति भावः। यदुक्तङ्गोत्रे स्वैकोनसङ्ख्यानामित्यनेन पञ्चदयन्तदुपपत्तये आह । तत्तत्पिण्डसम्बन्ध्येवेति । अत एव । पितुरेवापत्यमिति स्वीकारादेव । कश्चित् पृच्छतीत्यस्य पितामहस्यापत्ये वेति शेषः । अपत्यम्गोत्रप्रश्नेति सामानाधिकरण्यमस्मिन्पक्षेऽपत्यमिवापत्यमितिरीत्या गौणं गोत्रानुवादाद् ग्राह्यम् । गर्गादिभ्यो विहितः प्रत्ययो गोत्राधिकारसामर्थ्याद्यद्यपि तृतीये वाच्येऽनन्तरापत्ये प्रत्ययमकृत्वापि भविष्यतीति तद्विषये वक्ष्यमाणा परम्परा न सम्भवतीति यस्मिन्स्थले वक्ष्यमाणो दोषः सम्भवति तादृशं स्थलमाह । उपगोस्तृतीय इति । अणविशिष्टमिष्टमिति । एवञ्चात्रानिष्टापत्तिरिष्टासिद्धिरित्युभयन्दोषः । परम्परापत्यापत्यवत्सम्बन्ध इति । परम्परयाऽपत्यापत्यवद्भावसम्बन्ध इत्यर्थः । एवञ्चात्रैकस्येष्टस्य सिद्धावप्यनिष्टस्यापि प्राप्तिः । नन्वत्र पञ्चेऽनन्तरापत्ये प्रत्यय इष्ट एवेति द्वितीयप्रत्ययमारभ्यानिष्टप्रत्ययगणना कार्या तथा च मूलोक्तं स्वैकोनसङ्ख्यानामित्यनुपपन्नमित्याशयेन शङ्कते । यद्यपीति । सोऽपि । प्रथमोऽपि । एवञ्चास्य श्लोकस्यानिष्टपरम्परापत्तौ तात्पर्यमिति भावः । स्वैकोनसङ्ख्यानामित्यस्य स्वं गोत्रन्तदपेक्षया एकोनसङ्ख्यानाम्प्रत्ययानाम्परम्परा प्रसज्यत इत्यन्वयः । अयम्भावः । अत्र गोत्रशब्दो गोत्राभिधायिप्रत्ययपरः तथा च गोत्राभिधायी प्रत्ययः प्रकृते एक इष्टः इतरेऽनिष्टा अतः प्रथमस्यानिष्टस्य चतुर्थस्य चानिष्टस्य सन्दंशपतितत्वात्तत्राप्यनिष्टत्वकल्पनया गोत्राभिधायि-

प्रत्ययगणनायान्तस्य तृतीयापत्ये जातत्वाद्द्वयोर्गणना एवञ्चतुर्थे गोत्रे त्रयाणामनिष्टानां गणना एवम्पञ्चमादौ चतुर्णामित्यादिक्रमेण गणनायां गोत्राभिधायकस्य वस्तुगत्यैकस्य परित्यागङ्कृत्वाऽनिष्टानाम्परम्परा प्रसज्यते। एतस्याप्यौपचारिकानिष्टत्वमादाय तु व्याख्यानसमये एकोनशतं प्रत्ययाः स्युरित्युक्तम्। तत्र प्रत्यया इत्यस्यानिष्टा इति शेषः। अत्र पक्षे। पितुरेवापत्यमिति पक्षे। विध्यर्थत्वमिति। तृतीयस्यापत्यत्वविरहेणोपगोर्गोत्रापत्यमित्यर्थविवक्षायामप्राप्तस्य प्रत्ययस्य विधानार्थमित्यर्थः। गौरवमिति। न ह्येकेनैको गोत्र इतिसूत्रेणोभयलाभ इतिसूत्रस्यावृत्तिङ्कृत्वैकस्य विध्यर्थत्वमपरस्य नियमार्थत्वमिति गौरवमित्यर्थः। एकग्रहणसामर्थ्यात्केवलमस्य सूत्रस्य नियमार्थत्वमेवेत्याशयेन शङ्कते। न चेति। एकग्रहणसामर्थ्यादकृतार्थस्य कल्पनां कृत्वा सूत्रसार्थक्यापेक्षया पितामहादीनामप्यपत्यभवतीतिपक्षस्वीकार उचितः एवञ्च प्रसिद्ध एवार्थे नियामकमित्याशयेन समाधत्ते। एकग्रहणेत्यादिना। पितामहादीनामप्यपत्यमितिपक्ष एव पाणिनिसम्मत इत्याह। अत एवेति। स्वरसतः। लक्षणां विनापि पितामहादीनामितिपक्षस्य ज्यायस्त्वे साधकान्तरमाह। दशस्विति। अपत्यत्वमपीति। न पतन्त्यनेनेत्यपत्यशब्दार्थस्यापि तत्राबाधादिति भावः। स्पष्टमाष्य इति। तत्र हि उत्पादयितर्यपत्ययुक्त इतिपक्षस्योपपादनङ् कृत्वा तत्र दूषणानि चाभिधाय सन्तु तर्हि सर्वेऽपत्ययुक्ता इति। कथम्पुनर्ज्ञायते सर्वेऽपत्ययुक्ता इति। एवं हि याज्ञिकाः पठन्ति। दशपुरुषानूकं यस्य गृहे शूद्रा न विद्येरन् स सोमम्पिबेदिति। यदि च सर्वेऽपत्ययुक्ता भवन्ति तत एतदुपपन्नम्भवतीत्युक्तम्। दशपुरुषानूकमिति। अनुपूर्वात्कायतेरनुकानमभिधानमित्यर्थे घञर्थे कविधानमिति भावे कः। अन्येषामपीति दीर्घः। एवञ्चानूकशब्दः शब्दार्थकः सम्पन्नः। दश पुरुषा अस्मिन्नित्यर्थेऽनूकेऽन्यपदार्थे बहुव्रीहिः। सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः। दशपुरुषोऽनूको यस्मिन्निति पुरुषेऽन्यपदार्थे पुनर्बहुव्रीहिः। दशसु पुरुषेष्विति यावत्। अत्र शूद्राः विवाहिताः। शूद्रावेदी पतत्यध इति वचनात्। महाभारतेऽप्ययमर्थः प्रसिद्ध इत्याह। जरत्कार्वादुपाख्यान इति। तत्र हि यायावरनामका ऋषयः काञ्चिद्वृक्षशाखामवलम्बमाना गर्त्तान्विते ऽधोदेशे प-

तनभीता जरत्कारुणा दृष्टाः । ततो जरत्कारुणा तान् प्रति पृष्टङ्किमर्थंभवन्तो भीताः कुतश्चेदृश्यवस्था भवताम् । ततस्ते जरत्कारुमत्यूचुः । अस्माकङ् कुले जरत्कारुनामक एकः पुरुषोऽस्ति स दारपरिग्रहन्न करोति । स यावज्जीवति तावदस्माकमेवमेवावस्थानन्तन्मरणानन्तरञ्चास्माकम्यतनम्भविष्यतीति निश्चयेन वयम्भीताः स्मेति।एतेन पितामहादीनामपत्यमिति स्पष्टमेव लभ्यते । भाष्यान्तरसम्मतिमप्याह । अपतनादिति । अमरग्रन्थासङ्गतिमप्यस्मिन् पक्षे परिहरति । अपत्यन्तोकमिति । पूर्वोक्तभाष्यविरोधमपि परिहरति । पितामहोत्सङ्ग इति । एको गोत्र इतिसूत्राभावेऽस्मिन्पक्षे दोषोपपादनं करोति । स्वदूनेतीति । न त्विष्टासिद्धिरिति । एवञ्च विधायकत्वशङ्काया नावकाशः । नन्वेवमपि । नियमार्थकस्य सूत्रस्यारम्भेपि । परमप्रकृतेरिति । यन्निरूपितापत्यत्वविशिष्टानां समुदायस्तद्वाचकादित्यर्थः । भाष्ये प्रत्याख्यातत्वेनेति । गोत्रग्रहणस्येत्यादिः । तदुक्तभाष्यं । गोत्रग्रहणन्न करिष्यते । एकोऽपत्ये प्रत्ययो भवतीत्येव । यदि चेदानीम्प्रत्ययान्तादपि प्रत्ययः स्यात् नैकोऽपत्ये कृतः स्यात् । यदि गोत्रग्रहणन्न क्रियते । कथं गार्ग्यायणः वात्स्यायन इति । वक्तव्यमेवैतत् गोत्राद्यून्यस्त्रियामिति । अस्मिन् पक्षेऽनुवर्त्तमानापत्यशब्दस्योक्तार्थसिद्धये आवृत्तिः कार्येति गौरवमतो भाष्योक्तपक्षान्तरमाह । यद्वेति । प्रत्ययप्रकृतिरित्यस्याध्याहारः । सौत्रमेकग्रहणमेवास्मिन् पक्षे साधकम् । पक्षान्तरन्तत एवाह । यद्वेति । सर्वमूलत्वमिति । सर्वेषाङ्गोत्रापत्यत्वेन विवक्षितानां यो मूलपुरुषस्तत्प्रतिपादकत्वमित्यर्थः । भाष्ये स्पष्टमिति । तच्च हि अथापि गोत्रग्रहणङ् क्रियते एवमपि न दोषः । न एकग्रहणेन प्रत्ययोऽभिसम्बध्यते एको गोत्रे प्रत्ययो भवतीति किन्तर्हि प्रकृतिरभिसम्बध्यते । एका प्रकृतिर्गोत्रप्रत्ययमुत्पादयतीति यदि चेदानीम्प्रत्ययान्तादपि प्रत्ययः स्यान्नैका प्रकृतिर्गोत्रे प्रत्ययमुत्पादयेत् । अथ वा अख्यानेऽयं यत्नः क्रियते न हीदं लोकाद्विद्यते लोके हि संख्याम्प्रवर्त्तमानामुपचरन्ति एक इति वा प्रथम इति वा । यावद् ब्रूयात्प्रथमो गोत्रे प्रत्ययमुत्पादयति तावदेको गोत्र इतीति । न हीदमिति । लोके योऽर्थः प्रथमशब्दस्य दृश्यते स एव इहाप्याश्रीयत इत्यर्थः । शास्त्रेऽपि प्रथमार्थक एकशब्दो दृष्टः । एकेऽस्यप्राणाः प्रथमेऽस्यप्राणा इत्यर्थः । उपचरन्ति । व्यवहरन्ति । तद्वान्ये इति । पूर्वोक्तदोषा

णामनुत्पादायेत्यर्थः। आद्यः। इष्टासिद्धिरूपो दोषः। नन्वपत्यपरम्परायां स द्वितीय एवेति तृतीय इत्यनुपपन्नमत आह। तृतीयत्वमिति। तस्मादेव इति। अनन्तरापत्यप्रत्ययान्तादेवेत्यर्थः। एवकारव्यवच्छेद्यमाह। न त्विति। उत्तरसूत्रस्य मुख्यपक्षे प्रयोजनमादावाह। पितामहेति। अनन्तरापत्ययुवप्रत्ययान्तादिति। अनन्तरापत्यप्रत्ययान्ताद् युवापत्यप्रत्ययान्ताच्चेत्यर्थः। सूत्रारम्भे सति यो नियमः फलितस्तमाह। यूनीति। आद्ये। पितुरेवापत्यमिति पक्षे। चतुर्थ्यन्तयान्तादिति। चतुर्थ्यन्तवाचिप्रत्ययान्तादित्यर्थः। न तु तृतीयवाचीति। पञ्चम्यस्य तृतीयाऽपत्यत्वाभावादिति शेषः। संज्ञासंज्ञिनिर्देशस्थले उभयोरपि प्रथमान्तत्वं सर्वत्र दृष्टमिति स्त्रियान्न युवसंज्ञेत्यनुपपन्नमत आह। अस्त्रियामितीति। तदन्तविधिरिति। वर्णग्रहणञ्च सर्वत्र लुक्त्वात् न ष्याभ्यामितिसूत्रेण ङ्याङ्निषेधो व्यर्थ इत्याशङ्कते नन्विति। ऐचो विषयनिर्देशार्थमिति। ऐजागमस्य प्रवृत्तियोग्यं यत्स्थलन्तन्निर्देशार्थमित्यर्थः। द्व्याशीतिक इति। द्व्याभ्यामशीतिभ्याङ्क्रीत इत्यर्थः। पूर्वाविद्यनेन यदि पूर्वावयवत्वमैचो न बोध्यते किन्तु पदान्तयकारवकारोच्चारणकालपूर्वकालिकोच्चारणविषयत्वमात्रबोध्यत इति कल्प्यते तदाह। अभक्तत्वे होति। अस्त्रियादिति। ऐयजशब्दादित्यर्थः। गोत्र इति सूत्रे तस्यापत्यमित्यनुवृत्तेराह। तत्सम्बन्ध्यपत्यमित्यर्थ इति। ननु कौञ्जायन्य इत्यत्र जस्य ञित्वाद्वृद्धेः सिद्धौ घ्फञोर्ञित्वं व्यर्थमत आह। घ्फञोरिति अधिञ्जतङ्गोत्रइति। गोत्रे कुञ्जादिभ्य इत्येतत्। तदपत्येषु। भृगुवत्साप्त्येषु। अन्यथा। आरोपाभावे। इति के चिदिति। लाघवानुसारिणः। एतेन यद्दण्डिना भार्गवस्य वात्स्यस्य। आग्रायणश्चेतिद्वन्द्वं स्वीकृत्य बहुत्वाभावेऽपि सौत्रत्वाद्यञञोर्लुगिति निर्देशोऽयम्भृगुवत्साग्रायण इतीत्युक्तन्तदपास्तम्॥ ऋषित्वे त्विति। तदा तु ऋष्यन्धकेत्यण् स्यात्। द्रोणस्य मनुष्यत्वादनादित्यनुपपन्नमतो व्याचष्टे। भारतेति। द्रोणसंज्ञकस्याधुनिकस्य ग्रहणशङ्कां वारयति। अभिव्यक्तेति। अनाद्यर्थाभिधायित्वमिति। अभिव्यक्तो लोकप्रसिद्धोऽर्थो येषान्ताद्दशानां लोभः तेन संज्ञाशब्दानान्निरासः। एते हि यद्यद्व्यक्तेः संज्ञाः क्रियन्ते तत्तद्व्यक्तिमात्रमभिदधति तथा चाद्यर्थाभिधायकत्वलाभेन नैतेऽनाद्यर्थाभिधायका इति भावः। एतादृशाश्च लो-

कप्रसिद्धार्थग्रहणावच्छेदकानुपूर्वावच्छिन्ना इतिविशिष्टरूपोपादान एतन्नवृत्तिरित्यर्थादुक्ता भवति। विशिष्टरूपोपादानेन विधीयमानङार्यञ्च प्रायेण पदकार्यस्थल इति पदकार्य इत्यस्य लाभः। गोणनिरास इति। एते च गुणारोपप्रकरणादिसहकारिणैवार्थबोधका अतो न स्वतन्त्राः। अप्रयुक्तनिरस्तमिति। लोके विशेषणार्थबोधकत्वेन श्रुता इति व्युत्पत्तेः। एते च जगबडदमितिसमुदायरूपा अनर्थकाः अनुकरणानामर्थसङ्गावेऽपि तेन विशेषणार्थबोधकत्वेन श्रुताः। क्व चित्त्वनुकरणेऽव्यक्तानुकरणस्येतिज्ञापकाङ्गवति शास्त्रीयं कार्यम्। ये च शास्त्रीयप्रक्रियया साधुत्वेन व्युत्पादयितुं शक्यन्ते वचन्ति आवम् कमन्नित्यादयस्तेषामपि भाष्यकारीयवचनप्रामाण्यान्न शास्त्रविषयत्वमित्यर्थादुक्तं भवति। ये च प्रातिपदिकप्रकृतिकणिजन्तादयस्ते यद्यपि लोकेऽर्थबोधकत्वेन विशेषेण न श्रुतास्तथाप्येषान्तत्करोतीत्यादिशास्त्रेण साधुत्वाव्याख्यानाच्छास्त्रविषयत्वमस्त्येव। एतेन यस्त्विङन्तदाह। न तदुक्तिष्विति। तद्दुक्तिर्येषान्ते तथाभूतास्तत्सदृशाः गौणादय एवेत्यर्थः। भाष्येपीति। उक्तश्लोकार्थ उपनिबद्ध इति शेषः। बाह्वादिप्रभृतिष्विति। अत्र प्रभृतिग्रहणेन कुच्छादीनाङ् ग्रहणम्। लोकविदितादिपुरुषत्वरूपइति। लोकविदिते आदिपुरुषत्ववति येषां दर्शनमित्यर्थः। लौकिके गोत्रभाव इति। लोकविदिते गोत्रत्व इत्यर्थः। प्रकृताभिप्रायमेतत्। नत्वेतावद्दर्शनेन तद्धितमात्रविषयकत्वमभिव्यक्तेतिन्यायस्येति भ्रमितव्यम्। सम्बन्धिशब्दानाङ्कार्य इति। यथा राजश्वशुराद्यदितिसूत्रविहितो यत्प्रत्ययः श्वशुरसदृशे प्रयुज्यते यदा तदा श्वशुरस्यापत्यं श्वाशुरिरित्येव भवति। एतच्च पूर्ववार्त्तिकेनापि लभ्यत इत्यभिप्रायेणावयुत्यानुवादेनेति विशेषणन्दत्तम्। एवञ्चेति। गोत्रभाव इत्यस्य प्रकृताभिप्रायकत्वकथने च। कश्चिदिति। यथाश्रुतार्थग्राही। अनन्तरेऽपीतीति। अपिना व्यवहित इत्यस्य संग्रहः। अत एव पौत्रो दौहित्र इत्यत्र गोत्रेऽप्यसत्त्वेन प्राप्तस्य लुकः प्रवराध्यायप्रसिद्धत्वाभावाद्दारणसङ्गतिः। ननु गोत्र इत्यस्यासम्बन्धे यून्यपि प्राप्नोतीत्यत आह। यूनि त्विति। नन्वस्य गोत्राधिकारीयत्वात्कथञ्जामदग्न्यादीनां सिद्धिरत आह। रामो जामदग्न्य इति। लुक्श्लाविधानात्। एतत्सर्वमिति। प्रवराध्यायप्रसिद्धस्य लौकिकगोत्रस्य ग्रहणमित्येतत्। यूनि लुगितिसू-

चे राजन्यादुञ् मनुष्याच्च ज्ञापकम्परङ्गोत्रम् । यदयं वुञ्विधौ राजन्यमनुष्ययोर्यं ग्रहणङ्करोति तज् ज्ञापयत्याचार्यः लौकिकम्परङ्गोत्रग्रहणमिति। गोत्रोच्चोष्ट इतिसूत्रे राजमनुष्यशब्दावुपात्तौ तौ च गोत्रे कुञ्जादिभ्य इत्यतो गोत्रग्रहणानुवर्त्तनाच्छास्त्रीयगोत्राभिधायिनौ ततश्च गोत्रग्रहणेनैव सिद्धे तयोर्यं ग्रहणमपत्याधिकारादन्यत्र लौकिके गोत्रमित्यस्य ज्ञापकन्तथा च राजन्यमनुष्ययोः प्रवराध्यायप्रसिद्धत्वाभावेन गोत्रग्रहणेनैतयोरग्रहणं स्यादिति तयोरुपादानं सफलमिति । द्वितीये अष्टाशीतिसहस्राण्यूर्द्धरेतसामृषीणां बभूवुस्तत्रागस्त्याष्टमैर्ऋषिभिः प्रजनोऽभ्युपगतस्तत्र भवतां यदपत्यन्तानि गोत्राणीत्युक्तम् । तत्र भवतामिति । अगस्त्याष्टमानामित्यर्थः । तृतीये उभयत्र लौकिकस्य गोत्रस्य ग्रहणमित्युक्तम् । तत्र कैयटः । यञञोश्चेत्यत्र यस्कादिभ्यो गोत्र इत्यतो गोत्र इत्यनुवर्त्तते । संघाङ्क्त्यत्रापि गोत्रचरणाद् वुञित्यतः । ऋषिप्रजनस्य लोके गोत्रमित्युच्यते इति। आङ्गिरस इत्येवेतिलेखनेन वतण्डाच्चेतिसूत्रे कपिबोधादितिसूत्रादाङ्गिरस इत्यनुवर्त्तते । तस्मिन्वाच्ये च गर्गादित्वाद्यञि सिद्धे इदन्नियमार्थमाङ्गिरसे यदि वतण्डशब्दात्प्रत्ययो भवति तदा यञेवेत्येवंविधो नियम इष्टस्तदभिप्रायेणाह । तत्र यञेति । विपरीतनियमं वारयति । आङ्गिरस एवेतीति । योगविभाग एवेति । अयमभावः । आङ्गिरसे वाच्ये शिवादित्वात्प्राप्तस्याणो बाधनार्थमिदं सूत्रम् । गर्गादिपाठादादौ यञ् प्राप्तस्तस्याधित्वा शिवादिपाठादण् प्राप्तस्तस्याधित्वा आङ्गिरसेऽनेन यञ् भवति । न च गर्गादित्वात्प्राप्तस्य यञो बाधक ऋषित्वादण् तद्बाधनार्थमेवेदमस्त्विति वाच्यम् । एवन्तर्हि सर्वत्र ऋष्यण यञो बाधापत्त्या गर्गादिपाठवैयर्थ्यं स्यादिति तत्र पाठ ऋष्यण् बाधकस्याप्यादित्यणा समावेशो न स्यादतः शिवादौ पाठादेवाणा समावेशो भवति । स च पाठोऽनाङ्गिरसे चरितार्थ इत्याङ्गिरसेऽनेन यञेव यथा स्यादित्येवमर्थो योगविभाग इत्याशयात् । अनन्तरस्येतिन्यायेति । तेन वातण्डोत्यत्राणो लुङ न भवति । तत्र । षड्विधायकसूत्रे । इह तु शिवाद्यण् भवतीति कथमत्र षडः प्राप्तिरिति भावः । तदप्रवृत्तेः । प्रतिपदोक्तपरिभाषाया अप्रवृत्तेः । परे त्विति । भाष्यानुसारिण । तत्रैव । गर्गादिगणे एव वतण्डाल्लुक् स्त्रियामिति पठनीयमित्यर्थः । अत्र भाष्ये तत्रैवोच्यते इ-

युक्तान्तेन गर्गादौ पाठस्यापूर्वत्वाभिप्रायेण प्रकृतसूत्रस्य विध्यर्थत्वाभिप्रायेण च शङ्क्येयम्। गर्गादावस्य पाठो नास्तीत्याशयः। एवं हि भाष्ये उक्तम्। किमर्थमिदमुच्यते न गर्गादिभ्य इत्येव सिद्धम्। लुक् स्त्रियामिति वक्ष्यामीति। यदि पुनस्त्वेवोच्येत। नैवं शक्यम्। आङ्गिरसग्रहणं हि विच्छिद्येतेति। इदञ्च सूत्रम्पृथक् कृतन्न तु कपीति सूत्र एव वतण्डशब्दः पठितस्तेनाङ्गिरस इत्यस्य प्रकृतसूत्रे सम्बन्धो नास्तीति च पूर्वपक्ष्याशयः। अत एवाह। अनाङ्गिरस इति। एवं हि आङ्गिरसग्रहणं विच्छिद्येतेत्याशयः। अत्रापि। वातण्ड इत्यत्रापि। तत्र। अनाङ्गिरसे। तदभावः। यञोऽभावः योगविभागसामर्थ्येन। गर्गादौ पाठे कर्त्तव्ये तत्र पाठमकृत्वा कपिबाधादितिसूत्रानन्तरम्पृथक् वतण्डाच्चेतिसूत्रपाठेन। अनाङ्गिरसेपीति। अपिना आङ्गिरसे। यदि गर्गादिपाठमकृत्वाऽत्र सूत्रम्पठ्यते तदा अनाङ्गिरसे न भवति। आङ्गिरस इतास्य सम्बन्धादिति भावः। यदि प्रामाणिक इति। यदि गर्गादावस्य पाठाभावस्तदा पूर्वोक्तरीत्या ज्ञापनासम्भवाच्छिवादावस्य पाठो न प्रामाणिक इति भावः। शिवादौ पाठकल्पनपक्षे आह। तदेति। इत्यनुरोधेनेति। एवं हि तत्रोक्तम्। अतः प्रभृति सामान्येन प्रत्यया विज्ञायन्ते। शिवादिभ्योऽपत्येऽण् प्रत्ययो भवति। यथायथमित्रादीनामपवादः। शैवः। प्रौष्ठ इति। तत्र भाष्य इति। यूनि लुक्सूत्रभाष्य इत्यर्थः। गोत्रत्वप्रयुक्त इति। गोत्रोच्चोष्ट इतिसूत्रविहित इत्यादिः। इत्युक्तमिति। एवञ्च गोत्रोच्चोष्ट इतिसूत्रस्य परत्र पाठात्तत्र प्रवराध्यायप्रसिद्धगोत्रग्रहणेन गार्ग्यायणस्य तथात्वात्तस्माद् वुञ् सिध्यतीति भावः। गाङ्क्यादि त्विति। स्त्रीभ्यो ढगिति सूत्रस्यापि गोत्राधिकारीयत्वाद्गोत्र एव प्रत्ययो न्याय्य इति भावः। आरोपेण। गोत्रत्वारोपेण। न चैवमिति। गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकाराश्रयणे। यूनि ढक् न स्यादिति। यूनीष्टो ढक् स इदानीमवन्मते न स्यात्। स्त्रीभ्यो ढगितिसूत्रेऽपि गोत्र इतास्य सम्बन्धादिति भावः। दात्तेयीति। दत्तायाः गोत्रापत्यं स्त्री दात्तेयीत्यर्थः। अगोत्रादितुक्तिसामर्थ्येनेति। अगोत्रादिति हि गोत्रप्रत्ययान्तादौपगवशब्दान्मा भूदित्येवमर्थम्। गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकारेऽस्य गोत्रापत्ये प्रत्ययविधायकतया एको गोत्र इतिनियमाद्गोत्रप्रत्ययान्तेभ्यः फिञ् नैव प्राप्नोतीति प्रकृत-

सूत्रेऽगोत्रादिति एवमेवानिञ इति च व्यर्थमिति भावः । यञिञोर्लुगित्यदिति । यथा भवद्भिर्गोत्राधिकारेऽपि सामर्थ्याद्यूनि तस्य प्रवृत्तिः स्वीक्रियते तद्वत् । वास्तवमिति । यस्य गोत्रे विधानन्तदन्तस्य वास्तवन्तत्त्वम् । नन्वेकार्थीभावाभ्युपगमान्न प्रत्ययमात्रस्य वास्तवन्तत्त्वमत आह । शास्त्रप्रक्रियेति । अत एव । गमकाभाव एव लौकिकग्रहणादेव । कण्वादिभ्यो गोत्र इति । कण्वशब्दस्य गर्गादौ पाठात्तेभ्यश्च शास्त्रीयगोत्र एव प्रत्ययविधानादिति भावः । अणिञोरित्यादौ चेति । तत्र ह्यनार्षयोरिति वासिष्ठौ वैश्वामित्रौत्रत्र ष्यङादेशवारणाय कृतं तयोश्च ऋष्यन्धकेतिसूत्रेण शास्त्रीयगोत्रेऽणिधानात्पर्युदासन्यायेन शास्त्रीयगोत्रग्रहणमभिप्रेतीति भावः । यच्चोक्तम्पूर्वं शास्त्रप्रक्रियेति तस्य फलान्तरमप्याह । राजन्येति । अत एव । कल्पितगोत्रार्थकत्वादेव । अत एव । गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकारादेव । फिञ् नेति । एको गोत्र इतिनियमात् । भाष्यस्वरसादिति । उपपादितमेतत् । गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इतिमते शङ्कते । न चेत्यादिना भाष्योक्तमिति । तत्र हि किमर्थं शिवादिभ्योऽण् विधीयते न यथाविहितमित्येवोच्येत शिवादिभ्यो यथाविहितमितीयल्लुचमाने इञ् प्रसज्येत । इञतो यथा विहितः । पुनर्वचनमिदानीञ्किमर्थं स्यात् । ये तस्य बाधकास्तद्बाधनार्थम् । स वै नास्ति यस्तम्बाधेत । तत्रारभ्यसामर्थ्याद्यो विहितो न च प्राप्नोति स भविष्यति कश्चासावणेवेत्युक्तम् । अण एव विधिरिति । भविष्यतीति शेषः । भाष्याशयात् । प्रश्नभाष्याशयात् । शिवादिभ्य इतिसूत्रस्थाण्ग्रहणस्य प्रयोजनमाह । अण्ग्रहणमिति । इञ एव विधानं स्यादिति । शिवादिभ्यो यथा विहितमिति व्याख्यान इति शेषः । अपत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धगोत्रग्रहणमिति सिद्धान्ते प्रसक्तामनुपपत्तिम्परिहर्तुं भाष्याशयमाह । यत्त्विति । इत्युक्तमिति । स तु न प्राप्नोतीति शेषः । प्रवराध्यायप्रसिद्धत्वाभावादिति भावः । स्वयन्तदुपपत्तिमाह । तदिति । विशेष्यप्रकृतिभ्य इतीति । स्त्रीलिङ्गनिर्देशात् । प्रकृतिः शब्दरूपा सा न नदी मानुषत आह । अर्थद्वारकमिति । वाचकतासम्बन्धेनेत्यर्थः । आरोप्येति । भेदप्रधानतदात्म्यस्वीकारे । इदञ्चिन्त्यमिति । स्त्रीलिङ्गनिर्देशमात्रेण धान्यमात्रेनेति यदुक्तन्तच्चिन्त्यमित्यर्थः । ननु धान्यमात्रप्रतिपादको माचीशब्द

श्चालुग्भविष्यतीत्येवमभिधानेन प्रकृतसूत्रे च गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्वयोरप्येकयोरलुक्। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्वयोरप्येकयोरलुग्वक्तव्यः। विदानामपत्यमाणवकः। वैदः। वैदौ। किमर्थमिदम् अचीत्येवालुक् सिद्धः। अचीत्युच्यते न चात्राजादिमध्यास्ति। प्रत्ययलक्षणेन। वर्णाश्रये नास्ति प्रत्ययलक्षणम्। यदि वा कानि चिद्वर्णाश्रयाणि प्रत्ययलक्षणेन भवन्ति तथेदमपि भविष्यतीतिप्रतिपादनेन च ध्वनितमित्यर्थः।प्रधानमेवेति।प्रधानीभूतार्थविशेषणतापन्नमेवेत्यर्थः। आङ्गः स्त्रिय इति। अङ्गानामपत्यानि स्त्रियः आङ्ग्य इत्यर्थ। याख्यानादिति।अङ्गानतिक्रान्त इति विग्रहेऽपि अत्यङ्ग इत्यत्र लुग्दर्शनमूलकादित्यर्थस्तदेवाह।तेनेति।रघुत्वे नैवततो बोध इति।रघुत्वारोपे चापत्यापत्यवद्भावसम्बन्धः प्रयोजक इति शेषः।पश्चादुत्पन्नस्यापीतो मनुष्यजातेरितिङीषो लुक् कुतो नेत्यत आह। अचेति। अतश्चेतिसूत्रे तद्राजस्येत्यनुवर्त्तते तच्चात इत्यस्य विशेषणन्न तु विशेष्यन्तथा सत्यदन्तस्य तद्राजस्येत्यर्थापत्तौ आङादीनामप्यनेन सूत्रेणैव लुक्सिद्धौ स्त्रियामवन्तीत्यस्य वैयर्थ्यापत्तेः। एवञ्च तद्राजशब्दाभिन्नस्यात इत्यर्थः। सम्पन्नस्याट्टशश्च ह्रस्व एवाकारः सम्भवतीति तपरकरणं व्यर्थमत आह। तपरकरणमिति। नियतमिति। गम्यमानभवतिक्रियाविशेषणमेतत्। एतेनानन्तरापत्येऽप्येवमेवेति सूचितम्। क्षत्रिया इति। एतेन यत्राच्यग्रहणस्योदाहरणन्तत्र जनपदक्षत्रियोभयवाचकत्वेन प्रकृतप्रकरणीयप्रत्ययोत्पत्तियोग्यताऽस्तीति ध्वनितम्। इतिमते इति। भाष्यसम्मते मत इत्यर्थः। यौधेयीत्यत्र यौधेयशब्दादुत्पन्नस्याञोऽपि प्राप्तस्य लुकोऽनेन निषेध इत्यस्य फलमुपपादयति। आदय इति। एतेन। यौधेयादिग्रहणेन ज्ञापकेन। ङीपीतीति। अञो लुकि कृतेऽपि जातिलक्षणङीषः प्राप्त्यभाव उक्तः। ङीबुदात्तः स्यादिति। कित इत्यनेन ढगन्तस्यान्तोदात्तत्वात्। आद्युदात्तत्वमिति। समुदायस्येति शेषः। अणिञोरितिसूत्रस्यापत्याधिकारबहिर्भूतत्वाल्लौकिकगोत्रग्रहणशङ्कानिवारणायाह। अत्रेति। तद्धीति। गोत्रावयवादितिसूत्रं हीत्यर्थः। तेन। अनन्तर इति भाष्येण। लौकिकगोत्रेति। प्रवराध्यायप्रसिद्धस्य गोत्रस्येत्यर्थः। पूर्वोक्तभाष्ये गोत्रादवयुत इत्यस्य पारिभाषिकगोत्रात्पृथग्भूत इत्यर्थस्तेन तस्मादट्टशे प्रत्यये

विध्यर्थमित्यर्थः । अन्तोदात्तत्वानापत्तेरिति । यद्यपि कुमुदगन्धियशब्दादणि तस्य प्रत्ययसंज्ञासन्नियोगशिष्टाद्युदात्तत्वे तदादेशस्य षङ्कोऽप्युदात्तत्वात्ततष्टापि कृते एकादेश उदात्तेनेत्युदात्तत्वं सिध्यति । तथापीञन्ते वाराह्यादावन्तोदात्तत्वानापत्तेरित्यर्थः । प्रत्ययः परश्चेतिसूत्रद्वयप्रकरणेऽस्य पाठेन प्रत्ययविधायकत्वमस्य सूत्रस्येतिशङ्कानिवारणायाह । अयञ्चादेश एवेति । औदमेघे यामिद्धे रिति । आपत्यस्य च तद्धितइतिसूत्रविहितो यलोपः प्रकृते न स्यात् स्वतन्त्रप्रत्ययपक्षे तस्यापत्यत्वाभावादिति भावः । ननु पुंवद्भावेन यकारनिवृत्तिर्भविष्यतीत्यत आह । अढ इति । नन्वस्य स्वतन्त्रप्रत्ययत्वेऽपि स्वार्थिकत्वेनापत्यार्थकत्वादापत्यस्येति यलोपः स्यादेवेत्यत आह । स्त्रियामिति विशिष्यावितिं । अत्र विशिष्योक्त्या इति कथनेन प्रकृतिवाच्यस्त्रीत्वद्योतकत्वमेव टाबादीनामिति सूचितम् । अनिर्दिष्टार्था इतिन्यायेनात्यन्तस्वार्थिकानान्तु सकलस्वप्रकृत्यर्थकता । अत एव यौधेयी इत्यत्रापत्यार्थक ढगन्तयौधेयशब्दात्यर्ञादीतिसूत्रेणाञि तदन्तस्य गोत्रत्वमस्त्येवाअत एवाह । गोत्राणन्तेति । यञ्प्रत्ययस्येति । अभिजिद्विदभृदितिसूत्रविहितस्येत्यादिः । आदेशत्वपक्षे येच तद्धितइतिसूत्रस्थभाष्यविरोधशङ्कानिवारणाय शङ्कते । नन्वादेशत्व इति । नन्वस्तु शीर्षन्नादेशस्तथापि नस्तद्धित इति टिलोपो भविष्यत्याह तीत्यत । टिलोप इति । एकदेशयुक्तित्वादिति । अभावकर्मणोरिति पर्युदासेनादेशत्वानाक्रान्तस्य यादितद्धितस्य ग्रहणेन टिलोपापवादप्रकृतिभावाप्राप्त्या दृष्टरूपसिद्धौ पर्युदासानाश्रयणेनादेशपक्षे दूषणाभिधानमनुचितमित्येकदेशयुक्तित्वमिति भावः । किञ्च प्रकृतसूत्रस्थसिद्धान्तभाष्यविरोधादप्येकदेशयुक्तित्वमित्याह । अत एवेति । एकदेशयुक्तित्वादेव । उक्तप्रयोगयोः । हास्तिशीर्ष्या पैलुशीर्ष्या इतिप्रयोगयोः । अनभिधानमेवेति । एतदनभिधानाभिधानं पर्युदासानाश्रयणेन । तयोः प्रयोगयोः प्रामाणिकत्वे उपायान्तरमाह । यद्वेति । गोत्रावयवादितिसूत्रघटकोऽवयवशब्दो लोकप्रसिद्धावयवार्थापेक्षया विलक्षण इत्याशयेनाह । अवयवशब्द इति । अवन्त इति । अवेत्युपसर्गपूर्वकयुधातोरप्रत्ययान्तः । अप्रधानवाचीति । अप्रधानस्य लक्षणया प्रकृते बोधकः । तेन न नीलघटादिशब्दजन्यशाब्दबोधे नीलपदार्थेऽवयवत्वव्यवहारापत्तिः । गोत्रावयवा-

देत्यत्र कर्मधारयात्पक्षे । सौत्रत्वादवयवशब्दस्य परनिपातः। सूत्रस्य प्रयोजनान्तरमाह । किञ्चेति । अवयुतमित्यस्य व्याख्या पृथग्भूतमिति। अनयोरुभयोरपीति।भारद्वाजीयभाष्ये उदाहरणत्वेन प्रदर्शितयोर्दैवदत्तायाङ्गदस्येत्यनयोः। अपिना पूर्वोक्तानाम्पुणिकादीनाङ्ग्रहणम्। न चाणिञोरितिसूत्रव्याख्यानावसरे गोत्रशब्देन पारिभाषिकस्य गोत्रस्य ग्रहणमित्यर्थे गोत्रावयवादितिसूत्रारम्भस्य साधकत्वमुक्तन्तत्कथमुपपद्यतेऽगुरूपोत्तमार्थत्वादस्येति वाच्यम् । भारद्वाजीयभाष्यसम्मतप्रयोगसाधकस्य तस्यारम्भादित्यर्थात् । सूत्रे इति । सूतशब्दो भोजशब्दश्च षष्ठ्यन्तप्रत्ययमाप्नोतीत्यनयोरर्थः । युवत्यामिति क्षत्रिय इति चोपाधिः पशाविवत्तदाह।सूतशब्दादिति ।स्त्रियामस्य विधानात्क्षत्रियशब्दः क्षत्रियापरः । जातौ सूतीति । युवत्वजातिविशिष्टे रूढस्य सूतीतिरूपमित्यर्थः । क्रियाशब्दस्य तु सूता इत्येव भवतीति बोध्यम् । दैवयज्ञीत्यादिनिर्देशादपत्यार्थकप्रत्ययान्तानामेतस्मिन् सूत्रे ग्रहणमित्याशयेनाह। अनन्तरापत्यार्थमित्यर्थ इति । उभयत्र विभाषेयम् । गोत्रे प्राप्ते अनन्तरापत्ये आरम्भात् । इदम् । उभयत्र विभाषात्वकथनम् । अन्यथा । तस्यान्यविषकत्वस्यापि स्वीकारे ॥

॥ इत्यपत्याधिकारविवरणम् ॥

करणे घञिति । रञ्जेर्धातोरिति शेषः । घञि च भावकरणयोरिति नकारलोपः । रञ्जनकर्म इति । रञ्जनमत्रान्यदीयवर्णप्रकारकप्रतीतिविषयत्वम् । एवञ्च तेन रक्तत्वञ्च तत्सम्बन्धप्रयोज्यतदीयवर्णप्रकारकप्रतीतिविशेष्यत्वमिति बोध्यम् । तत्सम्बन्धस्य पृथगग्रहणप्रयोजकः सम्बन्धविशेषः । तेन जपाकुसुमसम्बन्धाद्रक्तः स्फटिक इतिप्रतीतावपि न जपाकुसुममिति प्रयोगापत्तिः । रोचनाशब्देनेति । अन्यग्रहणमिति । अश्विन्यादिशब्देन तत्तन्नक्षत्रयुक्तचन्द्रवाचकस्य ग्रहणमित्यर्थः । स च । केवलनक्षत्रवाचकश्च । एवमिति । उभयवाचक इत्यर्थः । ननु यदि सूत्रघटको नक्षत्रशब्दस्तत्तन्नक्षत्रयुक्तचन्द्रलाक्षणिकस्तदा तत्तन्नक्षत्रयुक्तचन्द्रबोधकादश्विनीयुक्तचन्द्रशब्दादपि प्रत्ययः प्राप्नोतीत्यत आह । स च नक्षत्रवाचकादेवेति । अश्विन्यादिशब्देभ्य एवेत्यर्थः । न तु नक्षत्रवाचकनक्षत्रशब्दादपि । अत्रापयुक्त एव हेतुर्बोध्यः । ननु प्रकृते पुष्यशब्दः पुष्य-

नक्षत्रयुक्तशशियुक्तषष्ट्यादिघटीपरिच्छिन्नकालपरस्यैव चाद्यभवत्वेन सम्भवत्यभेदे आधाराधेयभावाभावादत आह। अद्यतनमित्यादि । ननु लुबविशेष इतिसूत्रस्य व्याख्यावसरे षष्टिदण्डात्मकेति यद्व्याख्यातन्तस्य कथं लाभ इति चेदित्थम्। पूर्वसूत्रमनुवर्त्तते । नक्षत्रशब्दश्च तत्तन्नक्षत्रयुक्तशशिबोधक इति तत्तन्नक्षत्रयुक्तशशियुक्तकाल इत्यर्थे यः प्रत्ययस्तस्य लुप् स्यादविशेष इत्यस्य प्रत्यासत्त्या तत्तन्नक्षत्रेण शशिनो यावत्कालावच्छेदेन सम्बन्धस्तद्व्याप्यस्य विशेषस्य विवक्षा न चेदितिसूत्रार्थात्।एतेनाद्य पुष्य इत्युक्ते ह्यः श्वो वा नेति विशेषो गम्यत एवेत्यविशेष इत्यनुपपन्नमित्यपास्तम्।तद्व्याप्यत्वञ्च तत्परिच्छेदकसूर्यर्क्षसङ्ख्याव्यूनर्क्षसङ्ख्यावत्क्रियापरिच्छिन्नत्वमेव।एतद्विषयेऽपीति । संज्ञाविषयेऽपीत्यर्थः । इन्द्वाच्छः । अत्र नक्षत्रेणेत्यनुवर्त्तते तच्च षष्ठ्या विपरिणम्यते । एवञ्च नक्षत्राणां यो इन्द्वस्तस्माद् युक्त इत्यर्थे प्रत्ययो भवति । योयुक्तः स कालश्चेदिति सूत्रार्थः।वार्त्तिकमितिःदृष्टं साम्नकलेर्ढक्दृष्टं साम्नेत्यत्र कलेर्ढग्वक्तव्य इति वार्त्तिकात्। ननु क्रमविषयसाम्नो नित्यत्वात्कलिना दृष्टमित्यनुपपन्नमिति चेन्न। यस्य साम्नो विशिष्टकार्यविषयो विनियोगो ज्ञानातिशयसम्पत्त्या कलिनाऽज्ञायि तत्तेन दृष्टमित्युच्यते। परिवृतो रथः। तेनेति वर्त्तत इति। तृतीयान्तात्परिवृत इत्यर्थेऽण् प्रत्ययो भवति। यः परिवृतः स रथश्चेत्। परिवृत इत्यस्य समन्ताद्युक्त इत्यर्थो न तु मूलोक्त इत्याह। समन्तादिति। अपाठ इति। अप्रशस्तः पाठ इत्यर्थः। मनोरमाविरोधादिति। तत्र तदेकान्तग्रहणं कर्त्तव्यमित्यस्य पुत्रैः पौत्रैः परिवृत इत्यत्र प्रत्ययाप्रवृत्तिः प्रयोजनत्वेनोक्ता। न हि पुत्रपौत्रैः समन्ताद्दृष्टनं सम्भवति। तदेकान्तेत्यत्र तच्छब्देन परिवृतशब्दार्थघटको विशेष्यभूतोऽर्थः परामृश्यते तस्यैकान्तस्तदेकान्तः। येन परिवृतः स तदेकान्तोऽवयवश्चेद्भवतीति विवक्षितम्।अवयवत्वं च अवयववत्तदभेदेन प्रतीयमानत्वम्। खरे विशेष इति। वैयवैयाघ्रेति द्वावप्यञन्तत्वादाद्युदात्तौ ताभ्यामञि हेयः। वैयाघ्रः। एतावाद्युदात्तावेव । सूत्राभावे त्वणन्तत्वादन्तोदात्तत्वं स्यात्। तत्र इति। तस्मिन् प्रवृत्तिनिमित्ते बोधनीय इति शेषः। तच्च। अपूर्वत्ववचनकरणीभूतप्रवृत्तिनिमित्तञ्च। प्रकृत्यर्थगतम्। कुमारशब्दार्थगतम्। रूढेरिति। अत एवापूर्वः पतिर्यस्या इतिसमानाधिकरणपदको

बहुव्रीहिसमासः । आद्ये । द्वितीयान्ताच्चत्यय इतिपक्षे । उपयन्तरि । एवञ्चापूर्वः पतिर्यस्यास्तासादृशी या कुमारी तामुपपन्नः कौमारः पतिः । द्वितीये । प्रथमान्ताच्चत्ययस्वीकारे । उपयमनविशिष्टे स्वार्थे । एतच्च निपातनसामर्थ्यालब्धम् । उपयमनविशिष्ट इतिकथनेन विनाहाच्चाङ् न तथा प्रत्ययः । एवञ्चापूर्वपतिसम्बन्धः स्त्रीनिष्ठः प्रकृते कुमारशब्दस्य प्रवृत्तिनिमित्तमित्यर्थादुक्तं भवति । अपूर्वत्वस्य पतिनिष्ठस्य च प्रतीतिरनेन प्रवृत्तिनिमित्तेन स्वघटकतया कारिता भवति । न च कौमारापूर्ववचन इत्युभयतः स्त्रिया अपूर्वत्व इति वक्तव्यमिति वार्त्तिककृतोक्तम् । एतेन स्त्रीनिष्ठापूर्वत्वे निपातनमिति लभ्यते एवञ्चापूर्वः पतिर्यस्या इत्यर्थे सामासानुपपत्तिरिति वाच्यम् । एतद्वार्त्तिकव्याख्यानावसरेऽपूर्वपतिङ्कुमारीमुपपन्नः कौमारो भर्त्ता । कुमारी अपूर्वपतिः पतिमुपपन्ना कौमारी भार्येति । भाष्यकृता प्रदर्शनेन वार्त्तिकस्य स्त्रिया इत्यनन्तरम्पाणिग्रहणस्येति शेषपूरणेन व्याख्यानस्योचितत्वात् । द्वितीयमिति । कौमारी भार्येति रूपम् । स्त्र्यवधिरिति । एतच्चार्थादुपपन्नभवति । शरावस्याधिकरणत्वात् । एवञ्च शराव ओदन इति शब्दात्किञ्चिदपादानकोद्देश्योत्तरकालिकशरावाधिकरणकनिधानकर्म ओदन इत्याकारकः शाब्दबोधः । उपयोगफला क्रियेति । उपयोगः फलं यस्या इत्यर्थः । उसो लाक्षणिकत्वमुपपादयति । वसेः क्विपीति । वृत्तिः शरणमिति । भाष्येऽदर्शनात् । सावनातिरिक्तेति । सावने तथा व्यवहाराभावात् । एतेन प्रकृतसूत्रविहितप्रत्ययान्तस्य समुदायस्य रूढिरपीति लब्धम् । रूढ्यर्थतावच्छेदकञ्च मासनिष्ठं शुक्लप्रतिपदादिदर्शान्ततिथिसमुदायत्वम् । कृष्णप्रतिपदादिपौर्णमास्यन्ततिथिसमुदायत्वं वाऽएवञ्च पौषादिपदं योगरूढम्न च सौरेऽपि पौषव्यवहारात्पौषपदङ्केवलरूढमेवास्तु तस्मिन् रूढ्यर्थतावच्छेदकञ्च धनुस्थरविविशिष्टत्वमेवास्त्विति वाच्यम् तथा सति सास्मिन् पौर्णमासीतिसूत्रेण योगप्रदर्शनवैयर्थ्यापत्तेः न च सौरेऽपि धनुस्थरविविशिष्टपौर्णमासीघटित एव तथा व्यवहार इति वाच्यम्यस्मिन्वर्षे पौषशुक्लपक्षीयपौर्णमासीप्राक्तिथावेव मकरसंक्रातिस्तस्मिन्सौरे पौषव्यवहाराभावप्रसङ्गात् । एव योगार्थाभिन्न एव शक्तिः सौरे तु धनुस्थरव्यारब्धे तथा व्यवहारः स्थलपद्मे पद्मव्यवहारवद्गौणः । पुष्यपदञ्च न केवलम्पुष्यनक्षत्र-

मात्रबोधकमण्प्रत्ययप्रकृतिबोधकम्। पौषी या पौर्णमासी तस्यान्वियमेन पुष्यनक्षत्रयुक्तचन्द्रमसा योगस्य नियमाभावात् किन्तु पुनर्वसुपुष्यान्यतरबोधकम्। अन्त्योपान्त्यौ चिभौ ज्ञेयौ फाल्गुनस्य त्रिभो मतः। शेषा मासा द्विभाज्ञेयाः क्षत्तिकादिव्यवस्थयेति वचनात्। न च पौषादिपदस्यतुस्थरव्यारब्धे शक्लप्रौषीपौर्णमासीघटिते गौणमित्थे वास्त्विति वाच्यम्। सा वैशाखस्यामावस्या या रोहिण्या सम्पद्यते इति श्रुत्या चान्द्र एव शक्तिकल्पनात्। फल्गुनीनक्षत्रेण युक्ता फाल्गुनीत्यत्र फल्गुनीपदस्य पूर्वफाल्गुनी उत्तरफाल्गुनी हस्त इत्येतत्त्रितयपरतया यस्मिन्वर्षे हस्तनक्षत्रयुक्तचन्द्रमसा युक्ता फाल्गुनस्य पौर्णमासी तस्मिन्वर्षे चैत्राश्विचाखात्यन्यतरयोगसम्भवेन तदुत्तरं वैशाखामावास्यायां रोहिणीयोगस्य सम्भवात्यदि मेषस्थरविविशिष्टमासत्वं वैशाखत्वन्तदा वैशाखामावास्यायां सूर्यस्य मेषस्थत्वे चन्द्रमसश्च रोहिणीयोगोऽमावास्यैव न स्यात्। अमा सह वसतोऽस्यान्द्रार्काविति व्युत्पत्तेः प्रसिद्धत्वात्। सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्येति गोभिलवचनाच्चामावास्यान्ते चन्द्रस्य सूर्यराशाववस्थान नियमात्सूर्यस्यापि वृषस्थत्वमुपपादनीयमतश्चान्द्रे वैशाखे वैशाखपदस्य शक्तिरिति। मेषादिस्थे सवितरि यो मासः प्रपूर्यते चान्द्रः। चैत्राद्यः स विज्ञेयः पूर्त्तिर्द्वित्वेऽधिमासोऽन्य इतिवचनाच्छुक्लप्रतिपदादिचान्द्रामावास्यायां वृषराशौ सूर्यावस्थानस्य तस्याश्च वैशाखस्य समाप्तेश्च सम्भव इति द्रष्टव्यम्। के चित्तु पुष्येण युक्ता पौर्णमासी पौषीत्यत्र पुष्यनक्षत्रस्य योग एव न विवक्षितः। किन्तु पुष्ययोगयोग्यतैव। तद्योगयोग्यत्वञ्च तद्योगयोग्यतावच्छेदकधर्मवत्त्वम्। योग्यतावच्छेदको धर्मश्च धनुस्थरव्यारब्धपक्षीयत्वम्। एवञ्च पौषीपदस्य धनुस्थरव्यारब्धपौर्णमास्यां शक्तौ पौषपदमपि धनुस्थरव्यारब्धपौर्णमासीघटितत्वावच्छिन्ने शक्तमिति पौषपदस्य योगरूढ़त्वमव्याहतम्। एवमेव सर्वत्र बोध्यमिति वदन्ति। साक्षायानुजावरेत्यादीति। साक्षायानुजावरानुषूकचातुष्प्राकाश्यराच्चोष्णवैयातवैक्षतवारिवस्कताग्रायणाग्रहायणसान्तानानि इति। साऽस्य देवता। प्रथमान्ताद्देवतोपाधिकात् षष्ठ्यर्थेऽणादयः स्युः। सम्बन्धित्वे नेत्यादि। एतेन सम्बन्धित्वमेव प्रत्ययार्थतावच्छेदकम्। प्रत्ययार्थश्च क्व चित्प्रदेयम्। क्व चिन्मन्त्र इत्युक्तभवति। वृत्तिस्वभावलब्धमिति। तादृशेऽर्थे

एव प्रकृतसूत्रे देवतापदोपादानेन प्रत्ययविधानाद्देवतात्वेन देवताऽपि प्रतीयते। तथा च ऐन्द्रन्दधीत्यादौ प्रकृत्यर्थाभिन्नदेवतासम्बन्धित्वावच्छिन्ने प्रकृतिप्रत्ययसमुदायस्य शक्तिरिति भावः। ऐन्द्रन्दधीत्यादौ हविषि देवतासम्बन्धित्वञ्च देवतोद्देश्यकत्यागकर्मत्वम्। मन्त्रे तद्देवताकत्वरूपसम्बन्धित्वञ्च तदुद्देश्यकत्यागकरणत्वेन श्रुतिबोधितत्वम्। न च मन्त्रं विनापि हविःप्रक्षेपादिरूपक्रियाजननाक्षयन्मन्त्रस्य करणत्वमिति वाच्यम्। करणत्वस्य त्यागाङ्गव्यापारकत्वरूपत्वात्। व्यापारश्चोच्चारणरूपः। मूले द्रव्ये उद्देश्यविशेष इति। अत्र द्रव्यपदोत्तरसप्तम्यर्थौ विषयिता। उद्देश्यविशेष इत्यस्य स्वत्वप्रकारकेच्छोद्देश्य इत्यर्थः। एवञ्च त्यज्यमानद्रव्यविषयित्वावच्छिन्नस्वत्वप्रकारितावदिच्छोद्देश्यो देवतेत्यर्थः। लाघवादाह। मन्त्रस्तुत्येति। मन्त्रेण स्तुत्येत्यर्थः। ऐश्वर्यकर्मण इति। ऐश्वर्यार्थकस्येत्यर्थः। ऐश्वर्यञ्च त्यज्यमानद्रव्यनिरूपितम्। आग्नेयशब्दस्य ब्राह्मणपरत्वमनुपपन्नमित्याशङ्कते। अग्नयुद्देशेनेति। व्यस्तस्यैव देवतात्वेऽपीति। प्रत्येकञ्चतुर्थीश्रवणेन विशेषवाचकदेवशब्दप्रकृतिकविभक्तिसजातीयविभक्तिकविश्वशब्दघटितस्य देवतावाचकत्वेऽपीत्यर्थः। वैश्वदेव्यामिक्षेति। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्रेत्यर्थः। ब्रह्मणि रूढस्येति। को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च। पावके च मयूरे च सुखशीर्षजलेषु कमितिकोशाद्ब्रह्मण्ययं रूढः। ननु केवलः कशब्दो यदि ब्रह्मणि वर्त्तते तदा कस्मा अनुब्रूहीति प्रैषविरोध इत्यत आह। कस्मा इति। अत्र। कस्येदितिसूत्रे। तन्त्रेण। विभक्त्यन्ततन्त्रेण। शब्दपरत्वेऽपि। किमशब्दानुकरणत्वेऽपीत्यर्थः। किंशब्दस्य प्रजापतिवाचकत्वे साधकमाह। अत एव। किंशब्दस्य प्रजापतिवाचकत्वादेव। अत्रैव साधकान्तरमाह। विष्णुसहस्रनामसु चेति। संज्ञात्वादिति। ब्रह्मसंज्ञात्वादित्यर्थः। अत एव। आधुनिकसंज्ञाया एव प्रतिषेधादेव। कस्येदितिसूत्रे तन्त्रेणोभयोर्निर्देशे भाष्यं साधकमाह। तदुक्तमिति। तदुत्तरमिति। अथ किमः। अथापि न किमः। उभयथापि कस्मा अनुब्रूहीति भवितव्यम्। सर्वस्य हि सर्वनामसंज्ञा क्रियते सर्वश्च प्रजापतिः। प्रजापतिश्च क इति। तदेतदाचष्टे। कशब्दस्येति। अपर आह। यद्येव किमः। अथापि न किमः। उभयथा कायानुब्रूहीति भवितव्यमिति। अत्र

भवितव्यमित्यनेन स्वस्य तद्विषये सम्मत्वभावः सूचितः। तथा चोभयथेत्युक्तिरेकदेशिनः। तद्वयेति। प्रथमोक्तोभयथेत्यादिद्वयमित्यर्थः। भाष्याद्यसम्मतत्वात्। पाठेन सर्वनामसंज्ञा क्रियते। इत्यादिविरोधात्। अत एव विश्वेषान्देवानामिति प्रयोगविरोधो नेति बोध्यम्। अन्त्य इति। त्यदादेरेव किमः कादेशविधानादिति भावः। ननु परत्वादादिवृद्धिरित्यसङ्गतम्। इकारविधानसामर्थ्यनैव लोपो न भविष्यतीत्यत आह। उत्कृष्टत्वादिति। तत्वञ्च। उत्कृष्टत्वञ्च। आयमिति। श्रीर्देवताऽस्य आयम्। बोधः। आदिवृद्ध्या लोपबाधः। वारिस्वाहुं वा आख्यत् अवचारत् अबबाहदित्यादौ निषेधार्थमग्लोपीत्यत्र प्रत्याहारग्रहणन्तच्च वृद्ध्यपेक्षया लोपस्य बलवत्त्व एव सङ्गच्छत इत्याशयेनाह। के चित्त्विति। अत एव। सामान्यापेक्षनियमस्वीकारादेव। तदप्राप्तिः। वृद्ध्या बाधाल्लोपाप्राप्तिः। न सा। न पूर्वमत्र वृद्धेः प्राप्तिः। ननु लोपस्य बलवत्त्वे आयमितिरूपासिद्धिरत आह। आयमितीति। अत एव। लोपस्य बलवत्त्वादेव। अन्यथा। लोपस्य बलवत्त्वाभावे। तत्पक्षे। वृद्धेर्बलवत्त्वपक्षे। मस्येत्वे। कस्येदितिसूत्रेणालोन्त्यपरिभाषया मस्येत्वे। लोपसवर्णदीर्घौ बाधित्वा। परत्वाल्लोपं वार्णादाङ्गं बलीय इति सवर्णदीर्घबाधित्वेत्यर्थः। तदसिद्धिः। कायमितिरूपासिद्धिः। मम तु। वृद्धेर्लोपस्य बलवत्त्ववादिनो मम त्वित्यर्थः। एतेन। सामान्यापेक्षज्ञापकेन वृद्धेर्लोपस्य बलवत्त्वस्वीकारेण। शौवं मासम्। शुनो विकारः अवयवो वा। प्राणिरजतादिभ्योऽञित्यञ्। न प्राप्नोतीति। वृद्धियोग्यस्याभावेन निषेधाप्राप्त्या तत्सन्नियोगशिष्ट ऐजागमो न प्राप्नोतीत्यर्थः। घ्न इति। जानातीति घ्नः। इगुपधज्ञाप्रीकिर इति कः। परिहारदिगेषेति। परिहारप्रदर्शनमार्गसूचनन्त्वत्र निर्भर इति भावः। अत्र टिलोपं बाधित्वा वृद्धिः प्राप्तेत्युपादानाद्वृद्धेर्बलवत्त्वन्तेन नाश्रितम्। तदपास्तम्। पूर्वोक्तज्ञापकेन वृद्ध्यपेक्षया लोपस्यैव बलवत्त्वात्। दोषाभावपरभाष्यमिति। अत्र नुगागमात्पूर्वमपि यस्येतिलोपस्य वृद्धिबाधकस्य प्राप्तेरिति यं विधिमतीत्यन्यायसञ्चारो नास्तीति भावः। एतस्यैकदेश्युक्तित्वञ्च वृद्धेर्लोपबाधकत्वाभिप्रायेण तेनोक्तम्। तदेव चिन्त्यमिति। पूर्वोक्तरीत्या लोपस्य बलवत्त्वादिति भावः। अत्र कैयटानुयायिनः। आयमितिपूर्वोक्तरीत्या वृद्धेर्लोपबाधकत्वे नोचितमेव। न च स्त्रीपुंसा-

भ्यामितिसूत्रस्थभाष्यविरोधः। तस्य दोषान्तरोपलक्षणत्वात्। किमो मस्येच्वेऽन्त्यस्य हुडिम्बाधित्वा आदिहुड्या भवितव्यम्। तस्या अन्त्योपधाहुडिबाधकत्वात्। अन्यथा गार्ग्य इत्यत्रापि यस्येतिलोपम्बाधित्वाऽजन्तलक्षणहुड्यापत्तेः। किमः कादेशो निपात्यत इतिकैयटोक्तत्वाच्च। वार्णादाङ्ङ्बलीय इतिवचनन्तु समाननिमित्तकत्वाभावेन व्याश्रयत्वान्न प्रवर्त्तत इति। ननु यदि प्रत्ययसन्नियोगेनोक्तरूपनिपातनन्तदाऽणेनप्त्रे स्वाहेत्यत्र प्रत्ययसन्नियोगाभावादुक्तरूपासिद्धिरत आह। अपोनप्त्र इति। ननु पित्रीयतीत्यादौ रिङादेशविधानेऽप्यङ्ङसावर्धधातुकयोरिति दीर्घे सिद्धे रीङि दीर्घोच्चारणं व्यर्थमत आह। अङ्ङवृत्ते ति। अनिर्दिश्यमानेति। अङ्ङे त्यर्थः। सर्वादेशत्वे ति। अनेकाल्त्वात्। भ्रमेति। एतेन ऋदन्तस्याङ्ङ्स्थे त्यर्थेऽपि निर्दिश्यमानपरिभाषाऽनेकाल्परिभाषयोरेकवाक्यतया निर्दिश्यमानस्य सर्वस्थे त्यर्थाश्रयते च ऋत इत्यनेन ऋवर्णस्थैव निर्दिश्यमानतया तस्यैवादेशे सिद्धे ङित्त्वं स्पष्टार्थमेवेति सूचितम्। समुदाय इति। अत्रारुचिः पूर्वोक्तैव। महाराजग्रोष्ठपदादित्यत्र निर्दिष्टमहाराजेतिपदं व्याचष्टे। महाराज इति। तादूप्यानतिदेशादिति तादूप्यस्य वर्णमात्रवृत्तिधर्मस्यातिदेशाभावात्। उत्तरपदादित्वविशिष्टाच्चत्वस्य वर्णमात्रवृत्तित्वादिति भावः। एतेन। पूर्वोक्तरीत्या इन्द्रशब्दस्यानचकत्वेनाननु मरुच्छब्देन्द्रशब्दयोः समस्त एव सूत्रसार्थक्यभविष्यतीत्यत आह। मरुदादिभिरिति। न च सौमेन्द्र इत्यत्राप्यजाद्यदन्तत्वादिन्द्रशब्दस्यैव पूर्वनिपातः स्यादिति वाच्यम्। अत्र सोम शब्दस्य महेश्वरवाचकतयाऽभ्यर्हितत्वेति पूर्वनिपातसम्भवात्। अनेनैव। नेन्द्रस्थे त्यनेनैव। अन्तादिवच्चेति सूत्रे एवमुक्ता गुडोदकमित्यत्रोदके केवल इतिपूर्वपदान्तोदात्तत्वस्य पूर्वभ्रवृत्तौ तत एकादेश इति हि फलं स्पष्टम्। ईट्टशे एवार्थ इति। पूर्णो मासोऽस्यामित्यर्थ एवास्य पौर्णमासीशब्दस्य साधुत्वमित्यर्थः। मातरि षिच्चेति वार्त्तिकम्। प्रयोजनान्तरेति। यथाऽविदूसशब्दाख्यानार्थे णिचि टिलोपे क्विपि पदान्ते विसर्गसिद्धिः अन्यथा षकारस्य स्थाने रुत्वन्न स्यादिति यत्केन चिदुक्तम् तन्निरस्तम्। यत्तु सोढादीनामादेशत्वान्न षत्वप्राप्तिरिति तन्नेत्याह। दुग्ध इतीत्यादि। यौवनमितीति। युवतीनां समूह इत्यर्थे युवतिशब्दादणि भस्याढ इति पुंवद्भावे टिलोपे प्राप्ते प्रकृति-

भावः । अनुदात्तादिरयमिति । तथा च यौवतमित्यत्रानुदात्तादेरञित्यञ् । सोऽनुनासिक इति । यणनुनासिक इत्यर्थः । वार्त्तिकस्याहन्शब्दस्य कालवाचकत्वभ्रमवारणायाह । क्रतावितिं । ननु महावाते वातयेतिप्रयोग इष्यते स च सम्मूहासम्भवान्नोपपद्यत इत्यत आह । दिग्भेदेनेति । यथासंख्यार्थ इति । योगविभागाभावें यप्रत्ययस्य समुच्चयार्थश्चकारस्याप्युपादेयतया प्रत्ययानाञ्चतुष्ट्वाद्यथासंख्यन्न स्यात् । तस्य निवास इतिसूत्रेण विषयो देश इत्यस्य गतार्थतान्निराचष्टे । विषयः स्वत्ववानिति । प्रत्ययोपाधिरिति । प्रत्ययार्थविशेषणम् । ननु यं विषयार्थकप्रत्ययान्त एव देशाभिधायको भविष्यतीति देशपदमनर्थकमत आह । क्व चिद्देशेति । एवञ्च । सोऽस्येत्यनुवृत्तौ च । प्रथमान्तेभ्यः प्रयोजनयोर्दृष्टवाचकेभ्योऽस्य सङ्ग्रामस्येत्यर्थेऽण् प्रत्ययो भवतीत्यर्थः । ननु घञन्तस्य पुल्लिङ्गत्वात्ता इति स्त्रीलिङ्गनिर्देशोऽनुपपन्न इत्यत आह । सेति स्त्रीलिङ्गमिति । तत्फलमिति । कृद्ग्रहणपरिभाषाप्रवृत्तिफलमित्यर्थः । ननु गतिकारकसमभिव्याहृतकृदन्तं यत्र तत्र तद्विशिष्टस्यैव कृद्ग्रहणेन ग्रहणमितिपरिभाषार्थाद्घञन्तादिधीयमानः प्रत्ययोऽत्र श्येनपातशब्दाद्भविष्यतीति पाते जे इत्यनुपपन्नमत आह मूले । अप्रत्ययपरे पातशब्द इति । एवञ्च पातशब्दस्य अप्रत्ययपरत्वमात्रमपेक्षितन्न तु अप्रत्ययविधानावधित्वमिति भावः । घञन्तसामान्यात्प्रत्ययमाशङ्क्याह । इतिरिति । कर्तृकर्मणोरितिसूत्रस्थभाष्येति । तत्र हि कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणमनर्थकम् । किङ्कारणम् । लप्रतिषेधात् । प्रतिषिध्यतेऽत्र षष्ठी लप्रयोगे नेति । तस्य कर्मकर्त्रर्थन्तर्हि कृद्ग्रहणं कर्त्तव्यम् । कृतो ये कर्तृकर्मणी तत्र यथा स्यात् । अन्यस्य ये कर्तृकर्मणी तत्र मा भूत् । नैतदस्ति प्रयोजनम् । धातोर्हि इये प्रत्यया विधीयन्ते तिङः कृतश्च । तत्र कृत्प्रयोग इष्यते । तिङ्प्रयोगे प्रतिषिध्यते इत्युक्तम् । अत्र भाष्ये नैतदस्तीत्यादिना यथोक्तप्रयोजनन्न कृद्ग्रहणस्येति दर्शयताप्रकृतसूत्रे कर्तृकर्मपदोपादानेन स्ववाच्यतावच्छेदककर्तृत्वकर्मत्वे उपस्थिते तयोश्च ससम्बन्धिकत्वान्निरूपकाकाङ्क्षत्वात्ताभ्याङ् क्रिया आक्षिप्यते सा चार्थरूपा न प्रयुज्यत इति तद्वाचकशब्दाश्रिये सति क्रियावाचकशब्दप्रयोगे सति ये तद्वाच्यक्रियानिरूपितकर्तृत्वकर्मत्वे तद्विशिष्टवाचकात् षष्ठीति सूत्रार्थः कृद्ग्रहणाभावेऽपि भवि-

यतीति दर्शयति। धातोर्हि इय इत्यादिना। एवञ्च क्रियावाचकत्वमुक्तद्वय-प्रत्ययान्तयोरिति तयोरेवाक्षेपो भविष्यतीति भावः। न च क्रियावाचकाक्षेपेऽपि धातोरेवाक्षेप इत्यत्र किम्प्रमाणम्। तेन दीव्यति खनति जयतीति सूत्रविहिततद्धितानामपि क्रियोपसर्जनद्रव्यवाचकत्वेन क्रियावाचकत्वादिति वाच्यम्। एतन्नाप्यप्रामाण्येन कारकान्वययोग्यक्रिया धातुवाच्यैव न तद्धितादिवाच्येति निर्णयेनादोषात्। अत एव देवदत्तेन शत्योऽध्वः। आभ्रिको भूमिमित्यादयो न प्रयोगाः। अत एव हिरुगादियोगे न द्वितीया इति। न च विग्रहघटकादधीत इत्यादिशब्दादेककर्तृकमध्ययनमिति बोधः। व्याकरणशब्दात्तु व्याकरणकर्मकाध्ययनकर्त्तेति बोध इतिवृत्तिविग्रहयोः समानार्थत्वनियमानुपपत्तिरिति वाच्यम्। आख्यातन्तद्धितकृतोरितिसमानार्थत्वाव्याघातात्। तदेतदाह। अधीत इत्यादि। उभयोः। अधीतेवेदेत्यनयोः। प्रकृतसूत्रभाष्ये उक्थादीत्युच्यते कान्युक्थानि। सामानि। यद्येवं सामगमात्रे औक्थिक इति प्राप्नोति। नैष दोषः। तादर्थ्यात्तच्छब्दाभविष्यतीति। उक्थार्थमुक्थम्। इह उक्थान्यधीते औक्थिकः। एतेनउक्थशब्दो येषु सामसु रूढस्तान्यधीयाने प्रत्ययो नेष्यते इत्यर्थादुक्तभवति। यदधीयाने प्रत्यय इष्यते तचोक्थशब्दो न रूढ इति कैयटः। यदधीयाने। प्रातिशाख्यमधीयाने। असामगेऽपीति शेषः। प्रश्नाश्रयोऽयम्। ततोऽग्रे तादर्थ्यादित्यनेन लक्षणया उक्थलक्षणम्प्रातिशाख्यशास्त्रम्। मुख्यार्थाभिधायिनस्तूक्थशब्दात्प्रत्ययो नेष्यते। तत्र वाक्यमेव भवति। उक्थान्यधीते वेद वेति। उक्थान्यधीते इत्यौक्थशब्दः प्रातिशाख्यपर एव। तस्मात्प्रत्यये कृते औक्थिशब्दः प्रातिशाख्यमधीयाने वर्त्तते। तदग्रे भाष्ये य इदानीमौक्थिक्यमधीते कथन्तच भविष्यति। औक्थिक इत्येव तत्र भवितव्यम्। कथम्। तस्येदमित्यत्रानुक्। तस्येदमित्यत्रानुवक्तव्यः। तस्येदमित्यस्य च। स तर्हि वक्तव्यो न वक्तव्यः। इहास्माभिस्तच्छब्दः साध्यम्। औक्थिक्यमधीते। उक्थान्यधीते। औक्थिक इति। तत्र द्वयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भविष्यति। अविरविकन्यायेनेति। औक्थिशब्दात्प्रातिशाख्याध्येतृवाचकादौक्थिकानामाम्नाय इत्यर्थे छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यङिति आम्नायः प्राति-

ग्राख्यमेव । तस्येदमित्यर्थादिति वार्त्तिके षष्ठ्यर्थे पञ्चमी । अध्येत्रवेदिभ्योरुत्पन्नस्याणो लुगाम्नाये विहितस्य आस्य च लुगित्यर्थः । नानयोः । अध्येत्रवेदिचोः । अनभिधानादिति । अत्र मानन्तु भाष्यकारोक्तिरेव । एतच्च कैयट इति । एवं हि भाष्ये उक्तम् । विद्यालक्षणकल्पसूत्रान्तादकल्पादेरिकक् स्मृत इति । इकक् । ठक् । अत्र कैयटः । अकल्पादेरित्येतदानन्तर्यात्सूत्रान्तस्यैव कल्पादेर्निषेधङ्करोति । अत एव भाष्ये अकल्पादेरिति किमर्थम् । काल्पसूत्र इति प्रत्युदाहृतम् । द्विगाविति । तिस्रो विद्या अधीत इत्यर्थे द्विगावित्यर्थः । ताभ्याम् । शतषष्टिशब्दाभ्याम् । प्रोक्तशब्दस्यार्थपरत्वव्याप्यमिति प्रोक्तार्थकप्रत्ययपरत्वोपपत्तये आह । स्वरितत्वादिति । आपत्यार्थं वचनमिति । अपत्ये भवो यः प्रत्ययस्तदर्थमित्यर्थः । सौचमार्षपदं व्याचष्टे । ऋषिप्रकृतिकेति । अत एव मूले उक्तम् । आर्षग्रहणेनेति । कुर्वादिरिति । अतोऽत्र ख्यः । ततः । ख्यान्तात् । ह्रस्वत्वाच्छे प्राप्तेऽणबाधनार्थमाह । वामरथ्यश्येत्यादि । न लुगिति । ऋषिशब्दोच्चारणेन विहितस्याणोऽभावात् । भाष्योक्तत्वेनेति । ऋष्यभिधायकत्वेनैव लुकः प्राप्तेरिति भावः । मन्त्रग्रहणादिति । जुष्टैतसूत्रपठितस्य छन्दःशब्दस्य शक्यार्थपरत्वे तदनुवृत्त्यैव सिद्धे मन्त्रग्रहणं व्यर्थमेव स्यादिति भावः । चेनेति । अनुक्तसमुच्चयार्थकेन चेनेत्यर्थः । काश्यपिन इति । काश्यपशब्दात्प्रोक्तार्थे काश्यपकौशिकेति णिनिश्छन्दसि ततोऽध्येतरि जातस्याणो लुक् । वार्त्तिकारम्भपक्षे तु । अपिना प्रत्याख्यानपक्षे तु भसंज्ञया बाधस्य परिग्रहः । अयमाशयः । यदि सुबन्तादध्येतरि प्रत्ययः स्यात्तदाऽन्तर्वर्त्तिसुपः प्रत्ययलोपे प्रत्ययलक्षणमितिसूत्रेण सुबन्तत्वात्पदत्वे सति न लोपः स्यात् । न च भसंज्ञया बाधः । स्वादिष्वसर्वनामस्थानइतिसूत्रप्राप्तपदत्वस्य तया बाधेऽपि साच न प्रवर्त्तते प्रोक्तादितिसूत्रेणाध्येचर्थकस्य लुकापहारात् । न च असर्वनामस्थाने यचीतिसूत्रस्य यकारादावजादौ सर्वनामस्थाने पूर्वम्पदन्न मध्ये चेत्सुबन्तमस्ति तदपि पदन्नेति व्याख्यानेन पदत्वनिषेधो भविष्यतीति वाच्यम् । उत्तरपदत्वे चेतिवार्त्तिकप्रत्याख्यानाय तथा तस्यार्थस्य योगविभागेन स्वीकारेऽपि वार्त्तिकारम्भपक्षे तादृशार्थकल्पने मानाभावात् । यदि णिनिप्रत्ययान्तात्सुबुत्पत्तेः प्रागेवाध्येचर्थकः प्रत्ययस्तदा तु

न पदत्वप्राप्तिरिति भावः । प्रोक्तप्रत्ययान्तानीति यदुक्तन्तन्नाभाया॰ह । प्रोक्तादित्यनुवृत्तमिति । कठम्महदितिवदिति । यथेदमसाधु तद्वदित्यर्थः । प्रत्ययान्तश्चेदिति यद्व्याख्यातन्तत्फलमाह । जनपद इति । कर्तरि तृतीयेति । एवञ्चैतदन्वयाय निर्वृत्तमित्यवान्तर्भावितण्यर्थाद्धेतुधातोः कर्त्तरि क्तः । व्याख्यानादिति । भाष्ये अदूरभवश्चेतिसूत्रानन्तरङ्किम्पुनरयमेकयोग आहो स्विन्नाना योगा इति वितर्क्य नाना योगा इतिपक्षे ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनन्तस्यैव विषये स्यादिति शङ्कायामुक्तम् । नैष दोषः । गोयूथवदधिकाराः । तद्यथा । गोयूथमेकदण्डप्रघट्टितं समं घोषङ् गच्छति तद्वदधिकारा इत्युक्तम् । एतेन सर्वेषामुत्तरत्र संबन्धाय चकारस्य पूर्वोक्तार्थचयसमुच्चायकत्वं स्पष्टमेव लभ्यते तन्मूलकादित्यर्थ. । न्याय्यत्वादिति । मतोर्बह्वच इतिन्यासे उभयोः पञ्चम्यन्तत्वात्सामानाधिकरण्यन्नाय्यमित्यर्थः । सूत्रस्थभाष्यादिति । तत्र हि रोण्या अण् प्रयोजनमित्युक्तम् । अनुशतिकादित्वादेतत्सूत्रोदाहरणे भाष्योक्ते उभयपदवृद्धिः । विशेषानुरोधीति । नीलो घट इत्यादौ नीलादिपदस्यैव । कटुवदरीति । अदूरभवार्थे जातस्याणो वरणादिभ्यश्चेति लुप् । तदेतदिति । अभावज्ञाने प्रतियोगिज्ञानस्य कारणतया लोकसिद्धत्वात्प्रत्याख्येयप्रदर्शनं विना प्रत्याख्यानासम्भवादौ प्रदर्श्य तत्पूर्वोक्तमित्यर्थः । इत्यादितो बोध इति । किन्तु जनपदत्वव्याप्याङ्गदेशत्वादिनैवेति शेषः । प्रसङ्गादिति । खण्डनीयप्रसङ्गादित्यर्थः । भाष्यरीत्या मूलोक्तादिशेषमाह । अतीतरात्र इति । अन्यरीत्यापि कृतं सूत्रं व्याख्यातुमुचितमित्याशयेन व्याचष्टे । अत्र सुपीत्यनुवर्त्तत इति । सूत्राभावेऽपि सिद्धिर्भविष्यतीत्याशयेन शङ्कते । यद्यपीति । अन्यार्थं सूत्रमित्याशयेन समाधत्ते । तथापीति । इदमपीति । गुणवचनानामितिवचनमपि । तत्पक्ष इति । पदसंस्कारपक्ष इत्यर्थः । भाष्यरीत्येति । तत्र हि समासमंज्ञाया गुणवचनसंज्ञाबाधकत्वोक्तेः । अत एव । समासस्य गुणवचनत्वाभावादेव । न चानेन न्यायेन परिहृतमिति पूर्वोक्तं विरुध्यते अस्मिन्न्यासे गुणवचनानामित्युक्तेरिति वाच्यम् । तत्रत्यगुणवचनशब्दस्य किञ्चिद्वाक्तिविशेषणीभूतार्थतात्पर्यकपरत्वात् । सिद्धे सतीति न्यायेनाह । सैवेति । तत एवाह । तदेवेति । अभिरूपपद इति । प्राप्नोतीति शे-

षः । अन्यथा । अणोऽस्वीकारे । अर्थान्तर इति । तेन निर्वृत्तमित्याद्यर्थे । देशत्वे नेति । नद्यामपि मत्स्यादिस्थितेस्तत्सम्बन्धिदेशत्वे नेत्यर्थः । मध्वादिभ्यश्चेतिसूत्रे विशेषं वक्तुमतीकमधृत्वैव व्याचष्टे । मध्वादीति । यदि मध्वादिष्विक्षुशब्दपाठः स्यात्तदा प्राप्तस्योरञस्तेषु पाठाद्बाधेन मतुपि सतीक्षुमतीत्यस्य सिद्धौ विप्रतिषेधविचारासङ्गतिः स्पष्टैव । मत्वर्थ एवेति । एवकारेण निर्वृत्ताद्यर्थव्यवच्छेदः । भाष्यकैयटयोरिति । तत्र हि पदसंज्ञायास्तसौ मत्वर्थ इति भसंज्ञाबाधिका भविष्यतीत्युक्तम् । यदि निर्वृत्तादिष्वप्यर्थेषु स्यात्तदा तत्र पदत्वप्राप्तिर्न निवारितेति भाष्यकारस्य न्यूनत्वापत्तिः । अङ्गोपस्य । टिलोपस्य । दत्तोत्तरत्वात् । पदेऽन्त इत्यर्थेन तत्र स्थानिवद्भावनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्ववासिद्ध इत्यत्र पदचरमावयवविधायकातिरिक्तस्य चैपादिकस्य ग्रहणमिति हि तत्रोक्तम् । एवमुक्तमिति । आद्ययोर्भय इत्येवमुक्तम् । अनुदात्तार्थमिति । अन्यत्र तूदात्तनिवृत्तिस्वरेणैव सिद्धम् । उच्चारणार्थोकारसहिता इति । ननु विल्वशब्दप्रकृतिकस्वार्थकान्तनिर्देश एव किन्न स्यादत आह । व्याख्यानादिति । सन्नियोगशिष्टपरिभाषाज्ञापनपराकरमूलकाद्व्याख्यानादित्यर्थः । इदमेव । कुग्रहणमेव । अत एव । सन्नियोगशिष्टानामितिपरिभाषास्वीकारादेव । उपधाया इति वर्त्तते न वेति । सूर्यतिथागस्त्यमत्स्यानामित्यतः ॥

॥ इति चातुर्थिकाः ॥

विशेषतयेति विवक्षायाः फलमाह । एवञ्चेति । ध्वनितञ्चेदमिति । उत्सर्ग. शेष एवासाविति विग्रिथ समाधानेन । विषयलाभार्थमिति । यदि केवलाधिकार एव स्यात्तदा वक्ष्यमाणा ढादयः प्रकृतिविशेषाद्विधीयन्ते तेषां शैषिकान्न प्राप्तिरिति तादृशविषयलाभो न स्यात् । लक्षणत्वे तु अश्वैरुह्यते आश्वो रथः । आश्वेन प्राप्यते मनुष्य इत्यत्र तु वाक्यमेव न तु प्रत्ययः । अधिकारस्य फलमाह । तस्येदमिति । टापः शीभ्नोपस्थितिकत्वादाह । अव्ययसाहचर्यादिति । एवञ्चाचोऽपि शीभ्नमेवोपस्थितिः । न पुंवत्त्वमिति । न पुंवद्भावेत्याकारनिवृत्तिः । के त्विदिति । भाष्यानुसारिणः । इ-

ष्टेः । सर्वनाम्न इतीष्टेः । अनव्ययग्रहणेऽपीति । अपिना अव्ययस्य सङ्ग्रहः । साङ्चर्यपरिभाषा तु द्विस्त्रिसिसूत्रे क्त्वोऽर्थग्रहणादनित्येति भावः । राङ्ग्वक इति । रङ्कुषु जातो मनुष्य इत्यर्थः । क्वाचित्कम्पाठं खण्डयति । राङ्कव इति । तत्र इति । मनुष्यस्य इत्यर्थः । कच्छादिभ्य इति । रङ्कुः कच्छादिरिति प्रागेवोक्तम् । पदान्तत्वादिति । प्रत्ययलक्षणेन पदान्तत्वात् । असंज्ञायामितिसप्तमीनिर्देशाच्छ्रतिप्रत्ययसमुदायस्य संज्ञात्वे व्याहृत्तिरिति भ्रममनिवारणायाह । सूत्र इति । माधुर इति । मधुरायाश्चव इत्यर्थः । ङीषन्त इति । गौरादिङीषन्तः । मध्योदात्त इति । आधानमित्यत्राङ्पूर्वाद्धाञो ल्युटि आङा समासेऽव्ययपूर्वपदप्रकृतिस्वरेणाधानशब्द आद्युदात्त इति भावः । स्वरे विशेष इति । यद्यत्राञ् स्यात्तदा शार्कराधानशब्द आद्युदात्तः स्यात् । सम्प्रति त्वणन्तत्वादन्तोदात्तो भवतीति विशेष इत्यर्थः । अञ्निरूपितापवादत्वोपपत्तये आह । तस्येति । इञर्थे तिसूत्रानन्तरङ्गोत्वमिहेत्युपादानेन इञर्थे तिसूत्र एवेति भ्रान्तिवारणायाह । सूत्रद्वयेपीति । तत्फलमूले पाणिनीयमिति । अत्रेञ्प्रत्ययो यूनि न तु गोत्रे । मूलेऽणोऽपवाद इत्युक्तन्त्वापवादशब्दो बाधकपरस्तेन यत्फलितन्तदाह । प्रतिषेध इति । तेन । पूर्वोक्तज्ञापकेनाश्नीयसिद्धिरिति । जानातीति ज्ञा । ज्ञाया अयं ज्ञीयः । सामर्थ्यादिति । द्वद्विग्रहणाभावेऽचामिति सम्बन्धसामान्ये षष्ठी स्यात् । विकल्पार्थमिति । प्राचाम्देश इतिनिर्देशात् । अन्यथा प्राग्देश इत्येव वदेदिति भावः। व्यवस्थितविभाषेति । अत्र मानमेतत्सूत्रस्थमेङ् प्राचान्देशे शैषिकेष्विति वक्तव्यम् । सैपुरिकी सैपुरिका । स्कौनगरिकी । स्कौनगरिकेति भाष्यमेव । अत्र । मनुष्यनाम्नि । अत एव । आधुनिकसंकेतितस्य ग्रहणादेव । सार्थकमिति । अन्यथा देशवाचकस्यापि नामधेयत्वात्तेनैव सिद्धे किमनेन । के चिदिति । मुख्याः । अन्ये त्विति । अचारुचिबीजन्तु एङ् प्राचामितिसूत्रस्य विध्यर्थत्वकल्पनमेव युक्तम् । विधिनियमसंभवे विधिरेव ज्यायानितिन्यायादिति । ननु उच्चारणार्थकस्यापीत्संज्ञां विना निहत्यभावाद्विशेषोपादानमफलमत आह । विधेयघटकेति । तदतिरिक्तेति । उच्चारणातिरिक्तेत्यर्थः । अनुबन्धस्य व्यत्यासेनोच्चारणन्तु स्त्रीप्रत्यये विशेषार्थम् । विपरीतनियम इति । उवर्णान्ताद्देशवाचिनो द्व-

ङाचेत्याचामेवेति नियम इत्यर्थः । व्याख्यानादिति । अग्रादेशवाचिनो ह्रस्वस्योवर्णान्तस्याप्रसिद्धत्वमूलकहरदत्तीयव्याख्यानादित्यर्थः । धन्व मरुदेश इति । समानौ मरुधन्वानाविति कोशे पाठात् यद्यप्ययम् लिंग इति ततो भाति। तथापि भाष्ये आष्टकन्नाम धन्वेतिपाठान्नपुंसकलिङ्गोऽपीत्याशयेनेह धन्वेत्युक्तम् । व्याख्यानादिति । योपधशब्दसाहचर्यमूलाद्व्याख्यानात् । साधकान्तरमप्याह । अह्रस्वत्वाच्चेति । अत एव । देशग्रहणस्यानुवृत्तिसत्त्वादेव । व्याख्यानादीर्घग्रहणमिति । प्राग्देशवाचिनो ह्रस्वस्य दीर्घकारान्तस्य दर्शनमूलकाद्व्याख्यानादित्यर्थः। तेन । सजनपद एव कर्मधारयाश्रयणेन । जनपदावधिरपि जनपद एवेत्यर्थः । नन्वेवन्तदवधिग्रहणं व्यर्थमत आह । जनपदत्वेनेति । तथा च बाधकबाधनार्थेन्तदवधिग्रहणमिति भावः । अह्रस्वादपि बहुवचनविषयात्। ह्रस्वात्प्राचामित्यतो ह्रस्वादिति प्रक्रान्तमतोऽह्रस्वादिति । तावन्मात्रोक्तौ विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमितिन्यायेन देवदत्तो वामेनाक्ष्णा पश्यतीत्यत्र यथा दक्षिणेन न पश्यतीति गम्यते तथाऽह्रस्वादित्युक्ते ह्रस्वान्नेति गम्येतेति प्रकृतसूत्रेऽपीति । प्रकृतसूत्रोदाहरणेषु अङ्गा इत्यादयो बहुवचनान्ता एव । दार्वक इत्युदाहरणे प्रकृतसूत्रस्य प्रवृत्त्यर्थमाह । दार्वा इतीति । कच्छाग्नि । ओर्देश इत्यतो देश इत्यनुवर्त्तते । सामर्थ्यादेवेति । तावन्मात्रस्य देशवचनत्वाभावात् । जनपदतदवध्योश्चेतिसूत्रस्थभाष्यविरुद्ध इति । तत्र हि तदवधिग्रहणस्य प्रयोजनमुक्तम् जनपदाज्जनपदावधेर्वुञेव यथा स्यात् । यदन्यत्प्राप्नोति तन्मा भूदिति । किञ्चान्यत्प्राप्नोति । कः । गर्गोत्तरपदाच्छविधेर्जनपदाद्वुञ् पूर्वविप्रतिषिद्धमिति वक्ष्यति स पूर्वविप्रतिषेधो न पठितव्यो भवति इत्युक्तम् । यदि प्रकृतसूत्रेऽपि कच्छाग्निवक्त्रगर्तोत्तरपदादिति पाठः प्रामाणिकः स्यात्तदा चैगर्त्तक इत्यस्यानेन सूत्रेण सिद्धौ पूर्वविप्रतिषेधारम्भो व्यर्थः स्यादिति भावः । गर्तोत्तरपदाच्छविधेः कोऽवकाश इति चेत् । पर्यायः स्यात् । स च नेष्टोऽतो वर्त्तोत्तरपदादित्येव पाठो युक्त इति । ननु कच्चादिषु नगरशब्दस्य पाठान्नागरा इत्यनुपपन्नमत आह । कच्चादिष्विति । जनपदवुञ्बाधनार्थम् । प्रस्थोत्तरपदेतिप्राप्ताण्बाधकस्य जनपदेतिसूत्रविहितस्य वुञो बाधनार्थमित्यर्थः । नन्वेवन्नैलीनक इत्यत्रापि कोपधादित्येवाणि सिद्धे प्रस्थोत्तरपदेतिसूत्रे

कोपधग्रहणं व्यर्थमत आह। तक्वेति। अञ्बाधनार्थमिति। वुञ्बाधकाञ्-बाधनार्थमित्यर्थः। आदिपदसंग्राह्यमाह। सिन्धोरिति। व्याख्यानादिति। अपदादौ वाच्यं यदि भवति तदा साख्वादेवेतिनियमो यद्यभिप्रेतः स्यात्तदाऽनेन नियमेन गौयवाग्वोर्वाच्यत्वेन विवक्षायाङ् कच्छादित्वादेव वुञि सिद्धे गोयवाग्वोश्चेत्युत्तरसूत्रारम्भो व्यर्थः स्यादिति तदारम्भमूलकव्याख्यानादित्यर्थः। कश्चित्। माधवः। स्वार्थिककेति। गहादेराकृतिगणत्वात्। केवलस्वशब्दात्तस्येदमित्यर्थे द्वारादीनाञ्चेत्यैजागमे सौवमित्यपीति प्रामाणिकाः। यौगिक इति। न मनुष्योऽमनुष्यः। न तु सभाराजामनुष्यपूर्वेतिसूत्रस्थामनुष्यशब्दवद्रूढ्यार्थबोधकः। व्याख्यानात्। फलेष्वपि पार्वतीयानीतिप्रयोगदर्शनमूलकाद्व्याख्यानात्। प्रकृतविशेषणमिति। देश इति वर्त्तते। भारद्वाजशब्दश्च न गोत्राभिधायकः किन्तु सूत्रोपात्तयोः क्षत्रियपर्णयोर्विशेषणमिति। एवञ्च देशाभिन्ने भारद्वाजे यौ क्षत्रियपर्णशब्दौ ताभ्याञ्छः स्यादिति वाक्यार्थः। व्याख्यानात्। प्रकृतिविशेषणत्वेन वृत्तिकारादिसम्मतव्याख्यानात्। न यथासङ्ख्यमिति। न निमित्तकार्यिणोर्यथासङ्ख्यमित्यर्थः। अन्यभावेति। प्रकृतसूत्रघटको योऽन्यतरस्यामितिशब्दस्तस्य विधेयत्वाभिमतखञ्ज्ञयोर्योऽभावस्तन्निष्ठबोधकत्वेऽपि सूत्रविधेयादन्यो योऽण् तस्य भावार्थकत्वाभावादित्यर्थः। तत्प्राप्तेः। यथासङ्ख्यप्राप्तेः। ननु यथाकथञ्चिद्यः कालबोधकस्तस्य ग्रहणे रमणीयशब्दस्यापि रमणीयः काल इत्यत्र कालबोधकतया रमणीये जात इत्यर्थविवक्षायां ठञ् प्राप्नोतीत्यत आह। रमणीयादीति। अत एव। यथाकथञ्चित्कालबोधकस्य ग्रहणादेव। सायम्प्रातिक इत्यादि। सायम्प्रातिक इत्यत्र तदन्तत्वात्प्राप्तिः पौनःपुनिक इत्यत्र तु स्थानिवत्त्वेनेति विवेकः। अयञ्च स्थानिवद्भावो द्विर्वचनस्यादेशत्वपक्षे। छ-नत्रचाणोरिति। छः। इद्वाच्छ इति। सन्धिवेलेतिविहितोऽण्। विप्रतिषेधपरस्येति। तत्र हि छादोर्ढ्ये कालाट्ठञ्। छादोर्ढ्ये ठञ् कालाट्ठञ् इत्येतद्भवति विप्रतिषेधेन। छस्यावकाशः। शालीयो मालीयः। ओर्ढ्ये ठञ् भवतीत्यस्यावकाशः। निषादकषूनाम देशः। नैषादकर्षुकः। इहोभयम्प्राप्नोति। कालाट्ठञ् भवतीत्यस्यावकाशः। आर्द्धमासिकम्। सांवत्सरिकम्। छस्य स एव। मासादुभयम्प्राप्नोति मासिकम्। नत्रचादण्। नत्रचादण् भवति छादिप्रतिषेधेन

अणोऽवकाशः । तैषः पौषः । ङस्य स एव । स्वादेरुभयमाप्नोति । सौवातः । अव्ययाट्टुगटुगलौ छाङ्गवतो विप्रतिषेधेन । टुगटुगलोरवकाशः । दोषातनम् दिवातनम् । ङस्य स एव । प्रातःशब्दादुभयमाप्नोति । प्रातस्तनम् इतिभाषासङ्गतिरित्यर्थः । दुर्बलच्छेनेति । तद्बाध्यबाध्यत्वेन दुर्बलत्वमिति भावः । अयम् । आङ्शब्दः । एवञ्च । तदादिग्रहणे च । नियमार्थ इति । स्वशब्दस्य द्वारादित्वात्तेनैव सिद्ध इत्यर्थः । पौर्णमास्याञ्छमिति । पौर्णमासीशब्दस्य सन्धिवेलादिगणे पाठात् । अत एव । अव्ययानाञ्चमात्र इत्यस्यानित्यत्वादेव । स्पष्टार्थमिति । छन्दसीत्ये तन्निवृत्तेः स्पष्टतया प्रतिपत्त्यर्थमित्यर्थः । स निर्देश्यः । अद्यतन इति निर्देश्यः । एवम् । युवोरनाकाविति सूत्र इव । भाष्ये प्रत्याख्यातमिति । सायमितिमान्ताव्ययस्य च स्वीकारादेव प्रातःसन्ध्या मनक्षत्रा सायंसन्ध्या सभास्करेत्युपपद्यते । यत्तु स्यतेर्धञि दिवावसानवचनः सायशब्दस्तस्याप्ये तन्निपातनमितिवृत्तिकृत्तन्न युक्तमिति ध्वनयन्नाह । घञन्तसायेति । तद्भाव इति । प्रत्याख्यानभाष्यस्य भावः । नन्वन्यत्रापि प्रयोगो दृश्यत इत्यत आह । सायमशनमित्यादि । अत एव । अव्ययसंज्ञकस्यैव सायंशब्दस्य प्रकृतसूत्रे ग्रहणादेव । यस्तु सायशब्दो घञन्तः स न कालवाची किन्तु दिननाशे वर्त्तत इति भावः । चिरमित्यस्याप्युपादानं व्यर्थमित्याशङ्कते । नन्विति । ब्रप्रत्ययेन । चिरपरुत्परारिभ्यस्त्रो वक्तव्य इतिवार्त्तिकविधेयेन । तत् । चिरङ्ग्रहणम् । तत्त्वसम्भवात् । अनित्यत्वज्ञापकत्वसम्भवात् । न चेष्टापत्तिः । प्रत्याख्यानपरभाष्यविरोधात् । तस्याप्रामाणिकत्वात् । चिरम्शब्दस्याप्रामाणिकत्वात् । अत एव भाष्ये प्रत्ययसन्नियोगेन मान्तत्वच्चिरशब्दस्य निपात्यत इत्युक्तत्र तु प्रत्याख्यानन्तस्य कृतम् । तेन शारदं सस्यमिति । न चेह समुदायः संज्ञा किन्तु यौगिकोयम् । अत एव । अधिकारत्वादेव । तदपवादत्वात् । आदिवृद्ध्यपवादत्वात् । अत एव । उत्तरपदवृद्धैस्तदपवादत्वादेव । पौर्वप्राविषमिति । पूर्वा चासौ प्रावृट् च तस्यामवमित्यर्थः । वाचनिक एवेति । अन्यथा प्रत्ययविधित्वान्न स्यात् । दिग्वाचकस्य । अत्र दिक्शब्दो दिगवच्छिन्नस्यापि बोधकः।पौर्वभद्र इति।पूर्वस्मिन्भद्रे जातः।अन्योक्तिङ् खण्डयति । वृद्धिविधायक इति । उत्तरार्थ इत्युक्तिङ्कटाच्चयन्नाह । सुसर्वेति । अन्ये । विवेचकाः । देशनिर्देश्य इति । न त्वाचार्यनिर्देश्यः । वृत्तिकारमतमाह।

यज्ञोपवीत्यादिना । उत्तरपदविशेषणम् । दिश इत्यपि तस्य विशेषणमिति दिशः परेषान्नगरवाच्युत्तरपदानान्दिशः परेषामुत्तरपदानाङ् ग्रामवाच्यङ्गावयवानामचामादेरची ह्रस्वरितिसूत्रार्थस्तत्रते द्रष्टव्यः । परन्त्वेषा कल्पना भाष्यविरुद्धेति सूत्रयन्नाह । भाष्ये त्विति । मूलेपि ध्वनितमिति । दिशः परेषान्नगरवाचिनामिति कथनेन ध्वनितमित्यर्थः । समानाधिकरणसमास इति । ततो ङीपवेतोः प्राचामिति वुञ् । पक्षे इति । वुन्प्रत्ययाभावपक्षे इत्यर्थः । नक्षत्रयुक्तचन्द्रवाचिभ्य इति । तत्तन्नक्षत्रयुक्तचन्द्रमसा युक्तकालवाचिभ्य इत्यर्थः । असम्भवादिति । तस्य समास एव सम्भव इति भावः । पुनष्टाविति । अत एव यत्र न स्त्रीत्वन्तत्र चित्र इतीत्र भवति । नक्षत्रवाचित्वाभावेन । जातार्थकप्रत्ययान्तस्य नक्षत्रवाचित्वाभावेनेत्यर्थः । स्त्रियामित्येवेत्यस्यैतौ प्रत्ययौ स्त्रियाम्भवत इत्यर्थः । तत्र मानमाह । फल्गुनी इत्यादि । अस्त्रियामपीत्यस्य लाभप्रकारमाह । श्राविष्ठीय इत्यादीति । प्रत्याख्यातमिति । लुगर्थं वचनम्प्रत्याख्यातम्पूर्वौक्ताः प्रत्ययास्तूपसंख्येया एव । सूत्रे समाहारद्वन्द्वपूर्वपदकेति । स्थानान्तश्च गोशाला च स्थानान्तगोशालम् । स्थानान्तगोशालञ्च खरशाला चेति समाहारद्वन्द्वः । तत्रापीति । अपिना नपुंसकत्वाभावपक्षीयशब्दसङ्ग्रहः । एतेन । पूर्वोक्तरीत्या सौत्रप्रयोगसाधनेन । कृतङ्कस्येत्यादि । ङ्कस्त्वं हि नपुंसकत्वे विधीयते न च स्त्रीप्रत्ययस्तत्रकृतिकः । एवञ्च भवदुक्तं व्याख्यानमसङ्गतमेवेति भावः । प्रतिप्रसूतपदं व्याचष्टे । कालाट्ठञेति । मूले नक्षत्रेभ्यो बहुलमिति । भाष्यकारीयं वचनमेतत् । तत्र जात इत्यस्य तदधिकरणकजननकर्त्ता इत्यर्थः । कृतलब्धक्रीतकुशलाः । तत्रेति वर्त्तते । तदर्थस्य च कृतादिशब्दैकदेशक्रियायामन्वयः । तत्र कुशल इत्यस्य तस्मिन् स्थित्यादिरूपा या क्रिया तस्याङ्कुशल इत्यर्थः । प्रायभवः । तत्रेति वर्त्तते । ननु वक्ष्यमाणेन तत्र भव इत्यनेनास्याभिन्नार्थबोधकत्वमिति अन्यतरोपादानवैयर्थ्यमिति चेन्न अनित्यभवः प्रायभवः नित्यभवस्त्वत्र भव इति भेदात् । भवशब्दोऽत्र सत्ता कर्तृवाची । सुघ्ने प्रायभव इत्यस्य सुघ्नावयवसकलग्रामानवच्छिन्ना या सुघ्नावयवकतिपयग्रामाद्यवच्छिन्ना सत्ता तत्कर्त्तेत्यर्थः । भवनेऽनित्यत्वञ्च कतिपयतदवच्छिन्नत्वम् । नित्यभव इत्यस्य तद्देशावयवसकलग्रामाद्यवच्छिन्ना या तद्देशा-

धिकरणिका सत्ता तत्कर्त्तेति वाच्योऽर्थ इति सूचकाराशयः। भाष्यकृता तु प्रकृतसूत्रव्याख्यातम्। प्रायभवग्रहणमनर्थकम् तच्च भवेन कृतत्वात्। प्रायभवग्रहणमनर्थकम्। किङ्कारणम्। तच्च भवेन कृतत्वात्। यो हि सुराष्ट्रे प्रायेण भवति तच्च भवोऽसौ भवति तच्च तच्च भव इत्येव सिद्धम्। अत्र कैयटः। भवे सामान्ये प्रायभवस्यापि विशिष्टस्यान्तर्भावादिति भावः। ततः आरम्भवाह। न सिद्धयति। अनित्यभवः प्रायभवः। नित्यभवस्तत्र भव इति। अर्थभेदमनेना चष्टे। यस्तत्र कदा चिद्भवति कदा चिन्न भवति स प्रायभवः। यस्य तु नियत आधाराधेयभावस्य तत्र भव इति कैयट। अत्र कदा चिदिति न कालिकाव्याप्यवृत्तिमात्रपरङ्किन्तु यदीयसत्त्वसमव्याप्यवृत्ति तत्सामान्योपलक्षणम्। तच्च कालिकन्दैशिकं वेत्यन्यदेतत्। प्रत्याख्यानवाह। अनित्यभवः प्रायभव इति चेन्मुक्तसंशयेन तुल्यम्। यद्वावमुक्तसंशयं तच्च भव उदाहरणन्याय्यमन्यते स्रौघ्नो देवदत्त इति तेनैतत्तुल्यम्। सोऽपि ह्यवश्यमुदकदेशादीन्यभिनिष्क्रामति। एतेन तदीयसत्त्वस्य दैशिकाव्याप्यवृत्तित्वन्निदर्शितम्। अथैतत्प्रायभव उदाहरणन्याय्यमन्यते। तच्च भवे किमुदाहरणम्। यत्तत्र नित्यभवति। स्रौघ्नाः प्राकाराः। एवन्तर्हि तच्च भव इति प्रकृत्य जिह्वामूलाङ्गुलेश्छो विधीयते स तस्मिन् दृष्टापचारे अङ्गुलीयमिति भवति एवम्प्रायभवेऽपि भविष्यति। एतेन प्रघट्टकेन नीलघटस्य घटत्वेन बोधवत्प्रायभवस्यापि भवत्वेन बोधमाश्रित्य प्रायभव इति प्रत्याख्यातमिति भावः। उपजानूप। उपजान्वादयः सामीप्येऽव्ययीभावाः। सम्भूतेः। तत्रेति वर्त्तते। सप्तमीसमर्थात्प्रातिपदिकात्सम्भूत इत्यस्मिन्नर्थे यथाविहितम्प्रत्ययो भवति। अत्र सम्भूतिर्नोत्पत्तिः सत्ता वा। जातभवाभ्यामङ्गतार्थत्वात्। किन्त्ववक्लृप्तिः प्रमाणानतिरेकश्च यथायथं सम्भूतिपदार्थः। कोशाड्ढञ्। कौशेयं वस्त्रम्। अत्र कोशे सम्भूतिर्वस्त्रस्य सत्कार्यवादसिद्धान्तरीत्या। वार्त्तिककृता तु लोकप्रसिद्धरीत्या विकार एव प्रत्ययं स्वीकृत्येदं सूत्रव्याख्यातम्। विकारे कोशाड्ढञ् वक्तव्यः। कोशस्य विकारः। कौशेयम्। सम्भूतेर्ह्यर्थानुपपत्तिः। सम्भूत इत्युच्यमानेऽर्थस्यानुपपत्तिः स्यात्। न ह्यदः कोशे सम्भवति। तदानीं वस्त्रानुत्पत्तेः। किन्तर्हि कौशस्यादौ विकारः। यदि विकार इत्युच्यते भस्मन्यपि प्राप्नोति भस्मापि कोशस्य विकारः। अथ सम्भूत

इत्युच्यमाने क्त्रमौ कस्मान्न भवति। अनभिधानात्। यद्येव तर्हि क्त्रमावनभिधानान्न भवति एवमस्मन्यपि न भविष्यतीति च भाष्ये उक्तम्। कालात्साधुपुष्यात्। तत्र तेष्येव। तच्च साधुत्वञ्च तदधिकरणकयोग्योत्पत्तिकत्वम्। यथा हेमन्ते कृतः प्राकारो योग्यो भवति तथा नान्यकाले निर्मित इति विवक्षितम्। ननूम इत्यत्र भूते प्रत्ययविधानादुप्यत इतिव्याख्यानमनुपपन्नमत आह। सूत्रे भूतकाल इति। देयमृणे। अत्रावश्यके कृत्यः। कलाप्यञ्चत्य। लाक्षणिका इति। साहचर्यसम्बन्धस्याच्च लक्षणाबीजस्य सर्वत्र सत्त्वन्द्रष्टव्यम्। एतद्वृत्तिविषयस्येति। वुन्प्रत्ययविषय इत्यर्थः। ननु दिक्सङ्ख्ये संज्ञायामिति नियमादवरसमेत्यत्र कथं कर्मधारय इत्यत आह। अवरशब्दस्येति। तदस्य सोढम्। सोढमित्यत्र सहधातोः कर्मणि क्तः। सहनकर्मेत्यर्थः। न लोकेतिनिषेधादस्येति न कर्त्तरि षष्ठीसम्भव इत्याशयेनाह। क्रियाकारकभावेति। सहनमत्र परोक्तं दुर्वचनं सहते इत्यत्रैव नत्वमारूपङ्क्रियतुपुनः पुनः परिशीलितमित्यत्र या क्रिया तत्परमित्याशयेनाह। सोढमभ्यस्तमितिपञ्चानामिति षष्ठ्यर्थोऽवयवावयविभावस्तस्यादिपदार्थेऽन्वयस्तत्फलमाह। सौदैविक इति। सुदैविकाशब्दाच्च प्रत्ययः। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। व्याख्यायतेऽनेनेति व्याख्यानः। व्याख्यातव्यं व्याख्येयम्। तस्येति षष्ठीसमर्थाद्व्याख्येयवाचकाव्रातिपदिकाद्व्याख्यानेऽभिधेयेऽणादयः स्युरित्यर्थः। चकारात्समन्ताङ्वार्थे। बह्वचोऽन्तोदात्तात्ठञ्। पूर्वसूत्रमनुवर्त्तते। बह्वचो व्याख्यातव्यनाम्नोऽन्तोदात्तात्व्रातियदिकाद्व्याख्यानेऽर्थे ठञ् भवतीत्यर्थः। षत्वणत्वेतिसमुदायः समासस्वरेणान्तोदात्तः। मध्योदात्तवाजपेयाद्यर्थ इति। वाजपेयशब्दो यद्यपि यागविशेषे रूढस्तथापि शास्त्रेण व्युत्पाद्यते इति वाजैः यवागूभिः सम्पादनीय इत्यर्थोऽस्य साधुत्वान्व्याख्यानेऽयङ्क्तुक्तपदप्रकृतिस्वरेण मध्योदात्तः। पेयशब्दस्य यतोऽनाव इत्याद्युदात्तत्वात्। पाकयज्ञादिशब्दानां व्याख्यातव्यनामत्वमुपपादयति। यज्ञार्थेत्यादि। व्याख्यानरूपेऽर्थे प्रत्ययविधानेऽपि पौरोडाशिकं काण्डमित्यस्य कथं साधुत्वमत आह। पौरोडाशिकमिति। कार्कण इति। ककणादागत इत्यर्थके। ननु शुण्डिकादिभ्य इतिपृथक्सूत्रारम्भसामर्थ्यादेवाणि सिद्धेऽण्ग्रहणङ्ङिमर्थमत आह। अण्ग्रहणमिति। गोत्रादङ्गवत्। गोत्रप्रत्ययान्तात्प्यञ्च्य-

न्तादागत इत्यर्थेऽङ्गवत्प्रत्ययो भवति। वैदमित्यत्र वैदशब्दादञन्तादङ्गवद्विधीयमानः प्रत्ययो यथा सङ्घाङ्कलक्षणेष्वञ्ञिञामणितिसूत्रेणाङ्ङण् भवति तथा आगतमित्यर्थेऽपि स एव भवति। इत्यभिमान इति। तत आगत इत्यर्थस्य प्रक्रमे नञः शुचीश्वरेतिसूत्रलेखनकर्तुरिति शेषः। अर्थान्तरेऽपि प्रत्ययप्रवृत्तौ सूत्रस्य चारितार्थ्यमाह। अशुचौ भवमिति वेति। हेतुमनुष्येभ्योन्यतरस्यां रूप्यः। हेतुमनुष्यवाचकेभ्यः षष्ठ्यन्तेभ्य आगत इत्यर्थेऽन्यतरस्यां रूप्यप्रत्यय इत्यर्थो न तु हेतुमनुष्यशब्दादिति बहुवचननिर्देशात्। मनुष्यग्रहणमहेत्यर्थम्। प्रभवति। अस्य सूत्रस्यागतार्थतामाह। प्रभवः प्रथमप्रकाश इति। एतद्वृत्तीति। ञ्यप्रत्ययोत्पत्तिविषय इत्यर्थः। तद्गच्छति पथिदूतयोः। द्वितीयान्ताद्गच्छतीत्यर्थे प्रत्ययः स्यात् यो गच्छति स पत्या दूतश्च भवति। अभिनिष्क्रामति द्वारम्। तदित्येव। द्वितीयान्तादभिनिष्क्रामतीत्यर्थे प्रत्ययो भवति योऽभिनिष्क्रामति तद्वारञ्चेत्। अचाभिराभिमुख्ये। स्रुघ्नमभिनिष्क्रामतीत्यस्य स्रुघ्नदेशाभिमुख्येन कन्यकुब्जद्वारमभिनिष्क्रामतीत्यर्थः। यद्यपि स्रुघ्नदेशाभिमुख्येन निष्क्रामन्तिये जनास्तेषामपि निष्क्रमणक्रियायाद्वारस्य करणत्वन्तथापि साध्वसिस्थिनत्तीत्यत्र यथा करणस्य स्वातन्त्र्यविवक्षा तथाऽत्रापि बोध्यम्। अधिकृत्य कृते ग्रन्थे। तदित्येव। द्वितीयान्तादधिकृत्य कृत इत्यर्थे प्रत्ययो भवति यः कृतः ग्रन्थश्चेत् भवति। अधिकृत्य। प्रस्तुत्य। ननु सौभद्रो यायात इतिवृत्तिकारोक्तोदाहरणस्यापि सम्भवात्तत्यागे किम्बीजमत आह। सौभद्र इत्यादि। मूले उपचारादिति। यथा वासवदत्तामधिकृत्य कृता या आख्यायिका सोपचाराद्वासवदत्तेत्युच्यते न तु प्रत्ययः क्रियते तथाऽत्रापि छप्रत्ययाभावेऽपि प्रयोग इति भावः। सोऽस्य निवासः। प्रथमान्तान्निवासोपाधिकादस्येति षष्ठ्यर्थे प्रत्यय इत्यर्थः। स्रुघ्नाभिन्ननिवाससम्बन्धीत्याकारको बोधः। फलितार्थमाह। स्रुघ्नाधिकरणकेति। अभिजनश्च। सोऽस्येति वर्त्तते। अभिजायते येभ्य इति व्युत्पत्त्याभिजनशब्दः पूर्वबान्धववाची स लक्षणयाऽत्र देशे वर्त्तते। प्रकृतिविशेषणमिति। पर्वते वर्त्तमानाच्चातिपदिकादभिजनोपाधिकादस्येत्यर्थे प्रत्ययः स्यात्। साङ्काश्यका इति। सङ्काश्येन राज्ञा निर्वृत्तं सांकाश्यम्। सांकाश्ये जातः साङ्काश्यकः।

यौपधत्वादिति। धन्वयोपधाद्वुञ्। लौकिकमिति। अपत्याधिकारादन्यत्वात्। औपगवक इति। औपगवो भक्तिरस्येत्यर्थः। शूरशब्दादिति। एतस्य क्षत्रियवाचकत्वेन प्रसिद्धत्वाभावात्। न चैवं वासुदेवार्जुनाभ्यामितिपूर्वसूत्रवैयर्थ्यम् क्षत्रियाख्यत्वादेव सिद्धेरिति वाच्यम्। अस्य संज्ञाशब्दत्वात्। अत एवोक्तभाष्ये। संज्ञैषा तत्र भवत इति। मद्रशब्दत्वेनेति। मद्र इत्यत्र योऽण् तद्विवृत्तिरत्र। दृष्टान्तार्थमिति। बहुवचने जनपदेन समानश्रुतित्वप्रदर्शनार्थम्। ननु पञ्चालो ब्राह्मण इत्यसङ्गतम् पञ्चालशब्दस्य देशक्षत्रियान्यतरस्मिन्नुत्पादनादत आह। अभेदोपचार इति। ननु तित्तिरिणा प्रोक्तः श्लोक इत्यर्थे छणोऽभावेण्य् कुतो नेत्यत आह। तित्तिर्यादिभ्य इति। छन्दोब्राह्मणानीतिसूत्रे ब्राह्मणपदसन्निधानाच्छन्दःशब्दो मन्त्रमात्रपर एव स्यादत आह। छन्दःशब्देनेति। काश्यपकौशिकाभ्याम्। ऋषिवाचिभ्याङ्काश्यपकौशिकाभ्यान्तेन प्रोक्तमित्यर्थे णिनिः प्रत्ययो भवति। कल्पे आभ्यां प्रोक्त इति स्मर्यते। आभ्याम्। काश्यपकौशिकाभ्याम्। इष्यत इति। वृत्त्यादिसम्मतात्काश्यपकौशिकग्रहणञ्च कल्पे नियमार्थम्। काश्यपकौशिकाभ्यामेव णिनिः कल्पे तद्विषयो भवतीति छन्दोब्राह्मणानीति सूत्रसम्मत व्याख्यानादिति शेषः। वैशम्पायनशिष्यत्वादेवेति। शिष्यशिष्याणामपि शिष्यव्यवहारदर्शनादिति भावः। तदुग्रहणम्। कलापिग्रहणम्। तदुक्तभाष्ये। प्रत्यक्षकारिग्रहणम्। प्रत्यक्षकारिग्रहणङ्कर्तव्यम्। अन्ते वास्यन्ते वासिभ्यो मा भूदिति। प्रत्यक्षकारीत्यस्य प्रत्यक्षमध्ययनकारीत्यर्थः। तत्तर्हि वक्तव्यञ्च वक्तव्यम्। कलापिखाडायनग्रहणं ज्ञापकं वैशम्पायनान्ते वासिषु प्रत्यक्षकारिग्रहणस्य। यदयं कलापिखाडायनग्रहणङ्करोति तज् ज्ञापयत्याचार्यो नान्ते वास्यन्ते वासिभ्यो भवतीति। कथङ्कृत्वा ज्ञापकम्। वैशम्पायनान्ते वासी कठः। कठान्ते वासी खाडायनः। वैशम्पायनान्ते वासी कलापी। यदि चान्ते वास्यन्ते वासिभ्योऽपि स्यात् कलापिखाडायनग्रहणमनर्थकं स्यात्। पश्यति खाचार्यो नान्ते वास्यन्ते वासिभ्यो भवतीति ततः कलापिखाडायनग्रहणङ्करोतीति। तच्च कलापिग्रहणमुक्तसूत्र एव स्फुटम्। खाडायनग्रहणन्तु शौनकादिगणे णिन्यर्थङ्कृतमिति बोध्यम्। याज्ञवल्क्यानीतीति। याज्ञवल्क्येन प्रोक्तानीत्यर्थः। अभिमानोक्तिबीजमाह। भाष्ये त्विति। छन्दस्यभिधेय इति। अत्र

छन्दःशब्दो मन्त्रब्राह्मणान्यतरपरः । भाष्यविरोधादिति । तच्च हि शौनकादिपठितस्य खाडायनग्रहणस्य कलापीतिसूत्रेऽन्तेवासिग्रहणेऽन्तेवासन्तेवासिग्रहणन्नित्यर्थे ज्ञापकत्वमुक्तम् । यदि शौनकादीतिसूत्रस्य वेदमात्रविषयकत्वन्तदा शौनकादिषु खाडायनशब्दपाठे सति वेदमात्रेऽभिधेये णिनिः कलापीतिसूत्रेण णिनौ तु मन्त्रब्राह्मणयोर्णिनिरिति फलभेदस्य स्पष्टतयोक्तार्थज्ञापकत्वपरभाष्यमसङ्गतं स्यादिति भावः । पाराशर्येतिसूत्रघटकं भिक्षुसूत्रपदं व्याचष्टे । भिक्षुसूत्रमिति । सूत्रस्य भिक्षुत्वसम्पादकत्वमुपपादयति । यथा नटेति । ननु वेदान्तश्रवणस्य ब्रह्मज्ञानाङ्गत्वम्मनुवचनाल्लभ्यते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेत्यनेन तु वेदनेच्छायामुपयोगः प्रतीयत इति विरोध इत्यत आह । विविदिषावाक्येऽपीति । उभयत्रापीति । उभयत्र करणत्वेऽपि वेदने करणत्वात्तेरिति भावः। विविदिषावाक्यस्यापि वेदन एव करणत्वे तात्पर्यमित्याशयेनाह । वस्तुत इति । एतेन प्रघट्टकेनात्मदर्शनोपयोगिनः सूत्रस्य भिक्षुत्वसम्पत्तिः फलमुक्तम्न तु भिक्षुभिरेवाध्येतव्यमिति । तमेवार्थन्दृढ़यति । ऐतरेयब्राह्मणेऽपीति । एतेन गृहस्थस्यापि आत्मदर्शनेऽधिकारित्वमुक्तम् । ननु सन्यस्य श्रवणमित्यनेन सन्यासोत्तरं श्रवणमुक्तन्तेन विरोध इत्यत आह । सन्यस्येति । मूलोक्तभिक्षव इतिपदं व्याचष्टे । भिक्षुत्वयोग्या इति । अनयोः । पाराशर्येतिसूत्रविषययोः । इष्यते । तदुक्तञ्छन्दोब्राह्मणानीतिसूत्रभाष्ये । कथम्पाराशरिणो भिक्षवः । शैलालिनो नटाः । अत्रापि तद्विषयता चेति । एकदिक्पदे बहुव्रीहिरित्यभिप्रायेण व्याचष्टे । एकादिग्रूपाधिकरणस्थमिति । उपज्ञाते । तेनेति वर्त्तते । तृतीयासमर्थादुपज्ञात इत्यर्थे प्रत्ययो भवति । विनोपदेशं स्वयमेव यदभिसम्बुद्धन्तदुपज्ञातम् । कृते ग्रन्थे । तेनेत्येव । तृतीयान्तात्कृत इत्यर्थे प्रत्ययो भवति । यः कृतः स ग्रन्थश्चेद्भवति । कृतमुत्पादितम् । यत्तु सिद्धमुपदेशं विनापि ज्ञातन्तदुपज्ञातमित्यनयोर्भेदः । छापवाद इति । वृद्धाच्छ इतिप्राप्तस्यापवादः । तस्येदम् । सामान्यविशेषरूपेणेति । विशेषरूपेण येषां शेषभूतानामप्रत्ययार्थत्वमुक्तन्तेषां प्रकृत्यर्थसम्बन्धित्वात्मकसामान्यरूपेणापि प्रत्ययार्थत्वमित्यर्थः । शेषभूतानामेव । तेन प्रत्ययार्थत्वन्तेन यस्मिन्नित्यादाह । अपत्यादीनामिति । वह्नेस्तुरणिट्चासूत्रेण

प्रत्यये सिद्धे इडर्थमुपसङ्ख्यानम्। वहधातोर्यस्तुस्तदन्तप्रकृतिकषष्ठ्यन्तादिदमर्थेऽण् प्रत्ययो भवति तुस्तु इट् च भवति। तुरिति लृन्लृचोः सामान्यग्रहणम्। अयमिडलौकिके प्रक्रियावाक्ये ढत्वादीनामसिद्धत्वात्तेभ्यः पूर्वमवर्त्तते। अत एवाह सांवहित्रमिति। अग्नीधः शरणेरण् भच्च। अग्नीच्छब्दाच्छरणेऽर्थे रण् प्रत्ययो भवति तस्मिन् पूर्वस्य भसंज्ञा भवति। अग्निमिन्धे इन्धयतीत्यर्थे क्विप् तदाह। अन्तरिति। अग्नीत् होता। तस्य शरणङ्गृहम्। गृहस्य स्थानत्वात्तत्साधारण्येनोक्तमूले स्थानमिति। सोऽपीति। होतापीत्यर्थः। तात्स्थ्यमत्र लक्षणायां बीजम्। तस्मात्। होट्टपरादाग्नीध्रशब्दात्। समिधामाधाने षेण्ण्। आधानपदे करणे ल्युट्। समिधामिति कर्मणि षष्ठी। पत्रपूर्वात्। रथादित्यनुवर्त्तते। एवच्च पत्रपूर्वाद्रथादित्यर्थः। पत्रशब्दोऽत्र स्वरितत्वादर्थपरः। उत्तरत्रापीति। पत्राध्वर्युपरिषदश्चेति सूत्रेऽपि। अध्वर्युशब्दे च स्वरूपग्रहणं स्वरूपमिति शास्त्रादेव परिषच्छब्देऽपि। अत्रैव। पात्राध्वर्युपरिषदितिसूत्रे। इन्द्राद्वुन्। क्वाचित्कम्पाठं खण्डयति। वैरे देवासुरेति। लौकिकम्। प्रवराध्यायप्रसिद्धम्। नन्वेवं चौद्रकमालवकमित्यस्यासिद्धिरत आह। गोत्वारोपेणेति। इदमर्थविशेषणानीति। विशेषार्थत्वाद्विशेषणत्वन्न्याय्यमेव। वुञोऽपवाद इति। गोत्रचरणादिति प्राप्तस्येति शेषः। सम्बन्धमिति। स्वाश्रयस्वामित्वसम्बन्धेन। साक्षात्सम्बन्धः। स्वस्वामिभाव एव। ननु चरणाद्धर्मान्याययोरित्युक्तत्वेन प्रोक्तार्थे कथमत्रत्य इत्यत आह। गोत्रचरणेति। उत्सर्गीयमिति। लक्षणशब्दबोध्यार्थस्य क्लीबत्वात्तदर्थकप्रत्ययान्तस्यापि क्लीबत्वमित्युत्सर्ग इत्यर्थः। दाक्षाणामिम इति। सङ्घादय इत्यर्थः। इञर्थे त्यण् सर्वे। गोत्रप्रत्ययान्ताः। रेवत्यादिभ्यष्ठगिति ठगन्ताः। इञ् स्यादिति। कुणिञ्जलशब्दादपत्येऽर्थेइञ्स्यादित्यर्थः। हस्तिपादशब्दादिति। अड्हस्त्यादिभ्य इतिनिषेधात्पादस्य लोप इति लोपो न। आथर्वणिक इति। अथर्वणा प्रोक्तो वेदोऽधीयेऽर्थेऽधीते वेत्यर्थः। वसन्तादित्वाट्ठक्। दाक्षिणनायनेतिनिपातनाट्टिलोपाभावः। ततोऽणि प्रकृतसूत्रेणैवैकशब्दलोपे प्रकृतिभाव इत्यर्थः॥

॥ इति शैषिकाः ॥

तस्य विकारः । षष्ठीसमर्थादिकाररूपेऽर्थे प्रत्ययो भवति । अन्नेतिप्रकृतिभावबाधनायाह मूले अन्नस्य विकार इति । मध्योदात्त इति । एवञ्च शे पनिघातेनानुदात्तादिरयमित्यञ् । नन्वारभ्यसामर्थ्यादेवाणि सिद्धेऽण्ग्रहणं व्यर्थमत आह । अण्ग्रहणमिति । उवर्णान्तत्वादीति । अचादिना तिप्तिङीकग्रब्दादनुदात्तादेर्ङे तिप्राप्त इत्यर्थः । ननु दैवदारवमिति औरञित्यस्योदाहरणत्वेनोपात्तत्वाच्यनुदात्तादेर्ङ्य एव श्रुतौ नोक्तमत आह । देवदारुरिति । पीतद्रुर्थानामितिफिट्सूत्रेणाद्युदात्तः । अन्तोदात्तोऽयमिति । तथा च तत्सन्नियोगशिष्टशेषनिघातेनानुदात्तत्वेऽञ् । पलाशादिभ्यो वा । पलाशादिभ्यः प्रातिपदिकेभ्यः षष्ठ्यन्तेभ्यः विकारावयवयोरर्थयोर्वाञ् भवति । उभयत्र विभाषेयम् । पलाशशब्दस्य पृषोदरादित्वादन्तोदात्तत्वेनानुदात्तादेर्ङे तिप्राप्ते खदिरशब्दस्य किरच् प्रत्ययान्तत्वेनाप्राप्तेऽस्यारभ्यादित्याशयेनाह । खदिरशब्दोऽत्र षष्ठ्यन्त इति । श्रम्याः ष्लञ् । श्रमीशब्दात् ष्लञ्प्रत्ययो भवति । पित्त्वफलम्मूलेशामीली सुगिति । माधवसम्मत्याह । ष्लञन्तेति । तद्विकारत्वमारोप्येति । तन्नाशोत्तरकालोत्पत्तिको हि तद्विकारः । श्रमीनाशेन यदुत्पद्यते तद्धि शामीलम् । एतत्सत्तायां श्रमी नास्ति । शामीलनाशेन च यदुत्पद्यते भस्मादि तदुत्पत्तौ श्रमीनाशस्य न कारणत्वमन्यथा सिद्धत्वादिति जितश्च तत्प्रत्ययादिति सूत्रारम्भवादिनो भावः । भाष्यरीत्या तु शामीलविकारोत्पत्तावपि श्रमीनाशस्य प्रयोजकत्वात्तन्नाशप्रयोज्योत्पत्तिकत्वमस्त्येवेतिजितश्चेतिसूत्रभाष्यमित्याख्यातम् । अस्य । ष्लञः । ङीषिति । तथान्तोदात्तः शामीलीशब्दः । फले भेदः स्यादिति । प्रत्ययस्य टित्त्वे तु टित्त्वान्ङीष्यनुदात्तान्तत्वमेवेति न फलभेद इति भावः । नन्वौष्ट्रिका उपानत् । कांस्या स्थालीत्यत्र जितश्चेतिसूत्रारम्भे वुञन्तययन्तास्त्रियां ङीष्प्रादिति फलभेदस्य सष्टतया कथमित्याख्यानमत आह । उष्ट्रस्येत्यादि । वैल्वम् । वैल्वमयमिति । अत्र वैल्वस्य विकार इत्यर्थविवक्षायां द्रव्यत्वेऽपि विकल्पेन मयट् । एतच्च जितश्चेतिसूत्रारम्भवादिमते । अन्तोदात्त इति । तथा चानुदात्तादित्वादञ् । तस्य । एकाच इत्यस्य प्रकरणाबाध इति । विकारप्रकरणस्याबाध इत्यर्थः । यावकमित्यस्य संज्ञाशब्दत्वादवयवार्थाभावेऽपि कथञ्चित्तदुपपत्तिरित्याशयेनाह । यावक इति । वार्ष्णशब्द इ-

ति । मयूरवाचकाद्वर्हिशब्दात्प्राणिरजतादिभ्योऽञित्यञ् । आद्युदात्ताविति । एतेनानुदात्तादेश्चेत्यनेन गतार्थता नेति सूचितम् । वैल्वमयमितीति । बिल्वादिभ्योऽणित्यणन्तान्मयट् । भाष्यरीत्याह । तस्यावयव इत्यर्थ इति । ननु वैल्वस्य विकार इत्यर्थोऽपि कुतो नेत्यत आह । विकार इति । भाष्यमिति । प्रकृतसूत्रभाष्ये विकारावयवार्थकप्रत्ययान्ताद्विकारावयवार्थे मयङ्व्याहृत्यर्थञिञतश्चतदितिसूत्रमित्यादौ सूत्रस्य प्रयोजनमभिधाय विकारावयवयोः प्रकृतिशब्दस्य कपोतादेरारोपेण समुदाये दृष्टाः शब्दा अवयवेष्वपि वर्त्तन्त इतिन्यायेन वा प्रवृत्तिं स्वीकृत्य प्रकृतिशब्दस्याहृत्वात्तस्मान्मयडभावस्य सिद्धिमाश्रित्य सूत्रभाष्याख्यायोक्तं तद्विवादास्पदेऽवयवे समुदायशब्दो नास्तीति विकारेवाप्रकृतिशब्द इति । किन्तर्हि विकारावयवशब्दोऽपि त्वस्ति तत उत्पत्तिः प्राप्नोति । इत्येवमाशङ्क्य विकारावयवशब्दाभावस्य इति चेत् न तेनानभिधानात् । विकारावयवशब्दाभावस्य इति चेत् । तत्र । किंकारणम् । तेनानभिधानादित्युक्तम् । अथ कैयटः । मयटः कापोतमयमिति विकारावयवयोः प्रयोगाभावादित्यर्थः । प्रयोगाभावादित्यस्य मयटः प्रयोगेण तदर्थानवगमादित्यर्थः । अयमाशयः प्रकृतिविकारविकारस्य प्रकृतिविकारत्वाप्रकृतिवाचकादेव विकारार्थकप्रत्ययेन तस्यार्थस्य बोधसम्भवेन न वैल्वमयमित्यनेन विकारविकारप्रत्ययः किन्तु विकारावयवस्येति । परिमाणशब्देन परिमाणन्तु सर्वत इत्यनेनारोहपरिणाहाभ्यां येन मीयते तस्यार्थस्य प्रतिपादनाद्दध्यमाणस्येत्यः प्रतिक इतिप्रयोगस्यानुपपत्तिरत आह । अत्र परिमाणशब्देनेति । व्याख्यानादिति । आर्हादिसूत्रस्थभाष्यसम्मतव्याख्यानादित्यर्थः । व्याख्यानमेव स्पष्टयति । अत एवेति । मूले युजभावे यथाक्रमसगजाविति क्लान्तदुपपादयति । उमेतीति । गोपयसोः । अत्र गोशब्दस्खङ्गितलक्षणादिपरः । द्रव्यशब्दस्य व्युत्पित्तिर्यद्यपि मूलोक्तैव तथाप्यय रूढ इत्याशयेनाह । द्रव्यशब्द इति । स्त्रीप्रत्ययलुकस्तद्धितलुङ्निमित्तकत्वेन तद्धितलुको बीजपरत्वादचः परस्मिन्निति स्थानिवत्त्वमाशङ्क्याह । लुका लुप्तत्वादिति । न्यग्रोधस्य च । न्यग्रोधशब्दो लघावन्त इति मध्योदात्तः । इदमव्युत्पन्नप्रातिपदिकमित्यस्य यकारो न पदान्त इति सूचकः । यदि तु न्यक् रोहतीतिव्युत्पत्तिमाश्रयमचापीत्युच्यते

तदा न्यग्रोधस्य चेत्के वलस्यैवेतिनियमार्थम्। तत्र। विल्वादिगणे। एवञ्च पाटलानि पुष्पानीत्यत्र प्राप्तोपि लुप्। भाष्ये मूलानीति पाठ इति। एवञ्च पुष्पेषु मल्लिका करवीरमित्युदाहरणं युक्तम्। मूले तु पाटलानीति वृत्तिग्रामाख्यादिति। तत्र हि बहुलग्रहणस्य प्रयोजननिरूपणावसरे न च भवति पाटलानि पुष्पाणि। साल्वानि मूलानीत्युक्तम्। तेषाम्। उणादीनाम्। यञञोर्लुगभावे हेत्वन्तरमाह। एककाल इति। उद्देश्यविधेयभावावगाहिशाब्दबोधे उद्देश्यावच्छेदकप्रकारकज्ञानस्य पूर्वकोटिकत्वनियमात्। व्यर्थत्वापत्तेरिति। प्रातिपदिकादित्यनेनान्वयाय पञ्चमीनिर्दिष्टस्य कर्तुमुचितत्वादिति भावः॥

॥ इति विकारार्थकाः ॥

॥ प्राग्दीव्यतीयाः समाप्ताः ॥

तस्य चेति। समुदायस्य चेत्यर्थः। वृत्ताविति। माशब्दिक इत्यादिवृत्तावित्यर्थः। अत्रास्येति। स्वागतादिगणे। सैवेति। करणतृतीयैवेत्यर्थः। अत्र। दीव्यतीत्यादौ। इत्युक्तमिति। आख्यातलब्धितार्थस्येतिन्यायात्। इह। पर्यादिगणे। सूत्रोपात्तत्वादिञ्निमित्तकेतिभ्रमवारणायाह। यत्किञ्चिन्निमित्तक इति। एतदेवेति मूलस्य श्वादेरितिसूत्रमेवेत्यर्थः। ग्रीवहानमिति। श्वहानेरिदमित्यर्थः। ननु श्वापदशब्दाद्दाच्छः स्यादत आह। अभिधानेति। निषेध इति। इकारादाविति वचनेन। चेर्मञ्मित्यम्। तेन दीव्यतीत्यत्रस्थेनेति वर्त्तते। त्रिप्रत्ययोन्तात्तृतीयान्तान्मित्यम्मवितिवाक्यार्थः। अत्र वाक्यन्निवृत्त्यर्थन्नित्यग्रहणम्। अत एव पाकेन निर्वृत्तमिति घञन्तेन क्विप्रत्ययान्तसमानार्थकेन विग्रहं कुर्वन्ति। ननु त्रिशब्देन सङ्ख्यावाचकस्य त्रिशब्दस्य क्विप्रत्ययस्य च ग्रहणमाप्नोति। न च त्रयाणामित्यत्र मप्रत्ययादर्शनेन सङ्ख्याया न ग्रहणमिति वाच्यम्। तृतीयान्तत्वे एव मब्विषयत्वप्रतिपादनादत आह। ङितः क्विरेवेति। व्याख्यानादिति। वक्ष्यमाणभाष्यसम्मतव्याख्यानादित्यर्थः। चेरिति भिन्नमिति। चेर्मवितिभिन्नमित्यर्थः। त्रिप्रत्ययान्तप्रकृतिकतृतीयान्तस्य वाक्ये प्रयोगोऽनेना-

वारितोऽत आह । ततो नित्यमिति । चयान्ताङ्गवत्वे वेति । अत्र तेनेत्यस्यासम्बन्धस्तेनेत्वे तत्सम्बन्धेनेदन्नित्यं मद्विधायकमिति तु न । नित्यविकल्पयोर्विषयव्यवस्थानापत्तेः । अयं यो मप् स चान्ताङ्गवत्वे वेति वाक्येन त्रिशब्देन सङ्ख्याया न ग्रहणं । निजान्त्रयाणामिति निर्देशात् । न च निर्वृत्तार्थे एव नित्यत्वबोधनेन चयाणामितिनिर्देशस्योपपत्तिरिति वाच्यम् । योगविभागस्यैवं सति वैयर्थ्यापत्तेरिति भावः । अत एवाह । अन्यत्र चेति । एवञ्च । नित्यमिति वाक्येन चान्तस्य मब्विषयत्वबोधने च । अतएव पूर्वन्नेरित्यस्य व्याख्यानावसरे त्रिप्रत्ययान्ताच्चित्यमिति व्याख्यातम् ॥ केचित्तु भावार्थादिमप् । निर्वृत्त इत्यनुवर्त्तते । निर्वृत्त इत्यर्थे भावार्थकप्रत्ययान्तादिमप् । ततस्त्रेः । भावार्थादित्येव । नियमार्थमिदम् । भावार्थं यत्त्रिशब्दान्तन्तत इमप्प्रत्ययो भवत्येवेति । तेन वाक्यस्य व्यावृत्तिः सिद्धैव । ततो नित्यमिति । अत्र निर्वृत्तमित्यस्यासम्बन्धः । त्रिप्रत्ययान्ताच्चित्यमिमप् । तेनान्यत्रापि त्रिप्रत्ययान्तस्य खात न्त्रेण प्रयोगो नेत्यनेन बोध्यते । एवञ्च मप्प्रत्ययो न विधेय इत्याहुः । कुट्टिमाद्यर्थेवमिति । इमबन्तम् । कुट्टिमोऽस्त्री निवद्धाभूरिति यद्यपि कोशे उक्तन्तथापि कुट्टिमा भूमिः । सेकिमोऽसिरितिभाष्यप्रामाण्यात्कुट्टिमशब्दः पुल्लिङ्गोऽपि । व्यञ्जनैरुपसिक्ते । व्यज्यतेऽनेनेतिव्युत्पत्त्या करणल्युडन्तो व्यञ्जनशब्द इत्यभिप्रायेणाह । अन्नादिरसेति । उपसिक्तमेकीभूतम् । न च यदुपसिक्तन्तत्संसृष्टमिति संसृष्टमित्येव सिद्धे उपसिक्त इत्यस्य वैयर्थ्यमिति वाच्यम् । स्याल्यामपि सूपादिनासंसृष्टेयमितिव्यवहारादुपसिक्तस्य ततो भेदात् । ननु तत्प्रत्यन्विति सूत्रे वर्त्तत इत्यस्यानुवर्त्तेर्वर्त्तनरूपेऽर्थे एव प्रत्ययो वाच्यः । हृत्धातुस्त्वकर्मक इति कथमत्र कर्मसामानाधिकरण्यमत आह । अकर्मकेति । फलसमानाधिकरण्यादिति । अभेदेन फलविशेषणत्वादित्यर्थः । फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वम् । अकर्मकत्वव्यवहारस्तु बहिर्भूतकर्मान्वयायोग्यत्वात् । अस्य कर्मत्वे च तदितिनिर्देश एव प्रमाणम् । वस्तुतोऽस्य प्रथमान्तत्वेप्युपपत्तिरित्याशयेनाह । क्रियेत्यादि । परिमुखञ्च । अपपरी वर्जन इति कर्मप्रवचनीयत्वम् । पञ्चम्यपाङ्परिभिरिति समासः । मुखं वर्जयित्वेत्यर्थः । प्रयच्छति गर्ह्यम् । द्वितीयान्तात्प्रयच्छतीत्यस्मिन्नर्थे प्रत्ययो भवति यद् द्वितीयान्तपद-

वोध्यन्तद्रव्यं चेत् । द्विगुणार्थमिति । अनेनोपचारे बीजनिरूपणमुक्तम् । अभिधानस्वाभाव्यादिति । यद्यौपचारिकात्रत्ययस्तदा गर्ह्यं त्वप्रतीतिरन्यथा द्विगुणमयच्छतीत्युक्ते यत्र क्रमेण न्याय्यद्रव्योत्तमर्णेनाधमर्णाय तत्तन्द्रव्यं द्विगुणतामाप्नुवन्त्यपि द्विगुणमयच्छतीति व्यवहारो भवति न च तत्र गर्ह्यं त्वमस्ति हिरण्यद्वैगुण्येऽपि दीयमानत्वस्य शास्त्रसिद्धत्वादिति भावः । अव्ययादावेवेति । अव्ययपूर्वपदकत्व एवेत्यर्थः । उञ्छति । तदित्येव । द्वितीयासमर्थादुञ्छतीत्यर्थे प्रत्ययो भवति । उञ्छनञ्च भूपतितस्यैकैकस्य ग्रहणम् । भाष्ये विशेष इति । एवञ्च हार्दुरिकः कुशाल एव । प्रसिद्धत्वात् । अव्ययीभावइति । पन्थानं वर्जयित्वेत्यर्थकम् । तदाहेति । चकारस्य भिन्नक्रमत्वे तिष्ठतीत्येतदनन्तरमन्वयोजनया पश्चिमन्त्येतिपूर्वसूचस्थस्य इन्तीत्यस्यार्थस्य समुच्चय इति भावः। मोघपदार्थमाह । पन्था इति । मथे विलोडन इति धातोः कर्मणि घञ् । मथ्यते गन्तृभिर्य इति विग्रहः । अव्ययीभावेति । स च प्रकृते कण्ठकृण्ठमित्यर्थे। गुणविशेषः। दुःखम्। चरणमाचासेवा । न तु करणमात्रम्। तेन य आधर्मिकस्तस्य कदाचिद्धर्मफलकग्रहणे धार्मिक इति न प्रयोगः । अव्ययीभाव एति। वीप्सायामित्यादिः । निदुग्ध इति । तेनाहिहुडिरक्षितमुदाहरणं युक्तम् । समवायशब्दस्य स्वरूपपरत्वे बहुवचनासङ्गतिरत आह । बहुवचनादिति । समवैतीत्यस्य प्रविशतीत्यर्थः।स्वयमपि सम्भूहन्नविश्य तदवयवो भवतीति यावत्।यच्च समवैतिशब्दार्थंघटकीभूता या विशेषणीभूता प्रवेशक्रिया तन्निरूपितकर्मत्वविवक्षयासमवायानिति द्वितीया । यदा त्वधिकरणत्वविवक्षा तदा सप्तमी भवति। धर्मचेत्रे कुरुक्षेत्रे समवेता युयुत्सव इति यथा । संज्ञायां ललाट । अत्र संज्ञाशब्देन सम्यक्ज्ञायतेऽनयेति व्युत्पत्त्या प्रसिद्धिविषयः शब्द उच्यते ।सेवके एव च लालाटिकशब्दः प्रसिद्धः । यो हि प्रभोर्भालमभ्यक्षति तदाज्ञापालनाय स एवमुच्यते । भिक्षुर्हि पादविक्षेपमात्रयोग्यदेशमभ्यक्षति न त्वन्यदेशान्तस्य प्रदेशान्तरदर्शने ब्रह्मदर्शनतत्परत्वविघातः स्यात् धर्म्यशब्द व्याचष्टे । धर्म्योऽनुवृत्त इति । अनुवृत्तः । बहुकालमारभ्य सुजनैराराचितः सौजन्यं योग्यता । तेन महिम्ना धर्म्यमित्यत्राप्युपपत्तिः अवक्रयः अवक्रीयतेऽनेन अवक्रयः करणे क्रीञ एरच् । राज्ञा करत्वेन ग्राह्यं यद्रव्यं तदुच्यते । एतच्च कदा-

चिव्रजोभ्योऽधिकजिघृक्षयापि भवतीति धर्म्याभेदः । तदस्यपण्यम् । प्रकृतसमर्थादस्येतिषष्ठ्यर्थे ठक् । यत्प्रयोजनसमर्थम्पण्यञ्चेद्भवति । अत्र पण्यशब्दार्थस्य हेत्वन्तर्भावात्पण्यशब्दस्य प्रयोगो न । प्रसारितंख्यापितम् । हेत्ताविति । वस्तुतो दन्त्यमध्यपाठो युक्तः । गणे तथा दर्शनात् । आयुधमिति । प्रहरणशब्दः करणल्युडन्तः । व्यष्टार्थमिति । स्त्रीद्वारणेऽपि सवर्णदीर्घेण सिद्धेः । न च यस्येतिलोपापत्तिः । इकारोच्चारणसामर्थ्यात् । यदुक्तम्मूले अस्ति परलोक इत्येवम्मतिर्यस्येति तन्नाभीपायमाह । हेत्तिविषय इति । अस्तिनास्तिशब्दौ निपातौ आख्यानाद्वा विधानसामर्थ्यात्प्रत्ययः । दैवपर्याय इति । दैवन्दिष्टमितिकोशात् । व्याख्यानादिति । दिष्टमितिनिर्देशमूलकव्याख्यानादित्यर्थः । क्रियानन्तर्भाव इति । अपूपादिशब्दानां लक्षणाया अनङ्गीकारे अनभिधानादिति । अपूपादिशब्दानां शीलशब्दसामानाधिकरण्येनार्थानभिधायकत्वादित्यपि बोध्यम् । एवं क्रियान्तरान्तर्भावेपि न हेत्तिरभिधानलाभाव्यात् । एकमन्यदिति । प्रज्ञतसूत्रेण प्रत्ययो यश्च परीक्षाकाले विपरीतोच्चारणस्तद्विषये एव । न तु अध्ययने जयो हेत्तोरित्यादौ । अभिधानलक्षणाः कृत्तद्धितसमासा इत्यभियुक्तोक्तेः । नियुक्तं नियतमिति । स्वानुष्ठेयक्रियाव्यापकदानक्रियाकर्म । आणामांसौदनाट्टिठन् । अत्र टो ङीषर्थः । इकार उच्चारणार्थः । नकार आद्युदात्तार्थः । अत एव । विगृह्णीतस्यापि ग्रहणादेव । ओदन इति । अन्यत्र हेतेः सिद्धत्वात् । हेत्तिनिमित्ते तिसूत्रस्य ठञि प्रवृत्तिरिति तु न वाच्यम् । कोपधत्वेन प्रतिषेधस्य सिद्धेः । व्याख्यानमेव । हेत्यादिसम्मतव्याख्यानमेव । अध्यायिनीतिसूत्रे नञ् प्राशस्त्यबोधक इत्याशयेन मूले निषिद्धेति । सन्निवेशपर्यायाविति । प्रस्तारशब्दे प्रेङ्खोऽयम् इति घञ् । सन्निवेशस्य विलक्षणावयवसम्बन्धस्तत्र व्यवहारासंभवात्तद्विशिष्टपरावित्यौ । अधिकरणार्थकप्रत्ययान्तौ वा । अत्रैवायमिति आरण्यकेन भिक्षुणा ग्रामाक्रोशे वस्तव्यमितिशास्त्रन्तदनादृत्यनिकटे योऽरण्यस्थो यो वासस्त्रत्रैवायं साधुरितिवृत्तियन्योऽत्र प्रमाणम् ॥

॥ इति ठगधिकारः ॥

तद्वहति रथयुगप्रासङ्गम् । द्वितीयान्तेभ्य एभ्यो वहतीत्यर्थे यत्प्रत्ययो भव-

ति। यदुक्तम्मूले वत्सानामित्यादि तल्लाभप्रकारमाह। प्रासङ्ग इत्यादि। अयत्र रथाङ्गे किन्तु तत्सदृशे काष्ठविशेषे रूढः। उपधाया इतिवर्त्तत इति। तेन भसंज्ञकस्य समुदायस्य या उपधा तस्या दीर्घनिषेधोऽयमिति प्रतिदीव्न इत्यत्र निषेधो न। अन्य इति। अयत्र कित्। किन्तु धुरो यड्ढकञाविति सूत्रपाठ इति तेषामाशयः। एवञ्चधौरेयक इत्येवरूपम्। कित्वपक्षे आह। मूलपाठे त्विति। खः सर्वधुरात् एकधुरादितिसूत्रनिर्दिष्टयोः सर्वधुरैकधुरशब्दयोः पूर्वकालैकसर्वजरदितिसूत्रनिष्पन्नसमासरूपत्वे नालौकिकप्रक्रियावाक्ये ऋक्पूरितिसूत्रेणाप्प्रत्ययेऽपि परवल्लिङ्गमिति स्त्रीत्वे प्राप्ते आह। सर्वधुरैकधुराविति। सूत्र इति शेषः। तेन प्रत्ययः सर्वधुराशब्दादेकधुराशब्दाच्च। सर्वधुरां वहतीत्येव विग्रहः। तत्र सर्वधुरीणशब्दे यस्येतिलोपेन टापो निवृत्तावप्येकधुर इत्यस्य कथं सिद्धिरत आह। अन्तरङ्गानपीत्यादि। टापो लुगिति। लुक्तद्धितलुकीत्यनेनेति शेषः। संज्ञायां जन्या। अत्र जन्या इतिनिपातनेऽपि प्रक्रियामाह। जनीशब्दादिति। अत्र संज्ञायामित्युपात्तम् तत्र कस्य संज्ञेत्याकाङ्क्षायामाह। जन्या जामातुर्वयस्या इत्यादि। एतेन समुदायेन चेल्लक्षा गम्यत इत्यर्थे इदन्निपातनमित्यर्थादुक्तम्भवति। एतच्च वृत्तिरीत्या मूले व्याख्यातम्। भाष्यसम्मतमप्यत्रमाह। भाष्ये त्विति। जनीशब्दादिति। जायतेऽस्यां गर्भ इत्यर्थे जनधातोर्जनिवध्योरितिवृद्धेः प्रतिषेधे ङ्क्षदिकारादिति ङीषि व्युत्पन्नोऽयम्। एतस्माद्वहतीत्यर्थे यत्। ननु निपातनपक्षे समुदायेन चेल्लक्षा गम्यत इत्यर्थो भवति सम्प्रति त्वन्यत्रापि प्रयोगः स्यादत आह। रूढिरपीति। योगरूढिरित्यर्थः। सा च रूढिः कोशे प्रतिपादितैव। सर्वकालप्रत्ययविध्यर्थमिति। जनीं वहन्ति जन्याः। जनीं वोढारो जन्याः। लुटि रूपम्। जनीमवाप्तुर्जन्या इति। लुङन्तमेतत्। तथा च योगार्थालिङ्क्षिते रूढिः स्वीकर्त्तव्या न तु केवलरूढिरेवेत्याशयेनाह। एवञ्चैतदिति। यदुक्तम्धरणिकोशे जन्यं निर्वादेतिनदुपपत्तिमाह। जनवादे त्विति। करणमात्रोपलक्षणमिति। तदुक्तम्भाष्ये। विध्यत्यकरणेन। विध्यत्यकरणेनेति वक्तव्यम्। अधनुषेति ह्युच्यमानेऽतिप्रसङ्गो भवति। इहापि प्रसज्येत शर्कराभिर्विध्यति। तत्तर्हि वक्तव्यत्र वक्तव्यम्। कस्मान्न भवति शर्कराभिर्विध्यति कण्टकैर्विध्य-

ति । अनभिधानादिति । तदंशे । करणांशे । ननु यत्र करणाप्रयोगस्तत्रातिप्रसङ्ग इत्यत आह । चोरमिति । वशङ्गतः । वशनं वशः । इच्छा । एवञ्चेच्छाप्राप्त इत्यर्थेऽतिप्रसङ्गनिवारणायाह । सर्वस्यापीति । निर्देशादेवेति । पदमितिनिर्देशादित्यर्थः । आबर्हीति । बृह उद्यमन इतिधातोरिन् । दन्त्योष्ठादिः । उत्पाटनयोग्याः । क्षेत्र एव शुष्काः । ते हि लवनेन सङ्गृहीतुमशक्याः । मूले यप्रत्ययश्चेति । तेन धेनुष्याशब्दोऽन्तोदात्तः । इतिवदिति । स्वरूपबोधनतात्पर्यकत्वात् । अन्ये । मुख्याः । नौवयेतिसूत्रे संज्ञाग्रामित्यनुवृत्तेराह । मित्र एवेति । अत एव तुल्यशब्दः सदृशमात्रे रूढः । धर्मफलन्धर्म्य मिति । सुखादिरित्यर्थः । वधार्हः । अर्हेऽर्थे दण्डादित्वाद्यत् । कर्त्तरि ल्तीयेति । मूलेन वणिग्भिः पटादिविक्रयकाले दत्तं यन्मूलाख्यन्द्रव्यन्तेनात्मानमति यच्छंषी क्रियते लाभाख्यो भागः सोऽचानाम्यशब्देन विवक्षितः । आङ्पूर्वान्नमधातोरत एवनिपातनाण्णत्वम् । अन्यथा पोरदुपधादिति । यत्स्यात् ।प्रस्तुतं सीताशब्दं व्याचष्टे । सीतेति । छन्दसोनिर्मिते । छन्दः शब्दोऽत्रेच्छापर्यायः । प्रीणातीति । सुखञ्जनयतीत्यर्थः । हृदयशब्दात् षष्ठ्यन्ताच्छ्रिय इत्यर्थे यत्प्रत्ययः स्यादित्यर्थः । मतजनहलात् । यथासङ्ख्यमत्र विवक्षितम् । सूत्रघटकंकरणशब्दं व्याचष्टे । ल्युट इति । उभयोः । भावकरणयोः।मतस्येति कर्मणि षष्ठी । यदा च भावे प्रयस्तदा ज्ञानकर्मिका कृतिरित्यर्थः । करणे तु ज्ञानकरणमिन्द्रियमात्मा । प्रतिजनादिभ्यइति । अव्ययीभावाभिप्रायेणाह । जनञ्जनमिति । योगविभागे साधकमाह । सर्वेवेदेत्यादि । अन्य इति । अचारुचित्तु चकारस्य प्रत्ययद्वयसमुच्चायकत्वात्वा दर्शनेन ख्यमांत्वस्यैवानेन विधानं स्यादिति योगविभाग आवश्यक इति । समानतीर्थे वासी । सप्तम्यत्र समर्थविभक्तिः । ननु प्रत्ययोत्पत्तिकाले समानतीर्थशब्दाभावात्कथमत्र्यस्तस्मादत आह । यादिप्रत्ययेति । चातुर्थिकाः । चतुर्थाध्यायभवा इत्यर्थः ॥

॥ इति प्राग्धितीयाः ॥

॥ समाप्ताश्चतुर्थाध्यायप्रत्ययाः ॥

प्राक्रीताच्छः। व्याख्यानत इति। अत्र भाष्ये प्राक्क्रीतादिति न वाच्यञ्चाधिकार एव कर्त्तव्य इत्यभिप्रायेण प्राग्वचनङ्गिमर्थमिति प्रङ्गाङ्कृत्वा प्राग्वचने उक्तङ्गिसुक्तम्। सकृद्विधानार्थम्। अधिकारास्सिद्धमिति चेदपवादविषयेऽणप्रसङ्ग इत्युक्तम्। सकृद्विधानार्थमित्यस्य प्राक्क्रीतादु येऽर्थास्तेषु सकृदेवानेन छविधानार्थमित्यर्थः। अपवादविषय इत्यस्य उगवादिभ्यो यदितियद्विषयेऽपि छः प्राप्नोतीत्यर्थः। ततः पुनरथ क्रियमाणेऽपि प्राग्वचने कथमिदं विज्ञायते प्राक्क्रीताद्याः प्रकृतय आहो स्वित् प्राक्क्रीताद्येऽर्था इति। किञ्चातः। यदि विज्ञायते प्राक् क्रीताद्याः प्रकृतय इति स एव दोषः अपवादविषये छप्रसङ्ग इति। अथ विज्ञायते प्राक् क्रीताद्येऽर्था इति न दोषो भवति। समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानो यच्छं वाधिष्यते। यथा न दोषस्तथास्तु प्राक् क्रीताद्येऽर्था इति विज्ञायत इत्युक्तन्तन्मूलकव्याख्यानत इत्यर्थः। अर्थबोधकेष्वेवेति। अर्थबोधनतात्पर्यकेषु तस्मै हितमित्यादिषु। अवध्यवधिमतोः साजात्यात्। अलोन्त्योत्पूर्वउपधेत्यत्र यथा। लोकेऽपि फाल्गुनात्प्राक्। वनात्प्राक् देवदत्तो गत इत्युक्ते माघमासान्तकालस्य वनपूर्वदेशस्यैव चप्रतीतिर्न तु वैपरीत्येनेति सुप्रसिद्धम्। एतेन। अर्थस्यावधित्वस्वीकारेण। इत्युक्तमिति। विशिष्य यदाद्यपवादविधायकसूत्रेषु छयतोः सम्बन्धाभावादेवं कथनन्न युक्तम्। उगवादिभ्य इत्यादिसूत्रेष्वपि सम्बन्धे हि तत्र तया लेख उचित इति तेषाशयः। अपास्तमिति। अर्थस्यावधित्वस्वीकारेण भवदुक्तदूषणस्यानवसरात्। ननु नभ्यञ्चक्रमित्ययुक्तम्। चक्रस्य नाभिहितत्वाभावादत आह। नभ्यञ्चक्रमिति। इवार्थमुपपादयति॥ सच्छिद्र इति। अष्टाध्यायीति। अथ यो नभ्यार्थो वृक्षः कथन्तत्र भवितव्यम्। नभ्यो वृक्षः नभ्या शिंशपेति। तादर्थ्यात्तद्धितेन भविष्यति नभ्यार्थो नभ्य इति। नाभि नभञ्चेति गवाद्यन्तर्गणसूत्रमेव भाष्ये व्याख्यातम्। भाष्योक्तसभ्यन्तर्गणसूत्रमाह। मूले शुन इति। नस्तद्धित इति टिलोपवारणायाह। चेनेति। यद्यपि सभ्यसारणीत्तरं शु अन् प इतिस्थिते वार्णादाङ्गमितिन्यायेन प्राप्तस्य टिलोपस्य ये चाभावकर्मणोरिति प्रकृतिभावेन वारणे कृते ततः पूर्वरूपोत्तरम्पुनष्टिलोपो भ्रष्टावरसत्वान्न भविष्यतीति कथञ्चकारेण तद्विधानम्। तथापि तौ सदितिनिर्देशेन भ्रष्टावसरन्यायोऽत्र शास्त्रे ना

श्रीयत इति चकारस्य प्रकृतिभावसमुच्चायकत्वमावश्यकमिति । गणसूत्रान्तरमेवाह मूले,। ऊधसोऽनङ्चेति । विभाषा हविरपूपादिभ्यः । अत्र सूत्रे हविःशब्देन विशेषणाङ्ग्रहणाद्धविष्यशब्दस्य कथं सिद्धिरत आह । अविः शंब्द इति । नन्वपूपशब्दग्रहचर्याद्धविःशब्देनापि स्वरूपग्रहणमेव भविष्यति । एवं सति स्वंरूपमिति ग्रहणस्याप्यनुग्रहो भविष्यतीत्यत आह । विभाषा हविरित्यत्र त्विति । अयमाशयः । उगवादिभ्यो यदितिसूत्रे हविरपूपादिभ्यो विभाषाया यत्। हविरपूपादिभ्यो विभाषाया यञ्चवति पूर्वविप्रतिषेधेन । हविरपूपादिभ्यो विभाषाया अवकाशः । आमिक्ष्यम् । आमिक्षीयम् । यतोऽवकाशः शङ्कव्यन्दारु । पिन्वयः कर्पासः । इहोभयमाप्नोति । चरव्यास्तण्डुलाः । यद् भवति पूर्वविप्रतिषेधेनेति भाष्ये उक्तम् । तेन स्वरूपविधिस्तदंशे न भवतीति । चरव्या इत्यत्र चर्वधिकरणकं हविरुपचाराच्चरुशब्देनाभिधीयते । खलयवमाष । व्याख्यानादिति । भाष्यसम्मतव्याख्यानादित्यर्थः । तत्र हि समानार्थावेतौ हृषन्शब्दश्च । ब्रह्मन्शब्दो ब्राह्मणशब्दश्च । तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भविष्यति । अविरविकन्यायेन हृषाय हितमिति विग्रह्य हृष्यमिति भविष्यति हृष्णे हितमिति विग्रह्य वाक्यमेव । ब्रह्मणे हितमिति विग्रह्य ब्रह्मण्यमिति भविष्यति । ब्राह्मणेभ्यो हितमिति विग्रह्य वाक्यमेवभविष्यतीत्युक्तम् । आत्मन्विश्वजन । व्याख्यानादिति । आत्मन्विश्वजनशब्दाभ्यां भोगोत्तरपदाच्च प्रीतिपदिकात्तस्मै हितमित्यर्थे खः प्रत्ययो भवतीति वृत्तिसम्मतव्याख्यानादित्यर्थः । भोगशब्दस्य शरीरवाचकत्वे मानमाह । अहिरिवेति । कर्मधारयादेवेतीति । सर्वसमासेभ्योऽस्यान्तरङ्गत्वात् । रथकारपञ्चमेष्विति । रथकारः पञ्चमो येषान्तेषु चतुर्षु ब्राह्मणादिष्वित्यर्थः, रथकारश्च माहिष्येण करण्यान्तु रथकारः प्रजायत इत्यत्र प्रसिद्धः राजन्यादिन्यायात्सुत्वम् । माहिष्यः । वैश्याच्छूद्रायामुत्पन्ना कन्या करणी । पुरुषाद्यधिकारसमूहतिनक्रतीष्ठितिवात्तिके निपातनात्तृतीयाया अलुक् । सामर्थ्यादिति । वधादिचितयान्वययोग्यबलादित्यर्थः । तेनेति निर्दिष्टेव । तृतीया निर्दिष्टेव । तदर्थे विकृतेः प्रकृतौ । अत्र तदर्थमिति सामान्ये नपुंसकम् । व्यत्ययो बहुलमिति सप्तम्याः प्रथमा । प्रकृतिरुपादानकारणन्तत्र्यौत्तरावस्थाविशिष्टं वस्तु विकृतिरित्युच्यते ।

तदिति सर्वनाम्ना विकृतिः प्रत्यवमृश्यते । प्रकृतेस्तदर्थत्वकथनेनानन्यार्थत्वं लभ्यते विशेषणसामर्थ्यात्तेन न प्रकृतेर्विकृत्यर्थत्वसम्भावना यत्र तत्र प्रत्ययः किन्तु तदर्थत्वनिश्चय एव तत्रैवानेन सूत्रेण प्रत्ययः । अस्य । विकृतिवाचकशब्दस्य । न प्रथमत्वम् । न सूत्रोच्चारितप्रथमशब्दबोध्यत्वम् । अर्थमर्थकादिति ।तस्यापत्यमित्यादौ तथैव दर्शनादिति भावः । स्रष्टार्थमिति । हितशब्दस्याप्यनुवृत्त्या विकृतये हिता या प्रकृतिरित्यनेन तदर्थत्वलाभेऽपि पूर्वोक्तनिश्चयस्य स्रष्टतया लाभार्थन्तदर्थग्रहणमित्यर्थः । सक्तुभ्यो यवा इत्यत्र तु न । सक्तूनां यवविकृतित्वाभावात् । किन्तु धानाविकृतित्वमेव । सूत्रे उभयोपादानसामर्थ्याच्च परस्परं प्रकृतिविकृतिभावस्तत्रैवायमत्ययः । तेन यत्रास्यर्थश्चर्मौपादीयते तत्र न असेरयोविकारत्वान्न तु चर्मणः । चर्मणस्तु कोशप्रकृतित्वम् । छदिरुपधिबलेः । सौत्रं समाहारद्वन्द्वस्य पुंस्त्वम् । बलिशब्दोऽत्रोपहारपरः । करोपहारयोः पुंसि बलिः प्राख्यङ्गजे स्त्रियामित्यमरः । यथाकथञ्चिदिति । नह्यत्र तदुत्पत्तिप्रयोजकनाशप्रतियोगित्वरूपस्य प्रकृतित्वस्य स्वरसतः प्रतीतिरिति भावः । आर्षभ्य इत्यत्राप्येवमिति । यथाकथञ्चिदेव । यस्योत्पत्तेः प्राक्काले सत्त्वे सति तत्सम्पादकत्वत्वत्रैव प्रकृतित्वव्यवहारस्य सुप्रसिद्धत्वात् । अत एव भाष्ये प्रकृतसूत्रे प्रकृतिविकृतिग्रहणन्निवर्त्तियते तच्चावश्यन्निवर्त्त्यम् । इहार्थमुत्तरार्थञ्चेहार्थन्तावत्बालेयास्तण्डुलाः ।उत्तरार्थम्।ऋषभोपानहोर्जः ।आर्षभ्यो वत्सइति । गुणान्तरयुक्ता हि तण्डुला बालेयाः । गुणान्तरयुक्तश्च वत्स आर्षभ्य इति प्रत्तिपादितम् । तत्रैव कैयटः । गुणान्तरयुक्ता हीति । वत्सावस्थायां यो गुणः सन्निवेशजत्वेनो लाक्षादिकृतलौहित्यादिलक्षणो वा तदपेक्ष्यप्राक्तनगुणयुक्ता इत्यर्थः । गुणान्तरयुक्तश्च वत्स इति । सुजातावयवः संहननवान्महाप्राण ऋषभावस्याप्राप्तये यदा परिपोष्यते न तु दानविक्रयार्थन्तदा तादर्थ्यस्य सम्भव इति । मूले उपधिशब्दात्स्वार्थे इष्यत इति । उपपूर्वाद्धाञ उपसर्गे घोः किः । अत्र भाष्ये उपध्यर्थमितिप्रत्ययानुपपत्तिः उपध्यभावात्।उपध्यर्थमितिप्रत्ययस्येत्यानुपपत्तिः ।किं कारणम् ।उपध्यभावात् ।विकृतेः प्रकृतावभिधेयाभावेन भवितव्यम् न चोपधिसंज्ञिकाया विकृतेः प्रकृतिरस्ति । यद्धि तद्व्याङ्गन्तदोपधेयमित्युच्यते । सिद्धन्तु छदन्तस्य स्वार्थेऽविधानात् ।सिद्धमेतत् ।कथम् ।छदन्तस्य स्वा-

र्थेऽवक्तव्यः। उपधीयते उपधेयम्। उपधेयमेवौपधेयमित्युक्तम्। अजपेक्षयेति। पूर्वविप्रतिषेधे प्रमाणन्तु उगवादिभ्य इतिसूत्रस्थं यञ्ञावञः पूर्वविप्रतिषिद्धमितिवार्त्तिकमेव। यतोऽवकाशः। शङ्कव्यन्दारु। पिचव्यः कर्पासः। अजोऽवकाशः। चार्धम्। वारचर्म्म। सनङ्गु नाम चर्मविकारस्तस्मादुभयम्प्राप्नोति। सनङ्गव्यं चर्म। अत्रस्यावकाशः। औपानह्यन्दारु अजः स एव। उपानन्नाम चर्मविकारः तस्मादुभयम्प्राप्नोति। औपानह्यचर्म इति। तदस्य तदस्मिन्स्यादिति। अत्र वाक्यद्वयम्। तदस्य स्यादिति। तदस्मिन्स्यादिति च। आद्ये तदिति प्रथमासमर्थविभक्तिः। षष्ठ्यर्थे च प्रत्ययः। द्वितीये सप्तम्यर्थे। स्यादित्यनेन सम्भावितैककर्तृका सत्ता उच्यते। सूत्रेऽस्येत्येकवचनमविवक्षितम्। अतएवासामिति बहुवचनोपादानं मूले सङ्कच्छले इष्टकानामाधिक्यं दृष्ट्वा प्राकारस्य ताभिः साध्यतां ज्ञात्वा एवमुच्यते। सम्भावने लिङ्। देशस्य च दार्ढ्यं समत्वोच्चत्वादिसद्गुणवत्तान्दृष्ट्वा प्रासादोऽस्मिन्स्यादिति सम्भावना भवति। नेह प्रकृतिविवक्षातिभावो विवक्षितः। लौकिकीं विवक्षामिति। एतेनैकेनेतिकरणेन सर्वदोषपरिहारसम्भवात्स्यादितिसम्भावनाविषयसत्ताप्रत्ययार्थमेव सूत्रे न वाच्यमिति ध्वनितम्॥

॥ इति छयदधिकारः ॥

आर्हादित्यस्य साधुत्वायाह। अत्राहतीति। एतेनाचाङा अर्हीयशब्दस्य समासः। अर्हीयशब्दस्य तदर्हमित्यत्र निर्दिष्टोऽचप्रत्ययान्तोऽपीति तस्याप्यवधित्वमितिशङ्कायां नावकाशः। आढ्यानादिति। ढ्यादिसम्मतयाढ्यानादित्यर्थः। प्रकृतसूत्रे परिमाणशब्दउपात्तस्तत्र यदिपरिच्छेदकमात्रपरस्तदा परिमाणग्रहणेन मिते सङ्ख्याग्रहणवैयर्थ्यापत्तिरतो भाव्ये परिमाणस्य सङ्ख्यातो भेदः प्रदर्शित ऊर्द्धमानमित्यादिना। एवञ्चोन्मानस्य परिमाणशब्देन ग्रहणन्न प्राप्नोतीत्याशङ्क्य समाधत्ते। यद्यपीत्यादिना। ऊर्द्धं यदिति। अत्र यदितियेनेत्यर्थकमव्ययम्। ऊर्द्धं येन मीयत इत्यर्थः। परिच्छेदकेन पाषाणादिना तुलादौ स्थापनोत्तरं परिच्छेद्यपरिच्छेदकयोरूर्द्धाधरभावेन यदमनन्तदुन्मानमुन्मितिस्तत्करणमुन्मानम्। परिमाणन्तु सर्वतः। आरोहपरिणाहाभ्यां येन मीयते तत्परिमाण-

म्। आरोह उच्छ्रायः। परिणाहो विस्तारः। आभ्यां खञ्जिन् वर्त्तमानाभ्यां येन काष्ठादिनिर्मिते नाटककुड्यादिनाप्रस्थादिना च मीयते तत्प्रस्थादि परिमाणशब्देनोच्यते। आयामस्त्विति। आयामो दैर्घ्यम्। आयाम इत्यस्य येन मीयत इति शेषः। वस्त्रकाष्ठादिगतन्दैर्घ्यं येन मीयते हस्तादिना तत्प्रमाणमित्यर्थः। तच्च दीर्घस्य वस्त्रादेः परिच्छेदकं यद्यच्चोर्ध्वाधरदिक्संबद्धं यज्जलमित्यादि तत्परिच्छेदकमत एव जानुदघ्नजलमित्यादौ प्रमाणे द्वयसच्दघ्नजिति प्रत्ययसिद्धिः। सङ्ख्या वाच्या तु सर्वतः। सङ्ख्या एकत्वद्वित्वादि सर्वतः सर्वस्माद्वाच्या विलक्षणा। पूर्वोक्तपरिच्छेदकेभ्यो विलक्षणा। ऊर्ध्वमानादिकन्न करोति। उन्मानादेरपि परिच्छेदङ्करोति। द्वे तुले इत्यादिव्यवहारात्। एवञ्च सङ्ख्यायाः परिमाणापेक्षया विलक्षणत्वात्प्रकृतसूत्रे ग्रहणम्। तदुक्तभाष्ये। भेदमात्रं ब्रवीत्येषा नैषा मानङ् कृतञ्चन। एवञ्च कृत्वा सङ्ख्यायाः पृथग्ग्रहणङ्क्रियत इति। कृतञ्चनेत्यस्य न कृतञ्चित्सन्निवेशादेः सङ्ख्या मानम्। सन्निवेशादिनिरपेक्षमानमित्यर्थः। अत एव द्वौ मेरुसर्षपाविति भवति। सूत्रस्थभाष्यस्वरस इति। तत्र हि असमास इति किमर्थम्। परमनिष्केण क्रीतम्परमनैष्किकमिति प्रत्युदाहृतम्। तत्र कैयटः। ठञेवात्र भवति। निष्कशब्दस्य परिमाणवाचित्वात् पूर्वेणाप्राप्ते ऽनेन ठञ्विधीयत इति। एवञ्च निष्कस्योन्मानत्वेन तत्र पर्युदासपरभाष्यप्रामाण्येनोन्मानस्यापि तत्र ग्रहणम्। परिमाणान्तस्येत्युत्तरपदवृद्धिः। प्राणपर्युदासात्तत्राप्युन्मानं परिमाणपदेन गृह्यते। यस्मिन्सूत्रे यस्य पदस्य स्थितिस्ततोऽग्रिमसूत्रे संबन्धे सति तत्रानुवर्त्तत इति व्यवहार इत्यतः सप्तदशेत्यनुपपन्नमत आह। सप्तदशेति। एतेन। उक्तार्थेन। सङ्ख्याया इत्यस्यानुवृत्तिरुक्तेति। तदनुवृत्तौ तस्मादित्युत्तरस्येत्यनेनोत्तरत्वस्य लाभो भवतीत्येतदर्थमुत्तरपदस्येति प्रकृते नानुवर्त्तनीयम्। तथा च कथम्परमनैष्किकमित्यत्र वृद्धिरिति भावः। वाक्यभेदेनेति। संख्याया इति पञ्चमीनिर्देशादुत्तरस्येत्युपस्थितम्। आदेः परस्येतिपरिभाषा चोपस्थिता। तदपेक्षयापरिमाणान्तस्येत्यवयवषष्ठी। एवञ्च परिमाणान्तावयवस्य सङ्ख्याया उत्तरस्यादेरचो वृद्धिरित्यर्थः। असङ्ख्यापूर्वपदकेऽपि वृद्धेः प्रवृत्त्यर्थं परिमाणान्तस्येतिपृथग्वृद्धिविधायकम्। तस्य च परिमाणान्तस्याचामादेरचो वृद्धिरित्यर्थः। अत एव। वाक्यभेदस्वीकारा-

देव । परिमाणान्तस्येत्यनेनाप्युत्तरपदस्यैव वृद्धिविधानमित्यत्र साधक माह । संङ्ख्याया इत्येतदिति । साहचर्यादिति । आरभ्यसामर्थ्यादित्यपि बोध्यम् । संङ्ख्यायामिति । असंङ्ख्ये ति तत्र पर्युदासस्य प्राप्तेरिति भावः । ज्ञापकपरेति । संबत्सरशब्दस्य ज्ञापकपरेत्यर्थः । एतेन । वक्ष्यमाणप्रकारेण । अपरिमाणत्वादिति । निष्कमष्टाधिके स्वर्णशते दीनारकर्षयोः । वक्षोऽलंकरणे हेमपात्रे हेमपलेऽपि चेतिकोशात् । इदम् । परिमाणशब्देनोन्मानस्यापि ग्रहणम् । ज्ञापिते त्विति । तदन्तविधौ ज्ञापिते त्वित्यर्थः । अत्र ज्ञाप्यं वचनन्तु एतत्प्रकरणस्थसूत्रीयप्रकृतिशब्दस्तदन्तस्यापि बोधक इति । फलम्पूर्ववेत्याशयेन मूले पूर्ववेत्युक्तम् । तन्निषेधः स्यात् । तदन्तविधिनिषेधः स्यात् । इत्यस्यापीति । अन्यथा तदन्तविधौ गोशब्दान्तादिधीयमानो यत्केवलगोशब्दान्न स्यात् । प्रत्ययविधिविषयेण व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यनेन निषेधात् । सिद्धान्तरीत्याह । व्यपदेशिवद्भाव इति । न तावदेवेति । द्राभ्यां शूर्पाभ्यां क्रीतेतिलौकिकविग्रहसूचिता । ननु पूर्वपदवृद्धिमादाय भविष्यतीत्यत आह । पूर्वपदस्येति । उत्तरसूत्रे ति । सङ्ख्याया अतीतिसूत्रेत्यर्थः । असम्भवात् । शतस्याशते वृत्यसम्भवात् । किन्त्वशतेऽभिधेय इत्यर्थः प्रत्ययार्थविशेषणत्वे । निषेध इति तु फलितार्थकथनन्तदाह इत्यत इति । शतम्परिमाणमस्येत्यादौ सङ्ख्येयवाचकात्प्रत्ययः । यः सङ्घः प्रत्ययार्थः स वस्तुत एकस्मान्न भिद्यत इत्यर्थः । सङ्ख्यायाः संज्ञासङ्घसूत्रेतिसूत्रेण कन्प्रत्ययं शाटकशतमिति । अत्र प्रकृत्यर्थत्वमन्यस्य सङ्ख्येयस्य प्रत्ययार्थत्वमन्यस्येति स्पष्टमेव । यत्र निषेधस्तत्र तु यस्य परिमाणपदेन ग्रहणन्तन्नान्यत्प्रत्ययार्थादित्यर्थः । लुगन्ते ति । सङ्ख्याया अतीतिसूत्रेण जातस्य कनोऽद्वार्थपूर्वेति लुक् तदन्तेत्यर्थः । द्वन्द्वगर्भेति । तिश्च श्च तिश्रतीः तावन्ती यस्य सा तिश्रदन्ता न तिश्रदन्ता अतिश्रदन्ता सा सङ्ख्या प्रकृतित्वेनाश्रीयत इत्यर्थः । प्रत्ययग्रहणपरिभाषयैव सिद्धेऽन्तग्रहणस्य प्रयोजनमाह । अन्तग्रहणमिति । न स्यादिति । एकसप्ततिशब्दस्य न तिप्रत्ययान्तत्वमिति भावः । वतोरिड्वा । बहुगणेतिसूत्रेण वत्वन्तस्य सङ्ख्यासंज्ञा । व्याख्यानादिति । वतोरिति पञ्चमीनिर्देशात्तन् इतिप्रथमायाः षष्ठ्यन्तत्वमित्यर्थप्रतिपादनपरभाष्यकारीयवचनप्रामाण्यादित्यर्थः । च्च चरेष्ट इतिवट्टिप्रत्ययविधानेनैव सिद्धे प्रत्ययाधिकारापठितेट्शब्दसट्शब्द-

शब्दोच्चारणेनागमत्वमनुमीयते । अन्यथा । योगविभागाभावे । नासामर्थ्यमिति । न प्रत्ययेनासामर्थ्यमित्यर्थः । समानाधिकरणसमास एवेति । समानाधिकरणपदकसमास एवेत्यर्थः । तेन षष्ठीसमासेन विग्रहे ततो जातस्य प्रत्ययस्य न लुक् । इति शेष इति । तदुक्तभाष्ये । द्विगोर्लुकि तन्निमित्तग्रहणङ्कर्त्तव्यम् । द्विगोर्निमित्तं यस्माद्वितस्तस्य लुग्भवतीति वक्तव्यम् । इह मा भूत । द्वाभ्यां शूर्पाभ्यां क्रीतम् द्विशूर्पम् द्विशूर्पेण क्रीतन्द्विशौर्पिकमिति । ननु यदि तन्निमित्तग्रहणङ्क्रियते समाहारद्विगोः परस्य लुग्न प्राप्नोतीत्यत आह ।समाहारद्विगोरिति । अनभिधानादिति । तदुक्तभाष्ये । इहास्माभिस्त्रैशब्दं साध्यम् । द्वाभ्यां शूर्पाभ्यां क्रीतम् द्विशूर्पमिति । द्विशूर्प्या क्रीतमिति । तत्र द्वयोः शब्दयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भविष्यति अविरविकन्यायेन । द्वाभ्यां शूर्पाभ्यां क्रीतमितिविग्रह्य द्विशूर्पमिति भविष्यति । द्विशूर्प्या क्रीतमितिविग्रह्य वाक्यमेवेति। इदम् । असंज्ञायामित्येतत् । आदेशस्येति । प्रत्यादेशस्येत्यर्थः । द्विचिपूर्वाद्विष्कात् । अत एव । स्पष्टप्रतिपत्त्यर्थत्वादेव । न तु पूर्वशब्दोऽचाव्यात्यादिवारकः पञ्चमीनिर्द्देशादेव पूर्वशब्दार्थलाभात्। भाष्ये उक्तम्।तत्र हि द्विचिभ्यान्द्वैयोग्यम् । द्विचिभ्यामिति यदुच्यते तद्वैयोग्यमिति द्रष्टव्यम्।किमिदन्द्वैयोग्यमिति द्वयोर्योगयोर्भवम् द्वियोगम् । द्वियोगस्य भावो द्वैयोग्यमिति।एतेन द्विचिभ्यामित्यस्योभयशेषत्वमित्युक्तम् न च द्विचिभ्यामित्यस्याद्यः पूर्वयोगस्तच्छेषत्वमनेन प्रतिपाद्यत इति वाच्यम् । तद्वैषं विजानीयात् अविशेषेणेत उत्तरन्द्विचिभ्यामिति तदाचार्यः सुहृल्लाभान्वाचष्टे द्विचिभ्यान्द्वैयोग्यमिति भाष्यञ्चतेव विस्तादिति-सूत्रशेषत्वस्य बोधनात्।इदम्।बहुपूर्वादिति यत्। तदुक्तं द्विचिभ्यामिति पूर्वसूत्र एत्र।बहुग्रहणङ्कर्त्तव्यम्। बहुनिष्कम्। बहुनैष्किकम्। बहुविस्तम्। बहुवैस्तिकमिति । न सम्बध्यत इति । एतद्बीजन्तूक्तमेव । स्पष्टार्थत्वमुपपादयति । कन्प्रत्यय इति । इष्टासिद्धेरिति । इकन्प्रत्ययपक्षे पुंवद्भावे यस्येतिलोपे खारिक इति कन्पक्षे तु खारीक इति भविष्यतीतीष्टासिद्धिरित्यर्थः । द्रव्यमेव गृह्यत इति । एवञ्च द्रव्यत्वावच्छिन्नान्वितेऽपिदाने तत्पदसङ्ग्राह्यविशेषधर्मावच्छिन्नान्वये वा धकाभावः ।द्रव्यवान् घटवानितिवत् । प्रकृतसूत्रान्यथासिद्धिम्परिहरति । सोऽस्यांशेति । धनपतिसंयोग इतीन्नि । धनपतेः संयोगो धनपतिसंयोगः । संयु-

ज्यतेऽनेनेति संयोगः। यागादिश्च संयोगपदेन विवक्षितः। संयोगपदार्थघटक-युज्धात्वर्थक्रियायाश्चनपतेरिति षष्ठ्यर्थकर्तृत्वस्यान्वयस्तदेतद्बोधयितुमाह। संयुज्यन्त इति। दीयत इत्यस्य पृथगन्वये साहित्याभावाद्वडादीनान्तद्धो न प्राप्नोतीत्यत आह। इन्द्रस्येति। रक्षानिवेश इत्यत्र रक्षाया निवेश इति षष्ठीसमासः। वाक्यघटकषष्ठ्यानिमित्तनिमित्तिभावार्थकतया समासस्य तादृशसम्बन्धविशिष्टेऽर्थे शक्तिस्तदभिप्रायेणाह। रक्षानिमित्त इति। निर्वेशो भृतिर्भोगयोरित्यमरः। अत्र मानमिति। रूढ्यैवाच ग्रहणमित्यत्र मानमित्यर्थः। यत्तु प्रकृतसूत्रेऽर्धशब्दो भागवाचकस्तात् तदा भागस्यावयविसापेक्षत्वादसामर्थ्यान्न प्रत्ययो न भविष्यतीत्यतोऽत्र सूत्रे रूढ्यैवग्रहणमिति मतन्तद्दूषयति। असामर्थ्यं त्वितिनित्यसापेक्षत्वन्दर्शयति। अर्धमित्युक्त इति। भारभूतत्वमिति। अत्र भारशब्दो भावप्रधानः। भूत इत्यत्र भूप्राप्तावितिधातोः कर्त्तरि क्तः। एवञ्च भारत्वप्राप्त इत्यर्थः। तच्च भारभूतत्वमर्थानाञ्च तु शब्दानामितिकथञ्चारभूतेभ्यो वंशादिभ्य इतीत्यत आह। वंशादिशब्दानामिति। एतद्व्याख्यापक्षेसमानवचनकत्वन्तर्हि स्यादत आह। सौत्रमिति। एवञ्च प्रत्ययो बहुलमित्यनेनास्य सिद्धिरिति भावः। हरति। देशान्तरम्प्रापयति चोरयतीति वा। वहति। उत्क्षिप्य धारयति। आवहति। उत्पादयतीत्यर्थः। आद्यव्याख्यानमेवेति। द्वितीयव्याख्याने भारादित्येकवचनार्थस्य सर्वथा बाध एव भवति। एवं भारभूतेभ्य इत्यस्य गुरुत्ववद्भ इत्यर्थो वाच्यः। एवञ्च वंशादीनां भारभूतत्वाव्यभिचाराद्वंशादिभ्य इत्येतद्विशेषणतया तस्योपादानस्य व्यर्थत्वापत्तिश्चेति भावः। ऐज् नेति। ऐचो निषेधसन्नियोगशिष्टत्वात्। लुगभावमुपपादयति। अन्यतरस्यामित्यादि। आढकाचितैलतः। पुनः खग्रहणादिति। यदि ततोऽन्यतरस्यामित्यस्यानुवृत्तिः स्यात्तदा खस्यापि तत एवानुवृत्त्या विधौ सिद्धे प्रकृतसूत्रस्थ खग्रहणं व्यर्थं स्यात्। अत एव। अन्यतरस्यांग्रहणानुवृत्तेः सूत्रकारासम्मतत्वादेव। उत्तरेण। संख्यायाः संज्ञेत्यनेन। ध्वनितमिति। ब्रुव हि तद्दृश्य परिमाणं संख्यायाः संज्ञासंघसूत्राध्ययनेष्वितिपठित्वा संख्यावाचकेभ्यः प्रत्ययानुदाहृत्यान्येभ्योऽपि दृश्यते खारशतायर्थम्। खारशतिको राशिः। खारसहस्रिको राशिरित्युदाहृतन्तेन ध्वनितमित्यर्थः। वार्त्तिकवचनप्रामाण्यादकारान्तोऽपि खारशब्दोऽस्ति। परिच्छे-

दकमात्रमिति। अत्र मात्रपदेन पारिभाषिकस्यैव ग्रहणमितिनियमश्चच्छेदः। अनभिधानादिति। अत्रैव भाष्ये सङ्ख्यादिष्वर्थेषु यथा प्रत्यय इष्यते तथाऽन्यत्रापि प्रत्ययसिध्यर्थञ्जीवितपरिमाणे चोपसङ्ख्यानं कर्त्तव्यम्। षष्टिर्जीवितपरिमाणमस्य षाष्टिकः। सांप्रतिकः। जीवितपरिमाणे चेत्यनर्थकम्। कालादितिसिद्धत्वात्। जीवितपरिमाणे चेत्यनर्थकं वचनम्। किङ्कारणम्। कालादितिसिद्धत्वात्। कालादित्येव सिद्धम्। इह यस्य षष्टिर्जीवितपरिमाणम्। षष्टिरसौ भूतो भवति तच्च तमधीष्टो श्रुतो भूतो भावीत्येव सिद्धम्। अवश्यञ्चैतदेवं विज्ञेयम्। इह वचने हि लुक् प्रसङ्गः। इह हि क्रियमाणे लुक् प्रसज्येत। द्विषाष्टिकः। त्रिषाष्टिकः। अनेन सति लुग्भवति। तेन सति कस्माच्च भवति। आर्हादित्युच्यते इत्युक्तम्। एतेन भाष्यग्रन्थेन द्विषाष्टिक इत्यादौ लुगभाव एवेष्ट इति लभ्यते। यदि च द्विषष्टिशब्दादपि तमधीष्ट इति प्रत्ययः स्यात्तदा लुक् स्यादेवेत्यनभिधानभाष्यप्रामाण्यान्निर्णीयत इति। ननु समुदायस्य कथङ्कालवाचकत्वमत आह। कालादित्यधिकारेऽपीति। रमणीयशब्दात्प्रत्ययं वारयति। रमणीयेति। अनभिधानादिति। प्रस्तुतसूत्रस्थभाष्य एव रमणीयादिभ्यस्तेन प्रत्ययातिप्रसङ्गमाशङ्क्यार्थ मतमेतत्। काले दृष्टः शब्दः कालशब्दः कालं यो न व्यभिचरतीति न रमणीयादिष्वतिप्रसङ्गोभवतीत्युक्तन्तेन तेभ्यः प्राप्यभावो निर्णीयते। केचित्तु सोऽस्येत्यनुवृत्त्यैव सिद्धे तदस्येत्यस्योपादानमेतद्विहितस्यार्हीयत्वनिवृत्त्यर्थम्। तेन द्विषाष्टिक इत्यत्र न लुगित्याहुस्तन्न षूयति। तस्मात्सामर्थ्यादिति। काकवाशितेनेवेतिन्यायेन काकशब्देन न शास्त्रबोध्योऽर्थः प्राप्यते तथाऽत्राप्यतस्मात्सामर्थ्यान्नाऽनार्हीयत्वप्राप्तिरिति। तेन। तदल्पविधिस्वीकारेण। ह्रस्वयोरितिवदितिदृष्टान्तेन तच्च यथावृत्तिविषये सङ्ख्यापरत्वन्तथाचापीति सूचितमित्याशयेनाह। वृत्तिविषय इति। वृत्तिकारोक्तरीत्या मूलोक्तं सूत्रशब्दस्य प्रयोजनन्न युक्तमिति सूचयन्स्वयन्तत्प्रयोजनमाह। परे त्विति। पञ्चकमध्ययनमित्यत्र पञ्चकशब्द आवृत्तिरूपसंख्यायां वर्त्तत इत्याशयेनाह। पञ्चावृत्तय इति। प्रयोग इति। स्तोमशब्दस्य प्रयोग इत्यर्थः। ननु यदि स्तोमशब्दः समूहपरस्तदा स्तुतिः स्तोम इति सामानाधिकरण्यानुपपत्तिरत आह। स्तुतिः स्तोम इति। एकवचनान्ताः। अत एव विंशत्याद्याः सदैकत्व इतिकोश-

सङ्गतिः। वार्त्तिककृत इति। अत एव वार्त्तिककृतोक्तमनारभ्यो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिष्विति। अत्र वार्त्तिककृत इत्यनेन यावतां व्युत्पादनं सूत्र कृता कृतन्तेष्वव्युत्पन्नत्वकल्पनन्न युक्तङ्किन्त्वनुक्तसाधुत्वानामेवेतिसूचितमत एव भाष्यकृतोक्तन्नासूया कर्त्तव्या यत्नानुगमः क्रियते इति। अत्र कैयटः। अननुगमो हि दोषाय। अग्रक्यो वानन्त्यात्सर्वशब्दानुगमो न त्वनुगम एव स्वप्रज्ञापराधादशक्यार्थविशेषनिश्चयत्वाद्दोषत्वे नोद्भावनीय इति। दोषायेति। अनुगममन्तरेण मन्दबुद्धीनामनुग्रहासम्भवात्। वस्तुतो न सोऽप्याचार्यस्य दोष इत्याह। अशक्य इति। अनुगमस्तु सर्वथा नाचार्यस्य दोषायेत्याह। न त्विति। अनुगमविषयेषु विंशत्यादिषु अर्थविशेषानिश्चयः स्वप्रज्ञापराधजो न तु तत्र सूत्रकृदपराध इति भावः। विंशत्वारिंशतोः। व्यत्ययेन पञ्चम्यर्थे षष्ठी तदभिप्रायेणाह। आभ्यामिति। तदर्हति। द्वितीयासमर्थादर्हतीत्यर्थे प्रत्ययो भवति। अर्हतीत्यस्य योग्यो भवतीत्यर्थः। योग्यता च क्रियायामेवेति क्रियावाचकपदाध्याहारेणेति श्वेतेच्छ्वमित्यत्र तत्रभुमितिपदाध्याहारेण व्याख्यातम्। इत्यनुरोधेनेति। तत्र हि नित्यग्रहणं प्रत्ययार्थविशेषणमित्युक्तम्। दण्डादिभ्यः। यदिति त्वनुवृत्त्या लभ्यते। अपपाठ इति। अत्र भानन्तु अचो यदिति सूत्रस्थभाष्यमेव। तथाहि। तत्र हि हनोवा यद्वधश्च वक्तव्य इति वार्त्तिकान्वध्यः। वाच्यः। तद्धितो वा। वधमर्हति वध्यः। उभयथापि वध्य इत्येतत्प्रतीतेनाव इत्याद्युदात्तम्। तद्धितस्यासान्तत्वे तु तदन्तस्यान्तोदात्तत्वं स्यादिति तद्धितोवेतिसमानत्वेनाभिधानमसङ्गतं स्यादिति। लक्षणया सिद्धे वार्त्तिकवैयर्थ्यमित्यभिप्रायेणाशङ्कते। यद्यपीति। मुख्यार्थेभ्यः। शक्यार्थैरेव्यः। तेन यज्ञशब्दस्य पाके लक्षणया यज्ञमर्हति सूद इत्यत्र न॥

॥ इत्यार्हीयाः ॥

पारायणतुरायणचान्द्रायणं वर्त्तयति। पारायणशब्द आदित आरभ्य समाप्तिपर्यन्तं ग्रन्थस्याध्ययनस्यवाचकः। तस्य वर्त्तनं यद्यपि गुरुभिर्योऽयमाख्य

न्तथापि पारायणमधीते पारायणिक इत्युच्यते । यस्तुरायणेन यजते सतौरायणिक इत्युच्यते । यश्चैवाधीते यश्च परस्य करोति उभौ तौ वर्त्तयतः । यश्च यजते यश्च पुरोडाशान्निर्वर्त्तयति उभौतौ वर्त्तयतः । उभयत्र कस्माच्च भवत्यनभिधानादितिभाष्ये उक्तम् । अत्र कैयटः । परस्य । शिष्यस्य । करोति उच्चारयति अध्यापक इत्यर्थः । उभौ ताविति । अन्यतरासन्निधौ क्रियाया अनिष्पादादुभयोः कर्त्तृत्वम् । अनभिधानादिति । अध्यापके याजके च प्रयोगाभावादिति । एतद्भाष्यकैयटाभ्यां शिष्य एव प्रत्यय उत्पद्यत इत्याशयेनाह । शिष्य एवेषत इति । तद्विषयत्वे । संशयविषयत्वे । भाष्यासम्मत इति । तच्च हि पत्यौ ण नित्यमित्येव सूत्रपाठो दृश्यते न त्वणिति । अतिप्रसङ्गस्त्वनभिधानान्नेति । उपपादितमेतत् । तेन निर्वृत्तम् । द्वितीयान्तात्कालवाचिनः प्रातिपदिकाद्विर्वृत्तमित्यस्मिन्नर्थे ठञ्प्रत्ययः स्यात् । तमधीष्ट इत्यन्तसंयोग इति । इदमुपलक्षणमेतत्सूचविषये सर्वत्रात्यन्तसंयोग एव । नन्वध्येषणारूपक्रियायाः न मासव्यापकत्वन्तस्या मासारम्भकप्रथमदिन एवोत्पत्तेरिति मासत्वाधिकरणदिनान्तरे प्रतियोगित्वाधिकरणतदभावसत्त्वादत आह । मुहूर्त्तमिति । अध्ययनव्याप्ते इति। काले इति शेषः । तद्व्याप्तत्वोपचारादिति । अध्येषणव्याप्तत्वोपचारादित्यर्थः । एतेनाध्येषणस्य न कालिकसम्बन्धेन व्यापकत्वविवक्षा किन्तु स्वप्रयोज्याध्ययनप्रतियोगिकैकालिकसम्बन्धेन । मासत्वाधिकरणद्वितीयादिदिने यस्किञ्चिन्मुहूर्त्तावच्छेदेन निरुक्तसम्बन्धावच्छिन्नप्रतियोगिताकस्तदभावो वर्त्तमानोऽपि न प्रतियोगित्वाधिकरण इति भावः । ननु किमुपचारेण यस्मिन्मुहूर्त्तेऽध्येषणन्तन्मुहूर्त्तं व्यापकत्वसत्त्वेन तन्मुहूर्त्तवाचकात्प्रत्ययोत्पत्तिस्वीकारेण सूत्रस्थचारितार्थ्यादत आह। यावत्कालेति । नेष्यत इति । तदुक्तभाष्ये । अधीष्टभृतयोर्द्वितीयानिर्देशोऽनर्थकस्तत्रादर्शनात् । न ह्यसौ मासमधीष्यते किन्तु मुहूर्त्तमसावधीष्टो मासन्तत्कर्म करोति । तादर्थ्यात्तच्छब्दाभविष्यतीति । अत्र कैयटः । मासादिशब्दा अध्येषणभरणव्याप्तमुहूर्त्तादिकालवाचिन एवाश्रियन्त इति । न चैवं सति मुहूर्त्तं व्यापकत्वमेव लब्धन्तच्च साक्षादेवास्ति अध्येषणादेरिति तत्कल्पभूताध्ययनव्याप्त इतिपूर्वोक्तं विरुध्येतेति वाच्यम् । अधीष्टभृतयोरिति प्रतीकमुपादाय कैयटेनैव यावन्तं कालमध्येषणभरणञ्च क्रियते तत्र-

त्यर्थो नेष्यते अध्येषणभरणफलव्यापारव्याप्यात्तु कालादिष्यत इत्यनेन तथाभिधानात्। फलव्यापारित्यस्याध्येषणादिफलभूतो यो व्यापारः कर्मकरणरूपस्तद्व्याप्यादित्यर्थः। मासमधीष्ट इत्यस्य मासव्यापिव्यापारार्थमधीष्ट इत्येवार्थः। अध्येषणभरणव्याप्तमुहूर्त्तादिकालमचिन इतिकैयटस्यापि मासव्यापिव्यापारफलकाध्येषणभरणव्याप्तमुहूर्त्तेत्यादयर्थः। एतेन मासादिव्यापकत्वं स्पष्टमेव लभ्यत इति। यदुक्तमूले भूतः स्वशक्तया व्याप्तकाल इति तच्च कालान्तर्भावेनानाह। भूतेति। एतेनाधीष्टभृतयोर्दीव्यतीत्यत्र यथा वर्त्तमानकालान्तर्भावेण न ग्रहिस्तथा भूतकालान्तर्भावेण न ग्रहिरितिसूचितम्। मासाद्यर्थे यत्खञौ। मासशब्दाद्यर्थे गम्यमाने उक्तार्थे यत्खञौ प्रत्ययौ स्तः। अत्रापि। षण्मासाण्ण्यच्चेतिसूत्रेऽपि। चेन ठञ्मात्रस्य सम्बन्धः। तस्य। यपः। इत्यनुसारीति। तत्र हि षण्मासेतिसूत्रव्याख्यानावसरे चकाराद्यप् चेत्युक्तम्। ननु चकाराकरणायावयसि। ठन्। इत्येवं सूत्रद्वयमेव कर्त्तव्यमत आह। अवयवसीति। ननु वयसीतिसूत्रे भूतार्थ एव प्रत्ययस्वीकारात्पञ्चत्यनुपपन्नमत आह। यथायोगेति। तद्धितार्थद्विगाविति। द्वे अहनी अधीष्ट इत्यादिविग्रहः। नन्वेव विग्रहेपि रात्राह्नरितिसूत्रमपरत्वाद्बाधित्वा टच भाष्यमित्याशङ्क्यायामाह मूले समासान्तविधेरिति। इत्याद्येवेति। तत्र हि अहःसंवत्सर इत्येवमन्ताद्विगोर्निहत्तादिषु वा खप्रत्ययो भवति तेन मुक्ते ठञ्भवतीत्युक्ताद्यहीनः त्रैयज्ञिक इतिरूपमुदाहृतम्। अत्राहीन इत्यन्तशब्दान्तात्खप्रत्ययदर्शनेन समासान्ताभावः कल्प्यते। यदा नानेन खस्तदा पूर्वोक्तसामान्यसूत्रेण अन्हादेशेक्षतेऽपि ठञ्प्रत्यय इत्याशयः। अस्तिगमक इति। साधकसत्त्वे भवत्येव। यथा तदस्य परिमाणम्। संख्याया संज्ञासंघेतिक्रमेण पाठात्सङ्ख्येतिसूत्रे संख्याया परिमाणग्रहणेन ग्रहणम्भवत्येवेति। तयोरेव। खठञोरेव। न नित्य इति। चित्तवतीतिसूत्रविहितः। क्वाचित्कम्पाठं खण्डयति। भूतो वेत्यपाठ इति। द्विवार्षिक इत्यत्राष्टीष्टो भृतो वेत्यर्थविवक्षायां भविष्यत्वस्य बुद्धिस्थत्वे चित्तवतीतिनित्यं लुक् दुर्वार इत्याशङ्क्यायामाह। चित्तवतीत्यत्रेति। तत्रैवाभिधानादिति। लुक्प्रवृत्तिविषये द्वन्द्वैरन्तरङ्गानपीतिन्यायेनाप्रवृत्तेरद्वद्विवटितप्रयोगस्य तत्रैवाभिधानादित्यर्थः। हरदत्त इत्यने-

न सूचितामरुचिन्दर्शयन्नुक्तमतमाह। परे त्विति। नित्यग्रहणन्तर्हि तत्सूत्रस्थं व्यर्थमत आह। नित्यग्रहणमित्यादि। न मुन्नेत्यादि। शालिविशेष एव लोकप्रसिद्धेः। तदस्येतिसूत्रार्थप्रदर्शनावसरे ब्रह्मचर्यमित्यस्यान्वयाप्रदर्शनात्तस्य वैयर्थ्यशङ्कावारणायाह। ब्रह्मचर्यञ्चेदिति। ननु मासोऽस्येत्यर्थे ब्रह्मचर्यस्य विशेष्यत्वेऽपि ब्रह्मचर्ये स्वपरिच्छेदकत्वसम्बन्धावच्छिन्नव्यापकता प्रतीयत इति द्वितीया कुतो नेत्याकाङ्क्षायामाह। द्वितीया त्विति। यत्र विशेष्यतावच्छेदकरूपेण ज्ञातेऽर्थे कालाध्वनिरूपितव्यापकताबोधनाय कालाध्ववाचकः शब्दः प्रयुज्यते तत्रैव द्वितीया। प्रकृते तु मासत्वावच्छिन्ने ब्रह्मचर्यनिरूपिता व्याप्यता बोधनीया न तु मासनिरूपिता व्यापकताब्रह्मचर्ये बोधनीयेति न द्वितीयेत्यर्थः। मासे व्याप्यताबोधे ब्रह्मचर्ये व्यापकताबोध आर्थिको यद्यप्यस्ति तथापि न स वाक्यतात्पर्यविषय इति भावः। पूर्वोक्तप्रयोगस्योपपत्तिमाह। मासिक इति। अत एव। पुंवद्भावाभावादेव। भाष्ये त्विति। वार्त्तिके तदस्य ब्रह्मचर्यमित्युपादानेन सूत्रस्थ हेधाव्याख्यानमितिसूचितम्। तदिति द्वितीयासमर्थात्कालवाचिनोऽस्येति षष्ठ्यर्थे ठञ् भवति ब्रह्मचर्यञ्चेन्नश्यते। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। तथा तदिति प्रथमासमर्थात्कालवाचिनोऽस्येतिषष्ठ्यर्थे ठञ् भवति यत्तदस्येति निर्दिष्टं ब्रह्मचर्यञ्चेत्तद्भवतीति। मासो ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यमिति। वाक्ये मासस्य प्राधान्यात्प्रथमैव। महानाम्न्यादिभ्य इति। अत्र महानाम्नीशब्दाद्ब्रह्मचर्यस्य विशेष्यतायामत्ययविधानेन सामर्थ्यादत्र षष्ठी समर्थविभक्तिः। तस्य च दक्षिणायज्ञाख्येभ्य इति सूत्रे आख्याग्रहणाभावेऽपि यज्ञेभ्य इत्युच्यमानेऽपि तद्वाचकशब्देभ्य एव भविष्यतीतिकालाधिकारस्य विधानसामर्थ्यादेव बाधे सिद्धे नेदमाख्याग्रहणस्य प्रयोजनमित्याशयेनाह। परे त्विति। अत एव। आख्याशब्दाभावेऽपि कालाधिकारबाधस्य सिद्धत्वादेव। तत्र च दीयते। इदम्। प्रथमोक्त व्याख्यानम्। इत्यादिभाष्यरीत्येति। इदमर्थप्रदर्शनपरं लेखनभाष्ये तु प्रकृतसूत्रे अग्निपदे दीयते कार्यं मित्युक्तम्। एतेनैतादृशानुपूर्व्या भाष्येऽदर्शनेनेत्यमभिधानमसङ्गतमित्यपास्तम् तस्मै प्रभवते सन्तापादिभ्यः। अत्र यत्प्रभवतीति तद्व्याचष्टे। प्रभवतीतीति। इत्युक्तपाठरीत्याह। चूडादिभ्य इति। रपि बोध्यमिति। तदुक्त

आर्षे । अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानमिति । चौणीमान्यण्ग्रहणानि। व्युष्टादिभ्योऽण् । समयस्तदस्य प्राप्तम् । ऋतोरण् । प्रयोजनम् । विशाखाढादण् मन्थदण्डयोरिति । न चैवं पाठे चूड़ादिभ्यः कथमत्ययलाभ इति वाच्यम्। आदिशब्दस्य प्रकारार्थतया चूड़ादीनामादितस्तच्च पाठाभावेऽपि लाभसम्भवादिति भावः । नन्वेवमपि सर्वेभ्यः सर्वेष्वर्थेषु प्रत्ययः प्राप्नोतीत्यत आह । तेन यथादर्शनमिति । तदुक्तमार्षे । व्युष्टादिभ्योऽण् । अग्निपदादिभ्यश्चेति वक्तव्यम् । अग्निपदे दीयते कार्यं वा आग्निपदम्। पैलुमूलम् । समयस्तदस्य प्राप्तम् । ऋतोरण् । अग्निपदादिभ्यश्च । उपवस्ता प्राप्तोऽस्य औपवस्तम् । प्राशिता प्राप्तोऽस्यौप्राशिचम् । प्रयोजनम् । विशाखाषाढादण् मन्थदण्डयोः । अग्निपदादिभ्यश्चेति वक्तव्यम् । चूड़ा प्रयोजनमस्य चौड़म् । अद्धा प्रयोजनमस्य आद्धम् । तेन । चौरेतिविशिष्योपादानेन । अत एव । आदुदात्तत्वस्य निपातनादेव । ठजा सिद्धं इति । प्रयोजनमितिसामान्यसूत्रेण सिद्ध इत्यर्थः । एकशब्दस्यासहायपरतयाऽसहायागारलाभे तादृशस्यागारस्य मुमुक्षोः सौकर्यसम्पादकत्वेन प्रयोजनत्वलाभ इति भावः । आकालिकड़ाद्यन्तवचने । आकालिकट् इति रूपनिपात्यते । आद्यन्तवचने । आद्यन्तयोर्वचने विशेषणे विवक्षिते । समानकालशब्दस्य स्थानेऽयमादेशः समानकालशब्दार्थस्याद्यन्तयोर्विशेषणस्येत्यर्थः । एतदर्थमेव । समानकालशब्दस्य स्थाने आदेशार्थमेव । अत्रैवकारेणैकट्प्रत्ययविधानाभावेऽपि ठञ्प्रकरणात्तदनुवृत्त्याप्येतल्लिङ्गमिति ध्वनितम् । तदभिप्रायेणाह । अयमप्यादुदात्त इति । निदर्शनमिति । अकालाट्ठं सेतिवार्त्तिकविधेयो निदित्यर्थः ॥

इत्यनार्हीयठजधिकारः ।

समाप्तश्च ठजोऽधिकारः ।

तेन तुल्यं क्रिया चेद्वतिः । तेनेतिद्वतीयान्तात्तुल्यमित्यर्थे वतिः स्यात् । यत्तुल्यं सा क्रिया चेत् । अत्र तुल्यशब्दार्थस्य क्रियाविशेषणत्वेन स्त्रीत्वं स्यादत आह । सामान्य इति । एवम् । तुल्यमिति सामान्ये नपुंसकम् । ब्राह्मणवदधीत इत्यत्र यो धात्वर्थव्यापारस्तद्विशेषणत्वेन नपुंसकमित्यर्थः । प्रत्ययार्थ-

विशेषणम्। प्रत्ययार्थे तुल्येऽभेदेन विशेषणमित्यर्थः। क्व चित्क्रियात्वसम्भावनया प्रकृत्यर्थविशेषणत्वमपि सम्भाव्यते इत्याशङ्कानिवारणायाह। ख्यातव्येनेति। ननु भुक्त्वा इव गच्छतीत्यादिषु क्रियाया उपमानत्वसम्भवेन प्रकृत्यर्थविशेषणत्वमपि सम्भाव्यत इत्यत आह। क्त्वाद्यन्ताभ्यामिति। अचादिना तुमुनः परिग्रहः। अत एव। तुल्यशब्दार्थेऽनन्वयादेव। न च तैलपाक इव घृतपाक इत्यत्र क्रियायास्तृतीयासमर्थत्वं सम्भवत्येवेति वाच्यम्। अत्रापि घञ्प्रतिपाद्यक्रियायाः सत्त्वभूताया एवोपमानत्वात्। ब्राह्मणेन तुल्यमधीत इत्यादौ ब्राह्मणादिशब्दानां ब्राह्मणकर्तृकाध्ययनलक्षणया तुल्यत्वोपपत्तिः। तुल्यशब्देन सादृश्यवानुच्यते तदेकदेशसादृश्ये तृतीयार्थस्य प्रतियोगित्वस्यान्वयो व्युत्पत्तिवैचित्र्यात्। ननु नृत्यवद्गमनमित्यादौ गमनशब्दार्थस्य सत्त्वरूपतया क्रियात्वाभावात्कथं वतिरत आह। नृत्यवदिति। सत्तयोरिति। नृत्यशब्दस्य नृत्यकर्तृकसत्त्वे लक्षणया नृत्यकर्तृकसत्तायाः उपमानत्वङ्गमनकर्तृकसत्तायाः उपमेयत्वमित्यर्थः। तत्र तस्येव। सप्तमीसमर्थात्षष्ठीसमर्थाच्च इवार्थे वतिरित्यर्थः। तस्य। मथुरायामिव पाटलिपुत्रेऽधीत इतिवाक्यस्य। मथुरया तुल्यमित्यत्र तुल्यार्थैरिति तृतीया प्रतियोगित्वरूपसम्बन्धार्थिका। मथुरायामिवेत्यत्र सप्तमी तु अस्मादेव ज्ञापकादिवार्थकशब्दयोगे सप्तमी भवतीति कल्पनया साधनीया साऽपि सम्बन्धार्थिकैवेति इयोर्वाक्ययोस्तुल्यत्वमित्यर्थः। तदुक्तभाष्ये। इवशब्देन योगे सप्तमीसमर्थादिति शास्ति तज्ज्ञापयत्याचार्यो भवतीवशब्दयोगे सप्तमीति। किमेतस्य ज्ञापनेप्रयोजनम्। देवेष्विव नाम ब्राह्मणेषु इत्यत्रापि सिद्धभवतीति। द्रव्यगुणादितुल्य इति। द्रव्यगुणादीनान्तुल्यत्वे द्रव्यगुणादिकृततुल्यत्व इति वार्थः। मूले क्रियाग्रहणव्यावर्त्यावसरे गुणग्रहणं कृतन्तदक्रियोपलक्षणम्। पूर्वसूत्रविषये गुणतुल्यतायाम्प्रत्युदाहरणं पुत्रेण तुल्यं स्थौल्यमिति। द्रव्यतुल्यतायां यथा। ब्राह्मणेन तुल्यांस्य गौरिति। आदिनाऽभावपरिग्रहः। तदुदाहरणम्। पित्रा तुल्यः स्थौल्याभाव इति। प्रकृतसूत्रन्तु पितृवत्स्थूलः पुत्रः। ब्राह्मणवदस्य चर्चियस्य गौः। रोगिवदस्य भोजनाभाव इति। एवमादिविषये प्रवर्त्तत एव। पूर्वसूत्रविषयादस्य सूत्रस्य भेदकान्तरन्दर्शयति। किञ्चेति। तत्समानोपमेयसमाने। पूर्वसूत्रेण मथुरायामिवेतिविग्रहे चेष्टति-

स्तदा प्राकारपदाद्वृत्त्या एकस्य प्राकारपदस्य तत्सत्तापरत्वम्मथुरापदस्य मथुराधिकरणकप्राकारे लक्षणा वा अस्तीत्यस्य चोध्याहारः कार्य इति मथुरासम्बन्धिप्राकारसत्तासदृशी पाटलिपुत्राधिकरणकप्राकारसत्तेतिबोध इति महदेव वैलक्षण्यम्। तयोः। इवार्थोपमानस्य तदभिन्नत्वेनाभिप्रेतस्य मथुरादिपदार्थस्य च।तद्वारकः। उपमेयद्वारकः। स्वसिद्धान्तमाह। परे त्विति। षष्ठ्यर्थेति। एवञ्च सम्बधित्वेनैव प्रकृते बोधः। अत एव। षष्ठ्यर्थसप्तम्यन्तात्प्रत्ययस्वीकारादेव। उपमानविशेषणादिति। उपमानस्य प्राकारस्य विशेषणान्मथुराशब्दादुपमेयस्य प्राकारस्यविशेषणात्पाटलिपुत्रशब्दाच्चेत्यर्थः।तदर्हम्।अर्हतीत्यर्हम्।पचाद्यच्कर्तृकर्मणोरिति तच्छब्दान्षष्ठीवारणायाह।सौचत्त्वादिति। द्वितीयान्तदेवायम्प्रत्ययः। अत एव विधि मर्हतीति तिङन्तेन विग्रहप्रदर्शनम्मूले । एवञ्च विषयविषयिभावरूपः सम्बन्धो द्वितीयार्थः। तस्य चार्हशब्दार्थयोग्यता कर्तृपदार्थैकदेशयोग्यतायामन्वयः। पूर्वसूत्रेणान्यथासिद्धिम्परिहरति। सादृश्याप्रतीतेरिति। तदुक्तभाष्ये। किमर्थमिदमुच्यते। न तेन तुल्यं क्रिया चेद्वतिरित्येव सिद्धम्। न सिध्यति। तृतीयासमर्थात्तत्र यदान्येन कर्त्तव्यां क्रियामन्यः करोति तदा प्रत्यय उत्पाद्यते। इह पुनर्द्वितीयासमर्थादात्मार्हायां क्रियायामर्हतिकर्त्तरि निश्चितबलाधाने प्रत्यय उत्पाद्यते। ब्राह्मणवद्ब्रुवान्वर्त्तते एतद्वृत्तं ब्राह्मणमर्हतीति। आत्मार्हायामिति। द्वितीयान्तवाच्यस्यार्थस्यात्मनोऽर्हा या क्रिया तस्यामित्यर्थः। निश्चितबलाधान इति। निश्चितस्यार्थस्यान्ययोगनिवृत्त्यर्थं बलाधानम्पुनरुपादानेन निश्चयनमित्यर्थः। यथा ब्राह्मणस्य किञ्चिदाचरणम्असिद्धमेवान्यसम्बन्धिनेतिप्रतिपादनाय पुनरुपादीयते एतदाचरणम्ब्राह्मणमर्हति न त्वन्यमिति तदेतल्लक्ष्यवर्त्तत इति भावः। उपमानत्वाविवक्षायाञ्च प्रत्ययसिद्ध्यर्थमिदम्। तदाह। विनीतवदिति। चिच्छेद कृतहस्तवदिति। अत्र चिच्छेदेति क्रियापदम्। कृतः सम्पन्नो हस्तो येषान्तेषामिदं योग्यमित्यर्थः। तस्य भावस्त्वतलौ। भावे चाकर्मकेभ्य इत्यादाविति। आदिना षड् भावविकारा इत्यादिपरिग्रहः। अनेनेति। प्रवृत्तिनिमित्तेनेत्यर्थः। न चतिरिति। न राजपुरुषत्वमित्यादौ राजत्वादेस्त्वप्रत्ययवाच्यत्वापत्तिः। तत्र राजपुरुषेतिप्रकृतिजन्यबोधीयराजनिष्ठविशेषतानिरूपितप्रकारतासत्त्वेऽपिपुरुषनिष्ठा या प्रकारता नास्ति-

का मुख्यविशेष्यता तन्निरूपितप्रकारतायाः असत्त्वात्। शब्दस्यापि शाब्दबोधे प्रकारकतया भानमिति मते भावप्रत्ययवाच्यतापत्तिवारणायाह। स चेति। स च। भावश्च। यत्र बुद्धिस्थे सति। यस्मिन् बुद्धिविषयभूते सति। यद्विषयक बुद्धौ सत्यामिति यावत्। विशिष्टबुद्धिरिति विशेषणज्ञानस्य कारणतया विशेषणविशिष्टस्य बुद्धिविषयत्वेन तज्ज्ञानं विना विशिष्टज्ञानन्न सम्भवतीति भावः। तत्त्वम्। प्रवृत्तिनिमित्तत्वम्। उपलक्षणमिति। प्रकारसंसर्गस्याप्युपलक्षणमित्यर्थः। एतन्मते राजपुरुषादिशब्दाद्विग्रहवाक्ये श्रूयमाणा या विभक्तिस्तदर्थसंबन्धेन पूर्वपदार्थप्रकोरकोत्तरपदार्थविशेष्यको बोधः। यथा राजविशिष्टः पुरुष इत्याकारकः। राजसम्बन्धवान्पुरुष इत्याकारकबोधाभिप्रायेणाह। यद्वेति। डित्थोऽयमित्यादिशब्दाद्बोधो डित्थशब्दप्रकारक एवेति स शब्द एव तत्र प्रवृत्तिनिमित्तशब्देन व्यवह्रियत इत्याशयेनाह। संज्ञाशब्दे प्राय इति। यत्र तत्तद्धर्मपुरस्कारेण संज्ञित्वेनाभिप्रेतानामुपादानङ्कृत्वा संज्ञा विधीयते तत्र संज्ञाशब्दादपि तत्तद्धर्मप्रकारिका बुद्धिरिति तेषान्धर्माणान्तत्र प्रवृत्तिनिमित्तत्वाभाव इत्युपात्तम्। अत एव विशिष्टरूपोपादानविषया या गौणमुख्यपरिभाषा तया गोऽभवदित्यत्र ओदितिसूत्रेण प्रगृह्यसंज्ञावारणपरभाष्यं संगच्छते। यत्र तु न संज्ञी संज्ञाशास्त्रे उपात्तो विशेषरूपेण तत्र तच्छब्दप्रकारकैवोपस्थितिः। यथा ङ्याप्प्रातिपदिकादित्यत्र। लौकिकसंज्ञाशास्त्रेऽपि व्यवस्थामाह। परे त्विति। विशेष्यभूत इति। त्वान्तशब्दजन्यबोधीयविशेष्यताश्रय इत्यर्थः। प्रकृतिश्चेति। यत्र त्वप्रत्ययश्चिकीर्षितस्तत्र प्रकृतिर्डित्थादिः। त्वान्तशब्दजन्यबोधस्वरूपमाह। डित्थशब्दवानर्थ इति। नन्वेवं यतस्त्वप्रत्ययस्ततो निर्विकल्पकापत्तिरत आह। डित्थइत्यादित इति। सङ्ख्यादिप्रकारक इति। सङ्ख्या तत्र विभक्त्यर्थस्या प्रकारकतया भासते एवञ्च तज्जन्यबोधो न निष्प्रकारक इति भावः। ककारादीनामप्यज्ञानां वर्णानामपि कुरित्यादिशब्दजन्यबोधविशेष्यत्वात्तेषु प्रक्रियामाह। कुत्वमित्यादेरिति। अन्यथा। कुत्वमित्यादिशब्दाच्छब्दस्यैवोपस्थितिस्वीकारे। जात्यादिशब्दसाधारण्येनाह। भावश्च चेति। तदुक्तभाष्ये। यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतावितीति। अत्र गुणशब्दः पराश्रयस्य भेदकधर्मस्य बोधकः। एवञ्च प्रवृत्तिनि-

मित्तत्वावच्छिन्नत्वाद्यर्थः । प्रकृतिरर्थपरा । षष्ठ्यर्थश्चाधेयत्वम् । यद्वेति द्वितीयपक्षे तु सम्बन्धः षष्ठ्यर्थः । एवञ्चोभयमतेति प्रवृत्तिनिमित्तस्यैव त्वाद्यर्थत्वमिति बोध्यम् । द्वेकयोरित्यादितो द्वित्वैकत्वयोरितिबोधस्वीकारेणाह । भावप्रधानेत्यादि । तादात्म्ये नेति जातिमत्त्वयोर्गुणगुणिनोः क्रियाक्रियावतोश्च तादात्म्यस्यैव स्वीकारात् । तादात्म्यञ्च भेदसहिष्णुरभेदः । स्वरूपेणेति । एतेन जात्यादीनान्न जातित्वादिना बुद्धिविषयत्वमित्युक्तम् । तच्च । ब्राह्मणाः पूज्याः ब्रह्मणः पूज्य इत्यादौ । प्रवृत्तिनिमित्तस्य प्राधान्येन भानस्त्वादिप्रत्ययसाध्यमितिभावप्रत्ययं विनापि चेत्प्रवृत्तिनिमित्तस्य प्राधान्यन्तदा तस्यासाधुत्वापत्तिः स्यादिति भावः । अत एव । तादृगस्खले जातेः प्राधान्यादेव । अस्य । तस्य भावस्त्वतलाविति सूत्रस्थ । अन्यथा । चकाराभावे । एतयोः । त्वतलोः । ताविति । नञ्स्नञावित्यर्थः । गृह्यमाणेति । वृद्ध्यादिभ्य इत्यादौ प्रत्ययविधिविषये ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीतिनिषेधान्नेषान्तदन्तेभ्यः प्राप्तिरिति भावः । यगणौ प्राप्ताविति । पत्यन्तेतिसूत्रे इगन्तेतिसूत्रे चान्तग्रहणस्य स्वत एव सत्त्वात् । उत्तर इति । यदि पत्यन्तेतिसूत्रद्वयविषय एव प्रतिषेधस्तदा पत्यन्तेतिसूत्रानन्तरमेव नञ्पूर्वात्तत्पुरुषान्नेति ब्रूयात्तथा न ऋतमिति प्रकृते तथा करणन्तदन्तविधिम्वृद्ध्यादिविषये ज्ञापयति तथासति तत्पुरुषबहुव्रीह्योरुभयोरपि तदन्तत्वात्तत्पुरुषाच्च नञ्पूर्वादनेन निषेधे परिगणेषाद्बहुव्रीहेरिमनिजादीनामुत्पत्तिः प्राप्ता तत्रोक्तभाष्ये नेष्यते । त्वतलावेवेष्यत इति । गणे । ब्राह्मणादिगणे । परिगणनफलमाह तेनेति । ऋतमयतीति । ऋतमाचष्ट इत्यर्थे णिचि इष्टवद्भावाद्भावः प्राप्तोऽपि परिगणनान्नेत्यर्थः । यौवनमिनीति । अन्निति प्रकृतिभावः । भाष्ये क्व चिन्मृग्यमिति । वृत्तिग्रन्थे एवन्दर्शनान्मूलकृतोक्तम् । ननु शैथोपाध्यायिकेति द्वन्द्वेत्यादिसूत्रोदाहरणत्वेन मूले उक्तन्तदसङ्गतम् योपधादितिसूत्रेण सिद्धत्वादत आह । अस्यापीति । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । गोत्रवाचिनश्चरणवाचिनश्च प्रोतिकदिकाङ्गावकर्मणोरर्थयोर्युजभवति । श्लाघादिषु विषयभूतेषु । तत्र श्लाघादीनां विषयत्वं यथाऽस्ति तथोपपादयति । श्लाघादयश्चेति । प्रत्ययार्थान्वयिनः । प्रत्ययार्थविषयतानिरूपिता या विषयता तच्छालिबोधविषयाः । एतेन । वक्ष्यमाणदूषणेन । त्वस्याप्राप्तेरिति

यञा बाधादिति भावः। पूर्वसूत्रविहितेति। होत्राभ्य इतिसूत्रे त्वतलोरपि सम्बन्धादिति भावः॥

समाप्रश्च नञ्स्नञोरधिकारः।

धान्यानाम्भवने। धान्यानामिति कर्त्तरि षष्ठी। भवनशब्दोऽधिकरणल्युड़न्तः। भवति जायतेऽस्मिन्निति भवनम्। परस्परेति। भवनशब्दक्षेत्रशब्दयोः परस्परमन्वययोग्यत्वात्। क्षेत्रशब्दस्य शरीरवाचकतया यदि क्षेत्रशब्देन शरीरं गृह्यते तदा भवनशब्दसामानाधिकरण्यन्नोपपद्यत इति भावः। एतेन क्षेत्रपदस्य प्रयोजनमप्युक्तम्। अन्यथा भवनशब्दस्य सत्त्वाधारवाचकत्वमपि सम्भाव्येत तथा सत्यतिप्रसङ्गः स्यात्तदाह। मुङ्गानामिति। विभाषा तिलमाषोमा। पूर्वञ्च चेति। यवयवकेतिसूत्र इत्यर्थः। के चित्। सिद्धान्तानुसारिणः। तस्या उपपत्तिः पूर्ववत्। सर्वचर्मणः। सर्वचर्मन्शब्दात्तृतीयान्तात्कृतइत्यर्थे खखञौ प्रत्ययौ स्तः। इदन्निपातनमिति। समासनिपातनमित्यर्थः। प्रत्ययार्थघटककृतिनिरूपितकरणत्वस्य चर्मणि न्याय्यत्वात्तृतीयान्तादिति लभ्यम्। यथामुखसम्मुखस्य दर्शनः खः। दर्शनशब्दोऽत्राधिकरणल्युड़न्त आदर्शादिवाचकः। यथाऽसादृश्यइतिनियमात्सादृश्येऽव्ययीभावाप्राप्तावाह। मूले निपातनात्सादृश्येऽव्ययीभाव इति। दर्शनशब्देन क्तदन्तेन योगात्कर्मणि षष्ठी। नाव्ययीभावादित्यम्। प्रत्ययो नेष्यत इति। भाष्यकारीयव्याख्यानसम्वादादनिष्टिः। तथाहि सम्मुखेति किन्निपात्यते सम्मुखेति समस्यान्तलोपः। सम्मुखेति समस्यान्तलोपो निपात्यते। सममुखस्य दर्शनः सम्मुखीन इति। कथन्तर्हि संयुगे सम्मुखीनन्नाम्मुहुः प्रसहते तु कइति। सम्मुखीनादर्शस्य यथासम्मुखावस्थानकर्त्तृत्वं तथा यः सम्मुखावस्थानकर्त्ता तत्र तद्धर्मक्तमादृश्योदुपचारात्सम्मुखीनशब्दप्रयोग इत्यवेहि। तत्सर्वादेः पत्रपात्रम्। सर्वादेरिति बहुव्रीहिः प्रातिपदिकमन्यपदार्थः। पत्र पात्रमिति पञ्चम्यर्थे प्रथमा। तदन्तप्रातिपदिकविशेषणमेवञ्चद्वितीयान्तात्सर्वशब्दाद्यवयवकात्पथ्याद्यन्तात्प्रातिकोद्याप्नोतीत्यर्थे खः स्यादित्यर्थः। अत्र सर्वादेरित्यादिशब्दोपादानेन सर्वशब्दाद्यवयवकसमासलाभे सति यच्च पथिन्शब्दान्तसमासादकारः समासान्तस्तत्रापि तस्य समाससमुदायाव-

यवत्वासर्वादिपञ्चन्तसमासग्रहणेन ग्रहणम्भवत्येवेति बोध्यम्। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। अत्र बद्धाभक्षयतिनेयशब्दानान्निपातनात्तिङन्तघटितो द्वन्द्वः। आद्य इति। यदाऽनुरायामेतदाऽनुपदं बद्धेत्यत्र यस्य चायाम इति समास इत्याशयेनाह। पादसम्बन्धिदैर्घ्यसदृशदैर्घ्यो क्षितेति। अन्त्य। अनुशब्दस्य सादृश्यार्थकत्वे। यथार्थ इत्यव्ययीभावः। निर्देशात्। अयानयान्तसमासोत्तरद्वितीयानिर्देशात्। ननु समाहारद्वन्द्वात्रयमपि सम्भाव्यत इत्यतः आह। योग्यत्वादिति। बद्धेत्याद्यर्थेऽन्वययोग्यत्वात्। अयानयः स्खलविशेष इति यन्मूले व्याख्यातन्तल्लाभप्रकारमाह। अयःप्रदक्षिणेति। असौ। अयानयशब्दः। तत्स्थानानामिति। तत् अयानयाख्यं स्थानं येषामित्यर्थः। परैः। परद्यूतकारशारैः। नोक्रम्यते। नाध्यास्यते। पदम्। स्थानम्। युग्मादिस्थानं हि तादृशम्। तत्र स्थितानाम्परकीयैर्बाधा नेति द्यूते प्रसिद्धम्। शृणन्त्यभिदूर्तकारास्ते शारा इति शारशब्दः काष्ठादिमयेषु देवनसाधनेषु वर्त्तते। प्रधानकर्मणीति। प्रधाने नीहृकृष्वहामित्युक्तेः। परोवरपरम्परा मूलेऽवरस्योत्वन्निपात्यत इति। अवरस्यादेरिति शेषः। उत्त्वञ्चेदम्प्रत्ययसन्नियोगेनेत्यत्र साधकमाह। अत एवेति। प्रत्ययसन्नियोगेनेतिस्वीकारादेव। परम्परेत्यत्र तु परपरतराणाम्परम्परभावः। न चास्यापि निपातनम्प्रत्ययसन्नियोगेनेति पारम्पर्यायाता इति कथं साधुरिति वाच्यम्। अव्युत्पन्नपरम्पराशब्दात्स्वार्थे चातुर्वर्ण्यादिषु पाठेन साधुत्वात्। अवारपात्यन्तानुकामं गामी। गामीत्यत्र गमेरिनिर्वाहुलकात्कैवलाण्णिच्चेति णित्वम्। भविष्यगम्यादय इति भविष्यत्कालता। आवश्यके वा णिनिः। अवारपारशब्दाद्विधीयमानः केवलादवारशब्दात्कथमत आह। राष्ट्रावारपारादिति। समायां समायां विजायते। विजायत इत्यर्थे पदसमुदायात्प्रत्ययः। पूर्वपद इति। पूर्वस्मिन् पद इत्यर्थः। वीप्सायान्निर्वचनं वा। समासवद्भावः। विपूर्वको जनिर्गर्भविमोचने तदाह। गर्भं विमुञ्चतीत्यर्थ इति। तेन। गर्भविमोचनेन। तथोच्चारणादिति। यलोपघटितशब्दोच्चारणादित्यर्थः। अद्यश्वीनाऽवष्टब्धे। अद्यश्वीनेति निपात्यते। अवष्टब्धेऽर्थे। आसन्नमवष्टब्धम्। अविदूरम्। एतादृश एवार्थे स्तम्भधातोः सस्य अवाच्चालम्बनाविदूर्ययोरितिसूत्रेण षत्वविधानात्। अविभक्तिकमिति।एतेन स्त्रियामिदन्नि-

पातनमिति शङ्का निरस्ता । व्याख्यानादिति । अद्यश्वीनम्मरणमितिप्रयोगदर्शनमूलकाद्व्याख्यानादित्यर्थः । अद्य श्व इत्यत्र वार्थे समासः । अविभक्तिकत्वस्वीकारेण । अद्यश्वीना इत्यस्यैव निपातने तु अद्यश्वो वा वियोगः अद्यश्वीनङ्गमनमित्यत्र न स्यात् । आगवीनः । गोः प्रत्यर्पण इति । लक्षणया गोशब्दस्य तत्र वृत्तिः । तदुक्तभाष्ये । आगवीन इति किन्निपात्यते । गोराङ्पूर्वादात्तस्य प्रतिदानात्कारिणि खो निपात्यते । आत्तस्य गोः । प्रतिदानात् कर्म करोति । आगवीनः कर्मकर इति । अत्र भाष्ये कर्मकर इत्युपादानाद्यस्मै वेतनत्वेन गौर्दत्तस्स एवागवीन इत्युच्यते न तु गौर्बन्धकत्वेन येन गृहीतस्स एव स्वीयस्य द्रव्यस्याधमर्णेन दाने कृतेऽपि गाम्प्रतिददाति सोप्यागवीन इत्युच्यते तदेतदाविष्कर्त्तुमाह । यो गवा भृतं इत्यादिरिति । अनुग्वलंगामी । अनुगुशब्दादलंगामीत्यर्थे खः स्यात् । अलंशब्दः पर्याप्तौ । पर्याप्तिः पूर्णता । सा च यद्यद्देशाधिकरणं गोकर्त्तृकं गमनन्तत्तद्देशाधिकरणकगोगमनान्तरम्यश्चाङ्गमनम् तथा यः करोति स एवमुच्यते । अव्ययत्वादिति । अव्ययीभावस्याव्ययत्वादिति भावः । इत्येवेति । कर्त्तृकर्मणोरितिसूत्रेण षष्ठ्याःप्राप्तेः गोष्ठात्खञ् भूतपूर्वे । अत्र भूतपूर्वशब्दो गोष्ठशब्दस्यैव विशेषणम् । गोष्ठशब्दाङ्भूतपूर्वोपाधिकात्स्वार्थे खञ् स्यात् । चरटो बाधा नेतीति । तेन गोष्ठचर इत्यपि भवतीति तेषामाशयः । शौलीनकौपीने । शालीनकौपीनशब्दौ निपात्येते । अदृष्टे अकार्ये चाभिधेये । अप्रदृष्टोऽप्रगल्भः । अकार्यङ्करणानर्हम् । लाक्षणिकाभ्यामिति । तथा च भाष्यम् । उत्तरपदलोपोऽत्र द्रष्टव्यः । शालाप्रवेशनमर्हत्यदृष्टः शालीनः । कूपावतरणमर्हत्यकार्यन्तत्कौपीनम् । व्रातेन जीवति । निर्हेशादेव तृतीया समर्थविभक्तिः । अत एव निपातनात् । व्रातेनेतिनिपातनादित्यर्थः । किं व्रातन्नाम । नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनः सङ्घाः व्राताः । तेषाङ्कर्म व्रातम् । व्रातकर्मणा जीवन्ति व्रातीन इति भाष्यात् । उत्सेधजीविन इत्यस्य उत्सेधेन शरीरायासेनेत्यर्थः । निपातनाश्रयणञ्च वृद्धाच्छ इत्यस्य बाधनार्थम् । साप्तपदीनं सख्यम् । साप्तपदीनमिति निपात्यतेसख्यञ्चेद्विशेष्यम् । कथं साप्तपदीनः सखेति । अर्श आदिभ्य इत्यच इसिद्धम् । घृतमिति पाठ इति । तथा च तथैवोचितमिति भावः । तस्य पाकमूले । यथासङ्ख्यमिति । पील्वादिकर्णादिभ्यः षष्ठ्यन्तेभ्यः पा-

कमूले वाच्ये कुणञाहचौ प्रत्ययौ स्तः । पाकः परिणामः । मूलमुपक्रमः । जाहचौ जकारस्य नेत्वम् । फलाभावात् । आदिशब्दद्वयोपादानं स्पष्टार्थम् । पक्वात्तिः । तस्य पाकमूल इति सूत्रान्मूलग्रहणमात्रमनुवर्त्तते । एकयोगनिर्दिष्टानां क्व चिदेकदेशोऽप्यनुवर्त्तत इतिवचनात् । न चैकयोगनिर्दिष्टानां सह वा प्रवृत्तिरितिपरिभाषाप्यस्तीति वाच्यम् । पूर्वामाश्रित्य मूल इति वक्तव्यमितिवार्त्तिकप्रत्याख्यानपरभाष्यप्रामाण्येन पूर्वपरिभाषाया एव प्रवृत्तिस्वीकारात् । पक्वस्य मूलं पक्वतिः । अत्र पक्वपदेन मासावयवः पक्षिणामवयवश्च गृह्यते । तयोर्मूलम् । प्रतिपत । पक्षिणः पार्श्वावयवविशेषश्च । तेन वित्तः । तृतीयान्तादित्त इत्यर्थे चुञ्चुप् चणप् एतौ प्रत्ययौस्तः।वित्तः प्रतीतः विख्यात इति यावत्। विनञ्भ्याम् । अत्र न सहेति व्यस्तं पदद्वयम् । प्रकृत्यर्थविशेषणमिति । तदुक्तभाष्ये । नायम्प्रत्ययार्थः किन्तर्हि प्रकृतिविशेषणमेतत् । विनञ् इत्येताभ्यामसहवाचिभ्यान्नानाजौ भवतः । कस्मिन्नर्थे । स्वार्थे इति । विशब्दस्यासहार्थे वृत्तिश्च घटेन विनेतिप्रयोगे सति घटसाहित्याभावप्रतीतेरस्त्येव । वेः शालच् । वेः शालच् शंकटच् इत्येतौ प्रत्ययौ स्तः समाधानक्रियावचनाद्विशब्दादेतावपि प्रत्ययौ स्वार्थे । वस्तुतो रूढ्यार्थविशेषप्रतिपादकत्वम्प्रत्ययान्तयोरिति बोध्यम् । एतत्प्रत्याख्यानपरेति । उपमानादा सिद्धमित्यादिना कृतम्प्रत्ययान्तत्परेत्यर्थः । यथा गवां स्थानङ् गोष्ठम् तथोष्ट्राणाम् । गोष्ठशब्दस्य सादृश्यात्पश्वन्तरस्थाने वर्त्तमानस्य पश्वन्तरवाचकेन समास इति भावः । चितः पठिता इति । मूल इति शेषः प्रत्याख्यानपक्षे समासत्वादन्तोदात्तत्वम्भविष्यतीति भाव इति । अचत्यादिति । गोष्ठादयः स्थानादिषु पशुनामादिभ्य इति वार्त्तिकस्थादिशब्दार्थेत्यर्थः । एवञ्च वार्त्तिककारेण सामान्यशब्देनोक्तानामपि स्पष्टप्रतिपत्त्यर्थं विशेषशब्देनोपादानङ्कृतमिति भावः । अधिकभाष्यकैयटयोः स्पष्टम् । नते नासिकायाः ।नासिकासम्बन्धिनतत्व इति । नासिकासाधने नमनेऽवशब्दस्य वृत्तिरिति भावः । यकारादिः प्रकृते टीटच् । तेन टस्य नेत्वम् ।निर्विडज्विरीसचौ । निविडाः । परस्परमतिशयेन मिलिताः। अत्रासम्बन्ध इति।एवञ्च वृत्तिकारोक्तायां नते नासिकाया इत्यस्यानुवृत्तौ प्रमाणाभाव इति भावः । नासिकासाधनकनतस्य प्रत्ययवाच्यता भ्रमन्निरस्यति । तच्च वर्त्तमानादिति । उच्चारणार्थ इ-

ति । न तु विवक्षितः । तथाले उच्चारणसामर्थ्यादिन्च्प्रत्यये परे तस्य लोपाभावे गुणे रूपासिद्धिः स्पष्टैव । क्लिन्नस्य चिल्पिल् । वार्त्तिकमिदम् । क्लिन्नस्येत्यादेशापेक्षणात् षष्ठी । अस्य चक्षुषो इत्यर्थे लप्रत्ययो भवति । क्लिन्नस्य चिल्पिलादेशो भवतीत्याकाङ्क्षायाम्प्रातिपदिकोधिकारात्प्रातिपदिकादिति लब्धम्। तच्च प्रादिपदिकमुपस्थितत्वात् क्लिन्नशब्दात्मकमेव गृह्यते । संज्ञाधिकारलभ्येति । अत एव कोशे उक्तम् । उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यकेति । अन्यच्च तु गौणः प्रयोग इत्याशयेनाह । समुद्र इति । ठस्येक इतिसूत्रस्याङ्गाधिकारपाठफलन्दर्शयति। ठस्याङ्गेति । प्रमाणे इयं । प्रकृतिविशेषणमिति । तदुक्तभाष्ये । प्रमाण इति नायमत्ययार्थः। क्व तर्हि प्रत्यया भवन्ति । तइति । कुत एतत् । अस्येत्यनुवर्त्तनात् । क्व प्रकृतम् । तदस्य सञ्जातन्तारकादिभ्य इतीति । पारिभाषिकार्थकस्यैव ग्रहणमिति नियमनिरासायाह । प्रमाणमात्रेति । अत एव । प्रमाणशब्दस्य परिच्छेदकमात्रपरत्वादेव । प्रस्थमात्रमिति। प्रस्थः परिमाणमस्येत्यर्थः । के चिदित्यनेन सूचितामरुचिं सूचयन्नाह । अन्येत्विति। अत एव । आयामपरिच्छेदकस्यैवप्रमाणशब्देनग्रसणादेव । तेन । तादृशविशेषपदोपादानेन । विशेषस्तुपरिमाणन्तुसर्वतइति । आयामस्तु प्रमाणं स्यादिति । कैयटोपि चिन्त्य एवेति । उक्तभाष्यादायामवाचिभ्य एवेतिनिश्चयादिति भावः । लुगिति । ल इति लुकः प्राचां संज्ञा । ऊरुद्वयसमिति । ऊरुशब्दस्योर्द्धावस्थितवस्तुपरिच्छेदकत्वे नोन्मानत्वात् । दिष्ट्यादीनान्तु पारिभाषिकप्रमाणत्वं स्पष्टमेव । यदा आयामेति । उभयथा परिच्छेदकत्वमेतेषां लोकसिद्धमेव । एतत्सामर्थ्यादिति । प्रमाणात्तद्विगोर्लुंग्विधानसामर्थ्यादित्यर्थः । मात्रजिति । न तुद्वयसच्दघ्नचोः । तयोः प्रथमश्च द्वितीयश्चेत्यनेनोन्मानवाचकादेव नियमनात् । न च प्रकृतवार्त्तिके नित्यग्रहणं व्यर्थम् । विकल्पस्याप्रकृतत्वादिति वाच्यम् । प्रमाणे ल इत्यस्य पूर्वसूत्रेण यत्र मात्रच् तत्रैव लुग्विधायकतया शमः स्याल वेत्यर्थविवक्षायां शममात्रमित्यत्र यथा नोत्तरवार्त्तिकविधेयस्य लुक् तथा द्वौ शमौ स्यातान्न वेत्यर्थविवक्षायां द्विशम इति रूपमिष्यते न तु तत्र मात्रचः श्रवणङ्कदा चिद्भवतीति नित्यं लुगेव द्विगोर्यथा स्यादित्येवमर्थं तत्सत्वात् । तेन । प्रमाणेतिवचने त्रयाणाभेदेनोपादानेन । बहुलग्रहणसहित इति ।

वत्वन्तात्स्वार्थे इयसज्मोत्वौ बहुलमिति । तत्रैव । प्रमाण एव । भिन्नोपाधिकत्वात् । प्रकृत्यर्थविशेषणीभूतार्थस्य भिन्नत्वादित्यर्थः । वतुपोऽप्यत्र विधिरिति । तदुक्तम्भाष्ये । एतदेव ज्ञापयति भवति किमिदंभ्यां वतुवितीति । एतेन। प्रत्ययान्तरत्वभ्रमनिवारकत्वेन । भाष्योक्तमेव पक्षान्तरमाह । यद्वेति । इदमो निह्नत्यर्थमिति । अन्यथैकयोगनिर्दिष्टत्वात्तस्याप्यनुवृत्तिः स्यात् । पूर्वत्र । यत्तदेतेभ्य इतिसूत्रे । प्रश्न इति । किम्शब्दस्य प्रश्नार्थकत्वादस्य लाभः । प्रश्नो युक्त एवेति । अत एवास्य नित्यं बहुवचनान्तत्वम् । तेन । द्विविधस्यापि समुदायस्य ग्रहणेन । यस्य चित्वप्रयुक्तमन्तोदात्तत्वन्तदवयवस्यैवान्त्याचोऽनुदात्तत्वं शेषनिघातेनेत्यभिप्रायेण शङ्कते । नन्विति । प्रकृतेरपीति । चितः सप्रकृतेरितिवचनात् । आदिरुदात्त इति । अयजादेश आद्युदात्त इत्यर्थः । ननूदात्तपदमन्त्यस्यैवोदात्तत्वम्बोधयत्वित्यत आह । अन्तोदात्तत्वस्येति । एवञ्चानुदात्तम्पदमितिपरिभाषैकवाक्यतया सर्वोदात्तत्वमयुक्तमिति भावः । बाधितुमुदात्तग्रहणमिति । तथा चोदात्तग्रहणसामर्थ्यादामन्त्रिताद्युदात्तत्वं बाधित्वाऽन्तोदात्तत्वमस्त्विति भावः । चित्स्वरस्यैवेति । स्थानिवत्त्वेनेत्यादिः । इदम् । तपयः स्थानेऽयजादेशविधानम् । प्रतिषेधः । स्थानिवद्भावस्य प्रतिषेधः । तदसम्बन्धेऽपीति । आद्युदात्तत्वेत्यस्यासम्बद्धत्वेऽपीत्यर्थः । अन्तोदात्ततया । घृतादिपाठादन्तोदात्ततया । समुदायानुबन्धः । प्रत्याहारसम्पादकत्वेन समुदायानुबन्धः । स्वानुबन्धः । इयम् चयमित्यादावन्तोदात्तत्वसम्पादकः । तदस्मिन्नधिकम् । प्रथमासमर्थादस्मिन्नितिसप्तम्यर्थे दशान्तात्प्रातिपदिकाद्डः स्यात् ।यत्रप्रथमासमर्थमधिकवाचकन्तच्चेत् । समानजातीयत्व इतीति । प्रत्ययार्थापेक्षया समानजातीये प्रकृत्यर्थे अधिके सति प्रत्यय इत्यर्थः । इतिकरणलभ्योऽयमर्थ इति । इतिशब्दो हि लौकिकीं विवक्षामनुसारयति । लोके च समानजातीय एव प्रयोगो दृश्यते । तदुक्तम् । अधिके समानजातावितिवार्त्तिककृता । शदन्तविंशतेश्च । तदस्मिन्नधिकमित्यर्थेशदन्ताद्विंशतिशब्दाच्च प्रातिपदिकाद्डः स्यात् । तेन । संख्याग्रहणानुवर्त्तनेन । संख्याया एव यत्राधिक्यम्प्रतिपाद्यते तत्र प्रत्यय इष्यते यत्र तु सङ्ख्येयस्याधिक्यन्तत्र नेत्यर्थः । तत्फलमाह । गोविंशदिति । अत्र हि सङ्ख्येयस्याधिक्यप्रतिपादनान्न प्रत्यय इति

भावः । अन्तग्रहणादिति । अन्यथा प्रत्ययग्रहणपरिभाषया त्रिंशच्चत्वारिंशच्छब्दयोरेव ग्रहणं स्यान्न तु एकत्रिंशच्छब्दस्य तस्य तत्त्वाभावादन्तग्रहणेन तु सा परिभाषा बाध्यत इति भावः । विंशतावप्यन्त इति । तदुक्तं वार्त्तिककृता । विंशतेश्च । विंशतेश्चान्तग्रहणं कर्त्तव्यम् इति । सङ्ख्याया गुणस्य निमाने मयट् । समानभाग इति । समानावयव इत्यर्थः । द्विगुणन्त्रिगुणमित्यादिस्थले गुणशब्दस्य भागार्थकत्वस्य लोकप्रसिद्धत्वात् । आधिक्य इति । तदुक्ताभाष्ये । भूयसःभूयस इति वक्तव्यम् । किमयोजनम् । भूयसो वाचिकायाः सङ्ख्याया उत्पत्तिर्यथा स्यात् । अल्पीयसो वाचिकाया उत्पत्तिर्मा भूदिति । भूयस इति । निमेयभागसङ्ख्याया निमानभागसङ्ख्या यदाऽधिका भवति तदा प्रत्ययो यथा स्यात् । एको यवभागो निमानमस्योदखिद्भागस्येत्यत्र मा भूदिति विवक्षितम् । अधिका भवतीत्यनेनाधिक्यमात्रविवक्षा प्रत्ययोत्पत्तिनियामिका न तु बहुत्वव्याप्यतिशय इति । निमेयस्यैकत्वे इति । तदुक्ताभाष्ये । एकोऽन्यतरः। एकत्वेऽन्यतरो भवतीति वक्तव्यम् । इह मा भूत् । द्वौ यवानां चय उदखित इतीति । अत्र कैयटः। अन्यतरशब्देन नियमेयमेव विवक्षितम्। एक एव यदि निमेयगुणो भवति तदा प्रत्ययः द्वयोर्बहुषु च निमेयगुणेषु न भवति। निमानेऽधिकत्वस्योक्तत्वात्सामर्थ्यबलम्व्योक्तमन्यतरशब्देन निमेयमेवेति । द्वौ यवानामितिभाष्यस्य द्वौ भागौ यवानान्निमानमुदखितस्तयोभागानिमेयमित्यर्थमाश्रित्य पुनः शंका कैयटे ननु भूयस्त्वस्याचाभावान्न भविष्यतीति। एवं शङ्काङ्कृत्वा तेनैव समाहितमेवं तर्ह्युदाहरणदिगियम् । इदन्त्वोदाहरणन्त्वयोऽयवानान्द्वावुदखित इतीति । अथ वा द्वौ यवानान्निमेयौ चय उदखितो भागानिमानमिति विवक्षायामुदाहरणम् । ततो भाष्ये उक्तं समानानाम्। समानाश्चेति वक्तव्यम्। इह माभूत् । एकोयवानामध्यर्द्धमुदखित इतीति । निमेय भागस्य येन केनापि निमानभागेन समानत्वे सति यदा निमेयसङ्ख्या निमानसङ्ख्यातोऽधिका भवति तदा प्रत्यय इत्यर्थः। तेनेति । पूर्वोक्तभाष्यसम्मतव्याख्यानेनेत्यर्थः। ननु द्विमयमित्यत्र द्विशब्दस्य यवानामित्येतत्सापेक्षत्वात्कथं वृत्तिरत आह । द्विशब्दस्येति । ननु मूले द्विमयमुदखिद्भागेति वक्तुमुचितन्तत्कथमुदखिदितीत्यत आह । उदखिद्भागस्याप्युदेति । तस्य पूरणे डट् । तस्येतिषष्ठीसमर्थात्सङ्ख्यावाचिनः

प्रातिपदिकात्पूरण इत्येतस्मिन्नर्थे डडित्यर्थः । पूर्यते अनेनेति करणे ल्युट् । पूर्यत इत्यस्य सङ्ख्याशब्दः पञ्चमादिर्यस्य सङ्ख्यावे प्रवर्त्तत इत्यर्थः । एतेन यत्सङ्ख्यावासङ्ख्यावाभ्यां पूरणार्थकप्रत्ययान्तशब्दबोध्यसङ्ख्यायाः प्रवृत्त्यप्रवृत्ती भवतस्स पूरण इत्युच्यत इत्युक्तं भवति । अत्र भाष्ये द्वितीयेऽध्यायेऽष्टम इति प्राप्नोतीति शङ्कां कृत्वा चरमोपजातेपूर्वस्मिं ज्ञानपगते । चरमोपजातेपूर्वस्मिं ज्ञानपगते प्रत्यय इति वक्तव्यम् । गणनायाङ्क्रियमाणायाम्पूर्वस्मिन्संख्येऽनपगते बुद्ध्या परिगृहीतत्वादयद्बुद्धिः पश्चादुपजायते तत्र प्रत्यय इत्यर्थः । एतेन गणनायां यस्य चरमङ्गणना भवति तस्मिन्नभिधेये प्रत्ययः । इत्युक्तं भवति । अत एव भाष्यकृतोक्तम् द्वितीयेऽध्यायेऽष्टम इति प्राप्नोति । भवत्येवेति । न च पञ्चानाम्पूरण इत्यत्र पञ्चन् शब्दस्य सङ्ख्येयपरत्वेऽपि पञ्चानाम्पूरणः पञ्चम इत्यत्र चरमगणिते यथा प्रत्ययो भवति तथा पञ्चानामुष्ट्रिकाणाम्पूरणोघट् इत्यत्रापि प्राप्नोति । उष्ट्रिका च घटपरिमितेनोदकेन पञ्चताः पूर्यन्ते तादृशो मृन्मयः चर्ममयो वा पात्रविशेष इति वाच्यम्। सङ्ख्याया अवयव इति सूत्राद्वितीयसङ्ख्याग्रहणानुवृत्त्या सङ्ख्यायाः पूरणे वर्त्तमानात्सङ्ख्याशब्दात्प्रत्ययविधानेन सामञ्ज स्यात् । तदेतदुक्तम्प्रवृत्तिनिमित्तसङ्ख्यापूरण इति । नान्तादसंख्यादेर्मट् । डडित्यनुवर्त्तते । तत्र नान्तादितिपञ्चम्याषष्ठ्यन्तत्वेन विपरिणम्यते । नान्तादसङ्ख्यादेः परस्य डटो मडागमः स्यादित्यर्थः । नचेह डटोऽननुवृत्तावपिमट्प्रत्यय एवास्तामिति वाच्यम् । षड्कतीति सूत्रस्यागमविधायकतया तत्र मण्डूकानुवृत्त्या डड्ग्रहणमनुवर्त्तनीयमिति क्लेशापत्तेः। ननु षड्कतीतिसूत्रेऽनुवर्त्तमानस्य डडित्यस्य सप्तम्यन्तत्वमवश्यं वाच्यमेव प्रकृतसूत्रेऽप्यर्थाधिकारात्तथैवास्तु आगमस्तुमुक्कर्त्तव्य इत्यत आह । मुक्तुनक्कत इति । षट्कतिकतिपयचतुराम् । इह षष्ठीनिर्देशात्मुक्कआगमत्वमेव । चतुरस्थ्यतीविहितौताभ्यामत्ययाभ्याङ्टोवाधाभावायाह । क्थतावितीति । देस्तीयः । द्विशब्दात्सङ्ख्यावाचिनः पूरणेऽर्थे तीयप्रत्ययः स्यात् । अस्य प्रत्ययत्वे साधकमाह । प्रत्ययाधिकार इति । नास्येति । सहायवाचकस्येत्यर्थः । ननु यद्यपूरणस्तीयशब्दोनास्ति तदा पूरणाङ्गाग इतिसूत्रे पूरणग्रहणं व्यर्थमत आह । तत्रत्येति । त्रेः सम्प्रसारणञ्च । त्रिशब्दात् षष्ठ्यन्तात्पूरणइत्यर्थे तीयप्रत्ययः स्यात् तत्सन्नियोगेन त्रिशब्दस्य सम्प्रस-

रणम्। तृतीय इत्यत्र ऋकारस्य हल इतिदीर्घो न। अनणत्वात्। अत्र प्रक्रियालाघवाय च स्तृ चेति तु नोक्तम्अत्ययान्तरत्वभ्रमापत्तेः। विंशत्यादिभ्यः। अत्र विंशत्यादयः के इत्याकाङ्क्षायामाह। अत्र विंशत्यादय इति। प्रत्यासत्त्येति भावः। उत्तरसूत्र इति। षष्ठ्यादेरितिसूत्रे इत्यर्थः। ननु ग्रहणवतेति निषेधस्य प्रत्ययविधावेव प्रवृत्तेस्तमट्विधायकस्य। तथात्वान्न निषेधप्राप्तिरिति। डटः प्रत्ययत्वात्तेन यस्मादिहितस्तदादेरित्यस्योपस्थितिः कल्पते तच्च विशेष्यम्। विंशत्यादिकञ्च विशेषणमिति तदन्तविधिः सिद्ध एवेति न तदन्तविधौ ज्ञापकोपयोग इत्यत आह। ज्ञापकेनेति। एवञ्च तस्य निषेधस्य प्रत्ययविधिविषयत्वमेवेत्यर्थानुवादकमेवज्ञापकमिति भावः। अत्र विंशत्यादिभ्य इत्युपादानात्सूचोपात्ता एव विंशत्यादयो ग्राह्या न तु सहस्रादयः षड्भिर्विंशतीति सूत्रानुक्ताः। न च षड्भिर्विंशतीतिसूत्रं वार्त्तिककृता अनारभ्यो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिष्वित्यनेन प्रत्याख्यातमिति कथन्त एव विंशत्यादय इति वाच्यम्। वार्त्तिककारेण तस्य प्रत्याख्याने कृतेऽपि नासूया कर्त्तव्या यत्नानुगमः क्रियत इत्यनेन भाष्यकृता तस्यावश्यकत्वस्योक्तत्वात्। गणपाठ एव विंशत्यादयः पाठ्यास्त एव च ग्रहीष्यन्त इति तु वार्त्तिककाराशयः। नित्यं शतादिमासार्द्धमास। नन्वत्र शतादिग्रहणं व्यर्थम्षष्ठ्यादेरित्युत्तरसूत्रेणैव सिद्धत्वादितिचेन्न। तत्रासंख्यादेरित्युक्त्वेन यत्र संख्यादित्वन्तदर्थमस्यावश्यकत्वादत एव मूले एकशततम इत्युदाहृतम्। षष्ठ्यादेश्चासङ्ख्यादेः। अत्र षष्ट्यादयः प्राक् शताद्द्रष्टव्याः। शतशब्दस्य पूर्वसूत्रे उपादानात्। अत एव तत्रासंख्यादेरिति निषेधाप्रवृत्तिः। नित्यग्रहणञ्च प्रकृतसूत्रेऽपि षष्ठ्यर्थं संबध्यते। संख्यादिभ्यः षष्ठ्यादिभ्यस्तु प्रकृतसूत्राप्राप्तेर्विकल्प एवेत्याशयेन मूले उक्तम् सङ्ख्यादेश्चेति। मतौ छः सूक्तसाम्नोः। अत्र मताविति मत्वर्थपरत्वेन प्रथमा समर्थविभक्तिः प्रकृतेऽपि। एवमस्तुपाधिकत्वञ्च। सूक्ते सामनि चाभिधेये प्रातिपदिकान्मत्वर्थे छः स्यात्। अस्य वामशब्दाद्यद्यपि प्रत्ययो विधीयते तथापि न सुपो धातुप्रातिपदिकयोरिति लुक्। अस्य वामेतिसमुदायस्यानुकरणशब्दत्वात्सुबभावादित्याह। अस्य वामीयमित्यादाविति। ङसादेरिति। ङसादेशत्वेन प्रतीयमानशब्दादेरित्यर्थः। न तु ङसः कथमप्यत्र सम्भवः। परिनिष्ठितानुकरणत्वात्।

अध्यायानुवाकयोर्लुक्प्रातिपदिकान्मत्वर्थे छः स्यादध्यायानुवाकयोरभिधेययोः। लुक् च। कस्य लुगित्याकांक्षायामनेन सूत्रेण विहितस्य छस्येत्यर्थाल्लभ्यते। एवञ्च विधानसामर्थ्यादिकल्प इत्याह। मूलेऽविधानेत्यादि। तच्च छविधानन्न मात्रादित्याशयेनाह। ज्ञापकमिति। शब्दपरा इति। मत्वर्थपरा इति शेषः। आकर्षादिभ्यः कन्। नन्वाकर्षादीनां गोषदादिषु पाठङ्कृत्वा प्रकृतसूत्रेण कार्यमिति चेन्न। इदुदन्तादपि कन् यथा स्यात् वुनि तु यस्येति चेति सूत्रेणेदुतोर्लोपे अशनिकः शकुनिकः त्रसुक इति न सिध्येदित्याशयात्। धनहिरण्यात्। अत्र कामशब्दाभावबहुव्रीह इत्याशयेनाह। काम इच्छेतीति। तच्च कुशल इतिसूत्रात्तच्चेति वर्त्तते कन्निति च। धनहिरण्यशब्दात्सप्तम्यन्तात्कामेऽर्थे कन् स्यात्। अनभिधानादिति। तदुक्तभाष्ये। धनहिरण्यात्कामाभिधान इति वक्तव्यम्। षष्ठ्यर्थे ह्यनिष्टप्रसङ्गः। षष्ठ्यर्थे सत्यनिष्टमसज्येत। धने कामोऽस्येति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कस्मान्न भवति। धने कामोऽस्येति। अनभिधानादिति। स्वाङ्गेभ्यः प्रसिते। स्वाङ्गवाचिनः सप्तम्यन्तात्प्रसितेऽर्थे कन्। प्रसितस्तत्परः। अत्र केशानामक्रियात्वात्तेषु तत्परत्वमनुपपन्नमत आह। मूले तद्रचनायामिति। एवञ्च वृत्तिविषये केशशब्दस्तद्रचना रूपेऽर्थे लाक्षणिक इत्याशयस्तदाह। अत्रैवार्थे इति। उदराद्ठगाद्यूने। एतदर्थमाह। तच्चेत्यादि। अविजिगीषुरिति। दिवोऽविजिगीषायामितिसूत्रेण निष्ठा नत्वस्य तच्चेवार्थे विधानादाद्यूनशब्द एतदर्थकः। यो हि अग्नौ सामर्थ्याधिक्येनौदर्याग्निना पीडितः सन्नुदरभरण एव तत्परस्य एवौदरिक इत्युच्यते तादृशश्चामल्ल इत्याशयेनाह। मल्ल इति। अमल्लो हि बहुवारम् भक्षयति सर्वदोदरभरणैकव्यापारवान् भवति तथापि बुभुक्षित एवास्ते। अत एव शारीरसामर्थ्यरहितो भवति। औदरिकशब्दबोध्यः सः। यस्तुसकृच्चर्वणेनापि सन्तुष्टो भवति सएवशारीरसामर्थ्यवान्भवतितादृशश्चमल्लउदरक इतिव्यपदिश्यते। तन्त्वशब्दादचिरापहृतेऽर्थेपञ्चम्यन्तात्कन्स्यात्। अचिरमपहृतस्तन्त्वात्सद्य एवाहृतस्तादृशश्चप्रत्यय एवेत्युक्तम्मूले। प्रत्यग्रइति। प्रत्यग्रोनूतनो नव इति कोशः। ब्राह्मणकोष्णिके संज्ञायाम्। ब्राह्मणकेतिदेशविशेषस्य संज्ञा। तादृशश्च क इत्याकाङ्क्षायामाह। मूले आयुधजीविन इत्यादि। शीतोष्णाभ्यां कारिण्यर्थे कन् स्यात्। शीतमिति क्रि-

याविशेषणम्। शीतमन्दम् तादृशश्वालस एवेति लोकेऽलसो व्यपदिश्यते शीतक इति। इयमपि संज्ञैवेत्याशयेनाह। संज्ञायामिति। अधिकम्। अधिकमिति निपात्यते। अध्यारूढशब्दात्कन् आरूढशब्दस्य लोपोऽत्र निपात्यते यद्यपि तथाप्यत्र शुद्धरूढत्वमेव कल्प्यते अवयवशक्तिज्ञानस्य समुदायजन्यशक्तिज्ञाने सहकारित्वाभावादित्याशयेनाह। व्युत्पादनेति। अत्रेदं बोध्यम्। यद्यप्यध्यारूढशब्दः कर्मतान्तः कर्तृतान्तो वा गत्यर्थकाद्धातोर्गत्यर्थाकर्मकेत्यनेनोभयत्र तस्य विधानात्। आद्ये कर्मणोऽभिधानात्ततः प्रथमा कर्तुस्तृतीया। अध्यारूढा खारी द्रोणेन। द्वितीये कर्तुरभिधानात्ततः प्रथमैव। अध्यारूढो द्रोणो खारीमिति। अधिकशब्दप्रतिपाद्यार्थस्य त्वक्रियात्वात्तद्योगे न द्वितीयातृतीये भवतः किन्तु यस्मादधिकं यस्य चेश्वरवचनमिति निर्देशाज्ज्ञापकात्तद्योगे पञ्चमी तदस्मिन्नधिकमिति निर्देशात्सप्तमी वा। अधिका खारी द्रोणात्। अधिको द्रोणः खार्यामिति वा। अधिका खारी द्रोणेनेत्यत्र तु हेतौ तृतीया बोध्या। अनुकाभिकाभीकः कमिता। सूत्रे समाहारद्वन्द्वेऽपि सौत्रं पुंस्त्वम्। अनुक अभिक अभीक एते शब्दा निपात्यन्ते। कमितासमुदायेनाभिधेयत्वेत्। क्रियाविशिष्टसाधने वर्त्तमानाभ्यामन्वभिभ्यां स्वार्थे कन्नभेर्दीर्घः पाच्चिको निपात्यते। पार्श्वेनान्विच्छति। अत्र पार्श्वशब्दः पार्श्वसदृशे वर्त्तते पार्श्वमिव पार्श्वमिति। उत्तरपदलोपात्। सदृशश्वान्ऋजुरुपायः। यः पुरुषो ऋजुनोपायेवान्वेष्टव्या नर्थानन्ऋजुनोपायेनान्विच्छति स उच्यते पार्श्वक इति। पार्श्वन्तिर्यगवस्थानादन्ऋजु यथा तथा उपायोऽपि। अयः शूलदण्डाजिनाभ्याम्। इहायः शूलदण्डाजिनशब्दौ लाक्षणिकौ। अयः शूलमिवायःशूलन्तीक्ष्ण उपायः। दण्डाजिनशब्दस्तु दर्भेदभसाधनत्वाद्वर्त्तते। तदुक्तभाष्ये। किं योऽयः शूलेनान्विच्छति स आयः शूलिकः। किञ्चातः। शिवभागवते प्राप्नोति। एवन्तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः। अयः शूलमिवायःशूलम्। यो मृदुनोपायेनान्वेष्टव्यानर्थान् रभसेनान्विच्छति स उच्यते आयःशूलिकः। शिवभागवत इति। शिवोभगवान्भक्तिरस्येत्यर्थे गमकत्वात्साधुत्वमिति प्रागुक्तम्। इह शीतोष्णपार्श्वायः शूलदण्डाजिनशब्देभ्यो मुख्यार्थेभ्यो न प्रत्ययः। किन्तूक्तार्थेभ्य एव। तावतिथग्रहणमिति लुग्वा। अत्र तावतिथशब्दस्य पूरणप्रत्ययान्तत्वादयंशब्दः पूरणप्रत्ययान्तसामान्योपलक्षणम्।

ननु लुग्वेत्यनेनैतत्सूचविधीयमानस्य प्रत्ययस्यैव वाक्यभेदेन लुक् कुतो नेत्यत आह। षष्ठे नेत्यादि। न च पूरणप्रत्ययान्तात्प्रातिपदिकादृच्छ्रातीत्यर्थे कन्प्रत्ययो विधीयते एवञ्च ग्रहणरूपस्यार्थस्य वृत्तावन्तर्भावाद्विकं ग्रहणन्देवदत्तस्येत्यत्र ग्रहणमित्युपादानमधिकमित्यत आह। ग्रहीतर्यपीति। गुरुकृतयेति। गुरुकृता या द्वितीया शब्दावृत्तिस्तया करणभूतया देवदत्तकृतङ्ग्रहणमित्यर्थः। ग्रन्थविषये ग्रहणे। ग्रन्थकर्मके ग्रहणे। एवञ्च ग्रन्थकर्मकङ्ग्रहणमित्ययार्थ इति भावः। ग्रहणमिति भावेलुडिति। एवञ्चटतीयान्तादृग्रहणमित्यर्थेप्रत्ययः। अत एव देवदत्तस्येतिषष्ठ्यन्तार्थस्यकर्तृत्वस्यतत्रान्वयः। तावतियेनगच्छातीत्यनेन तु प्रत्ययोग्रहणकर्त्तरिविधीयते। पूरणप्रत्ययस्यचनित्योलुगितिपूर्वस्माद्विशेषः। शृङ्खलमस्य बन्धनम्। शृंखलशब्दात्प्रथमासमर्थादन्धनोपाधिकादस्येति षष्ठ्यर्थे कन्प्रत्ययो भवति। कालप्रयोजनाद्रोगे। पूरणप्रत्ययान्त एवेति। सन्निधानात्। यद्यप्यत्र सूत्रे समर्थविभक्तिबोधकप्रत्ययार्थबोधकञ्च पदन्ननिर्दिष्टन्तथापि संज्ञायामित्यस्योत्तरसूत्रादपकर्षेणरोग इत्युपादानेन च रोगस्य सञ्ज्ञायां सामर्थ्याद्विभक्तेः प्रत्ययार्थस्य च निर्देशः कार्यः। संज्ञाग्रहणादेव कालबोधकः पूरणार्थकप्रत्ययान्तक एवेत्यपि लभ्यतेइत्यपिबोध्यम्। ततः पूरणप्रत्ययान्तेभ्यः। तदस्मिन्नन्नमाये संज्ञायाम्। अत्र प्राय इतिसप्तमी वैषयिकी। प्रायो बहुत्वम्। यदन्नन्तप्रायविषयम्बाहुल्येन प्रक्रान्तं चेत्। संज्ञायामिति प्रत्ययान्तोपाधिः। अभ्यवहार्यमिति। न तु भिक्षा स्त्री भक्तमन्धोऽन्नमिति भक्ते रूढम्। गुडापूपिकेत्युदाहरणस्याकारारूढत्वात्। श्रोत्रियंश्छन्दोधीते। छन्दः शब्दादधीतइत्यर्थे घन्प्रत्ययो भवति छन्दः शब्दस्य च श्रोत्रादेशो भवति। कैयटमतानुसारेणाह। सूत्रेऽधीत इत्यस्येति। आद्यमनेन भुक्तमिनिठनौ। आद्यशब्दाद्द्वितीयान्तादनेन भुक्तमित्यर्थे इनिठनौ प्रत्ययौ स्तः। आद्यशब्दो यद्यपि क्रियाविशेषवचनस्तथापि प्रकृतेऽनेन भुक्तमित्युपादनसामर्थ्यात्तत्साधनद्रव्यपर इत्याशयेनाह। आद्यशब्दादिति। पूर्वादिनिः। अन्तरङ्गत्वाद्धीग्रोपस्थितिकत्वात्। छन्दसि-परिपन्थिपरिपरिणौपर्यवस्थातरि। पर्यवस्थाता प्रतिपक्षः स एवभपन्न इत्युच्यते तस्मिन्नार्ये परिपन्थिपरिपरिणौ निपात्येते। छन्दसि विषये। उक्तौ शब्दौ छन्दस्येव साधू। अनुपद्यन्वेष्टा। पदस्य पश्चादित्यर्थेऽव्ययीभावः। अनु-

पदीगवामिति। षष्ठ्यर्थोऽवयवावयविभावस्तस्य नित्यसापेक्षत्वात्पदशब्दार्थेऽन्वयः। अन्वेषणञ्च प्रत्यासत्त्यागत्वामेव विवक्षितम्। तेन पदार्थान्तरान्वेषणकर्तरि वाक्यमेव। साक्षाद्द्रष्टरि संज्ञायाम्। साक्षादित्यव्ययम् तस्मादिनिः प्रत्ययो भवति। द्रष्टरि समुदायेनाभिधेये। संज्ञायामित्यस्योपादानेनायमर्थो लभ्यते। संज्ञायतेऽनया सा संज्ञा निपातनादङ्करणे। विषयत्वं सप्तम्यर्थः। अस्मिन्सूत्रे साक्षाद्द्रष्टरि समुदायोपादानेऽपि साक्षाच्छब्दादस्य प्रत्ययविधायकत्वं यथा भवति तल्लाभोपायमाह। साक्षाद्द्रष्टेत्यर्थ इति। क्षेत्रियच्परक्षेत्रे चिकित्स्यः। क्षेत्रियजिति निपात्यते। परक्षेत्रे चिकित्स्यदभिधातुमिष्यते। एतेन परक्षेत्रे चिकित्स्ये त्येतदाक्यार्थ एव क्षेत्रियशब्दार्थ इत्युक्तम्भवति। निपातनञ्चात्र क्षेत्रशब्दाद्यचः परशब्दलोपस्य चाक्षेत्रशब्दोऽत्र शरीरवाची। परशरीरे जन्मान्तरीयशरीरे चिकित्स्यः प्रतीकार्यः नत्वस्मिन् देहे तेनासाध्य इतिफलितम्। यद्वा परक्षेत्रे जातानि यानि तृणानि धान्यरक्षणार्थन्ततश्चिकित्स्यानि परिहर्त्तव्यानि तानि क्षेत्रियानि। यद्वा परस्य यत्क्षेत्रं दाररूपन्तेषु प्रवृत्तः सन्यश्चिकित्स्यो निगृहीतव्यः सोऽत्राभिधीयते। एतत्सर्वमाकरादवसेयम्। इन्द्रियमिन्द्रलिङ्गं। इन्द्रआत्मेति यदुक्तन्तत्र प्रमाणमाह। स एतमेव पुरुषमिति। इन्द्रस्यात्मनो लिङ्गमनुमापकमित्येतदुपपादयति। कर्वधिष्ठितानामिति। इन्द्रेण दृष्टम् ज्ञातम्ममचक्षुर्ममश्रोत्रमित्यादिक्रमेण। इन्द्रेणात्मनैवसृष्टम् जन्मान्तरे यादृशं सदसत्कर्मकृतन्तज्जन्यादृष्टवशादिह जन्मनि तदनुरूपाणीन्द्रियाणि भवन्ति। इन्द्रेण जुष्टम्प्रीणितम्।यथा तेषु विकारो नभवति तथा यत्नेन कृतम्।इन्द्रेण दत्तम्। तत्तद्विषयग्रहणार्थन्तेषु विषयेषु योजितम्। अत्रेन्द्रियं लिङ्गदृष्टसृष्टजुष्टदत्तेष्विति वक्तव्येऽनेकेन्द्रशब्दोपादानमिन्द्रस्यात्मनः स्वस्यैव स्वेन्द्रियलिङ्गत्वादि विवक्षायां यथा स्यात्परसम्बन्धिनो यथा कथञ्चित्ताद्दशत्वे माभूदित्येवमर्थम्॥

॥ इति भावाद्यर्थकाः ॥

तदस्यास्त्यस्मिन्निति मतुप्। प्रथमान्तादस्त्युपाधिकादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे च मतुप्प्रत्ययः स्यात्। अत्रास्तीत्यत्र प्रतीयमानः प्रथमार्थो न विवक्षितः। अत एवाहममुष्यस्य देवदत्तस्येत्यर्थे महान्देवदत्त इत्यत्र गावः सन्त्यस्मिन्देशे स गोमान्देश इत्यत्र च मतुप्सिद्धिः। एवञ्च प्रथमातिक्रमे कारणाभावाच्छब्दसंस्कारार्थन्तयोरुपादानमिति भावः। अस्येत्युपादानस्य फलमाह। गोमानिति। तत्सम्भव इति। तत्र यथा ब्रह्मदत्ते पञ्चालाधिकरणत्वसम्भवस्तथा गोमानित्यत्रापि भविष्यतीतिभावः। मानाभावादिति। तत्रापि स्वामित्वसम्बन्धस्य वृत्त्यनियामकतयाऽधिकरणतावच्छेदकत्वे प्रमाणाभावात्तत्सम्बन्धावच्छिन्नाधिकरणता न प्रतीयते किन्तु तत्सम्बन्धाश्रयत्वमात्रम्। इदं सूचन्तु यत्र तत्तद्विशेषसम्बन्धावच्छिन्नावच्छिन्नाधिकरणता प्रतीतिस्तत्रैवप्रवर्त्तते। अस्मिन्नित्यस्य प्रयोजनमाह गोमान्देश इति। सम्बन्धाभावेन। षष्ठ्यर्थसम्बन्धाभावेन। संबन्धाभावमुपपादयति। सर्वत्रेति। यथा देवदत्तस्य गाव इत्यत्र क्रयविक्रयादिलक्षणः प्रतिग्रहपोषणादिलक्षणो वा यः क्रियाकारकभावस्तत्पूर्वकः स्वस्वामिभावः। राज्ञः पुरुष इत्यादौ राजा तेभ्यो वेतनन्ददाति चैतस्य भार्यापुत्रावित्यादौ प्रतिग्रहजननादिलक्षणसम्बन्धपूर्वकः सः। नचैवमत्रेति। गोमान्देश इत्यत्र तादृशः सम्बन्धो नास्तीत्यर्थः। संयोगसम्बन्धस्याधाराधेयभावनियामकत्वेऽपि संयोगसंबन्धस्य क्रियाकारकभावमूलकत्वाभावेन षष्ठीवाच्यत्वन्नेत्येतदुपपादयति। संयोग एवेति। तन्मूलकः सः। क्रियाकारकभावमूलकः संयोगो नेत्यर्थः। प्रकारान्तरेण संयोगस्य षष्ठीनिमित्तत्वं खण्डयति। किञ्चेति। षष्ठ्यापत्तेरिति। न हि तत्र घटस्य घट इति भवतीति भावः। अत एव। संयोगस्य षष्ठीनिमित्तत्वाभावादेव। यथा भूमादीनान्नमत्वर्थत्वङ्किन्तु प्रमाणान्तरेण प्रकरणादिना च प्रतीतिस्तथा संयोगस्यापि मत्वर्थत्वाभावात्तेषु ग्रहणमिति भावः। ते तस्येति। ते वृक्षाः पर्वतस्य न किञ्चित्सम्बन्धिनः। षष्ठ्यर्थमत्वर्थीयो नेति। यथा गोमच्छब्दादेवदत्तपराद्गोमानस्येत्यर्थेनेत्यर्थः। सप्तम्यर्थेनेति। देशपराद्गोमच्छब्दात्सप्तम्यर्थेन। ननु दण्डिमतीशालेतिदृश्यत एवेत्यत आह। भिन्नवृत्तावपीति। अत्र षष्ठ्यर्थे वृत्तिं कृत्वा सप्तम्यर्थे वृत्तिः कार्या। तदुक्तभाष्ये मत्वन्तान्मतुपा न भवितव्यम् किं कारणम्। यस्य गोमन्तः सन्ति

गावोऽपि तस्य सन्तीति । एवमेव सप्तम्यर्थेऽपि द्रष्टव्यम् । एवं रीत्या तत्र तत्राप्राप्तिमुपपाद्यभाष्यकृतैवोक्तम् । शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः । सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते इति । अत्र सन्नन्तादितिवाक्ये सरूप इति सम्बन्ध्यते । तत्र शब्दतः सारूप्यमव्यभिचरितमिति प्रकृतेऽर्थत एव विवक्षितमत इच्छार्थकसन्नन्तादिच्छायां सन्न । स्वार्थसन्नन्तादिच्छायाश्चवल्येव । जुगुप्सिषते । मिमांसिषत इति यथा । सप्तम्यर्थे च नेनिठनाविति । तदुक्तमत इञितिसूत्रे भाष्ये सप्तम्याश्च नतौ स्मृताविति । दण्डा अस्यां शालायां सन्तीति । ननु गोमान्देवदत्त इत्यस्माद्गोसम्बन्धः प्रतीयेत न तु वर्त्तमानकालोऽस्त्यर्थश्च । गोशब्दो गोत्वविशिष्टस्य मतुप् च षष्ठ्यर्थस्य प्रतिपादक इतिविशिष्टसमुदायात्तस्यैवप्रतीतिः स्यादत आह । अत्र शब्दशक्तीति । ननु भूतत्ववर्त्तमानत्वयोर्विरोधात्कथङ्गोमानासीदित्यादि प्रयोगोऽत आह । गोमानासीदित्यादेरिति । अस्तिग्रहणमिति । भाष्ये अथास्तिग्रहणं किमर्थम् । सत्तायाम्प्रत्ययो यथास्यात् । नैतदस्ति प्रयोजनम् । न सत्ताम्पदार्थो व्यभिचरति । इत्याद्युक्ताऽस्तिग्रहणम्प्रत्ययविध्यर्थम् । नोपाध्यर्थम् । अस्तिमानिति मतुप् यथा स्यात् । अप्रातिपदिकत्वात् । नैष दोषः । अव्ययमेषोऽस्तिशब्दः । नैषोऽस्तेर्लट् । कथमव्ययत्वम् । विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञानिपातोऽव्ययमित्यव्यय संज्ञा।एवमपि न सिद्ध्यति किं कारणमस्ति सामानाधिकरण्ये मतुप् विधीयते न चास्तेरस्तिनासामानाधिकरण्यमिति । अत्र कैयटः । गवादीनां संबन्धव्यभिचाराभ्यामस्तीतिसामानाधिकरण्यं सम्भवत्यस्ते स्वव्यभिचारादस्तिसामानाधिकरण्याभाव इति । सचास्तिशब्दः सत्ताकर्तृधनप्रतिपादकः । सौचेति शब्दस्य प्रयोजनमाह । इतिशब्देति । भूमनिन्देति वार्तिके संसर्गेतिपाठाभिप्रायेण व्याचष्टे । संसर्गः संयोग इति । स च । संयोगश्च । सम्बन्धान्तरे । स्वस्वामिभावादिसम्बन्धे । तन्नियामकः संसर्गित्वबुद्धिनियामकः । संयुक्तदण्डस्यैवेति । संयुक्तोदण्डो यस्य तस्येत्यर्थवार्तिकं व्याचष्टे । अस्तिविवक्षायामिति । भूम्नि यथा । यवमान् । गोमानिति । भूमाबहुत्वम् । एतच्चार्थिकम् । यस्य यावद्यवमत्त्वं योग्यन्तस्य ततो बहुत्वेऽयमयोगः । अत्र भूमादिग्रहणम्प्रायेण भूमादयोऽपि प्रतीयन्त इत्येवम्परम् । सा प्रतीतिश्चव्यञ्जनाजन्यशाब्दबोधरूपो मान-

सीवेल्यन्यदेतत् । निन्दायाम् । कक्षुदावर्त्तिनी कन्या । प्रशंसायाम् । रूपवानयं ब्राह्मणः । नित्ययोगे । क्षीरिणः । कण्टकिनो वृक्षा इति । अत्र क्षीरेण सह नित्यो योगः कालिकप्रत्यासत्याक्षीरसत्तासमनियतसत्ताकत्वरूपः प्रतीयते । अतिशायने उदरिणी कन्या । संसर्गे । दण्डी । छत्री इति । एतद्वार्त्तिकं व्याख्याय भाष्येऽक्तम् । भूमादिग्रहणं कर्त्तव्यम् । इति करणः क्रियते ततश्चेदिवच्चा । भूमादियुक्तस्यैव विच्चा इति । तेन । रसादिविशेषणत्वेन । अत्र गुणग्रहणेन शास्त्रान्तरे ये गुणत्वेन प्रसिद्धास्ते गृह्यन्ते तत्फलमाह । जलादिवाचीति । एभ्यः । रसादिभ्यः । भाष्ये स्पष्टमिति । दृश्यन्ते ह्यन्ये रसादिभ्यो मत्वर्थीयाः । रसिको नटः । उर्वशी वैरूपिण्यप्सरसाम् । स्पर्शिको वायुरिति । एतेनेदं सूत्रमत्याख्यातम् । गुणगुणि बोधकेभ्य इति । एतादृशो यः शब्दस्तस्माद्गुणपरतायां सत्यान्तस्माद्यदा गुणिनि सम्बन्धिनि विवक्षिते मतुप् तदा तस्य लुकि शुक्लः पट इति भवतीति वार्त्तिकारम्भस्य प्रयोजनमाह । गुणगुणिनोरभेदेति । गुणगुणिनोः सम्बन्धस्तादात्म्यमस्ति तादात्म्यञ्च भेदाभेदाविति तयोर्मध्ये यदाभेदस्य प्राधान्यमाश्रित्यतद्व्यवहारस्तदा शुक्लादिशब्देभ्यो मतुपि लुप्ते तस्याश्रवणाय वार्त्तिकारम्भः कार्य इति भावः । नचैवं रूपवानिति न स्यात्तत्रापि लुकः प्राप्तेरिति वाच्यम् । शब्दशक्तिस्वभावाच्छुक्लादिशब्दवाच्यो द्विविधोव्यवहार इति त एव गुणवचनेभ्य इत्यत्र गृह्यन्ते न तु भेदव्यवहारमात्रविषया रूपादय इत्याशयात् । अत एव । लुप्तमतुवन्तस्य प्रयोगस्वीकारादेव ॥गुणिनीति । लुप्तमतुवन्तवाच्यत्वेन विवक्षिते इति शेषः । विशेष्यलिङ्गतेति । विशेष्यवाचक पटादिशब्दानां यल्लिङ्गन्तल्लिङ्गशुक्लादिशब्दप्रयोगः सिद्धः । शुक्लः पटः शुक्ला शाटी । शुक्लं वस्त्रमिति । न च शुक्लं रूपमितिप्रयोगो दृश्यते गुणिपरत्वन्तु नास्तीतिगुणिनीत्यसङ्गतमिति वाच्यम् । गुणिपदस्य गुणनिष्ठप्रकारतानिरूपितविशेष्यत्वेन विवक्षितो योऽर्थस्तत्परत्वात् । गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तदितीत्यत्रापि गुणिशब्द एतत्पर एव । तत्रापि । गुणिन्यपि । सर्वलिङ्गस्य रूढिस्वीकारेगुणिवाचकस्य स्त्रीत्वेऽपि पुल्लिङ्गशब्दस्य रूढ्याप्रयोगः स्यात् । नियतलिङ्गस्य रूढत्वे तु शुक्लः शाटीतिप्रयोगः स्यात् । गुणवचनेभ्य इत्यत्र शुक्लादिशब्दानामिव ग्रहणमित्यत्र गुणेभ्य इतिवक्तव्ये गुणवचनेभ्य इत्यत्र वच-

नञ्शब्दमुच्चारयतो वार्त्तिककारस्य तात्पर्यमस्तीत्यवसीयते। आकडारेति सूत्रस्थभाष्यस्याप्येवं सत्यविरोधो भवति। शुक्लादीनामेव गुणवचनसंज्ञायास्तत्र विधानात्। अयञ्चेति। यत्र पटादिशब्दसमभिव्याहारस्तत्र लुगाश्रीयते। यत्र तु न तथा तत्र शुक्लवानिति भवत्येवेति। ध्वनितञ्चेदमिति। तत्र हि गुणेन षष्ठी न समस्यत इत्यस्यादौ ब्राह्मणस्य शुक्लाः ब्राह्मणस्य कृष्णा इत्युदाहरणप्रदर्शनैतदस्ति प्रयोजनम्। असामर्थ्यादेवात्र न भविष्यति कथमसामर्थ्यम् सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ता इत्युक्तम्। एतेन तत्र लुकः सिद्धये द्रव्यस्यापेक्षाऽवश्यं वाच्या। यदि च द्रव्यवाचकसमभिव्याहाराभावेऽपि लुक् स्यात्तदा द्रव्यमत्रापेक्ष्यते इत्यभिधाना सङ्गतिः स्यात्तेनेदमुक्तमित्यर्थः। तत्र केवलस्य शुक्ला इत्यस्य प्रयोगस्तु प्रविश्य पिण्डीमितिवद्बोध्यः। प्रत्याख्यातमिति। अव्यतिरेकात्सिद्धमित्यादिना। अत्र कैयटः। गुणगुणिनोः सोऽयमित्यभिसम्बन्धादभेदाध्यवसायादुत्पत्तिरेव मतुपो नास्तीत्यर्थः। अभेदाध्यवसाये हेतुर्भाष्यकृतैवोक्तः। न गुणो गुणिनं व्यभिचरतीतिनन्वयं यो यदव्यभिचारि स तदभिन्न इति न नियमः। वह्निनिरूपिताव्यभिचारस्य धूमे सत्त्वेऽप्यभेदाभावादिति चेन्न। गुणगुणिनोर्जातितद्वतोरिवायुतसिद्धभावस्त्वोऽयमित्यभेदात्सम्बन्ध इत्यनेन कैयटेन समाधानात्। अभेदात्सम्बन्ध इत्यस्य विशेषणविशेष्यभावरूपः सम्बन्ध इत्यर्थः। एवञ्च मतुप्प्रवृत्तियोग्यो यो भेदसम्बन्धः सोऽत्र नास्तीति विवक्षितम् अभेदसमानाधिकरणो यो भेदः स न मतुपो नियामक इति भावः। कस्यचिन्मतमाह। भेदेऽपीति। अन्य इत्यनेनारुचिः सूचिता तद्दोजन्त्वव्यतिरेकादिति पूर्वभाष्यविरोधः। तेन हि मतुप्प्रवृत्तियोग्यभेदाभाव एव लभ्यते न त्वनभिधानमन्यथाऽव्यतिरेकस्य हेतुत्वे नाभिधानं व्यर्थंस्यादिति। वचनमारभ्यमिति। यदि सूत्रे पाठः स्यात्तदा निपातनेनैव कच्चीवच्छब्दसिद्धौ सम्प्रसारणविधानं व्यर्थं स्यादिति भावः। व्रीह्यादित्वे त्विति। अत्र तु शब्द एवार्थे। प्राण्यङ्गादेवेति मूले। किमत्र प्रमाणमिति चेत्। प्राण्यङ्गादिति वक्तव्यमिति वार्त्तिकमेव। ननु प्राण्यङ्गादित्यस्य प्रत्युदाहरणं यन्मेधावानित्युक्तन्तदसङ्गतमम्नायामेधेति सूत्रे विशिष्यमेधाशब्दपाठेन विन्प्रत्ययो लचो बाधकः स्यादित्याशङ्कते। न चेति। समाधत्ते। चिकीर्षेति। के चित्तु मेधावानि-

त्यपि प्रत्युदाहरणं युक्तमेव। अस्मायामेधेति सूत्रे धीर्धारणावती मेधेति बुद्धिविशेषे रूढस्यैवाभिव्यक्तेतिन्यायेन ग्रहणमिदम्प्रत्युदाहरणन्तु बुद्धिसामान्यलाक्षणिकस्य मेधाशब्दस्य। किञ्च चिकीर्षावानिति यदुक्तन्तदपि नोचितम्। अस्मिन्नेव सूत्रे इह कस्मान्नभवति चिकीर्षास्ति जिहीर्षास्ति। प्राख्यङ्गादिति वक्तव्यम्। तत्तर्हि वक्तव्यन्न वक्तव्यम्। कस्मान्न भवति। चिकीर्षास्तीति अनभिधानादिति भाष्यकृदुक्तानविधानात्। वस्तुतो मनीषावान्। धिषणावानिति प्रत्युदाहरणमित्याहुः। एतच्चेति। लचश्चकारस्य स्वरितबाधनार्थत्वम्। चकारोच्चारणसामर्थ्याल्लचो लकारात्परः स्वर उदात्त एवेति नियमेनेति तत्त्वः। भाष्योक्तव्याख्यानादिति। तच्च हि सिध्मादिषु यान्यकारान्तानि तेभ्यो लचा मुक्ते इनिठनौ प्राप्नुतः। इनिठनौ च नेष्येते। कथन्तौ न भविष्यतः। लजन्यतरस्यामिति समुच्चयोऽयन्न विभाषा लच मतुप् चेति भाष्योक्तव्याख्यानादित्यर्थः। वत्सांसाभ्याङ्कामबले। एतद्व्याख्यानावसरे लच्चेति व्याख्यातन्तन्न युक्तम्। वृत्तिग्रन्थविरोधात्। तच्च हि न चायमर्थो मतुपि सम्भवतीति नित्यं लजेव भवतीति प्रतिपादितम्। वत्सांसाभ्यां यथा सङ्काङ्कामवति बलवति चार्थे लजनेन विधीयते। सूत्रे कामबलशब्दौ अर्श आद्यजन्तौ। प्रज्ञा श्रद्धा। सौम्यप्रज्ञाशब्दस्य प्रयोजनमाह। यद्यपीति। ननु अर्णचेति सूत्रे योगविभाग उत्तरार्थ इति व्याख्यातन्तच्च न्यूनम्। तपःसहस्रेति सूत्र एवाणः पाठे तपःसहस्रयोर्विनोन्योर्यथा सङ्काङ्क स्यादितीहार्थोऽपि योगविभाग इत्यत आह। तपःसहस्राभ्यामिति। दन्त उन्नत उरच्। अत्र दन्तेति लुप्तविभक्तिकम्। उन्नतेति प्रकृतिविशेषणम्। दन्तशब्दादुन्नतोपाधिकादुरच्प्रत्ययो भवति मत्वर्थे। ऊषशुषिमुष्क। द्रव्यवाचकमधुशब्दग्रहणशङ्का वारणायाह। रसवाचिन इति। स्पष्टञ्चेदमाह इति। तत्र ह्ययम्मधुशब्दोऽस्त्येव द्रव्यपदार्थकः। अस्ति रसवाची। अपि च मधुन्येव हि मध्विदम्मधुरमिति प्रयुज्यते तद्योरसवाची तस्येदङ्ग्रहणमित्युक्तम्। रप्रत्ययान्तनगरशब्दस्त्विति। अस्मादित्वात्। अत एव। जातिवाचकत्वादेव। भाष्ये उक्तत्वेनेति। द्युद्भ्यां नित्यार्थमेके। कथम्। विभाषा मध्येऽयं योगःक्रियते विभाषा मध्ये ये विधयस्ते नित्या भवन्तीति तत्रोक्तम्। व्याख्यानादिति। तत्पूर्वभाष्ये वस्य पुनर्वचनं सर्वविभाषार्थम्। केशा-

ष्ठोऽन्यतरस्यामित्युक्तम्। तच्च कैयटः। कैमाद्द इत्येव वक्तव्यम्। तच्च प्रकृतान्यतरस्यां ग्रहणानुवृत्त्या ठन्निनिमतुपो भविष्यन्तीति किमन्यतरस्यां ग्रहणे न ठन्निनिप्राप्त्यर्थेन तत्पुनःक्रियमाणम्पूर्वस्यान्यतरस्यां ग्रहणस्य मतुप्समुच्चयार्थत्वं ज्ञापयतीत्यर्थ इति। एतद्भाष्यसम्मतव्याख्यानादित्यर्थः। भाष्योक्तोदाहरणान्याह। विंवावमिति। भाष्ये तु न दृश्यते इति। किन्तु वृत्तौ एवमुक्तेर्दर्शनेन मूले लिखितमिति शेषः। शब्दस्य साधुत्वन्तु अन्येभ्य इति वप्रत्यये पृषोदरादित्वात्सलोपे सति भवतीति बोध्यम्। एकाच्चरादित्यादि। एकाच्चरात्। स्ववान्। खवान्। क्षतः। कारकवान्। जातेः। व्रश्चवान्। भ्रस्जवान्। सप्तम्याम्। दण्डा अस्यां शालायां सन्ति। न च तण्डुली तण्डुलिकः इति न स्याज्जातिवाचकत्वादिति वाच्यम्। एवन्तर्हि नायं समुच्चयः क्षतश्वजातेर्वेति। किन्तर्हि जातिविशेषणं क्षदृग्रहणम्। क्षय्यो जातिरिति। कथं कारकावानिति अनभिधानादिति भाष्यकृतैव समाधानात्। एतेनैकाच्चरादिति नापूर्वम् किन्तु इतिशब्दानुवृत्त्यासर्वंसाधनीयमिति ध्वनितम्। एकगोपूर्वात्। बहुव्रीहिरिति। एकगोशब्दौ पूर्वावयवौ यस्येत्यर्थः। इतिसमास इति। अत एव भाष्येऽत इत्यनुवर्त्तते उताहो न। किञ्चातः यद्यनुवर्त्तते ऐकगविको न सिध्यति। समासान्ते कृते भविष्यति। एवमपि गोशकटिको न सिध्यति। अथ निवृत्तम्। इहापि प्राप्नोति। गोविंशतिरस्यास्तीति। अनभिधानान्न भविष्यतीत्युक्तम्। एतेन प्रवहकेन कर्मधारयसमासात्प्रत्ययविधायकमेतत्सूत्रमिति ध्वनितम्। मत्वर्थेऽनभिधानेनेति। अत्र मानन्तुद्विगोस्तद्धितस्य प्रतिषेध इतिवचनस्य वा मत्वर्थे प्रतिषेध इति वचनस्य वा आवश्यकत्वमिति विचारे भाष्यकृतोक्तम्। द्विगोस्तद्धितस्य प्रतिषेधो वक्तव्यः। यदेतन्नास्ति सर्वत्र मत्वर्थे प्रतिषेध इति सति हि तस्मिंस्तेनैतल्लिङ्गमिति भाष्यदर्शनमेव। पञ्चखट्वः पञ्चगुरित्यादौ द्विगोस्तद्धितार्थे विधीयमानस्य बहुव्रीहेश्च प्राप्तौ द्विगौ प्रतिषिद्धे बहुव्रीहिसंज्ञायाम्बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरो भवति द्विगौ तु समासान्तोदात्तत्वं स्यात्। एवम्पञ्चखट्वा इत्यत्र ङीवापत्तिः पञ्चगुरित्यादौ टजापत्तिश्च स्यात्। अचेति। एकगोपूर्वेति सूत्र इत्यर्थः। अत एव। अत इत्यस्यासम्बन्धादेव। ननु यद्यत इत्यस्यासम्बन्धस्तदा गोविंशतिरस्यास्तीत्यर्थेपिठञ् स्यादत आह। गोविंशती-

ति । अनभिधानान्नेति स्पष्टमिति । तत्र हि अत इति निवृत्तमित्यभिधाय कस्मान्न भवति गोविंशतिरस्यास्त्रीति । अनभिधानान्न भविष्यतीत्युक्तम् । सूत्रस्थभाष्यादिति । तत्र हि समासान्ता इति सौत्रान्तशब्दस्य समासचरमावयवत्वम्प्रत्ययानांसिद्धान्तिनोक्तम् । ततोऽगृहीताभिप्रायेण प्रत्ययपरत्वेन सिद्धिर्भविष्यतीति पूर्वपक्षिणा वैयर्थ्यम्प्रतिपादिते प्रयोजनान्यभिहितानि अव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञा इत्यनेन वार्त्तिककृता । प्रतिराजम् । उपराजम् । पञ्चगवम् । दशगवम् । द्विपुरी त्रिपुरी । द्विधुरी त्रिधुरी । एतानि प्रयोजनान्यभिधाय भाष्यकृता द्वन्द्वसंज्ञा च प्रयोजनम् । वाक्त्वचम् । सुक्त्वचम् । द्वन्द्वश्च समासो नपुंसकलिङ्गो यथा स्यात् । नैतदस्ति प्रयोजनम् । लिङ्गमशिष्यम् लोकाश्रयत्वाल्लिङ्गस्य । इदन्तर्हि प्रयोजनम् । कोशश्च निषच्च । कोशनिषदम् । कोशनिषदिनी । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिरिति इनिर्यथा स्यादित्यभिहितम् । एतेन तस्मिन्सूत्रेऽत इत्यस्य सम्बन्ध इति लभ्यते । असामर्थ्येऽपीति निष्कादित्यस्य शतसहस्रयोरेवाभिसम्बन्धात् । सौत्रान्तशब्दस्य प्रयोजनमाह । अन्तग्रहणमिति । क्वचिद्भाष्यपुस्तके फलवर्हाभ्यामिनिनिति पाठो दृश्यते तस्यायुक्तत्वसूचनायाह । इनजिति पाठ इति । प्रत्ययचयेति । इनिठनोर्मतुपश्चेत्यर्थः । पर्वमरुद्भ्रान्तो वक्तव्य इति वृत्तौ पाठः । भाष्ये तु तविति पाठः क्वचिद्दृश्यते तेनायम्पिदित्याशयेनाह । पिदयमित्येक इति । वस्तुतस्त्विति पाठो युक्त इत्याशयेनाह । निदयमिति । ननु मरुच्छब्दस्यानजन्तत्वात्कथन्तत्वमत आह । तत्र हीति । मरुच्छब्दे तादृशव्युत्पत्त्या साधित इत्यर्थः । प्रत्याख्यानपक्षे यथा आदुदात्तत्वम्प्रकारमाह । तत्रेति । पर्वमरुद्भ्रान्तन्नितिवचने मरुच्छब्दस्य प्रत्याख्यानपक्षे इत्यर्थः । प्रथमे । प्रथमाध्याये । एताश्चसंज्ञा इति । निपातोपसर्गाव्ययसंज्ञा इत्यर्थः । तत्त्वविषया एवेति । यत्र तत्वन्तत्वेत्यर्थः । नानुपपन्न इति । अन्यथाऽव्ययत्वाल्लुगापत्तौ तादृशप्रयोगानुपपत्तिः स्फुटैव । तत्त्वविषया इतिबहुवचनान्तोपादानस्य प्रयोजनं समुदायस्य तत्वविषयत्वमिति अत एव मरुद्भिर्दत्तोमरुत्त इत्येवं व्युत्पादितस्य पूर्वपदप्रकृतिस्वरेणादुदात्तत्वसिद्धिरन्यथा मृगोरुतिरिति व्युत्पन्नस्य मरुच्छब्दस्यान्तोदात्ततया पूर्वपदप्रकृतिस्वरेऽपि मध्योदात्तत्वमेव स्यात् । यदि क्वचिन्मरुत्तशब्दो मध्योदात्तः श्र-

यते तदाऽऽद्युदात्तत्वेऽपि छान्दसत्वेन मध्योदात्तत्वम्। तेन। पदत्वेन। ननु केवलमतुबर्थ एवम्मिनिप्रत्ययविधाने किञ्चिद्वाग्वन्यपि वाग्मीति प्रयोगापत्तिरत आह। उत्तरसूत्रेति। अत एव मूलकारोऽग्रे आह। यस्तु सम्यगित्यादि। तेन। ऐश्वर्यवाचकादेवामिनिच्प्रत्ययस्वीकारेण। अस्यैश्वर्यवाचकत्वमेतद्वृत्तिविषय एव। किञ्चिद्वेदमिति। वर्त्तुलं कटकम्। चिपिटन्तु वलयम्। समासाद्वतीति। उपपादितमेतत्प्राक्। सम्बध्यत एवेति। अन्यतरस्याङ्ग्रहणमिति शेषः। अदन्तत्वादिति। वातातीसारयोरुपतापत्वाद्वन्द्वेति पूर्वसूत्रेण सिद्ध इत्यपि बोध्यम्। मूले रोगेचायमिष्यत इति। लक्ष्यदर्शनमत्र प्रमाणम्। भाष्ये तु न दृश्यते। फलान्तराभावादिति। न च वयस्येवेतिनियमार्थमस्त्विति वाच्यम्। अभिधानस्वाभाव्यात्तत्रैव भविष्यतीति भावः। धनवाचीति। अर्थैरैश्वर्यवा अपीतिकोशात्। तत्र। कालतोऽसन्निधिविवक्षायाम्। विरोधादिति। कालतोऽसन्निहितस्य तदस्यास्तीत्यनेन विरोधादित्यर्थः। एवञ्चैतद्विषयेऽर्थोऽसन्निहितोऽस्येत्येव विग्रहः। अनभिधानादिति। येन नाप्राप्तिन्यायेनासन्निहितेऽस्य सूत्रस्य बाधकत्वात्। अत एव। इनिठनोरभावादेव। भाष्ये उक्तम्। तत्र मतुबेवोच्चारित इतिभावः। अर्थाच्चासन्निहित इत्यत्रार्थशब्दोऽत्र धनवाचीति यदुक्तन्तस्य प्रयोजनमाह। अर्थनमिति। एवञ्चधनवाचकादेव पूर्वोक्तं सत्तोपाधिकत्वेऽनभिधानङ्क्रियावाचकात्तु भयत्वेव। अनभिधानादिति। अर्थिकप्रत्यर्थिकावपि सिद्धौ भवत इति भाष्येतदनुच्चारणमत्र प्रमाणम्। तेन। इन्नाचसमुच्चायकस्यान्यतरस्याङ्ग्रहणस्य करणेन। एतस्मात्। वलादेः॥

॥ इति मत्वर्थीयाः ॥

प्राग्दिशो विभक्तिः। अस्य सूत्रस्य न विभक्तिविधायकत्वम्। तथा सति दिशः प्राग्येवक्ष्यमाणाः शब्दास्तेभ्यो विभक्तिर्भवतीति विवक्षितोऽर्थो भवेत् स तु न युक्तः ङ्याप्प्रातिपदिकादित्येतदेकवाक्यतया ङ्याजसित्यनेनैव सिद्धेरस्य वैयर्थ्यापत्तेः। नाप्यस्य दिशः प्राग्यः प्रत्ययः ससुप्तिङ्संज्ञक इत्यर्थेऽविभक्तिशब्दवाच्यार्थोपस्थितौ तदभेदस्य प्रत्ययेषु प्रतिपादनेन विज्ञेयः। तच्च

इत्यत्र चलो लुगापत्तेः। न च तिङ्संज्ञैवास्त्विति वाच्यम्। विभक्तिपदस्यार्थोपस्थापकत्वस्य लक्षणतया तिङ्मात्रस्योपस्थितेः सुबुपस्थितिप्रतिबन्धककल्पनां विनाऽसम्भवात्। किन्त्वेतत्सूत्रघटकं विभक्तिपदं स्वरूपपरम्। दिक्शब्देभ्य इत्यतः प्राग्विभक्तिरित्येतदुपतिष्ठत इत्यर्थः। अधिमेषु प्रत्ययविधायकसूत्रेषु यत्प्रत्ययबोधकमदन्तदेकवाक्यतया चैतेनोपस्थापितविभक्तिशब्दस्यैकवाक्यतया इदमो विभक्तिपदाभिन्न इशप्रत्ययो भवतीत्यादिक्रमेण वाक्यार्थनिष्पत्तिस्तथा सति भवतीत्यत एतस्य संज्ञासूत्रत्वे पर्यवसानश्चवतीत्याशयेनाह। व्याख्यानादिति। स्वार्थिका इत्यत्रालीयवाचकस्वपदस्यार्थशब्देन समासस्तदाह। स्वीयप्रकृतेरिति। यदुक्तमाद्येनेति तत्प्रयोजनविरूपयितुमाह। यावन्तादिति। ननु सर्वादिषु किमशब्दो द्विशब्दात्प्राक्पठनीयः प्रकृतसूत्रे च किमशब्दो न पठनीय इत्याशंकायामाह। द्वयादिभ्य इत्यादि। विधेय। निर्देशात्। किंसर्वनामेति सूत्रे विधेयानिर्देशात्। व्याख्यानादिति। बहुगणेषु सङ्ख्यागणश्चर्त्तव्यमिति वार्त्तिकमूलाद्व्याख्यानादित्यर्थः। तेनेह न। वहोर्धनात्। बहुषु धनेषु। इदम इश्। इदम इशित्यादेशः स्यात्। निमित्तस्य किमस्त्रे ऽनिर्देशात्प्रकरणोपात्तस्याक् दिश इत्येतदुपतिष्ठते। तच्च दिक्शब्दघटितसूत्रप्राक्पठितसूत्रविधेयप्रत्यये लाक्षणिकम्। तत्समभ्या च विपरिणामस्तदाह। प्राग्दिशीय इति। दिशः प्राक् प्राग्दिशस्तत्र भव इत्यर्थे इत्यत्र तच्छब्दो दिक्शब्देभ्य इत्यतः प्राग्यत्प्रत्ययविधायकं सूत्रमन्तत्यरः। तत्समभ्यर्थीघटकप्रत्ययबोधकशब्दवाच्यार्थकभवशब्दान्वयी। नन्वनादेशावयवनकारस्य प्रागेव निवृत्तौ कथं सर्वादेशत्वमतआह। सर्वादेशत्वमिति। यदायं सर्वादेशस्तदा स्थानिवद्भावेन प्रातिपदिकत्वे सति नलोपप्राप्तिरिति क्रमेणादेशप्रवृत्तिसमयेऽनेकाल्त्वमसत्त्वे वेति भावः। ननु गलोपस्यासिद्धत्वाद्यदाद्यत्वमेव वक्तुमुचितमित्यत आह। परत्वादिति। फलमाहेति। विभक्तावित्येतन्मात्रोक्तौ कस्मादित्यत्र ङादेशापत्तिरिति भावः। तसेश्च। किं सर्वनामबहुभ्यः परो यस्तसिरित्युच्यमानेऽपि नपुंसकलिंगेभ्य एभ्यः परस्तसधातुरपि सम्भाव्यत इत्यतस्तस्यापि प्राप्नोति। न च पञ्चम्या इत्यनुवर्त्त्य पञ्चम्यन्तेभ्य एभ्यः परस्य तसेरितिविज्ञायत इपि वाच्यम्। एवमपि तस्मात्तस्य तियस्मात्तस्य तीत्यत्र प्राप्तेः सत्त्वात्। न च तस्य तेरादेशे

फलाभावः । अस्यापि ग्रहणेऽप्रत्ययत्वेऽपि लित्स्वरः स्यादत आह । प्रत्ययग्रहणपरिभाषयेति । प्रत्ययमात्रग्रहणसम्पादिका या प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणमित्येषा परिभाषा तयेत्यर्थः । नन्वत्र प्रत्ययग्रहणे यस्माल्लविहित इतिपरिभाषासञ्चारावसरः । आनुपूर्वीं साम्यमादाय धातोरपि ग्रहणशङ्काकाले प्रत्ययमात्रग्रहणाभावेन तस्याः परिभाषाया अप्राप्तेः । ननु प्रत्ययोप्रत्ययोरित्येषा परिभाषा लक्ष्यसाधकत्वेन नाश्रितेत्यत आह । व्याख्यानाच्चेति । ग्रैनभाष्यमित्युक्तम् । स्वार्थइत्यस्यपञ्चम्यन्तप्रकृत्यर्थ इत्यर्थः । स्वार्थिकैः साहचर्यात्प्रकृतसूत्रस्थतसिग्रहः स्वार्थिको गृह्यते इतिभावः । स्वार्थिक इत्यस्य स्वीयप्रकृत्यर्थ इत्यर्थः । किञ्च प्रकृतसूत्रभाष्ये किमर्थन्तसेस्तसिलुच्यते । तसेस्तसिल्वचनं स्वरार्थम् । तसेस्तसिल्वचनङ्क्रियते स्वरार्थम् । लितिप्रत्ययात्पूर्वंसुतात्तश्चवतीत्येष स्वरो यथा स्यात् । ननु चायन्तसिल् तसिम्बाधिष्यते । न सिध्यति । परत्वात्तसिः प्राप्नोति । तसिलो वकारः । ततो ह्रीयते । ततोऽवरोहति । तसेरवकारः ग्रामत आगच्छतिनगरत आगच्छति । इहोभयम्प्राप्नोति तत आगच्छतीत्युक्तभाष्ये तन्मूलकव्याख्यानेनोपदेशे य इकारान्तभाष्यकारसम्मतव्याख्यानादित्यर्थः । तत्र हि समानशब्दानामप्रतिषेधो वक्तव्य इत्युपक्रम्यैतस्य वचनस्य प्रत्याख्यानाय स्वार्थे विद्यमानस्य तसेस्तसिलादेस्तसिस्तस्येह ग्रहणमिष्टञ्च प्रत्यय एवेति । विभक्त्यर्थमित्येतद्व्याचष्टे । विभक्तिनिमित्तेति । ननु विभक्तिनिमित्तकार्यार्थत्वस्य भाष्यकृतानुक्तेर्न्यूनतेत्यत आह । स्वरार्थमितीति । अभिधानमूलकमिति । अभिधानमूलकाः कृत्तद्धितसमासा इति न्यायमूलकमित्यर्थः । भाष्ये इति । तत्र हि पर्यभिभ्यां सर्वोभयार्थे । पर्यभिभ्यां यदुच्यते तत्सर्वोभयार्थेन्द्रष्टव्यमित्युक्तम् । अतिप्रसङ्गं वारयति । ओदनमित्यादि । किमोदिति सूत्रे वा ग्रहणापकर्षे प्रमाणमाह । साहचर्यादिति । भाष्यस्वरस इति । सप्तम्यास्त्रलितिसूत्रे तसिलादीनां विभक्त्यादेशत्वं स्वतन्त्रप्रत्ययत्वं वेतिविचारे विभक्त्यादेशत्वपक्षेकस्मिन् कुचेत्यत्रे दुद्ग्रामोदच्चधेरिति प्राप्नोतीत्युक्तम् । अत्र हि विशेषविहितत्वेनादादेशेन तस्मिन्पक्षे भाष्यमिति कुचेतिप्रयोगानुपपत्तिः प्राप्नोतीति वाहचच्छन्दसीत्यत्र नेति योगविभागेन लोकेऽपि चादेश इतिकल्पनया कुचे-

त्यस्योपपत्तिः कृता । न च छान्दसमेव कुचेत्यस्तु । छन्दस्यापाद्यरूपाभावात् । वस्तुतस्तच्छान्दसमेव । छन्दस्यपि न्याय्यविचारस्य बहुशो दृष्टत्वात् । वाग्रहणापकर्षणादादेशस्य वैकल्पिकत्वकल्पनन्तु न चमत्कारकारि । तथा सति 'पूर्वसूत्र एव वा ग्रहणस्य कर्त्तुमुचितत्वादितिभावः । एतदोऽनित्यं वेति । अनितिविभक्तसूत्रेणानादेशेनेत्यर्थः । अनुदात्तार्थमिति । इदमोऽन्वादेश इत्यतोऽनुदात्त इत्यनुवृत्तेरिति भावः । तयोस्तद्विधानमिति । चतसृणां प्रकृतसूत्रेणानुदात्तविधानमित्यर्थः । तत्सामर्थ्यात् । अनुदात्तविधानसामर्थ्यात् । कृगस्वरितत्वादिति । मतब्या इत्यस्येदमोऽह इति सूत्रे भंवत्यर्थेऽन्तश्च स्वरितत्वं कृगमिवेति भावः । कालार्थकत्वाभावादिति । कालत्वावच्छिन्नबोधकत्वाभावादित्यर्थः । यद्यपि सर्वशब्दस्य बुद्धिविषयविशेषबोधकतास्ति तथापि यदा कालत्वाधिकरणतावच्छेदकत्वञ्च विवक्षितङ्किन्तु कालोपाधित्वेनाभिहिता येषदार्थास्तन्निष्ठतत्तद्व्यक्तित्वस्याधिकरणतावच्छेदकत्वविवक्षा तदा न दाप्रत्यय इति भावः । अर्थे भाष्यसम्मतिमाह । अत एवेति । कालत्वेनाधिकरणत्वविवक्षा यास्मादाप्रत्यय इत्यर्थस्याभिमतत्वादेव । एवञ्च यत्र काल इत्यादीनां यदुपाध्यभिन्नकाल इत्यर्थः । यदा काले सदाकाल इत्यादि प्रयोगा न भवत्येव । दाप्रत्ययेन कालत्वेन कालस्योक्तयोक्तार्थानामप्रयोग इतिन्यायात् । इदमोर्हिल् । इदमपिसूत्रं यदा न कालत्वावच्छिन्नाधिकरणत्वविवक्षा किन्तु क्षणत्वावच्छिन्ना तदा न प्रवर्त्तते । ननु तदोदाचेति सूत्रेण न दाप्रत्ययो विधीयते किन्त्वदाप्रत्यय इसिन्न तर्वैकान्येत्यनेनान्यथा सिद्धिः । अदाप्रत्ययविधानफलन्तु न दाशब्दस्याद्युदात्तत्वसिद्धिरत आह । एतद्व्याख्येयमिति । तदोदावचनमनर्थकं विहितत्वात् । विहितोऽपि दाप्रत्ययः सर्वैकान्यकिंयत्तदः काले देतीत्यनेन दाप्रत्यय एव भाष्यसम्मत इतिमत्वा । तदा शब्दस्यान्तोदात्त एवेतिभावः । प्रतिहन्धिभूतमिति । प्रतिहन्द्यर्थस्य प्रतिपादकमित्यर्थः । ननु यदा तत्तत्क्रिया निरूपितवृत्तित्वविवक्षा पुष्यनक्षत्रयुक्तचन्द्रमसस्तदा इदानीम्पुष्यनक्षत्रमिति प्रयोगोपपत्तावपि सामान्यविवक्षायामत्र पुष्य इतिप्रयोग इष्यते । तदोपपद्यते भेदेऽन्याधाराधेयभावः प्रसिद्धो नित्यभेदे इत्याशंकायामाह । पुष्येणेति । एवञ्चात्र पुष्य इत्यस्य पुष्यनक्षत्रयुक्तचन्द्रयुक्तकालाभिन्नमितिदिनमित्यर्थः । अधिकरणशक्तिप्रधा-

नस्य वृत्तिविषय एव शक्तिमत्परत्वमिति न नियम इतिभावः । अन्य इति । अ व्ययानामनेकार्थत्वादिति तेषांभावः । अन्य इत्यनेन सर्व इत्यादीनामधिकरणशक्तिप्रधानत्वमेव सुप्रसिद्धमिति कृत्स्नशक्तिविरोध इति । स्वसम्मतप्रकारमाह । व्यपदेशिवद्भावेनेति । वृत्तिरीत्याह । एद्युसितीति । प्रत्ययाद्युदात्तत्वबाधनायाह । निपातनादिति । चित्यत्यत इति । पूर्वान्यान्यतरेतरापराधरीभयोत्तरेभ्य इद्युसच् इति । पञ्चम्यर्थे सप्तमीति । व्यत्ययेन । किं सर्वनामबहुभ्य इतिसम्बन्ध्यते एतदन्वयाय पञ्चम्या व्याख्यत्वात् । उच्यते प्रतिपाद्यतेऽनेन तद्वचनम् । प्रकारस्य प्रवृत्तिनिमित्तस्य यद्वचनन्तेभ्यः किमादिभ्य इत्यर्थः । प्रकारशब्दस्य भेदकधर्मपरत्वे मानमाह । बहुभिरिति । यथा तथा शब्दात्साट्टश्यमतीयत इतिप्राचाम्मतङ्गृह्णति । साट्टश्यन्त्विति । अनभिधानात् । शक्त्या साट्टश्यस्यानभिधानात् । प्रकारवचन इत्यस्य प्रकृतिविशेषणत्वेऽप्यभिधानस्याभाव्यादाह । अत्यन्तेति । नाप्यमन्द्योतक इत्याह । द्योतकत्व इति ॥

॥ इति प्राग्दिशीयाः ॥

दिक्शब्देभ्यः दिशि रूढेभ्य इत्युपादानाद्यौगिकानामैन्द्रादिशब्दानां व्यावृत्तिः । तत्र । पूर्वाधरेति सूत्रे । ननु यः शब्दो दिशि रूढस्तस्य देशवृत्तित्वङ्कथमत आह । शब्दभेदादिति । तथा क्त्वा । प्रवृत्तिनिमित्तीकृत्य । ननु पूर्वस्मिन्देशे इत्यत्रातिप्रसङ्ग इतिचेन्न । तत्र पूर्वशब्दस्य देशविशेषणत्वेऽपि देशवृत्तित्वाभावात् । अत्र हि पूर्वकालार्जितत्वमवृत्तिनिमित्तमिति । यदि तु पुरस्ताद्दिशः पुरस्ताद्देशादितिप्रयोगः क्वचिद्दृश्यते तदा समुच्चयस्यद्वौ ब्राह्मणाविति-वदुपपत्तिः कार्यास्यष्टार्थत्वादिति । के चित्तु तसुजेव कर्त्तव्येऽकारोच्चारणसामर्थ्यादन्यतोऽप्यस्मिन्नस्तातिचेति चकारेण पुरादेशश्च भवतीतिपुरतः इत्यस्य सिद्धिर्भवतीत्याहुः । भाष्ये तु नैतदुद्दृष्टम् । अन्ये तु विभाषा परावराभ्यामिति सूत्रे विभाषेति योगविभागेन पूर्वशब्दादप्यतसुच् । तस्मिं श्चास्तातिचेति चकारस्यानुक्तसमुच्चयार्थत्वात्पुरादेश इत्याहुः । वस्तुतस्तु पुरतः शब्दः समानकालीनप्राक्कालीनशब्दतुल्ययोगक्षेम एव । किमर्थमर्हि प्रकृतसूत्रेऽकार इति चेत् । दक्षिणा शब्दाद्यदायम्व्ययस्तदा दक्षिणत आगतो दक्षिणतो वस-

तीति रूपसिद्ध्यर्थमेवेति गृहाण । सर्वनाम्नो वृत्तिमात्र इति तु भाष्यकारस्येष्टिर्नेतु सूत्रकारेण सा कृतेति प्रकृतेऽकार उच्चारितः । भाष्यरीत्या तु व्यर्थ एव । एवमकाराभावे चकारोऽपि न पाठ्यः । तसुप्रत्यये उदात्तत्वम्प्रत्ययाद्युदात्तत्वेन सिद्धम् । षष्ठीतसर्थेति सूत्रे तस्यर्थस्य एव पाठ्यमिति दिक् । ननु प्राची शब्दो नाञ्चत्यन्त इत्यत आह । लिङ्गविशिष्टेति । विभक्तिचयार्थमिति । सप्तमी पञ्चमी प्रथमेति विभक्तित्रयेत्यर्थः । एनबन्यतरस्यामदूरे । प्रागसेरिति । पूर्वाधरावराणामसिरिति सूत्रविहितासेः प्रागित्यर्थः । मूलकृता तु पूर्वाधरेतिसूत्रविहितादेशस्यास्तातावपि प्रवृत्तिम्बोधयितुमेनब्न्यतरस्यामिति सूत्रात्परमपि सूत्रमाख्यातम् । अदूरत्वस्यावधिसाकाङ्क्षत्वादाह । अवधिमानिति । मूले पक्षे यथा स्यमिति । उत्तरादिभ्य एनबभावे यथा स्यमित्यर्थः । के चिन्मत एवाञ्चत्यन्ताल्लाक्षणप्रत्ययं वारयति । अञ्चत्यन्तात्त्विति । इयमेव । अञ्चत्यन्तात्प्राप्तिरूपैव । दक्षिणादाच् । प्रत्ययाद्युदात्तत्वेन सिद्धे चकारोच्चारणस्य फलमाह । चकार इति । आजाहीति । अन्यारादितरर्त्त इतिसूत्रनिर्दिष्टो य आच् तस्यैव पञ्चमीविधाने निमित्तत्वमिति सूचनार्थः । न चाहिप्रत्ययसाहचर्यात्प्रत्ययस्यैव ग्रहणम्भविष्यतीति वाच्यम् । साहचर्यपरिभाषाया अनित्यत्वस्य ज्ञापनार्थत्वात् । पूर्वसाहचर्यादप्रत्ययस्यैव ग्रहणमिति शङ्कानिरासार्थत्वाच्च । आहि च दूरे । अवधिमानवक्षेत्रे दूर इत्यर्थः । व्याख्यानादिति । दक्षिणापश्चादितिसूत्रे आच्यश्चादितिवक्तव्ये दक्षिणेत्याजन्तसमुदायोच्चारणरूपाद्व्याख्यानादित्यर्थः । सङ्ख्याया विधार्थे धा । इहविधायामिति वक्तव्येऽर्थशब्दो विधाशब्दस्य प्रसिद्ध्यर्थपरिग्रहार्थम् । स च प्रकाररूप इत्याशयेन व्याचष्टे । मूले क्रियाप्रकार इति । अत्र विधशब्दस्यापि प्रश्नेषः सम्भाव्यत इत्याशयेनाह । विधार्थेति । अत एव प्रकृतसूत्रभाष्ये विधार्थ इत्युच्यते को विधार्थो नाम । विधाया अर्थः विधार्थः । यद्येवमेका गोविधा । एका हस्तिविधा अत्रापि प्राप्नोति इत्युम् । अत्र विधा शब्दार्थः । अभिधानस्याभाव्यादिति । अत एव भाष्ये पूर्वोक्तस्य गिधाशब्दस्यार्थे धाप्रत्ययमाशङ्क्याधात्वर्थपृथग् भाव इति वक्तव्यमित्युक्तम् । धात्वर्थपृथग्भावश्च कारकाणामप्रवृत्तिविशेषः क्रिया । यद्येवङ्क्रियाप्रकारोऽयम्भवति । विधयुक्तगताश्च प्रकारे भवन्ति । एवं विधम् । एवं युक्तम् । एवङ्गतम् । एवम्प्रकार-

मिति । एतेन भाष्यग्रन्थेन विधशब्दस्यार्थ एव प्रत्यय उक्तः । नवधा द्रव्यम् । षड्धा रस इत्यादिप्रयोगाणामप्युपपत्तिमाह । त्रेधा गुण इत्यादि । अधिकरणविचालेवेति सूत्रं व्याचष्टे । अधिकरणस्येति । तद्विषयम् । संख्याविषयमेकस्यानेकीकरणरूपमनेकस्य वा एकीकरणरूपम् । धामात्रस्येति । तेन संख्याया विधार्थ इति सूत्रविहितस्यापि भवतीतिभावः । अत एव । धामात्रस्य स्थानेऽस्यष्टवादेशानाकारीतिःक्षतत्वप्रत्ययत्व इतिशेषः । द्वित्रीषधमुञ्छिवोः सख्यिनो धाप्रत्ययस्य विधार्थेऽधिकरणविचाले वा विहितस्य धमुञादेशः । चकारेणान्यतरस्यामित्यनुकर्षः । स्वभावादिति । शब्दशक्तिस्वभावात् । सत्ववाचित्वम् । डान्तस्य सत्ववाचित्वम् । अत एव द्वैधानीत्यत्र लिङ्गसङ्ख्या योगः । याप्ये । अधमसपर्याद्योऽप्ययमङ्गते कुत्सिते वर्त्तते कुत्सितग्रहणङ्कर्त्तव्यमिति वार्त्तिकमूलादाख्यानादित्याशयेनाह याप्यमत्रेति । प्रवृत्तिनिमित्तकुत्सायामेवेति । यस्य भावाद्यस्मिन्नैश्वर्यादिगुणे शब्दानिर्वृत्तिस्तदभिधानी तद्गुणे वक्तव्ये प्रत्यय इतिभाष्यात् । तद्गुणे वक्तव्ये । कुत्सितत्वेन प्रतिपाद्य इत्यर्थः । अत एव शरीरेण क्षयो वैयाकरण इत्यर्थे वैयाकरणक इति न । एतच्च सूत्रमवृत्तिनिमित्तगतकुत्साविवक्षायामेव प्रवर्त्तत इतिबोधयितुङ्कुत्सित इत्यत्रैवेदन्नोक्तम् तच्च सूत्रमप्रवृत्तिनिमित्तकुत्सायामपि । अनेन सिद्धे तत्सूत्रारम्भादितिभावस्तदाह । अयमित्यादि । किञ्च पाशपप्रत्ययस्तिङन्ताद्न भवति विधेयकाभावात् । पाशपस्तत्रैव विधाने तु तिङन्तादप्यस्यादित्यपि बोध्यम् । पूरणाङ्गे । प्रकृतसूत्रस्थपूरणग्रहणस्याङ्गेकादश इत्युत्तरार्थम् । अर्थवांस्तीयशब्दो हि पूरण एव । तीयशब्दस्य पूरणार्थकत्वेऽपि पूरणाङ्ग इतिनिर्देशः शब्दार्थयोस्तादात्म्यात् । ननु तीयादीकक् न विधाया इतिवचनदयमप्रकृतसूत्रभाष्ये न दृश्यत इत्यत आह । तीयादीकगिति । अत्र भाग इतिपुंस्त्वस्य विवक्षितत्वाद्भागिर्यत्र विशेष्यो तत्र नायमप्रत्ययः । तेन चतुर्थी पञ्चमी भक्तिरित्येव नत्वब्नन्तत्वाट्टाप् । मूले महाविभाषया सिद्ध इति । ननु प्रत्ययो यदा क्रियते तदा भागार्थप्रतीतिस्तदभावे तु नेतिकथमेतदित्यत आह । प्रकरणादिकमिति । भाष्ये स्पष्टमिति । तत्र हि लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं कर्त्तव्यमेकपदस्वरे लुमता लुप्ते प्रत्ययलक्षणन्नेति वक्तव्यमित्युक्तम् । अन्यत्रेति । सावेकाचस्तृतीयादिरित्यादिधित्यर्थः ।

कन्लुकाविति च कस्य लुमित्याकांक्षायामाह । वाक्यभेदेनेति । स्वार्थत्वोपपत्तये-आह । तत्रार्थ इति । भूतपूर्वार्थसम्बन्ध इति । भूतपूर्वो योऽर्थस्य सम्बन्धस्तत्र या इत्यर्थः । कर्तरीति । इतराभिभवकर्तरीत्यर्थः । उपक्रमभाष्येतिशय इति-यदुक्तन्तद्विरोधमपरिहरति । अग्रे गुणोऽभिधीयत इति । अतिशेतेऽनेनेत्यतिशा-यनो गुणाऽभिधीयते करणेल्युट् । द्रव्यवाचकाच्चदा प्रत्ययस्तदापि स्वसमवेतगुण स्यैव प्रकर्षोऽभिधीयते । अत एव । भावल्युटोऽनभिप्रेतत्वादेव । लिङ्गवचना सिद्धिः । शुक्लतरं शुक्लतरा इत्यत्र लिङ्गवचनासिद्धिः शङ्किता इत्यर्थः । तद्विशि ष्टे । अतिशयविशिष्टे । सा लक्षणा कर्मणि कर्त्तरिवेति विकल्पा दूषणमाह । अभिभूयमानादेवेति । अत एव । भाष्योक्तस्य युक्तत्वादेव । तत्र । पूर्वोक्तार्थस्य सिद्धौ । प्रकृत्यर्थद्रव्यस्य । शुक्लतरः पट इत्यादौ । तत्त्वम् । इतराभिभवकर्तृत्व-म् । फलितार्थमाह । एवञ्चेति । तरपः स्वार्थिकत्वे कुमारितरेत्यत्र समुदाया-दयसि प्रथम इतिसूत्रेण ङीबापत्तिरतस्ताम्परिहरति । कुमारीत्यादि । उक्त-त्वादिति । प्रथमवयोविशिष्टार्थगतस्त्रीत्वे द्योत्ये ङीवितितदर्थात् । ननु तर-बन्तस्य यत्प्रवृत्तिनिमित्तम्प्रकर्षस्तद्विशिष्टः प्रथमवयोविशिष्टार्थ एव नत्वतिरि-क्त इतितरबन्तान्ङीप् प्राप्नोतीत्यत आह । वयो मात्रेति । अत एव । अवधार-णरूपार्थस्य तद्घटकत्वादेव । इत्यादाविति । आदिना अश्वतरा इत्यस्य सङ्ग्र-हः । प्रकृतसूत्रभाष्य एवैतौ प्रयोगौ द्रष्टव्यौ । नडीषिति । जानेरितिङीष् न । तत्राप्यवधारणस्य विवक्षितत्वात् । एकदेशिनोरुक्तिरिति । एकदेशित्वञ्चोक्ता-र्थानभिज्ञत्वात् । टाबपीतिशङ्काकर्त्तुस्तस्या उक्तेऽपि भवन्मते टाबादयः स्वा-र्थिकाष्टाबादय इतिसमाधानोत्तरङ्ङीबपि तर्हि प्राप्नोतीतिशङ्कस्य चेत्यर्थः । छान्दसत्वादिति । एवञ्च युधिष्ठिरः श्रेष्ठतमः कुरूणामित्यादिप्रयोगा लोकेऽ-साधव एव । ह्यवयवकसमुदाये एकस्य प्रकर्षविवक्षायान्तरवीयसुनोर्वक्ष्यमाण-त्वाद्ज्ञानमेकस्य प्रकर्षविवक्षायामस्य सूत्रस्य प्रवृत्तिरत एव मूलेऽयमेषामि-ति बहुवचनोपादानङ्कृतम् । तिङश्च । अत्र मूले तमबित्वे बीजम् । यद्यपि पू र्वसूत्रे तमबिष्ठनावुक्तौ तथाप्यजादीगुणवचनादेवेतिनियमादिष्ठनोक्तः । किं-मेतिङ्व्ययघादाम्बद्रव्यप्रकर्षे । इहाव्ययान्तशब्दानाङ्ङसमासोत्तरङ्किमेतिङ्-व्ययाद्घ इतिसमासस्तेन यस्मिङ्ङस्तदाह । किमादीनि ननु पूर्वाङ्गशब्दस्य द्र-

व्यवाचकत्वात्कथम्पूर्वाह्णेतरामित्यत्रामुप्रत्यय इत्यत आह। पूर्वाह्ण इति। तत्तत्क्रियाविशिष्टस्य। घटादिजन्यद्रव्यस्येति शेषः। गुणवत्यर इति। अधिकरणशक्तिप्रधानस्यापि वृत्तिविषयशक्तिमत्परत्वात्। ननु सर्वत्र धर्मप्रकर्षमादाय द्रव्यप्रकर्षसम्भवात्कथं दाहरणासम्भव इत्यत आह। उच्चैस्तमामित्यत्रेति। ननु यस्य क्रियाकारकभावसम्बन्धविशेषणत्वन्तस्य चेन्न द्रव्यत्वन्तदा तद्घटस्थस्येत्यत्र घटस्य परामर्शो न स्यात्। घटकर्मकदर्शनमिति बोधादत आह। शक्त्या विशिष्टस्येति। घटमित्यत्र केवलघटस्यैव तच्छब्देन परामर्शो न तु क्रियानिरूपितकर्मत्वशक्त्या विशिष्टस्य। उच्चैरादिशब्देभ्यस्तु अधिकरणत्वशक्तिसंबद्धस्यैव प्रतीत्या न तस्य सर्वनामपरामर्शयोग्यतेतिभावः। अत एव। क्रियाकारकभावसम्बन्धविशेषणत्वादेव। इदम्। पूर्वाह्ण शब्दस्य प्रकृते पूर्वाह्णनिष्ठाधिकरणत्वप्रतिपादकतया तादृशविशिष्टार्थप्रतिपादकस्याद्रव्यार्थकत्वाद्भवत्यामुप्रत्ययः। आम्बित्यत्रोकारोच्चारणमकारस्यैवं ङ्ञाभावायात्रत एव। ङ्ञस्वनद्याप इत्यत्रास्य ग्रहणाभावः। सानुबन्धकत्वादन्यथापरत्वाद्यस्येति लोपस्याधित्वोच्चैस्तरामित्यत्र नुट् स्यात्। न चामुप्रत्ययोङ्ञकाकारादिरेवास्तु यस्येति लोपस्तु न भविष्यत्यकारोच्चारणसामर्थ्यादिति वाच्यम्। अकारानुच्चारणे मकारमात्रस्य प्रत्ययतया तमपस्वनुदात्तत्वे नान्तानुदात्तत्वापत्तेः। अकारोच्चारणे तु तस्य प्रत्ययाद्युदात्तत्वे नोदात्ततया तेनैकादेशस्योदात्तत्वे नान्तोदात्तत्वस्य स्पष्टतया ङ्ञकारोच्चारणसामर्थ्यमितियस्येति लोपाप्रत्ते र्दुर्वारत्वात्। द्विवचनविभज्योपपदे। अत्र द्विवचनशब्दो न पारिभाषिकार्थस्य प्रतिपादकः किन्तु द्वयोर्वचनन्द्विवचनम्। उच्यतेऽनेन तद्वचनमित्यर्थकल्पनया द्वयर्थप्रतिपादकपरः। विभज्यशब्दः कर्मण्युत्पत्त्या विभजनीयपरः। निपातनाद्यत्। एवञ्च द्वयर्थप्रतिपादके विभज्योपपदे च ङ्याप्प्रातिपदिकात्तिङन्ताच्च तरबीयसुनौ स्त इत्यर्थः फलित। तेन द्वयोरेकस्येतिलब्धन्तदाह। द्वयोर्मध्ये इति। विभक्त्यव्यवाचके चोपपदे कस्मात्प्रत्यय इत्याकाङ्क्षायांप्रत्यासत्त्यायल्लब्धन्तदाह। विभागप्रयोजकीभूतेति। तेन प्रतिपदोक्तविभक्त्या सुबन्तत्वम्प्राप्तं उपपदत्वमित्यर्थोश्रयणेन। ननु यत्र बहूनामध्ये एकस्य प्रकर्षस्तत्रापितरप् दृश्यते तस्य का गतिरत आह। एते खल्वपीति। भाष्यप्रयोगमात्रत्वात्साधुत्वकल्पनेऽपि पाणिनीयन्यासेनैतयोरनुपपा-

दमेन न्यूनत्वन्तु वारमेवेत्यक्षरसः के चिदित्युक्त्या सूचितः। सूत्रेणैव तयोः साधुत्वमुपपादयतामतमाह। परेत्विति। स्वकल्पनाया भाष्याविरुद्धत्वमाह। अत एवेति। नितराङ्च्छतीति। अत्र निशब्दः क्रियागतनिश्चितत्वद्योतकस्तङ्कटकनिश्चयगतोऽप्रामाण्यज्ञानानास्कन्दितत्वरूपः प्रामाण्यनिश्चयविषयत्वरूपो वा प्रकर्षो बोध्यः। नन्वेक एव धर्मो यत्र विवक्षितस्तत्र पटुत्ववान्पटुः। ऐषमस्तु पटुतर इत्यादि तत्र कथन्तरप्दार्थप्रतिपादकस्य विभज्यस्य चोपदस्याभावादिति चेन्न। एकस्यापिधर्मिणो गुणभेदेन भेदकल्पनयाऽनुयोगिगतगुणे प्रतियोगिगतगुणापेक्षया प्रकर्षविवक्षया तरप्स्वीकारात्। गुणभेदेन भेदव्यवहारो लोके सुप्रसिद्ध एव। यथा पूर्वपरिणीता भार्यान्यान्तरपरिग्रहे भर्त्रा कृते पतिं प्रतिवक्ति अन्य एवाग्निरिति। तुरिष्ठेमेयस्सु। ननु तृन्तृजन्तादिमनिज्विधायकाभावादिमनिज्ग्रहणमनर्थकमत आह। इमनिजिति। कल्पनापत्तेरिति। एकसूत्रोपात्तत्वाविशेषादिति शेषः। आपत्तेश्चेति। सूत्रारम्भे तु छन्दस्येव सूत्रेणेष्ठेयीयसुनौ भवत इतिभावः। ननु छन्दस्येव चेद्वृन्नन्तात्तृजन्तात्प्रत्ययस्तदा लोपविधायकस्य सूत्रस्य छान्दसप्रयोगसाधकतया वैदिकप्रकरण एव लेखनमुचितमितिशङ्कते। यद्यपीति। तस्यैव। निमित्तविधायकतुरुस्कन्दसीत्यस्यैव। णाविष्ठवदित्यतिदेशेनास्य लौकिकेऽपि प्रयोगे प्रवृत्तेश्च। ननु टेरिति सूत्रे ढेलोप इत्यतो लोपपदानुवृत्त्याऽनेन चेल्लोपस्तदाऽलोन्त्यपरिभाषयाऽन्त्यस्यैव लोपः स्यादत आह। स च वचनसामर्थ्यादिति। न च विल्वकादिभ्य इतिसूत्राल्लुक् पदानुवृत्त्या सर्वादेशत्वे सिद्धे वचनसामर्थ्यकल्पनमयुक्तमिति वाच्यम्। तल्लुक्यलुक्पदस्यास्वरितत्वात्। अत एव टेरित्युत्तरसूत्रे लोपपदस्यैव सम्बन्धो दृश्यते। प्रशस्यत्वम्प्रशंसाविषयत्वम्। प्रशंसाचोत्कृष्टगुणप्रकारको निश्चयः एवञ्च विषयतायां जातिक्रियासंज्ञाव्यतिरिक्तत्वात्प्रशस्यत्वङ्गुण इत्याशयेनाह। प्रशस्यत्वमितिननु प्रशस्यशब्दस्य धातुजत्वात्प्रशस्यत्वङ्क्रियैवेत्यत आह। तस्येति। तेन। इष्ठादिसम्बन्धेन। ज्ञ इति। जानातीति ज्ञः। ज्ञः स्याली पाक इत्यत्र ज्ञशब्दात्तास्य देवतेत्यर्थेऽणि यस्येति लोपः। भाष्ये स्पष्टमिति। तत्र हि प्रकृत्यैकाजिति किमिष्ठेमेयस्सु प्रकृतिभाव आहोस्विदविशेषेणेतिविकल्पा द्वितीयपक्षे दूषणमुक्तम्। शीवमिति। शुलोविकारेऽ-

वयवे च प्राप्यजि कृते नस्तद्धित इति टिलोपः प्राप्नोतीति कैयटः । तथा अधुना इत्यत्र इदमशब्दादधुना प्रत्यये इदम इशादेशस्तस्य यस्येति लोपो न प्राप्नोति । तथा द्रव्यमित्यत्र द्रोर्विकार इत्यर्थे द्रोर्द्रेति यप्रत्यये ओर्गुणो न प्राप्नोतीति दूषणमभिधाय यस्येत्यादौ प्रकृतिभाव इतिसिद्धान्त्येकदेशिनोक्तम् । अचादिशब्दः प्रकारे । लोपविधायकत्वेन च सादृश्यम् । यस्य यस्येत्यादिना लोपप्राप्तिस्तत्र प्रकृतिभावः । ओर्गुणस्तु तेभ्यः पूर्वं इतिप्रकृतिभावाभावः । एवमपि श्रिय हितः श्रेयः ज्ञादेवताऽस्य स्यालोपाकस्य ज्ञः स्यालोपाक इत्यत्र प्राप्नोति । तस्मादिष्ठेमेयस्सु प्रकृतिभाव इतिसिद्धान्तिनोक्तम् । एतेन प्रघट्टकेन प्रकृत्यैकाजिति सूत्रस्य स्वविषयप्राप्तसर्वलोपबाधकत्वं स्पष्टतयैव बोध्यते । अत एव कनयति कनिष्ठ इत्यादावल्लोपो न इतिलोपो न । न च कनादेशेऽकारोच्चारणसामर्थ्यादल्लोपाभावः । एवमप्यचैव नस्तद्धित इत्यस्यापत्तेः । अकारोच्चारणवट्टिसंज्ञकस्यान्शब्दस्योच्चारणसामर्थ्यात्टिलोपाभाव इति तु वक्तुमशक्यम् । सर्वादेशत्वसम्पादनेन चारितार्थ्यात् । किञ्च नेयनपत्य इत्यादिसूत्रेषु प्रकृत्या इत्यत एवानुवर्त्तते तेन यनटेरित्यस्यैव बाधकः प्रकृतिभावो विधीयते किन्तु लोपमात्रस्य बाधक इतयर्थाधिकारानुरोधात्प्रकृत्यैकाजिति सूत्रस्यापि लोपमात्रबाधकत्वम् । किञ्च यद्यनन्तरस्येतिन्यायेन टेरित्यस्यैवायम्बाधकः स्यात्तदा नैकाजित्येव ब्रूयात्तथा तु नोक्तमतोऽपि सर्वलोपबाधकत्वम् । अस्य प्रकृतिभावस्य सर्वलोपबाधकत्वादेवोपक्रमेऽविशेषेणेति पचे शौवमित्यत्र नस्तद्धित इतिटिलोपोनेत्युक्तम् । ननु प्रकृत्यैकाजितिसूत्रस्य श्रेष्ठः श्रेयानिति रूपन्त्वन्यथा सिद्धम् । आदेशेऽकारोच्चारणसामर्थ्यादेव लोपाभावस्य सिद्धेः । न च स्रजीयान् । स्रुचीयानित्यत्र विन्मतोर्लुगिति लुकि कृते टिलोपो मा भूदिति प्रकृतिभावविधानमावश्यकमिति वाच्यम् । येन नाप्राप्तिन्यायेन विन्मतोर्लुकष्टिलोपबाधकतया तस्मिन् कृते टिलोपाभावस्य सिद्धेरिति चेन्न । कनिष्ठः कनीयानिति रूपसिद्ध्यर्थमस्यावश्यकत्वात् । न चाचाप्युच्चारणसामर्थ्यं वक्तुं शक्यम् । सर्वादेशसम्पादकत्वेन चरितार्थत्वात् । वस्तुतस्तु नाप्राप्ते टिलोपे नेदाद्यादेशा आरभ्यमाणाः स्वविषये टिलोपस्य बाधका एवेति तेषु कृतेषु टिलोपो न भविष्यतीति नास्य सूत्रस्य प्रयोजनम् । नस्तद्धित इत्येतद्बाधकतया

कनिष्ठः कनीयानित्यर्थमपि न । अनुच्चारणसामर्थ्यात् । सर्वादेशत्वन्तु केत्यादेशेन चरितार्थमित्याहुः । अन्तिकबाढयोः । अन्यथा । नेदसाधयोरादेशयोरदन्तत्वे । कन्महचर्याच्चेति । उत्तरसूत्रस्य यथा हलन्तादेशविधायकत्वन्तथा तत्साहश्यादस्यापि हलन्तादेशविधायकत्वम् । इष्टादिनिमित्तकत्वेन च साहश्यम् । तदपवादत्वात् । टिलोपापवादत्वात् । लुप्तषष्ठीकमित्यादि । तथा च यणादेः परस्य लोप इतिवाक्यार्थः । पूर्वस्येत्यवाकाङ्क्षाशान्त्यर्थमाह । पूर्वत्व इति । अगुणवचनत्वादिति । आकृतिग्रहणेतिलक्षणेम जातिवाचकत्वसम्भवादिति भावः । अपर आहेत्यादिनोक्तं यत्रादुर्भाविनाशाभ्यामित्यादि लक्षणलक्षितज्जातिवाचकत्वन्नास्तीत्याशयेनाह । अन्ये त्विति । इत्याद्यसिद्धेरिति । अतो गुणवचनत्वन्तयोः स्वीकार्यमिति भावः । लभ्यत इति । आद्ये गुणवचनश्चेत्यनेन प्रातिपदिकमात्रस्य गुणवचनसंज्ञां विधाय तदनन्तरं समासादिसूत्राया स्तद्वाधकतयोक्तत्वेन यत्र तासाम्प्राप्तिस्तत्र न गुणवचनत्वमन्यत्र त्वस्त्येवेति सूचितम् । अन्ये प्रादुर्भावविनाशाभ्यामित्यनेन जातेर्लक्षणसूचनादस्त्येव गुणवचनत्वम् । वस्तुतस्तज्जातिलक्षणमाथक्रतो नाभिप्रेतमपर आहेत्यनेनापरितोषस्य ध्वननात् । किन्त्वाकृतिग्रहणा इत्याद्येव । एवञ्च युवत्वज्जातिरेव । अत एवोक्तं गुणवचनोऽपीति । अत एव युवतितरेत्यत्र जातेश्चेति पुंवत्वनिषेधसिद्धिः । प्रियस्थिरस्फिरोरु । वंहोत्यादाविति । आदिना वर्षीत्यस्य द्राघीत्यस्य च परिग्रहः । वृन्दशब्देऽदन्तत्वभ्रमनिवारणायाह । वरादिसाहचर्यादिति । तन्निमित्तकः । आदेशनिमित्तकः । कार्यिणोऽपि कार्यप्राप्तिपूर्वकालिकत्वेन निमित्तत्वव्यवहारः।कार्यान्तरस्य लोपस्य । अत एव ज्ञापकादिति । अन्यथा अस्य गुणवचनत्वाभावान्न स्यात् । भाषरीत्या गुणवचनसंज्ञाया अचाप्राप्तेः । विन्ग्रहणं व्यर्थमितीति । न च विन्नन्ताद्यदेष्टन्तदा लुगर्थं विन्ग्रहणमिति वाच्यम् । विन्नन्ताद्यदाच सूत्रे विन्ग्रहणन्तदाजादिः प्रत्ययो ज्ञापकाज्जायते विन्ग्रहणाभावे तु स नैव स्यादिति भावः । व्याख्यातमिति । प्रागिति शेषः । प्रकृत्यर्थतावच्छेदकधर्मनिष्ठेति । यथा पटुरूपेत्यत्र । तत्समानाधिकरणेति । प्रकृत्यर्थतावच्छेदकधर्मसमानाधिकरणेत्यर्थः । यथा चोररूप इत्यत्र । अत्र प्रकृत्यर्थतावच्छेदकश्चोरत्वन्तच्च स्त्रीयकर्तृत्वरूपन्तत्समानाधिकरणो ध-

र्मस्तद्विषये कुशलता तस्याम्पूर्णता प्रतीयते । तेनान्तर्हितवस्त्वपह्नारेऽपि सामर्थ्यङ्गम्यते । ननु प्रशंसाया अतिशायनानतिरिक्तत्वादतिशायन इतिसूत्रानन्तरं रूपबितिसूत्रं कार्यमतिशायनपदञ्चानुवर्त्तनीयमत आह । प्राशस्त्यमित्यादि । पचतिरूपमित्यत्र क्रियाप्रधानात्तिङन्तात्यत्र रूपप् तत्र तु प्रधानीभूतक्रियागतमेव पूर्णत्वङ्गम्यत इतिरूपबन्तात्प्रथमैकवचनमेव सामान्ये नपुंसकत्वमेव । पचतिरूपम्पश्यतीत्यादौ तु द्वितीयादिकमपीति बोध्यम् । ईषदसमाप्तौ । समाप्तिः पदार्थानां सम्पूर्णता । ईषदसमाप्तिश्च किञ्चिन्न्यूनत्वविशिष्टा पूर्णता । स्वार्थिकानाम्प्रकृतितो लिङ्गवचनातिक्रमे ज्ञापकमाह । स्त्रियामितीति । स्वभावात् । शब्दशक्तिस्वभावात् । न हि द्राक्षाकल्पदित्युक्ते द्राक्षामतगुणस्येषदसमाप्तिर्गम्यते । उपमागम्येति । अत एव पटुकल्पो देवदत्तो गुडकल्पाद्राक्षेत्यादावभेदान्वयात्समानविभक्तिकत्वम् । उपमानोपमेययोः सामानाधिकरण्यस्य प्रसिद्धत्वात् । तिङन्तादप्यते भवन्ति । तिङश्चेत्यस्य सम्बन्धात् । विभाषा सुपो बहुच् । सुपो विभक्तेर्थ विधानादस्य कल्पबादिबाधकत्वमितिग्रङ्गावारणायाह । विभाषा ग्रहणमिति । न तत् । न विभाषा ग्रहणम् । अनिष्टत्वे त्विति तुना अरुचिः सूचिता । वाक्यस्य प्रकृतसूत्रस्यभाष्यप्रामाण्यादिष्टत्वात् । एवं हि भाष्ये उक्तम् । विभाषा ग्रहणङ्किमर्थम् । विभाषा बहुच्यथा स्यात् । बहुचामुक्ते वाक्यमपि यथा स्यात् । नैतदस्ति प्रयोजनम् । प्रकृता महाविभाषा तया भविष्यति । इदन्तर्हि प्रयोजनङ्कल्पादयोऽपि यथा स्युरिति । उत्तरत्र त्विति । अत एव पचतकिञ्जल्पतकीत्यादिप्रयोगसङ्गतिः । इत्तावितिं । मूले व्याख्यानवाक्ये । ज्ञापकमिति । अत एव गुडकल्पा द्राक्षाः सन्तीति भवति । यत्र तु प्रकर्षस्येषदसमाप्तेश्च विवक्षा तत्र पूर्वविप्रतिषेधेन कल्पबादिषु कृतेष्वपि पुनः प्रसङ्गविज्ञानात्तरपबाद्यो भवन्ति । पटुकल्पतरो मृदुकल्पतम इति । तमबादिभ्यः कल्पबादयो विप्रतिषेधेनेतिवार्त्तिकमत्र प्रमाणम् । सोऽपि । थाल्पि । तथा सति । प्रकारमात्रे थाल्प्रत्यये सति । अत एव । बाधाभावादेव । यथा जातीयक इति । यथा जातीयक इत्यस्य यत्सदृश इत्यर्थः । अत्र थाल्न्ताज्जातीयर ततः स्वार्थेकः ॥

॥ इत्यस्तात्याद्याः ॥

अव्ययसर्वनाम्नाम् । अत्र प्रागिवादित्यनुवर्त्तते । एवञ्चाव्ययादिभ्यः प्रागिवाद्येऽर्थास्तेषु टेः प्रागकच् । कस्यायमपवादः । अञ्चाते । अत्र प्रागिवात्क इतिसूत्रात्के त्यव्ययसर्वनाम्नामिति सूत्रञ्चानुवर्त्तते । बाध्यबाधकयोश्च कत्रासमावेशाद्वाक्यभेदेनोभयविधानम् । एवञ्चाञ्चातेऽर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे को भवति अव्ययादिभ्यस्त्वञ्चतेऽर्थेऽकज्भवति स च टेः प्रागित्येवं वाक्यभेदेनोभयम्भवति तदाह । वाक्यभेदेनेति । न च विशेषरूपेणाञ्चात एवार्थः प्रातिपदिकेन बोध्यत इति अञ्चातोऽश्व इत्यनुपपन्नमिति वाच्यम् । अश्वत्वेन ज्ञातोऽपि स्वामित्वविशेषसम्बन्धित्वेनाज्ञात इतिसामान्यविशेषधर्मभेदादुभयसम्भवात् । अत एव । युष्मदस्मद्भ्यां प्रातिपदिकविषये प्रातिपदिकस्यैव टेः प्रागकचः प्रवृत्तेरेव । यत्वादित्विति । अत्र सुबन्तस्य टेः प्रागकच्स्वीकारात्सुप्निमित्तककार्ये कृतेऽकच् प्रवर्त्तते । ननु कुत्सितोऽश्व इत्यनुपपन्नम् । जातेः कुत्सायाः असम्भवादत आह । येन धर्मेणेति । कुत्सितगतकुत्सायामिति । यथाऽश्वपदार्थगतधावनविवक्षायां तस्य कुत्सितत्वे विवक्षिते कुत्सितशब्दस्य प्रवृत्तिस्ततस्तस्य विपरीतपादविक्षेपादिकर्तृत्वविवक्षायाङ्प्रत्ययः । कुत्सित इत्यस्य संज्ञायामितिसूत्रेऽनुवृत्तौ याहशोऽर्थः सम्पद्यते तमाह । कुत्सादिहेतुकेति । अनुकम्प्यमानसम्बन्धादिति । अनुकम्पाविषयपुत्रादिसम्प्रदानकदानकर्मत्वमिह सम्बन्धः । घनिलचौ च । पूर्वसूत्रएवैतयोः पाठे कर्त्तव्ये योगविभागेन कथनस्य फलमाह । पूर्वसूत्र इति । उक्तविषयातिरिक्त इति । तथा चाञ्चाते कुत्सितेऽर्थे देवदत्तादीनाम्प्रवृत्तिस्तदापि कप्रत्ययष्ठच्प्रत्ययौ वा भवति तदाह । तच कठजिति । बुद्धिसन्निधानादिति । ठाजादाविति सूत्रस्य ठच्प्रत्ययप्रकरणे पाठेनाचैव यष्ठः पठितस्य एव । शीघ्रमुपस्थितो भवतीति भावः । तस्मिन्निति । ठग्रहणे कृते सतीत्यर्थः । पूर्वमिति । तन्निमित्तककार्यात्पूर्वमित्यर्थः । तस्य । इकादेशसम्बन्धिपूर्वकालिकत्वस्य । नन्वजिनान्तेतिसूत्रे लोपपदस्य समासघटकतया कथन्नाचानुवृत्तिरत आह । अजिनान्तेति । अत एव । उत्तरपदरहितस्य लोपपदस्यानुवृत्तेरेव । तेन । अनभिधानकल्पनेन । अनभिधाने प्रमाणन्तु विपरीतप्रयोगस्य भाष्येऽदर्शनमेव । विनापीत्यस्यान्यथा सिद्धिमाह । समुदायेति । ननु विनापीत्यस्य वचनस्यारम्भे पदस्यैव प्रयोगो न त्वपदस्य

वर्णस्य प्रयोग इतिनियमस्य सिद्धिर्वचनानारम्भे तु वर्णमात्रस्यापि पूर्वोत्तरपदभिन्नस्य प्रयोगः स्यादत आह। वर्णमात्रेति । पूर्वाचार्यसंज्ञेति न चेत्यस्य लादेशविधानमेवास्त्विति वाच्यम्। चकारसंग्राह्यस्य द्वितीयादच ऊर्ङ्स्याप्यादेशावतावनिष्टापत्तेः एतदुत्तरङ् क्व चिट्टवर्णादपीति दृश्यते तस्याप्रामाणिकत्वमाह। ऋवर्णादपीतीति। नन्वुपेन्द्रदत्तशब्दादडच्प्रत्यये द्वितीयादच एकारादूर्ध्वस्य लोपे एकारश्रवणापत्तिरत आह। नेन्द्रस्येतीति। द्वितीयं सम्यञ्चरमित्यत्र सम्यञ्चरमिति सामान्यत एवोपात्तमतः सम्यञ्चरसत्त्वमेव निमित्तन्न तु तदादेः पदत्वमप्यपेक्षितमित्याशयेनाह। एकपदेपीति । नन्वेवं वाक्शब्दस्य प्रत्यये ठचि परे कुत्वे कृते इकादेशे कृतेऽपि ककारस्य श्रवणापत्तिरत आह। अचेकादेशेति। कुत्वादीत्यादिना जश्त्वस्योपग्रहः । एकाचरेतिवार्त्तिकारम्भस्यावश्यकत्वबोधयितुमाह। यद्यपीत्यादि। एतेन। पूर्वोक्तव्याख्यानेन। द्विविधस्यापि पदत्वस्य बाधमाह। तर्चेति । स्पष्टश्चेदमिति। षष्ठाजादिवचनाल्लिङ्गमिति वचनेन ठाजादाविति वचनस्यैव लक्ष्यानुरोधाच्च षड्ङ्लिशब्दात्प्रत्ययस्त्वप्रवृत्तिर्न त्वेकाचरेति वचनस्येति भावः इदमग्रोक्तवनिकान्यायेन। वस्तुतः शेवलेति सूत्रभाष्येऽपि स्पष्टमित्यर्थः। तेन। अञ्चतसन्धीनां लोपविधानेन। अन्यथा यकारस्य श्रवणापत्तिः। इतिभेद इति। तेनान्यतरेणान्यतरस्य गतार्थता न शङ्क्या । अत एव। उपलक्षणत्वादेव। नन्वेकशब्दोपादानाभावे द्वयोरिति निर्द्धारणषष्ठी कथमत आह। द्वयोरितीति। व्याख्यानादिति। निर्द्धार्यमाणवाचिभ्यः किमादिभ्यः प्रत्ययविधानसामर्थ्यमूलकव्याख्यानादित्यर्थः। न प्रत्ययार्थ इति। अत एव कतर इत्यादिशब्दघटितवाक्यजन्यशाब्दबोधेन निर्द्धारणस्य भानम्। अनभिधानादिति। अत्र प्रमाणन्तु बहुनाञ्जातिपरिप्रश्नडतमजित्यत्र बहुग्रहणमनर्थकम्। किङ्कारणम्। किमित्येतत्परिप्रश्ने वर्त्तते परिप्रश्नश्चानिर्ज्ञाते। अनिर्ज्ञातत्वञ्च बहुषु। द्वेकयोः पुनर्निर्ज्ञातमिति भाष्यमेव । अत एव। जातिपरिप्रश्न इत्यस्यानावश्यकत्वादेव। तत्र साधकभाष्यमाह। क्रतमेति। अध्यापकः शूरो वेत्यनेन जातिपरिप्रश्नाभावो ध्वनितः। वाग्रहणमितीति। समुच्चयार्थत्वकल्पनयेति भावः । अत एव। महाविभाषया क्वचित्प्रत्ययाभावादेव। क एतयोरर्थयोरिति। अत्र कतर इति

नोच्चारितम्। प्रायिकमिति। अत एकैकाच्च प्राचामितिसूत्रभाष्ये प्राग्वचनं किमर्थम्। विभाषा यथा स्यात् प्राग्वचनानर्थक्यञ्च विभाषाप्रकरणात्। प्रकृता महा विभाषा तयैव सिद्धमित्युक्तम्। सप्तम्याष्ठ इति। तत्र हि प्राग्वचनानर्थक्यमित्येवोक्तञ्च वकञुत्पत्तिस्तेन साधिता। येनेतरः कुत्स्यत इतिविशेषलाभप्रकारमाह। अवक्षेपण इति। स्वार्थिकत्वप्रकरणाबाधायाह॥

॥ इति प्राग्दीव्यतीयाः ॥

इवार्थ इति। प्रकारान्तरे। इवार्थे प्रत्ययविधाने। लुपि युक्तवदितिसूत्रप्रवृत्तावतिप्रसङ्ग इत्यत आह। वचनं त्विति। ननु यदि देवलकानां या प्रतिमा तत्रैवायं लुगदा तत्तद्देवस्थाने पूजार्थं स्थापिता या मूर्त्तिस्तत्र विष्णुः शिव इत्यादिप्रयोगस्य कथमुपपत्तिरत आह। तत्तदायतनेष्विति। अनन्तरावतीर्णबाधाया इति। अनन्तरं स्रोत्यत्युत्तरक्षणेऽवतीर्णः सञ्जातो बाधोयस्यास्यैव भ्रमत्वेन कल्प्यते। यथा शुक्तिविशेष्यकरजतत्वप्रकारकज्ञाने जाते सति तदनन्तरशुक्तिरियमित्यधिष्ठानस्य तत्वनिश्चयेन पूर्वोत्पन्नं रजतत्वज्ञानभ्रमः। शुक्तौ रजतत्वप्रकारकत्वादितिरीत्या भ्रमत्वप्रकारकानुमितिसम्भवो यत्र तस्यास्तत्र भ्रमत्वेन प्रक्रमादित्यर्थः। अर्चास्विति। इदन्देवपथादिषु पठितानां कतिपयानामुदाहरणप्रदर्शनम्। तत्र ह्येवम्पठितम्। अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिषु इति। अर्चासु शिवः विष्णुः। चित्रेषु अर्जुनः दुर्योधनः। रावणः। ध्वजेषु। कपिः। गरुडः। सिंहः। देवपथः। हंसपथो वारिपथः। अस्मिन्गणे केषांचित्पाठः प्रपञ्चार्थः। ननु यस्य स्वरितत्वात्स्वघटितसूत्रानन्तरसूत्रे ऽनुवृत्तिस्तत्र निवृत्तमितिव्यवहारो युक्तः स्वरितेन युक्तः प्रतिकृतिपदस्योत्तरसूत्रे ऽनुवृत्त्यभावादत आह। अस्वरितत्वादिति। भाष्यविरुद्धत्वाच्चेति। तत्र ह्येवमुक्तम्। अपन्नाभिशब्दो गवादिषु पठ्यते तत्रैवमुच्यते नाभिनभश्चेति तत्र चोद्यतेनाभेर्नभभावे प्रत्ययानुपपत्तिः प्रकृत्यभावात्। विकृतेः प्रकृतावभिधेयायामित्ययेन भवितव्यम् न च नाभिसंज्ञाया विकृतेः प्रकृतिरस्ति। नभश्चक्रमितीष्यते तत्र सिध्यति। विकृतेः प्रकृतिर्हितत्वेन व्यपदिश्यते न च नाभिश्चक्रस्य विकृतिरिति तस्मै हितमित्यर्थे प्रत्ययो न प्राप्नोती-

ति भावः । नापितादर्थमस्ति अवयविनोऽवयवार्थत्वाभावात् । शरीरावयवो नाभिस्तद्वाचकात्तु हितार्थे शरीरावयवार्थादिति यता भवितव्यम् । नाभ्यन्तैलमिति । गवादियतासन्नियुक्तो न नभावोन्यत्र यति न भवति । गवादियच्च चक्र एव तदुक्तभाष्ये । यदेवतन्मण्डलचक्राणामण्डलचक्रान्नभ्यमित्युच्यत इति । मण्डलाकारश्चक्रं येषान्तानि मण्डचक्राणि शकटानि तेषामण्डलाकारं यच्चक्रन्नभ्यमुच्यत इत्यर्थः । एवं भाष्ये शङ्काङ्कृत्वोक्तम् । सिद्धन्तु शाखादिषु वचनाद्दृश्यत्वच्च । सिद्धमेतत् । कथम् शाखादिषु नाभिशब्दः पठितव्यः दृश्यत्वच्च वक्तव्यम् नाभिरिव नभ्यमिति । कः पुनरिहोपमार्थः । यत्तदच्चधारणम्परिवर्त्तनम्वा । एवम्प्रकारेण चक्रे नभ्यशब्दः साधितः स च शाखादिभ्यो यदितिन्यास एवोपपद्यते य इति पाठे तु प्रत्ययाद्युदात्तत्वे नाम्नोदात्तत्वापत्तिरिति शाखादित्वात् सिद्धमित्यसङ्गतं स्यात् । द्रव्यच्चभव्ये । भव्येऽभिधेये द्रव्यशब्दादिवार्थे यत्प्रत्ययः स्यात् । भव्यशब्दार्थं व्याचष्टे । आत्मवानिति । समासाच्च तद्विषयोत् ॥तच्छब्देन इवशब्दः परामृश्यते । स इवशब्दस्तच्छब्देनोपस्थितः स्वार्थम्बोधयति । एवच्च सः इवार्थो विषयो यस्य तादृशो यः समासस्तस्मादिवार्थे कः स्यात् । अत्र विषयपदोपादानेनानन्यभाववोधकेनेवार्थविषयत्वं समासस्यावयवद्वारकं विशेषणमितिलब्धम् । अवयवत्वच्च पूर्वोत्तरपदयोरविशिष्टमिति इवार्थवृत्तिसर्वावयवकत्वं लब्धन्तदाह । इवार्थविषयेत्यादि । अत एव । इवार्थवृत्तिसर्वावयवकत्वस्याश्रयणादेव । इन्द्राच्च इवार्थेनेति । तस्य समासस्येवार्थविषयत्वाभावात् । नन्विवार्थे समासविधायकशास्त्राभावादुदाहरणाप्रसिद्धिरत आह । काक इवेति । इवार्थवृत्तित्वमुपपदयति । तत्रेति । तद्विसमभिव्याहार इति बोध इत्यत्रान्वयः । समासार्थोपमानप्रयोज्येति । समासार्थो यदुपमानं काकागमनसमानाधिकरणोपमानतान्नपतनन्तद्बोधकस्य तत्प्रयोज्येलक्षणया समासः उपमानतालक्षतकाकवधे वर्त्तते तस्य च प्रत्ययार्थोपमायामुपमानत्वेन तादृशकाकवधसदृशश्येनपतनसमानाधिकरणदेवदत्तागमनजनितश्येनकर्तृको देवदत्तस्य वध इति बोधः । पूगाञ्ञरोऽग्रामणी । ग्रामणीर्वावयवकत्वन्न सं

ख्यानादिति । स्वरूपस्य ग्रहणञ्चेत्प्रत्ययविधित्वेन तदन्तस्याग्रहणेन केवक
ग्रामशब्दादेव प्रत्ययविधायकमिदम्भवेत्तथा च तस्यपू ग्रामणीर्वावयवकत्वन्न सं

भवतीत्यग्रामणीपूर्वादिति विशेषणं व्यर्थं स्यादिति तत्सामर्थ्यमूलकव्याख्यानादित्यर्थः। लोहिता ध्वजा येषामिति। उद्भूताबयवभेदस्य समुदायस्य पूगवाचकत्वबन्धनयितुम्बहुवचनोपादानम्। अग्रामणीपूर्वादित्यस्याभावे देवदत्तो ग्रामणीर्यस्य पूगस्य पूर्वावयवस्तस्मादपि स्यात्। तत्र देवदत्तका इत्येव भवति। स एषाङ्ग्रामणीरिति कन्। पूगाद्व्रातस्य यो विशेषस्तमाह। शरीरायासेति। टित्वसामर्थ्यादिति। स्त्रियामेव ङीप् भवति। मूले ब्राह्मणे तद्विशेषग्रहणम् राजन्ये स्वरूपग्रहणमत्र वृत्तिग्रन्थो मानम्। तत्र हि वाह्वीकेषु ब्राह्मणशब्दवाच्यायुधजीविसङ्घाभाव इत्युक्तम्। दामन्यादित्रिगर्त्तषष्ठाच्छः। आयुधजीविसङ्घादित्यनुवर्त्तते। दामन्यादिभ्यः प्रातिपदिकेभ्यस्त्रिगर्त्तषष्ठेभ्यश्च स्वार्थे छः स्यात्। त्रिगर्त्तः षष्ठो वर्गो येषान्ते मूले उदाहृताः। पर्श्वादियौधेयादिभ्याम्। अस्त्रियामित्यनुवर्त्तत इति। मस्जूक्लृप्त्येति शेषः। भाष्यप्रामाण्यादिति। तत्र ह्यापत्यग्रहणङ्गर्ग्यबन्धीपाद्यजः प्रतिषेधार्थम्। इह मा भूत्। द्वैप्येति। तत्तर्हि वक्तव्यन्न वक्तव्यम्। नैवं विज्ञायते कञ्क्रपोऽयञश्चेति कथन्तर्हि कञ् क्रपोऽयञश्चेतीत्युक्तम्। अत्र भाष्ये द्वीपाद्यञ इत्येवोक्तन्त्वभिजिति सूत्रविहितस्य यञोऽप्युदाहृतम्। यदि तस्मिन्सूत्रेऽस्त्रियामित्यस्य सम्बन्धो न स्यात्तदाऽभिजितोऽपत्यं स्त्रीत्यर्थे यञ्प्रत्ययः स्यात् ततश्च यञश्चेति न्यासे ङीप् स्यादयञश्चेति न्यासे तु नेति फलभेदः स्यादिति कथमयञिति छेदेन वार्त्तिकप्रत्याख्यानमिति तस्मिन्सूत्रेऽस्त्रियामित्यस्य सम्बन्धोऽस्तीतिभाष्यकाराभिप्रायः कल्प्यः। एवञ्च तत्सूत्रपूर्वपठिते पर्श्वादीतिसूत्रेऽस्त्रियामित्यस्यासम्बन्धे साधकाभावादत्राप्यस्त्रियामिति सम्बन्ध्यत एवेति भावः। तेन। अस्त्रियामित्यस्य सम्बन्धेन। मध्यपठिते त्वसम्बन्धे साधकमाह। अष्टेष्वणिति। अपत्याणन्तादिति। अनन्तरापत्याणन्तादित्यर्थः। अस्मिन् सूत्रेऽण इत्युपादानाद्यदा गोत्रापत्येऽभिजिच्छब्दादण् तदापि यञ् भवत्येवाषन्तवाच्यर्थ एव यञन्तात्प्रतीयते न तु यञोऽस्य गोत्रवाचकत्वमित्येको गोत्र इतिसूत्रस्याप्रवृत्तिः। एतद्यञन्तस्य शब्दस्य तु गोत्राभिधायकत्वमस्त्येवेति गोत्रचरणादिति वुञ् भवत्येवेति भावः। सप्तभ्येदमिति। तत्र ह्यणो गोत्रादिति वक्तव्यमिह मा भूत् आभिजितो मुहूर्त्तः। आभिजितः स्थालीपाक इतीत्युक्त-

म्। पादशतस्य। अनेन सूत्रेण वीप्सायां वुन्विधानात्तद्धितार्थेति सूत्रविहिता समाससंज्ञा चप्रत्ययविषये भवति। अत एव। तद्भावभावितामात्रेण निमित्तत्वादेव। अत्र ह्यकारादेशस्योप्रत्ययसन्नियोगेन विधानेऽपि तस्यार्द्धधातुकनिमित्तकत्वमस्त्वेवेति लोपः प्रवर्त्तते तस्याचः परस्मिन्नितिस्थानिवत्त्वान्न गुणः। तथा निमित्तत्वानाश्रयणादिति। यत्र लोपस्य किञ्चित्सन्नियोगेन विधानन्तत्र यत्सन्नियोगेन विधानन्तस्य निमित्तत्वेनाग्रहणमिति भावः। किञ्च धिन्वीतिसूत्रीयदृष्टान्ते नलोपस्य परनिमित्तकत्वमित्ययुक्तम्। तत्र हि सौत्रक्रमानुरोधेनादावकारदेशस्तत उप्रत्ययस्तस्योप्रत्ययोपदेशकालेऽकारान्तत्वबुद्धिसत्त्वादकारलोप इत्यतोऽकारलोपकाले आर्द्धधातुकबुद्धेः सत्त्वात्परनिमित्तत्वमार्द्धधातुके इत्यस्य सप्तम्यन्तस्य लोपविधायके सम्बन्धात्। प्रकृते तु यद्यपि वुन्प्रत्ययः प्रथमम्प्रवर्त्तते ततो लोपस्तथापि वुनः सप्तम्यन्तपदेनानुपादानान्नलोपनिमित्तत्वमिति। दण्डव्यवसर्गयोश्च। दण्डोदमनम् तच्च न शारीरदण्डेन किन्तु द्रव्यग्रहणेनेत्याशयेनाह। दण्डोदण्डनमिति। व्यवसर्गो दानम्। एतयोरर्थयोर्गम्यमानयोः स्वार्थे वुनित्यर्थः। स्थूलादिभ्यः प्रकारवचने कन्। प्रकारस्य वचनन्द्योतनन्तस्मिन्नित्यर्थः। स्थूलको ह्रस्व इत्यस्मात्सदृशस्थूलाभिन्न इति बोधः। अनत्यन्तगतौक्तात्। अनत्यन्तगतौगम्यमानायां क्तान्तात्कन् स्यात्। अशेषतः सम्बन्धाभाव इति। यस्मिन्वस्तुछेदनस्य नाशेषतः सम्बन्धो वाच्यसर्वावयवावच्छेदेन सम्बन्धरूपस्तादृशञ्छिन्नकमित्युच्यते। तत्सन्निहितेन। क्तान्तसन्निहितेन। तस्याकृतिगणत्वे। यावादेराकृतिगणत्वे। तदस्यनित्यत्व इति। तद्विभाषा ग्रहणमस्य अषडक्षेतिसूत्रविहितस्य। अषडक्षीणो मन्त्र इत्यस्याविद्यमानानिषडक्षीणि यस्मिन्नित्यर्थः। अचाक्षिशब्दः श्रोत्रपरः। द्वाभ्यामेव कृत इति तु फलितार्थकथनम्। आशितास्तर्पिता गावो यस्मिन्नित्यर्थे आशितङ्गवीनमिति भवति। आशितशब्दोऽत्र ण्यन्तात्कर्मणि क्तान्तः। पूर्वपदस्य सुमागमो निपातनात्। अलङ्कर्मणि इत्यस्य कर्मणि समर्थ इत्यर्थः। पर्योदयोग्लानाद्यर्थे चतुर्थीति समासः। अलम्पुरुषायेत्यस्यापि पुरुषाय प्रतिपुरुषाय मल्लरूपाय समर्थस्ततोऽपि बलवत्तर इत्यर्थः। ईश्वराधीन इत्यस्य ईश्वरेऽधिष्ठित इत्यर्थः। अधिशब्दस्य शौण्डादिगणपाठात्सप्तमीतत्पुरुषः। अध्युत्तरपदादित्यत्रोत्तरप-

दग्रहणम्प्रायिकन्ते नायं राज्ञोऽधीनः। स्त्रिया अधीन इत्यपि भवति। अतिदिश्यतां वा सच्चासच्चापि नेह मेभारोस्ति। कल्पो हि वाक्यशेषो वाक्यं वक्तुर्थधीनं हीतिभाष्यप्रयोगात्। इयमभ्युच्चय युक्तिरिति। उत्तरसूत्रे विभाषा ग्रहणेन ज्ञापकेनास्य नित्यत्वकथनरूपा उक्तिरभ्युच्चयः। कथन्तर्हि नित्यत्वमित्याकाङ्क्षायामाह। हृहतीजात्यन्ता इतीति। विभाषाच्चेरदिक् स्त्रियाम्। अच्चत्यन्तात्प्रातिपदिकाददिक् स्त्रियां वर्त्तमानात्स्वार्थे खः प्रत्ययो भवति। अदिक् स्त्रियामितद्व्याचष्टे। अदिगिति। दिक् चासौ स्त्री च दिक्स्त्री न दिक् स्त्री अदिक्स्त्री। प्राक् प्राचीनमित्यत्र प्राक्शब्द अस्तात्यन्तः। प्राचि देशे प्राक्। दिक्शब्देभ्य इत्यस्तातिरच्चेर्लुगिति लुक्। तथा च प्राक्शब्दोऽवाधिकरणशक्तिप्रधानन्तस्यालिङ्गत्वमाह। निर्लिङ्गमिति। खान्तविषये विशेषमाह। खान्तमिति। अत्यन्तविरोधापत्तेरिति। यद्यलिङ्गन्तदात्यर्थे किमपि लिङ्गन्न प्रतीयते लिङ्गसर्वनामनपुंसकत्वे तु सत्त्वादीनां साम्यावस्था रूपा स्थितिः प्रतीयते सा च नात्यन्तं विरुद्धा। सर्वपदार्थानाङ्गुणत्रयपरिणामत्वात्पूर्वावस्था रूपत्वमेव। उपचयादिकन्तु गुणानां या पूर्वावस्था ततो विलक्षणमिति ततो विरोधइतिभावः। एकवचनच्चेति। औत्सर्गिकमिति शेषः। पदसंस्कारपक्ष इति। तस्मिन्पक्षे पदानि संस्कृत्ययधेष्टन्तेषां योजनङ्क्रियते। वाक्यसंस्कारपक्षे तु विपरीतमपीत्याह। यदेति। मानच्चिन्त्यमिति। भाष्ये प्राक् प्राचीनम्। प्रत्यक्प्रतीचीनम्। उदक् उदीचीनमित्येव प्रयुक्तमत एतद्विषये पदसंस्कारपक्ष एवेति भावः। प्राग्निरिति। दिक्शब्दस्य स्त्रीलिङ्गत्वाददिगिति वक्तव्ये स्त्रीग्रहणं स्त्रीप्रत्ययान्तान्मा भूदित्यर्थमिति भावः। अस्त्रियामिति किमिति मूले अदिगित्युक्तावपि स्त्रीप्रत्ययान्तस्य व्यावृत्तिर्भविष्यतीत्यभिप्रायेण प्रश्नः। प्राचीनङ्ग्रामादाग्रा इत्युक्तन्तस्य त्वयभावः यद्यप्यदिगवच्छब्द वाचकः प्राक्शब्दस्तथाप्यस्त्रीलिङ्ग इत्यतो न स्त्रियामित्यधिकारी यः प्रत्यय इत्यस्माद्भवति प्रत्ययः स्त्रीग्रहणाभावे तु न स्यादित्यव्याप्तिवारणाय स्त्रीग्रहणमिति भावः। भाष्यप्रयोग इति। एतादृशप्रयोग एव प्रकृतसूत्रविहितखान्तस्य विशेष्यवाचकशब्दापेक्षया विभिन्नलिङ्गवचनसङ्गावे मानमिति भावः। जात्यन्ताच्छबन्धुनि। ननु ब्राह्मणजातीय इत्यत्र ब्राह्मणस्य जातिरिति समासे जात्यन्तस्य ब्रा-

ब्राह्मणत्वजातिपरत्वन्न तु द्रव्यपरत्वमिति जात्यन्तस्य बन्धुनि वर्त्तमानत्वमनुपपन्नमत आह। तज्जात्याश्रयद्रव्यलक्षकादिति। एवञ्च स्वार्थिकप्रत्ययप्रकरणाबाधाय लाक्षणिकस्यैव प्रकृतित्वम्। वस्तुतस्तु प्रकरणबाधेन जात्यन्ताच्छक्यार्थबोधकादिदम्बुन्यर्थे छः स्यादित्येवार्थ उचित इत्याशयेनाह। अत्रेति। द्रव्यस्य जातिव्यञ्जकत्वङ्कथमिति चेदित्यम्। जातेः प्रत्यक्षद्रव्यघटितपरम्परासन्निकर्षेण भवति। द्रव्यबोधकब्राह्मणादिपदजन्यशाब्दबोधेऽपि जातेर्द्रव्यनिष्ठविशेष्यतानिरूपितप्रकारतया भानन्न तु स्वातन्त्र्येणेति। न च ब्राह्मणत्वादिपदजन्यशाब्दबोधे स्वातन्त्र्येणैव भानमिति वाच्यम्। तत्रापि ब्राह्मणेतरावृत्तित्वे सति यावद्ब्राह्मणवृत्तित्वरूपब्राह्मणत्वत्वप्रकारक एव शाब्दबोध इति तादृशशाब्दबोधस्य या विषयिता सा द्रव्यविषयिता व्याप्यैव। जातिव्यञ्जकत्वञ्च जातिविषयिता प्रयोजिका या आश्रयविषयिता तन्निरूपकत्वमित्यस्य विवक्षितत्वात्। प्रत्युदाहरणे ब्राह्मणजातिः शोभनेत्यत्र जात्यस्य न द्रव्यलक्षकत्वमतो न ततः प्रत्ययः। पररीत्या त्वाश्रयस्य विवक्षा नेति न प्रत्यय इति भावः। स्थानान्तादिभाषा। स्थानान्तात्प्रातिपदिकादिभाषा छः प्रत्ययः स्यात्। तच्चेत्स्थानान्तं सस्थानेनार्थवच्चवति। समानं स्थानमस्य सस्थानः। यो हि पिष्टतुल्यो भवति तस्य पिष्टस्थानसमानं स्थानम्भवति। सस्थानशब्दे उष्ट्रमुखवत्समासः तेन यल्लक्ष्यन्तदाह। सस्थानशब्द इति। ज्योतिर्जनपदेति सूत्रेण समानशब्दस्य सादेशः। सस्थानेनेतिकरणे तृतीया। भवनक्रियायामस्याश्रयोऽन्वेति स्थानम्पदम्। मान्यत्वादिरूपम्। अस्मिन् सूत्रे विभाषा ग्रहणादिभाषा इयमध्यपठितत्वाज्जात्यन्तादितिनित्यमिति लभ्यते एतदर्थमेवात्र विभाषा ग्रहणम्। अनुगादिनष्ठक्। सूत्रार्थमाह। अन्वित्यादिना। स एवेत्यस्य अनुगदति य इत्यर्थः। णचस्त्रियामञ्। यद्यपि कर्मव्यतिहारे णच् स्त्रियामितिसूत्रेण णच्प्रत्ययः स्त्रियामेव विहित इतिणजन्ताद्विहितोऽञ्प्रत्ययः स्त्रियामेव भविष्यति स्वार्थिकत्वात्तथापि स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इतिज्ञापनायात्र स्त्रियामिति। तेन गुडकल्याद्राचेत्यादि सिध्यति। विसारिणो मत्स्ये। विसारिन्शब्दादण् प्रत्ययो भवति। समुदायेन मत्स्येऽभिधेये। सङ्घायाः क्रिया। एककर्तृणां सजातीयक्रियाणाम्पुनः पुनर्जायमानानाङ्गणनङ्क्रियाभ्यावृत्तिगणनन्तत्र स्वार्थे स-

ङ्ग्यावाचकात्प्रत्यय इत्यर्थः । यद्यप्याहृत्तिशब्दस्य द्वितीयप्रवृत्तौ रूढिस्तथापि प्रकृतसूत्रे ऽभिशब्दोपादानसामर्थ्यादभ्याहृत्तिशब्दो जन्ममात्रपर इत्याशयेन मूलेऽभ्याहृत्तिर्जन्मेत्युक्तम् । अत एव । अभ्याहृत्तिशब्दस्य जन्ममात्रपरत्वादेव । इति नेति । किन्तु चिः पचतीत्येव भवतीति शेषः । तत्सङ्ख्योत्पत्तिपरा इति । पञ्चेति सङ्ख्या यस्यास्तादृशी योत्पत्तिस्तत्परा इत्यर्थः । तेषाम् पञ्चादिशब्दानाम् । एवञ्च पञ्चकृत्वो भुङ्क्ते इति शब्दात्पञ्चसङ्ख्योत्पत्तिकमेककर्तृकभोजनमिति बोधः । एव मन्यत्रापि । नन्वेका क्रिया न पञ्चसङ्ख्योत्पत्तिकेत्यतोवर्त्तमानार्थकलट् प्रयोगानुपपत्तिरत आह । समुदायस्येति । एकदिवसाधिकरणैककर्तृकपञ्चसङ्ख्योत्पत्तिकभोजनक्रियासमुदायस्येत्यर्थः । पचतीत्यादौ यथोपक्रमप्रभृत्यपवर्गपर्यन्तं वस्तुतः क्रियाणाञ्चायमानानामनेकत्वेऽपि शब्दान्निवृत्तभेदाक्रिया प्रतीयते तथा पञ्चकृत्वेत्यत्रापि निवृत्तभेदभोजनक्रियायाम्पञ्चसङ्ख्योत्पत्तिकत्वान्वयः । यत्र तु कर्मणि प्रत्ययस्तत्र पञ्चसङ्ख्योत्पत्तिकत्वस्य विक्लित्यादिफलरूपक्रियायामन्वयः । अतः पञ्चकृत्वः पच्यन्ते ते मनानीत्यादिप्रयोगा अपि भवन्ति । तिरोहितावयवभेदफलसमुदायविवक्षायामेकवचनम्पञ्चकृत्वः पञ्चात इति च भवति । उद्भूतावयवभेदत्वे बहुवचनम् । एकजातीयानामेककर्मकाणामेककर्तृकाणामिव क्रियाणाञ्चन्मसङ्ख्या न एवास्य साधुत्वं शब्दशक्तिस्वभावादिति बोध्यम् । सङ्ख्याया इत्यस्योपादाने सति भूरिवारानित्यत्र यथा नातिप्रसङ्गस्तथाह । नायमिति । अयम् । भूरिशब्दः । अप्रसिद्धेरिति । नियतविषयपरिच्छेदको हि तत्र प्रसिद्धः । नन्वेवम्बहुशब्दादपि सङ्ख्याकार्यन्न स्यादत आह । बहुशब्दस्त्विति । इत्युक्तमिति । सङ्ख्यासंज्ञासूत्रव्याख्यानावसरे । कालपरः कालेशक्तः । भोजनपर्याप्त इति । भोजनक्रिया निष्ठाया कालिकसम्बन्धावच्छिन्ना व्यापकता तन्निरूपिततादात्म्यसम्बन्धावच्छिन्नव्याप्यता विशिष्टः । भूरिवारशब्देन यो बुद्धिस्थानेकावयवकः परिच्छिन्नोघट्यादिसमुदायो बोध्यते तद्व्याप्यकत्वम्पूर्वोक्तन्नानुपपन्नम् । स च घट्यादिसमुदाय उद्भूतावयवभेदोविवक्षित इति प्रकृते बहुवचनम् । तिरोहितावयवभेदतादृशसमुदायविवक्षायान्तु भूरिवारम्भुङ्क्त इत्येकवचनम् भवत्येव । यत्तु भूरिशब्दो बहुत्वसङ्ख्योत्पत्तिकाहृत्तिकक्रियाधारकालपरस्तस्य कालबोधकवारशब्देन बहुव्रीहिः

भोजनक्रियैवान्यपदार्थः । एवञ्च भूरिशब्दस्य क्रियाविशेषणीभूतार्थप्रतिपादकतया कर्मण्येव द्वितीया । क्रियाविशेषणत्वात् । न च मृदुपचतीतिवन्नपुंसकत्वापत्तिरिति वाच्यम् । अनियतलिङ्गकस्यैव क्रियाविशेषणीभूतार्थप्रतिपादकस्य नपुंसकत्वात् । वारशब्दस्य तु नित्यपुंस्त्वात्तदन्तसमासस्यापि लोकतो नित्यपुंस्त्वमिति के चित् । तन्न । शास्त्रेण पुंस्त्वस्यानुपपादनात् । अन्ये तु भूरिशब्दो बहुसङ्ख्याद्वत्तिकजन्मवत्परः । कालावच्छिन्नपरश्च वारशब्दस्तयोश्च कर्मधारय एवञ्च समासस्य पुंस्त्वव्याय्यमेव । तदर्थस्याभेदेन भुज्धात्वर्थफलेऽन्वेतीति क्रियाविशेषणत्वाद्वितीयेत्याहुः । क्रियाग्रहणं प्रकृतसूत्रे व्यर्थमित्यभिप्रायेणाशङ्कते । यद्यपि द्रव्यगुणयोरिति । पञ्चकृत्वः खेतः पटः पञ्चकृत्वो धनवान्देवदत्त इत्यादिप्रयोगास्तु जात इत्यादिशब्दाध्याहारेणोपपाद्याः । प्राचीनोक्तङ्क्रियाग्रहणप्रयोजनं खण्डयति । साध्यस्वभावैवेति । ननु यदि साध्यस्वभावैवेति न नियमस्तदा द्वौ पाकाविल्यादौ सुजापत्तिरत आह । द्वौ पाकाविति । अभावादिति । किन्तु सिद्धावस्थक्रियागतद्वित्वं विवक्षितमिति शेषः । अनापत्तिरिति । द्विशब्देन सामानाधिकरण्याद्धि द्वित्वस्यैकस्यैव सम्बोधेनान्यतरवैयर्थ्यमितिन्यायेन पाकशब्दाद्विवचनेन च प्रतिपादनम्भवति तच्च क्रियाजन्मगणने न सम्भवतीति भावः । अत एव । क्रियाजन्मगणनायामेताद्दशस्थले द्विवचनासम्भवादेव । न च पञ्चवारान् भुङ्क्त इति यत्र प्रयोगस्तत्र पञ्चन्शब्दात्कृत्वसुच् स्यादिति वाच्यम् । तत्र वारशब्देनाभ्यावृत्तेरुक्ततया सङ्ख्याशब्दस्य तद्वत्तित्वाभावात् । नचैवम्भूरिवारानित्यत्रापि एवं वक्तव्यमिति मूलोक्तप्रत्युदाहरणविरोध इति वाच्यम् । तस्य भूरिभुङ्क्त इत्येतदुपलक्षणत्वात् । युग्मोभादिशब्दादिति । एतयोर्नियतविषयपरिच्छेदकत्वसम्भवेऽपि लोके एकः युग्मौ चय इत्येवङ्रूपेण न हि प्रसिद्धेति भावः । विभाषा वहोर्धा विप्रकृष्टकाले । क्रियाभ्यावृत्तिगणन इत्यनुवर्त्तेऽत आह । अविप्रकृष्टेत्यादि । दिवसस्येति मूले शेषत्वविवक्षया षष्ठी । तत्प्रकृतवचने मयट् । व्याख्यानादिति । प्रकृतशब्दस्य प्रस्तुतार्थकतया प्रकृते मयडिति वक्तव्ये वचनग्रहणसामर्थ्यलब्धम्प्राचुर्येण प्रस्तुतम्प्रकृतमित्येवं वृत्तिकारादिभिर्व्याख्यातन्तन्मूलकादित्यर्थः । इत्यक्षरार्थ इति । वचनशब्दस्य भावल्युडन्तत्वपक्षे इति शेषः । य-

दा त्वधिकरणे प्रत्ययस्तस्मिन्पक्षे सूत्रार्थमाह । प्राचुर्येणेत्यादि । व्याख्यानादिति।अन्नमयो यज्ञः। अपूपमयं पर्वेत्यादिहत्यादि सम्मतप्रामाणिकप्रयोगदर्शनमूलकव्याख्यानादित्यर्थः । तदग्रहणमिति । प्रातिपदिकादुक्तेऽर्थद्वये प्रत्ययविधानेऽपीष्टप्रयोगोऽप्राप्त इत्यादिः टित्वान्ङीविति । स्वार्थिकानाम्प्रकृतितो लिङ्गवचनानुवर्त्तनस्य सत्त्वात्। अन्नमयो यज्ञ इत्येतत्तु क्व चिल्लिङ्गवचनातिक्रमस्यापि सत्त्वेन । समूहवच्च बहुषु । प्रकृतवचने इत्यनुवर्त्तते । बहुषु प्रकृतवचने चार्थ इत्यर्थः प्रातिपदिकार्थे स्वातन्त्र्येण बहुष्वित्यस्यान्वयाभिप्रायेण तथा च यत्फलितन्तदाह । बहुत्वविशिष्टइति । समूहवदित्यत्र समम्यन्ताइतिः। अनन्तावसथेतिहभेषजात् । इतिहेतिनिपातसमुदायादयम्प्रत्ययः । स चोपदेशपरम्परायां वर्त्तते । भैषजशब्दम्प्रकृतसूत्रघटकं साधयति । भियः षुगित्यादि। अत एव निपातनादिति। अन्यथा आदिहद्यामैषजमिति स्यादितिभावः। देवतान्तात्तादर्थ्ये यत्। तदर्थमेवतादर्थ्यम् स्वार्थे यञ तदाह।तदर्थे वस्तुनीत्यर्थइति।तेन। स्वार्थिकतत्प्रत्ययस्वीकारेण। देवदेवत्यमिति। सिद्धमिति।देवदेवत्यमित्यत्र देवस्य देवत्यमित्यर्थः । एतेन । निरुक्तदेवतात्वस्य पित्वेऽपि सत्त्वेन । पादार्घाभ्याञ्च । तादर्थ्य इत्यनुवर्त्तते । अत्र चकारोऽनुक्तसमुच्चयार्थः । तेन एष वै सप्तदशाक्षरश्छन्दस्य इति सिद्धम् । अत एव निपातनादिति । आग्नीध्रसाधारणेति वार्त्तिके निपातनात्। साधारणशब्दार्थं व्याचष्टे । अनेकमिति । साधारणशब्दे समानशब्दस्य सादेशस्तु पृषोदरादित्वाद्बोध्यः । अत एव निपातनात्सादेशस्य दीर्घ इत्येवोक्तम् । अनेन वार्त्तिकेनोभयोरपि निपातनमिति तु युक्तम् । लोहितान्मणौ । मणौ वर्त्तमानाल्लोहितशब्दात्स्वार्थे कनित्यर्थः । वर्णे चानित्ये । अनित्ये वर्णे वर्त्तमानाल्लोहितशब्दात्कन् स्यात् । अस्मादिति । लोहितान्मणिङ्बाधनं वेतिवार्त्तिकादित्यर्थः । अत एव । अस्य कनोऽत्यन्तस्वार्थिकत्वेन स्वार्थेद्रव्यमात्रापेक्षतयाऽन्तरङ्गत्वेन द्याबुत्पत्तेः प्रागेवोत्पत्तेः स्वीकारादेव । उपायादितीति । इदं ह्रस्वत्वम्प्रत्ययसन्नियोगे न । एतेन । दीर्घस्य स्थानित्वकथनेन । अल्यस्य स्यादिति । ह्रस्वत्वमल्यस्य स्यादित्यर्थः । व्याख्यानादिति । औपयिकेति लक्ष्यदर्शनमूलकव्याख्यानादित्यर्थः । वाचो व्याहृतार्थायाम् । अन्येनोक्त इत्यस्यान्येन प्रकाशित इत्यर्थः । अनेन यद्यपि वाचिक इत्यस्य अनुवादात्म-

कर्मशब्देऽपि प्रवृत्तिः प्राप्ता तथापि वाचिकपदं रूढमित्याशयेनाह मूलेसन्देशवागिति। तद्युक्तात्कर्मणोऽण्। तेन युक्तात्तद्युक्तात्। तच्छब्दार्थमाह। तच्छब्देनेति। प्रकृतित्वेनाभिप्रेते कर्मशब्दे वाक्युक्तत्वञ्च वाक्प्रतिपाद्यवाचकत्वरूपन्तदाह। वाचायुक्तादिति। वागेवेत्युत्तरस्थैवेति। भाष्ये यत्क्रियमतिनिर्दिश्यत इति प्रश्नवाक्यन्तदुत्तरभूतं यद्वागेवेति वाक्यन्तत्र य एवकारस्तेनेत्यर्थः। क्रिययोः। वच्धातुक्रुधातुभ्यामतिपाद्ये ये क्रिये तयोरित्यर्थः। कर्मणोऽणित्यत्र कर्मशब्दः क्रियापरः। न च कर्मणा क्रियत इत्यत्र पौनरुक्त्यमिति वाच्यम्। कर्मणेत्यत्र कर्मशब्दस्य वाक्प्रतिपाद्यार्थकर्मकक्रियापरत्वङ्क्रियते इति क्रुधातोः क्रियासामान्यार्थकत्वमिति भेदात्। तद्युक्तादित्यस्य प्रत्युदाहरणप्रदर्शनपरे वाक्ये यत्कर्मक्रियत इत्यत्र कथभेद इति न शङ्क्यम्। अत्रापि कर्मशब्दस्य वाक्करणकार्थप्रतिपादनाभावाधिकरणकालावच्छिन्नत्वविशिष्टक्रियापरत्वङ् क्रियत इत्यत्र क्रुधातोः क्रियासामान्यपरत्वमिति भेदात्। वाचा कथनमित्यत्र वाङ्नलौकिकी किन्तु मन्त्ररूपा विवक्षितेत्याशयेनाह। एवञ्चेति। पूर्वोक्तभाष्यव्याख्यानावसरे इदन्त्वया कर्त्तव्यमिति सन्देशवाचं श्रुत्वा यत्कर्म क्रियत इति कैयटरीत्या भाष्यव्याख्यायामुत्तरवाक्यस्थैवकारास्वारस्यमित्याह। इदन्त्वयेति। कैयटानुसारेणेति। इदमुपलक्षणम्। वृत्त्यनुसारेणेत्यपि बोध्यम्। ओषधेरजातौ। अजातौ वर्त्तमानादोषधिशब्दादित्यर्थः। औषधम्पिबतीत्यत्रौषधिशब्द ओषधिविशेषपरोलक्षणयेति न जातिपरत्वम्। प्रज्ञादिभ्यश्चेत्यत्र प्रज्ञशब्दस्य योऽर्थस्तमाह। प्रजानातीति। वृत्तौ स्पष्टमिति। नित्यश्चायम्प्रत्ययः उत्तरसूत्रेऽन्यतरस्याङ्ग्रहणादितितत्रोक्तम्। बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्। बह्वर्थादल्पार्थाच्च प्रातिपदिकात्कारकाभिधायिनः शस् प्रत्ययः स्यात्। अत्र कारकादितिसामान्यत एवोक्तमतः कारकसामान्यप्रतिपादकादयम्प्रत्ययो न कर्मप्रतिपादकादेव। बहुभिः कालैर्ददाति बहुशो ददाति। अल्पं न ददातिअल्पशो ददाति। बहुभ्यो ददाति अल्पाय ददातीत्यर्थेऽपि बहुशः अल्पशः इति भवति। अर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्चायम्। विशेषोदाहरणम्। त्रिशः। पञ्चश इत्यादि। भूरिशो ददातीत्यादौ। मूले मङ्गलामङ्गलवचनमिति। यथासंख्यमत्राभिप्रेतम्। यत्र मङ्गलममङ्गलञ्च गम्यतेतत्रायम्प्र-

स्यय इत्यर्थः । इत्युक्तङ्खण्डयति । अपेतेति । एतेनासौचत्वकथनेन । तत्तत्त्वे । अन्यार्थकैकशब्दसत्त्वे । न एव । एकार्थका एव । येनोक्तावेकत्वविशिष्टस्यैवार्थस्य स्वभावाद्बोधकास्त एव गम्यन्ते तादृशाश्च परिमाणवाचकास्तेषामुक्तपरिमाणार्थत्वेन न्यूनाधिकभावे प्रयोगाभावः । जातिशब्देभ्यस्तु न तथेति तेभ्यो न श्रसिति भावः । घटङ्घटमितीति । यदि घटशब्दाच्छत् स्यात्तदा एकस्यैव घटस्य प्रतीतिः । स्यादिति नास्ति किन्तु द्वयोर्बहूनां वा प्रतीतिरपि स्यादित्याह । ततः श्रसीति । अभिमान इति । एतेन उक्तावभेदैकत्वसङ्ख्याया भानस्योक्तगतः प्रसिद्धतया पूर्वोक्तमयुक्तमिति ध्वनितम् । अत्यसम्मतत्वप्रयोजनमनुवदति । एजवचनादितीति । अत्र हि घटौ घटावित्युच्चारणेनैकत्वविशिष्टार्थाभिधायकत्वाभावः स्फुट एव । केचिदित्यरुचिसूचनाय । तद्बीजन्तु यदिद्विवचनान्तव्याहृतिरेव फलन्तदैकवचनान्तात्प्रत्यय इत्यत्रैव पर्यवसानमिति घटंघटमित्यत्र श्रस् दुर्वार एवेति परिमाणशब्देभ्य एव प्रत्यय इति नियमलाभ इति । सूत्रे सङ्ख्यैकार्थेति वक्तव्ये वचनशब्दोपादानसामर्थ्यादेकवचनान्तादित्यर्थो नाभिप्रेतः किन्त्वेकं वक्तीत्येकवचनमित्यर्थ एवाभिप्रेत इत्याशयेनाह । वस्तुत इति । सङ्ख्यातिरिक्तार्थानामिति । सङ्ख्याशब्देभ्यस्तु द्विवचनस्य प्रकृत्यर्थद्वित्वानुवादकतया परिगृहीतैकत्वानामेवेति नियमस्य तत्रभावादिति भावः । परिगृहीतैकत्वानामिति । परिगृहीतं वाचकतासम्बन्धेनैकत्वविशिष्टन्तेषामित्यर्थः । नन्वत्र सूत्रे चकारो व्यर्थः । एकार्थबोधकपरैकवचनशब्दोपादानेन सिद्धे सङ्ख्याशब्दोपादानेनैकत्वातिरिक्तसङ्ख्यावाचकाः सङ्ख्याशब्देन विवक्षिता इत्यर्थो भविष्यतीत्यत आह । अत्राहुरिति । वीप्साश्रयभाव इति । वीप्साबोधकश्रस्प्रत्ययाभाव इत्यर्थः । पञ्च इति । एतेनैकैकमित्यपि भवतीति सूचितम् । सन्देहः स्यादिति । अत्र श्रम् वीप्सायां वा स्वार्थे वेति सन्देहः स्यादित्यर्थः । अपवादत्वाभावादिति । द्विवह्वादिशब्देभ्योऽपिदर्शनादित्यादिः । वीप्सायामिवेति । अत एवतान्त्रे केति सूत्रघटकस्यैकश्र इत्यस्यैकैकमित्यभियुक्तव्याख्यानसङ्गतिः । तदनुवरदेनेति । नित्यवीप्सयोरितिसूत्रसिद्धद्विर्वचनानुवादेनेत्यर्थः । ध्वनितञ्चेदमिति । तत्र हि यत्र तद्विनेनानुक्ता वीप्सा भवति तत्रद्विर्वचनम् । तद्यथा । एकैकशो ददातीत्युक्तम् । अत्र द्विरेकशब्दः श्रश्च दृश्यते

तस्योपपत्त्यर्थं कैतटेनोक्तङ्के चिदाहुः । अल्पार्थो ऽयं कशब्दोऽस्ति तस्य वीप्सायां द्विर्वचने बह्वल्पार्थादिति शस्प्रत्यय इति । अत्र के चिदितिवदताऽरुचिः सूचिता । साचाल्पार्थकैकशब्दसङ्गावे दृढतरमानाभाव इति । ष्णान्ता षट् बहुषु बहुवचनम् । एकादाकिनिच् एको गोत्रे एतेषु सूत्रेषु सङ्ख्याऽसहान्यार्थकस्य प्रथमार्थकस्य च भाष्यकृतोक्तेस्तेषामामाणिकत्वेऽपि समानस्य धारणार्थकयोर्मानाभावः । न च चैत्रमैत्रयोरेका माता । देवदत्तविष्णुमित्रयोरेकं धनमित्यत्र तौ दृश्येत इति वाच्यम् । सङ्ख्यापरैकशब्दप्रयोगेणाप्येतयोरुपपत्तेः । किञ्चाल्पार्थकैकशब्दस्य तदर्थकत्वेन प्रसिद्ध्यभावाद्बह्वल्पार्थादिति सूत्रे न तद्ग्रहणम् । किञ्च सङ्ख्याशब्दातिरिक्तशब्दानाम्परिगृहीतकत्वानामेव वीप्सासत्त्वेन ततो द्विर्वचनापवादः शसेव प्राप्नोति । नचैकम्बहुव्रीहिवदितिद्विर्वचनन्तच भवत्विति वाच्यम् । तस्य सूत्रस्य सङ्ख्यावाचकप्रसिद्धतरैकशब्द एव प्रवृत्तेः । किञ्च तेन वीप्सायाङ्गतद्विर्वैकशब्दानुवादेन बहुव्रीहिवद्भावस्य विधिरित्येव युक्तमत एव तान्येकेति सूत्रस्थस्यैकश इत्यस्योपपत्तिः । तथा चैकश इति वदता विवक्षितमर्थजातङ्ज्ञापितमित्यर्थः । कथन्तर्हि भाष्यप्रयोगस्योपपत्तिरिति चेदुच्यते । सङ्ख्यैकवचनाच्चेत्यत्र चकारस्य भिन्नक्रमतया वीप्सायां स्वार्थे च श इत्यर्थः । स च स्वार्थिको न सर्वत्र किन्तु अभिधानस्वाभाव्यादेकशब्दात्कृतद्विर्वचनैकशब्दाच्चेति नातिप्रसङ्गः । एवञ्चैकशब्दप्रकृतिकशसः स्वार्थिकत्वस्यापि सत्त्वेन न ततो नियमेन वीप्सोक्तिरिति वीप्साबोधकशसभावपक्षे वीप्सायान्द्विर्वचने कृते ततः स्वार्थिकः शसिति । अत्रेदम्भाष्यमेव मानम् । एकश इति तु वीप्साशसन्तं स्वार्थिकशसन्तम्वाऽस्तु । लौकिकप्रयोगे प्रकरणादिनाऽर्थावसाय इति तदेतदाह । भाष्यप्रदीपोद्योते निरूपितमिति । आद्यादिभ्य उपसङ्ख्यानम् । अयं स्वार्थिकः सर्वाभ्यो विभक्तिभ्यो विशेषाभावात्तासु कृतासु तदन्तेभ्यो भवति तदाह । अमेवेति । वा ग्रहणसम्बन्धाच्चायन्तस्सिर्वैकल्पिकस्तेनैतद्रहितानामाद्यादीदीनाम्प्रयोगो भवति । अपादानेचाहीयरुहोः । अपादाने या पञ्चमी विहिता तदन्ताद्धातोः स्यात् । तच्चापादानं हीयरुहोर्नेच्चेत् । अत्र हीयेति निर्देशाल्कर्मप्रत्ययान्तज्जहाति योगे उपादानत्वम्भवति न तु जिहीतेर्योग इति निर्णेयम् । बेन भूमिरुज्जिहीते भूमित उज्जिहीत इत्यत्र तसिर्भवति । स्वर्गाद्धीयते । पर्वता-

दवरीहतीत्यत्रैव तसिप्रत्ययो न भवति । मन्वो हीनः स्मरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाहेत्यत्र तु तृतीयान्तात्तसिः । अतिग्रहाव्यथत । अतिग्रहादिविषयेऽकर्त्तरि या तृतीया तदन्ताद्धा तसिः स्यात् । चारित्रेणातिगृह्यते । चारित्रतोऽतिगृह्यते । चारित्रं सुष्ठु वर्त्तनन्तेनान्यानतिक्रम्य गृह्यते । अत्र करणतृतीयान्तादिति वक्तव्येऽकर्त्तरि तृतीयेत्युपादानं हेतौ या तृतीया तदन्ताद्ग्रहाय । तेन चारित्रेणातिगृह्यत इत्यत्र चारित्रस्य हेतुत्वविवक्षायामपि तसिर्भवति । हीयमानपापयोगाच्च । अत्र पापयोगशब्दावर्थ आद्यजन्तौ । तेन युक्तेत्यर्थस्य लाभः । तद्युक्तत्वञ्च तदन्वयित्वम् । उदाहरणे करणे हेतौ च तृतीया । युक्तत्वञ्च न साक्षादेवेत्याशयेनाह । तदुक्तत्वमिति । हृक्तितो हीयत इत्यत्र हीधात्वर्थहाने हृक्तस्य करणत्वेनान्वयः । हृक्ततः पाप इत्यत्र तु यः पुरुषोऽतिदयालुत्वेन हेतुना पापवतोऽपि जनस्य सङ्ग्रहङ्कृतवान् सविवक्षित इति साक्षात्तदुक्तत्वम् । अत एवोक्तभूले त्वेपस्याविवक्षायामिति । षष्ठ्या व्याश्रये । नाना पक्षसमाश्रयो व्याश्रयः । एवञ्च नाना पक्षसमाश्रयणे गम्यमाने षष्ठ्यन्ताद्धा तसिः स्यादित्यर्थः । अत्र तत्समाश्रयणमेककर्त्तृकमनेककर्त्तृकम्वा । उदाहरणेऽर्जुनादिपदानां शक्त्यर्थपरतायामाह । पक्षे इति शेष इति । हृक्तावर्जुनादिपदानान्तत्वे लक्षणा वा बोध्या । रोगाच्चापनयने । प्रवाहिकात इत्यादावुदाहरणे प्रवाहिकादिपदानान्तन्निवर्त्तकोपाये लक्षणा । क्षय्यस्तियोगे सम्पद्यकर्त्तरि च्विः । करणतृतीयेति । तेनभावस्तद्भाव स्तद्भाव इत्यत्र भवनस्य वास्तविकमेव किन्तु वैवक्षिकम् । सम्पद्य इत्यादिपदं व्याचष्टे । सम्पद्य इत्यादेरिति । कर्त्तृत्वस्य क्रियानिरूपित्वात्प्रकृते च सा क्रिया सम्पत्तिरूपा विवक्षितेत्याशयेनाह । भावे श्र इति । एवञ्चाभूतकर्त्तृकं यत्तद्रूपकरणभवनन्तस्मिन्गम्यमाने यस्य सम्पत्तिकर्त्तृत्वविवक्षा तद्वाचकादयम्प्रत्ययः । तस्य । सम्पत्तिकर्त्तृवाचकशब्दस्य । प्रकृताविति । अत्र प्रकृतित्वन्न तदुत्पत्तिप्रयोजकनाशप्रतियोगित्वरूपम् । किन्तु तद्व्यवहारपूर्वकालिकव्यवहारविषयत्वम् । एवञ्चान्यबोधकस्य शब्दस्यान्यत्र कथं वृत्तिरित्याकाङ्क्षायामाह । गौण्या वृत्त्येति । अत एव । गौण्या वृत्त्या वर्त्तमानत्वेन गौणत्वादेव । नात्वमिति । महच्छब्दस्य गौण्याऽमहति वृत्तित्वाद्गौणमुख्यन्यायेनाऽमहत इतिनात्वमित्यर्थः । यद्यपि भवनकर्त्ता-

ऽमहांस्त्वथापि स एव गौरुक्ता महच्छब्दबोध्य इति महद्भूता ब्राह्मणीत्यत्र पुंवद्भावो भवतीत्याशयेनाह । सामानाधिकरण्येति । मध्ये वमिति । विकारा-भेदेनेत्यर्थः । एवञ्च प्रकृतेः कर्तृत्वम्फलितन्त्वदाह । अत एवेति । प्रकृतेः कर्तृ-त्वादेव सङ्घीभवन्तीत्यत्रासङ्घानाम्बहुत्वाद्बहुवचनन्त्वङ्गवतीत्यत्रात्वम्पदार्थस्य कर्तृत्वादुक्तपदार्थस्याकर्तृत्वान्न मध्यमः किन्तु शेषत्वात्प्रथम इत्यर्थः । अन्यत्र चुरा-न्तत्वाभावे । उभयोः कर्तृत्वमिति । एतच्च लक्ष्यानुरोधेन कल्प्यते । चुरान्तवि-षये पूर्वोक्तां व्यवस्थां हरिरप्याह । पूर्वावस्थामविजहत्स्वरूपमुत्तरम् । स-म्मूर्छित इवार्थोऽजायमानोऽभिधीयते । पूर्वावस्था कारणावस्था । उत्तरन्व-र्मम् । कार्यावस्थाम् । एवञ्चावस्था द्वयावच्छिन्नमेकमेव वस्तु पूर्वावस्थानुगुण्ये-नोत्तरावस्था प्राप्य मुखञ्जायत इत्युच्यते । एकस्यैव वस्तुन उभयावस्था प्राप्य-भिधानेन प्रकृतिविकृत्योरेकार्थप्रतिपादकत्वरूपं सामानाधिकरण्यं स्पष्टमेवा-भिहितम् । नन्वेवं चुरान्त एवोभयोः कर्तृत्वापत्तिरत आह स एव । सव्यापार-तरः कश्चित्कचिद्धर्मः प्रतीयते । संसृज्यन्ते च भावाभ्यामेधादयोऽपि प्रकृत्य इति । सः व्यापारः कर्तृत्वशक्तिरूपः । एतन्निष्ठः प्रकर्षश्च व्यवस्थया प्रकृतिवि-कृतिसम्बन्धित्वेन प्रतीतिविषयत्वरूपः । यथा सुवर्णपिण्डः खदिराङ्गारसवर्णं कुण्डले भवत इतिभाष्यप्रयोगाद्धात्वर्थे विकृतेः कर्तृत्वङ्क्वचित् । क्वचित्तु प्र-कृतेः । यथैको वृक्षः पञ्च नीका भवतीति प्रयोगात्तादृशस्थले एकवचनमेव । अत्वन्त्वं सम्पद्यते त्वङ्गवतीत्यत्रात्वम्पदार्थस्य कर्तृत्वात्प्रथमः । त्वमत्वञ्चवसीत्य-र्थे तु अत्वङ्गवसीत्येव । एवञ्च प्रकृतेर्विकृतेश्चापि यत्रोक्तत्वन्द्वयोरपि । गच्छति वाचकः सङ्ग्रामप्रकृतेर्विकृतेर्नेहोति प्रवादश्चुरान्तविषय एव । यत्र चिप्रत्ययस्तत्र सादृश्यमूलाभेदाध्यवसायेन विकारोभेदात्तत्प्रकृतेः कर्तृत्वेनोभयोरुक्तत्वम् । सादृश्यमूलाध्यवसानेनोभयोः कर्तृत्वादेव गौरुक्ता महङ्गूतेत्यत्र महच्छब्दस्य नात्वम् । तदेतत्स्पष्टीकृतमत्र शेखरेऽन्यत्र प्रकृतिविकृत्योः कर्तृत्वेऽनियम इ-त्यादिना । अत्र यो विशेषस्तमाह । अनारोपितादिति । अनारोपितवाचका-दित्यर्थः । तथा भूते । पूर्वावस्था त्यागाभावविशिष्टे वस्तुनिवर्त्तमानादिति शेषः । आरोपिततद्भावसम्पत्ताविति । आरोपितशुक्लत्वादिरूपभावस्य सम्पत्तौ । विवक्षितायामिति शेषः । अत एव । आरोपिततद्भावसम्पत्ताविव चिप्रत्ययस्य

साधुत्वादेव । अत एव । उक्तोऽर्थः । भाष्ये प्रत्याख्यातमिति । तादृशभाष्यप्रामाण्यादारोपविषय एव च्विप्रत्ययः । प्रकृतसूत्रभाष्येऽपि ध्वनितमिति । तत्र हि च्विविधावभूततद्भावग्रहणकर्त्तव्यमिह मा भूत् । सम्पद्यन्ते यवाः । सम्पद्यन्ते शालयः । अथ क्रियमाणेऽपि वै अभूततद्भावग्रहणे इह कस्मान्न भवति । सम्पद्यन्तेऽस्मिन्क्षेत्रे शालय इति । प्रकृतिविवक्षाग्रहणञ्च कर्त्तव्यमिति । एतेन सम्पद्यन्तेऽस्मिन्क्षेत्रे इत्यत्र प्रकृतिविवक्षा भावान्न च्विप्रत्यय इत्युक्तम्भवति । प्रकृतिविवक्षेत्यस्य प्रकृतेरुपादानकारणत्वेन विवक्षितस्यान्यरूपेण विवक्षेत्यर्थः । प्रकृतिरेव सादृश्यमूलकाभेदेन विकारबोधकशब्देनाभिधीयते यत्र तत्रैव च्विप्रत्ययो भवतीति ध्वनितमित्यर्थः । नन्वतिसर्वशब्दे सर्वशब्दस्य वास्तविकमेवोपसर्जनत्वमिति कथं च्विप्रत्यय इत्यत आह । संज्ञोपसर्जनीभूतेति । तेन वाक्येन वृत्तिघटकस्य सर्वादेरुपसर्जनत्वेनातिसर्व इत्यादौ सर्वादित्वाभावः प्रतिपाद्यते । उपसर्जनत्वञ्च सर्वमतिक्रान्त इतिवाक्यप्रयोगेण प्रदर्श्यते। एवञ्चयो वाक्यघटकस्तस्मिन्ननुपसर्जने उपसर्जनत्वमारोपितमेव । वृत्तिघटकयो पूर्वोत्तरपदयोः परस्परसमभिव्याहारेणान्यार्थसम्बन्धस्वार्थाभिधायकत्वं वाक्यघटके तु नेति । वाक्यघटकस्य हि सर्वशब्दस्य तादृशरूढेऽतिक्रमणक्रियानिष्ठविशेष्यतानिरूपिता या कर्मत्वसम्बन्धावच्छिन्नप्रकारता तदाश्रयप्रतिपादकत्वम् । समासघटकस्य सर्वशब्दस्य तु अतिक्रमणकर्तृरूपातिशब्दार्थसंसृष्टार्थाभिधायकत्वम्पांसूदकवदिति भावः । स्पष्टञ्चेदमीदूतौ च सप्तम्यर्थ इति सूत्रेऽर्थग्रहणप्रयोजननिरूपणावसरे भाष्यकैयटयोः । वृत्तिवाक्ययोरत्यन्तभेदादिति । उपपादितरीत्यात्योः प्रायेण श्रूयमाणसुब्वत्योर्वापर्यभावापन्नानेकावयवकत्वतद्भिन्नत्वाभ्यामन्यतरार्थसंसृष्टस्वार्थाभिधायकपदाघटितत्वतद्घटितत्वरूपविरुद्धधर्माभ्याम् । भेदादित्यर्थः । तत्र । वाक्यघटके । तत्तत्पदत्वं वृत्तिघटकतत्तत्पदत्वम् । तत्त्वम् । आरोपितत्वम् । एवमन्यत्रापि बोध्यम् । नन्वेवमपि ब्रह्मीभवतीत्यादिप्रयोगानुपपत्तिस्तदारोपस्य विवक्षयाच्विप्रत्ययेनोपपादयितुमशक्यत्वादत आह । अशत्रीभूत्वेत्यादि । अधिकरणत्वमपीतीति । तथा च नादेवग्रहपदार्थे सम्पद्यकर्तृत्वमेवेति तच्विप्रत्यय इति शेषः । अहरितिप्रथमान्तपदार्थेन सामानाधिकरण्योपपत्तये आह । अधिकरणशक्तीति । दोषा गच्छतीत्यादौ दोषाग-

ब्देन रात्रिनिष्ठाधिकरणत्वमतिपाद्यते तस्य निरूपकता सम्बन्धेन गमधात्वर्थ-क्रियायामन्वयेनरात्रिनिष्ठाधिकरणत्वनिरूपकमेककर्तृकं वर्त्तमानकालिकङ्ग-मनमितिबोधो भवति प्रकृते तु रात्रिभिन्नमप्यहोरात्रिरूपमेव सम्पन्नमित्यर्थः प्रतीयत इति भावः। आपत्यस्य च तद्धिते नातीतिसूत्रेण क्राच्योश्चेत्यस्यान्य-था सिद्धिनिरासायाह। नेञन्तादिति। अनेन। यदीति शब्दोपादानेन अनुवा-दोऽयम्। क्रञ्वस्तियोग इतिसूत्रसिद्धच्विप्रत्ययानुवादोऽयम्। तेन। तत्सिद्धच्विप्र त्ययानुवादकरणेन। उन्मनीस्यादित्यादिसिद्धमिति। अयमेव योगो यदि च्विप्र-त्ययस्यापि विधायकः स्यात्तदास्य सूत्रस्य प्रातिपदिकानुवादेन प्रत्ययविधा यकतया ग्रहणपदे निषेधापत्तिरित्याह। अन्यथेति। क्रञ्वस्तीति सूत्रसिद्धप्र-त्ययानुवादत्वे तु तेन सूत्रेण सिद्धप्रत्ययानुवादेन लोपमात्रमनेन बोध्यते एव-च्च तदन्तविधिर्भवत्येव। अनुवादफलन्तु यत्र प्रत्ययस्तत्रैव लोप इति। विभा-षा सातिकार्त्स्न्ये। क्रञ्वस्तियोग इत्यनुवर्त्तते। कार्त्स्न्यमित्यं तद्व्याचष्टे। क्र-त्स्नमिति। यावत्स्वरूपं कार्त्स्न्यमत्र न विवक्षितमिति भावः। विधेयतया वि-वक्षितस्य सम्बन्धो यत्रोद्देश्यस्यावयवविशेषावच्छिन्नस्य प्रतीयते तत्राभिविधिः। सर्वावयवोपेतं तु कार्त्स्न्यमिति भेदः। न तु च्विरिति। सम्पूर्वकृपदधातुयोगे च्विप्रत्ययविधायकसूत्राभावेन न च्विरित्यर्थः। तदधीनवचने। निवृत्तमिति। अर्थान्तरोपादानमिह हेतुः। तदधीनन्तदायत्तन्तत्स्वामिकमित्यर्थः। तच्छ-ब्दोऽत्र स्वामिपरः। एवञ्च यत्रेप्सितव्यस्य स्वामिविशेषसम्बन्धोऽभिधित्सितस्तत्र स्वामिवाचकात्सातिर्भवति। राजाधीनङ्करोति राजसात्करोति राष्ट्रमित्यादा-वीप्सितव्यराष्ट्रस्य स्वामिराजसम्बन्धः प्रतिपाद्यते स च न दानविधिना क्रियत इति भवत्ययम्प्रत्ययः। एवमन्यत्रापि बोध्यम्। देये त्रा च। तदधीनवचन इत्य-नुवर्त्तते। देयमित्यत्राहार्थे क्रत्यः। एवञ्च तदधीनस्य देयस्य यत्र वचनन्तत्र-त्राप्रत्ययः स्यात्त्रकारात्सातिः। तदधीनेतिलुप्तकर्मषष्ठ्यन्तम्। विप्रत्रा करोति ग्राममित्यत्र स्वामिविप्रोद्देश्यक दानकर्मणो ग्रामस्य देयस्य विप्रसम्बन्धः प्रतीय-त इतिभवति त्राप्रत्ययः। एवञ्च दानविधिना दानविवक्षायामयं योगः प्रव-र्त्तते यथा कथञ्चिद्दानविवक्षायान्तु पूर्वेणेति विशेषः। स्वरादेराकृतिगणत्वा-च्चान्तस्याव्ययत्वम्। देवमनुष्यपुरु। इति च निवृत्तमिति। पूर्वसूत्रे चकारेण

साते: सम्बन्धाच्चानुकृष्टत्वोत्तरत्वेति परिभाषया तस्यासम्बन्धः। एवञ्च तदेकवाक्यतापन्नङ्भवस्तियोग इत्यपि निवर्त्तते। चाग्रहणन्त्वनुवर्त्तते। स्वरितत्वात्। एवञ्च क्रियावाचकधातुसामान्ययोगेऽयम्प्रत्ययो भवति। देवादिभ्यः प्रातिपदिकेभ्यः द्वितीया सप्तम्यर्थे चाप्रत्ययः स्यादिति फलितम्। जायते त्वयद्वितीयान्तात्सप्तम्यन्तात्। चान्तार्थस्य निरूपकतया क्रियायामन्वयः। देवचा गच्छति नमस्कारः। तण्डुलवा पचति। ग्रामत्रा वसतीत्यादौ गमनाद्यन्वयात्। अत्यन्तानुकरणाद्व्रजवरार्द्धादनितौ डाच्। पटपटाकरोपि। दमदमाकरोति। खरटखरटाभवति। खरटखरटास्यादित्युदाहरणपराकरग्रामाख्यात्। डाचः प्रत्ययादुदात्तत्वे नैवोदात्तत्वे सिद्धे चित्त्वं व्यर्थमत आह। डाचश्चित्त्वमिति। कर्षात्वत इतिसूत्रभाष्येति। तत्र हि किमर्थं क्रुषेर्विकृतस्य ग्रहणं क्रियते न क्रुषात्वत इत्येवोच्येत। यस्य क्रुषेर्विकरणे एतद्रूपन्तस्य यथा स्यात्। इह मा भूत्। हलस्य कर्ष इति। यस्य क्रुषेर्विकरण इत्यनेन विकरणान्तस्येदमनुकरणन्निर्दिष्टमित्युक्तम्। सङ्ख्यायाश्च गुणान्तायाः। क्रुषावित्यनुवर्त्तमादनेनापि क्रुषावभिधेयायाम्प्रत्ययः। अत्र सङ्ख्याशब्दः संख्यावाचकशब्दपरः। गुणशब्दः स्वस्वरूपपरः। अर्थगतस्त्रीत्वस्य शब्देः आरोपः। एवञ्च संख्यायागुणान्तत्वन्न सम्भवतीत्यतोऽचान्तशब्दः परसमीपवाची। एवञ्च संख्यावाचकशब्दपूर्वपदकगुणशब्दोत्तरपदकात्प्रातिपदिकादिति फलितम्। समयाच्च यापनायाम्। कर्तुं योग्यस्यार्थस्य कालप्राप्तिः समयः। तस्यातिक्रमणं यापना। समयशब्दाद्यापनायाङ्गम्यमानायां डाच्प्रत्ययः स्यात्। तथा च समया करोतीत्यनेन यस्य पाकादेर्यः कालस्तमतिक्रम्य यस्तिष्ठति स एव उच्यते। सपत्ननिष्पत्तात्। अतिव्यथने गम्यमाने सपत्ननिष्पत्तादयम्प्रत्ययः। अतिव्यथनमतिपीडनम्। सत्यादशपथे। सत्यशब्दादशपथेऽर्थे डाच्। अनृतप्रतिपत्तिवचनसत्यशब्दादयम्प्रत्ययो भवति। तथैव विब्रुवोति। सत्सु साधुसत्यमिति॥

इति प्रतिकृत्याद्यर्थकाः।

इति तद्धितविकरणम्।

श्रीगणेशायनमः ।

सर्वस्य हे । इदं सूत्रमधिकारसूत्रञ्च तु विधिसूत्रम् । विधेयविशेषानिर्देशात् । अधिकारत्वेऽपि न शब्दस्याधिकारः । नित्यवीप्सयोरित्युत्तरसूत्रेषु प्रवृत्तेषु द्विशब्दस्य कार्यस्यादर्शनात् । किन्त्वर्थाधिकारः । एवञ्च संख्येयस्योपस्थितिर्भवति । अत एव तस्य परमाङ्गेडितमिति सङ्गच्छते । अधिक्रियमाणः सर्वशब्दः सर्वावयवकसमुदायपरः । स च वाक्यधातुरूपोऽपि सम्भवतीति तद्व्यावृत्त्यर्थम्पदस्येत्यस्यापकर्षे आवश्यक इति सर्वस्येति किमर्थमित्यभिप्रायेण शङ्कते । न चेति । समाधत्ते । द्वितीयेति । पदस्येत्यस्यैकस्य सत्त्वेऽपि सर्वस्येत्यस्य स्थानषष्ठीत्वङ्कल्पतेति भावः । अन्यथा । सर्वस्येत्यस्याभावे । तेन । सर्वस्येत्यस्य स्थानषष्ठीत्वेन यद्वातेन । सर्वस्य पदस्य स्थानेइत्यर्थस्वीकारेण । ननु पुनःपुनः शब्दस्य कालवाचकतया ततः स्वञि कथम्पुनः रुत्पत्तिप्रतीतिरत आह । तच्च हीति । भवितरि वर्त्तमानादिति । वृत्तिविषये लक्षणया तच्च वर्त्तमानादित्यर्थः । ठञ् तु कालवाचकादेव । अन्तरङ्गत्वात्सुपीति । प्रातिपदिकार्थमात्रापेक्षत्वेनान्तरङ्गत्वात् । लुक्त्वाच्चेति । चेनान्तरङ्गत्वादित्याक्षपते । अव्ययात्सुपो लुकीति । अनेन समासग्रहणञ्चतनियमस्य प्रवृत्तियोग्यता सूचिता। स्वोक्तनियमस्यापि प्रवृत्तिन्दर्शयति । स्वातन्त्र्याणापीति । ननु कार्यकालपक्षे स्यानिन एव कथम्प्रातिपदिकत्वमप्रत्यय इतिनिषेधस्य सत्त्वादत आह । निषेधाप्रवृत्त्येति । न ङिसम्बुद्ध्योरिति सूत्रेण तथा ज्ञापनादिति भावः । सर्वस्येत्यस्य स्थानषष्ठीत्वेऽपि पूर्वोक्तरूपस्य कथं सिद्धिः । पुनरित्यस्य सुबन्तस्य स्थानितया तस्या स्थाने य आदेशस्तस्मिन्सुबन्तत्वसत्त्वेऽपि प्रातिपदिकत्वस्य दुर्लभत्वात् । पुनःशब्दप्रकृतिकत्वविशिष्टसुबन्तत्वस्याश्राव्यतया तस्यातिदेशासम्भवाच्चेत्याशयेन शङ्कते । न चैवमिति । समाधत्ते पुनरिति । आदेशोत्तरम्पुनःपुनरितिसमुदायस्य प्रातिपदिकसंज्ञायाम्पुनः सुवुत्पत्त्या प्रातिपदिकप्रकृतिकसुबन्तत्वं सुलभमिति भावः । प्रत्ययग्रहणपरिभाषायां यस्मादित्यस्यसत्त्वेन प्रकृतेरुपादानात्प्रातिपदिकप्रकृतिकसुबन्तत्वस्यापि श्राव्यतयाऽतिदेशेनैतल्लाभाच्च तद्धितविधौ सुवित्यस्य विशिष्यानिर्देशात्प्रातिपदिकप्रकृतिकसुबन्तादित्यर्थस्य शब्दमर्यादया न लाभ इत्याशयेनाह । यद्वेति । ननु पुनर्पुनरिति-

समुदायस्यादेशत्वे वल्लसादाविव प्रकृतिप्रत्ययविभागसम्मोहेन पुनर्पुनरित्यस्य सुबन्तत्वालाभ इति पदत्वन्नस्यादितिपदान्तकार्यालाभ इत्याशङ्कावारणायाह। तत्र द्विराहृत्तेति। अनस्तमितेति। अनस्तमितोऽवयवभेदो यत्र तस्येत्यर्थः। अग्ने अग्ने इत्यादाविति। आदिना पुनःपुनरित्यस्योग्रहः। पूर्वरूपादीति। आदिना विसर्गस्योङ्ग्रहः। एतेन। अनस्तमितावयवभेदसमुदायस्यादेशत्वकल्पनेन। अत एव। तादृशस्यादेशत्वादेव। अखण्डपदे। अस्तमितावयवभेदसमुदाये। एतादृशादेशस्य स्वीकारेऽवयवविषयकापेक्षा बुद्धिस्थत्वेन तया द्वित्वस्य जननाद्वित्वस्यैकत्वबाधकतयाऽऽमेकान्तरमितिसूत्रस्य प्रवृत्तिर्न स्यादत आह। समुदायस्यापीति। द्विःप्रयोगपक्षेऽप्युक्तदोषमपरिहरति। कस्कादिष्विति। न च द्विःप्रयोगपक्षे हृच्चमिति मान्तस्य द्विरुच्चारणेऽपि स्यान्नादेशभावाभावात्तु प उभयत्र श्रवणप्रसङ्ग इति वाच्यम्। पूर्वोच्चारणसहितद्विरुच्चारणस्य विधेयत्वात्। तत्र प्राप्ताप्राप्तविवेकेन समुदायोच्चारणे तात्पर्येण समुदायस्य प्रातिपदिकत्वात्तदवयवसुपो लुक् सिद्धेः। अन्य इति। द्वे इत्यस्यानन्तरमुच्चारणे इत्यस्य शब्दस्याध्याहारेण सर्वस्य पदस्येत्यनयोः कर्मधारयत्ववादिनः। न च द्विःप्रयोगपक्षेऽपि पचसि पचसि देवदत्तेत्यत्रैकपदान्तरितत्वस्य कथं सिद्धिरिति वाच्यम्। तावेव सुप्तिङौ यौ ततः परौ सैव प्रकृतिरादा समुदायपदत्वमेतेनेति भाष्योक्तरीत्या समाधानात्। समुदाये वाक्यसमाप्तिस्वीकारात्। द्विःप्रयोगादेव वृष्टिर्वृष्टिरिति समुदायस्याखण्डपदत्वाभावाखण्डत्वञ्च भवति। स्यादेर्द्विर्वचनत्वपक्षे तु अनस्तमितादेशत्वकल्पनयैव सा वारणीयेति गौरवम्। तथा च द्विःप्रयोगपक्ष एव लघुत्वादुचितः। ननु पदस्येत्यस्यापकर्षे प्रपचतीत्यस्य द्विर्वचनं न स्यादत आह। प्रपचतीति। सगतिग्रहणञ्च कर्तव्यमिति हि प्रकृतसूत्रे वार्त्तिकम्। नित्यवीप्सयोः। व्याख्यानादिति। प्रकृतसूत्रे इह कस्मान् न भवति हिमवान्वाडवः। नैष दोषः। अयन्नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु वर्त्तते। तद्यथा। नित्या पृथिवी। नित्यमाकाशमिति। नित्या पृथ्वीति तु पृथ्वीविकाराणाङ्घटपटादीनामनित्यत्वेऽपि पृथ्वीतिव्यवहारस्य नित्यत्वात्पृथिव्यानित्यत्वेन। अस्याभीक्ष्ण्ये वर्त्तते। नित्यप्रहसितो नित्यप्रजल्पित इति। तद्य आभीक्ष्ण्ये वर्त्तते तस्येदङ्ग्रहणमिति भाष्यमूलकव्याख्यानादित्यर्थः। ननु नित्यशब्दस्या-

भीक्ष्णार्थकत्वे कैयटविरोध इत्याशङ्कते । नन्विति । मानाभावादिति । तादृशभेदे मानाभावादित्यर्थः । शब्दशक्तिस्वभावादिति । तथा च येषामाधान्ये न क्रियाप्रतिपादकता तेषान्द्विर्वचनभवतीति सिद्धम् । तत्र शङ्कानिवारणायाह । हिरुगादीनामिति । वीप्सापदार्थश्च द्रव्याणां गुणक्रियाद्रव्यैः सम्बन्धेच्छा व्याप्तुमिच्छा वीप्सेति व्युत्पत्तेः । ग्रामो ग्रामो रमणीयः । वृक्षं वृक्षं सिञ्चति । वृक्षो वृक्षः पर्णवान् । जलञ्चलञ्चोलमित्युदाहरणानि । सा च वीप्सेहैश्यनिष्ठा विधेयव्याप्यता यथा यथन्तेषु द्रष्टव्या । अत्रेदम्बोध्यम् । यत्र द्रव्यस्य व्यापकत्वविवक्षा तत्रोक्तोदाहरणे भवति । क्रियावाचकशब्दाध्याहारेण तरुकर्तृकभवनक्रियायामेव व्यापकत्वमन्वयं वक्ष्यति । अभावस्य च व्यापकता यत्र तत्र गजत्वेन मौक्तिकमित्यादौ मौक्तिकसत्ताभावे गजव्यापकत्वस्याधितमिति गजव्यापकाधिकरणतावच्छेदकमौक्तिकसत्ताभाव इति बोधो बौद्धप्रतियोगिप्रसिद्ध्योपपादनीयः । स चाभावोऽधिकरणतायां गजव्यापकत्वरूपविशेषणाभावलक्षतः । वक्षौ वक्षौ न शैत्यमित्यादौ तु विशेष्याभावलक्षत एव । यत्र तु ब्राह्मणो ब्राह्मणो विद्वानित्यादि प्रयुज्यते तत्र ब्राह्मणत्वव्यापकत्वस्याधितमत एतेषु ब्राह्मणादिपदानाम्बुद्धिस्थ ब्राह्मणादिषु लक्षणा । यत्र यत्पदार्थवीप्सया यत्र यत्र धूमस्तत्राग्निरिति प्रयुज्यते तत्र तत्पदे वीप्सां विनाऽपि तत्पदेन तेषाम्पर्वतादीनाम्परामर्शात्तत्तद्धर्मिव्यापकतायाः पर्यवसानम् । कारकत्वेद्विजानीपाव्यां याम्मन्येत सा भवेदित्यत्रकथितत्वेति सूत्रभाष्यात् । क्वचित्तु स्पष्टप्रतिपत्त्यर्थन्तत्पदेऽपि व्यापकत्वविवक्षया द्विर्वचनं क्रियत एव यां यामिग्रः प्रैक्षतकातरार्त्ती सा सा क्रिया नस्रसुखी बभूवेत्यादौ यथा । परेर्वर्जन इतिसूत्रं व्याचष्टे । वर्जनद्योतकस्येत्यर्थः । तत्त्वासम्भव इति । वर्जनद्योतकत्वस्यासम्भव इत्यर्थः । अत एव । समासवाच्यस्यार्थस्य प्रकाशने द्योतकापेक्षाभावादेव । यत्तु परेर्वर्जन इति सूत्रस्थ वर्जनमात्रार्थकस्य परेर्हि भवत इत्यर्थं व्याख्याय समासे हार्थत्वान्न परेर्हिवचनमर्थाधिक्यस्य समासे क्लृप्तत्वादिति तन्न । तादृशार्थस्य सूत्राक्षरमर्यादयाऽलाभात् । वाक्यादेरामन्त्रितस्य । असूयादिविषये वाक्यादेरामन्त्रितस्य द्वे भवतः । असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात्तयोस्सूत्रे उपादानं व्यर्थमित्याशङ्कावारणायाह । विनापीति । तदुक्तभाष्ये । साक्षृतेः पाणिनिभिर्घृन्ति

गुरवो न विषोच्चितैः । लाघनार्थिनोदोषास्ताडनार्थिनो गुणा इति। एकम्बहुव्रीहिवत् । एक इत्यत्राऽपि बहुव्रीहिवद्भावः स्यादतः प्रकरणप्राप्तस्य द्वे इत्यस्य प्रकृतसूत्रेऽपि सम्बन्धस्तेन द्विरुक्त इत्यर्थलाभेऽपि कस्मिन्नर्थे द्विर्वचनमित्याकाङ्क्षायामाह । वीप्साविषय इति । नित्यवीप्सयोरित्यस्य सम्बन्धात् । तत्राभीक्ष्ण्यस्यासम्भवाद्वीप्सायामित्यस्य परिशेषाल्लाभ इति भावः । एवञ्च द्विर्वचनन्नित्यवीप्सयोरित्यनेनैव । अनेन सूत्रेण तु बहुव्रीहिवद्भावमात्रस्य विधानमिति तत्त्वम् । परोक्तङ्खण्डयति । अनेनैवेति । एतदपवादत्वानापत्त्येति । एतस्यैव सूत्रस्य द्विर्वचनविधायत्वे पूर्वसूत्राप्राप्तिविषय एवानेन द्विर्वचनम्भवेत् तथा चावीप्सायां द्विर्वचनं शस्प्रत्ययविषये त्वनेनाद्विर्वचनमिति विषयभेदादेतदपवादः शस् न स्यात् नित्यवीप्सयोरितिसूत्रसिद्धद्विर्वचनविषय एव बहुव्रीहिवद्भावेऽपि विशेषमाह । अत्रेदमिति । वस्तुतस्तु एकाच्च प्राचामितिनिर्देशेन यत्र द्विर्वचनन्तत्रैव बहुव्रीहिवद्भाव इति द्वे इत्यनुवृत्तिरुत्तरार्थैव । ननु बहुव्रीहिवद्भावफलनिरूपणावसरे सुब्लोप एवोक्तस्तथा च समुदायस्य कथम्प्रातिपदिकत्वमत आह । अत्रेति । ननु बहुव्रीहिसमासे यथा गोस्त्रियोरिति ह्रस्वो भवति तथात्रापि स्यादित्येकैकया आवृत्त्या इत्यत्रापि स्यादत आह । गोस्त्रियोरितीति । उपसर्जनार्थनिमित्तत्वादिति । बहुव्रीहिवदित्यनेन सप्तम्यन्ताद्वतिना निष्पन्नेन कार्यस्यैवातिदेशादिति भावः । उक्तार्थानामिति न्यायमाश्रित्य शङ्कते । न चात्रेति । कटोऽपि कर्मभीष्मादयोऽपीति पक्षे यथा कटत्वविशिष्टनिष्ठकर्मत्वस्य कटपदोत्तरद्वितीययोक्तत्वेऽपि भीष्मत्वविशिष्टनिष्ठकर्मत्वस्यानुक्तत्वाद्भीष्मपदाद्वितीया भवति तथात्रापि व्याप्तिविशिष्टनिष्ठविभक्त्यर्थस्यानुक्तेर्भवति सा विभक्तिरित्याशयेनाह । व्याप्तीति । न चैकैकयेत्यत्रोत्तरपदेऽपि सर्वनाम्नो वृत्तिमात्र इत्यनेन पुंवद्भावः स्यादिति वाच्यम् भस्त्रैषायाञ्जाहेति लिङ्गेन पूर्वस्यैवेट्स्मित्युक्तत्वात् । आबाधे च । नन्वनेन यत्र द्विर्वचनन्तत्राऽपि बहुव्रीहिवद्भावातिदेशेन न करोति । सुसुजागर्त्तीत्यत्र नञ्सुभ्यामित्यन्तोदात्तत्वापत्तिः । तथा ऋक् ऋक् पू पूरित्यत्र ऋक्पूरितिसमासान्तस्य चापत्तिरिति चेन्न । नञ्सुभ्यामित्यत्र वर्णसमास इत्यतः सिंहावलोकनन्यायेन समासग्रहणं सम्बध्यते तेन बहुव्रीहेर्विशेषणात् स्वरो न भवति।

समासान्तविषयेऽपि न दोषः । समासाच्च तद्विषयादित्यतः समासग्रहणं बहुव्रीहौ संख्येय इतिसूत्राद्बहुव्रीहिग्रहणञ्च ऋक्पूरितिसूत्रे सम्बध्य तयोश्च विशेषणविशेष्यभावेन ऋगादन्तबहुव्रीहिषु समासादकारप्रत्ययो भवतीति वाक्यभेदेन व्याख्यानात् । न चननेत्यत्र बहुव्रीहिवद्भावान्नलोपः स्यादिति वाच्यम् । नलोपो नञ इतिसूत्रे वर्णं समास इत्यतः समासग्रहणस्य सत्वन्यायेनानुवृत्त्या सम्बन्धकल्पनेनादोषात् । यदि च द्विवचननिष्पन्न समुदायस्य बहुव्रीहिवद्भावेऽपि समासचरमावयवत्वावच्छिन्नरूढस्योत्तरपदस्य मुख्यसमासचरमावयवत्वावच्छिन्नबोधकत्वमेवेति नोत्तरपदनिमित्तककार्यप्रवृत्तिरित्युच्यते तदा न दोष इति के चित्तन्न गतगतेत्यत्र पुंवत्वानापत्तेः । कर्मधारयवदुत्तरेषु । भाष्यप्रामाण्यादिति । कर्मधारयत्वे कानि प्रयोजनानि । कर्मधारयत्वे प्रयोजनानि सुब्लोपपुंवद्भावान्तोदात्तत्वानि । पटुपटुः । पटुपटुरिति हि भाष्ये उक्तम् । अत एव । अनुदात्तङ्चेत्यस्यानुपस्थितेरेव । प्रियादिष्विति । प्रियप्रिया । मनोज्ञमनोज्ञा । चपलचपलेत्यादौ । अत्र प्रकारे गुणवचनस्येति द्विर्वचनम् । एवञ्च आब्बाधायां प्रियादीनां यत्र द्विर्वचनन्तत्र पुंवद्भावस्याप्रवृत्तिरेव । भाष्यप्रामाण्यादिति । नन । सुसु । इत्यत्र स्वरातिप्रसङ्गशङ्कासमाधानयोः करण परभाष्यप्रामाण्यात् । अत एव । बहुव्रीहिप्रयुक्तस्वरस्य तत्रानिष्टत्वादेव । प्रकारे गुणवचनस्य । प्रकारे वर्त्तमानस्य गुणवचनस्य द्वे भवतः । व्याख्यानादिति । प्रातसूत्रभाष्ये अग्निर्माणवकः । गौर्वाहीक इत्यत्रातिप्रसङ्गमाशङ्क्य गुणवचनग्रहणस्य प्रकृत्यर्थविशेषणत्वेन समाधाय साहश्यमूलाभेदेन वर्त्तमानानां सर्वेषामेव गुणवचनत्वमिति शङ्कायांगुणवचनग्रहणसामर्थ्यादेवं विज्ञास्यामः प्राक् प्रकाराद्यो गुणवचन इत्युक्तन्मूलकव्याख्यानादित्यर्थः । स्वमतमाह । प्रकार इति । वार्त्तिकेषु । आनुपूर्व्य इत्यादिषु । न चैतद्वार्त्तिकोदाहरणेषु मूले मूल इत्यादिषु वीप्सायामेव द्विर्वचने सिद्धे वार्त्तिकवैयर्थ्यमिति वाच्यम् । एकमेव हि मूलं भवति अन्येषान्तूपरितनभागापेक्षया गौणो मूलव्यपदेश इति तुल्यरूपाणां यत्र व्याप्यत्वविवक्षा तत्रैव तेन द्विर्वचनविधानात् । अग्रे अग्रे सूक्ष्मा इत्यत्राप्येवमेव बोध्यम् । यत्र तु तुल्यरूपाणामेव निवक्षा तत्र तेनैव द्विर्वचनम् । यथा मूले मूले पथि विटपिनां स्वैरिणीनान्निवास इत्यत्र । संभ्रमेणेति

वचनघटकं संभ्रमपदार्थमाह । संभ्रम इत्यादि । अत्र भाष्ये चापले इे भवत इति वक्तव्यम् अहिरहिर्बुध्यस्व बुध्यस्वेति प्रतिपादितम् । आशु-प्रतिपादनस्यापलस्यच संभ्रमस्थले भवतीत्याशयेन संभ्रमेणेत्यादुक्तम् । अत एव । लोप्ये वेति नियमस्वीकारादेव । अत एव । उक्तनियमादेव । तद्यो तत्रे । क्रियासमभिहारस्यौत्तरे० विशेषमाह । भृशार्थ इति । न शास्त्रीयद्वित्व-मिति । यदि तु चापलविवक्षा तदा शास्त्रीयमपि सम्भवत्येवेति बोध्यम् । क्र-मेण्यतिहारे सर्वनाम्नो द्वे वाच्य इति पृथग्वाक्यम् । अत्र कर्मशब्दः क्रियापरः । तेन यङ्लुबन्तदाह । क्रियाविनिमय इति । क्रियाविनिमयश्च परस्परकरणरूपः । यद्यप्यत्र सर्वनाम्न इति सामान्यत एवोक्तम् । तथापि प्रकृतवार्त्तिकव्याख्यान-परभाष्येऽन्येतरशब्दयोरुदाहरणत्वेन प्रदर्शनात्परस्परापेक्षेति प्रयोगदर्शना-च्चान्यपरेतरशब्दविषय एवेदङ्क्रियाविनिमयविवक्षायाञ्चित्यद्विर्वचनविधाय-कम् । एतदभिप्रायेण वक्ष्यति । अन्यपर इत्यादि । समासवद्भावस्यैवेति । समा-सवच्च बहुलमिति वाक्यान्तरेण तस्यैव बहुलमप्रवृत्तिबोधनात् । तत्रापि वेति-वक्तव्ये बहुलशब्दोपादानेन यङ्लुबन्तदाह । अत एवेति । अत एव । बहुलग्र-हणादेव । परशब्दस्य द्विर्वचने तत्र समासवद्भावाभावे च प्रमाणमाह । परस्प-रशब्द इति । कर्मव्यतिहारः स्फुट एवेति । अन्योन्यादिपदानां समभिव्याहृतप-दार्थतावच्छेदकावच्छिन्नमर्थः । एवञ्चान्योन्यं विप्रान मन्त्रीत्यादौ समभिव्याहृ-तपदार्थतावच्छेदकं विप्रत्वन्तदवच्छिन्नमन्योन्यशब्दार्थः । द्वितीयार्थः कर्मत्व-न्तस्मिन् प्रकृत्यर्थस्याधेयतयाऽन्वयः । तस्य निरूपकतासम्बन्धेन धात्वर्थफलेऽ-न्वयः । फलञ्च प्रकृते स्वविशेषकाश्रयसृष्टत्वप्रकारकबोधात्मकम् । फलस्य चापर-धात्वर्थव्यापारे अनुकूलत्वसम्बन्धावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्योभय-सम्बन्धेनान्वयस्तदन्वितस्य व्यापारस्य च विप्रान्विताख्यातार्थकर्तृविशेष्यतया भानमिति विप्रवृत्तिकभेदनिरूपकापसृष्टत्वप्रकारकबोधानुकूलस्वाश्रयबोधा-वच्छिन्नप्रतियोगिताकभेदसमानाधिकरणो विप्रकर्तृको व्यापार इतिशाब्दबो-धः । फलनिष्ठाऽवच्छेदकता च फलतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या । स च प्रकृते तत्तद्व्यापारानधिकरणवृत्तित्वविशिष्टसमवाय इतिसर्वसामञ्जस्यम् । यत्र तु समभिव्याहृतपदार्थतावच्छेदकस्य द्वित्वन्देवदत्तयज्ञदत्तावस्योन्यञ्चप्र-

तुरित्यादौ तत्रान्योन्यपदाद्देवदत्तत्वावच्छिन्नस्य यज्ञदत्तत्वावच्छिन्नस्योपस्थितिः। फलप्राणवियोगः। फलतावच्छेदकसम्बन्धस्य तत्तद्व्यापारानधिकरणवृत्तित्वविशिष्टाश्रयत्वमिति देवदत्तवृत्तिकर्मतानिरूपकप्राणवियोगनिष्ठफलतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकताकभेदसमानाधिकरणस्तादृशप्राणवियोगानुकूलो यज्ञदत्तवृत्तिकर्मतानिरूपकप्राणवियोगानुकूलस्तादृशप्राणवियोगावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणो व्यापारो द्वित्ववद्देवदत्तवज्ञदत्तकर्तृको भूतानद्यतनकालिक इतिशाब्दबोधः। एवमेवान्योन्यादिशब्दप्रकृतिकविभक्त्यन्तरस्थलेऽप्यूह्यम्। यत्र तु चत्रिया अन्योन्यस्य धनञ्जयहरिति प्रयोगस्तत्रान्योन्यशब्दप्रकृतिकषष्ठ्यर्थस्वत्वेऽन्योन्यपदार्थस्य समभिव्याहृतपदोपस्थाप्यचत्रियत्वावच्छिन्नस्य चत्रियत्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदविशिष्टनिरूपितत्वविशिष्टाधेयतासम्बन्धेनान्वयः। यत्र तु समभिव्याहृतपदार्थतावच्छेदकस्य नानात्वन्तत्र समभिव्याहृतपदार्थतावच्छेदकावृत्तिपदार्थाभावावच्छिन्नन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदविशिष्टनिरूपितत्वविशिष्टाधेयतासम्बन्धेन प्रकृत्यर्थस्य स्वत्वेऽन्वयः। स्वन्यूनवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वमेव तादृशस्वत्वस्य च नामार्थं इतिरीत्याग्रेऽपि। इतरेतरपरस्परशब्दस्य यत्र प्रयोगस्तत्राप्येतयोरन्योन्यशब्दसमानार्थत्वादेवमेव शाब्दबोध इति दिक्। नन्वितरशब्दे चेत्समासवद्भावस्तदा कथं स्वौभावादिकार्यमत आह। इतरेतरेषामित्यादाविति। उक्तरीत्येति। इयोरपि सुपोर्लुकि चरमेतरशब्दस्य सर्वादिपठितत्वेन तदन्तस्य सर्वनामत्वात्सर्वनामकार्यमिति। अन्तोदात्तार्था। समासस्येत्यन्तोदात्तत्वप्रवृत्त्यर्थाः अन्यपरयोस्तु समासवद्भावाभावादाम्बेडितानुदात्तत्वभवत्येव। न चैतरशब्दस्य समासवद्भावविधानाद्द्वयोरपि सुपोर्लुकि विशिष्टादुत्पन्नस्य सुपः समुदायप्रकृतिकतयोत्तरपदस्थत्वाभावेन कथमितरेतरमिमे ब्राह्मणौ भोजयतः। इतरेतराभोजयतः। इतरेतरमिमे ब्राह्मणकुले भोजयतः। इतरेतराभोजयत इत्यस्य सिद्धिरिति वाच्यम्। उत्तरपदस्थाया इत्यस्योत्तरपदोत्तरं श्रूयमाणाया इत्यर्थेनादोषात्। मूले अन्योन्यमित्यत्राऽऽडतरादिभ्य इदङ्प्राप्त इत्युक्तम् तत्रेदम्बोध्यम्। ऽतरादिभ्यः पञ्चभ्यः परयोरित्यर्थे तस्य प्राप्तिः यदि तु ऽतरादिभ्यो विहि-

विहितयोरित्यर्थं आश्रीयते तदा तु तस्याप्राप्तिरेवेति । वार्त्तिकेषु कर्मधारयवदित्यस्य सम्बन्धेन सिद्धे समासवद्भावविधानं व्यर्थमिति तु न शङ्क्यम् । चापले इे वाच्य इतिवार्त्तिकेनान्यामन्याम्परस्परामित्यादौ प्रियसखीनामाशुप्रतिपादनविवक्षायां हित्वे कर्मधारयवद्भावे पुंवद्भावापत्तेः । दलहय इत्यस्य समासवद्भाव एव प्रवृत्तिरिति भ्रमनिवारणायाह । तदभावे चेति । सर्वनाम्न इतीति । समासवद्भावविधानेन वृत्तित्वसत्त्वादिति शेषः । ननु पूर्वेत्यन्यपरयोर्न समासवदित्युक्तमिति समासे सोरलुगित्यनुपपन्नमत आह । कृतद्वित्वस्येति। एतादृशान्येवोदाहरणानि मूले प्रदर्शितानि । इदमिति । मूलोक्तस्वचुलग्रहणप्रयोजनमित्यर्थः । भाष्यकारसम्मतपक्षाभिप्रायेणाह । डतरादिसूत्र इति । ननु स्वादेशविधानसामर्थ्यादेव लुङ् भविष्यतीत्यत आह । स्वादेशेति । ननु यद्यन्योन्यशब्दे पूर्वपदे सुभावस्तदाऽन्यान्यप्रादुर्भावादिति प्रयोगानुपपत्तिरत आह । अन्यान्येति । स्पष्ट एवेति । अन्यस्यान्यस्य प्रादुर्भावादिति तस्यार्थात् । अकृच्छ्रे प्रियसुखयोः । तदर्थकयोरिति । अकृच्छ्रार्थकयोरित्यर्थः । अनयोरकृच्छ्रार्थकत्वं लक्षणया । यस्य दाने क्लेशसम्भावना तत्रैव तदभावप्रतिपादनमेवङ्घनस्य फलम् । यथा स्वे यथायथमिति रूपं साधु भवति । मूलेऽव्ययीभावः। यथा शब्दो वीप्सायाम् । स्वशब्दस्तु प्रकृते आत्मात्मीयान्यतरवाची । एवञ्च देवदत्तयज्ञदत्तविष्णुमित्रेषु यथायथन्तत य आशिषश्च सन्तिति यत्र प्रयोगस्तत्रात्मीयवाची स्वशब्दो ग्राह्यः । यो य आत्मीयस्तत्रेत्यर्थे स्वस्मिन् स्वस्मिन्निति यथा स्वमितिवीप्सायामव्ययीभावः । नाव्ययीभावादित्यम् । यथायथं ज्ञाता इत्यत्र यथा शब्द आत्मवाची । स्वस्य स्वस्य आत्मनो ज्ञाता यथा स्वं ज्ञातेत्यर्थः । अत्र यथा शब्दस्य वीप्साबोधकतयाऽनेनैव वीप्साप्रतिपादनान्नित्यवीप्सयोरिति द्विर्वचनाप्राप्तेः प्रकृतसूत्रेण तन्निपात्यते । वृत्तं वृत्तं सिञ्चतीत्यत्र वीप्सायां विवक्षायां वृत्तशब्दस्य द्विर्वचनेन वीप्साप्रतीतिस्तथा प्रकृते न सम्भवति। वृत्तत्वविशिष्टो यथा वृत्तशब्दार्थस्तथात्र वीप्सा यथा शब्दस्यार्थः वीप्सायाश्च वीप्सा न प्रतीयते तदेतदुक्तं वीप्सायां यथा शब्दस्याहत्तेरिति । क्लीबत्वञ्चेतीति । अत्र क्लीबत्वं समुदायस्य निपात्यते न तु यथाशब्दस्यैव तेन समुदायस्य कृत्वत्वञ्च तु पूर्वस्य । अव्ययत्वाभाव इति । यथायथशब्दस्येति शेषः । यथायथ-

शब्दार्थस्य ज्ञातेत्यत्र या ज्ञानक्रिया तन्निरूपितकर्मत्वात्कर्तृकर्मणोरिति ष-
ष्ठीप्राप्तिशङ्कावारणायाह । ज्ञातेत्यस्येति । अव्ययत्वाभावफलमाह । इत्यर्थ इति ।
यथा स्वरूपमिति । एतेनैतादृशार्थविवक्षायामालवाचकस्वशब्देन यथा स्व-
शब्दे समास इति बोधितम् । वृत्तिकारोक्तमनुवदति । ज्ञाता इति । इन्द्वं रहस्य-
मर्यादावचन । एतेष्वर्थेषु विषयभूतेषु इन्द्वमिति निपात्यते । एतेषामर्थानां
विषयता च स्वघटितवाक्यजन्यशाब्दबोधविषयतया । तत्र रहस्यार्थस्य वाच्य-
त्वेन विषयत्वं स्पष्टमेव । अन्येषान्तु वाक्यप्रयोज्यज्ञानविषयत्वं ज्ञेयम् । ननु
नपुंसकत्वस्य निपातनमस्तु अव्ययत्वन्तूत्तरपदेत्यादाव्यत्वेन भविष्यतीत्यत आह ।
संज्ञात्वादिति । अव्ययस्य प्रत्यासत्त्या त्यदादिप्रकृतिकविभक्तिनिमित्तकतया प्र-
कृतस्य समुदायस्य सर्वादिपठितद्विशब्दान्तत्वेन सर्वनामत्वे सति तदग्राह्यन्त्य-
दादित्वं वाच्यन्तच्च न सम्भवति संज्ञात्वादिति भावः । द्विशब्दस्य नित्यद्विवच-
नान्तत्वेऽपि निपातितस्यास्य तथात्वाभावमाह । चेनेति । वृत्तौ स्पष्टमिति ।
रहस्यस्य इन्द्वशब्दवाच्यत्वन्तच्च स्पष्टमित्यर्थः । अभिव्यक्तिरर्थ एवमिति । इन्द्वे ति-
समुदायस्य वाच्य इत्यर्थः । शरत्प्रभृतित्वात् । चतुर्शब्दस्य शरदादिषु पाठात् ।
अत्र चतुर्शब्दश्चतुर्णाम्पूरणे वर्त्तते । तेनावतुर्यादिति सिद्धम् । अभिविध्यर्थ-
काङ्समभिव्याहारेण यल्लब्धन्तदाह । चतुर्यान्तमिति । ननु मिथुनीयन्तीत्यने-
न मिथुनकर्मकेच्छाया एव प्रतीतिर्न तु मिथुनत्वप्राप्तेरिति मिथुनङ्गच्छतीति
विवरणमयुक्तमत आह । फलितार्थेति । ननु प्रयोजयत्यन्तं सङ्गमतेऽपि चतुर्थ-
यन्तङ्गमनन्न वृत्तमत आह । स्वसाहित्येनेति । इन्द्वव्यञ्जनानि प्रयुनक्तीत्य-
स्य व्यञ्जि न्युब्लोक्तानि पाचाणि इन्द्वम्मयुनक्तीत्यर्थः । अभिव्यक्तिपदार्थं
व्याचष्टे । अत्यन्तसहचरितत्वं नेति । तेनेति । अत्यन्तसहचरितत्वमुपादानेनेत्य-
र्थः । युधिष्ठिरार्जुनयोर्लोकविज्ञातत्वेऽप्यत्यन्तसहचरितत्वाभाव इति भावः ।
सूत्रोक्तातिरिक्तविषयेऽपि इन्द्वमितीष्यते तत्सिध्यर्थं योगविभागादित्युक्तमूले ।
योगविभागस्य चेष्टसिध्यर्थत्वादतिप्रसङ्गो नाशङ्कनीयः किन्तु यत्र यत्र ष्यते ता-
न्युदाहरणानि स्पष्टप्रतिपत्तये प्रदर्श्यन्ते । इन्द्वं युद्वान्यवर्त्तन्ते तीति । एकशे-
षादिति । इन्द्वशब्दस्यैकशेषादित्यर्थः । नपुंसकत्वन्तु विशेष्यानुरोधात् । क्व
चित्तु स्वार्थे द्विर्वचनेऽपि पुंस्त्वम् । तदाह यथा चार्थे इन्द्व इति । योगविभा-

॥ श्रीः ॥

॥ चन्द्रकलोदाहारः ॥

शिवदेव्यास्तपोमूर्त्तेर्मातुः पादाब्जजन्मनः ।
पितुः श्रीहविश्वनाथस्य कर्णांल्लेह्यादरान् मुहुः ॥ १ ॥
ख्याते घटोद्भवकुले बुधलक्ष्मणाख्यः स्वर्णाद्यविप्रमुकुटो दृढधर्मनिष्ठः ॥
पुण्यप्रयागपरिषेवणपूतपूर्वोऽपूर्वस्तपस्तनुरभूदुचितैकचित्तः ॥ १ ॥
तत्पुण्यपुञ्जपरिपाकसुपूर्त्तिदक्षस्तत्सूनुराविरभवद्भवदेवमिश्रः ।
यो मानवासुकरकार्यगणैर्मनुष्यदेहोऽपि सूक्ष्ममतिभिर्भव एव मेने ॥ २ ॥
क्रीड़ोचिते वयसि काशिनिवासमेव तातं पुनःपुनरयाचत मातरं सः ।
तावाशु पुत्रमनुजग्मतुरात्मनोऽपि श्रेयस्करीं समवलोक्य महेशसेवाम् ॥ ३ ॥
संप्राप्य शम्भुनगरे पितृमातृपार्श्वे कालं कियन्तमतिवाह्य परेशभावम् ।
संप्राप्तयोरथ तयोरुचितं विधाय कृत्यं ततोऽभवदसावनृणोऽद्वितीयः ॥ ४ ॥
काले कियत्यथ गते मणिकर्णिकायां स्नात्वा व्रजन् पथि पिशङ्गजटा विभूतीः ।
रुद्राक्षमाल्यमपि धारयता द्विजेन वर्षीयसा कुलभवादिकमेष पृष्टः ॥ ५ ॥
दिव्याकृतिं शिवसमं पुरुषं समीक्ष्य सम्यक् स्वकीयकुलगोत्रभवादिदत्तम् ।
मूर्ध्ना प्रणम्य विनिवेदयति स्म तस्मै पित्रोर्वियोगकथने त्ववसन्नकण्ठः ॥६॥
दत्तस्तु पूर्णमधिकारमथास्य बाल्येऽप्यालोच्य चिज्जड़विवेचनचारुमन्त्रम् ।
दत्त्वैष यावदुपसीदति सद्गुरुं तं तावत्तिरोहिततनुर्भवति स्म तस्मै ॥ ७ ॥
ततः प्रभृत्येष समस्तवस्तुज्ञाता बभूवेति न तत्र चित्रम् ।
सर्वे महान्तो महिमानमात्रा मन्त्रप्रभावादिति हि प्रसिद्धम् ॥ ८ ॥

विद्वद्भ्यः स्वर्णभारान् ददतुलबलो दक्षिणाग्रामहेन्द्रो
द्रव्यं दत्वाऽपि यस्मै कनकमणिचयं पेशवा माधवाख्यः ॥
यद्विद्याबुद्धिपूजाकरणमलमदः स्वीयकोशेऽनवाप्य ।
मूर्ध्नोवाह स्वदत्तां मणिमयशिबिकां यस्य भूदेवमौलिः ॥ ९ ॥
तस्याङ्गजो निखिलनव्यनिबन्धवार्द्धेः सेतून् व्यधात् सुविहतीर्विपुला विपश्चित् ।
विद्याविवेकविनयैरपि ताततुल्यः सीताऽऽत्मजोऽपि भुवि भैरवमिश्रनामा ॥ १० ॥
मञ्जूषां भूषणं यो व्यहृणुत गहनं कौस्तुभं शब्दरत्नं
भाष्यं सोद्योतदीपं प्रतिपदमखिलान् शेखरद्वन्द्वमन्यान् ।
ग्रन्थाञ् श्रीविक्रमस्योदभवदगमदब्दे एकोनविंशे
शिष्यानध्याप्य भट्टान् व्यतनुत शतकेऽशीतिवर्षाऽधिकायुः ॥ ११ ॥
रसगोनगभूसंख्ये विक्रमार्कस्य वत्सरे ।
श्रावणस्य त्रयोदश्यां कृष्णायां सोऽत्यजत्तनुम् ॥ १२ ॥
यद्यप्यनेकबुधनिर्मितसन्निबन्धाः सन्त्येव ते तु न तथा विदुषामभीष्टाः ।
श्रीमिश्रभैरवकृताः कृतिकौशलेन पुण्येन चास्य शिरसा विधृताः सुधीभिः ॥ १३ ॥
दृष्ट्वाऽपि कांश्चन तदीयकृतेर्विशेषाञ् शेषावलोकनधियः सुधियः प्रयत्नात् ।
तत्पुस्तकानि विरलान्यनवाप्य नूनं क्लिश्यन्ति खिन्नमनसो मनसोऽनुरागैः ॥ १४
इत्यादि सम्यगवधार्य गणेशदत्तो धीमान् प्रपौत्र उदितस्य निबन्धकर्तुः ।
सर्वान् क्रमेण निजवंश्यकृतान्निबन्धान् संमुद्र्य लोकमपणीकयितुं प्रवृत्तः ॥ १५ ॥
पूर्वं स तद्विहृतिमिन्दुकलाभिधानां शब्देन्दुशेखरशिरोविधृतां जनानाम् । ॥
दुर्गासरःपरिसरस्थितकाशिकाख्ये यन्त्रेऽवरोप्य सकलां मुदमादधाति ॥ १६ ॥
ग्रन्थप्रणेतृकरशोधनलेखनादिसंपूज्यपुस्तकमवेक्ष्य विशोधितेऽस्मिन् ।
दृष्टिच्युतेर्मतिगतिस्खलनादिना वा यास्ताशुतीरपि विशोध्य पठन्तु सन्तः ॥ १७ ॥

नत्वा मनीषिचरणाम्बुजबुद्धिशुद्ध्यै संक्षिप्तमेव विनिवेदयतीतिवृत्तम् ।
काशीस्थकुम्भजनिपत्तनसन्निवासी विप्रो द्विवेदकुलसंभवरामनाथः ॥ १८ ॥
श्रीमिश्रभैरवविनिर्मितकार्यवर्ज्यं संग्राहकाभिधनिबन्धधृतान् मनोज्ञान् ।
श्लोकान् समीक्ष्य गुरुवक्त्रमुखाच्च किं चिदासाद्य यत्किञ्चितमस्तु शिवार्पणं तत् ॥ १९ ॥

गाभावे उक्तप्रयोगाणां कथं साधुत्वमत आह। एवं हि युद्धमर्यादेति। द्वयोर्द्वयोरेव युद्धधर्म्यश्च भवति। शब्दप्रयोग इति। पुरुषस्य सहनशीलता यत्र प्रतिपाद्यते तत्र शीतोष्णयोः सहप्रयोग एव दृश्यत इति। नव्युत्पन्न इति। शीत्र इति शेषः। तदाशयः। सूत्रकारस्याशयः। द्वन्द्वं रहस्येति सूत्रे कतिपयानामेवार्थानामुपादानादिति भावः॥

इति द्विरुक्तिप्रक्रिया।

शब्देन्दुशेखरव्याख्या तद्धितान्तस्य या कृता।
सा वै शम्भुतिथौ वर्षे खाष्टभूतीन्दुसम्मिते॥
आश्विनस्यासिते पक्षे भैरवेण समापिता।
अस्ति दौलतरायाख्यो राजराजोपरः कृती॥
तस्याश्रयजीविकेनैषाऽवन्तिकायाः प्रभुर्महान्।
यस्य प्रतापसिंहेन निरस्ताः शत्रुवारणाः॥
विदुषान्तु प्रमोदाय तेन तुष्यतु शङ्करः।

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डल-
प्रसारिविमलतरानवद्यसद्यशः पार्वणपीयूषभान्वगस्त्यकुलवं-
शावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायाञ्चन्द्र-
कलायान्द्विरुक्तिप्रक्रियान्तशब्देन्दुशेखर-
व्याख्यानं सम्पूर्णम्।